# Sanskrit Bible (NT)
# in Gujarati Script

New Testament in Sanskrit Language; printed in Gujarati Script

# Sanskrit Bible (NT) in Gujarati Script

## New Testament in Sanskrit Language; printed in Gujarati Script

copyright © 2018 SanskritBible.in

Language: Sanskrit

Contributor: SanskritBible.in

Thank you for your interest in Sanskrit Bible.
Sanskrit Bible (NT) is freely available in 22 different scripts of your choice. This edition is in Gujarati script and is based on the Sanskrit translation of the Holy Bible published by Calcutta Baptist Missionaries in 1851. Please visit SanskritBible.in to learn more about Sanskrit Bible and to download various free Christian literature.

This translation is made available to you under the terms of the Creative Commons Attribution Share-Alike license 4.0.
You have permission to share and redistribute this Bible translation in any format and to make reasonable revisions and adaptations of this translation, provided that:

- You include the above copyright and source information.
- If you make any changes to the text, you must indicate that you did so in a way that makes it clear that the original licensor is not necessarily endorsing your changes.
- If you redistribute this text, you must distribute your contributions under the same license as the original.

Pictures included with Scriptures and other documents on this site are licensed just for use with those Scriptures and documents. For other uses, please contact the respective copyright owners.
Note that in addition to the rules above, revising and adapting God's Word involves a great responsibility to be true to God's Word. See Revelation 22:18-19.

2020-01-01

PDF generated using Haiola and XeLaTeX on 11 Nov 2022 from source files dated 29 Jan 2022
e1290797-4477-53f0-873d-c9153a72fd01

Contents

Matthew . . . 1
Mark . . . 28
Luke . . . 45
John . . . 74
Acts . . . 96
Romans . . . 125
1 Corinthians . . . 137
2 Corinthians . . . 149
Galatians . . . 157
Ephesians . . . 161
Philippians . . . 165
Colossians . . . 168
1 Thessalonians . . . 171
2 Thessalonians . . . 174
1 Timothy . . . 176
2 Timothy . . . 179
Titus . . . 182
Philemon . . . 184
Hebrews . . . 185
James . . . 194
1 Peter . . . 197
2 Peter . . . 200
1 John . . . 202
2 John . . . 205
3 John . . . 206
Jude . . . 207
Revelation . . . 208

# મથિલિખિતઃ સુસંવાદઃ

I ઇબ્રાહીમઃ સન્તાનો દાયૂદ્ તસ્ય સન્તાનો યીશુખ્રીષ્ટસ્તસ્ય પૂર્વ્વપુરુષવંશશ્રેણી।
II ઇબ્રાહીમઃ પુત્ર ઇસ્હાક્ તસ્ય પુત્રો યાકૂબ્ તસ્ય પુત્રો યિહૂદાસ્તસ્ય ભ્રાતરશ્ચ।
III તસ્માદ્ યિહૂદાતસ્તામરો ગર્ભે પેરસ્સેરહૌ જજ્ઞાતે, તસ્ય પેરસઃ પુત્રો હિષ્રોણ્ તસ્ય પુત્રો ઽરામ્।
IV તસ્ય પુત્રો ઽમ્મીનાદબ્ તસ્ય પુત્રો નહશોન્ તસ્ય પુત્રઃ સલ્મોન્।
V તસ્માદ્ રાહબો ગર્ભે બોયમ્ જજ્ઞે, તસ્માદ્ રૂતો ગર્ભે ઓબેદ્ જજ્ઞે, તસ્ય પુત્રો યિશયઃ।
VI તસ્ય પુત્રો દાયૂદ્ રાજઃ તસ્માદ્ મૃતોરિયસ્ય જાયાયાં સુલેમાન્ જજ્ઞે।
VII તસ્ય પુત્રો રિહબિયામ્, તસ્ય પુત્રોઽબિયઃ, તસ્ય પુત્ર આસાઃ।
VIII તસ્ય સુતો યિહોશાફટ્ તસ્ય સુતો યિહોરામ તસ્ય સુત ઉષિયઃ।
IX તસ્ય સુતો યોથમ્ તસ્ય સુત આહમ્ તસ્ય સુતો હિષ્કિયઃ।
X તસ્ય સુતો મિનશિઃ, તસ્ય સુત આમોન્ તસ્ય સુતો યોશિયઃ।
XI બાબિલ્નગરે પ્રવસનાત્ પૂર્વ્વં સ યોશિયો યિખનિયં તસ્ય ભ્રાતૃંશ્ચ જનયામાસ।
XII તતો બાબિલિ પ્રવસનકાલે યિખનિયઃ શલ્તીયેલં જનયામાસ, તસ્ય સુતઃ સિરુબ્બાવિલ્।
XIII તસ્ય સુતો ઽબોહુદ્ તસ્ય સુત ઇલીયાકીમ્ તસ્ય સુતોઽસોર્।
XIV અસોરઃ સુતઃ સાદોક્ તસ્ય સુત આખીમ્ તસ્ય સુત ઇલીહૂદ્।
XV તસ્ય સુત ઇલિયાસર્ તસ્ય સુતો મત્તન્।
XVI તસ્ય સુતો યાકૂબ્ તસ્ય સુતો યૂષફ્ તસ્ય જાયા મરિયમ્; તસ્ય ગર્ભે યીશુરજનિ, તમેવ ખ્રીષ્ટમ્ (અર્થાદ્ અભિષિક્તં)
વદન્તિ।
XVII ઇત્થમ્ ઇબ્રાહીમો દાયૂદં યાવત્ સાકલ્યેન ચતુર્દશપુરુષાઃ; આ દાયૂદઃ કાલાદ્ બાબિલિ પ્રવસનકાલં યાવત્ ચતુર્દશપુરુષા
ભવન્તિ। બાબિલિ પ્રવાસનકાલાત્ ખ્રીષ્ટસ્ય કાલં યાવત્ ચતુર્દશપુરુષા ભવન્તિ।
XVIII યીશુખ્રીષ્ટસ્ય જન્મ કથ્યતે। મરિયમ્ નામિકા કન્યા યૂષફે વાગ્દત્તાસીત્, તદા તયોઃ સઙ્ગમાત્ પ્રાક્ સા કન્યા પવિત્રેણાત્મના
ગર્ભવતી બભૂવ।
XIX તત્ર તસ્યાઃ પતિ ર્યૂષફ્ સૌજન્યાત્ તસ્યાઃ કલઙ્કં પ્રકાશયિતુમ્ અનિચ્છન્ ગોપનેને તાં પારિત્યક્તું મનશ્ચક્રે।
XX સ તથૈવ ભાવયતિ, તદાનીં પરમેશ્વરસ્ય દૂતઃ સ્વપ્ને તં દર્શનં દત્ત્વા વ્યાજહાર, હે દાયૂદઃ સન્તાન યૂષફ્ ત્વં નિજાં જાયાં
મરિયમમ્ આદાતું મા ભૈષીઃ।
XXI યતસ્તસ્યા ગર્ભઃ પવિત્રાદાત્મનોઽભવત્, સા ચ પુત્રં પ્રસવિષ્યતે, તદા ત્વં તસ્ય નામ યીશુમ્ (અર્થાત્ ત્રાતારં) કરીષ્યસે,
યસ્માત્ સ નિજમનુજાન્ તેષાં કલુષેભ્ય ઉદ્ધરિષ્યતિ।
XXII ઇત્થં સતિ, પશ્ય ગર્ભવતી કન્યા તનયં પ્રસવિષ્યતે। ઇમ્માનૂયેલ્ તદીયઞ્ચ નામધેયં ભવિષ્યતિ।। ઇમ્માનૂયેલ્ અસ્માકં
સઙ્ગીશ્વરઇત્યર્થઃ।
XXIII ઇતિ યદ્ વચનં પુર્વ્વં ભવિષ્યદ્વક્ત્રા ઈશ્વરઃ કથાયામાસ, તત્ તદાનીં સિદ્ધમભવત્।
XXIV અનન્તરં યૂષફ્ નિદ્રાતો જાગરિત ઉત્થાય પરમેશ્વરીયદૂતસ્ય નિદેશાનુસારેણ નિજાં જાયાં જગ્રાહ,
XXV કિન્તુ યાવત્ સા નિજં પ્રથમસુતં અ સુષુવે, તાવત્ તાં નોપાગચ્છત્, તતઃ સુતસ્ય નામ યીશું ચક્રે।

# II

I અનન્તરં હેરોદ્ સંજ્ઞકે રાજ્ઞિ રાજ્યં શાસતિ યિહૂદીયદેશસ્ય બૈત્લેહમિ નગરે યીશૌ જાતવતિ ચ, કતિપયા જ્યોતિર્વ્વુદઃ પૂર્વ્વસ્યા
દિશો યિરૂશાલમ્નગરં સમેત્ય કથયમાસુઃ,
II યો યિહૂદીયાનાં રાજા જાતવાન્, સ કુત્રાસ્તે? વયં પૂર્વ્વસ્યાં દિશિ તિષ્ઠન્તસ્તદીયાં તારકામ્ અપશ્યામ તસ્માત્ તં પ્રણન્તુમ્
અાગમામ।
III તદા હેરોદ્ રાજા કથામેતાં નિશમ્ય યિરૂશાલમ્નગરસ્થિતૈઃ સર્વ્વમાનવૈઃ સાર્દ્ધમ્ ઉદ્વિજ્ય
IV સર્વ્વાન્ પ્રધાનયાજકાન્ અધ્યાપકાંશ્ચ સમાહૂયાનીય પપ્રચ્છ, ખ્રીષ્ટઃ કુત્ર જનિષ્યતે?
V તદા તે કથયામાસુઃ, યિહૂદીયદેશસ્ય બૈત્લેહમિ નગરે, યતો ભવિષ્યદ્વાદિના ઇત્થં લિખિતમાસ્તે,
VI સર્વ્વાભ્યો રાજધાનીભ્યો યિહૂદીયસ્ય નીવૃતઃ। હે યીહૂદીયદેશસ્યે બૈત્લેહમ્ ત્વં ન ચાવરા। ઇસ્રાયેલીયલોકાન્ મે યતો યઃ
પાલયિષ્યતિ। તાદૃગેકો મહારાજસ્ત્વન્મધ્ય ઉદ્ભવિષ્યતી।।
VII તદાનીં હેરોદ્ રાજા તાન્ જ્યોતિર્વ્વિદો ગોપનમ્ આહૂય સા તારકા કદા દૃષ્ટાભવત્ , તદ્ વિનિશ્ચયામાસ।
VIII અપરં તાન્ બૈત્લેહમં પ્રહીત્ય ગદિતવાન્, યૂયં યાત, યત્નાત્ તં શિશુમ્ અન્વિષ્ય તદુદ્દેશે પ્રાપ્તે મહ્યં વાર્ત્તાં દાસ્યથ, તતો
મયાપિ ગત્વા સ પ્રણંસ્યતે।
IX તદાનીં રાજ્ઞ એતાદૃશીમ્ આજ્ઞાં પ્રાપ્ય તે પ્રતસ્થિરે, તતઃ પૂર્વ્વસ્યાં દિશિ સ્થિતૈસ્તૈ ર્યા તારકા દૃષ્ટા સા તારકા તેષામગ્રે ગત્વા
યત્ર સ્થાને શિશૂરાસ્તે, તસ્ય સ્થાનસ્યોપરિ સ્થગિતા તસ્થૌ।
X તદ્ દૃષ્ટ્વા તે મહાનન્દિતા બભૂવુઃ,
XI તતો ગેહમધ્ય પ્રવિશ્ય તસ્ય માત્રા મરિયમા સાર્દ્ધં તં શિશું નિરીક્ષય દણ્ડવદ્ ભૂત્વા પ્રણેમુઃ, અપરં સ્વેષાં ઘનસમ્પત્તિં
મોચયિત્વા સુવર્ણં કુન્દુરું ગન્ધરમઞ્ચ તસ્મૈ દર્શનીયં દત્તવન્તઃ।
XII પશ્ચાદ્ હેરોદ્ રાજસ્ય સમીપં પુનરપિ ગન્તું સ્વપ્ન ઈશ્વરેણ નિષિદ્ધાઃ સન્તો ઽન્યેન પથા તે નિજદેશં પ્રતિ પ્રતસ્થિરે।

XIII અનન્તરં તેષુ ગતવત્મુ પરમેશ્વરસ્ય દૂતો યૂષફે સ્વપ્ને દર્શનં દત્વા જગાદ, ત્વમ્ ઉત્થાય શિશું તન્માતરઞ્ચ ગૃહીત્વા મિસર્દેશં
પલાયસ્વ, અપરં યાવદહં તુભ્યં વાર્ત્તાં ન કથયિષ્યામિ, તાવત્ તત્રૈવ નિવસ, યતો રાજા હેરોદ્ શિશું નાશયિતું મૃગયિષ્યતે।
XIV તદાનીં યૂષફ્ ઉત્થાય રજન્યાં શિશું તન્માતરઞ્ચ ગૃહીત્વા મિસર્દેશં પ્રતિ પ્રતસ્થે,
XV ગત્વા ચ હેરોદો નૃપતે ર્મરણપર્ય્યન્તં તત્ર દેશે ન્યુવાસ, તેન મિસર્દેશાદહં પુત્રં સ્વકીયં સમુપાહૂયમ્। યદેતદ્વચનમ્ ઈશ્વરેણ
ભવિષ્યદ્વાદિના કથિતં તત્ સફલમભૂત્।
XVI અનન્તરં હેરોદ્ જ્યોતિર્વ્વિદ્ભિરાત્માનં પ્રવઞ્ચિતં વિજ્ઞાય ભૃશં ચુકોપ; અપરં જ્યોતિર્વ્વિદ્ભ્યસ્તેન વિનિશ્ચિતં યદ્ દિનં તદ્દિનાદ્
ગણયિત્વા દ્વિતીયવત્સરં પ્રવિષ્ટા યાવન્તો બાલકા અસ્મિન્ બૈત્લેહમ્નગરે તત્સીમમધ્યે ચાસન્, લોકાન્ પ્રહિત્ય તાન્ સર્વ્વાન્
ઘાતયામાસ।
XVII અતઃ અનેકસ્ય વિલાપસ્ય નિનાદઃ ક્રન્દનસ્ય ચા શોકેન કૃતશબ્દશ્ચ રામાયાં સંનિશમ્યતે। સ્વબાલગણહેતોર્વૈ રાહેલ્ નારી
તુ રોદિની। ન મન્યતે પ્રબોધન્તુ યતસ્તે નૈવ મન્તિ હિ॥
XVIII યદેતદ્ વચનં યિરીમિયનામકભવિષ્યદ્વાદિના કથિતં તત્ તદાનીં સફલમ્ અભૂત્।
XIX તદનન્તરં હેરેદિ રાજનિ મૃતે પરમેશ્વરસ્ય દૂતો મિસર્દેશે સ્વપ્ને દર્શનં દત્ત્વા યૂષફે કથિતવાન્
XX ત્વમ્ ઉત્થાય શિશું તન્માતરઞ્ચ ગૃહીત્વા પુનરપીસ્રાયેલો દેશં યાહી, યે જનાઃ શિશું નાશયિતુમ્ અમૃગયન્ત, તે મૃતવન્તઃ।
XXI તદાનીં સ ઉત્થાય શિશું તન્માતરઞ્ચ ગૃહ્લન્ ઇસ્રાયેલ્દેશમ્ આજગામ।
XXII કિન્તુ યિહૂદીયદેશે અર્ખિલાયનામ રાજકુમારો નિજપિતુ ર્હેરોદઃ પદં પ્રાપ્ય રાજત્વં કરોતીતિ નિશમ્ય તત્ સ્થાનં યાતું
શઙ્કિતવાન્, પશ્ચાત્ સ્વપ્ન ઈશ્વરાત્ પ્રબોધં પ્રાપ્ય ગાલીલ્દેશસ્ય પ્રદેશૈકં પ્રસ્થાય નાસરન્નામ નગરં ગત્વા તત્ર ન્યુષિતવાન્,
XXIII તેન તં નાસરતીયં કથયિષ્યન્તિ, યદેતદ્વાક્યં ભવિષ્યદ્વાદિભિરુક્તં તત્ સફલમભવત્।

# III

I તદાનોં યોહ્નન્નામા મજ્જયિતા યિહૂદીયદેશસ્ય પ્રાન્તરમ્ ઉપસ્થાય પ્રચારયન્ કથયામાસ,
II મનાંસિ પરાવર્ત્તયત, સ્વર્ગીયરાજત્વં સમીપમાગતમ્।
III પરમેશસ્ય પન્થાનં પરિષ્કુરુત સર્વ્વતઃ। તસ્ય રાજપથાંશ્ચૈવ સમીકુરુત સર્વ્વથા। ઇત્યેતત્ પ્રાન્તરે વાક્યં વદતઃ કસ્યચિદ્ રવઃ॥
IV એતદ્વચનં યિશયિયભવિષ્યદ્વાદિના યોહનમુદ્દિશ્ય ભાષિતમ્। યોહનો વસનં મહાઙ્ગરોમજં તસ્ય કટૌ ચર્મ્મકટિબન્ધનં; સ ચ
શૂકકીટાન્ મધુ ચ ભુક્તવાન્।
V તદાનીં યિરૂશાલમ્નગરનિવાસિનઃ સર્વ્વે યિહૂદિદેશીયા યર્દ્દન્તટિન્યા ઉભયતટસ્થાશ્ચ માનવા બહિરાગત્ય તસ્ય સમીપે
VI સ્વીયં સ્વીયં દુરિતમ્ અઙ્ગીકૃત્ય તસ્યાં યર્દ્દનિ તેન મજ્જિતા બભૂવુઃ।
VII અપરં બહૂન્ ફિરૂશિનઃ સિદૂકિનશ્ચ મનુજાન્ મંક્તું સ્વસમીપમ્ આગચ્છતો વિલોક્ય સ તાન્ અભિદધૌ, રે રે ભુજગવંશા
આગામીનઃ કોપાત્ પલાયિતું યુષ્માન્ કશ્ચેતિતવાન્?
VIII મનઃપરાવર્ત્તનસ્ય સમુચિતં ફલં ફલત।
IX કિન્ત્વસ્માકં તાત ઇબ્રાહીમ્ અસ્તીતિ સ્વેષુ મનઃસુ ચીન્તયન્તો મા વ્યાહરત। યતો યુષ્માન્ અહં વદામિ, ઈશ્વર એતેભ્યઃ
પાષાણેભ્ય ઇબ્રાહીમઃ સન્તાનાન્ ઉત્પાદયિતું શક્નોતિ।
X અપરં પાદપાનાં મૂલે કુઠાર ઇદાનીમપિ લગન્ આસ્તે, તસ્માદ્ યસ્મિન્ પાદપે ઉત્તમં ફલં ન ભવતિ, સ કૃત્તો મધ્યેઽગ્નિં નિક્ષેપ્સ્યતે।
XI અપરમ્ અહં મનઃપરાવર્ત્તનસૂચકેન મજ્જનેન યુષ્માન્ મજ્જયામીતિ સત્યં, કિન્તુ મમ પશ્ચાદ્ ય આગચ્છતિ, સ મત્તોપિ
મહાન્, અહં તદીયોપાનહૌ વોઢુમપિ નહિ યોગ્યોસ્મિ, સ યુષ્માન્ વહ્નિરૂપે પવિત્ર આત્મનિ સંમજ્જયિષ્યતિ।
XII તસ્ય કારે સૂર્પ આસ્તે, સ સ્વીયશસ્યાનિ સમ્યક્ પ્રસ્ફોટ્ય નિજાન્ સકલગોધૂમાન્ સંગૃહ્ય ભાણ્ડાગારે સ્થાપયિષ્યતિ, કિંન્તુ
સર્વ્વાણિ વુષાણ્યનિર્વ્વાણવહ્નિના દાહયિષ્યતિ।
XIII અનન્તરં યીશુ ર્યોહના મજ્જિતો ભવિતું ગાલીલ્પ્રદેશાદ્ યર્દ્દનિ તસ્ય સમીપમ્ આજગામ।
XIV કિન્તુ યોહન્ તં નિષિધ્ય બભાષે, ત્વં કિં મમ સમીપમ્ આગચ્છસિ? વરં ત્વયા મજ્જનં મમ પ્રયોજનમ્ આસ્તે।
XV તદાનીં યીશુઃ પ્રત્યવોચત્; ઈદાનીમ્ અનુમન્યસ્વ, યત ઇત્થં સર્વ્વધર્મ્મસાધનમ્ અસ્માકં કર્ત્તવ્યં, તતઃ સોઽન્વમન્યત।
XVI અનન્તરં યીશુરમ્મસિ મજ્જિતુઃ સન્ તત્ક્ષણાત્ તોયમધ્યાદ્ ઉત્થાય જગામ, તદા જીમૂતદ્વારે મુક્તે જાતે, સ ઈશ્વરસ્યાત્માનં
કપોતવદ્ અવરુહ્ય સ્વોપર્ય્યાગચ્છન્તં વીક્ષાઞ્ચક્રે।
XVII અપરમ્ એષ મમ પ્રિયઃ પુત્ર એતસ્મિન્નેવ મમ મહાસન્તોષ એતાદૃશી વ્યોમજા વાગ્ બભૂવ।

# IV

I તતઃ પરં યીશુઃ પ્રતારકેણ પરીક્ષિતો ભવિતુમ્ આત્મના પ્રાન્તરમ્ આકૃષ્ટઃ
II સન્ ચત્વારિંશદહોરાત્રાન્ અનાહારસ્તિષ્ઠન્ ક્ષુધિતો બભૂવ।
III તદાનીં પરીક્ષિતા તત્સમીપમ્ આગત્ય વ્યાહૃતવાન્, યદિ ત્વમીશ્વરાત્મજો ભવેસ્તર્હ્યાજ્ઞયા પાષાણાનેતાન્ પૂપાન્ વિધેહિ।
IV તતઃ સ પ્રત્યબ્રવીત્, ઇત્થં લિખિતમાસ્તે, "મનુજઃ કેવલપૂપેન ન જીવિષ્યતિ, કિન્ત્વીશ્વરસ્ય વદનાદ્ યાનિ યાનિ વચાંસિ
નિઃસરન્તિ તૈરેવ જીવિષ્યતિ। "
V તદા પ્રતારકસ્તં પુણ્યનગરં નીત્વા મન્દિરસ્ય ચૂડોપરિ નિધાય ગદિતવાન્,
VI ત્વં યદિશ્વરસ્ય તનયો ભવેસ્તર્હીતોઽધઃ પત, યત ઇત્થં લિખિતમાસ્તે, આદેક્ષ્યતિ નિજાન્ દૂતાન્ રક્ષિતું ત્વાં પરમેશ્વરઃ। યથા
સર્વ્વેષુ માર્ગેષુ ત્વદીયચરણદ્વયે। ન લગેત્ પ્રસ્તરાઘાતસ્ત્વાં ધરિષ્યન્તિ તે કરૈઃ॥
VII તદાનીં યીશુસ્તસ્મૈ કથિતવાન્ એતદપિ લિખિતમાસ્તે, "ત્વં નિજપ્રભું પરમેશ્વરં મા પરીક્ષસ્વ। "
VIII અનન્તરં પ્રતારકઃ પુનરપિ તમ્ અત્યુચ્ચધરાધરોપરિ નીત્વા જગતઃ સકલરાજ્યાનિ તદૈશ્વર્ય્યાણિ ચ દર્શયાશ્ચકાર કથયાઞ્ચકાર
ચ,

IX યદિ ત્વં દણ્ડવદ્ ભવન્ માં પ્રણમેસ્તર્હ્યહમ્ એતાનિ તુભ્યં પ્રદાસ્યામિ।

X તદાનીં યીશુસ્તમવોચત્, દૂરીભવ પ્રતારક, લિખિતમિદમ્ આસ્તે, "ત્વયા નિજઃ પ્રભુઃ પરમેશ્વરઃ પ્રણમ્યઃ કેવલઃ સ સેવ્યશ્ચ। "

XI તતઃ પ્રતારકેણ સ પર્ય્યત્યાજિ, તદા સ્વર્ગીયદૂતૈરાગત્ય સ સિષેવે।

XII તદનન્તરં યોહન્ કારાયાં બબન્ધે, તદ્વાર્ત્તાં નિશમ્ય યીશુના ગાલીલ્ પ્રાસ્થીયત।

XIII તતઃ પરં સ નાસરન્નગરં વિહાય જલધેસ્તટે સિબૂલૂન્નપ્તાલી એતયોરુવભયોઃ પ્રદેશયોઃ સીમ્નોર્મધ્યવર્ત્તી યઃ કફર્નાહૂમ્
તન્નગરમ્ ઇત્વા ન્યવસત્।

XIV તસ્માત્, અન્યાદેશીયગાલીલિ યર્દ્દન્પારેઽબ્ધિરોધસિ। નપ્તાલિસિબૂલૂન્દેશૌ યત્ર સ્થાને સ્થિતૌ પુરા।

XV તત્રત્યા મનુજા યે યે પર્ય્યભ્રામ્યન્ તમિસ્રકે। તૈર્જનૈર્બૃહદાલોકઃ પરિદર્શિષ્યતે તદા। અવસન્ યે જના દેશે મૃત્યુચ્છાયાસ્વરૂપકે।
તેષામુપરિ લોકાનામાલોકઃ સંપ્રકાશિતઃ।।

XVI યદેતદ્વચનં યિશયિયભવિષ્યદ્વાદિના પ્રોક્તં, તત્ તદા સફલમ્ અભૂત્।

XVII અનન્તરં યીશુઃ સુસંવાદં પ્રચારયન્ એતાં કથાં કથયિતુમ્ આરેભે, મનાંસિ પરાવર્ત્તયત, સ્વર્ગીયરાજત્વં સવિધમભવત્।

XVIII તતઃ પરં યીશુ ર્ગાલીલો જલધેસ્તટેન ગચ્છન્ ગચ્છન્ આન્દ્રિયસ્તસ્ય ભ્રાતા શિમોન્ અર્થતો યં પિતરં વદન્તિ એતાવુભૌ
જલધૌ જાલં ક્ષિપન્તૌ દદર્શ, યતસ્તૌ મીનધારિણાવાસ્તામ્।

XIX તદા સ તાવાહૂય વ્યાજહાર, યુવાં મમ પશ્ચાદ્ આગચ્છતં, યુવામહં મનુજધારિણૌ કરિષ્યામિ।

XX તેનૈવ તૌ જાલં વિહાય તસ્ય પશ્ચાત્ આગચ્છતામ્।

XXI અનન્તરં તસ્માત્ સ્થાનાત્ વ્રજન્ વ્રજન્ સિવદિયસ્ય સુતૌ યાકૂબ્ યોહન્નામાનૌ દ્વૌ સહજૌ તાતેન સાર્દ્ધં નૌકોપરિ જાલસ્ય
જીર્ણોદ્ધારં કુર્વ્વન્તૌ વીક્ષ્ય તાવાહૂતવાન્।

XXII તત્ક્ષણાત્ તૌ નાવં સ્વતાતઞ્ચ વિહાય તસ્ય પશ્ચાદ્ગામિનૌ બભૂવતુઃ।

XXIII અનન્તરં ભજનભવને સમુપદિશન્ રાજ્યસ્ય સુસંવાદં પ્રચારયન્ મનુજાનાં સર્વ્વપ્રકારાન્ રોગાન્ સર્વ્વપ્રકારપીડાશ્ચ શમયન્
યીશુઃ કૃત્સ્નં ગાલીલ્દેશં ભ્રમિતુમ્ આરભત।

XXIV તેન કૃત્સ્નસુરિયાદેશસ્ય મધ્યં તસ્ય યશો વ્યાપ્નોત્, અપરં ભૂતગ્રસ્તા અપસ્મારર્ગીણઃ પક્ષાધાતિપ્રભૃતયશ્ચ યાવન્તો
મનુજા નાનાવિધવ્યાધિભિઃ ક્લિષ્ટા આસન્, તેષુ સર્વ્વેષુ તસ્ય સમીપમ્ આનીતેષુ સ તાન્ સ્વસ્થાન્ ચકાર।

XXV એતેન ગાલીલ્-દિકાપનિ-યિરૂશાલમ્-યિહૂદીયદેશેભ્યો યર્દ્દનઃ પારાઞ્ચ બહવો મનુજાસ્તસ્ય પશ્ચાદ્ આગચ્છન્।

# V

I અનન્તરં સ જનનિવહં નિરીક્ષ્ય ભૂધરોપરિ વ્રજિત્વા સમુપવિવેશ।

II તદાનીં શિષ્યેષુ તસ્ય સમીપમાગતેષુ તેન તેભ્ય એષા કથા કથ્યાઞ્ચક્રે।

III અભિમાનહીના જના ધન્યાઃ, યતસ્તે સ્વર્ગીયરાજ્યમ્ અધિકરિષ્યન્તિ।

IV ખિદ્યમાના મનુજા ધન્યાઃ, યસ્માત્ તે સાન્ત્વનાં પ્રાપ્સન્તિ।

V નમ્રા માનવાશ્ચ ધન્યાઃ, યસ્માત્ તે મેદિનીમ્ અધિકરિષ્યન્તિ।

VI ધર્મ્માય બુભુક્ષિતાઃ તૃષાર્ત્તાશ્ચ મનુજા ધન્યાઃ, યસ્માત્ તે પરિતપ્સ્યર્ન્તિ।

VII કૃપાલવો માનવા ધન્યાઃ, યસ્માત્ તે કૃપાં પ્રાપ્સ્યન્તિ।

VIII નિર્મ્મલહૃદયા મનુજાશ્ચ ધન્યાઃ, યસ્માત્ ત ઈશ્વરં દ્રક્ષ્યન્તિ।

IX મેલયિતારો માનવા ધન્યાઃ, યસ્માત્ ત ઈશ્વરસ્ય સન્તાનત્વેન વિખ્યાસ્યન્તિ।

X ધર્મ્મકારણાત્ તાડિતા મનુજા ધન્યા, યસ્માત્ સ્વર્ગીયરાજ્યે તેષામધિકરો વિદ્યતે।

XI યદા મનુજા મમ નામકૃતે યુષ્માન્ નિન્દન્તિ તાડયન્તિ મૃષા નાનાદુર્વ્વાક્યાનિ વદન્તિ ચ, તદા યુયં ધન્યાઃ।

XII તદા આનન્દત, તથા ભૃશં હ્લાદધ્વઞ્ચ, યતઃ સ્વર્ગે ભૂયાંસિ ફલાનિ લપ્સ્યધ્વે; તે યુષ્માકં પુરાતનાન્ ભવિષ્યદ્વાદિનોઽપિ તાદૃગ્
અતાડયન્।

XIII યુયં મેદિન્યાં લવણરૂપાઃ, કિન્તુ યદિ લવણસ્ય લવણત્વમ્ અપયાતિ, તર્હિ તત્ કેન પ્રકારેણ સ્વાદુયુક્તં ભવિષ્યતિ? તત્
કસ્યાપિ કાર્ય્યસ્યાયોગ્યત્વાત્ કેવલં બહિઃ પ્રક્ષેપ્તું નરાણાં પદતલેન દલયિતુઞ્ચ યોગ્યં ભવતિ।

XIV યૂયં જગતિ દીપ્તિરૂપાઃ, ભૂધરોપરિ સ્થિતં નગરં ગુપ્તં ભવિતું નહિ શક્ષ્યતિ।

XV અપરં મનુજાઃ પ્રદીપાન્ પ્રજ્વાલ્ય દ્રોણાધો ન સ્થાપયન્તિ, કિન્તુ દીપાધારોપર્ય્યેવ સ્થાપયન્તિ, તેન તે દીપા ગેહસ્થિતાન્
સકલાન્ પ્રકાશયન્તિ।

XVI યેન માનવા યુષ્માકં સત્કર્મ્માણિ વિલોક્ય યુષ્માકં સ્વર્ગસ્થં પિતરં ધન્યં વદન્તિ, તેષાં સમક્ષં યુષ્માકં દીપ્તિસ્તાદૃક્ પ્રકાશતામ્।

XVII અહં વ્યવસ્થાં ભવિષ્યદ્વાક્યઞ્ચ લોપ્તુમ્ આગતવાન્, ઇત્થં માનુભવત, તે દ્વે લોપ્તું નાગતવાન્, કિન્તુ સફલે કર્ત્તુમ્
આગતોસ્મિ।

XVIII અપરં યુષ્માન્ અહં તથ્યં વદામિ યાવત્ વ્યોમમેદિન્યો ર્ધ્વંસો ન ભવિષ્યતિ, તાવત્ સર્વ્વસ્મિન્ સફલે ન જાતે વ્યવસ્થાયા
એકા માત્રા બિન્દુરેકોપિ વા ન લોપ્સ્યતે।

XIX તસ્માત્ યો જન એતાસામ્ આજ્ઞાનામ્ અતિક્ષુદ્રામ્ એકાજ્ઞામપી લંઘતે મનુજાંઞ્ચ તથૈવ શિક્ષયતિ, સ સ્વર્ગીયરાજ્યે
સર્વ્વેભ્યઃ ક્ષુદ્રત્વેન વિખ્યાસ્યતે, કિન્તુ યો જનસ્તાં પાલયતિ, તથૈવ શિક્ષયતિ ચ, સ સ્વર્ગીયરાજ્યે પ્રધાનત્વેન વિખ્યાસ્યતે।

XX અપરં યુષ્માન્ અહં વદામિ, અધ્યાપકફિરૂશિમાનવાનાં ધર્મ્માનુષ્ઠાનાત્ યુષ્માકં ધર્મ્માનુષ્ઠાને નોત્તમે જાતે યૂયમ્
ઈશ્વરીયરાજ્યં પ્રવેષ્ટું ન શક્ષ્યથ।

XXI અપરઞ્ચ ત્વં નરં મા વધીઃ, યસ્માત્ યો નરં હન્તિ, સ વિચારસભાયાં દણ્ડાર્હો ભવિષ્યતિ, પૂર્વ્વકાલીનજનેભ્ય ઇતિ
કથિતમાસીત્, યુષ્માભિરશ્રાવિ।

XXII કિન્ત્વહં યુષ્માન્ વદામિ, યઃ કશ્ચિત્ કારણં વિના નિજભ્રાત્રે કુપ્યતિ, સ વિચારસભાયાં દણ્ડાર્હો ભવિષ્યતિ; યઃ કશ્ચિચ્ચ સ્વીયસહજં નિર્બ્બોધં વદતિ, સ મહાસભાયાં દણ્ડાર્હો ભવિષ્યતિ; પુનશ્ચ ત્વં મૂઢ ઇતિ વાક્યં યદિ કશ્ચિત્ સ્વીયભ્રાતરં વક્તિ, તર્હિ નરકાગ્નૌ સ દણ્ડાર્હો ભવિષ્યતિ।

XXIII અતો વેદ્યાઃ સમીપં નિજનૈવેદ્યે સમાનીતેઽપિ નિજભ્રાતરં પ્રતિ કસ્માચ્ચિત્ કારણાત્ ત્વં યદિ દોષી વિદ્યસે, તદાનીં તવ તસ્ય સ્મૃતિ ર્જાયતે ચ,

XXIV તર્હિ તસ્યા વેદ્યાઃ સમીપે નિજનૈવેદ્યં નિધાય તદૈવ ગત્વા પૂર્વ્વં તેન સાર્દ્ધં મિલ, પશ્ચાત્ આગત્ય નિજનૈવેદ્યં નિવેદય।

XXV અન્યચ્ચ યાવત્ વિવાદિના સાર્દ્ધં વર્ત્મનિ તિષ્ઠસિ, તાવત્ તેન સાર્દ્ધં મેલનં કુરુ; નો ચેત્ વિવાદી વિચારયિતુઃ સમીપે ત્વાં સમર્પયતિ વિચારયિતા ચ રક્ષિણઃ સન્નિધૌ સમર્પયતિ તદા ત્વં કારાયાં બધ્યેથાઃ।

XXVI તર્હિ ત્વામહં તથ્યં બ્રવીમિ, શેષકપર્દકેઽપિ ન પરિશોધિતે તસ્માત્ સ્થાનાત્ કદાપિ બહિરાગન્તું ન શક્ષ્યસિ।

XXVII અપરં ત્વં મા વ્યભિચર, યદેતદ્ વચનં પૂર્વ્વકાલીનલોકેભ્યઃ કથિતમાસીત્, તદ્ યૂયં શ્રુતવન્તઃ;

XXVIII કિન્ત્વહં યુષ્માન્ વદામિ, યદિ કશ્ચિત્ કામતઃ કાઞ્ચન યોષિતં પશ્યતિ, તર્હિ સ મનસા તદૈવ વ્યભિચરિતવાન્।

XXIX તસ્માત્ તવ દક્ષિણં નેત્રં યદિ ત્વાં બાધતે, તર્હિ તન્નેત્રમ્ ઉત્પાટ્ય દૂરે નિક્ષિપ, યસ્માત્ તવ સર્વ્વવપુષો નરકે નિક્ષેપાત્ તવૈકાઙ્ગસ્ય નાશો વરં।

XXX યદ્વા તવ દક્ષિણઃ કરો યદિ ત્વાં બાધતે, તર્હિ તં કરં છિત્ત્વા દૂરે નિક્ષિપ, યતઃ સર્વ્વવપુષો નરકે નિક્ષેપાત્ એકાઙ્ગસ્ય નાશો વરં।

XXXI ઉક્તમાસ્તે, યદિ કશ્ચિન્ નિજજાયાં પરિત્યક્તુમ્ ઇચ્છતિ, તર્હિ સ તસ્યૈ ત્યાગપત્રં દદાતુ।

XXXII કિન્ત્વહં યુષ્માન્ વ્યાહરામિ, વ્યભિચારદોષે ન જાતે યદિ કશ્ચિન્ નિજજાયાં પરિત્યજતિ, તર્હિ સ તાં વ્યભિચારયતિ; યશ્ચ તાં ત્યક્તાં સ્ત્રિયં વિવહતિ, સોપિ વ્યભિચરતિ।

XXXIII પુનશ્ચ ત્વં મૃષા શપથમ્ ન કુર્વ્વન્ ઈશ્વરાય નિજશપથં પાલય, પૂર્વ્વકાલીનલોકેભ્યો યૈષા કથા કથિતા, તામપિ યૂયં શ્રુતવન્તઃ।

XXXIV કિન્ત્વહં યુષ્માન્ વદામિ, કમપિ શપથં મા કાર્ષ્ટ, અર્થતઃ સ્વર્ગનામ્ના ન, યતઃ સ ઈશ્વરસ્ય સિંહાસનં;

XXXV પૃથિવ્યા નામ્નાપિ ન, યતઃ સા તસ્ય પાદપીઠં; યિરૂશાલમો નામ્નાપિ ન, યતઃ સા મહારાજસ્ય પુરી;

XXXVI નિજશિરોનામ્નાપિ ન, યસ્માત્ તસ્યૈકં કચમપિ સિતમ્ અસિતં વા કર્ત્તું ત્વયા ન શક્યતે।

XXXVII અપરં યૂયં સંલાપસમયે કેવલં ભવતીતિ ન ભવતીતિ ચ વદત યત ઇતોઽધિકં યત્ તત્ પાપાત્મનો જાયતે।

XXXVIII અપરં લોચનસ્ય વિનિમયેન લોચનં દન્તસ્ય વિનિમયેન દન્તઃ પૂર્વ્વક્તમિદં વચનઞ્ચ યુષ્માભિરશ્રૂયત।

XXXIX કિન્ત્વહં યુષ્માન્ વદામિ યૂયં હિંસકં નરં મા વ્યાઘાતયત। કિન્તુ કેનચિત્ તવ દક્ષિણકપોલે ચપેટાઘાતે કૃતે તં પ્રતિ વામં કપોલઞ્ચ વ્યાઘોટય।

XL અપરં કેનચિત્ ત્વયા સાર્દ્ધં વિવાદં કૃત્વા તવ પરિધેયવસને જિઘૃતિતે તસ્માયુત્તરીયવસનમપિ દેહિ।

XLI યદિ કશ્ચિત્ ત્વાં ક્રોશમેકં નયનાર્થં અન્યાયતો ધરતિ, તદા તેન સાર્દ્ધં ક્રોશદ્વયં યાહિ।

XLII યશ્ચ માનવસ્ત્વાં યાચતે, તસ્મૈ દેહિ, યદિ કશ્ચિત્ તુભ્યં ધારયિતુમ્ ઇચ્છતિ, તર્હિ તં પ્રતિ પરાંમુખો મા ભૂઃ।

XLIII નિજસમીપવસિનિ પ્રેમ કુરુ, કિન્તુ શત્રું પ્રતિ દ્વેષં કુરુ, યદેતત્ પુરોક્તં વચનં એતદપિ યૂયં શ્રુતવન્તઃ।

XLIV કિન્ત્વહં યુષ્માન્ વદામિ, યૂયં રિપુવ્વપિ પ્રેમ કુરુત, યે ચ યુષ્માન્ શપન્તે, તાન, આશિષં વદત, યે ચ યુષ્માન્ ઋ◌ૃતીયન્તે, તેષાં મઙ્ગલં કુરુત, યે ચ યુષ્માન્ નિન્દન્તિ, તાડયન્તિ ચ, તેષાં કૃતે પ્રાર્થયધ્વં।

XLV તત્ર યઃ સતામસતાઞ્ચોપરિ પ્રભાકરમ્ ઉદાયયતિ, તથા ધાર્મ્મિકાનામધાર્મ્મિકાનાઞ્ચોપરિ નીરં વર્ષયતિ તાદૃશો યો યુષ્માકં સ્વર્ગસ્થઃ પિતા, યૂયં તસ્યૈવ સન્તાના ભવિષ્યથ।

XLVI યે યુષ્માસુ પ્રેમ કુર્વ્વન્તિ, યૂયં યદિ કેવલં તેવ્વેવ પ્રેમ કુરુથ, તર્હિ યુષ્માકં કિં ફલં ભવિષ્યતિ? ચણ્ડાલા અપિ તાદૃશં કિં ન કુર્વ્વન્તિ?

XLVII અપરં યૂયં યદિ કેવલં સ્વીયભ્રાતૃત્વેન નમત, તર્હિ કિં મહત્ કર્મ્મ કુરુથ? ચણ્ડાલા અપિ તાદૃશં કિં ન કુર્વ્વન્તિ?

XLVIII તસ્માત્ યુષ્માકં સ્વર્ગસ્થઃ પિતા યથા પૂર્ણો ભવતિ, યૂયમપિ તાદૃશા ભવત।

# VI

I સાવધાના ભવત, મનુજાન્ દર્શયિતું તેષાં ગોચરે ધર્મ્મકર્મ્મ મા કુરુત, તથા કૃતે યુષ્માકં સ્વર્ગસ્થપિતુઃ સકાશાત્ કિઞ્ચન ફલં ન પ્રાપ્સ્યથ।

II ત્વં યદા દદાસિ તદા કપટિનો જના યથા મનુજેભ્યઃ પ્રશંસાં પ્રાપ્તું ભજનભવને રાજમાર્ગે ચ તૂરીં વાદયન્તિ, તથા મા કુરિ◌ુ, અહં તુભ્યં યથાર્થં કથયામિ, તે સ્વકાયં ફલમ્ અલભન્ત।

III કિન્તુ ત્વં યદા દદાસિ, તદા નિજદક્ષિણકરો યત્ કરોતિ, તદ્ વામકરં મા જ્ઞાપય।

IV તેન તવ દાનં ગુપ્તં ભવિષ્યતિ યસ્તુ તવ પિતા ગુપ્તદર્શી, સ પ્રકાશ્ય તુભ્યં ફલં દાસ્યતિ।

V અપરં યદા પ્રાર્થયસે, તદા કપટિનઇવ મા કુરુ, યસ્માત્ તે ભજનભવને રાજમાર્ગસ્ય કોણે તિષ્ઠન્તો લોકાન્ દર્શયન્તઃ પ્રાર્થયિતું પ્રીયન્તે; અહં યુષ્માન્ તથ્યં વદામિ, તે સ્વકીયફલં પ્રાપ્નુવન્।

VI તસ્માત્ પ્રાર્થનાકાલે અન્તરાગારં પ્રવિશ્ય દ્વારં રુદ્ધ્વા ગુપ્તં પશ્યતસ્તવ પિતુઃ સમીપે પ્રાર્થયસ્વ; તેન તવ યઃ પિતા ગુપ્તદર્શી, સ પ્રકાશ્ય તુભ્યં ફલં દાસ્યતિ।

VII અપરં પ્રાર્થનાકાલે દેવપૂજકાઇવ મુધા પુનરુક્તિં મા કુરુ, યસ્માત્ તે બોધન્તે, બહુવારં કથાયાં કથિતાયાં તેષાં પ્રાર્થના ગ્રાહિષ્યતે।

VIII યૂયં તેષામિવ મા કુરુત, યસ્માત્ યુષ્માકં યદ્ યત્ પ્રયોજનં યાચનાતઃ પ્રાગેવ યુષ્માકં પિતા તત્ જાનાતિ।

IX અતએવ યૂયમ ઈદૃક્ પ્રાર્થયધ્વં, હે અસ્માકં સ્વર્ગસ્થપિતઃ, તવ નામ પૂજ્યં ભવતુ।

X તવ રાજત્વં ભવતુ; તવેચ્છા સ્વર્ગે યથા તથૈવ મેદિન્યામપિ સફલા ભવતુ।
XI અસ્માકં પ્રયોજનીયમ્ આહારમ્ અદ્ય દેહિ।
XII વયં યથા નિજાપરાધિનઃ ક્ષમામહે, તથૈવાસ્માકમ્ અપરાધાન્ ક્ષમસ્વ।
XIII અસ્માન્ પરીક્ષાં માનય, કિન્તુ પાપાત્મનો રક્ષ; રાજત્વં ગૌરવં પરાક્રમઃ એતે સર્વ્વે સર્વ્વદા તવ; તથાસ્તુ।
XIV યદિ યૂયમ્ અન્યેષામ્ અપરાધાન્ ક્ષમધ્વે તર્હિ યુષ્માકં સ્વર્גસ્થપિતાપિ યુષ્માન્ ક્ષમિષ્યતે;
XV કિન્તુ યદિ યૂયમ્ અન્યેષામ્ અપરાધાન્ ન ક્ષમધ્વે, તર્હિ યુષ્માકં જનકોપિ યુષ્માકમ્ અપરાધાન્ ન ક્ષમિષ્યતે।
XVI અપરમ્ ઉપવાસકાલે કપટિનો જના માનુષાન્ ઉપવાસં જ્ઞાપયિતું સ્વેષાં વદનાનિ મ્લાનાનિ કુર્વ્વન્તિ, યૂયં તઇવ વિષણવદના
મા ભવત; અહં યુષ્માન્ તથ્યં વદામિ તે સ્વકીયફલમ્ અલભન્ત।
XVII યદા ત્વમ્ ઉપવસસિ, તદા યથા લોકૈસ્ત્વં ઉપવાસીવ ન દૃશ્યસે, કિન્તુ તવ યોઽગોચરઃ પિતા તેનૈવ દૃશ્યસે, તત્કૃતે
નિજશિરસિ તૈલં મર્દ્દય વદનઞ્ચ પ્રક્ષાલય;
XVIII તેન તવ યઃ પિતા ગુપ્તદર્શી સ પ્રકાશ્ય તુભ્યં ફલં દાસ્યતિ।
XIX અપરં યત્ર સ્થાને કીટાઃ કલઙ્કાશ્ચ ક્ષયં નયન્તિ, ચૌરાશ્ચ સન્ધિં કર્ત્તયિત્વા ચોરયિતું શક્નુવન્તિ, તાદૃશ્યાં મેદિન્યાં સ્વાર્થં ધનં
મા સંચિનુત।
XX કિન્તુ યત્ર સ્થાને કીટાઃ કલઙ્કાશ્ચ ક્ષયં ન નયન્તિ, ચૌરાશ્ચ સન્ધિં કર્ત્તયિત્વા ચોરયિતું ન શક્નુવન્તિ, તાદૃશે સ્વર્ગે ધનં સઞ્ચિનુત।
XXI યસ્માત્ યત્ર સ્થાને યુષ્માંક ધનં તત્રૈવ ખાને યુષ્માકં મનાંસિ।
XXII લોચનં દેહસ્ય પ્રદીપકં, તસ્માત્ યદિ તવ લોચનં પ્રસન્નં ભવતિ, તર્હિ તવ કૃત્સ્નં વપુ ર્દીપ્તિયુક્તં ભવિષ્યતિ।
XXIII કિન્તુ લોચનેઽપ્રસન્ને તવ કૃત્સ્નં વપુઃ તમિસ્રયુક્તં ભવિષ્યતિ। અતએવ યા દીપ્તિસ્ત્વયિ વિદ્યતે, સા યદિ તમિસ્રયુક્તા
ભવતિ, તર્હિ તત્ તમિસ્રં કિયન્ મહત્।
XXIV કોપિ મનુજો દ્વૌ પ્રભૂ સેવિતું ન શક્નોતિ, યસ્માદ્ એકં સંમન્ય તદન્યં ન સમ્મન્યતે, યદ્વા એકત્ર મનો નિધાય તદન્યમ્
અવમન્યતે; તથા યૂયમપીશ્વરં લક્ષ્મીઞ્ચેત્યુભે સેવિતું ન શક્નુથ।
XXV અપરમ્ અહં યુષ્મભ્યં તથ્યં કથયામિ, કિં ભક્ષિષ્યામઃ? કિં પાસ્યામઃ? ઇતિ પ્રાણધારણાય મા ચિન્તયત; કિં પરિધાસ્યામઃ?
ઇતિ કાયરક્ષણાય ન ચિન્તયત; ભક્ષ્યાત્ પ્રાણા વસનાઞ્ચ વપૂંષિ કિં શ્રેષ્ઠાણિ ન હિ?
XXVI વિહાયસો વિહઙ્ગમાન્ વિલોકયત; તૈ ર્નોપ્યતે ન કૃત્યતે ભાણ્ડાગારે ન સઞ્ચીયતેઽપિ; તથાપિ યુષ્માકં સ્વર્ગસ્થઃ પિતા તેભ્ય
આહારં વિતરતિ।
XXVII યૂયં તેભ્યઃ કિં શ્રેષ્ઠા ન ભવથ? યુષ્માકં કશ્ચિત્ મનુજઃ ચિન્તયન્ નિજાયુષઃ ક્ષણમપિ વર્દ્ધયિતું શક્નોતિ?
XXVIII અપરં વસનાય કુતશ્ચિન્તયત? ક્ષેત્રોત્પન્નાનિ પુષ્પાણિ કથં વર્દ્ધન્તે તદાલોચયત। તાનિ તન્તૂન્ નોત્પાદયન્તિ કિમપિ કાર્ય્યં
ન કુર્વ્વન્તિ;
XXIX તથાપ્યહં યુષ્માન્ વદામિ, સુલેમાન્ તાદૃગ્ ઐશ્વર્ય્યવાનપિ તત્પુષ્પમિવ વિભૂષિતો નાસીત્।
XXX તસ્માત્ ક્ષદ્ય વિદ્યમાનં શ્વઃ ચુલ્લ્યાં નિક્ષેપ્સ્યતે તાદૃશં યત્ ક્ષેત્રસ્થિતં કુસુમં તત્ યદીશ્વર ઇત્થં બિભૂષયતિ, તર્હિ હે
સ્તોકપ્રત્યયિનો યુષ્માન્ કિં ન પરિધાપયિષ્યતિ?
XXXI તસ્માત્ અસ્માભિઃ કિમત્સ્યતે? કિઞ્ચ પાયિષ્યતે? કિં વા પરિધાયિષ્યતે, ઇતિ ન ચિન્તયત।
XXXII યસ્માત્ દેવાર્ચ્ચકા અપીતિ ચેષ્ટન્તે; એતેષુ દ્રવ્યેષુ પ્રયોજનમસ્તીતિ યુષ્માકં સ્વર્ગસ્થઃ પિતા જાનાતિ।
XXXIII અતએવ પ્રથમત ઈશ્વરીયરાજ્યં ધર્મ્મઞ્ચ ચેષ્ટધ્વં, તત એતાનિ વસ્તૂનિ યુષ્મભ્યં પ્રદાયિષ્યન્તે।
XXXIV શ્વઃ કૃતે મા ચિન્તયત, શ્વએવ સ્વયં સ્વમુદ્દિશ્ય ચિન્તયિષ્યતિ; અદ્યતની યા ચિન્તા સાદ્યકૃતે પ્રચુરતરા।

# VII

I યથા યૂયં દોષીકૃતા ન ભવથ, તત્કૃતેઽન્યં દોષિણં મા કુરુત।
II યતો યાદૃશેન દોષેણ યૂયં પરાન્ દોષિણઃ કુરુથ, તાદૃશેન દોષેણ યૂયમપિ દોષીકૃતા ભવિષ્યથ, અન્યઞ્ચ યેન પરિમાણેન
યુષ્માભિઃ પરિમીયતે, તેનૈવ પરિમાણેન યુષ્મત્કૃતે પરિમાયિષ્યતે।
III અપરઞ્ચ નિજનયને યા નાસા વિદ્યતે, તામ્ અનાલોચ્ય તવ સહજસ્ય લોચને યત્ તૃણમ્ આસ્તે, તદેવ કુતો વીક્ષસે?
IV તવ નિજલોચને નાસાયાં વિદ્યમાનાયાં, હે ભ્રાતઃ, તવ નયનાત્ તૃણં બહિષ્યર્તું અનુજાનીહિ, કથામેતાં નિજસહજાય કથં
કથયિતું શક્નોષિ?
V હે કપટિન્, આદૌ નિજનયનાત્ નાસાં બહિષ્કુરુ તતો નિજદૃષ્ટૌ સુપ્રસન્નાયાં તવ ભ્રાતૃ ર્લોચનાત્ તૃણં બહિષ્કર્તું શક્ષ્યસિ।
VI અન્યઞ્ચ સારમેયેભ્યઃ પવિત્રવસ્તૂનિ મા વિતરત, વરાહાણાં સમક્ષઞ્ચ મુક્તા મા નિક્ષિપત; નિક્ષેપણાત્ તે તાઃ સર્વ્વાઃ પદૈ
ર્દલયિષ્યન્તિ, પરાવૃત્ય યુષ્માનપિ વિદારયિષ્યન્તિ।
VII યાચધ્વં તતો યુષ્મભ્યં દાયિષ્યતે; મૃગયધ્વં તત ઉદ્દેશં લપ્સ્યધ્વે; દ્વારમ્ આહત, તતો યુષ્મત્કૃતે મુક્તં ભવિષ્યતિ।
VIII યસ્માદ્ યેન યાચ્યતે, તેન લભ્યતે; યેન મૃગ્યતે તેનોદ્દેશઃ પ્રાપ્યતે; યેન ચ દ્વારમ્ આહન્યતે, તત્કૃતે દ્વારં મોચ્યતે।
IX આત્મજેન પૂપે પ્રાર્થિતે તસ્મૈ પાષાણં વિશ્રાણયતિ,
X મીને યાચિતે ચ તસ્મૈ ભુજગં વિતરતિ, એતાદૃશઃ પિતા યુષ્માકં મધ્યે ક આસ્તે?
XI તસ્માદ્ યૂયમ્ અભદ્રાઃ સન્તોઽપિ યદિ નિજબાલકેભ્ય ઉત્તમં દ્રવ્યં દાતું જાનીથ, તર્હિ યુષ્માકં સ્વર્ગસ્થઃ પિતા સ્વીયયાચકેભ્યઃ
કિમુત્તમાનિ વસ્તૂનિ ન દાસ્યતિ?
XII યૂષ્માન્ પ્રતીતરેષાં યાદૃશો વ્યવહારો યુષ્માકં પ્રિયઃ, યૂયં તાન્ પ્રતિ તાદૃશાનેવ વ્યવહારાન્ વિધત્ત; યસ્માદ્
વ્યવસ્થાભવિષ્યદ્વાદિનાં વચનાનામ્ ઇતિ સારમ્।
XIII સઙ્કીર્ણદ્વારેણ પ્રવિશત; યતો નરકગમનાય યદ્ દ્વારં તદ્ વિસ્તીર્ણં યચ્ચ વર્ત્મ તદ્ બૃહત્ તેન બહવઃ પ્રવિશન્તિ।

XIV અપરં સ્વર્ગગમનાય યદ્ દ્વારં તત્ કીદૃક્ સંકીર્ણં યચ્ચ વર્త્મ તત્ કીદૃગ્ દુર્ગમમ્ તદ્દુદ્દેષ્ટારઃ કિયન્તોઽલ્પાઃ।
XV અપરઞ્ચ યે જના મેષવેશેન યુષ્માકં સમીપમ્ આગચ્છન્તિ, કિન્ત્વન્તર્દુરન્તા વૃકા એતાદૃશેભ્યો ભવિષ્યદ્વાદિભ્યઃ સાવધાના
ભવત, યૂયં ફલેન તાન્ પરિચેતું શક્નુથ।
XVI મનુજાઃ કિં કણ્ટકિનો વૃક્ષાદ્ દ્રાક્ષાફલાનિ શૃગાલકોલિતશ્ચ ઉડુમ્બરફલાનિ શાતયન્તિ?
XVII તદ્વદ્ ઉત્તમ એવ પાદપ ઉત્તમફલાનિ જનયતિ, અધમપાદપએવાધમફલાનિ જનયતિ।
XVIII કિન્તૂત્તમપાદપઃ કદાપ્યધમફલાનિ જનયિતું ન શક્નોતિ, તથાધમોપિ પાદપ ઉત્તમફલાનિ જનયિતું ન શક્નોતિ।
XIX અપરં યે યે પાદપા અધમફલાનિ જનયન્તિ, તે કૃત્તા વહ્નૌ ક્ષિપ્યન્તે।
XX અતએવ યૂયં ફલેન તાન્ પરિચેષ્યથ।
XXI યે જના માં પ્રભું વદન્તિ, તે સર્વ્વે સ્વર્ગરાજ્યં પ્રવેક્ષ્યન્તિ તન્ન, કિન્તુ યો માનવો મમ સ્વર્ગસ્થસ્ય પિતુરિષ્ટં કર્મ્મ કરોતિ સ
એવ પ્રવેક્ષ્યતિ।
XXII તદ્ દિને બહવો માં વદિષ્યન્તિ, હે પ્રભો હે પ્રભો, તવ નામ્ના કિમસ્માભિ ર્ભવિષ્યદ્વાક્યં ન વ્યાહૃતં? તવ નામ્ના ભૂતાઃ કિં
ન ત્યાજિતાઃ? તવ નામ્ના કિં નાનાદ્ભુતાનિ કર્મ્માણિ ન કૃતાનિ?
XXIII તદાહં વદિષ્યામિ, હે કુકર્મ્મકારિણો યુષ્માન્ અહં ન વેદ્મિ, યૂયં મત્સમીપાદ્ દૂરીભવત।
XXIV યઃ કશ્ચિત્ મમૈતાઃ કથાઃ શ્રુત્વા પાલયતિ, સ પાષાણોપરિ ગૃહનિર્મ્માત્રા જ્ઞાનિના સહ મયોપમીયતે।
XXV યતો વૃષ્ટૌ સત્યામ્ આપ્લાવ આગતે વાયૌ વાતે ચ તેષુ તદ્ગેહં લગ્નેષુ પાષાણોપરિ તસ્ય ભિત્તેસ્તન્ન પતતિ।
XXVI કિન્તુ યઃ કશ્ચિત્ મમૈતાઃ કથાઃ શ્રુત્વા ન પાલયતિ સ સૈકતે ગેહનિર્મ્માત્રા ઽજ્ઞાનિના ઉપમીયતે।
XXVII યતો જલવૃષ્ટૌ સત્યામ્ આપ્લાવ આગતે પવને વાતે ચ તૈ ર્ગૃહે સમાઘાતે તત્ પતતિ તત્પતનં મહદ્ ભવતિ।
XXVIII યીશુનૈતેષુ વાક્યેષુ સમાપિતેષુ માનવાસ્તદીયોપદેશમ્ આશ્ચર્ય્યં મેનિરે।
XXIX યસ્માત્ સ ઉપાધ્યાયા ઇવ તાન્ નોપદિદેશ કિન્તુ સમર્થપુરુષઇવ સમુપદિદેશ।

# VIII

I યદા સ પર્વ્વતાદ્ અવારોહત્ તદા બહવો માનવાસ્તત્પશ્ચાદ્ વવ્રજુઃ।
II એકઃ કુષ્ઠવાન્ આગત્ય તં પ્રણમ્ય બભાષે, હે પ્રભો, યદિ ભવાન્ સંમન્યતે, તર્હિ માં નિરામયં કર્ત્તું શક્નોતિ।
III તતો યીશુઃ કરં પ્રસાર્ય્ય તસ્યાઙ્ગં સ્પૃશન્ વ્યાજહાર, સમ્મન્યેઽહં ત્વં નિરામયો ભવ; તેન સ તત્ક્ષણાત્ કુષ્ઠેનામોચિ।
IV તતો યીશુસ્તં જગાદ, અવધેહિ કથામેતાં કશ્ચિદપિ મા બ્રૂહિ, કિન્તુ યાજકસ્ય સન્નિધિં ગત્વા સ્વાત્માનં દર્શય મનુજેભ્યો
નિજનિરામયત્વં પ્રમાણયિતું મૂસાનિરૂપિતં દ્રવ્યમ્ ઉત્સૃજ ચ।
V તદનન્તરં યીશુના કફર્નાહૂમ્નામનિ નગરે પ્રવિષ્ટે કશ્ચિત્ શતસેનાપતિસ્તત્સમીપમ્ આગત્ય વિનીય બભાષે,
VI હે પ્રભો, મદીય એકો દાસઃ પક્ષાઘાતવ્યાધિના ભૃશં વ્યથિતઃ, સતુ શયનીય આસ્તે।
VII તદાનીં યીશુસ્તસ્મૈ કથિતવાન્, અહં ગત્વા તં નિરામયં કરિષ્યામિ।
VIII તતઃ સ શતસેનાપતિઃ પ્રત્યવદત્, હે પ્રભો, ભવાન્ યત્ મમ ગેહમધ્યં યાતિ તદ્યોગ્યભાજનં નાહમસ્મિ; વાઙ્માત્રમ્ આદિશતુ,
તેનૈવ મમ દાસો નિરામયો ભવિષ્યતિ।
IX યતો મયિ પરનિઘ્નેઽપિ મમ નિદેશવશ્યાઃ કતિ કતિ સેનાઃ સન્તિ, તત એકસ્મિન્ યાહીત્યુક્તે સ યાતિ, તદન્યસ્મિન્ એહીત્યુક્તે
સ આયાતિ, તથા મમ નિજદાસે કર્મ્મૈતત્ કુર્વ્વિત્યુક્તે સ તત્ કરોતિ।
X તદાનીં યીશુસ્તસ્યૈતત્ વચો નિશમ્ય વિસ્મયાપન્નોઽભૂત્; નિજપશ્ચાદ્ગામિનો માનવાન્ અવોચ્ચ, યુષ્માન્ તથ્યં વચ્મિ,
ઇસ્રાયેલીયલોકાનાં મધ્યેઽપિ નૈતાદૃશો વિશ્વાસો મયા પ્રાપ્તઃ।
XI અન્યચ્ચાહં યુષ્માન્ વદામિ, બહવઃ પૂર્વ્વસ્યાઃ પશ્ચિમાયાશ્ચ દિશ આગત્ય ઇબ્રાહીમા ઇસ્હાકા યાકૂબા ચ સાકમ્ મિલિત્વા
સમુપવેક્ષ્યન્તિ;
XII કિન્તુ યત્ર સ્થાને રોદનદન્તઘર્ષણે ભવતસ્તસ્મિન્ બહિર્ભૂતતમિસ્રે રાજ્યસ્ય સન્તાના નિક્ષેસ્યન્તે।
XIII તતઃ પરં યીશુસ્તં શતસેનાપતિં જગાદ, યાહિ, તવ પ્રતીત્યનુસારતો મઙ્ગલં ભૂયાત્; તદા તસ્મિન્નેવ દણ્ડે તદીયદાસો નિરામયો
બભૂવ।
XIV અનન્તરં યીશુઃ પિતરસ્ય ગેહમુપસ્થાય જ્વરેણ પીડિતાં શયનીયસ્થિતાં તસ્ય શ્વશ્રૂં વીક્ષાઞ્ચક્રે।
XV તતસ્તેન તસ્યાઃ કરસ્ય સ્પૃષ્ટતવાત્ જ્વરસ્તાં તત્યાજ, તદા સા સમુત્થાય તાન્ સિષેવે।
XVI અનન્તરં સન્ધ્યાયાં સત્યાં બહુશો ભૂતગ્રસ્તમનુજાન્ તસ્ય સમીપમ્ આનિન્યુઃ સ ચ વાક્યેન ભૂતાન્ ત્યાજયામાસ,
સર્વ્વપ્રકારપીડિતજનાંશ્ચ નિરામયાન્ ચકાર;
XVII તસ્માત્, સર્વ્વા દુર્બ્બલતાસ્માકં તેનૈવ પરિધારિતા। અસ્માકં સકલં વ્યાધિં સએવ સંગૃહીતવાન્। યદેતદ્વચનં
યિશયિયભવિષ્યદ્વાદિનોક્તમાસીત્, તત્તદા સફલમભવત્।
XVIII અનન્તરં યીશુશ્ચતુર્દિક્ષુ જનનિવહં વિલોક્ય તટિન્યાઃ પારં યાતું શિષ્યાન્ આદિદેશ।
XIX તદાનીમ્ એક ઉપાધ્યાય આગત્ય કથિતવાન્, હે ગુરો, ભવાન્ યત્ર યાસ્યતિ તત્રાહમપિ ભવતઃ પશ્ચાદ્ યાસ્યામિ।
XX તતો યીશુ ર્જગાદ, ક્રોષ્ટુઃ સ્થાતું સ્થાનં વિદ્યતે, વિહાયસો વિહઙ્ગમાનાં નીડાનિ ચ સન્તિ; કિન્તુ મનુષ્યપુત્રસ્ય શિરઃ સ્થાપયિતું
સ્થાનં ન વિદ્યતે।
XXI અનન્તરમ્ અપર એકઃ શિષ્યસ્તં બભાષે, હે પ્રભો, પ્રથમતો મમ પિતરં શ્મશાને નિધાતું ગમનાર્થં મામ્ અનુમન્યસ્વ।
XXII તતો યીશુરુક્તવાન્ મૃતા મૃતાન્ શ્મશાને નિદધતુ, ત્વં મમ પશ્ચાદ્ આગચ્છ।
XXIII અનન્તરં તસ્મિન્ નાવમારૂઢે તસ્ય શિષ્યાસ્તત્પશ્ચાત્ જગ્મુઃ।
XXIV પશ્ચાત્ સાગરસ્ય મધ્યં તેષુ ગતેષુ તાદૃશઃ પ્રબલો ઝઞ્ભ્શનિલ ઉદતિષ્ઠત્, યેન મહાતરઙ્ગ ઉત્થાય તરણિં છાદિતવાન્,
કિન્તુ સ નિદ્રિત આસીત્।

XXV તદા શિષ્યા આગત્ય તસ્ય નિદ્રાભઙ્ગં કૃત્વા કથયામાસુઃ, હે પ્રભો, વયં મ્રિયામહે, ભવાન્ અસ્માકં પ્રાણાન્ રક્ષતુ।

XXVI તદા સ તાન્ ઉક્તવાન્, હે અલ્પવિશ્વાસિનો યૂયં કુતો વિભીથ? ततः સ ઉત્થાય વાતં સાગરઞ્ચ તર્જયામાસ, તતો નિર્વ્વાતમભવત્।

XXVII અપરં મનુજા વિસ્મયં વિલોક્ય કથયામાસુઃ, અહો વાતસરિત્પતી અસ્ય કિમાજ્ઞાગ્રાહિણૌ? કીદૃશોઽયં માનવઃ।

XXVIII અનન્તરં સ પારં ગત્વા ગિદેરીયદેશમ્ ઉપસ્થિતવાન્; તદા દ્વૌ ભૂતગ્રસ્તમનુજૌ શ્મશાનસ્થાનાદ્ બહિ ર્ભૂત્વા તં સાક્ષાત્ કૃતવન્તૌ, તાવેતાદૃશૌ પ્રચણ્ડાવાસ્તાં યત્ તેન સ્થાનેન કોપિ યાતું નાશક્નોત્।

XXIX તાવુચ્ચૈઃ કથયામાસતુઃ, હે ઈશ્વરસ્ય સૂનો યીશો, ત્વયા સાકમ્ આવયોઃ કઃ સમ્બન્ધઃ? નિરૂપિતકાલાત્ પ્રાગેવ કિમાવાભ્યાં યાતનાં દાતુમ્ અત્રાગતોસિ?

XXX તદાનીં તાભ્યાં કિઞ્ચિદ્ દૂરે વરાહાણામ્ એકો મહાવ્રજોઽચરત્।

XXXI તતો ભૂતૌ તૌ તસ્યાન્તિકે વિનીય કથયામાસતુઃ, યદ્યાવાં ત્યાજયસિ, તર્હિ વરાહાણાં મધ્યેવ્રજમ્ આવાં પ્રેરય।

XXXII તદા યીશુરવદત્ યાતં, અનન્તરં તૌ યદા મનુજૌ વિહાય વરાહાન્ આશ્રિતવન્તૌ, તદા તે સર્વ્વે વરાહા ઉચ્ચસ્થાનાત્ મહાજવેન ધાવન્તઃ સાગરીયતોયે મજ્જન્તો મમ્રુઃ।

XXXIII તતો વરાહરક્ષકાઃ પલાયમાના મધ્યેનગરં તૌ ભૂતગ્રસ્તૌ પ્રતિ યદ્યદ્ અઘટત, તાઃ સર્વ્વવાર્ત્તા અવદન્।

XXXIV તતો નાગરિકાઃ સર્વ્વે મનુજા યીશું સાક્ષાત્ કર્ત્તું બહિરાયાતાઃ તઞ્ચ વિલોક્ય પ્રાર્થયાઞ્ચક્રિરે ભવાન્ અસ્માકં સીમાતો યાતુ।

# IX

I અનન્તરં યીશુ ર્નૌકામારુહ્ય પુનઃ પારમાગત્ય નિજગ્રામમ્ આયયૌ।

II તતઃ કતિપયા જના એકં પક્ષાઘાતિનં સ્વટ્ટોપરિ શાયયિત્વા તત્સમીપમ્ આનયન્; તતો યીશુસ્તેષાં પ્રતીતિં વિજ્ઞાય તં પક્ષાઘાતિનં જગાદ, હે પુત્ર, સુસ્થિરો ભવ, તવ કલુષસ્ય મર્ષણં જાતમ્।

III તાં કથાં નિશમ્ય કિયન્ત ઉપાધ્યાયા મનઃસુ ચિન્તિતવન્ત એષ મનુજ ઈશ્વરં નિન્દતિ।

IV તતઃ સ તેષામ્ એતાદૃશીં ચિન્તાં વિજ્ઞાય કથિતવાન્, યૂયં મનઃસુ કૃત એતાદૃશીં કુચિન્તાં કુરુથ?

V તવ પાપમર્ષણં જાતં, યદ્વા ત્વમુત્થાય ગચ્છ, દ્વયોરનયો ર્વાક્યયોઃ કિં વાક્યં વક્તું સુગમં?

VI કિન્તુ મેદિન્યાં કલુષં ક્ષમિતું મનુજસુતસ્ય સામર્થ્યમસ્તીતિ યૂયં યથા જાનીથ, તદર્થં સ તં પક્ષાઘાતિનં ગદિતવાન્, ઉત્તિષ્ઠ, નિજશયનીયં આદાય ગેહં ગચ્છ।

VII તતઃ સ તત્ક્ષણાદ્ ઉત્થાય નિજગેહં પ્રસ્થિતવાન્।

VIII માનવા ઇત્થં વિલોક્ય વિસ્મયં મેનિરે, ઈશ્વરેણ માનવાય સામર્થ્યમ્ ઈદૃશં દત્તં ઇતિ કારણાત્ તં ધન્યં બભાષિરે ચ।

IX અનન્તરં યીશુસ્તત્સ્થાનાદ્ ગચ્છન્ ગચ્છન્ કરસંગ્રહસ્થાને સમુપવિષ્ટં મથિનામાનમ્ એકં મનુજં વિલોક્ય તં બભાષે, મમ પશ્ચાદ્ આગચ્છ, તતઃ સ ઉત્થાય તસ્ય પશ્ચાદ્ વવ્રાજ।

X તતઃ પરં યીશૌ ગૃહે ભોક્તુમ્ ઉપવિષ્ટે બહવઃ કરસંગ્રાહિણઃ કલુષિણશ્ચ માનવા આગત્ય તેન સાકં તસ્ય શિષ્યૈશ્ચ સાકમ્ ઉપવિવિશુઃ।

XI ફિરૂશિનસ્તદ્ દૃષ્ટ્વા તસ્ય શિષ્યાન્ બભાષિરે, યુષ્માકં ગુરુઃ કિં નિમિત્તં કરસંગ્રાહિભિઃ કલુષિભિશ્ચ સાકં ભુંક્તે?

XII યીશુસ્તત્ શ્રુત્વા તાન્ પ્રત્યવદત્, નિરામયલોકાનાં ચિકિત્સકેન પ્રયોજનં નાસ્તિ, કિન્તુ સામયલોકાનાં પ્રયોજનમાસ્તે।

XIII અતો યૂયં યાત્વા વચનસ્યાસ્યાર્થં શિક્ષધ્વમ્, દયાયાં મે યથા પ્રીતિ ર્ન તથા યજ્ઞકર્મ્મણિ। યતોઽહં ધાર્મ્મિકાન્ આહ્વાતું નાગતોઽસ્મિ કિન્તુ મનઃ પરિવર્ત્તયિતું પાપિન આહ્વાતુમ્ આગતોઽસ્મિ।

XIV અનન્તરં યોહનઃ શિષ્યાસ્તસ્ય સમીપમ્ આગત્ય કથયામાસુઃ, ફિરૂશિનો વયઞ્ચ પુનઃ પુનરુપવસામઃ, કિન્તુ તવ શિષ્યા નોપવસન્તિ, કુતઃ?

XV તદા યીશુસ્તાન્ અવોચત્ યાવત્ સખીનાં સંઙ્ગે કન્યાયા વરસ્તિષ્ઠતિ, તાવત્ કિં તે વિલાપં કર્ત્તું શક્લુવન્તિ? કિન્તુ યદા તેષાં સંઙ્ગાદ્ વરં નયન્તિ, તાદૃશઃ સમય આગમિષ્યતિ, તદા તે ઉપવત્સ્યન્તિ।

XVI પુરાતનવસને કોપિ નવીનવસ્ત્રં ન યોજયતિ, યસ્માત્ તેન યોજિતેન પુરાતનવસનં છિનત્તિ તચ્છિદ્રઞ્ચ બહુકુત્સિતં દૃશ્યતે।

XVII અન્યઞ્ચ પુરાતનકુત્વાં કોપિ નવાનગોસ્તનીરસં ન નિદધાતિ, યસ્માત્ તથા કૃતે કુતૂ ર્વિદીર્ય્યતે તેન ગોસ્તનીરસઃ પતતિ કુતૂશ્ચ નશ્યતિ; તસ્માત્ નવીનાયાં કુત્વાં નવીનો ગોસ્તનીરસઃ સ્થાપ્યતે, તેન દ્વયોરવનં ભવતિ।

XVIII અપરં તેનૈતત્કથાકથનકાલે એકોઽધિપતિસ્તં પ્રણમ્ય બભાષે, મમ દુહિતા પ્રાયેણૈતાવત્કાલે મૃતા, તસ્માદ્ ભવાનાગત્ય તસ્યા ગાત્રે હસ્તમર્પયતુ, તેન સા જીવિષ્યતિ।

XIX તદાનીં યીશુઃ શિષ્યૈઃ સાકમ્ ઉત્થાય તસ્ય પશ્ચાદ્ વવ્રાજ।

XX ઇત્યનન્તરે દ્વાદશવત્સરાન્ યાવત્ પ્રદરામયેન શીર્ણૈકા નારી તસ્ય પશ્ચાદ્ આગત્ય તસ્ય વસનસ્ય ગ્રન્થિં પસ્પર્શ;

XXI યસ્માત્ મયા કેવલં તસ્ય વસનં સ્પૃષ્ટ્વા સ્વાસ્થ્યં પ્રાપ્સ્યતે, સા નારીતિ મનસિ નિશ્ચિતવતી।

XXII તતો યીશુર્વદનં પરાવર્ત્ત્ય તાં જગાદ, હે કન્યે, ત્વં સુસ્થિરા ભવ, તવ વિશ્વાસસ્ત્વાં સ્વસ્થામકાર્ષીત્। એતદ્વાક્યે ગદિતએવ સા યોષિત્ સ્વસ્થાભૂત્।

XXIII અપરં યીશુસ્તસ્યાધ્યક્ષસ્ય ગેહં ગત્વા વાદકપ્રભૃતીન્ બહૂન્ લોકાન્ શબ્દાયમાનાન્ વિલોક્ય તાન્ અવદત્,

XXIV પન્થાનં ત્યજ, કન્યેયં નામ્રિયત નિદ્રિતાસ્તે; કથામેતાં શ્રુત્વા તે તમુપજહસુઃ।

XXV કિન્તુ સર્વ્વેષુ બહિષ્કૃતેષુ સોઽભ્યન્તરં ગત્વા કન્યાયાઃ કરં ધૃતવાન્, તેન સોદતિષ્ઠત્;

XXVI તતસ્તત્કર્મ્મણો યશઃ કૃત્સ્નં તં દેશં વ્યાપ્તવત્।

XXVII તતઃ પરં યીશુસ્તસ્માત્ સ્થાનાદ્ યાત્રાં ચકાર; તદા હે દાયૂદઃ સન્તાન, અસ્માન્ દયસ્વ, ઇતિ વદન્તૌ દ્વૌ જનાવન્ધૌ પ્રોચૈરાહૂયન્તૌ તત્પશ્ચાદ્ વવ્રજતુઃ।

XXVIII તતો યીશૌ ગેહમધ્યં પ્રવિષ્ટં તાવપિ તસ્ય સમીપમ્ ઉપસ્થિતવન્તૌ, તદાનીં સ તૌ પૃષ્ટવાન્ કર્મ્મૈતત્ કર્ત્તું મમ સામર્થ્યમ્
આસ્તે, યુવાં કિમિતિ પ્રતીથઃ? તદા તૌ પ્રત્યૂચતુઃ, સત્યં પ્રભો।
XXIX તદાનીં સ તયો ર્લોચનાનિ સ્પૃશન્ બભાષે, યુવયોઃ પ્રતીત્યનુસારાદ્ યુવયો ર્મઙ્ગલં ભૂયાત્। તેન તત્ક્ષણાત્ તયો ર્નેત્રાણિ
પ્રસન્નાન્યભવન્,
XXX પશ્ચાદ્ યીશુસ્તૌ દૃઢમાજ્ઞાપ્ય જગાદ, અવધત્તમ્ એતાં કથાં કોપિ મનુજો મ જાનીયાત્।
XXXI કિન્તુ તૌ પ્રસ્થાય તસ્મિન્ કૃત્સ્ને દેશે તસ્ય કીર્ત્તિં પ્રકાશયામાસતુઃ।
XXXII અપરં તૌ બહિર્યાત એતસ્મિન્નન્તરે મનુજા એકં ભૂતગ્રસ્તમૂકં તસ્ય સમીપમ્ આનીતવન્તઃ।
XXXIII તેન ભૂતે ત્યાજિતે સ મૂકઃ કથાં કથયિતું પ્રારભત, તેન જના વિસ્મયં વિજ્ઞાય કથયામાસુઃ, ઇસ્રાયેલો વંશે કદાપિ
નેદૃગદૃશ્યત;
XXXIV કિન્તુ ફિરૂશિનઃ કથયાઞ્ચક્રુઃ ભૂતાધિપતિના સ ભૂતાન્ ત્યાજયતિ।
XXXV તતઃ પરં યીશુસ્તેષાં ભજનભવન ઉપદિશન્ રાજ્યસ્ય સુસંવાદં પ્રચારયન્ લોકાનાં યસ્ય ય આમયો યા ચ પીડાસીત્, તાન્
શમયન્ શમયંશ્ચ સર્વ્વાણિ નગરાણિ ગ્રામાંશ્ચ બભ્રામ।
XXXVI અન્યચ્ચ મનુજાન્ વ્યાકુલાન્ અરક્ષકમેષાનિવ ચ ત્યક્તાન્ નિરીક્ષ્ય તેષુ કારુણિકઃ સન્ શિષ્યાન્ અવદત્,
XXXVII શસ્યાનિ પ્રચુરાણિ સન્તિ, કિન્તુ છેત્તારઃ સ્તોકાઃ।
XXXVIII ક્ષેત્રં પ્રત્યપરાન્ છેદકાન્ પ્રહેતું શસ્યસ્વામિનં પ્રાર્થયધ્વમ્।

# X

I અનન્તરં યીશુ ર્દ્વાદશશિષ્યાન્ આહૂયામેધ્યભૂતાન્ ત્યાજયિતું સર્વ્વપ્રકારરોગાન્ પીડાશ્ચ શમયિતું તેભ્યઃ સામર્થ્યમદાત્।
II તેષાં દ્વાદશપ્રેષ્યાણાં નામાન્યેતાનિ। પ્રથમં શિમોન્ યં પિતરં વદન્તિ, તતઃ પરં તસ્ય સહજ આન્દ્રિયઃ, સિવદિયસ્ય પુત્રો યાકૂબ્
III તસ્ય સહજો યોહન્; ફિલિપ્ બર્થલમય્ થોમાઃ કરસંગ્રાહી મથિઃ, આલ્ફેયપુત્રો યાકૂબ્,
IV કિનાનીયઃ શિમોન્, ય ઈષ્કરિયોતીયયિહૂદાઃ પ્રીષ્ટં પરકરેઽર્પયત્।
V એતાન્ દ્વાદશશિષ્યાન્ યીશુઃ પ્રેષયન્ ઇત્યાજ્ઞાપયત્, યૂયમ્ અન્યદેશીયાનાં પદવીં શેમિરોણીયાનાં કિમપિ નગરઞ્ચ ન પ્રવિશ્યે
VI ઇસ્રાયેલ્ગોત્રસ્ય હારિતા યે યે મેષાસ્તેષામેવ સમીપં યાત।
VII ગત્વા ગત્વા સ્વર્ગસ્ય રાજત્વં સવિધમભવત્, એતાં કથાં પ્રચારયત।
VIII આમયગ્રસ્તાન્ સ્વસ્થાન્ કુરુત, કુષ્ઠિનઃ પરિષ્કુરુત, મૃતલોકાન્ જીવયત, ભૂતાન્ ત્યાજયત, વિના મૂલ્યં યૂયમ્ અલભધ્વં
વિનૈવ મૂલ્યં વિશ્રાણયત।
IX કિન્તુ સ્વેષાં કટિબન્ધેષુ સ્વર્ણરૂપ્યતામ્રાણાં કિમપિ ન ગૃહ્લીત।
X અન્યચ્ચ યાત્રાયૈ ચેલસમ્પુટં વા દ્વિતીયવસનં વા પાદુકે વા યષ્ટિઃ, એતાન્ મા ગૃહ્લીત, યતઃ કાર્ય્યકૃત્ ભર્ત્તું યોગ્યો ભવતિ।
XI અપરં યૂયં યત્ પુરં યઞ્ચ ગ્રામં પ્રવિશથ, તત્ર યો જનો યોગ્યપાત્રં તમવગત્ય યાનકાલં યાવત્ તત્ર તિષ્ઠત।
XII યદા યૂયં તદ્ગેહં પ્રવિશથ, તદા તમાશિષં વદત।
XIII યદિ સ યોગ્યપાત્રં ભવતિ, તર્હિ તત્કલ્યાણં તસ્મૈ ભવિષ્યતિ, નોચેત્ સાશીર્યુષ્મભ્યમેવ ભવિષ્યતિ।
XIV કિન્તુ યે જના યુષ્માકમાતિથ્યં ન વિદધતિ યુષ્માકં કથાઞ્ચ ન શૃણ્વન્તિ તેષાં ગેહાત્ પુરાદ્વા પ્રસ્થાનકાલે સ્વપદૂલીઃ પાતયત।
XV યુષ્માનહં તથ્યં વચ્મિ વિચારદિને તત્પુરસ્ય દશાતઃ સિદોમમોરાપુરયોર્દશા સહ્યતરા ભવિષ્યતિ।
XVI પશ્યત, વૃકયૂથમધ્યે મેષઃ યથાવિસ્તથા યુષ્માન પ્રહિણોમિ, તસ્માદ્ યૂયમ્ અહિરિવ સતર્કાઃ કપોતાઇવાહિંસકા ભવત।
XVII નૃભ્યઃ સાવધાના ભવત; યતસ્તૈ ર્યૂયં રાજસંસદિ સમર્પિષ્યધ્વે તેષાં ભજનગેહે પ્રહારિષ્યધ્વે।
XVIII યૂયં મન્નામહેતોઃ શાસ્તૃણાં રાજ્ઞાઞ્ચ સમક્ષં તાનન્યદેશિનશ્ચાધિ સાક્ષિત્વાર્થમાનેષ્યધ્વે।
XIX કિન્ત્વિત્થં સમર્પિતા યૂયં કથં કિમુત્તરં વક્ષ્યથ તત્ર મા ચિન્તયત, યતસ્તદા યુષ્માભિ ર્યદ્ વક્તવ્યં તત્ તદ્દણ્ડે યુષ્મન્મનઃ સુ
સમુપસ્થાસ્યતિ।
XX યસ્માત્ તદા યો વક્ષ્યતિ સ ન યૂયં કિન્તુ યુષ્માકમન્તરસ્થઃ પિત્રાત્મા।
XXI સહજઃ સહજં તાતઃ સુતઞ્ચ મૃતૌ સમર્પયિષ્યતિ, અપત્યાગિ સ્વસ્વપિત્રો ર્વિપક્ષીભૂય તૌ ઘાતયિષ્યન્તિ।
XXII મન્નમહેતોઃ સર્વ્વે જના યુષ્માન્ ઋતીયિષ્યન્તે, કિન્તુ યઃ શેષં યાવદ્ ધૈર્ય્યં ધૃત્વા સ્થાસ્યતિ, સ ત્રાયિષ્યતે।
XXIII તૈ ર્યદા યૂયમેકપુરે તાડિષ્યધ્વે, તદા યૂયમન્યપુરં પલાયધ્વં યુષ્માનહં તથ્યં વચ્મિ યાવન્મનુજસુતો નૈતિ તાવદ્
ઇસ્રાયેલ્દેશીયસર્વ્વનગરભ્રમણં સમાપયિતું ન શક્ષ્યથ।
XXIV ગુરોઃ શિષ્યો ન મહાન્, પ્રભોર્દાસો ન મહાન્।
XXV યદિ શિષ્યો નિજગુરો ર્દાસશ્ચ સ્વપ્રભોઃ સમાનો ભવતિ તર્હિ તદ્ યથેષ્ટં ચેત્તૈર્ગૃહપતિર્ભૂતરાજ ઉચ્યતે, તર્હિ પરિવારાઃ કિં
તથા ન વક્ષ્યન્તે?
XXVI કિન્તુ તેભ્યો યૂયં મા બિભીત, યતો યન્ન પ્રકાશિષ્યતે, તાદૃક્ છાદિતં કિમપિ નાસ્તિ, યચ્ચ ન વ્યઞ્ચિષ્યતે, તાદૃગ્ ગુપ્તં
કિમપિ નાસ્તિ।
XXVII યદહં યુષ્માન્ તમસિ વચ્મિ તદ્ યુષ્માભિર્દીપ્તૌ કથ્યતાં; કર્ણાભ્યાં યત્ શ્રૂયતે તદ્ ગેહોપરિ પ્રચાર્ય્યતાં।
XXVIII યે કાયં હન્તું શક્નુવન્તિ નાત્માનં, તેભ્યો મા ભૈષ્ટ; યઃ કાયાત્માનૌ નિરયે નાશયિતું, શક્નોતિ, તતો બિભીત।
XXIX દ્વૌ ચટકૌ કિમેકતામ્રમુદ્રયા ન વિક્રીયેતે? તથાપિ યુષ્મત્તાતાનુમતિં વિના તેષામેકોપિ ભુવિ ન પતતિ।
XXX યુષ્મચ્છિરસાં સર્વ્વકચા ગણિતાઃ સન્તિ।
XXXI અતો મા બિભીત, યૂયં બહુચટકેભ્યો બહુમૂલ્યાઃ।
XXXII યો મનુજસાક્ષાન્મામઙ્ગીકુરુતે તમહં સ્વર્ગસ્થતાતસાક્ષાદઙ્ગીકરિષ્યે।
XXXIII પૃથ્વ્યામહં શાન્તિં દાતુમાગતઇતિ માનુભવત, શાન્તિં દાતું ન કિન્ત્વસિં।

XXXIV પિતૃમાતૃશ્વશ્રૂભિઃ સાકં સુતસુતાબધૂ ર્વિરોધયિતુઞ્ચાગતે◌ાસ્મિ।
XXXV તતઃ સ્વસ્વપરિવારએવ નૃશત્રુ ર્ભવિતા।
XXXVI યઃ પિતરિ માતરિ વા મત્તોધિકં પ્રીયતે, સ ન મદર્હઃ;
XXXVII યશ્ચ સુતે સુતાયાં વા મત્તોધિકં પ્રીયતે, સે◌ાપિ ન મદર્હઃ।
XXXVIII યઃ સ્વક્રુશં ગૃહ્લન્ મત્પશ્ચાન્નૈતિ, સે◌ાપિ ન મદર્હઃ।
XXXIX યઃ સ્વપ્રાણાનવતિ, સ તાન્ હારયિષ્યતે, યસ્તુ મત્કૃતે સ્વપ્રાણાન્ હારયતિ, સ તાનવતિ।
XL યો યુષ્માકમાતિથ્યં વિદધાતિ, સ મમાતિથ્યં વિદધાતિ, યશ્ચ મમાતિથ્યં વિદધાતિ, સ મત્પ્રેરકસ્યાતિથ્યં વિદધાતિ।
XLI યો ભવિષ્યદ્વાદીતિ જ્ઞાત્વા તસ્યાતિથ્યં વિધત્તે, સ ભવિષ્યદ્વાદિનઃ ફલં લપ્સ્યતે, યશ્ચ ધાર્મ્મિક ઇતિ વિદિત્વા તસ્યાતિથ્યં
વિધત્તે સ ધાર્મ્મિકમાનવસ્ય ફલં પ્રાપ્સ્યતિ।
XLII યશ્ચ કશ્ચિત્ એતેષાં ક્ષુદ્રનરાણામ્ યં કઞ્ચનૈકં શિષ્ય ઇતિ વિદિત્વા કંસૈકં શીતલસલિલં તસ્મૈ દત્તે, યુષ્માનહં તથ્યં વદામિ,
સ કેનાપિ પ્રકારેણ ફલેન ન વઞ્ચિષ્યતે।

# XI

I ઇત્થં યીશુઃ સ્વદ્વાદશશિષ્યાણામાજ્ઞાપનં સમાપ્ય પુરે પુર ઉપદેષ્ટું સુસંવાદં પ્રચારયિતું તત્સ્થાનાત્ પ્રતસ્થે।
II અનન્તરં યોહન્ કારાયાં તિષ્ઠન્ ખ્રિષ્ટસ્ય કર્મ્મણાં વાર્ત્તં પ્રાપ્ય યસ્યાગમનવાર્ત્તાસીત્ સએવ કિં ત્વં? વા વયમન્યમ્
અપેક્ષિષ્યામહે?
III એતત્ પ્રષ્ટું નિજૌ દ્વૌ શિષ્યૌ પ્રાહિણોત્।
IV યીશુઃ પ્રત્યવોચત્, અન્ધા નેત્રાણિ લભન્તે, ખઞ્ચા ગચ્છન્તિ, કુષ્ઠિનઃ સ્વસ્થા ભવન્તિ, બધિરાઃ શૃણ્વન્તિ, મૃતા જીવન્ત
ઉત્તિષ્ઠન્તિ, દરિદ્રાણાં સમીપે સુસંવાદઃ પ્રચાર્ય્યત,
V એતાનિ યદ્યદ્ યુવાં શૃણુથઃ પશ્યથશ્ચ ગત્વા તદ્વાર્ત્તાં યોહનં ગદતં।
VI યસ્યાહં ન વિઘ્નીભવામિ, સએવ ધન્યઃ।
VII અનન્તરં તયોઃ પ્રસ્થિતયો ર્યીશુ ર્યોહનમ્ ઉદ્દિશ્ય જનાન્ જગાદ, યૂયં કિં દ્રષ્ટું વહિર્મધ્યેપ્રાન્તરમ્ અગચ્છત? કિં વાતેન કમ્પિતં
નલં?
VIII વા કિં વીક્ષિતું વહિર્ગતવન્તઃ? કિં પરિહિતસૂક્ષ્મવસનં મનુજમેકં? પશ્યત, યે સૂક્ષ્મવસનાનિ પરિદધતિ, તે રાજધાન્યાં
તિષ્ઠન્તિ।
IX તર્હિ યૂયં કિં દ્રષ્ટું બહિરગમત, કિમેકં ભવિષ્યદ્વાદિનં? તદેવ સત્યં। યુષ્માનહં વદામિ, સ ભવિષ્યદ્વાદિનોપિ મહાન્;
X યતઃ, પશ્ય સ્વકીયદૂતોયં ત્વદગ્રે પ્રેષ્યતે મયા। સ ગત્વા તવ પન્થાનં સ્મયક્ પરિષ્કરિષ્યતિ॥ એતદ્વચનં યમધિ લિખિતમાસ્તે
સોઽયં યોહન્।
XI અપરં યુષ્માનહં તથ્યં બ્રવીમિ, મજ્જયિતુ ર્યોહનઃ શ્રેષ્ઠઃ કોપિ નારીતો નાજાયત; તથાપિ સ્વર્ગરાજ્યમધ્યે સર્વ્વેભ્યો યઃ ક્ષુદ્રઃ
સ યોહનઃ શ્રેષ્ઠઃ।
XII અપરઞ્ચ આ યોહનોઽદ્ય યાવત્ સ્વર્ગરાજ્યં બલાદાક્રાન્તં ભવતિ આક્રમિનશ્ચ જના બલેન તદધિકુર્વ્વન્તિ।
XIII યતો યોહનં યાવત્ સર્વ્વભવિષ્યદ્વાદિભિ ર્વ્યવસ્થયા ચ ઉપદેશઃ પ્રાકાશ્યત।
XIV યદિ યૂયમિદં વાક્યં ગ્રહીતું શક્નુથ, તર્હિ શ્રેયઃ, યસ્યાગમનસ્ય વચનમાસ્તે સોઽયમ્ એલિયઃ।
XV યસ્ય શ્રોતું કર્ણૌ સ્તઃ સ શૃણોતુ।
XVI એતે વિદ્યમાનજનાઃ કૈ ર્મયોપમીયન્તે? યે બાલકા હટ્ટ ઉપવિશ્ય સ્વં સ્વં બન્ધુમાહૂય વદન્તિ,
XVII વયં યુષ્માકં સમીપે વંશીરવાદયામ, કિન્તુ યૂયં નાનૃત્યત; યુષ્માકં સમીપે ચ વયમરોદિમ, કિન્તુ યૂયં ન વ્યલપત, તાદૃશૈ
ર્બાલકૈસ્ત ઉપમાયિષ્યન્તે।
XVIII યતો યોહન્ આગત્ય ન ભુક્તવાન્ ન પીતવાંશ્ચ, તેન લોકા વદન્તિ, સ ભૂતગ્રસ્ત ઇતિ।
XIX મનુજસુત આગત્ય ભુક્તવાન્ પીતવાંશ્ચ, તેન લોકા વદન્તિ, પશ્યત એષ ભોક્તા મદ્યપાતા ચણ્ડાલપાપિનાં બન્ધશ્ચ, કિન્તુ
જ્ઞાનિનો જ્ઞાનવ્યવહારં નિર્દોષં જાનન્તિ।
XX સ યત્ર યત્ર પુરે બહ્વાશ્ચર્ય્યં કર્મ્મ કૃતવાન્, તન્નિવાસિનાં મનઃપરાવૃત્ત્યભાવાત્ તાનિ નગરાણિ પ્રતિ હન્તેત્યુક્ત્વા કથિતવાન્,
XXI હા કોરાસીન્, હા બૈત્સૈદે, યુષ્મન્મધ્યે યદ્યદાશ્ચર્ય્યં કર્મ્મ કૃતં યદિ તત્ સોરસીદોન્નગર અકારિષ્યત, તર્હિ પૂર્વ્વમેવ તન્નિવાસિનઃ
શાણવસને ભસ્મનિ ચોપવિશન્તો મનાંસિ પરાવર્ત્તિષ્યન્ત।
XXII તસ્માદહં યુષ્માન્ વદામિ, વિચારદિને યુષ્માકં દશાતઃ સોરસીદોનો ર્દશા સહ્યતરા ભવિષ્યતિ।
XXIII અપરઞ્ચ બત કફર્નાહૂમ્, ત્વં સ્વર્ગં યાવદુન્નતોસિ, કિન્તુ નરકે નિક્ષેપ્સ્યસે, યસ્માત્ ત્વયિ યાન્યાશ્ચર્ય્યાણિ કર્મ્મણ્યકારિષત,
યદિ તાનિ સિદોમ્નગર અકારિષ્યન્ત, તર્હિ તદદ્ય યાવદસ્થાસ્યત્।
XXIV કિન્ત્વહં યુષ્માન્ વદામિ, વિચારદિને તવ દણ્ડતઃ સિદોમો દણ્ડો સહ્યતરો ભવિષ્યતિ।
XXV એતસ્મિન્નેવ સમયે યીશુઃ પુનરુવાચ, હે સ્વર્ગપૃથિવ્યોરેકાધિપતે પિતસ્ત્વં જ્ઞાનવતો વિદુષશ્ચ લોકાન્ પ્રત્યેતાનિ ન પ્રકાશ્ય
બાલકાન્ પ્રતિ પ્રકાશિતવાન્, ઇતિ હેતોસ્ત્વાં ધન્યં વદામિ।
XXVI હે પિતઃ, ઇત્થં ભવેત્ યત ઇદં ત્વદૃષ્ટાવુત્તમં।
XXVII પિત્રા મયિ સર્વ્વાણિ સમર્પિતાનિ, પિતરં વિના કોપિ પુત્રં ન જાનાતિ, યાન્ પ્રતિ પુત્રેણ પિતા પ્રકાશ્યતે તાન્ વિના પુત્રાદ્
અન્યઃ કોપિ પિતરં ન જાનાતિ।
XXVIII હે પરિશ્રાન્તા ભારાક્રાન્તાશ્ચ લોકા યૂયં મત્સન્નિધિમ્ આગચ્છત, અહં યુષ્માન્ વિશ્રમયિષ્યામિ।
XXIX અહં ક્ષમણશીલો નમ્રમનાશ્ચ, તસ્માત્ મમ યુગં સ્વેષામુપરિ ધારયત મત્તઃ શિક્ષધ્વઞ્ચ, તેન યૂયં સ્વે સ્વે મનસિ વિશ્રામં
લપ્સ્યધ્બે।
XXX યતો મમ યુગમ્ અનાયાસં મમ ભારશ્ચ લઘુઃ।

# XII

I અનન્તરં યીશુ ર્વિશ્રામવારે શસ્યમધ્યેન ગચ્છતિ, તદા તચ્છિષ્યા બુભુક્ષિતાઃ સન્તઃ શસ્યમઞ્જરીશ્છત્વા છિત્વા ખાદિતુમારભન્ત।
II તદ્ વિલોક્ય ફિરૂશિનો યીશું જગદુઃ, પશ્ય વિશ્રામવારે યત્ કર્મ્માકર્ત્તવ્યં તદેવ તવ શિષ્યાઃ કુર્વ્વન્તિ।
III સ તાન્ પ્રત્યાવદત, દાયૂદ્ તત્સઙ્ગિનશ્ચ બુભુક્ષિતાઃ સન્તો યત્ કર્મ્માકુર્વ્વન્ તત્ કિં યુષ્માભિ ર્નાપાઠિ?
IV યે દર્શનીયાઃ પૂપાઃ યાજકાન્ વિના તસ્ય તત્સઙ્ગિમનુજાનાઞ્ચાભોજનીયાસ્ત ઈશ્વરાવાસં પ્રવિષ્ટેન તેન ભુક્તાઃ।
V અન્યચ્ચ વિશ્રામવારે મધ્યેમન્દિરં વિશ્રામવારીયં નિયમં લઙ્વન્તોપિ યાજકા નિર્દોષા ભવન્તિ, શાસ્ત્રમધ્યે કિમિદમપિ યુષ્માભિ
ર્ન પઠિતં?
VI યુષ્માનહં વદામિ, અત્ર સ્થાને મન્દિરાદપિ ગરીયાન્ એક આસ્તે।
VII કિન્તુ દયાયાં મે યથા પ્રીતિ ર્ન તથા યજ્ઞકર્મ્મણિ। એતદ્વચનસ્યાર્થં યદિ યુયમ્ અજ્ઞાસિષ્ટ તર્હિ નિર્દોષાન્ દોષિણો નાકાર્ષ્ટ।
VIII અન્યચ્ચ મનુજસુતો વિશ્રામવારસ્યાપિ પતિરાસ્તે।
IX અનન્તરં સ તત્સ્થાનાત્ પ્રસ્થાય તેષાં ભજનભવનં પ્રવિષ્ટવાન્, તદાનીમ્ એકઃ શુષ્કકરામયવાન્ ઉપસ્થિતવાન્।
X તતો યીશુમ્ અપવદિતું માનુષાઃ પપ્રચ્છુઃ, વિશ્રામવારે નિરામયત્વં કરણીયં ન વા?
XI તેન સ પ્રત્યુવાચ, વિશ્રામવારે યદિ કસ્યચિદ્ અવિ ર્ગર્ત્તે પતતિ, તર્હિ યસ્તં ધૃત્વા ન તોલયતિ, એતાદૃશો મનુજો યુષ્માકં મધ્યે
ક આસ્તે?
XII અવે ર્માનવઃ કિં નહિ શ્રેયાન્? અતો વિશ્રામવારે હિતકર્મ્મ કર્ત્તવ્યં।
XIII અનન્તરં સ તં માનવં ગદિતવાન્, કરં પ્રસારય; તેન કરે પ્રસારિતે સોન્યકરવત્ સ્વસ્થોઽભવત્।
XIV તદા ફિરૂશિનો બહિર્ભૂય કથં તં હનિષ્યામ ઇતિ કુમન્ત્રણાં તત્પ્રાતિકૂલ્યેન ચક્રુઃ।
XV તતો યીશુસ્તદ્ વિદિત્વા સ્થનાન્તરં ગતવાન્; અન્યેષુ બહુનરેષુ તત્પશ્ચાદ્ ગતેષુ તાન્ સ નિરામયાન્ કૃત્વા ઇત્યાજ્ઞાપયત્,
XVI યૂયં માં ન પરિચાયયત।
XVII તસ્માત્ મમ પ્રીયો મનોનીતો મનસસ્તુષ્ટિકારકઃ। મદીયઃ સેવકો યસ્તુ વિદ્યતે તં સમીક્ષતાં। તસ્યોપરિ સ્વકીયાત્મા મયા
સંસ્થાપયિષ્યતે। તેનાન્યદેશજાતેષુ વ્યવસ્થા સંપ્રકાશ્યતે।
XVIII કેનાપિ ન વિરોધં સ વિવાદઞ્ચ કરિષ્યતિ। ન ચ રાજપથે તેન વચનં શ્રાવયિષ્યતે।
XIX વ્યવસ્થા ચલિતા યાવત્ નહિ તેન કરિષ્યતે। તાવત્ નલો વિદીર્ણોઽપિ ભંક્ષ્યતે નહિ તેન ચ। તથા સધૂમવર્ત્તિઞ્ચ ન સ
નિર્વ્વાપયિષ્યતે।
XX પ્રત્યાશાઞ્ચ કરિષ્યન્તિ તન્નામ્નિ ભિન્નદેશજાઃ।
XXI યાન્યેતાનિ વચનાનિ યિશયિયભવિષ્યદ્વાદિના પ્રોક્તાન્યાસન્, તાનિ સફલાન્યભવન્।
XXII અનન્તરં લોકૈ સ્તત્સમીપમ્ આનીતો ભૂતગ્રસ્તાન્ધમૂકૈકમનુજસ્તેન સ્વસ્થીકૃતઃ, તતઃ સોઽન્ધો મૂકો દ્રષ્ટું વક્તુઞ્ચારબ્ધવાન્।
XXIII અનેન સર્વ્વે વિસ્મિતાઃ કથયાઞ્ચક્રુઃ, એષઃ કિં દાયૂદઃ સન્તાનો નહિ?
XXIV કિન્તુ ફિરૂશિનસ્તત્ શ્રુત્વા ગદિતવન્તઃ, બાલ્સિબૂબ્નામ્નો ભૂતરાજસ્ય સાહાય્યં વિના નાયં ભૂતાન્ ત્યાજયતિ।
XXV તદાનીં યીશુસ્તેષામ્ ઇતિ માનસં વિજ્ઞાય તાન્ અવદત્ કિઞ્ચન રાજ્યં યદિ સ્વવિપક્ષાદ્ ભિદ્યતે, તર્હિ તત્ ઉચ્છિદ્યતે; યચ્ચ
કિઞ્ચન નગરં વા ગૃહં સ્વવિપક્ષાદ્ વિભિદ્યતે, તત્ સ્થાતું ન શક્નોતિ।
XXVI તદ્વત્ શયતાનો યદિ શયતાનં બહિઃ કૃત્વા સ્વવિપક્ષાત્ પૃથક્ પૃથક્ ભવતિ, તર્હિ તસ્ય રાજ્યં કેન પ્રકારેણ સ્થાસ્યતિ?
XXVII અહઞ્ચ યદિ બાલ્સિબૂબા ભૂતાન્ ત્યાજયામિ, તર્હિ યુષ્માકં સન્તાનાઃ કેન ભૂતાન્ ત્યાજયન્તિ? તસ્માદ્ યુષ્માકમ્
એતદ્વિચારયિતારસ્ત એવ ભવિષ્યન્તિ।
XXVIII કિન્તવહં યદીશ્વરાત્મના ભૂતાન્ ત્યાજયામિ, તર્હીશ્વરસ્ય રાજ્યં યુષ્માકં સન્નિધિમાગતવત્।
XXIX અન્યઞ્ચ કોપિ બલવન્ત જનં પ્રથમતો ન બદ્વ્વા કેન પ્રકારેણ તસ્ય ગૃહં પ્રવિશ્ય તદ્દ્રવ્યાદિ લોઠયિતું શક્નોતિ? કિન્તુ
તત્ કૃત્વા તદીયગૃસ્ય દ્રવ્યાદિ લોઠયિતું શક્નોતિ।
XXX યઃ કશ્ચિત્ મમ સ્વપક્ષીયો નહિ સ વિપક્ષીય આસ્તે, યશ્ચ મયા સાકં ન સંગૃહ્લાતિ, સ વિકિરતિ।
XXXI અતએવ યુષ્માનહં વદામિ, મનુજાનાં સર્વ્વપ્રકારપાપાનાં નિન્દાયાશ્ચ મર્ષણં ભવિતું શક્નોતિ, કિન્તુ પવિત્રસ્યાત્મનો
વિરુદ્ધનિન્દાયા મર્ષણં ભવિતું ન શક્નોતિ।
XXXII યો મનુજસુતસ્ય વિરુદ્ધાં કથાં કથયતિ, તસ્યાપરાધસ્ય ક્ષમા ભવિતું શક્નોતિ, કિન્તુ યઃ કશ્ચિત્ પવિત્રસ્યાત્મનો વિરુદ્ધાં
કથાં કથયતિ નેહલોકે ન પ્રેત્ય તસ્યાપરાધસ્ય ક્ષમા ભવિતું શક્નોતિ।
XXXIII પાદપં યદિ ભદ્રં વદથ, તર્હિ તસ્ય ફલમપિ સાધુ વક્તવ્યં, યદિ ચ પાદપં અસાધું વદથ, તર્હિ તસ્ય ફલમપ્યસાધુ વક્તવ્યં;
યતઃ સ્વીયસ્વીયફલેન પાદપઃ પરિચીયતે।
XXXIV રે ભુજગવંશા યૂયમસાધવઃ સન્તઃ કથં સાધુ વાક્યં વક્તું શક્ષ્યથ? યસ્માદ્ અન્તઃકરણસ્ય પૂર્ણભાવાનુસારાદ્ વદનાદ્
વચો નિર્ગચ્છતિ।
XXXV તેન સાધુર્માનવોઽન્તઃકરણરૂપાત્ સાધુભાણ્ડાગારાત્ સાધુ દ્રવ્યં નિર્ગમયતિ, અસાધુર્માનુષસ્ત્વસાધુભાણ્ડાગારાદ્
અસાધુવસ્તૂનિ નિર્ગમયતિ।
XXXVI કિન્ત્વહં યુષ્માન્ વદામિ, મનુજા યાવન્ત્યાલસ્યવચાંસિ વદન્તિ, વિચારદિને તદુત્તરમવશ્યં દાતવ્યં,
XXXVII યતસ્ત્વં સ્વીયવચોભિ ર્નિરપરાધઃ સ્વીયવચોભિશ્ચ સાપરાધો ગણિષ્યસે।
XXXVIII તદાનીં કતિપયા ઉપાધ્યાયાઃ ફિરૂશિનશ્ચ જગદુઃ, હે ગુરો વયં ભવત્તઃ કિઞ્ચન લક્ષ્મ દિદૃક્ષામઃ।
XXXIX તદા સ પ્રત્યુક્તવાન્, દુષ્ટો વ્યભિચારી ચ વંશો લક્ષ્મ મૃગયતે, કિન્તુ ભવિષ્યદ્વાદિનો યૂનસો લક્ષ્મ વિહાયાન્યત્ કિમપિ
લક્ષ્મ તે ન પ્રદર્શયિષ્યન્તે।
XL યતો યૂનમ્ યથા ત્ર્યહોરાત્રં બૃહન્મીનસ્ય કુક્ષાવાસીત્, તથા મનુજપુત્રોપિ ત્ર્યહોરાત્રં મેદિન્યા મધ્યે સ્થાસ્યતિ।

XLI અપરં નીનિવીયા માનવા વિચારદિન એતદ્વંશીયાનાં પ્રતિકૂલમ્ ઉત્થાય તાન્ દોષિણઃ કરિષ્યન્તિ, યસ્માત્તે યૂનસ ઉપદેશાત્ મનાંસિ પરાવર્ત્તયાઞ્ચક્રિરે, કિન્ત્વત્ર યૂનસોપિ ગુરુતર એક આસ્તે।

XLII પુનશ્ચ દક્ષિણદેશીયા રાજ્ઞી વિચારદિન એતદ્વંશીયાનાં પ્રતિકૂલમુત્થાય તાન્ દોષિણઃ કરિષ્યતિ યતઃ સા રાજ્ઞી સુલેમનો વિદ્યાયાઃ કથાં શ્રોતું મેદિન્યાઃ સીમ્ન આગચ્છત્, કિન્તુ સુલેમનોપિ ગુરુતર એકો જનોઽત્ર આસ્તે।

XLIII અપરં મનુજાદ્ બહિર્ગતો ઽપવિત્રભૂતઃ શુષ્કસ્થાનેન ગત્વા વિશ્રામં ગવેષયતિ, કિન્તુ તદલભમાનઃ સ વક્તિ, યસ્મા; નિકેતનાદ્ આગમં, તદેવ વેશ્મ પકાવૃત્ય યામિ।

XLIV પશ્ચાત્ સ તત્ સ્થાનમ્ ઉપસ્થાય તત્ શૂન્યં માર્જ્જિતં શોભિતઞ્ચ વિલોક્ય વ્રજન્ સ્વતોપિ દુષ્ટતરાન્ અન્યસપ્તભૂતાન્ સઙ્ગિનઃ કરોતિ।

XLV તતસ્તે તત્ સ્થાનં પ્રવિશ્ય નિવસન્તિ, તેન તસ્ય મનુજસ્ય શેષદશા પૂર્વ્વદશાતોતીવાશુભા ભવતિ, એતેષાં દુષ્ટવંશ્યાનામપિ તથૈવ ઘટિષ્યતે।

XLVI માનવેભ્ય એતાસાં કથનાં કથનકાલે તસ્ય માતા સહજાશ્ચ તેન સાકં કાઞ્ચિત્ કથાં કથયિતું વાઞ્છન્તો બહિરેવ સ્થિતવન્તઃ।

XLVII તતઃ કશ્ચિત્ તસ્મૈ કથિતવાન્, પશ્ય તવ જનની સહજાશ્ચ ત્વયા સાકં કાઞ્ચન કથાં કથયિતું કામયમાના બહિસ્તિષ્ઠન્તિ।

XLVIII કિન્તુ સ તં પ્રત્યવદત્, મમ કા જનની? કે વા મમ સહજાઃ?

XLIX પશ્ચાત્ શિષ્યાન્ પ્રતિ કરં પ્રસાર્ય્ય કથિતવાન્, પશ્ય મમ જનની મમ સહજાશ્ચૈતે;

L યઃ કશ્ચિત્ મમ સ્વર્ગસ્થસ્ય પિતુરિષ્ટં કર્મ્મ કુરુતે, સએવ મમ ભ્રાતા ભગિની જનની ચ।

# XIII

I અપરઞ્ચ તસ્મિન્ દિને યીશુઃ સદ્મનો ગત્વા સરિત્પતે રોધસિ સમુપવિવેશ।

II તત્ર તત્સન્નિધૌ બહુજનાનાં નિવહોપસ્થિતેઃ સ તરણિમારુહ્ય સમુપાવિશત્, તેન માનવા રોધસિ સ્થિતવન્તઃ।

III તદાનીં સ દૃષ્ટાન્તૈસ્તાન્ ઇત્થં બહુશ ઉપદિષ્ટવાન્। પશ્યત, કશ્ચિત્ કૃષીવલો બીજાનિ વપ્તું બહિર્જગામ,

IV તસ્ય વપનકાલે કતિપયબીજેષુ માર્ગપાર્શ્વે પતિતેષુ વિહગાસ્તાનિ ભક્ષિતવન્તઃ।

V અપરં કતિપયબીજેષુ સ્તોકમૃદ્યુક્તપાષાણે પતિતેષુ મૃદલ્પત્વાત્ તત્ક્ષણાત્ તાન્યઙ્કુરિતાનિ,

VI કિન્તુ રવાવુદિતે દગ્ધાનિ તેષાં મૂલાપ્રવિષ્ટત્વાત્ શુષ્કતાં ગતાનિ ચ।

VII અપરં કતિપયબીજેષુ કણ્ટકાનાં મધ્યે પતિતેષુ કણ્ટકાન્યેધિત્વા તાનિ જગ્રસુઃ।

VIII અપરઞ્ચ કતિપયબીજાનિ ઉર્વ્વરાયાં પતિતાનિ; તેષાં મધ્યે કાનિચિત્ શતગુણાનિ કાનિચિત્ ષષ્ટિગુણાનિ કાનિચિત્ ત્રિંશગુંણાનિ ફલાનિ ફલિતવન્તિ।

IX શ્રોતું યસ્ય શ્રુતી આસાતે સ શૃણુયાત્।

X અનન્તરં શિષ્યૈરાગત્ય સોઽપૃચ્છ્યત, ભવતા તેભ્યઃ કુતો દૃષ્ટાન્તકથા કથ્યતે?

XI તતઃ સ પ્રત્યવદત્, સ્વર્ગરાજ્યસ્ય નિગૂઢાં કથાં વેદિતું યુષ્મભ્યં સામર્થ્યમદાયિ, કિન્તુ તેભ્યો નાદાયિ।

XII યસ્માદ્ યસ્યાન્તિકે વર્દ્ધતે, તસ્માયેવ દાયિષ્યતે, તસ્માત્ તસ્ય બાહુલ્યં ભવિષ્યતિ, કિન્તુ યસ્યાન્તિકે ન વર્દ્ધતે, તસ્ય યત્ કિઞ્ચનાસ્તે, તદપિ તસ્માદ્ આદાયિષ્યતે।

XIII તે પશ્યન્તોપિ ન પશ્યન્તિ, શૃણ્વન્તોપિ ન શૃણ્વન્તિ, બુધ્યમાના અપિ ન બુધ્યન્તે ચ, તસ્માત્ તેભ્યો દૃષ્ટાન્તકથા કથ્યતે।

XIV યથા કર્ણૈઃ શ્રોષ્યથ યૂયં વૈ કિન્તુ યૂયં ન ભોત્સ્યથ। નેત્રૈર્દ્રક્ષ્યથ યૂયઞ્ચ પરિજ્ઞાતું ન શક્ષ્યથ। તે માનુષા યથા નૈવ પરિપશ્યન્તિ લોચનૈઃ। કર્ણૈ ર્યથા ન શૃણ્વન્તિ ન બુધ્યન્તે ચ માનસૈઃ। વ્યાવર્ત્તિતેષુ ચિત્તેષુ કાલે કુત્રાપિ તૈર્જનૈઃ। મત્તસ્તે મનુજાઃ સ્વસ્થા યથા નૈવ ભવન્તિ ચ। તથા તેષાં મનુષ્યાણાં ક્રિયન્તે સ્થૂલબુદ્ધયઃ। બધિરીભૂતકર્ણાશ્ચ જાતાશ્ચ મુદ્રિતા દૃશઃ।

XV યદેતાનિ વચનાનિ યિશયિયભવિષ્યદ્વાદિના પ્રોક્તાનિ તેષુ તાનિ ફલન્તિ।

XVI કિન્તુ યુષ્માકં નયનાનિ ધન્યાનિ, યસ્માત્ તાનિ વીક્ષન્તે; ધન્યાશ્ચ યુષ્માકં શબ્દગ્રહાઃ, યસ્માત્ તૈરાકર્ણ્યતે।

XVII મયા યૂયં તથ્યં વચામિ યુષ્માભિ ર્યદ્યદ્ વીક્ષ્યતે, તદ્ બહવો ભવિષ્યદ્વાદિનો ધાર્મ્મિકાશ્ચ માનવા દિદૃક્ષન્તોપિ દ્રષ્ટું નાલભન્ત, પુનશ્ચ યૂયં યદ્યત્ શૃણુથ, તત્ તે શુશ્રૂષમાણા અપિ શ્રોતું નાલભન્ત।

XVIII કૃષીવલીયદૃષ્ટાન્તસ્યાર્થં શૃણુત।

XIX માર્ગપાર્શ્વે બીજાન્યુપ્તાનિ તસ્યાર્થ એષઃ, યદા કશ્ચિત્ રાજ્યસ્ય કથાં નિશમ્ય ન બુધ્યતે, તદા પાપાત્માગત્ય તદીયમનસ ઉપ્તાં કથાં હરન્ નયતિ।

XX અપરં પાષાણસ્થલે બીજાન્યુપ્તાનિ તસ્યાર્થ એષઃ; કશ્ચિત્ કથાં શ્રુત્વૈવ હર્ષચિત્તેન ગૃહ્લાતિ,

XXI કિન્તુ તસ્ય મનસિ મૂલાપ્રવિષ્ટત્વાત્ સ કિઞ્ચિત્કાલમાત્રં સ્થિરસ્તિષ્ઠતિ; પશ્ચાત તત્કથાકારણાત્ કોપિ ક્લેસ્તાઽના વા ચેત્ જાયતે, તર્હિ સ તત્ક્ષણાદ્ વિઘ્નમેતિ।

XXII અપરં કણ્ટકાનાં મધ્યે બીજાન્યુપ્તાનિ તદર્થ એષઃ; કેનચિત્ કથાયાં શ્રુતાયાં સાંસારિકચિન્તાભિ ર્ભ્રાન્તિભિશ્ચ સા ગ્રસ્યતે, તેન સા મા વિફલા ભવતિ।

XXIII અપરમ્ ઉર્વ્વરાયાં બીજાન્યુપ્તાનિ તદર્થ એષઃ; યે તાં કથાં શ્રુત્વા વુધ્યન્તે, તે ફલિતાઃ સન્તઃ કેચિત્ શતગુણાનિ કેચિત ષષ્ટિગુણાનિ કેચિચ્ચ ત્રિંશદ્ગુણાનિ ફલાનિ જનયન્તિ।

XXIV અનન્તરં સોપરામેકાં દૃષ્ટાન્તકથામુપસ્થાપ્ય તેભ્યઃ કથયામાસ; સ્વર્ગીયરાજ્યં તાદૃશેન કેનચિદ્ ગૃહસ્થેનોપમીયતે, યેન સ્વીયક્ષેત્રે પ્રશસ્તબીજાન્યૌપ્યન્ત।

XXV કિન્તુ ક્ષણદાયાં સકલલોકેષુ સુપ્તેષુ તસ્ય રિપુરાગત્ય તેષાં ગોધૂમબીજાનાં મધ્યે વન્યયવમબીજાન્યુપ્ત્વા વવ્રાજ।

XXVI તતો યદા બીજેભ્યોઽઙ્કુરા જાયમાનાઃ કણિશાનિ ધૃતવન્તઃ; તદા વન્યયવસાન્યપિ દૃશ્યમાનાન્યભવન્।

XXVII ततो गृहस्थस्य दासेया आगम्य तस्मै कथयाञ्चक्रुः, हे महेच्छ, भवता किं क्षेत्रे भद्रबीजानि नौप्यन्त? तथात्वे वन्यययवसानि कृत आयन्?
XXVIII तदानीं तेन ते प्रतिगदिताः, केनचित् रिपुणा कर्म्मदमकारि दासेयाः कथयामासुः, वयं गत्वा तान्युत्पाट्य क्षिपामो भवतः कीदृशीच्छा जायते?
XXIX तेनावादि, नहि, शङ्केऽहं वन्यययवसोत्पाटनकाले युष्माभिस्तैः साकं गोधूमा अप्युत्पाटिष्यन्ते।
XXX अतः श्स्यकर्त्तनकालं यावद् उभयान्यपि सह वर्द्धन्तां, पश्चात् कर्त्तनकाले कर्त्तकान् वक्ष्यामि, यूयमादौ वन्यययवसानि संगृह्य दाहयितुं वीटिका बद्ध्वा स्थापयत; किन्तु सर्व्वे गोधूमा युष्माभि र्भाण्डागारं नीत्वा स्थाप्यन्ताम्।
XXXI अनन्तरं सोपरामेकां दृष्टान्तकथामुत्थाप्य तेभ्यः कथितवान् कश्चिन्मनुजः सर्षपबीजमेकं नीत्वा स्वक्षेत्र उवाप।
XXXII सर्षपबीजं सर्व्वस्माद् बीजात् क्षुद्रमपि सदङ्कुरितं सर्व्वस्मात् शाकात् बृहद् भवति; स तादृशस्तरु र्भवति, यस्य शाखासु नभसः खगा आगत्य निवसन्ति; स्वर्गीयराज्यं तादृशस्य सर्षपैकस्य समम्।
XXXIII पुनरपि स उपमाकथामेकां तेभ्यः कथयाञ्चकार; काचन योषित् यत् किण्वमादाय द्रोणत्रयमितगोधूमचूर्णानां मध्ये सर्व्वेषां मिश्रीभवनपर्य्यन्तं समाच्छाद्य निधत्तवती, तत्किण्वमिव स्वर्गराज्यं।
XXXIV इत्थं यीशु र्मनुजनिवहानां सन्निधावुपमाकथाभिरेतान्याख्यानानि कथितवान् उपमां विना तेभ्यः किमपि कथां नाकथयत्।
XXXV एतेन दृष्टान्तीयेन वाक्येन व्यादाय वदनं निजं। अहं प्रकाशयिष्यामि गुप्तवाक्यं पुराभवं। यदेतद्वचनं भविष्यद्वादिना प्रोक्तमासीत्, तत् सिद्धमभवत्।
XXXVI सर्व्वान् मनुजान् विसृज्य यीशौ गृहं प्रविष्टे तच्छिष्या आगत्य यीशवे कथितवन्तः, क्षेत्रस्य वन्यययवसीयदृष्टान्तकथाम् भवान अस्मान् स्पष्टीकृत्य वदतु।
XXXVII ततः स प्रत्युवाच, येन भद्रबीजान्युप्यन्ते स मनुजपुत्रः,
XXXVIII क्षेत्रं जगत्, भद्रबीजानी राज्यस्य सन्तानाः,
XXXIX वन्यययवसानि पापात्मनः सन्तानाः। येन रिपुणा तान्युप्तानि स शयतानः, कर्त्तनसमयश्च जगतः शेषः, कर्त्तकाः स्वर्गीयदूताः।
XL यथा वन्यययवसानि संगृह्य दाह्यन्ते, तथा जगतः शेषे भविष्यति;
XLI अर्थात् मनुजसुतः स्वांयदूतान् प्रेषयिष्यति, तेन ते च तस्य राज्यात् सर्व्वान् विघ्नकारिणोऽधार्म्मिकलोकांश्च संगृह्य
XLII यत्र रोदनं दन्तघर्षणञ्च भवति, तत्राग्निकुण्डे निक्षेप्स्यन्ति।
XLIII तदानीं धार्म्मिकलोकाः स्वेषां पितू राज्ये भास्करइव तेजस्विनो भविष्यन्ति। श्रोतुं यस्य श्रुती आसाते, म शृणुयात्।
XLIV अपरञ्च क्षेत्रमध्ये निधिं पश्यन् यो गोपयति, ततः परं सानन्दो गत्वा स्वीयसर्व्वस्वं विक्रीय त्तक्षेत्रं क्रीणाति, स इव स्वर्गराज्यं।
XLV अन्यञ्च यो वणिक् उत्तमां मुक्तां गवेषयन्
XLVI महार्घां मुक्तां विलोक्य निजसर्व्वस्वं विक्रीय तां क्रीणाति, स इव स्वर्गराज्यं।
XLVII पुनश्च समुद्रो निक्षिप्तः सर्व्वप्रकारमीनसंग्राह्यानायइव स्वर्गराज्यं।
XLVIII तस्मिन् आनाये पूर्णे जना यथा रोधस्युत्तोल्य समुपविश्य प्रशस्तमीनान् संग्रह्य भाजनेषु निदधते, कुत्सितान् निक्षिपन्ति;
XLIX तथैव जगतः शेषे भविष्यति, फलतः स्वर्गीयदूता आगत्य पुण्यवज्जनानां मध्यात् पापिनः पृथक् कृत्वा वह्निकुण्डे निक्षेप्स्यन्ति,
L तत्र रोदनं दन्तै र्दन्तघर्षणञ्च भविष्यतः।
LI यीशुना ते पृष्टा युष्माभिः किमेतान्याख्यानान्यबुध्यन्त? तदा ते प्रत्यवदन्, सत्यं प्रभो।
LII तदानीं स कथितवान्, निजभाण्डागारात् नवीनपुरातनानि वस्तूनि निर्गमयति यो गृहस्थः स इव स्वर्गराज्यमधि शिक्षिताः स्वर्व उपदेष्टारः।
LIII अनन्तरं यीशुरेताः सर्व्वा दृष्टान्तकथाः समाप्य तस्मात् स्थानात् प्रतस्थे। अपरं स्वदेशमागत्य जनान् भजनभवन उपदिष्टवान्;
LIV ते विस्मयं गत्वा कथितवन्त एतस्यैतादृशं ज्ञानम् आश्चर्य्यं कर्म्म च कस्माद् अजायत?
LV किमयं सूत्रधारस्य पुत्रो नहि? एतस्य मातु र्नाम च किं मरियम् नहि? याकुब्-यूषफ्-शिमोन्-यिहूदाश्च किमेतस्य भ्रातरो नहि?
LVI एतस्य भगिन्यश्च किमस्माकं मध्ये न सन्ति? तर्हि कस्मादयमेतानि लब्धवान्? इत्थं स तेषां विघ्नरूपो बभूव;
LVII ततो यीशुना निगदितं स्वदेशीयजनानां मध्यं विना भविष्यद्वादी कुत्राप्यन्यत्र नासम्मान्यो भवती।
LVIII तेषामविश्वासहेतोः स तत्र स्थाने बह्वाश्चर्य्यकर्म्माणि न कृतवान्।

# XIV

I तदानीं राजा हेरोद् यीशो र्यशः श्रुत्वा निजदासेयान् जगाद,
II एष मज्जयिता योहन्, प्रमितेभयस्तस्योत्थानात् तेनेत्थमद्भुतं कर्म्म प्रकाश्यते।
III पुरा हेरोद् निजभ्रातुः फिलिपो जायाया हेरोदीयाया अनुरोधाद् योहनं धारयित्वा बद्धा कारायां स्थापितवान्।
IV यतो योहन् उक्तवान्, एत्सयाः संग्रहो भवतो नोचितः।
V तस्मात् नृपतिस्तं हन्तुमिच्छन्नपि लोकेभ्यो विभयाञ्चकार; यतः सर्व्वे योहनं भविष्यद्वादिनं मेनिरे।
VI किन्तु हेरोदो जन्माहीयमह उपस्थिते हेरोदीयाया दुहिता तेषां समक्षं नृतित्वा हेरोदमप्रीणयत्।
VII तस्मात् भूपतिः शपथं कुर्व्वन् इति प्रत्यज्ञासीत्, त्वया यद् याच्यते, तदेवाहं दास्यामि।

VIII સા કુમારી સ્વીયમાતુઃ શિક્ષાં લબ્ધ્વા બભાષે, મજ્જયિતુર્યોહન ઉત્તમાઙ્ગં ભાજને સમાનીય મહ્યં વિશ્રાણય।
IX તતો રાજા શુશોચ, કિન્તુ ભોજનાયોપવિશતાં સઙ્ગિનાં સ્વકૃતશપથસ્ય ચાનુરોધાત્ તત્ પ્રદાતુમ આદિદેશ।
X પશ્ચાત્ કારાં પ્રતિ નરં પ્રહિત્ય યોહન ઉત્તમાઙ્ગં છિત્ત્વા
XI તત્ ભાજન આનાય્ય તસ્યૈ કુમાર્ય્યૈ વ્યશ્રાણયત્, તતઃ સા સ્વજનન્યાઃ સમીપં તન્નિનાય।
XII પશ્ચાત્ યોહનઃ શિષ્યા આગત્ય કાયં નીત્વા શ્મશાને સ્થાપયામાસુસ્તતો યીશોઃ સન્નિધિં વ્રજિત્વા તદ્વાર્ત્તાં બભાષિરે।
XIII અનન્તરં યીશુરિતિ નિશમ્ય નાવા નિર્જનસ્થાનમ્ એકાકી ગતવાન્, પશ્ચાત્ માનવાસ્તત્ શ્રુત્વા નાનાનગરેભ્ય આગત્ય
પદૈસ્તત્પશ્ચાદ્ ઈયુઃ।
XIV તદાનીં યીશુ ર્બહિરાગત્ય મહાન્તં જનનિવહં નિરીક્ષ્ય તેષુ કારુણિકઃ મન્ તેષાં પીડિતજનાન્ નિરામયાન્ ચકાર।
XV તતઃ પરં સન્ધ્યાયાં શિષ્યાસ્તદન્તિકમાગત્ય કથયાઞ્ચક્રુઃ, ઇદં નિર્જનસ્થાનં વેલાપ્યવસન્ના; તસ્માત્ મનુજાન્ સ્વસ્વગ્રામં ગન્તું
સ્વાર્થં ભક્ષ્યાણિ ક્રેતુઞ્ચ ભવાન્ તાન્ વિસૃજતુ।
XVI કિન્તુ યીશુસ્તાનવાદીત્, તેષાં ગમને પ્રયોજનં નાસ્તિ, યૂયમેવ તાન્ ભોજયત।
XVII તદા તે પ્રત્યવદન્, અસ્માકમત્ર પૂપપઞ્ચકં મીનદ્વયઞ્ચાસ્તે।
XVIII તદાનીં તેનોક્તં તાનિ મદન્તિકમાનયત।
XIX અનન્તરં સ મનુજાન્ યવસોપર્ય્યુપવેષ્ટુમ્ આજ્ઞાપયામાસ; અપર તત્ પૂપપઞ્ચકં મીનદ્વયઞ્ચ ગૃહ્લન્ સ્વર્ગં પ્રતિ
નિરીક્ષ્યેશ્વરીયગુણાન્ અનૂદ્ય ભંક્ત્વા શિષ્યેભ્યો દત્તવાન્, શિષ્યાશ્ચ લોકેભ્યો દદુઃ।
XX તતઃ સર્વ્વે ભુક્ત્વા પરિતૃપ્તવન્તઃ, તતસ્તદવશિષ્ટભક્ષ્યૈઃ પૂર્ણાન્ દ્વાદશડલકાન્ ગૃહીતવન્તઃ।
XXI તે ભોક્તારઃ સ્ત્રીર્બાલકાંશ્ચ વિહાય પ્રાયેણ પઞ્ચ સહસ્રાણિ પુમાંસ આસન્।
XXII તદનન્તરં યીશુ ર્લોકાનાં વિસર્જનકાલે શિષ્યાન્ તરણિમારોઢું સ્વાગ્રે પારં યાતુઞ્ચ ગાઢમાદિષ્ટવાન્।
XXIII તતો લોકેષુ વિસૃષ્ટેષુ સ વિવિક્તે પ્રાર્થયિતું ગિરિમેકં ગત્વા સન્ધ્યાં યાવત્ તત્રૈકાકી સ્થિતવાન્।
XXIV કિન્તુ તદાનીં સમ્મુખવાતત્વાત્ સરિત્પતે ર્મધ્યે તરઙ્ગૈસ્તરણિર્દોલાયમાનાભવત્।
XXV તદા સ યામિન્યાશ્ચતુર્થપ્રહરે પદ્ભ્યાં વ્રજન્ તેષામન્તિકં ગતવાન્।
XXVI કિન્તુ શિષ્યાસ્તં સાગરોપરિ વ્રજન્તં વિલોક્ય સમુદ્વિગ્ના જગદુઃ, એષ ભૂત ઇતિ શઙ્કમાના ઉચ્ચૈઃ શબ્દાયાઞ્ચક્રિરે ચ।
XXVII તદૈવ યીશુસ્તાનવદત્, સુસ્થિરા ભવત, મા ભૈષ્ટ, એષોઽહમ્।
XXVIII તતઃ પિતર ઇત્યુક્તવાન્, હે પ્રભો, યદિ ભવાનેવ, તર્હિ માં ભવત્સમીપં યાતુમાજ્ઞાપયતુ।
XXIX તતઃ તેનાદિષ્ટઃ પિતરસ્તરણિતોઽવરુહ્ય યીશોરન્તિકં પ્રાપ્તું તોયોપરિ વવ્રાજ।
XXX કિન્તુ પ્રચણ્ડં પવનં વિલોક્ય ભયાત્ તોયે મંક્તુમ્ આરેભે, તસ્માદ્ ઉચ્ચૈઃ શબ્દાયમાનઃ કથિતવાન્, હે પ્રભો, મામવતુ।
XXXI યીશુસ્તત્ક્ષણાત્ કરં પ્રસાર્ય્ય તં ધરન્ ઉક્તવાન્, હ સ્તોકપ્રત્યયિન્ ત્વં કુતઃ સમશેથાઃ?
XXXII અનન્તરં તયોસ્તરણિમારૂઢયોઃ પવનો નિવવૃતે।
XXXIII તદાનીં યે તરણ્યામાસન્, ત આગત્ય તં પ્રણમ્ય કથિતવન્તઃ, યથાર્થસ્ત્વમેવેશ્વરસુતઃ।
XXXIV અનન્તરં પારં પ્રાપ્ય તે ગિનેષરન્નામકં નગરમુપતસ્થુઃ,
XXXV તદા તત્રત્યા જના યીશું પરિચીય તદ્દેશસ્ય ચતુર્દિશો વાર્ત્તાં પ્રહિત્ય યત્ર યાવન્તઃ પીડિતા આસન્, તાવતએવ
તદન્તિકમાનયામાસુઃ।
XXXVI અપરં તદીયવસનસ્ય ગ્રન્થિમાત્રં સ્પ્રષ્ટું વિનીય યાવન્તો જનાસ્તત્ સ્પર્શં ચક્રિરે, તે સર્વ્વએવ નિરામયા બભૂવુઃ।

# XV

I અપરં યિરૂશાલમ્નગરીયાઃ કતિપયા અધ્યાપકાઃ ફિરૂશિનશ્ચ યીશોઃ સમીપમાગત્ય કથયામાસુઃ,
II તવ શિષ્યાઃ કિમર્થમ્ અપ્રક્ષાલિતકરૈ ર્ભક્ષિત્વા પરમ્પરાગતં પ્રાચીનાનાં વ્યવહારં લઙ્ઘન્તે?
III તતો યીશુઃ પ્રત્યુવાચ, યૂયં પરમ્પરાગતાચારેણ કુત ઈશ્વરાજ્ઞાં લઙ્ઘધ્વે।
IV ઈશ્વર ઇત્યાજ્ઞાપયત્, ત્વં નિજપિતરૌ સંમન્યેથાઃ, યેન ચ નિજપિતરૌ નિન્દ્યેતે, સ નિશ્ચિતં મ્રિયેત;
V કિન્તુ યૂયં વદથ, યઃ સ્વજનકં સ્વજનનીં વા વાક્યમિદં વદતિ, યુવાં મત્તો યલ્લભેથે, તત્ ન્યવિદ્યત,
VI સ નિજપિતરૌ પુન ર્ન સંમંસ્યતે। ઇત્થં યૂયં પરમ્પરાગતેન સ્વેષામાચારેણેશ્વરીયાજ્ઞાં લુમ્પથ।
VII રે કપટિનઃ સર્વ્વે યિશયિયો યુષ્માનધિ ભવિષ્યદ્વચનાન્યેતાનિ સમ્યગ્ ઉક્તવાન્।
VIII વદનૈ ર્મનુજા એતે સમાયાન્તિ મદન્તિકં। તથાધરૈ ર્મદીયઞ્ચ માનં કુર્વ્વન્તિ તે નરાઃ।
IX કિન્તુ તેષાં મનો મત્તો વિદૂરએવ તિષ્ઠતિ। શિક્ષયન્તો વિધીન્ ન્રાજ્ઞા ભજન્તે માં મુધૈવ તે।
X તતો યીશુ ર્લોકાન્ આહૂય પ્રોક્તવાન્, યૂયં શ્રુત્વા બુધ્યધ્બં।
XI યન્મુખં પ્રવિશતિ, તત્ મનુજમ્ અમેધ્યં ન કરોતિ, કિન્તુ યદાસ્યાત્ નિર્ગચ્છતિ, તદેવ માનુષમમેધ્યી કરોતી।
XII તદાનીં શિષ્યા આગત્ય તસ્મૈ કથયાઞ્ચક્રુઃ, એતાં કથાં શ્રુત્વા ફિરૂશિનો વ્યરજ્યન્ત, તત્ કિં ભવતા જ્ઞાયતે?
XIII સ પ્રત્યવદત્, મમ સ્વર્ગસ્થઃ પિતા યં કઞ્ચિદઙ્કુરં નારોપયત્, સ ઉત્પાવ્દ્યતે।
XIV તે તિષ્ઠન્તુ, તે અન્ધમનુજાનામ્ અન્ધમાર્ગદર્શકા એવ; યદ્યન્ધોઽન્ધં પન્થાનં દર્શયતિ, તર્હ્યુભૌ ગર્ત્તે પતતઃ।
XV તદા પિતરસ્તં પ્રત્યવદત્, દૃષ્ટાન્તમિમમસ્માન્ બોધયતુ।
XVI યીશુના પ્રોક્તં, યૂયમદ્ય યાવત્ કિમબોધાઃ સ્થ?
XVII કથામિમાં કિં ન બુધ્યધ્બે ? યદાસ્યં પ્રેવિશતિ, તદ્ ઉદરે પતન્ બહિર્નિર્યાતિ,
XVIII કિન્ત્વાસ્યાદ્ યન્નિર્યાતિ, તદ્ અન્તઃકરણાત્ નિર્યાતત્વાત્ મનુજમમેધ્યં કરોતિ।
XIX યતોઽન્તઃકરણાત્ કુચિન્તા બધઃ પારદારિકતા વેશ્યાગમનં ચૈર્ય્યં મિથ્યાસાક્ષ્યમ્ ઈશ્વરનિન્દા ચૈતાનિ સર્વ્વાણિ નિર્ય્યાન્તિ।

XX એતાનિ મનુષ્યમપવિત્રી કુર્વ્વન્તિ કિન્ત્વપ્રક્ષાલિતકરેણ ભોજનં મનુજમમેધ્યં ન કરોતિ।
XXI અનન્તરં યીશુસ્તસ્માત્ સ્થાનાત્ પ્રસ્થાય સોરસીદોન્નગરયોઃ સીમામુપતસ્થૌ।
XXII તદા તત્સીમાતઃ કાચિત્ કિનાનીયા યોષિદ્ આગત્ય તમુચ્ચૈરુવાચ, હે પ્રભો દાયૂદઃ સન્તાન, મમૈકા દુહિતાસ્તે સા ભૂતગ્રસ્તા
સતી મહાક્લેશં પ્રાપ્નોતિ મમ દયસ્વ।
XXIII કિન્તુ યીશુસ્તાં કિમપિ નોક્તવાન્, તતઃ શિષ્યા આગત્ય તં નિવેદયામાસુઃ, એષા યોષિદ્ અસ્માકં પશ્ચાદ્
ઉચ્ચૈરાહૂયાગચ્છતિ, એનાં વિસૃજતુ।
XXIV તદા સ પ્રત્યવદત્, ઇસ્રાયેલ્ગોત્રસ્ય હારિતમેષાન્ વિના કસ્યાપ્યન્યસ્ય સમીપં નાહં પ્રેષિતોસ્મિ।
XXV તતઃ સા નારીસમાગત્ય તં પ્રણમ્ય જગાદ, હે પ્રભો મામુપકુરુ।
XXVI સ ઉક્તવાન્, બાલકાનાં ભક્ષ્યમાદાય સારમેયેભ્યો દાનં નોચિતં।
XXVII તદા સા બભાષે, હે પ્રભો, તત્ સત્યં, તથાપિ પ્રભો ર્ભઞ્ચાદ્ યદુચ્છિષ્ટં પતતિ, તત્ સારમેયાઃ ખાદન્તિ।
XXVIII તતો યીશુઃ પ્રત્યવદત્, હે યોષિત્, તવ વિશ્વાસો મહાન્ તસ્માત્ તવ મનોભિલષિતં સિદ્ધ્યતુ, તેન તસ્યાઃ કન્યા તસ્મિન્નેવ
દણ્ડે નિરામયાભવત્।
XXIX અનન્તરં યીશસ્તસ્માત્ સ્થાનાત્ પ્રસ્થાય ગાલીલ્સાગરસ્ય સન્નિધિમાગત્ય ધરાધરમારુહ્ય તત્રોપવિવેશ।
XXX પશ્ચાત્ જનનિવહો બહૂન્ ખઞ્ચાન્ધમૂકશુષ્કકરમાનુષાન્ આદાય યીશોઃ સમીપમાગત્ય તચ્ચરણાન્તિકે સ્થાપયામાસુઃ, તતઃ
સા તાન્ નિરામયાન્ અકરોત્।
XXXI ઇત્થં મૂકા વાક્યં વદન્તિ, શુષ્કકરાઃ સ્વાસ્થ્યમાયાન્તિ, પઙ્ગવો ગચ્છન્તિ, અન્ધા વીક્ષન્તે, ઇતિ વિલોક્ય લોકા વિસ્મયં
મન્યમાના ઇસ્રાયેલ ઈશ્વરં ધન્યં બભાષિરે।
XXXII તદાનીં યીશુઃ સ્વશિષ્યાન્ આહૂય ગદિતવાન્, એતજ્જનનિવહેષુ મમ દયા જાયતે, એતે દિનત્રયં મયા સાકં સન્તિ, એષાં
ભક્ષ્યવસ્તુ ચ કિઞ્ચિદપિ નાસ્તિ, તસ્માદહમેતાનકૃતાહારાન્ ન વિસ્રક્ષ્યામિ, તથાત્વે વર્ત્મમધ્યે ક્લામ્યેષુઃ।
XXXIII તદા શિષ્યા ઊચુઃ, એતસ્મિન્ પ્રાન્તરમધ્ય એતાવતો મર્ત્યાન્ તર્પયિતું વયં કુત્ર પૂપાન્ પ્રાપ્સ્યામઃ?
XXXIV યીશુરપૃચ્છત્, યુષ્માકં નિકટે કતિ પૂપા આસતે? ત ઊચુઃ, સપ્તપૂપા અલ્પાઃ ક્ષુદ્રમીનાશ્ચ સન્તિ।
XXXV તદાનીં સ લોકનિવહં ભૂમાવુપવેષ્ટુમ્ આદિશ્ય
XXXVI તાન્ સપ્તપૂપાન્ મીનાંશ્ચ ગૃહ્લન્ ઈશ્વરીયગુણાન્ અનૂદ્ય ભંક્ત્વા શિષ્યેભ્યો દદૌ, શિષ્યા લોકેભ્યો દદુઃ।
XXXVII તતઃ સર્વ્વે ભુક્ત્વા તૃપ્તવન્તઃ; તદવશિષ્ટભક્ષ્યેણ સપ્તડલકાન્ પરિપૂર્ય્ય સંજગૃહુઃ।
XXXVIII તે ભોક્તારો યોષિતો બાલકાંશ્ચ વિહાય પ્રાયેણ ચતુઃસહસ્રાણિ પુરુષા આસન્।
XXXIX તતઃ પરં સ જનનિવહં વિસૃજ્ય તરિમારુહ્ય મગ્દલાપ્રદેશં ગતવાન્।

# XVI

I તદાનીં ફિરૂશિનઃ સિદૂકિનશ્ચાગત્ય તં પરીક્ષિતું નભમીયં કિઞ્ચન લક્ષ્મ દર્શયિતું તસ્મૈ નિવેદયામાસુઃ।
II તતઃ સ ઉક્તવાન્, સન્ધ્યાયાં નભસો રક્તત્વાદ્ યૂયં વદથ, શ્વો નિર્મ્મલં દિનં ભવિષ્યતિ;
III પ્રાતઃકાલે ચ નભસો રક્તત્વાત્ મલિનત્વાઞ્ચ વદથ, ઝઞ્ભ્શદ્ય ભવિષ્યતિ। હે કપટિનો યદિ યૂયમ્ અન્તરીક્ષસ્ય લક્ષ્મ બોદ્ધું
શક્નુથ, તર્હિ કાલસ્યૈતસ્ય લક્ષ્મ કથં બોદ્ધું ન શક્નુથ?
IV એતત્કાલસ્ય દુષ્ટો વ્યભિચારી ચ વંશો લક્ષ્મ ગવેષયતિ, કિન્તુ યૂનસો ભવિષ્યદ્વાદિનો લક્ષ્મ વિનાન્યત્ કિમપિ લક્ષ્મ તાન્ ન
દર્શયિષ્યતે। તદાનીં સ તાન્ વિહાય પ્રતસ્થે।
V અનન્તરમન્યપારગમનકાલે તસ્ય શિષ્યાઃ પૂપમાનેતું વિસ્મૃતવન્તઃ।
VI યીશુસ્તાનવાદીત્, યૂયં ફિરૂશિનાં સિદૂકિનાઞ્ચ કિણ્વં પ્રતિ સાવધાનાઃ સતર્કાશ્ચ ભવત।
VII તેન તે પરસ્પરં વિવિચ્ય કથયિતુમારેભિરે, વયં પૂપાનાનેતું વિસ્મૃતવન્ત એતત્કારણાદ્ ઇતિ કથયતિ।
VIII કિન્તુ યીશુસ્તદ્વિજ્ઞાય તાનવોચત્, હે સ્તોકવિશ્વાસિનો યૂયં પૂપાનાનયનમધિ કુતઃ પરસ્પરમેતદ્ વિવિંક્ય?
IX યુષ્માભિઃ કિમદ્યાપિ ન જ્ઞાયતે? પઞ્ચભિઃ પૂપૈઃ પઞ્ચસહસ્રપુરુષેષુ ભોજિતેષુ ભક્ષ્યોચ્છિષ્ટપૂર્ણાન્ કતિ ડલકાન્ સમગૃહ્લીતં;
X તથા સપ્તભિઃ પૂપૈશ્ચતુઃસહસ્રપુરુષેષુ ભેજિતેષુ કતિ ડલકાન્ સમગૃહ્લીત, તત્ કિં યુષ્માભિર્ન સ્મર્ય્યતે?
XI તસ્માત્ ફિરૂશિનાં સિદૂકિનાઞ્ચ કિણ્વં પ્રતિ સાવધાનાસ્તિષ્ઠત, કથામિમામ્ અહં પૂપાનધિ નાકથયં, એતદ્ યૂયં કુતો ન બુધ્યધ્વે?
XII તદાનીં પૂપકિણ્વં પ્રતિ સાવધાનાસ્તિષ્ઠતેતિ નોક્ત્વા ફિરૂશિનાં સિદૂકિનાઞ્ચ ઉપદેશં પ્રતિ સાવધાનાસ્તિષ્ઠતેતિ કથિતવાન્,
ઇતિ તૈરબોધિ।
XIII અપરઞ્ચ યીશુઃ કૈસરિયા-ફિલિપિપ્રદેશમાગત્ય શિષ્યાન્ અપૃચ્છત્, યોઽહં મનુજસુતઃ સોઽહં કઃ? લોકૈરહં કિમુચ્યે?
XIV તદાનીં તે કથિતવન્તઃ, કેચિદ્ વદન્તિ ત્વં મજ્જયિતા યોહન્, કેચિદ્વદન્તિ, ત્વમ્ એલિયઃ, કેચિચ્ચ વદન્તિ, ત્વં યિરિમિયો
વા કશ્ચિદ્ ભવિષ્યદ્વાદીતિ।
XV પશ્ચાત્ સ તાન્ પપ્રચ્છ, યૂયં માં કં વદથ? તતઃ શિમોન્ પિતર ઉવાચ,
XVI ત્વમમરેશ્વરસ્યાભિષિક્તપુત્રઃ।
XVII તતો યીશુઃ કથિતવાન્, હે યૂનસઃ પુત્ર શિમોન્ ત્વં ધન્યઃ; યતઃ કોપિ અનુજસ્ત્વય્યેતજ્જ્ઞાનં નોદપાદયત્, કિન્તુ મમ સ્વર્ગસ્યઃ
પિતોદપાદયત્।
XVIII અતોઽહં ત્વાં વદામિ, ત્વં પિતરઃ (પ્રસ્તરઃ) અહઞ્ચ તસ્ય પ્રસ્તરસ્યોપરિ સ્વમણ્ડલીં નિર્મ્માસ્યામિ, તેન નિરયો બલાત્ તાં
પરાજેતું ન શક્ષ્યતિ।
XIX અહં તુભ્યં સ્વર્ગીયરાજ્યસ્ય કુઞ્જિકાં દાસ્યામિ, તેન યત્ કિઞ્ચન ત્વં પૃથિવ્યાં ભંત્સ્યસિ તત્સ્વર્ગે ભંત્સ્યતે, યચ્ચ કિઞ્ચન
મહ્યાં મોક્ષ્યસિ તત્ સ્વર્ગે મોક્ષ્યતે।

XX પશ્ચાત્ સ શિષ્યાનાદિશત્, અહમભિષિક્તો યીશુરિતિ કથાં કસ્મૈચિદપિ યૂયં મા કથયત।
XXI અન્યચ્ચ યિરૂશાલમ્નગરં ગત્વા પ્રાચીનલોકેભ્યઃ પ્રધાનયાજકેભ્ય ઉપાધ્યાયેભ્યશ્ચ બહુદુઃખભોગસ્તૈ ર્હતત્વં તૃતીયદિને
પુનરુત્થાનઞ્ચ મમાવશ્યકમ્ એતાઃ કથા યીશુસ્તત્કાલમારભ્ય શિષ્યાન્ જ્ઞાપયિતુમ્ આરબ્ધવાન્।
XXII તદાનીં પિતરસ્તસ્ય કરં ઘૃત્વા તર્જયિત્વા કથયિતુમારબ્ધવાન્, હે પ્રભો, તત્ ત્વત્તો દૂરં યાતુ, ત્વાં પ્રતિ કદાપિ ન ઘટિષ્યતે।
XXIII કિન્તુ સ વદનં પરાવર્ત્ય પિતરં જગાદ, હે વિઘ્નકારિન્, મત્સમ્મુખાદ્ દૂરીભવ, ત્વં માં બાધસે, ઈશ્વરીયકાર્ય્યાત્
માનુષીયકાર્ય્યં તુભ્યં રોચતે।
XXIV અનન્તરં યીશુઃ સ્વીયશિષ્યાન્ ઉક્તવાન્ યઃ કશ્ચિત્ મમ પશ્ચાદ્ગામી ભવિતુમ્ ઇચ્છતિ, સ સ્વં દામ્યતુ, તથા સ્વક્રુશં ગૃહ્લન્
મત્પશ્ચાદાયાતુ।
XXV યતો યઃ પ્રાણાન્ રક્ષિતુમિચ્છતિ, સ તાન્ હારયિષ્યતિ, કિન્તુ યો મદર્થં નિજપ્રાણાન્ હારયતિ, સ તાન્ પ્રાપ્સ્યતિ।
XXVI માનુષો યદિ સર્વ્વં જગત્ લભતે નિજપ્રણાન્ હારયતિ, તર્હિ તસ્ય કો લાભઃ? મનુજો નિજપ્રાણાનાં વિનિમયેન વા કિં દાતું
શક્નોતિ?
XXVII મનુજસુતઃ સ્વદૂતૈઃ સાકં પિતુઃ પ્રભાવેણાગમિષ્યતિ; તદા પ્રતિમનુજં સ્વસ્વકર્મ્માનુસારાત્ ફલં દાસ્યતિ।
XXVIII અહં યુષ્માન્ તથ્યં વચ્મિ, સરાજ્યં મનુજસુતમ્ આગતં ન પશ્યન્તો મૃત્યું ન સ્વાદિષ્યન્તિ, એતાદૃશાઃ કતિપયજના
અત્રાપિ દણ્ડાયમાનાઃ સન્તિ।

# XVII

I અનન્તરં ષડ્દિનેભ્યઃ પરં યીશુઃ પિતરં યાકૂબં તત્સહજં યોહનઞ્ચ ગૃહ્લન્ ઉચ્ચાદ્રે ર્વિવિક્તસ્થાનમ્ આગત્ય તેષાં સમક્ષં રૂપમન્યત્
દધાર।
II તેન તદાસ્યં તેજસ્વિ, તદાભરણમ્ આલોકવત્ પાણ્ડરમભવત્।
III અન્યચ્ચ તેન સાકં સંલપન્તૌ મૂસા એલિયશ્ચ તેભ્યો દર્શનં દદતુઃ।
IV તદાનીં પિતરો યીશું જગાદ, હે પ્રભો સ્થિતિરત્રાસ્માકં શુભા, યદિ ભવતાનુમન્યતે, તર્હિ ભવદર્થમેકં મૂસાર્થમેકમ્
એલિયાર્થઞ્ચૈકમ્ ઇતિ ત્રીણિ દૂષ્યાણિ નિર્મ્મમ।
V એતત્કથનકાલ એક ઉજ્જ્વલઃ પયોદસ્તેષામુપરિ છાયાં કૃતવાન્, વારિદાદ્ એષા નભસીયા વાગ્ બભૂવ, મમાયં પ્રિયઃ પુત્રઃ,
અસ્મિન્ મમ મહાસન્તોષ એતસ્ય વાક્યં યૂયં નિશામયત।
VI કિન્તુ વાચમેતાં શૃણ્વન્તએવ શિષ્યા મૃશં શઙ્કમાના ન્યુબ્જા ન્યપતન્।
VII તદા યીશુરાગત્ય તેષાં ગાત્રાણિ સ્પૃશન્ ઉવાચ, ઉત્તિષ્ઠત, મા ભૈષ્ટ।
VIII તદાનીં નેત્રાણ્યુન્મીલ્ય યીશું વિના કમપિ ન દદૃશુઃ।
IX તતઃ પરમ્ અદ્રેરવરોહણકાલે યીશુસ્તાન્ ઇત્યાદિદેશ, મનુજસુતસ્ય મૃતાનાં મધ્યાદુત્થાનં યાવન્ન જાયતે, તાવત્
યુષ્માભિરેતદ્દર્શનં કસ્મૈચિદપિ ન કથયિતવ્યં।
X તદા શિષ્યાસ્તં પપ્રચ્છુઃ, પ્રથમમ્ એલિય આયાસ્યતીતિ કુત ઉપાધ્યાયૈરુચ્યતે?
XI તતો યીશુઃ પ્રત્યવાદીત્, એલિયઃ પ્રાગેત્ય સર્વ્વાણિ સાધયિષ્યતીતિ સત્યં,
XII કિન્ત્વહં યુષ્માન્ વચ્મિ, એલિય એત્ય ગતઃ, તે તમપરિચિત્ય તસ્મિન્ યથેચ્છં વ્યવજહુઃ; મનુજસુતેનાપિ તેષામન્તિકે તાદૃગ્
દુઃખં ભોક્તવ્યં।
XIII તદાનીં સ મજ્જયિતારં યોહનમધિ કથામેતાં વ્યાહૃતવાન્, ઇત્થં તચ્છિષ્યા બુબુધિરે।
XIV પશ્ચાત્ તેષુ જનનિવહસ્યાન્તિકમાગતેષુ કશ્ચિત્ મનુજસ્તદન્તિકમેત્ય જાનૂની પાતયિત્વા કથિતવાન્,
XV હે પ્રભો, મત્પુત્રં પ્રતિ કૃપાં વિદધાતુ, સોપસ્મારામયેન ભૃશં વ્યથિતઃ સન્ પુનઃ પુન ર્વહ્નૌ મુહુ ર્જલમધ્યે પતતિ।
XVI તસ્માદ્ ભવતઃ શિષ્યાણાં સમીપે તમાનયં કિન્તુ તે તં સ્વાસ્થં કર્ત્તું ન શક્તાઃ।
XVII તદા યીશુઃ કથિતવાન્ રે અવિશ્વાસિનઃ, રે વિપથગામિનઃ, પુનઃ કતિકાલાન્ અહં યુષ્માકં સન્નિધૌ સ્થાસ્યામિ? કતિકાલાન્
વા યુષ્માન્ સહિષ્યે? તમત્ર મમાન્તિકમાનયત।
XVIII પશ્ચાદ્ યીશુના તર્જતએવ સ ભૂતસ્તં વિહાય ગતવાન્, તદ્દણ્ડએવ સ બાલકો નિરામયોઽભૂત્।
XIX તતઃ શિષ્યા ગુપ્તં યીશુમુપાગત્ય બભાષિરે, કુતો વયં તં ભૂતં ત્યાજયિતું ન શક્તાઃ?
XX યીશુના તે પ્રોક્તાઃ, યુષ્માકમપ્રત્યયાત્;
XXI યુષ્માનહં તથ્યં વચ્મિ યદિ યુષ્માકં સર્ષપૈકમાત્રોપિ વિશ્વાસો જાયતે, તર્હિ યુષ્માભિરસ્મિન્ શૈલે ત્વમિતઃ સ્થાનાત્ તત્ સ્થાનં
યાહીતિ બ્રૂતે સ તદૈવ ચલિષ્યતિ, યુષ્માકં કિમપ્યસાધ્યઞ્ચ કર્મ્મ ન સ્થાસ્યાતિ। કિન્તુ પ્રાર્થનોપવાસૌ વિનૈતાદૃશો ભૂતો ન ત્યાજ્યેત।
XXII અપરં તેષાં ગાલીલ્પ્રદેશે ભ્રમણકાલે યીશુના તે ગદિતાઃ, મનુજસુતો જનાનાં કરેષુ સમર્પયિષ્યતે તૈ ર્હનિષ્યતે ચ,
XXIII કિન્તુ તૃતીયેઽહિ ્ન મ ઉત્થાપિષ્યતે, તેન તે ભૃશં દુઃખિતા બભૂવઃ।
XXIV તદનન્તરં તેષુ કફર્નાહૂમ્નગરમાગતેષુ કરસંગ્રાહિણઃ પિતરાન્તિકમાગત્ય પપ્રચ્છુઃ, યુષ્માકં ગુરુઃ કિં મન્દિરાર્થં કરં ન દદાતિ?
તતઃ પિતરઃ કથિતવાન્ દદાતિ।
XXV તતસ્તસ્મિન્ ગૃહમધ્યમાગતે તસ્ય કથાકથનાત્ પૂર્વ્વમેવ યીશુરુવાચ, હે શિમોન્, મેદિન્યા રાજાનઃ સ્વસ્વાપત્યેભ્યઃ કિં
વિદેશિભ્યઃ કેભ્યઃ કરં ગૃહ્લન્તિ? અત્ર ત્વં કિં બુધ્યસે? તતઃ પિતર ઉક્તવાન્, વિદેશિભ્યઃ।
XXVI તદા યીશુરુક્તવાન્, તર્હિ સન્તાના મુક્તાઃ સન્તિ।
XXVII તથાપિ યથાસ્માભિસ્તેષામન્તરાયો ન જન્યતે, તત્કૃતે જલધેસ્તીરં ગત્વા વડિશં ક્ષિપ, તેનાદૌ યો મીન ઉત્થાસ્યતિ, તં
ઘૃત્વા તન્મુખે મોચિતે તોલકૈકં રૂપ્યં પ્રાપ્સ્યસિ, તદ્ ગૃહીત્વા તવ મમ ચ કૃતે તેભ્યો દેહિ।

# XVIII

I તદાનીં શિષ્યા યીશોઃ સમીપમાગત્ય પૃષ્ટવન્તઃ સ્વર્ગરાજ્યે કઃ શ્રેષ્ઠઃ?
II તતો યીશુઃ ક્ષુદ્રમેકં બાલકં સ્વસમીપમાનીય તેષાં મધ્યે નિધાય જગાદ,
III યુષ્માનહં સત્યં બ્રવીમિ, યૂયં મનોવિનિમયેન ક્ષુદ્રબાલવત્ ન સન્તઃ સ્વર્ગરાજ્યં પ્રવેષ્ટું ન શક્નુથ।
IV યઃ કશ્ચિદ્ એતસ્ય ક્ષુદ્રબાલકસ્ય સમમાત્માનં નમ્રીકરોતિ, સએવ સ્વર્ગરાજયે શ્રેષ્ઠઃ।
V યઃ કશ્ચિદ્ એતાદૃશં ક્ષુદ્રબાલકમેકં મમ નામ્નિ ગૃહ્લાતિ, સ મામેવ ગૃહ્લાતિ।
VI કિન્તુ યો જનો મયિ કૃતવિશ્વાસાનામેતેષાં ક્ષુદ્રપ્રાણિનામ્ એકસ્યાપિ વિઘ્નિં જનયતિ, કણ્ઠબદ્ધપેષણીકસ્ય તસ્ય
સાગરાગાધજલે મજ્જનં શ્રેયઃ।
VII વિઘ્નાત્ જગતઃ સન્તાપો ભવિષ્યતિ, વિઘ્નોઽવશ્યં જનયિષ્યતે, કિન્તુ યેન મનુજેન વિઘ્નો જનિષ્યતે તસ્યૈવ સન્તાપો
ભવિષ્યતિ।
VIII તસ્માત્ તવ કરશ્ચરણો વા યદિ ત્વાં બાધતે, તર્હિ તં છિત્ત્વા નિક્ષિપ, દ્વિકરસ્ય દ્વિપદસ્ય વા તવાનપ્તવહ્નૌ નિક્ષેપાત્, ખઞ્જસ્ય
વા છિન્નહસ્તસ્ય તવ જીવને પ્રવેશો વરં।
IX અપરં તવ નેત્રં યદિ ત્વાં બાધતે, તર્હિ તદપ્યુત્પાવ્ય નિક્ષિપ, દ્વિનેત્રસ્ય નરકાગ્નૌ નિક્ષેપાત્ કાણસ્ય તવ જીવને પ્રવેશો વરં।
X તસ્માદવધદ્ધં, એતેષાં ક્ષુદ્રપ્રાણિનામ્ એકમપિ મા તુચ્છીકુરુત,
XI યતો યુષ્માનહં તથ્યં બ્રવીમિ, સ્વર્ગે તેષાં દૂતા મમ સ્વર્ગસ્થસ્ય પિતુરાસ્યં નિત્યં પશ્યન્તિ। એવં યે યે હારિતાસ્તાન્ રક્ષિતું
મનુજપુત્ર આગચ્છત્।
XII યૂયમત્ર કિં વિવિંગ્ધ્વે? કસ્યચિદ્ યદિ શતં મેષાઃ સન્તિ, તેષામેકો હાર્ય્યતે ચ, તર્હિ સ એકોનશતં મેષાન્ વિહાય પર્વ્વતં ગત્વા
તં હારિતમેકં કિં ન મૃગયતે?
XIII યદિ ચ કદાચિત્ તન્મેષોદ્દેશં લમતે, તર્હિ યુષ્માનહં સત્યં કથયામિ, સોઽવિપથગામિભ્ય એકોનશતમેષેભ્યોપિ
તદેકહેતોરધિકમ્ આહ્લાદતે।
XIV તદ્વદ્ એતેષાં ક્ષુદ્રપ્રાએિનામ્ એકોપિ નશ્યતીતિ યુષ્માકં સ્વર્ગસ્થપિતુ ર્નાભિમતમ્।
XV યદ્યપિ તવ ભ્રાતા ત્વયિ કિમપ્યપરાધ્યતિ, તર્હિ ગત્વા યુવયોર્દ્વયોઃ સ્થિતયોસ્તસ્યાપરાધં તં જ્ઞાપય। તત્ર સ યદિ તવ વાક્યં
શૃણોતિ, તર્હિ ત્વં સ્વભ્રાતરં પ્રાપ્તવાન્,
XVI કિન્તુ યદિ ન શૃણોતિ, તર્હિ દ્વાભ્યાં ત્રિભિ ર્વા સાક્ષીભિઃ સર્વ્વં વાક્યં યથા નિશ્ચિતં જાયતે, તદર્થમ્ એકં દ્વૌ વા સાક્ષિણૌ
ગૃહીત્વા યાહિ।
XVII તેન સ યદિ તયો ર્વાક્યં ન માન્યતે, તર્હિ સમાજં તજ્જ્ઞાપય, કિન્તુ યદિ સમાજસ્યાપિ વાક્યં ન માન્યતે,તર્હિ સ તવ સમીપે
દેવપૂજકઇવ ચણ્ડાલઇવ ચ ભવિષ્યતિ।
XVIII અહં યુષ્માન્ સત્યં વદામિ, યુષ્માભિઃ પૃથિવ્યાં યદ્ બધ્યતે તત્ સ્વર્ગે ભંત્સ્યતે; મેદિન્યાં યત્ ભોચ્યતે, સ્વર્ગેઽપિ તત્
મોક્ષ્યતે।
XIX પુનરહં યુષ્માન્ વદામિ, મેદિન્યાં યુષ્માકં યદિ દ્વાવેકવાક્યીભૂય કિઞ્ચિત્ પ્રાર્થયેતે, તર્હિ મમ સ્વર્ગસ્થપિત્રા તત્ તયોઃ કૃતે
સમ્પન્નં ભવિષ્યતિ।
XX યતો યત્ર દ્વૌ ત્રયો વા મમ નાન્નિ મિલન્તિ, તત્રૈવાહં તેષાં મધ્યેઽસ્મિ।
XXI તદાનીં પિતરસ્તત્સમીપમાગત્ય કથિતવાન્ હે પ્રભો, મમ ભ્રાતા મમ યદ્યપરાધ્યતિ, તર્હિ તં કતિકૃત્વઃ ક્ષમિષ્યે?
XXII કિં સપ્તકૃત્વઃ? યીશુસ્તં જગાદ, ત્વાં કેવલં સપ્તકૃત્વો યાવત્ ન વદામિ, કિન્તુ સપ્તત્યા ગુણિતં સપ્તકૃત્વો યાવત્।
XXIII અપરં નિજદાસૈઃ સહ જિગણયિષુઃ કશ્ચિદ્ રાજેવ સ્વર્ગરાજ્યં।
XXIV આરબ્ધે તસ્મિન્ ગણને સાર્દ્ધસહસ્રમુદ્રાપૂરિતાનાં દશસહસ્રપુટકાનામ્ એકોઽધમર્ણસ્તત્સમક્ષમાનાયિ।
XXV તસ્ય પરિશોધનાય દ્રવ્યાભાવાત્ પરિશોધનાર્થં સ તદીયભાર્ય્યાપુત્રાદિસર્વ્વસ્વઞ્ચ વિક્રીયતામિતિ તત્પ્રભુરાદિદેશ।
XXVI તેન સ દાસસ્તસ્ય પાદયોઃ પતન્ પ્રણમ્ય કથિતવાન્ , હે પ્રભો ભવતા ધૈર્ય્યે કૃતે મયા સર્વ્વં પરિશોધિષ્યતે।
XXVII તદાનીં દાસસ્ય પ્રભુઃ સકરુણઃ સન્ સકલર્ણં ક્ષમિત્વા તં તત્યાજ।
XXVIII કિન્તુ તસ્મિન્ દાસે બહિ ર્યાતે, તસ્ય શતં મુદ્રાચતુર્થાંશાન્ યો ધારયતિ, તં સહદાસં દૃષ્દ્વા તસ્ય કણ્ઠં નિષ્પીડ્ય ગદિતવાન્,
મમ યત્ પ્રાપ્યં તત્ પરિશોધય।
XXIX તદા તસ્ય સહદાસસ્તત્પાદયોઃ પતિત્વા વિનીય બભાષે, ત્વયા ધૈર્ય્યે કૃતે મયા સર્વ્વં પરિશોધિષ્યતે।
XXX તથાપિ સ તત્ નાઙ્ગીકૃત્ય યાવત્ સર્વ્વમૃણં ન પરિશોધિતવાન્ તાવત્ તં કારાયાં સ્થાપયામાસ।
XXXI તદા તસ્ય સહદાસાસ્તસ્યૈતાદૃગ્ આચરણં વિલોક્ય પ્રભોઃ સમીપં ગત્વા સર્વ્વં વૃત્તાન્તં નિવેદયામાસુઃ।
XXXII તદા તસ્ય પ્રભુસ્તમાહૂય જગાદ, રે દુષ્ટ દાસ, ત્વયા મત્સન્નિધૌ પ્રાર્થિતે મયા તવ સર્વ્વમૃણં ત્યક્તં;
XXXIII યથા ચાહં ત્વયિ કરુણાં કૃતવાન્, તથૈવ ત્વત્સહદાસે કરુણાકરણં કિં તવ નોચિતં?
XXXIV ઇતિ કથયિત્વા તસ્ય પ્રભુઃ ક્રુદ્ધ્યન્ નિજપ્રાપ્યં યાવત્ સ ન પરિશોધિતવાન્, તાવત્ પ્રહારકાનાં કરેષુ તં સમર્પિતવાન્।
XXXV યદિ યૂયં સ્વાન્તઃકરણૈઃ સ્વસ્વસહજાનામ્ અપરાધાન્ ન ક્ષમધ્વે, તર્હિ મમ સ્વર્ગસ્યઃ પિતાપિ યુષ્માન્ પ્રતીત્થં કરિષ્યતિ।

# XIX

I અનન્તરમ્ એતાસુ કથાસુ સમાપ્તાસુ યીશુ ર્ગાલીલપ્રદેશાત્ પ્રસ્થાય યર્દન્તીરસ્થં યિહૂદાપ્રદેશં પ્રાપ્તઃ।
II તદા તત્પશ્ચાત્ જનનિવહે ગતે સ તત્ર તાન્ નિરામયાન્ અકરોત્।
III તદનન્તરં ફિરૂશિનસ્તત્સમીપમાગત્ય પારીક્ષિતું તં પપ્રચ્છુઃ, કસ્માદપિ કારણાત્ નરેણ સ્વજાયા પરિત્યાજ્યા ન વા?
IV સ પ્રત્યુવાચ, પ્રથમમ્ ઈશ્વરો નરત્વેન નારીત્વેન ચ મનુજાન્ સસર્જ, તસ્માત્ કથિતવાન્,
V માનુષઃ સ્વપિતરૌ પરિત્યજ્ય સ્વપત્ન્યામ્ આસક્ષ્યતે, તૌ દ્વૌ જનાવેકાઙ્ગૌ ભવિષ્યતઃ, કિમેતદ્ યુષ્માભિ ર્ન પઠિતમ્?

VI અતસ્તૌ પુન ર્ન દ્વૌ તયોરેકાઙ્ગત્વં જાતં, ઈશ્વરેણ યચ્ચ સમયુજ્યત, મનુજો ન તદ્ ભિન્દ્યાત્|
VII તદાનીં તે તં પ્રત્યવદન્, તથાત્વે ત્યાજ્યપત્રં દત્ત્વા સ્વાં સ્વાં જાયાં ત્યક્તું વ્યવસ્થાં મૂસાઃ કથં લિલેખ?
VIII તતઃ સ કથિતવાન્, યુષ્માકં મનસાં કાઠિન્યાદ્ યુષ્માન્ સ્વાં સ્વાં જાયાં ત્યક્તુમ્ અન્વમન્યત કિન્તુ પ્રથમાદ્ એષો વિધિર્નાસીત્|
IX અતો યુષ્માનહં વદામિ, વ્યભિચારં વિના યો નિજજાયાં ત્યજેત્ અન્યાઞ્ચ વિવહેત્, સ પરદારાન્ ગચ્છતિ; યશ્ચ ત્યક્તાં નારીં
વિવહતિ સોપિ પરદારેષુ રમતે|
X તદા તસ્ય શિષ્યાસ્તં બભાષિરે, યદિ સ્વજાયયા સાકં પુંસ એતાદૃક્ સમ્બન્ધો જાયતે, તર્હિ વિવહનમેવ ન ભદ્રં|
XI તતઃ સ ઉક્તવાન્, યેભ્યસ્તત્સામર્થ્યં આદાયિ, તાન્ વિનાન્યઃ કોપિ મનુજ એતન્મતં ગ્રહીતું ન શક્નોતિ|
XII કતિપયા જનનક્લીબઃ કતિપયા નરકૃતક્લીબઃ સ્વર્ગરાજ્યાય કતિપયાઃ સ્વકૃતક્લીબાશ્ચ સન્તિ, યે ગ્રહીતું શક્નુવન્તિ તે
ગૃહ્લન્તુ|
XIII અપરમ્ યથા સ શિશૂનાં ગાત્રેષુ હસ્તં દત્વા પ્રાર્થયતે, તદર્થં તત્સમીપં શિશવ આનીયન્ત, તત આનયિતૃન્
શિષ્યાસ્તિરસ્કૃતવન્તઃ|
XIV કિન્તુ યીશુરુવાચ, શિશવો મદન્તિકમ્ આગચ્છન્તુ, તાન્ મા વારયત, એતાદૃશાં શિશૂનામેવ સ્વર્ગરાજ્યં|
XV તતઃ સ તેષાં ગાત્રેષુ હસ્તં દત્વા તસ્માત્ સ્થાનાત્ પ્રતસ્થે|
XVI અપરમ્ એક આગત્ય તં પપ્રચ્છ, હે પરમગુરો, અનન્તાયુઃ પ્રાપ્તું મયા કિં કિં સત્કર્મ્મ કર્ત્તવ્યં?
XVII તતઃ સ ઉવાચ, માં પરમં કુતો વદસિ? વિનેશ્વરં ન કોપિ પરમઃ, કિન્તુ યદ્યનન્તાયુઃ પ્રાપ્તું વાઞ્છસિ, તર્હ્યાજ્ઞાઃ પાલય|
XVIII તદા સ પૃષ્ટવાન્, કાઃ કા આજ્ઞાઃ? તતો યીશુઃ કથિતવાન્, નરં મા હન્યાઃ, પરદારાન્ મા ગચ્છેઃ, મા ચોરયેઃ, મૃષાસાક્ષ્યં મા
દદ્યાઃ,
XIX નિજપિતરૌ સંમન્યસ્વ, સ્વસમીપવાસિનિ સ્વવત્ પ્રેમ કુરુ|
XX સ યુવા કથિતવાન્, આ બાલ્યાદ્ એતાઃ પાલયામિ, ઇદાનીં કિં ન્યૂનમાસ્તે?
XXI તતો યીશુરવદત્, યદિ સિદ્ધો ભવિતું વાઞ્છસિ, તર્હિ ગત્વા નિજસર્વ્વસ્વં વિક્રીય દરિદ્રેભ્યો વિતર, તતઃ સ્વર્ગે વિત્તં લપ્સ્યસે;
આગચ્છ, મત્પશ્ચાદ્વર્ત્તી ચ ભવ|
XXII એતાં વાચં શ્રુત્વા સ યુવા સ્વીયબહુસમ્પત્તે ર્વિષણઃ સન્ ચલિતવાન્|
XXIII તદા યીશુઃ સ્વશિષ્યાન્ અવદત્, ધનિનાં સ્વર્ગરાજ્યપ્રવેશો મહાદુષ્કર ઇતિ યુષ્માનહં તથ્યં વદામિ|
XXIV પુનરપિ યુષ્માનહં વદામિ, ધનિનાં સ્વર્ગરાજ્યપ્રવેશાત્ સૂચીછિદ્રેણ મહાઙ્ગગમનં સુકરં|
XXV ઇતિ વાક્યં નિશમ્ય શિષ્યા અતિચમત્કૃત્ય કથયામાસુઃ; તર્હિ કસ્ય પરિત્રાણં ભવિતું શક્નોતિ?
XXVI તદા સ તાન્ દૃષ્દ્વા કથયામાસ, તત્ માનુષાણામશક્યં ભવતિ, કિન્ત્વીશ્વરસ્ય સર્વ્વં શક્યમ્|
XXVII તદા પિતરસ્તં ગદિતવાન્, પશ્ય, વયં સર્વ્વં પરિત્યજ્ય ભવતઃ પશ્ચાદ્વર્ત્તિનો ઽભવામ; વયં કિં પ્રાપ્સ્યામઃ?
XXVIII તતો યીશુઃ કથિતવાન્, યુષ્માનહં તથ્યં વદામિ, યૂયં મમ પશ્ચાદ્વર્ત્તિનો જાતા ઇતિ કારણાત્ નવીનસૃષ્ટિકાલે યદા
મનુજસુતઃ સ્વીયૈશ્વર્ય્યસિંહાસન ઉપવેક્ષ્યતિ, તદા યૂયમપિ દ્વાદશસિંહાસનેષૂપવિશ્ય ઇસ્રાયેલીયદ્વાદશવંશાનાં વિચારં કરિષ્યથ|
XXIX અન્યચ્ચ યઃ કશ્ચિત્ મમ નામકારણાત્ ગૃહં વા ભ્રાતરં વા ભગિનીં વા પિતરં વા માતરં વા જાયાં વા બાલકં વા ભૂમિં
પરિત્યજતિ, સ તેષાં શતગુણં લપ્સ્યતે, અનન્તાયુમોઽધિકારિત્વઞ્ચ પ્રાપ્સ્યતિ|
XXX કિન્તુ અગ્રીયા અનેકે જનાઃ પશ્ચાત્, પશ્ચાતીયાશ્ચાનેકે લોકા અગ્રે ભવિષ્યન્તિ|

# XX

I સ્વર્ગરાજ્યમ્ એતાદૃશા કેનચિદ્ ગૃહસ્થેન સમં, યોઽતિપ્રભાતે નિજદ્રાક્ષાક્ષેત્રે કૃષકાન્ નિયોક્તું ગતવાન્|
II પશ્ચાત્ તૈઃ સાકં દિનૈકભૃતિં મુદ્રાચતુર્થાંશં નિરૂપ્ય તાન્ દ્રાક્ષાક્ષેત્રં પ્રેરયામાસ|
III અનન્તરં પ્રહરૈકવેલાયાં ગત્વા હટ્ટે કતિપયાન્ નિષ્કર્મ્મકાન્ વિલોક્ય તાનવદત્,
IV યૂયમપિ મમ દ્રાક્ષાક્ષેત્રં યાત, યુષ્મભ્યમહં યોગ્યભૃતિં દાસ્યામિ, તતસ્તે વવ્રજુઃ|
V પુનશ્ચ સ દ્વિતીયતૃતીયયોઃ પ્રહરયો ર્બહિ ર્ગત્વા તથૈવ કૃતવાન્|
VI તતો દણ્ડદ્વયાવશિષ્ટાયાં વેલાયાં બહિ ર્ગત્વાપરાન્ કતિપયજનાન્ નિષ્કર્મ્મકાન્ વિલોક્ય પૃષ્ટવાન્, યૂયં કિમર્થમ્ અત્ર સર્વ્વં
દિનં નિષ્કર્મ્માણસ્તિષ્ઠથ?
VII તે પ્રત્યવદન્, અસ્માન્ ન કોપિ કર્મમણિ નિયુંક્તે| તદાનીં સ કથિતવાન્, યૂયમપિ મમ દ્રાક્ષાક્ષેત્રં યાત, તેન યોગ્યાં ભૃતિં
લપ્સ્યથ|
VIII તદનન્તરં સન્ધ્યાયાં સત્યાં સએવ દ્રાક્ષાક્ષેત્રપતિરધ્યક્ષં ગદિવાન્, કૃષકાન્ આહૂય શેષજનમારભ્ય પ્રથમં યાવત્ તેભ્યો ભૃતિં
દેહિ|
IX તેન યે દણ્ડદ્વયાવસ્થિતે સમાયાતાસ્તેષામ્ એકૈકો જનો મુદ્રાચતુર્થાંશં પ્રાપ્નોત્|
X તદાનીં પ્રથમનિયુક્તા જના આગત્યાનુમિતવન્તો વયમધિકં પ્રપ્સ્યામઃ, કિન્તુ તૈરપિ મુદ્રાચતુર્થાંશોઽલાભિ|
XI તતસ્તે તં ગૃહીત્વા તેન ક્ષેત્રપતિના સાકં વાગ્યુદ્ધં કુર્વ્વન્તઃ કથયામાસુઃ,
XII વયં કૃત્સ્નં દિનં તાપક્લેશૌ સોઢવન્તઃ, કિન્તુ પશ્ચાતાયા સે જના દણ્ડદ્વયમાત્રં પરિશ્રાન્તવન્તસ્તેઽસ્માભિઃ સમાનાંશાઃ કૃતાઃ|
XIII તતઃ સ તેષામેકં પ્રત્યુવાચ, હે વત્સ, મયા ત્વાં પ્રતિ કોપ્યન્યાયો ન કૃતઃ કિં ત્વયા મત્સમક્ષં મુદ્રાચતુર્થાંશો નાઙ્ગીકૃતઃ?
XIV તસ્માત્ તવ યત્ પ્રાપ્યં તદાદાય યાહિ, તુભ્યં યતિ, પશ્ચાતીયનિયુક્તલોકાયાપિ તતિ દાતુમિચ્છામિ|
XV સ્વેચ્છયા નિજદ્રવ્યવ્યવહરણં કિં મયા ન કર્ત્તવ્યં? મમ દાતૃત્વાત્ ત્વયા કિમ્ ઈર્ષ્યાદૃષ્ટિઃ ક્રિયતે?
XVI ઇત્થમ્ અગ્રીયલોકાઃ પશ્ચતીયા ભવિષ્યન્તિ, પશ્ચાતીયજનાશ્ચાગ્રીયા ભવિષ્યન્તિ, અહૂતા બહવઃ કિન્ત્વલ્પે
મનોભિલષિતાઃ|
XVII તદનન્તરં યીશુ ર્યિરૂશાલમ્નગરં ગચ્છન્ માર્ગમધ્યે શિષ્યાન્ એકાન્તે વભાષે,

XVIII પશ્ય વયં યિરૂશાલમ્નગરં યામઃ, તત્ર પ્રધાનયાજકાધ્યાપકાનાં કરેષુ મનુષ્યપુત્રઃ સમર્પિષ્યતે;
XIX તે ચ તં હન્તુમાજ્ઞાપ્ય તિરસ્કૃત્ય વેત્રેણ પ્રહર્త్తું ક્રુશે ધાતયિતુઞ્ચાન્યદેશીયાનાં કરેષુ સમર્પયિષ્યન્તિ, કિન્તુ સ તૃતીયદિવસે
શ્મશાનાદ્ ઉત્થાપિષ્યતે।
XX તદાનીં સિવદીયસ્ય નારી સ્વપુત્રાવાદાય યીશોઃ સમીપમ્ એત્ય પ્રણમ્ય કઞ્ચનાનુગ્રહં તં યયાચે।
XXI તદા યીશુસ્તાં પ્રોક્તવાન્, ત્વં કિં યાચસે? તતઃ સા બભાષે, ભવતો રાજત્વે મમાનયોઃ સુતયોરેકં ભવદ્દક્ષિણપાર્શ્વે દ્વિતીયં
વામપાર્શ્વ ઉપવેષ્ટુમ્ આજ્ઞાપયતુ।
XXII યીશુઃ પ્રત્યુવાચ, યુવાભ્યાં યદ્ યાચ્યતે, તન્ન બુધ્યતે, અહં યેન કંસેન પાસ્યામિ યુવાભ્યાં કિં તેન પાતું શક્યતે? અહઞ્ચ યેન
મજ્જેનેન મજ્જિષ્યે, યુવાભ્યાં કિં તેન મજ્જયિતું શક્યતે? તે જગદુઃ શક્યતે।
XXIII તદા સ ઉક્તવાન્, યુવાં મમ કંસેનાવશ્યં પાસ્યથઃ, મમ મજ્જનેન ચ યુવામપિ મજ્જિષ્યેથે, કિન્તુ યેષાં કૃતે મત્તાતેન
નિરૂપિતમ્ ઇદં તાન્ વિહાયાન્યં કમપિ મદ્દક્ષિણપાર્શ્વે વામપાર્શ્વે ચ સમુપવેશયિતું મમાધિકારો નાસ્તિ।
XXIV એતાં કથાં શ્રુત્વાન્યે દશશિષ્યાસ્તૌ ભ્રાતરૌ પ્રતિ ચુકુપુઃ।
XXV કિન્તુ યીશુઃ સ્વસમીપં તાનાહૂય જગાદ, અન્યદેશીયલોકાનાં નરપતયસ્તાન્ અધિકુર્વ્વન્તિ, યે તુ મહાન્તસ્તે તાન્ શાસતિ,
ઇતિ યૂયં જાનીથ।
XXVI કિન્તુ યુષ્માકં મધ્યે ન તથા ભવેત્, યુષ્માકં યઃ કશ્ચિત્ મહાન્ બુભૂષતિ, સ યુષ્માન્ સેવેત;
XXVII યશ્ચ યુષ્માકં મધ્યે મુખ્યો બુભૂષતિ, સ યુષ્માકં દાસો ભવેત્।
XXVIII ઇત્થં મનુજપુત્રઃ સેવ્યો ભવિતું નહિ, કિન્તુ સેવિતું બહૂનાં પરિત્રાણમૂલ્યાર્થં સ્વપ્રાણાન્ દાતુઞ્ચાગતઃ।
XXIX અનન્તરં યિરીહોનગરાત્ તેષાં બહિર્ગમનસમયે તસ્ય પશ્ચાદ્ બહવો લોકા વવ્રજુઃ।
XXX અપરં વર્ત્મપાર્શ્વ ઉપવિશન્તૌ દ્વાવન્ધૌ તેન માર્ગેણ યીશો ર્ગમનં નિશમ્ય પ્રોચ્ચૈઃ કથયામાસતુઃ, હે પ્રભો દાયૂદઃ સન્તાન,
આવયો ર્દયાં વિધેહિ।
XXXI તતો લોકાઃ સર્વ્વે તુષ્ણીમ્ભવતમિત્યુક્ત્વા તૌ તર્જયામાસુઃ; તથાપિ તૌ પુનરુચ્ચૈઃ કથયામાસતુઃ હે પ્રભો દાયૂદઃ સન્તાન,
આવાં દયસ્વ।
XXXII તદાનીં યીશુઃ સ્થગિતઃ સન્ તાવાહૂય ભાષિતવાન્, યુવયોઃ કૃતે મયા કિં કર્ત્તવ્યં? યુવાં કિં કામયેથે?
XXXIII તદા તાવુક્તવન્તૌ, પ્રભો નેત્રાણિ નૌ પ્રસન્નાનિ ભવેયુઃ।
XXXIV તદાનીં યીશુસ્તૌ પ્રતિ પ્રમન્નઃ સન્ તયો ર્નેત્રાણિ પસ્પર્શ, તેનૈવ તૌ સુવીક્ષાઞ્ચક્રાતે તત્પશ્ચાત્ જગ્મતુશ્ચ।

# XXI

I અનન્તરં તેષુ યિરૂશાલમ્નગરસ્ય સમીપવેર્ત્તિનો જૈતુનનામકધરાધરસ્ય સમીપસ્થિતં બૈત્ફગિગ્રામમ્ આગતેષુ, યીશુઃ શિષ્યદ્વયં
પ્રેષયન્ જગાદ,
II યુવાં સમ્મુખસ્થગ્રામં ગત્વા બદ્ધાં યાં સવત્સાં ગર્દ્દભીં હઠાત્ પ્રાપ્સ્યથઃ, તાં મોચયિત્વા મદન્તિકમ્ આનયતં।
III તત્ર યદિ કશ્ચિત્ કિઞ્ચિદ્ વક્ષ્યતિ, તર્હિ વદિષ્યથઃ, એતસ્યાં પ્રભોઃ પ્રયોજનમાસ્તે, તેન સ તત્ક્ષણાત્ પ્રહેષ્યતિ।
IV સીયોનઃ કન્યકાં યૂયં ભાષધ્વમિતિ ભારતીં। પશ્ય તે નમ્રશીલઃ સન્ નૃપ આરુહ્ય ગર્દભીં। અર્થાદારુહ્ય તદ્વત્સમાયાસ્યતિ
ત્વદન્તિકં।
V ભવિષ્યદ્વાદિનોક્તં વચનમિદં તદા સફલમભૂત્।
VI અનન્તરં તૌ શિષ્યૌ યીશો ર્યથાનિદેશં તં ગ્રામં ગત્વા
VII ગર્દભીં તદ્વત્સઞ્ચ સમાનીતવન્તૌ, પશ્ચાત્ તદુપરિ સ્વીયવસનાની પાતયિત્વા તમારોહયામાસતુઃ।
VIII તતો બહવો લોકા નિજવસનાનિ પથિ પ્રસારયિતુમારેભિરે, કતિપયા જનાશ્ચ પાદપપર્ણાદિકં છિત્વા પથિ વિસ્તારયામાસુઃ।
IX અગ્રગામિનઃ પશ્ચાદ્ગામિનશ્ચ મનુજા ઉચ્ચૈર્જય જય દાયૂદઃ સન્તાનેતિ જગદુઃ પરમેશ્વરસ્ય નામ્ના ય આયાતિ સ ધન્યઃ,
સર્વ્વોપરિસ્થસ્વર્ગેપિ જયતિ।
X ઇત્થં તસ્મિન્ યિરૂશાલમં પ્રવિષ્ટે કોઽયમિતિ કથનાત્ કૃત્સ્નં નગરં ચઞ્ચલમભવત્।
XI તત્ર લોકોઃ કથયામાસુઃ, એષ ગાલીલ્પ્રદેશીય-નાસરતીય-ભવિષ્યદ્વાદી યીશુઃ।
XII અનન્તરં યીશુરીશ્વરસ્ય મન્દિરં પ્રવિશ્ય તન્મધ્યાત્ ક્રયવિક્રયિણો વહિશ્ચકાર; વણિજાં મુદ્રાસનાની કપોતવિક્રયિણાઞ્ચાસનાની
ચ ન્યુબ્જયામાસ।
XIII અપરં તાનુવાચ, એષા લિપિરાસ્તે, "મમ ગૃહં પ્રાર્થનાગૃહમિતિ વિખ્યાસ્યતિ", કિન્તુ યૂયં તદ્ દસ્યૂનાં ગહ્વરં કૃતવન્તઃ।
XIV તદનન્તરમ્ અન્ધખઞ્ચલોકાસ્તસ્ય સમીપમાગતાઃ, સ તાન્ નિરામયાન્ કૃતવાન્।
XV યદા પ્રધાનયાજકા અધ્યાપકાશ્ચ તેન કૃતાન્યેતાનિ ચિત્રકર્મ્માણિ દદૃશુઃ, જય જય દાયૂદઃ સન્તાન, મન્દિરે બાલકાનામ્
એતાદૃશમ્ ઉચ્ચધ્વનિં શુશ્રુવુશ્ચ, તદા મહાક્રુદ્ધા બભૂવઃ,
XVI તં પપ્રચ્છુશ્ચ, ઇમે યદ્ વદન્તિ, તત્ કિં ત્વં શૃણોષિ? તતો યીશુસ્તાન્ અવોચત્, સત્યમ્; સ્તન્યપાયિશિશૂનાઞ્ચ બાલકાનાઞ્ચ
વક્ત્રતઃ। સ્વકીયં મહિમાનં ત્વં સંપ્રકાશયસિ સ્વયં। એતદ્વાક્યં યૂયં કિં નાપઠત?
XVII તતસ્તાન્ વિહાય સ નગરાદ્ બૈથનિયાગ્રામં ગત્વા તત્ર રજનીં યાપયામાસ।
XVIII અનન્તરં પ્રભાતે સતિ યીશુઃ પુનરપિ નગરમાગચ્છન્ ક્ષુધાર્ત્તો બભૂવ।
XIX તતો માર્ગપાર્શ્વ ઉડુમ્બરવૃક્ષમેકં વિલોક્ય તત્સમીપં ગત્વા પત્રાણિ વિના કિમપિ ન પ્રાપ્ય તં પાદપં પ્રોવાચ, અદ્યારભ્ય કદાપિ
ત્વયિ ફલં ન ભવતુ; તેન તત્ક્ષણાત્ સ ઉડુમ્બરમાહીરુહઃ શુષ્કતાં ગતઃ।
XX તદ્ દૃષ્ટ્વા શિષ્યા આશ્ચર્ય્યં વિજ્ઞાય કથયામાસુઃ, આઃ, ઉડુમ્વરપાદપોઽતિતૂર્ણં શુષ્કોઽભવત્।
XXI તતો યીશુસ્તાનુવાચ, યુષ્માનહં સત્યં વદામિ, યદિ યૂયમસન્દિગ્ધાઃ પ્રતીથ, તર્હિ યૂયમપિ કેવલોડુમ્વરપાદપં પ્રતીત્થં કર્ત્તું
શક્ષ્યથ, તન્ન, ત્વં ચલિત્વા સાગરે પતેતિ વાક્યં યુષ્માભિરસ્મિન શૈલે પ્રોક્તેપિ તદૈવ તદ્ ઘટિષ્યતે।

XXII તથા વિશ્વસ્ય પ્રાર્થ્ય યુષ્માભિ ર્યદ્ યાચિષ્યતે, તદેવ પ્રાપ્સ્યતે।
XXIII અનન્તરં મન્દિરં પ્રવિશ્યોપદેશનસમયે તત્સમીપં પ્રધાનયાજકાઃ પ્રાચીનલોકાશ્ચાગત્ય પપ્રચ્છુઃ, ત્વયા કેન સામર્થ્યનૈતાનિ કર્મ્માણિ ક્રિયન્તે? કેન વા તુભ્યમેતાનિ સામર્થ્યાનિ દત્તાનિ?
XXIV તતો યીશુઃ પ્રત્યવદત્, અહમપિ યુષ્માન્ વાચમેકાં પૃચ્છામિ, યદિ યૂયં તદુત્તરં દાતું શક્ષ્યથ, તદા કેન સામર્થ્યેન કર્મ્માણ્યેતાનિ કરોમિ, તદહં યુષ્માન્ વક્ષ્યામિ।
XXV યોહનો મજ્જનં કસ્યાજ્ઞયાભવત્? કિમીશ્વરસ્ય મનુષ્યસ્ય વા? તતસ્તે પરસ્પરં વિવિચ્ય કથયામાસુઃ, યદીશ્વરસ્યેતિ વદામસ્તર્હિ યૂયં તં કુતો ન પ્રત્યૈત? વાચમેતાં વક્ષ્યતિ।
XXVI મનુષ્યસ્યેતિ વક્તુમપિ લોકેભ્યો બિભીમઃ, યતઃ સર્વ્વૈરપિ યોહન્ ભવિષ્યદ્વાદીતિ જ્ઞાયતે।
XXVII તસ્માત્ તે યીશું પ્રત્યવદન્, તદ્ વયં ન વિદ્મઃ। તદા સ તાનુક્તવાન્, તર્હિ કેન સામરથ્યેન કર્મ્માણ્યેતાન્યહં કરોમિ, તદપ્યહં યુષ્માન્ ન વક્ષ્યામિ।
XXVIII કસ્યચિજ્જનસ્ય દ્વૌ સુતાવાસ્તાં સ એકસ્ય સુતસ્ય સમીપં ગત્વા જગાદ, હે સુત, ત્વમદ્ય મમ દ્રાક્ષાક્ષેત્રે કર્મ્મ કર્તું વ્રજ।
XXIX તતઃ સ ઉક્તવાન્, ન યાસ્યામિ, કિન્તુ શેષેઽનુતપ્ય જગામ।
XXX અનન્તરં સોન્યસુતસ્ય સમીપં ગત્વા તથૈવ કથિતવાન્; તતઃ સ પ્રત્યુવાચ, મહેચ્છ યામિ, કિન્તુ ન ગતઃ।
XXXI એતયોઃ પુત્રયો ર્મધ્યે પિતુરભિમતં કેન પાલિતં? યુષ્માભિઃ કિં બુધ્યતે? તતસ્તે પ્રત્યૂચુઃ, પ્રથમેન પુ◌ુત્રેણ। તદાનીં યીશુસ્તાનુવાચ, અહં યુષ્માન્ તથ્યં વદામિ, ચણ્ડાલા ગણિકાશ્ચ યુષ્માકમગ્રત ઈશ્વરસ્ય રાજ્યં પ્રવિશન્તિ।
XXXII યતો યુષ્માકં સમીપં યોહનિ ધર્મ્મપથેનાગતે યૂયં તં ન પ્રતીથ, કિન્તુ ચણ્ડાલા ગણિકાશ્ચ તં પ્રત્યાયન્, તદ્ વિલોક્યાપિ યૂયં પ્રત્યેતું નાખિદ્યધ્વં।
XXXIII અપરમેકં દૃષ્ટાન્તં શૃણુત, કશ્ચિદ્ ગૃહસ્થઃ ક્ષેત્રે દ્રાક્ષાલતા રોપયિત્વા તચ્ચતુર્દિક્ષુ વારણીં વિધાય તન્મધ્યે દ્રાક્ષાયન્ત્રં સ્થાપિતવાન્, માઞ્ચઞ્ચ નિર્મ્મિતવાન્, તતઃ કૃષકેષુ તત્ ક્ષેત્રં સમર્પ્ય સ્વયં દૂરદેશં જગામ।
XXXIV તદનન્તરં ફલસમય ઉપસ્થિતે સ ફલાનિ પ્રાપ્તું કૃષીવલાનાં સમીપં નિજદાસાન્ પ્રેષયામાસ।
XXXV કિન્તુ કૃષીવલાસ્તસ્ય તાન્ દાસેયાન્ ધૃત્વા કઞ્ચન પ્રહૃતવન્તઃ, કઞ્ચન પાષાણૈરાહતવન્તઃ, કઞ્ચન ચ હતવન્તઃ।
XXXVI પુનરપિ સ પ્રભુઃ પ્રથમતોઽધિકદાસેયાન્ પ્રેષયામાસ, કિન્તુ તે તાન્ પ્રત્યપિ તથૈવ ચક્રુઃ।
XXXVII અનન્તરં મમ સુતે ગતે તં સમાદરિષ્યન્તે, ઇત્યુક્ત્વા શેષે સ નિજસુતં તેષાં સન્નિધિં પ્રેષયામાસ।
XXXVIII કિન્તુ તે કૃષીવલાઃ સુતં વીક્ષ્ય પરસ્પરમ્ ઇતિ મન્ત્રયિતુમ્ આરેભિરે, અયમુત્તરાધિકારી વયમેનં નિહત્યાસ્યાધિકારં સ્વવશીકરિષ્યામઃ।
XXXIX પશ્ચાત્ તે તં ધૃત્વા દ્રાક્ષાક્ષેત્રાદ્ બહિઃ પાતયિત્વાબધિષુઃ।
XL યદા સ દ્રાક્ષાક્ષેત્રપતિરાગમિષ્યતિ, તદા તાન્ કૃષીવલાન્ કિં કરિષ્યતિ?
XLI તતસ્તે પ્રત્યવદન્, તાન્ કલુષિણો દારુણયાતનાભિરાહનિષ્યતિ, યે ચ સમયાનુક્રમાત્ ફલાનિ દાસ્યન્તિ, તાદૃશેષુ કૃષીવલેષુ ક્ષેત્રં સમર્પયિષ્યતિ।
XLII તદા યીશુના તે ગદિતાઃ, ગ્રહણં ન કૃતં યસ્ય પાષાણસ્ય નિચાયકૈઃ। પ્રધાનપ્રસ્તરઃ કોણે સએવ સંભવિષ્યતિ। એતત્ પરેશિતુઃ કર્મ્માસ્મદૃષ્ટાવદ્ભુતં ભવેત્। ધર્મ્મગ્રન્થે લિખિતમેતદ્વચનં યુષ્માભિઃ કિં નાપાઠિ?
XLIII તસ્માદહં યુષ્માન્ વદામિ, યુષ્મત્ત ઈશ્વરીયરાજ્યમપનીય ફલોત્પાદયિત્રન્યજાતયે દાયિષ્યતે।
XLIV યો જન એતત્પાષાણોપરિ પતિષ્યતિ, તં સ ભંક્ષ્યતે, કિન્ત્વયં પાષાણો યસ્યોપરિ પતિષ્યતિ, તં સ ધૂલિવત્ ચૂર્ણીકરિષ્યતિ।
XLV તદાનીં પ્રાધનયાજકાઃ ફિરૂશિનશ્ચ તસ્યેમાં દૃષ્ટાન્તકથાં શ્રુત્વા સોઽસ્માનુદ્દિશ્ય કથિતવાન્, ઇતિ વિજ્ઞાય તં ધર્ત્તું ચેષ્ટિતવન્તઃ;
XLVI કિન્તુ લોકેભ્યો બિભ્યુઃ, યતો લોકૈઃ સ ભવિષ્યદ્વાદીત્યજ્ઞાયિ।

# XXII

I અનન્તરં યીશુઃ પુનરપિ દૃષ્ટાન્તેન તાન્ અવાદીત્,
II સ્વર્ગીયરાજ્યમ્ એતાદૃશસ્ય નૃપતેઃ સમં, યો નિજ પુત્રં વિવાહયન્ સર્વ્વાન્ નિમન્ત્રિતાન્ આનેતું દાસેયાન્ પ્રહિતવાન્,
III કિન્તુ તે સમાગન્તું નેષ્ટવન્તઃ।
IV તતો રાજા પુનરપિ દાસાનન્યાન્ ઇત્યુક્ત્વા પ્રેષયામાસ, નિમન્ત્રિતાન્ વદત, પશ્યત, મમ ભેજ્યમાસાદિતમાસ્તે, નિજવ્ટષાદિપુષ્ટજન્તૂન્ મારયિત્વા સર્વ્વં ખાદ્યદ્રવ્યમાસાદિતવાન્, યૂયં વિવાહમાગચ્છત।
V તથપિ તે તુચ્છીકૃત્ય કેચિત્ નિજક્ષેત્રં કેચિદ્ વાણિજ્યં પ્રતિ સ્વસ્વમાર્ગેણ ચલિતવન્તઃ।
VI અન્યે લોકાસ્તસ્ય દાસેયાન્ ધૃત્વા દૌરાત્મ્યં વ્યવહૃત્ય તાનવધિષુઃ।
VII અનન્તરં સ નૃપતિસ્તાં વાર્ત્તાં શ્રુત્વા ક્રુધ્યન્ સૈન્યાનિ પ્રહિત્ય તાન્ ઘાતકાન્ હત્વા તેષાં નગરં દાહયામાસ।
VIII તતઃ સ નિજદાસેયાન્ બભાષે, વિવાહીયં ભોજ્યમાસાદિતમાસ્તે, કિન્તુ નિમન્ત્રિતા જના અયોગ્યાઃ।
IX તસ્માદ્ યૂયં રાજમાર્ગં ગત્વા યાવતો મનુજાન્ પશ્યત, તાવતએવ વિવાહીયભોજ્યાય નિમન્ત્રયત।
X તદા તે દાસેયા રાજમાર્ગં ગત્વા ભદ્રાન્ અભદ્રાન્ વા યાવતો જનાન્ દદૃશુઃ, તાવતએવ સંગૃહ્યાનયન્; તતોઽભ્યાગતમનુજૈ ર્વિવાહગૃહમ્ અપૂર્ય્યત।
XI તદાનીં સ રાજા સર્વ્વાનભ્યાગતાન્ દ્રષ્ટુમ્ અભ્યન્તરમાગતવાન્; તદા તત્ર વિવાહીયવસનહીનમેકં જનં વીક્ષ્ય તં જગાદ,
XII હે મિત્ર,ત્વં વિવાહીયવસનં વિના કથમત્ર પ્રવિષ્ટવાન્? તેન સ નિરુત્તરો બભૂવ।
XIII તદા રાજા નિજાનુચરાન્ અવદત્, એતસ્ય કરચરણાન્ બદ્ધા યત્ર રોદનં દન્તૈર્દન્તઘર્ષણઞ્ચ ભવતિ, તત્ર વહિર્ભૂતતમિસ્રે તં નિક્ષિપત।
XIV ઇત્થં બહવ આહૂતા અલ્પે મનોભિમતાઃ।

XV અનન્તરં ફિરૂશિનઃ પ્રગત્ય યથા સંલાપેન તમ્ ઉન્માથે પાતયેયુસ્તથા મન્ત્રયિત્વા
XVI હેરોદીયમનુજૈઃ સાકં નિજશિષ્યગણેન તં પ્રતિ કથયામાસુઃ, હે ગુરો, ભવાન્ સત્યઃ સત્યમીશ્વરીયમાર્ગમુપદિશતિ, કમપિ માનુષં નાનુરુધ્યતે, કમપિ નાપેક્ષતે ચ, તદ્ વયં જાનીમઃ।
XVII અતઃ કૈસરભૂપાય કરોઽસ્માકં દાતવ્યો ન વા? અત્ર ભવતા કિં બુધ્યતે? તદ્ અસ્માન્ વદતુ।
XVIII તતો યીશુસ્તેષાં ખલતાં વિજ્ઞાય કથિતવાન્, રે કપટિનઃ યુયં કુતો માં પરિક્ષધ્વે?
XIX તત્કરદાનસ્ય મુદ્રાં માં દર્શયત। તદાનીં તૈસ્તસ્ય સમીપં મુદ્રાચતુર્થભાગ આનીતે
XX સ તાન્ પપ્રચ્છ, અત્ર કસ્યેયં મૂર્ત્તિ ર્નામ ચાસ્તે? તે જગદુઃ, કૈસરભૂપસ્ય।
XXI તતઃ સ ઉક્તવાન, કૈસરસ્ય યત્ તત્ કૈસરાય દત્ત, ઈશ્વરસ્ય યત્ તદ્ ઈશ્વરાય દત્ત।
XXII ઇતિ વાક્યં નિશમ્ય તે વિસ્મયં વિજ્ઞાય તં વિહાય ચલિતવન્તઃ।
XXIII તસ્મિન્નહનિ સિદૂકિનોઽર્થાત્ શ્મશાનાત્ નોત્થાસ્યન્તીતિ વાક્યં યે વદન્તિ, તે યીશોરન્તિકમ્ આગત્ય પપ્રચ્છુઃ,
XXIV હે ગુરો, કશ્ચિન્મનુજશ્ચેત્ નિઃસન્તાનઃ સન્ પ્રાણાન્ ત્યજતિ, તર્હિ તસ્ય ભ્રાતા તસ્ય જાયાં વ્યુહ્ય ભ્રાતુઃ સન્તાનમ્ ઉત્પાદયિષ્યતીતિ મૂસા આદિષ્ટવાન્।
XXV કિન્ત્વસ્માકમત્ર કેઽપિ જનાઃ સપ્તસહોદરા આસન્, તેષાં જ્યેષ્ઠ એકાં કન્યાં વ્યવહાત્, અપરં પ્રાણત્યાગકાલે સ્વયં નિઃસન્તાનઃ સન્ તાં સ્ત્રિયં સ્વભ્રાતરિ સમર્પિતવાન્,
XXVI તતો દ્વિતીયાદિસપ્તમાન્તાશ્ચ તથૈવ ચક્રુઃ।
XXVII શેષે સાપી નારી મમાર।
XXVIII મૃતાનામ્ ઉત્થાનસમયે તેષાં સપ્તાનાં મધ્યે સા નારી કસ્ય ભાર્ય્યા ભવિષ્યતિ? યસ્માત્ સર્વ્વએવ તાં વ્યવહન્।
XXIX તતો યીશુઃ પ્રત્યવાદીત્, યૂયં ધર્મ્મપુસ્તકમ્ ઈશ્વરીયાં શક્તિઞ્ચ ન વિજ્ઞાય ભ્રાન્તિમન્તઃ।
XXX ઉત્થાનપ્રાપ્તા લોકા ન વિવહન્તિ, ન ચ વાચા દીયન્તે, કિન્ત્વીશ્વરસ્ય સ્વર્ગસ્થદૂતાનાં સદૃશા ભવન્તિ।
XXXI અપરં મૃતાનામુત્થાનમધિ યુષ્માન્ પ્રતીયમીશ્વરોક્તિઃ,
XXXII "અહમિબ્રાહીમ ઈશ્વર ઇસ્હાક ઈશ્વરો યાકૂબ ઈશ્વર" ઇતિ કિં યુષ્માભિ ર્નાપાઠિ? કિન્ત્વીશ્વરો જીવતામ્ ઈશ્વરઃ, સ મૃતાનામીશ્વરો નહિ।
XXXIII ઇતિ શ્રુત્વા સર્વ્વે લોકાસ્તસ્યોપદેશાદ્ વિસ્મયં ગતાઃ।
XXXIV અનન્તરં સિદૂકિનામ્ નિરુત્તરત્વવાર્ત્તાં નિશમ્ય ફિરૂશિન એકત્ર મિલિતવન્તઃ,
XXXV તેષામેકો વ્યવસ્થાપકો યીશું પરીક્ષિતું પપચ્છ,
XXXVI હે ગુરો વ્યવસ્થાશાસ્ત્રમધ્યે કાજ્ઞા શ્રેષ્ઠા?
XXXVII તતો યીશુરુવાચ, ત્વં સર્વ્વાન્તઃકરણૈઃ સર્વ્વપ્રાણૈઃ સર્વ્વચિત્તૈશ્ચ સાકં પ્રભૌ પરમેશ્વરે પ્રીયસ્વ,
XXXVIII એષા પ્રથમમહાજ્ઞા। તસ્યાઃ સદૃશી દ્વિતીયાજ્ઞૈષા,
XXXIX તવ સમીપવાસિનિ સ્વાત્મનીવ પ્રેમ કુરુ।
XL અનયો ર્દ્વયોરાજ્ઞયોઃ કૃત્સ્નવ્યવસ્થાયા ભવિષ્યદ્વક્તૃગ્રન્થસ્ય ચ ભારસ્તિષ્ઠતિ।
XLI અનન્તરં ફિરૂશિનામ્ એકત્ર સ્થિતિકાલે યીશુસ્તાન્ પપ્રચ્છ,
XLII ખ્રીષ્ટમધિ યુષ્માકં કીદૃગ્બોધો જાયતે? સ કસ્ય સન્તાનઃ? તતસ્તે પ્રત્યવદન્, દાયૂદઃ સન્તાનઃ।
XLIII તદા સ ઉક્તવાન્, તર્હિ દાયૂદ્ કથમ્ આત્માધિષ્ઠાનેન તં પ્રભું વદતિ ?
XLIV યથા મમ પ્રભુમિદં વાક્યમવદત્ પરમેશ્વરઃ। તવારીન્ પાદપીઠં તે યાવન્નહિ કરોમ્યહં। તાવત્ કાલં મદીયે ત્વં દક્ષપાર્શ્વ ઉપાવિશ। અતો યદિ દાયૂદ્ તં પ્રભું વદતિ, ર્તિહ સ કથં તસ્ય સન્તાનો ભવતિ?
XLV તદાનીં તેષાં કોપિ તદ્વાક્યસ્ય કિમપ્યુત્તરં દાતું નાશક્નોત્;
XLVI તદ્દિનમારભ્ય તં કિમપિ વાક્યં પ્રષ્ટું કસ્યાપિ સાહસો નાભવત્।

# XXIII

I અનન્તરં યીશુ ર્જનનિવહં શિષ્યાંશ્ચાવદત્,
II અધ્યાપકાઃ ફિરૂશિનશ્ચ મૂસાસને ઉપવિશન્તિ,
III અતસ્તે યુષ્માન્ યદ્યત્ મન્તુમ્ આજ્ઞાપયન્તિ, તત્ મન્યધ્વં પાલયધ્વઞ્ચ, કિન્તુ તેષાં કર્મ્માનુરૂપં કર્મ્મ ન કુરુધ્વં; યતસ્તેષાં વાક્યમાત્રં સારં કાર્ય્યે કિમપિ નાસ્તિ।
IV તે દુર્વ્વહાન્ ગુરુતરાન્ ભારાન્ બદ્વ્વા મનુષ્યાણાં સ્કન્ધેપરિ સમર્પયન્તિ, કિન્તુ સ્વયમઙ્ગુલ્યૈકયાપિ ન ચાલયન્તિ।
V કેવલં લોકદર્શનાય સર્વ્વકર્મ્માણિ કુર્વ્વન્તિ; ફલતઃ પટ્ટબન્ધાન્ પ્રસાર્ય્ય ધારયન્તિ, સ્વવસ્ત્રેષુ ચ દીર્ઘગ્રન્થીન્ ધારયન્તિ;
VI ભોજનભવન ઉચ્ચસ્થાનં, ભજનભવને પ્રધાનમાસનં,
VII હટ્ટે નમસ્કારં ગુરુરિતિ સમ્બોધનઞ્ચૈતાનિ સર્વ્વાણિ વાઞ્છન્તિ।
VIII કિન્તુ યૂયં ગુરવ ઇતિ સમ્બોધનીયા મા ભવત, યતો યુષ્માકમ્ એકઃ ખ્રીષ્ટએવ ગુરુ
IX ર્યૂયં સર્વ્વે મિથો ભ્રાતરશ્ચ। પુનઃ પૃથિવ્યાં કમપિ પિતેતિ મા સમ્બુધ્યધ્વં, યતો યુષ્માકમેકઃ સ્વર્ગસ્થએવ પિતા।
X યૂયં નાયકેતિ સમ્ભાષિતા મા ભવત, યતો યુષ્માકમેકઃ ખ્રીષ્ટએવ નાયકઃ।
XI અપરં યુષ્માકં મધ્યે યઃ પુમાન્ શ્રેષ્ઠઃ સ યુષ્માન્ સેવિષ્યતે।
XII યતો યઃ સ્વમુન્નમતિ, સ નતઃ કરિષ્યતે; કિન્તુ યઃ કશ્ચિત્ સ્વમવનતં કરોતિ, સ ઉન્નતઃ કરિષ્યતે।
XIII હન્ત કપટિન ઉપાધ્યાયાઃ ફિરૂશિનશ્ચ, યૂયં મનુજાનાં સમક્ષં સ્વર્ગદ્વારં રુન્ધ, યૂયં સ્વયં તેન ન પ્રવિશથ, પ્રવિવિક્ષૂનપિ વારયથ। વત કપટિન ઉપાધ્યાયાઃ ફિરૂશિનશ્ચ યૂયં છલાદ્ દીર્ઘં પ્રાર્થ્ય વિધવાનાં સર્વ્વસ્વં ગ્રસથ, યુષ્માકં ઘોરતરદણ્ડો ભવિષ્યતિ।
XIV હન્ત કપટિન ઉપાધ્યાયાઃ ફિરૂશિનશ્ચ, યૂયમેકં સ્વધર્મ્માવલમ્બિનં કર્ત્તું સાગરં ભૂમણ્ડલઞ્ચ પ્રદક્ષિણીકુરુથ,

XV કઞ્ચન પ્રાપ્ય સ્વતો દ્વિગુણનરકભાજનં તં કુરુથ।
XVI વત અન્ધપથદર્શકાઃ સર્વ્વે, યૂયં વદથ, મન્દિરસ્ય શપથકરણાત્ કિમપિ ન દેયં; કિન્તુ મન્દિરસ્થસુવર્ણસ્ય શપથકરણાદ્ દેયં।
XVII હે મૂઢા હે અન્ધાઃ સુવર્ણં તત્સુવર્ણપાવકમન્દિરમ્ એતયોરુભયો ર્મધ્યે કિં શ્રેયઃ?
XVIII અન્યચ્ચ વદથ, યજ્ઞવેદ્યાઃ શપથકરણાત્ કિમપિ ન દેયં, કિન્તુ તદુપરિસ્થિતસ્ય નૈવેદ્યસ્ય શપથકરણાદ્ દેયં।
XIX હે મૂઢા હે અન્ધાઃ, નૈવેદ્યં તન્નૈવેદ્યપાવકવેદિરેતયોરુભયો ર્મધ્યે કિં શ્રેયઃ?
XX અતઃ કેનચિદ્ યજ્ઞવેદ્યાઃ શપથે કૃતે તદુપરિસ્થસ્ય સર્વ્વસ્ય શપથઃ ક્રિયતે।
XXI કેનચિત્ મન્દિરસ્ય શપથે કૃતે મન્દિરતન્નિવાસિનોઃ શપથઃ ક્રિયતે।
XXII કેનચિત્ સ્વર્ગસ્ય શપથે કૃતે ઈશ્વરીયસિંહાસનતદુપર્ય્યુપવિષ્ટયોઃ શપથઃ ક્રિયતે।
XXIII હન્ત કપટિન ઉપાધ્યાયાઃ ફિરૂશિનશ્ચ, યૂયં પોદિનાયાઃ સિતચ્છત્રાયા જીરકસ્ય ચ દશમાંશાન્ દત્થ, કિન્તુ વ્યવસ્થાયા
ગુરુતરાન્ ન્યાયદયાવિશ્વાસાન્ પરિત્યજથ; ઇમે યુષ્માભિરાચરણીયા અમી ચ ન લંઘનીયાઃ।
XXIV હે અન્ધપથદર્શકા યૂયં મશકાન્ અપસારયથ, કિન્તુ મહાઙ્ગાન્ ગ્રસથ।
XXV હન્ત કપટિન ઉપાધ્યાયાઃ ફિરૂશિનશ્ચ, યૂયં પાનપાત્રાણાં ભોજનપાત્રાણાઞ્ચ બહિઃ પરિષ્કુરુથ; કિન્તુ તદભ્યન્તરં દુરાત્મતયા
કલુષેણ ચ પરિપૂર્ણમાસ્તે।
XXVI હે અન્ધાઃ ફિરૂશિલોકા આદૌ પાનપાત્રાણાં ભોજનપાત્રાણાઞ્ચાભ્યન્તરં પરિષ્કુરુત, તેન તેષાં બહિરપિ પરિષ્કારિષ્યતે।
XXVII હન્ત કપટિન ઉપાધ્યાયાઃ ફિરૂશિનશ્ચ, યૂયં શુક્લીકૃતશ્મશાનસ્વરૂપા ભવથ, યથા શ્મશાનભવનસ્ય બહિશ્ચારુ,
કિન્ત્વભ્યન્તરં મૃતલોકાનાં કીકશૈઃ સર્વ્વપ્રકારમલેન ચ પરિપૂર્ણમ્;
XXVIII તથૈવ યૂયમપિ લોકાનાં સમક્ષં બહિર્ધાર્મ્મિકાઃ કિન્ત્વન્તઃકરણેષુ કેવલકાપટ્યાધર્મ્માભ્યાં પરિપૂર્ણાઃ।
XXIX હા હા કપટિન ઉપાધ્યાયાઃ ફિરૂશિનશ્ચ, યૂયં ભવિષ્યદ્વાદિનાં શ્મશાનગેહં નિર્મ્માથ, સાધૂનાં શ્મશાનનિકેતનં શોભયથ
XXX વદથ ચ યદિ વયં સ્વેષાં પૂર્વ્વપુરુષાણાં કાલ અસ્થાસ્યામ, તર્હિ ભવિષ્યદ્વાદિનાં શોણિતપાતને તેષાં સહભાગિનો
નાભવિષ્યામ।
XXXI અતો યૂયં ભવિષ્યદ્વાદિઘાતકાનાં સન્તાના ઇતિ સ્વયમેવ સ્વેષાં સાક્ષ્યં દત્થ।
XXXII અતો યૂયં નિજપૂર્વ્વપુરુષાણાં પરિમાણપાત્રં પરિપૂરયત।
XXXIII રે ભુજગાઃ કૃષ્ણભુજગવંશાઃ, યૂયં કથં નરકદણ્ડાદ્ રક્ષિષ્યધ્વે।
XXXIV પશ્યત, યુષ્માકમન્તિકમ્ અહં ભવિષ્યદ્વાદિનો બુદ્ધિમત ઉપાધ્યાયાંશ્ચ પ્રેષયિષ્યામિ, કિન્તુ તેષાં કતિપયા યુષ્માભિ
ર્ઘાનિષ્યન્તે, ક્રુશે ચ ઘાનિષ્યન્તે, કેચિદ્ ભજનભવને કષાભિરાઘાનિષ્યન્તે, નગરે નગરે તાડિષ્યન્તે ચ;
XXXV તેન સત્પુરુષસ્ય હાબિલો રક્તપાતમારભ્ય બેરિખિયઃ પુત્રં યં સિખરિયં યૂયં મન્દિરયજ્ઞવેદ્યો ર્મધ્યે હતવન્તઃ,
તદીયશોણિતપાતં યાવદ્ અસ્મિન્ દેશે યાવતાં સાધુપુરુષાણાં શોણિતપાતો ઽભવત્ તત્ સર્વ્વેષામાગસાં દણ્ડા યુષ્માસુ વર્ત્તિષ્યન્તે।
XXXVI અહં યુષ્માન્ત તથ્યં વદામિ, વિદ્યમાનેઽસ્મિન્ પુરુષે સર્વ્વે વર્ત્તિષ્યન્તે।
XXXVII હે યિરૂશાલમ્ હે યિરૂશાલમ્ નગરિ ત્વં ભવિષ્યદ્વાદિનો હતવતી, તવ સમીપં પ્રેરિતાંશ્ચ પાષાણૈરાહતવતી, યથા કુક્કુટી
શાવકાન્ પક્ષાધઃ સંગૃહ્લાતિ, તથા તવ સન્તાનાન્ સંગ્રહીતું અહં બહુવારમ્ ઐચ્છં; કિન્તુ ત્વં ન સમમન્યથાઃ।
XXXVIII પશ્યત યષ્માકં વાસસ્થાનમ્ ઉચ્છિન્નં ત્યક્ષ્યતે।
XXXIX અહં યુષ્માન્ તથ્યં વદામિ, યઃ પરમેશ્વરસ્ય નામ્નાગચ્છતિ, સ ધન્ય ઇતિ વાણીં યાવન્ન વદિષ્યથ, તાવત્ માં પુન ર્ન
દ્રક્ષ્યથ।

# XXIV

I અનન્તરં યીશુ ર્યદા મન્દિરાદ્ બહિ ર્ગચ્છતિ, તદાનીં શિષ્યાસ્તં મન્દિરનિર્મ્માણં દર્શયિતુમાગતાઃ।
II તતો યીશુસ્તાનુવાચ, યૂયં કિમેતાનિ ન પશ્યથ? યુષ્માનહં સત્યં વદામિ, એતન્નિચયનસ્ય પાષાણૈકમપ્યન્યપાષાણે ઉપરિ ન
સ્થાસ્યતિ સર્વ્વાણિ ભૂમિસાત્ કારિષ્યન્તે।
III અનન્તરં તસ્મિન્ જૈતુનપર્વ્વતોપરિ સમુપવિષ્ટે શિષ્યાસ્તસ્ય સમીપમાગત્ય ગુપ્તં પપ્રચ્છુઃ, એતા ઘટનાઃ કદા ભવિષ્યન્તિ?
ભવત આગમનસ્ય યુગાન્તસ્ય ચ કિં લક્ષ્મ? તદસ્માન્ વદતુ।
IV તદાનીં યીશુસ્તાનવોચત્, અવધદ્ધ્વં, કોપિ યુષ્માન્ ન ભ્રમયેત્।
V બહવો મમ નામ ગૃહ્લન્ત આગમિષ્યન્તિ, ખ્રીષ્ટોઽહમેવેતિ વાચં વદન્તો બહૂન્ ભ્રમયિષ્યન્તિ।
VI યૂયઞ્ચ સંગ્રામસ્ય રણસ્ય ચાડમ્બરં શ્રોષ્યથ, અવધદ્ધ્વં તેન ચઞ્ચલા મા ભવત, એતાન્યવશ્યં ઘટિષ્યન્તે, કિન્તુ તદા યુગાન્તો
નહિ।
VII અપરં દેશસ્ય વિપક્ષો દેશો રાજ્યસ્ય વિપક્ષો રાજ્યં ભવિષ્યતિ, સ્થાને સ્થાને ચ દુર્ભિક્ષં મહામારી ભૂકમ્પશ્ચ ભવિષ્યન્તિ,
VIII એતાનિ દુઃખોપક્રમાઃ।
IX તદાનીં લોકા દુઃખં ભોજયિતું યુષ્માન્ પરકરેષુ સમર્પયિષ્યન્તિ હનિષ્યન્તિ ચ, તથા મમ નામકારણાદ્ યૂયં સર્વ્વદેશીયમનુજાનાં
સમીપે ઘૃણાર્હા ભવિષ્યથ।
X બહુષુ વિઘ્નં પ્રાપ્તવત્સુ પરસ્પરમ્ ઋૃતીયાં કૃતવત્સુ ચ એકોઽપરં પરકરેષુ સમર્પયિષ્યતિ।
XI તથા બહવો મૃષાભવિષ્યદ્વાદિન ઉપસ્થાય બહૂન્ ભ્રમયિષ્યન્તિ।
XII દુષ્કર્મ્મણાં બાહુલ્યાઞ્ચ બહૂનાં પ્રેમ શીતલં ભવિષ્યતિ।
XIII કિન્તુ યઃ કશ્ચિત્ શેષં યાવદ્ ધૈર્ય્યમાશ્રયતે, સએવ પરિત્રાયિષ્યતે।
XIV અપરં સર્વ્વદેશીયલોકાન્ પ્રતિમાક્ષી ભવિતું રાજસ્ય શુભસમાચારઃ સર્વ્વજગતિ પ્રચારિષ્યતે, એતાદૃશિ સતિ યુગાન્ત
ઉપસ્થાસ્યતિ।

XV અતો યત્ સર્વ્વનાશકૃદ્ઘૃણાર્હં વસ્તુ દાનિયેલ્ભવિષ્યદ્વાદિના પ્રોક્તં તદ્ યદા પુણ્યસ્થાને સ્થાપિતં દ્રક્ષ્યથ, (યઃ પઠતિ, સ બુધ્યતાં)
XVI તદાનીં યે યિહૂદીયદેશે તિષ્ઠન્તિ, તે પર્વ્વતેષુ પલાયન્તાં।
XVII યઃ કશ્ચિદ્ ગૃહપૃષ્ઠે તિષ્ઠતિ, સ ગૃહાત્ કિમપિ વસ્ત્વાનેતુમ્ અધે ા નાવરોહેત્।
XVIII યશ્ચ ક્ષેત્રે તિષ્ઠતિ, સોપિ વસ્ત્રમાનેતું પરાવૃત્ય ન યાયાત્।
XIX તદાનીં ગર્ભિણીસ્તન્યપાયયિત્રીણાં દુર્ગતિ ર્ભવિષ્યતિ।
XX અતો યષ્માકં પલાયનં શીતકાલે વિશ્રામવારે વા યન્ન ભવેત્, તદર્થં પ્રાર્થયધ્વમ્।
XXI આ જગદારમ્ભાદ્ એતત્કાલપર્ય્યનન્તં યાદૃશઃ કદાપિ નાભવત્ ન ચ ભવિષ્યતિ તાદૃશો મહાક્લેશસ્તદાનીમ્ ઉપસ્થાસ્યતિ।
XXII તસ્ય ક્લેશસ્ય સમયો યદિ હ્સ્વો ન ક્રિયેત, તર્હિ કસ્યાપિ પ્રાણિનો રક્ષણં ભવિતું ન શક્નુયાત્, કિન્તુ મનોનીતમનુજાનાં કૃતે સ કાલો હ્સ્વીકરિષ્યતે।
XXIII અપરઞ્ચ પશ્યત, ખ્રીષ્ટોઽત્ર વિદ્યતે, વા તત્ર વિદ્યતે, તદાનીં યદી કશ્ચિદ્ યુષ્માન ઇતિ વાક્યં વદતિ, તથાપિ તત્ ન પ્રતીત્।
XXIV યતો ભાક્તખ્રીષ્ટા ભાક્તભવિષ્યદ્વાદિનશ્ચ ઉપસ્થાય યાનિ મહન્તિ લક્ષ્માણિ ચિત્રકર્મ્માણિ ચ પ્રકાશયિષ્યન્તિ, તૈ ર્યદિ સમ્ભવેત્ તર્હિ મનોનીતમાનવા અપિ ભ્રામિષ્યન્તે।
XXV પશ્યત, ઘટનાતઃ પૂર્વ્વં યુષ્માન્ વાર્ત્તામ્ અવાદિષમ્।
XXVI અતઃ પશ્યત, સ પ્રાન્તરે વિદ્યત ઇતિ વાક્યે કેનચિત્ કથિતેપિ બહિ ર્મા ગચ્છત, વા પશ્યત, સોન્તઃપુરે વિદ્યતે, એતદ્વાક્ય ઉક્તેપિ મા પ્રતીત।
XXVII યતો યથા વિદ્યુત્ પૂર્વ્વદિશો નિર્ગત્ય પશ્ચિમદિશં યાવત્ પ્રકાશતે, તથા માનુષપુત્રસ્યાપ્યાગમનં ભવિષ્યતિ।
XXVIII યત્ર શવસ્તિષ્ઠતિ, તત્રૈવ ગૃધ્રા મિલન્તિ।
XXIX અપરં તસ્ય ક્લેશસમયસ્યાવ્યવહિતપરત્ર સૂર્ય્યસ્ય તેજો લોપ્સ્યતે, ચન્દ્રમા જ્યોસ્નાં ન કરિષ્યતિ, નભસો નક્ષત્રાણિ પતિષ્યન્તિ, ગગણીયા ગ્રહાશ્ચ વિચલિષ્યન્તિ।
XXX તદાનીમ્ આકાશમધ્યે મનુજસુતસ્ય લક્ષ્મ દર્શિષ્યતે, તતો નિજપરાક્રમેણ મહાતેજસા ચ મેઘારૂઢં મનુજસુતં નભસાગચ્છન્તં વિલોક્ય પૃથિવ્યાઃ સર્વ્વવંશીયા વિલપિષ્યન્તિ।
XXXI તદાનીં સ મહાશબ્દાયમાનતૂર્ય્યા વાદકાન્ નિજદૂતાન્ પ્રહેષ્યતિ, તે વ્યોમ્ન એકસીમાતોઽપરસીમાં યાવત્ ચતુર્દિશસ્તસ્ય મનોનીતજનાન્ આનીય મેલયિષ્યન્તિ।
XXXII ઉડુમ્બરપાદપસ્ય દૃષ્ટાન્તં શિક્ષધ્વં; યદા તસ્ય નવીનાઃ શાખા જાયન્તે, પલ્લવાદિશ્ચ નિર્ગચ્છતિ, તદા નિદાઘકાલઃ સવિધો ભવતીતિ યૂયં જાનીથ;
XXXIII તદ્વદ્ એતા ઘટના દૃષ્ટ્વા સ સમયો દ્વાર ઉપાસ્થાદ્ ઇતિ જાનીત।
XXXIV યુષ્માનહં તથ્યં વદામિ, ઇદાનીન્તનજનાનાં ગમનાત્ પૂર્વ્વમેવ તાનિ સર્વ્વાણિ ઘટિષ્યન્તે।
XXXV નભોમેદિન્યો ર્લુપ્તયોરપિ મમ વાક્ કદાપિ ન લોપ્સ્યતે।
XXXVI અપરં મમ તાતં વિના માનુષઃ સ્વર્ગસ્થો દૂતો વા કોપિ તદ્દિનં તદ્દણ્ડઞ્ચ ન જ્ઞાપયતિ।
XXXVII અપરં નોહે વિદ્યમાને યાદૃશમભવત્ તાદૃશં મનુજસુતસ્યાગમનકાલેપિ ભવિષ્યતિ।
XXXVIII ફલતો જલાપ્લાવનાત્ પૂર્વ્વં યદ્દિનં યાવત્ નોહઃ પોતં નારોહત્, તાવત્કાલં યથા મનુષ્યા ભોજને પાને વિવહને વિવાહને ચ પ્રવૃત્તા આસન્;
XXXIX અપરમ્ આપ્લાવિતોયમાગત્ય યાવત્ સકલમનુજાન્ પ્લાવયિત્વા નાનયત્, તાવત્ તે યથા ન વિદામાસુઃ, તથા મનુજસુતાગમનેપિ ભવિષ્યતિ।
XL તદા ક્ષેત્રસ્થિતયોર્દ્વયોરેકો ધારિષ્યતે, અપરસ્ત્યાજિષ્યતે।
XLI તથા પેષણ્યા પિંષત્યોરુભયો ર્યોષિતોરેકા ધારિષ્યતેઽપરા ત્યાજિષ્યતે।
XLII યુષ્માકં પ્રભુઃ કસ્મિન્ દણ્ડ આગમિષ્યતિ, તદ્ યુષ્માભિ ર્નાવગમ્યતે, તસ્માત્ જાગ્રતઃ સન્તસ્તિષ્ઠત।
XLIII કુત્ર યામે સ્તેન આગમિષ્યતીતિ ચેદ્ ગૃહસ્થો જ્ઞાતુમ્ અશક્ષ્યત્, તર્હિ જાગરિત્વા તં સન્ધિં કર્ત્તિતુમ્ અવારયિષ્યત્ તદ્ જાનીત।
XLIV યુષ્માભિરવધીયતાં, યતો યુષ્માભિ ર્યત્ર ન બુધ્યતે, તત્રૈવ દણ્ડે મનુજસુત આયાસ્યતિ।
XLV પ્રભુ ર્નિજપરિવારાન્ યથાકાલં ભોજયિતું યં દાસમ્ અધ્યક્ષીકૃત્ય સ્થાપયતિ, તાદૃશો વિશ્વાસ્યો ધીમાન્ દાસઃ કઃ?
XLVI પ્રભુરાગત્ય યં દાસં તથાચરન્તં વીક્ષતે, સએવ ધન્યઃ।
XLVII યુષ્માનહં સત્યં વદામિ, સ તં નિજસર્વ્વસ્વસ્યાધિપં કરિષ્યતિ।
XLVIII કિન્તુ પ્રભુરાગન્તું વિલમ્બત ઇતિ મનસિ ચિન્તયિત્વા યો દુષ્ટો દાસો
XLIX ઽપરદાસાન્ પ્રહર્ત્તું મત્તાનાં સઙ્ગે ભોક્તું પાતુઞ્ચ પ્રવર્ત્તતે,
L સ દાસો યદા નાપેક્ષતે, યઞ્ચ દણ્ડં ન જાનાતિ, તત્કાલએવ તત્પ્રભુરુપસ્થાસ્યતિ।
LI તદા તં દણ્ડયિત્વા યત્ર સ્થાને રોદનં દન્તઘર્ષણઞ્ચાસાતે, તત્ર કપટિભિઃ સાકં તદ્દશાં નિરૂપયિષ્યતિ।

# XXV

I યા દશ કન્યાઃ પ્રદીપાન્ ગૃહ્લત્યો વરં સાક્ષાત્ કર્ત્તું બહિરિતાઃ, તાભિસ્તદા સ્વર્ગીયરાજ્યસ્ય સાદૃશ્યં ભવિષ્યતિ।
II તાસાં કન્યાનાં મધ્યે પઞ્ચ સુધિયઃ પઞ્ચ દુર્ધિય આસન્।
III યા દુર્ધિયસ્તાઃ પ્રદીપાન્ સઙ્ગે ગૃહીત્વા તૈલં ન જગૃહુઃ,
IV કિન્તુ સુધિયઃ પ્રદીપાન્ પાત્રેણ તૈલઞ્ચ જગૃહુઃ।
V અનન્તરં વરે વિલમ્બિતે તાઃ સર્વ્વા નિદ્રાવિષ્ટા નિદ્રાં જગ્મુઃ।

VI અનન્તરમ્ અર્દ્ધરાત્રે પશ્યત વર આગચ્છતિ, તં સાક્ષાત્ કર્ત્તું બહિર્યાતેતિ જનરવાત્

VII તાઃ સર્વ્વાઃ કન્યા ઉત્થાય પ્રદીપાન્ આસાદયિતું આરભન્ત।

VIII તતો દુર્ધિયઃ સુધિય ઊચુઃ, કિઞ્ચિત્ તૈલં દત્ત, પ્રદીપા અસ્માકં નિર્વ્વાણાઃ।

IX કિન્તુ સુધિયઃ પ્રત્યવદન્, દત્તે યુષ્માનસ્માંશ્ચ પ્રતિ તૈલં ન્યૂનીભવેત્, તસ્માદ્ વિક્રેતૃણાં સમીપં ગત્વા સ્વાર્થં તૈલં ક્રીણીત।

X તદા તાસુ ક્રેતું ગતાસુ વર આજગામ, તતો યાઃ સજ્જિતા આસન્, તાસ્તેન સાકં વિવાહીયં વેશ્મ પ્રવિવિશુઃ।

XI અનન્તરં દ્વારે રુદ્ધે અપરાઃ કન્યા આગત્ય જગદુઃ, હે પ્રભો, હે પ્રભો, અસ્માન્ પ્રતિ દ્વારં મોચય।

XII કિન્તુ સ ઉક્તવાન્, તથ્યં વદામિ, યુષ્માનહં ન વેદ્મિ।

XIII અતો જાગ્રતઃ સન્તસ્તિષ્ઠત, મનુજસુતઃ કસ્મિન્ દિને કસ્મિન્ દણ્ડે વાગમિષ્યતિ, તદ્ યુષ્માભિ ર્ન જ્ઞાયતે।

XIV અપરં સ એતાદૃશઃ કસ્યચિત્ પુંસસ્તુલ્યઃ, યો દૂરદેશં પ્રતિ યાત્રાકાલે નિજદાસાન્ આહૂય તેષાં સ્વસ્વસામર્થ્યાનુરૂપમ્

XV એકસ્મિન્ મુદ્રાણાં પઞ્ચ પોટલિકાઃ અન્યસ્મિંશ્ચ દ્વે પોટલિકે અપરસ્મિંશ્ચ પોટલિકૈકામ્ ઇત્થં પ્રતિજનં સમર્પ્ય સ્વયં પ્રવાસં ગતવાન્।

XVI અનન્તરં યો દાસઃ પઞ્ચ પોટલિકાઃ લબ્ધવાન્, સ ગત્વા વાણિજ્યં વિધાય તા દ્વિગુણીચકાર।

XVII યશ્ચ દાસો દ્વે પોટલિકે અલભત, સોપિ તા મુદ્રા દ્વિગુણીચકાર।

XVIII કિન્તુ યો દાસ એકાં પોટલિકાં લબ્ધવાન્, સ ગત્વા ભૂમિં ખનિત્વા તન્મધ્યે નિજપ્રભોસ્તા મુદ્રા ગોપયાઞ્ચકાર।

XIX તદનન્તરં બહુતિથે કાલે ગતે તેષાં દાસાનાં પ્રભુરાગત્ય તૈર્દાસૈઃ સમં ગણયાઞ્ચકાર।

XX તદાનીં યઃ પઞ્ચ પોટલિકાઃ પ્રાપ્તવાન્ સ તા દ્વિગુણીકૃતમુદ્રા આનીય જગાદ; હે પ્રભો, ભવતા મયિ પઞ્ચ પોટલિકાઃ સમર્પિતાઃ, પશ્યતુ, તા મયા દ્વિગુણીકૃતાઃ।

XXI તદાનીં તસ્ય પ્રભુસ્તમુવાચ, હે ઉત્તમ વિશ્વાસ્ય દાસ, ત્વં ધન્યોસિ, સ્તોકેન વિશ્વાસ્યો જાતઃ, તસ્માત્ ત્વાં બહુવિત્તાધિપં કરોમિ, ત્વં સ્વપ્રભોઃ સુખસ્ય ભાગી ભવ।

XXII તતો યેન દ્વે પોટલિકે લબ્ધે સોપ્યાગત્ય જગાદ, હે પ્રભો, ભવતા મયિ દ્વે પોટલિકે સમર્પિતે, પશ્યતુ તે મયા દ્વિગુણીકૃતે।

XXIII તેન તસ્ય પ્રભુસ્તમવોચત્, હે ઉત્તમ વિશ્વાસ્ય દાસ, ત્વં ધન્યોસિ, સ્તોકેન વિશ્વાસ્યો જાતઃ, તસ્માત્ ત્વાં બહુદ્રવિણાધિપં કરોમિ, ત્વં નિજપ્રભોઃ સુખસ્ય ભાગી ભવ।

XXIV અનન્તરં ય એકાં પોટલિકાં લબ્ધવાન્, સ એત્ય કથિતવાન્, હે પ્રભો, ત્વાં કઠિનનરં જ્ઞાતવાન્, ત્વયા યત્ર નોપ્તં, તત્રૈવ કૃત્યતે, યત્ર ચ ન કીર્ણં, તત્રૈવ સંગૃહ્યતે।

XXV અતોહં સશઙ્કઃ સન્ ગત્વા તવ મુદ્રા ભૂમધ્યે સંગોપ્ય સ્થાપિતવાન્, પશ્ય, તવ યત્ તદેવ ગૃહાણ।

XXVI તદા તસ્ય પ્રભુઃ પ્રત્યવદત્ રે દુષ્ટાલસ દાસ, યત્રાહં ન વપામિ, તત્ર છિનદ્મિ, યત્ર ચ ન કિરામિ, તત્રેવ સંગૃહ્લામીતિ ચેદજાનાસ્તર્હિ

XXVII વણિક્ષુ મમ વિત્તાર્પણં તવોચિતમાસીત્, યેનાહમાગત્ય વૃદ્ધ્યા સાકં મૂલમુદ્રાઃ પ્રાપ્સ્યમ્।

XXVIII અતોસ્માત્ તાં પોટલિકામ્ આદાય યસ્ય દશ પોટલિકાઃ સન્તિ તસ્મિન્નર્પયત।

XXIX યેન વર્દ્ધ્યતે તસ્મિન્નૈવાર્પિષ્યતે, તસ્યૈવ ચ બાહુલ્યં ભવિષ્યતિ, કિન્તુ યેન ન વર્દ્ધ્યતે, તસ્યાન્તિકે યત્ કિઞ્ચન તિષ્ઠતિ, તદપિ પુનર્નેષ્યતે।

XXX અપરં યૂયં તમકર્મ્મણ્યં દાસં નીત્વા યત્ર સ્થાને ક્રન્દનં દન્તઘર્ષણઞ્ચ વિદ્યેતે, તસ્મિન્ બહિર્ભૂતતમસિ નિક્ષિપત।

XXXI યદા મનુજસુતઃ પવિત્રદૂતાન્ સઙ્ગિનઃ કૃત્વા નિજપ્રભાવેનાગત્ય નિજતેજોમયે સિંહાસને નિવેક્ષ્યતિ,

XXXII તદા તત્સમ્મુખે સર્વ્વજાતીયા જના સંમેલિષ્યન્તિ। તતો મેષપાલકો યથા છાગેભ્યોઽવીન્ પૃથક્ કરોતિ તથા સોપ્યેકસ્માદન્યમ્ ઇત્થં તાન્ પૃથક કૃત્વાવીન્

XXXIII દક્ષિણે છાગાંશ્ચ વામે સ્થાપયિષ્યતિ।

XXXIV તતઃ પરં રાજા દક્ષિણસ્થિતાન્ માનવાન્ વદિષ્યતિ, આગચ્છત મત્તાતસ્યાનુગ્રહભાજનાનિ, યુષ્મત્કૃત આ જગદારમ્ભત્ યદ્ રાજ્યમ્ આસાદિતં તદધિકુરુત।

XXXV યતો બુભુક્ષિતાય મહ્યં ભોજ્યમ્ અદત્ત, પિપાસિતાય પેયમદત્ત, વિદેશિનં માં સ્વસ્થાનમનયત,

XXXVI વસ્ત્રહીનં માં વસનં પર્ય્યધાપયત, પીડીતં માં દ્રષ્ટુમાગચ્છત, કારાસ્થઞ્ચ માં વીક્ષિતુમ આગચ્છત।

XXXVII તદા ધાર્મ્મિકાઃ પ્રતિવદિષ્યન્તિ, હે પ્રભો, કદા ત્વાં ક્ષુધિતં વીક્ષ્ય વયમભોજયામ? વા પિપાસિતં વીક્ષ્ય અપાયયામ?

XXXVIII કદા વા ત્વાં વિદેશિનં વિલોક્ય સ્વસ્થાનમનયામ? કદા વા ત્વાં નગ્નં વીક્ષ્ય વસનં પર્ય્યધાપયામ?

XXXIX કદા વા ત્વાં પીડિતં કારાસ્થઞ્ચ વીક્ષ્ય ત્વદન્તિકમગચ્છામ?

XL તદાનીં રાજા તાન્ પ્રતિવદિષ્યતિ, યુષ્માનહં સત્યં વદામિ, મમૈતેષાં ભ્રાતૃણાં મધ્યે કઞ્ચનૈકં ક્ષુદ્રતમં પ્રતિ યદ્ અકુરુત, તન્માં પ્રત્યકુરુત।

XLI પશ્ચાત્ સ વામસ્થિતાન્ જનાન્ વદિષ્યતિ, રે શાપગ્રસ્તાઃ સર્વ્વે, શૈતાને તસ્ય દૂતેભ્યશ્ચ યોઽનન્તવહ્નિરાસાદિત આસ્તે, યૂયં મદન્તિકાત્ તમગ્નિં ગચ્છત।

XLII યતો ક્ષુધિતાય મહ્યમાહારં નાદત્ત, પિપાસિતાય મહ્યં પેયં નાદત્ત,

XLIII વિદેશિનં માં સ્વસ્થાનં નાનયત, વસનહીનં માં વસનં ન પર્ય્યધાપયત, પીડિતં કારાસ્થઞ્ચ માં વીક્ષિતું નાગચ્છત।

XLIV તદા તે પ્રતિવદિષ્યન્તિ, હે પ્રભો, કદા ત્વાં ક્ષુધિતં વા પિપાસિતં વા વિદેશિનં વા નગ્નં વા પીડિતં વા કારાસ્થં વીક્ષ્ય ત્વાં નાસેવામહિ?

XLV તદા સ તાન્ વદિષ્યતિ, તથ્યમહં યુષ્માન્ બ્રવીમિ, યુષ્માભિરેષાં કઞ્ચન ક્ષોદિષ્ઠં પ્રતિ યન્નાકારિ, તન્માં પ્રત્યેવ નાકારિ।

XLVI પશ્ચાદમ્યનન્તશાસ્તિં કિન્તુ ધાર્મ્મિકા અનન્તાયુષં ભોક્તું યાસ્યન્તિ।

# XXVI

I યીશુરેતાન્ પ્રસ્તાવાન્ સમાપ્ય શિષ્યાનૂચે,
II યુષ્માભિ ર્જ્ઞાતં દિનદ્વયાત્ પરં નિસ્તારમહ ઉપસ્થાસ્યતિ, તત્ર મનુજસુતઃ ક્રુશેન હન્તું પરકરેષુ સમર્પિષ્યતે।
III તતઃ પરં પ્રધાનયાજકાધ્યાપકપ્રાઞ્ચઃ કિયફાનામ્નો મહાયાજકસ્યાટ્ટાલિકાયાં મિલિત્વા
IV કેનોપાયેન યીશું ધૃત્વા હન્તું શક્નુયુરિતિ મન્ત્રયાઞ્ચક્રુઃ।
V કિન્તુ તૈરુક્તં મહકાલે ન ધર્ત્તવ્યઃ, ધૃતે પ્રજાનાં કલહેન ભવિતું શક્યતે।
VI તતો બૈથનિયાપુરે શિમોનાખ્યસ્ય કુષ્ઠિનો વેશ્મનિ યીશૌ તિષ્ઠતિ
VII કાચન યોષા શ્વેતોપલભાજનેન મહાર્ઘ્યં સુગન્ધિ તૈલમાનીય ભોજનાયોપવિશતસ્તસ્ય શિરોભ્યષેચત્।
VIII કિન્તુ તદાલોક્ય તચ્છિષ્યૈઃ કુપિતૈરુક્તં, કુત ઇત્થમપવ્યયતે?
IX ચેદિદં વ્યક્રેષ્યત, તર્હિ ભૂરિમૂલ્યં પ્રાપ્ય દરિદ્રેભ્યો વ્યતારિષ્યત।
X યીશુના તદવગત્ય તે સમુદિતાઃ, યોષામેનાં કુતો દુઃખિનીં કુરુથ, સા માં પ્રતિ સાધુ કર્મ્માકાર્ષીત્।
XI યુષ્માકમં સમીપે દરિદ્રાઃ સતતમેવાસતે, કિન્તુ યુષ્માકમન્તિકેહં નાસે સતતં।
XII સા મમ કાયોપરિ સુગન્ધિતૈલં સિક્ત્વા મમ શ્મશાનદાનકર્મ્માકાર્ષીત્।
XIII અતોહં યુષ્માન્ તથ્યં વદામિ સર્વ્વસ્મિન્ જગતિ યત્ર યત્રૈષ સુસમાચારઃ પ્રચારિષ્યતે, તત્ર તત્રૈતસ્યા નાર્ય્યાઃ સ્મરણાર્થમ્
કર્મ્મેદં પ્રચારિષ્યતે।
XIV તતો દ્વાદશશિષ્યાણામ્ ઈષ્કરિયોતીયયિહૂદાનામક એકઃ શિષ્યઃ પ્રધાનયાજકાનામન્તિકં ગત્વા કથિતવાન્,
XV યદિ યુષ્માકં કરેષુ યીશું સમર્પયામિ, તર્હિ કિં દાસ્યથ? તદાનીં તે તસ્મૈ ત્રિંશન્મુદ્રા દાતું સ્થિરીકૃતવન્તઃ।
XVI સ તદારભ્ય તં પરકરેષુ સમર્પયિતું સુયોગં ચેષ્ટિતવાન્।
XVII અનન્તરં કિણ્વશૂન્યપૂપપર્વ્વણઃ પ્રથમેહ્નિ શિષ્યા યીશુમ્ ઉપગત્ય પપ્રચ્છુઃ ભવત્કૃતે કુત્ર વયં નિસ્તારમહભોજ્યમ્
આયોજયિષ્યામઃ? ભવતઃ કેચ્છા?
XVIII તદા સ ગદિતવાન્, મધ્યેનગરમમુકપુંસઃ સમીપં વ્રજિત્વા વદત, ગુરુ ર્ગદિતવાન્, મત્કાલઃ સવિધઃ, સહ શિષ્યૈસ્ત્વદાલયે
નિસ્તારમહભોજ્યં ભોક્ષ્યે।
XIX તદા શિષ્યા યીશોસ્તાદૃશનિદેશાનુરૂપકર્મ્મ વિધાય તત્ર નિસ્તારમહભોજ્યમાસાદયામાસુઃ।
XX તતઃ સન્ધ્યાયાં સત્યાં દ્વાદશભિઃ શિષ્યૈઃ સાકં સ ન્યવિશત્।
XXI અપરં ભુઞ્જાન ઉક્તવાન્ યુષ્માન્ તથ્યં વદામિ, યુષ્માકમેકો માં પરકરેષુ સમર્પયિષ્યતિ।
XXII તદા તેઽતીવ દુઃખિતા એકૈકશો વક્તુમારેભિરે, હે પ્રભો, સ કિમહં?
XXIII તતઃ સ જગાદ, મયા સાકં યો જનો ભોજનપાત્રે કરં સંક્ષિપતિ, સ એવ માં પરકરેષુ સમર્પયિષ્યતિ।
XXIV મનુજસુતમધિ યાદૃશં લિખિતમાસ્તે, તદનુરૂપા તદ્ગતિ ર્ભવિષ્યતિ; કિન્તુ યેન પુંસા સ પરકરેષુ સમર્પયિષ્યતે, હા હા ચેત્
સ નાજનિષ્યત, તદા તસ્ય ક્ષેમમભવિષ્યત્।
XXV તદા યિહૂદાનામા યો જનસ્તં પરકરેષુ સમર્પયિષ્યતિ, સ ઉક્તવાન્, હે ગુરો, સ કિમહં? તતઃ સ પ્રત્યુક્તવાન્, ત્વયા સત્યં
ગદિતમ્।
XXVI અનન્તરં તેષામશનકાલે યીશુઃ પૂપમાદાયેશ્વરીયગુણાનનૂદ્ય ભંક્ત્વા શિષ્યેભ્યઃ પ્રદાય જગાદ, મદ્વપુઃસ્વરૂપમિમં ગૃહીત્વા
ખાદત।
XXVII પશ્ચાત્ સ કંસં ગૃહ્લન્ ઈશ્વરીયગુણાનનૂદ્ય તેભ્યઃ પ્રદાય કથિતવાન્, સર્વ્વૈ ર્યુષ્માભિરનેન પાતવ્યં,
XXVIII યસ્માદનેકેષાં પાપમર્ષણાય પાતિતં યન્મન્નૂત્નનિયમરૂપશોણિતં તદેતત્।
XXIX અપરમહં નૂત્નગોસ્તનીરસં ન પાસ્યામિ, તાવત્ ગોસ્તનીફલરસં પુનઃ કદાપિ ન પાસ્યામિ।
XXX પશ્ચાત્ તે ગીતમેકં સંગીય જૈતુનાખ્યગિરિં ગતવન્તઃ।
XXXI તદાનીં યીશુસ્તાનવોચત્, અસ્યાં રજન્યામહં યુષ્માકં સર્વ્વેષાં વિઘ્નરૂપો ભવિષ્યામિ, યતો લિખિતમાસ્તે, "મેષાણાં રક્ષકો
યસ્તં પ્રહરિષ્યામ્યહં તતઃ। મેષાણાં નિવહો નૂનં પ્રવિકીર્ણો ભવિષ્યતિ"॥
XXXII કિન્તુ શ્મશાનાત્ સમુત્થાય યુષ્માકમગ્રેઽહં ગાલીલં ગમિષ્યામિ।
XXXIII પિતરસ્તં પ્રોવાચ, ભવાંશ્ચેત્ સર્વ્વેષાં વિઘ્નરૂપો ભવતિ, તથાપિ મમ ન ભવિષ્યતિ।
XXXIV તતો યીશુના સ ઉક્તઃ, તુભ્યમહં તથ્યં કથયામિ, યામિન્યામસ્યાં ચરણાયુધસ્ય રવાત્ પૂર્વ્વં ત્વં માં ત્રિ ર્નાઙ્ગીકરિષ્યસિ।
XXXV તતઃ પિતર ઉદિતવાન્, યદ્યપિ ત્વયા સમં મર્ત્તવ્યં, તથાપિ કદાપિ ત્વાં ન નાઙ્ગીકરિષ્યામિ; તથૈવ સર્વ્વે શિષ્યાશ્ચોચુઃ।
XXXVI અનન્તરં યીશુઃ શિષ્યૈઃ સાકં ગેત્શિમાનીનામકં સ્થાનં પ્રસ્થાય તેભ્યઃ કથિતવાન્, અદઃ સ્થાનં ગત્વા યાવદહં પ્રાર્થયિષ્યે
તાવદ્ યૂયમત્રોપવિશત।
XXXVII પશ્ચાત્ સ પિતરં સિવદિયસુતૌ ચ સઙ્ગિનઃ કૃત્વા ગતવાન્, શોકાકુલોઽતીવ વ્યથિતશ્ચ બભૂવ।
XXXVIII તાનવાદીચ્ચ મૃતિયાતનેવ મત્પ્રાણાનાં યાતના જાયતે, યૂયમત્ર મયા સાર્દ્ધં જાગૃત।
XXXIX તતઃ સ કિઞ્ચિદ્દૂરં ગત્વાધોમુખઃ પતન્ પ્રાર્થયાઞ્ચક્રે, હે મત્પિતર્યદિ ભવિતું શક્નોતિ, તર્હિ કંસોઽયં મત્તો દૂરં યાતુ; કિન્તુ
મદિચ્છાવત્ ન ભવતુ, ત્વદિચ્છાવદ્ ભવતુ।
XL તતઃ સ શિષ્યાનુપેત્ય તાન્ નિદ્રતો નિરીક્ષ્ય પિતરાય કથયામાસ, યૂયં મયા સાકં દણ્ડમેકમપિ જાગરિતું નાશન્કુત?
XLI પરીક્ષાયાં ન પતિતું જાગૃત પ્રાર્થયધ્વઞ્ચ; આત્મા સમુદ્યતોસ્તિ, કિન્તુ વપુ ર્દુર્બ્બલં।
XLII સ દ્વિતીયવારં પ્રાર્થયાઞ્ચક્રે, હે મત્તાત, ન પીતે યદિ કંસમિદં મત્તો દૂરં યાતું ન શક્નોતિ, તર્હિ ત્વદિચ્છાવદ્ ભવતુ।
XLIII સ પુનરેત્ય તાન્ નિદ્રતો દદર્શ, યતસ્તેષાં નેત્રાણિ નિદ્રયા પૂર્ણાન્યાસન્।
XLIV પશ્ચાત્ સ તાન્ વિહાય વ્રજિત્વા તૃતીયવારં પૂર્વ્વવત્ કથયન્ પ્રાર્થિતવાન્।

XLV તતઃ શિષ્યાનુપાગત્ય ગદિતવાન્, સામ્પ્રતં શયાનાઃ કિં વિશ્રામ્યથ? પશ્યત, સમય ઉપાસ્થાત્, મનુજસુતઃ પાપિનાં કરેષુ સમર્પ્યતે।

XLVI ઉત્તિષ્ઠત, વયં યામઃ, યો માં પરકરેષુ મસર્પયિષ્યતિ, પશ્યત, સ સમીપમાયાતિ।

XLVII એતત્કથાકથનકાલે દ્વાદશશિષ્યાણામેકો યિહૂદાનામકો મુખ્યયાજકલોકપ્રાચીનૈઃ પ્રહિતાન્ અસિધારિયષ્ટિધારિણો મનુજાન્ ગૃહીત્વા તત્સમીપમુપતસ્થૌ।

XLVIII અસૌ પરકરેષ્વર્પયિતા પૂર્વ્વં તાન્ ઇત્થં સઙ્કેતયામાસ, યમહં ચુમ્બિષ્યે, સોઽસૌ મનુજઃ,સએવ યુષ્માભિ ર્ધાર્য્યતાં।

XLIX તદા સ સપદિ યીશુમુપાગત્ય હે ગુરો, પ્રણમામીત્યુક્ત્વા તં ચુચુમ્બે।

L તદા યીશુસ્તમુવાચ, હે મિત્ર કિમર્થમાગતોસિ? તદા તૈરાગત્ય યીશુરાક્રમ્ય દધ્રે।

LI તતો યીશોઃ સઙ્ગિનામેકઃ કરં પ્રસાર્ય્ય કોષાદસિં બહિષ્કૃત્ય મહાયાજકસ્ય દાસમેકમાહત્ય તસ્ય કર્ણં ચિચ્છેદ।

LII તતો યીશુસ્તં જગાદ, ખડ્ગં સ્વસ્થાને ◌ં નિધેહિ યતો યે યે જના અસિં ધારયન્તિ, તએવાસિના વિનશ્યન્તિ।

LIII અપરં પિતા યથા મદન્તિકં સ્વર્ગીયદૂતાનાં દ્વાદશવાહિનીતોઽધિકં પ્રહિણુયાત્ મયા તમુદ્દિશ્યેદાનીમેવ તથા પ્રાર્થયિતું ન શક્યતે, ત્વયા કિમિત્થં જ્ઞાયતે?

LIV તથા સતીત્થં ઘટિષ્યતે ધર્મ્મપુસ્તકસ્ય યદિદં વાક્યં તત્ કથં સિધ્યેત્?

LV તદાનીં યીશુ ર્જનનિવહં જગાદ, યૂયં ખડ્ગયષ્ટીન્ આદાય માં કિં ચૌરં ધર્ત્તુમાયાતાઃ? અહં પ્રત્યહં યુષ્માભિઃ સાકમુપવિશ્ય સમુપાદિશં, તદા માં નાધરત;

LVI કિન્તુ ભવિષ્યદ્વાદિનાં વાક્યાનાં સંસિદ્ધયે સર્વ્વમેતદભૂત્। તદા સર્વ્વે શિષ્યાસ્તં વિહાય પલાયન્ત।

LVII અનન્તરં તે મનુજા યીશું ધૃત્વા યત્રાધ્યાપકપ્રાઞ્ચઃ પરિષદં કુર્વ્વન્ત ઉપાવિશન્ તત્ર કિયફાના◌ામકમહાયાજકસ્યાન્તિકં નિન્યુઃ।

LVIII કિન્તુ શેષે કિં ભવિષ્યતીતિ વેત્તું પિતરો દૂરે તત્પશ્ચાદ્ વ્રજિત્વા મહાયાજકસ્યાટ્ટાલિકાં પ્રવિશ્ય દાસૈઃ સહિત ઉપાવિશત્।

LIX તદાનીં પ્રધાનયાજકપ્રાચીનમન્ત્રિણઃ સર્વ્વે યીશું હન્તું મૃષાસાક્ષ્યમ્ અલિપ્સન્ત,

LX કિન્તુ ન લેભિરે। અનેકેષુ મૃષાસાક્ષિષ્વાગતેષ્વપિ તન્ન પ્રાપુઃ।

LXI શેષે દ્વૌ મૃષાસાક્ષિણાવાગત્ય જગદતુઃ, પુમાનયમકથયત્, અહમીશ્વરમન્દિરં ભંક્ત્વા દિનત્રયમધ્યે તન્નિર્મ્માતું શક્નોમિ।

LXII તદા મહાયાજક ઉત્થાય યીશુમ્ અવાદીત્। ત્વં કિમપિ ન પ્રતિવદસિ? ત્વામધિ કિમેતે સાક્ષ્યં વદન્તિ?

LXIII કિન્તુ યીશુ ર્મૌનીભૂય તસ્યૌ। તતો મહાયાજક ઉક્તવાન્, ત્વામ્ અમરેશ્વરનામ્ના શપયામિ, ત્વમીશ્વરસ્ય પુત્રોઽભિષિક્તો ભવસિ નવેતિ વદ।

LXIV યીશુઃ પ્રત્યવદત્, ત્વં સત્યમુક્તવાન્; અહં યુષ્માન્ તથ્યં વદામિ, ઇતઃપરં મનુજસુતં સર્વ્વશક્તિમતો દક્ષિણપાર્શ્વે સ્થાતું ગગણસ્થં જલધરાનારુહ્યાયાન્તં વીક્ષધ્વે।

LXV તદા મહાયાજકો નિજવસનં છિત્ત્વા જગાદ, એષ ઈશ્વરં નિન્દિતવાન્, અસ્માકમપરસાક્ષ્યેણ કિં પ્રયોજનં? પશ્યત, યૂયમેવાસ્યાસ્યાદ્ ઈશ્વરનિન્દાં શ્રુતવન્તઃ,

LXVI યુષ્માભિઃ કિં વિવિચ્યતે? તે પ્રત્યૂચુઃ, વધાર્હોઽયં।

LXVII તતો લોકૈસ્તદાસ્યે નિષ્ઠીવિતં કેચિત્ પ્રતલમાહત્ય કેચિચ્ચ ચપેટમાહત્ય બભાષિરે,

LXVIII હે ખ્રીષ્ટ ત્વાં કશ્ચપેટમાહતવાન્? ઇતિ ગણયિત્વા વદાસ્માન્।

LXIX પિતરો બહિરઙ્ગન ઉપવિશતિ, તદાનીમેકા દાસી તમુપાગત્ય બભાષે, ત્વં ગાલીલીયયીશોઃ સહચરએકઃ।

LXX કિન્તુ સ સર્વ્વેષાં સમક્ષમ્ અનઙ્ગીકૃત્યાવાદીત્, ત્વયા યદુચ્યતે, તદર્થમહં ન વેદ્મિ।

LXXI તદા તસ્મિન્ બહિર્દ્વારં ગતે ઽન્યા દાસી તં નિરીક્ષ્ય તત્રત્યજનાનવદત્, અયમપિ નાસરતીયયીશુના સાર્દ્ધમ્ આસીત્।

LXXII તતઃ સ શપથેન પુનરનઙ્ગીકૃત્ય કથિતવાન્, તં નરં ન પરિચિનોમિ।

LXXIII ક્ષણાત્ પરં તિષ્ઠન્તો જના એત્ય પિતરમ્ અવદન્, ત્વમવશ્યં તેષામેક ઇતિ ત્વદુચ્ચારણમેવ દ્યોતયતિ।

LXXIV કિન્તુ સોઽભિશપ્ય કથિતવાન્, તં જનં નાહં પરિચિનોમિ, તદા સપદિ કુક્કુટો રુરાવ।

LXXV કુક્કુટરવાત્ પ્રાક્ ત્વં માં ત્રિરપાહ્નોષ્યસે, યૈષા વાગ્ યીશુનાવાદિ તાં પિતરઃ સંસ્મૃત્ય બહિરિત્વા ખેદાદ્ ભૃશં ચક્રન્દ।

# XXVII

I પ્રભાતે જાતે પ્રધાનયાજકલોકપ્રાચીના યીશું હન્તું તત્પ્રતિકૂલં મન્ત્રયિત્વા

II તં બદ્ધ્વા નીત્વા પન્તીયપીલાતાખ્યાધિપે સમર્પયામાસુઃ।

III તતો યીશોઃ પરકરેષ્વર્પયિતા યિહૂદાસ્તત્પ્રાણાદણ્ડાજ્ઞાં વિદિત્વા સન્તપ્તમનાઃ પ્રધાનયાજકલોકપ્રાચીનાનાં સમક્ષં તાસ્ત્રીંશન્મુદ્રાઃ પ્રતિદાયાવાદીત્,

IV એતન્નિરાગોનરપ્રાણપરકરાર્પણાત્ કલુષં કૃતવાનહં। તદા ત ઉદિતવન્તઃ, તેનાસ્માકં કિં? ત્વયા તદ્ બુધ્યતામ્।

V તતો યિહૂદા મન્દિરમધ્યે તા મુદ્રા નિક્ષિપ્ય પ્રસ્થિતવાન્ ઇત્વા ચ સ્વયમાત્માનમુદ્બબન્ધ।

VI પશ્ચાત્ પ્રધાનયાજકાસ્તા મુદ્રા આદાય કથિતવન્તઃ, એતા મુદ્રાઃ શોણિતમૂલ્યં તસ્માદ્ ભાણ્ડાગારે ન નિધાતવ્યાઃ।

VII અનન્તરં તે મન્ત્રયિત્વા વિદેશિનાં શ્મશાનસ્થાનાય તાભિઃ કુલાલસ્ય ક્ષેત્રમક્રીણન્।

VIII અતોઽદ્યાપિ તત્સ્થાનં રક્તક્ષેત્રં વદન્તિ।

IX ઇત્થં સતિ ઇસ્રાયેલીયસન્તાનૈ ર્યસ્ય મૂલ્યં નિરુપિતં, તસ્ય ત્રિંશન્મુદ્રામાનં મૂલ્યં

X માં પ્રતિ પરમેશ્વરસ્યાદેશાત્ તેભ્ય આદીયત, તેન ચ કુલાલસ્ય ક્ષેત્રં ક્રીતમિતિ યદ્વચનં યિરિમિયભવિષ્યદ્વાદિના પ્રોક્તં તત્ તદાસિધ્યત્।

XI અનન્તરં યીશૌ તદધિપતેઃ સમ્મુખ ઉપતિષ્ઠતિ સ તં પપ્રચ્છ, ત્વં કિં યિહૂદીયાનાં રાજા? તદા યીશુસ્તમવદત્, ત્વં સત્યમુક્તવાન્।

XII કિન્તુ પ્રધાનયાજકપ્રાચીનૈરભિયુક્તેન તેન કિમપિ ન પ્રત્યવાદિ।
XIII તતઃ પીલાતેન સ ઉદિતઃ, ઇમે ત્વત્પ્રતિકૂલતઃ કતિ કતિ સાક્ષ્યં દદતિ, તત્ ત્વં ન શૃણોષિ?
XIV તથાપિ સ તેષામેકસ્યાપિ વચસ ઉત્તરં નોદિતવાન્; તેન સોઽધિપતિ ર્મહાચિત્રં વિદામાસ।
XV અન્યચ્ચ તન્મહકાલેઽધિપતેરેતાદૃશી રાતિરાસીત્, પ્રજા યં કઞ્ચન બન્ધિનં યાચન્તે, તમેવ સ મોચયતીતિ।
XVI તદાનીં બરબ્બાનામા કશ્ચિત્ ખ્યાતબન્ધ્યાસીત્।
XVII તતઃ પીલાતસ્તત્ર મિલિતાન્ લોકાન્ અપૃચ્છત્, એષ બરબ્બા બન્ધી ખ્રીષ્ટવિખ્યાતો યીશુશ્ચૈતયોઃ કં મોચયિષ્યામિ? યુષ્માકં
કિમીપ્સિતં?
XVIII તૈરીર્ષ્યયા સ સમર્પિત ઇતિ સ જ્ઞાતવાન્।
XIX અપરં વિચારાસનોપવેશનકાલે પીલાતસ્ય પત્ની ભૃત્યં પ્રહિત્ય તસ્મૈ કથયામાસ, તં ધાર્મ્મિકમનુજં પ્રતિ ત્વયા કિમપિ ન
કર્ત્તવ્યં; યસ્માત્ તત્કૃતેઽદ્યાહં સ્વપ્ને પ્રભૂતકષ્ટમલભે।
XX અનન્તરં પ્રધાનયાજકપ્રાચીના બરબ્બાં યાચિત્વાદાતું યીશુઞ્ચ હન્તું સકલલોકાન્ પ્રાવર્ત્તયન્।
XXI તતોઽધિપતિસ્તાન્ પૃષ્ટવાન્, એતયોઃ કમહં મોચયિષ્યામિ? યુષ્માકં કેચ્છા? તે પ્રોચુ ર્બરબ્બાં।
XXII તદા પીલાતઃ પપ્રચ્છ, તર્હિ યં ખ્રીષ્ટં વદન્તિ, તં યીશું કિં કરિષ્યામિ? સર્વ્વે કથયામાસુઃ, સ ક્રુશેન વિધ્યતાં।
XXIII તતોઽધિપતિરવાદીત્, કુતઃ? કિં તેનાપરાદ્ધં? કિન્તુ તે પુનરુચૈ ર્જગદુઃ, સ ક્રુશેન વિધ્યતાં।
XXIV તદા નિજવાક્યમગ્રાહ્યમભૂત્, કલહશ્ચાપ્યભૂત્, પીલાત ઇતિ વિલોક્ય લોકાનાં સમક્ષં તોયમાદાય કરૌ પ્રક્ષાલ્યાવોચત્,
એતસ્ય ધાર્મ્મિકમનુષ્યસ્ય શોણિતપાતે નિર્દોષોઽહં, યુષ્માભિરેવ તદ્ બુધ્યતાં।
XXV તદા સર્વ્વાઃ પ્રજાઃ પ્રત્યવોચન્, તસ્ય શોણિતપાતાપરાધોઽસ્માકમ્ અસ્મત્સન્તાનાનાઞ્ચોપરિ ભવતુ।
XXVI તતઃ સ તેષાં સમીપે બરબ્બાં મોચયામાસ યીશુન્તુ કષાભિરાહત્ય ક્રુશેન વેધિતું સમર્પયામાસ।
XXVII અનન્તરમ્ અધિપતેઃ સેના અધિપતે ર્ગૃહં યીશુમાનીય તસ્ય સમીપે સેનાસમૂહં સંજગૃહુઃ।
XXVIII તતસ્તે તસ્ય વસનં મોચયિત્વા કૃષ્ણલોહિતવર્ણવસનં પરિધાપયામાસુઃ
XXIX કણ્ટકાનાં મુકુટં નિર્મ્માય તચ્છિરસિ દદુઃ, તસ્ય દક્ષિણકરે વેત્રમેકં દત્ત્વા તસ્ય સમ્મુખે જાનૂનિ પાતયિત્વા, હે યિહૂદીયાનાં
રાજન્, તુભ્યં નમ ઇત્યુક્ત્વા તં તિરશ્ચક્રુઃ,
XXX તતસ્તસ્ય ગાત્રે નિષ્ઠીવં દત્વા તેન વેત્રેણ શિર આજઘ્નુઃ।
XXXI ઇત્થં તં તિરસ્કૃત્ય તદ્ વસનં મોચયિત્વા પુનર્નિજવસનં પરિધાપયાઞ્ચક્રુઃ, તં ક્રુશેન વેધિતું નીતવન્તઃ।
XXXII પશ્ચાત્તે બહિર્ભૂય કુરીણીયં શિમોન્નામકમેકં વિલોક્ય ક્રુશં વોઢું તમાદદિરે।
XXXIII અનન્તરં ગુલ્ગલ્તામ્ અર્થાત્ શિરસ્કપાલનામકસ્થાનમુ પસ્થાય તે યીશવે પિત્તમિશ્રિતામ્લરસં પાતું દદુઃ,
XXXIV કિન્તુ સ તમાસ્વાદ્ય ન પપૌ।
XXXV તદાનીં તે તં ક્રુશેન સંવિધ્ય તસ્ય વસનાનિ ગુટિકાપાતેન વિભજ્ય જગૃહુઃ, તસ્માત્, વિભજન્તેઽધરીયં મે તે મનુષ્યાઃ
પરસ્પરં। મદુત્તરીયવસ્ત્રાર્થં ગુટિકાં પાતયન્તિ ચ॥ યદેતદ્વચનં ભવિષ્યદ્વાદિભિરુક્તમાસીત્, તદા તદ્ અસિધ્યત્,
XXXVI પશ્ચાત્ તે તત્રોપવિશ્ય તદ્રક્ષણકર્વ્વણિ નિયુક્તાસ્તસ્થુઃ।
XXXVII અપરમ્ એષ યિહૂદીયાનાં રાજા યીશુરિત્યપવાદલિપિપત્રં તચ્છિરસ ઊર્દ્ધ્વે યોજયામાસુઃ।
XXXVIII તતસ્તસ્ય વામે દક્ષિણે ચ દ્વૌ ચૈરૌ તેન સાકં ક્રુશેન વિવિધુઃ।
XXXIX તદા પાન્થા નિજશિરો લાડયિત્વા તં નિન્દન્તો જગદુઃ,
XL હે ઈશ્વરમન્દિરભઞ્જક દિનત્રયે તન્નિર્મ્માતઃ સ્વં રક્ષ, ચેત્ત્વમીશ્વરસુતસ્તર્હિ ક્રુશાદવરોહ।
XLI પ્રધાનયાજકાધ્યાપકપ્રાચીનાશ્ચ તથા તિરસ્કૃત્ય જગદુઃ,
XLII સોઽન્યજનાનાવત્, કિન્તુ સ્વમવિતું ન શક્નોતિ। યદીસ્રાયેલો રાજા ભવેત્, તર્હીદાનીમેવ ક્રુશાદવરોહતુ, તેન તં વયં
પ્રત્યેષ્યામઃ।
XLIII સ ઈશ્વરે પ્રત્યાશામકરોત્, યદીશ્વરસ્તસ્મિન્ સન્તુષ્ટસ્તર્હીદાનીમેવ તમવેત્, યતઃ સ ઉક્તવાન્ અહમીશ્વરસુતઃ।
XLIV યૌ સ્તેનૌ સાકં તેન ક્રુશેન વિદ્ધૌ તૌ તદ્વદેવ તં નિનિન્દતુઃ।
XLV તદા દ્વિતીયયામાત્ તૃતીયયામં યાવત્ સર્વ્વદેશે તમિરં બભૂવ,
XLVI તૃતીયયામે "એલી એલી લામા શિવક્તની", અર્થાત્ મદીશ્વર મદીશ્વર કુતો મામત્યાક્ષીઃ? યીશુરુચ્ચૈરિતિ જગાદ।
XLVII તદા તત્ર સ્થિતાઃ કેચિત્ તત્ શ્રુત્વા બભાષિરે, અયમ્ એલિયમાહૂયતિ।
XLVIII તેષાં મધ્યાદ્ એકઃ શીઘ્રં ગત્વા સ્પઞ્જં ગૃહીત્વા તત્રામ્લરસં દત્ત્વા નલેન પાતું તસ્મૈ દદૌ।
XLIX ઇતરેઽકથયન્ તિષ્ઠત, તં રક્ષિતુમ્ એલિય આયાતિ નવેતિ પશ્યામઃ।
L યીશુઃ પુનરુચ્ચૈરાહૂય પ્રાણાન્ જહૌ।
LI તતો મન્દિરસ્ય વિચ્છેદવસનમ્ ઊર્દ્ધ્વાદધો યાવત્ છિદ્યમાનં દ્વિધાભવત્,
LII ભૂમિશ્ચકમ્પે ભૂધરોવ્યદીર્ય્યત ચ। શ્મશાને મુક્તે ભૂરિપુણ્યવતાં સુપ્તદેહા ઉદતિષ્ઠન્,
LIII શ્મશાનાદ્ વહિર્ભૂય તદુત્થાનાત્ પરં પુણ્યપુરં ગત્વા બહુજનાન્ દર્શયામાસુઃ।
LIV યીશુરક્ષણાય નિયુક્તઃ શતસેનાપતિસ્તત્સઙ્ગિનશ્ચ તાદૃશીં ભૂકમ્પાદિઘટનાં દૃષ્ટ્વા ભીતા અવદન્, એષ ઈશ્વરપુત્રો ભવતિ।
LV યા બહુયોષિતો યીશું સેવમાના ગાલીલસ્તત્પશ્ચાદાગતાસ્તાસાં મધ્યે
LVI મગ્દલીની મરિયમ્ યાકૂબ્યોશ્યો ર્માતા યા મરિયમ્ સિબદિયપુત્રયો ર્માતા ચ યોષિત એતા દૂરે તિષ્ઠન્ત્યો દદૃશુઃ।
LVII સન્ધ્યાયાં સત્યમ્ અરિમથિયાનગરસ્ય યૂષફ્નામા ધની મનુજો યીશોઃ શિષ્યત્વાત્
LVIII પીલાતસ્ય સમીપં ગત્વા યીશોઃ કાયં યયાચે, તેન પીલાતઃ કાયં દાતુમ્ આદિદેશ।
LIX યૂષફ્ તત્કાયં નીત્વા શુચિવસ્ત્રેણાચ્છાદ્ય

LX સ્વાર્થં શૈલે યત્ શ્મશાનં ચખાન, તન્મધ્યે તત્કાયં નિધાય તસ્ય દ્વારિ વૃહત્પાષાણં દદૌ།
LXI કિન્તુ મગ્દલીની મરિયમ્ અન્યમરિયમ્ એતે સ્ત્રિયૌ તત્ર શ્મશાનસમ્મુખ ઉપવિવિશતુઃ།
LXII તદનન્તરં નિસ્તારોત્સવસ્યાયોજનદિનાત્ પરેઽહનિ પ્રધાનયાજકાઃ ફિરૂશિનશ્ચ મિલિત્વા પીલાતમુપાગત્યાકથયન્,
LXIII હે મહેચ્છ સ પ્રતારકો જીવન અકથયત્, દિનત્રયાત્ પરં શ્મશાનાદુત્થાસ્યામિ તદ્વાક્યં સ્મરામો વયં;
LXIV તસ્માત્ તૃતીયદિનં યાવત્ તત્ શ્મશાનં રક્ષિતુમાદિશતુ, નોચેત્ તચ્છિષ્યા યામિન્યામાગત્ય તં હૃત્વા લોકાન્ વદિષ્યન્તિ, સ
શ્મશાનાદુદતિષ્ઠત્, તથા સતિ પ્રથમભ્રાન્તેઃ શેષીયભ્રાન્તિ ર્મહતી ભવિષ્યતિ།
LXV તદા પીલાત અવાદીત્, યુષ્માકં સમીપે રક્ષિગણ આસ્તે, યૂયં ગત્વા યથા સાધ્યં રક્ષયત།
LXVI તતસ્તે ગત્વા તદ્દ્વારપાષાણં મુદ્રાઙ્કિતં કૃત્વા રક્ષિગણં નિયોજ્ય શ્મશાનં રક્ષયામાસુઃ།

# XXVIII

I તતઃ પરં વિશ્રામવારસ્ય શેષે સપ્તાહપ્રથમદિનસ્ય પ્રભોતે જાતે મગ્દલીની મરિયમ્ અન્યમરિયમ્ ચ શ્મશાનં દ્રષ્ટુમાગતા།
II તદા મહાન્ ભૂકમ્પોઽભવત્; પરમેશ્વરીયદૂતઃ સ્વર્ગાદવરુહ્ય શ્મશાનદ્વારાત્ પાષાણમપસાર્ય્ય તદુપર્ય્યુપવિવેશ།
III તદ્વદનં વિદ્યુદ્વત્ તેજોમયં વસનં હિમશુભ્રઞ્ચ།
IV તદાનીં રક્ષિણસ્તદ્ભયાત્ કમ્પિતા મૃતવદ્ બભૂવઃ།
V સ દૂતો યોષિતો જગાદ, યૂયં મા ભૈષ્ટ, ક્રુશહતયીશું મૃગયધ્વે તદહં વેદ્મિ།
VI સોઽત્ર નાસ્તિ, યથાવદત્ તથોત્થિતવાન્; એતત્ પ્રભોઃ શયનસ્થાનં પશ્યત།
VII તૂર્ણં ગત્વા તચ્છિષ્યાન્ ઇતિ વદત, સ શ્મશાનાદ્ ઉદતિષ્ઠત્, યુષ્માકમગ્રે ગાલીલં યાસ્યતિ યૂયં તત્ર તં વીક્ષિષ્યધ્વે, પશ્યતાહં
વાર્ત્તામિમાં યુષ્માનવાદિષં།
VIII તતસ્તા ભયાત્ મહાનન્દાઞ્ચ શ્મશાનાત્ તૂર્ણં બહિર્ભૂય તચ્છિષ્યાન્ વાર્ત્તાં વક્તું ધાવિતવત્યઃ། કિન્તુ શિષ્યાન્ વાર્ત્તાં વક્તું
યાન્તિ, તદા યીશુ ર્દર્શનં દત્ત્વા તા જગાદ,
IX યુષ્માકં કલ્યાણં ભૂયાત્, તતસ્તા આગત્ય તત્પાદયોઃ પતિત્વા પ્રણેમુઃ།
X યીશુસ્તા અવાદીત્, મા બિભીત, યૂયં ગત્વા મમ ભ્રાતૃન્ ગાલીલં યાતું વદત, તત્ર તે માં દ્રક્ષ્યન્તિ།
XI સ્ત્રિયો ગચ્છન્તિ, તદા રક્ષિણાં કેચિત્ પુરં ગત્વા યદ્યદ્ ઘટિતં તત્સર્વ્વં પ્રધાનયાજકાન્ જ્ઞાપિતવન્તઃ།
XII તે પ્રાચીનૈઃ સમં સંસદં કૃત્વા મન્ત્રયન્તો બહુમુદ્રાઃ સેનાભ્યો દત્ત્વાવદન્,
XIII અસ્માસુ નિદ્રિતેષુ તચ્છિષ્યા યામિન્યામાગત્ય તં હૃત્વાનયન્, ઇતિ યૂયં પ્રચારયત།
XIV યદ્યેતદધિપતેઃ શ્રોત્રગોચરીભવેત્, તર્હિ તં બોધયિત્વા યુષ્માનવિષ્યામઃ།
XV તતસ્તે મુદ્રા ગૃહીત્વા શિક્ષાનુરૂપં કર્મ્મ ચક્રુઃ, યિહૂદીયાનાં મધ્યે તસ્યાદ્યાપિ કિંવદન્તી વિદ્યતે།
XVI એકાદશ શિષ્યા યીશુનિરૂપિતાગાલીલસ્યાદ્રિં ગત્વા
XVII તત્ર તં સંવીક્ષ્ય પ્રણેમુઃ, કિન્તુ કેચિત્ સન્દિગ્ધવન્તઃ།
XVIII યીશુસ્તેષાં સમીપમાગત્ય વ્યાહૃતવાન્, સ્વર્ગમેદિન્યોઃ સર્વ્વાધિપતિત્વભારો મય્યર્પિત આસ્તે།
XIX અતો યૂયં પ્રયાય સર્વ્વદેશીયાન્ શિષ્યાન્ કૃત્વા પિતુઃ પુત્રસ્ય પવિત્રસ્યાત્મનશ્ચ નામ્ના તાનવગાહયત; અહં યુષ્માન્
યદ્યદાદિશં તદપિ પાલયિતું તાનુપાદિશત།
XX પશ્યત, જગદન્તં યાવત્ સદાહં યુષ્માભિઃ સાકં તિષ્ઠામિ། ઇતિ།

# માર્કલિખિતઃ સુસંવાદઃ

I ઈશ્વરપુત્રસ્ય યીશુખ્રીષ્ટસ્ય સુસંવાદારમ્ભઃ।
II ભવિષ્યદ્વાદિનાં ગ્રન્થેષુ લિપિરિત્થમાસ્તે, પશ્ય સ્વકીયદૂતન્તુ તવાગ્રે પ્રેષયામ્યહમ્। ગત્વા ત્વદીયપન્થાનં સ હિ પરિષ્કરિષ્યતિ।
III "પરમેશસ્ય પન્થાનં પરિષ્કુરુત સર્વ્વતઃ। તસ્ય રાજપથઞ્ચૈવ સમાનં કુરુતાધુના॥ " ઇત્યેતત્ પ્રાન્તરે વાક્યં વદતઃ કસ્યચિદ્રવઃ॥
IV સએવ યોહન્ પ્રાન્તરે મજ્જિતવાન્ તથા પાપમાર્જનનિમિત્તં મનોવ્યાવર્ત્તકમજ્જનસ્ય કથાઞ્ચ પ્રચારિતવાન્।
V તતો યિહૂદાદેશયિરૂશાલમ્નગરનિવાસિનઃ સર્વ્વે લોકા બહિ ર્ભૂત્વા તસ્ય સમીપમાગત્ય સ્વાનિ સ્વાનિ પાપાન્યઙ્ગીકૃત્ય યર્દ્દનનદ્યાં
તેન મજ્જિતા બભૂવુઃ।
VI અસ્ય યોહનઃ પરિધેયાનિ ક્રમેલકલોમજાનિ, તસ્ય કટિબન્ધનં ચર્મ્મજાતમ્, તસ્ય ભક્ષ્યાણિ ચ શૂકકીટા વન્યમધૂનિ ચાસન્।
VII સ પ્રચારયન્ કથયાઞ્ચક્રે, અહં નમ્રીભૂય યસ્ય પાદુકાબન્ધનં મોચયિતુમપિ ન યોગ્યોસ્મિ, તાદૃશો મત્તો ગુરુતર એકઃ પુરુષો
મત્પશ્ચાદાગચ્છતિ।
VIII અહં યુષ્માન્ જલે મજ્જિતવાન્ કિન્તુ સ પવિત્ર આત્માનિ સંમજ્જયિષ્યતિ।
IX અપરઞ્ચ તસ્મિન્નેવ કાલે ગાલીલ્પ્રદેશસ્ય નાસરદ્ગ્રામાદ્ યીશુરાગત્ય યોહના યર્દ્દનનદ્યાં મજ્જિતોઽભૂત્।
X સ જલાદુત્થિતમાત્રો મેઘદ્વારં મુક્તં કપોતવત્ સ્વસ્યોપરિ અવરોહન્તમાત્માનઞ્ચ દૃષ્ટવાન્।
XI ત્વં મમ પ્રિયઃ પુત્રસ્ત્વય્યેવ મમમહાસન્તોષ ઇયમાકાશીયા વાણી બભૂવ।
XII તસ્મિન્ કાલે આત્મા તં પ્રાન્તરમધ્યં નિનાય।
XIII અથ સ ચત્વારિંશદ્દિનાનિ તસ્મિન્ સ્થાને વન્યપશુભિઃ સહ તિષ્ઠન્ શૈતાના પરીક્ષિતઃ; પશ્ચાત્ સ્વર્ગીયદૂતાસ્તં સિષેવિરે।
XIV અનન્તરં યોહનિ બન્ધનાલયે બદ્ધે સતિ યીશુ ર્ગાલીલ્પ્રદેશમાગત્ય ઈશ્વરરાજ્યસ્ય સુસંવાદં પ્રચારયન્ કથયામાસ,
XV કાલઃ સમ્પૂર્ણ ઈશ્વરરાજ્યઞ્ચ સમીપમાગતં; અતોહેતો ર્યૂયં મનાંસિ વ્યાવર્ત્તયધ્વં સુસંવાદે ચ વિશ્વાસિત।
XVI તદનન્તરં સ ગાલીલીયસમુદ્રસ્ય તીરે ગચ્છન્ શિમોન્ તસ્ય ભ્રાતા અન્દ્રિયનામા ચ ઇમૌ દ્વૌ જનૌ મત્સ્યધારિણૌ સાગરમધ્યે
જાલં પ્રક્ષિપન્તૌ દૃષ્ટ્વા તાવવદત્,
XVII યુવાં મમ પશ્ચાદાગચ્છતં, યુવામહં મનુષ્યધારિણૌ કરિષ્યામિ।
XVIII તતસ્તૌ તત્ક્ષણમેવ જાલાનિ પરિત્યજ્ય તસ્ય પશ્ચાત્ જગ્મતુઃ।
XIX તતઃ પરં તત્સ્થાનાત્ કિઞ્ચિદ્ દૂરં ગત્વા સ સિવદીપુત્રયાકૂબ્ તદ્ભ્રાતૃયોહન્ ચ ઇમૌ નૌકાયાં જાલાનાં જીર્ણમુદ્ધારયન્તૌ
દૃષ્ટ્વા તાવાહૂયત્।
XX તતસ્તૌ નૌકાયાં વેતનભુગ્ભિઃ સહિતં સ્વપિતરં વિહાય તત્પશ્ચાદીયતુઃ।
XXI તતઃ પરં કફર્નાહૂમ્નામકં નગરમુપસ્થાય સ વિશ્રામદિવસે ભજનગ્રહં પ્રવિશ્ય સમુપદિદેશ।
XXII તસ્યોપદેશાલ્લોકા આશ્ચર્ય્યં મેનિરે યતઃ સોધ્યાપકાઇવ નોપદિશન્ પ્રભાવવાનિવ પ્રોપદિદેશ।
XXIII અપરઞ્ચ તસ્મિન્ ભજનગૃહે અપવિત્રભૂતેન ગ્રસ્ત એકો માનુષ આસીત્। સ ચીત્શબ્દં કૃત્વા કથયાઞ્ચકે
XXIV ભો નાસરતીય યીશો ત્વમસ્માન્ ત્યજ, ત્વયા સહાસ્માકં કઃ સમ્બન્ધઃ? ત્વં કિમસ્માન્ નાશયિતું સમાગતઃ? ત્વમીશ્વરસ્ય
પવિત્રલોક ઇત્યહં જાનામિ।
XXV તદા યીશુસ્તં તર્જયિત્વા જગાદ તૂષ્ણીં ભવ ઇતો બહિર્ભવ ચ।
XXVI તતઃ સોઽપવિત્રભૂતસ્તં સમ્પીડ્ય અત્યુચૈશ્ચીત્કૃત્ય નિર્જગામ।
XXVII તેનૈવ સર્વ્વે ચમત્કૃત્ય પરસ્પરં કથયાઞ્ચક્રિરે, અહો કિમિદં? કીદૃશોઽયં નવ્ય ઉપદેશઃ? અનેન
પ્રભાવેનાપવિત્રભૂતેષ્વાજ્ઞાપિતેષુ તે તદાજ્ઞાનુવર્ત્તિનો ભવન્તિ।
XXVIII તદા તસ્ય યશો ગાલીલશ્ચતુર્દિક્સ્થસર્વ્વદેશાન્ વ્યાપ્નોત્।
XXIX અપરઞ્ચ તે ભજનગૃહાદ્ બહિ ર્ભૂત્વા યાકૂબ્યોહન્ભ્યાં સહ શિમોન આન્દ્રિયસ્ય ચ નિવેશનં પ્રવિવિશુઃ।
XXX તદા પિતરસ્ય શ્વશ્રૂર્જ્વરપીડિતા શય્યાયામાસ્ત ઇતિ તે તં ઝટિતિ વિજ્ઞાપયાઞ્ચક્રુઃ।
XXXI તતઃ સ આગત્ય તસ્યા હસ્તં ધૃત્વા તામુદસ્થાપયત્; તદૈવ તાં જ્વરોઽત્યાક્ષીત્ તતઃ પરં સા તાન્ સિષેવે।
XXXII અથાસ્તં ગતે રવૌ સન્ધ્યાકાલે સતિ લોકાસ્તત્સમીપં સર્વ્વાન્ રોગિણો ભૂતધૃતાંશ્ચ સમાનિન્યુઃ।
XXXIII સર્વ્વે નાગરિકા લોકા દ્વારિ સંમિલિતાશ્ચ।
XXXIV તતઃ સ નાનાવિધરોગિણો બહૂન્ મનુજાનરોગિણશ્ચકાર તથા બહૂન્ ભૂતાન્ ત્યાજયાઞ્ચકાર તાન્ ભૂતાન્ કિમપિ વાક્યં
વક્તું નિષિષેધ ચ યતોહેતોસ્તે તમજાનન્।
XXXV અપરઞ્ચ સોઽતિપ્રત્યૂષે વસ્તુતસ્તુ રાત્રિશેષે સમુત્થાય બહિર્ભૂય નિર્જનં સ્થાનં ગત્વા તત્ર પ્રાર્થયાઞ્ચક્રે।
XXXVI અનન્તરં શિમોન્ તત્સઙ્ગિનશ્ચ તસ્ય પશ્ચાદ્ ગતવન્તઃ।
XXXVII તદુદ્દેશં પ્રાપ્ય તમવદન્ સર્વ્વે લોકાસ્ત્વાં મૃગયન્તે।
XXXVIII તદા સોઽકથયત્ આગચ્છત વયં સમીપસ્થાનિ નગરાણિ યામઃ, યતોઽહં તત્ર કથાં પ્રચારયિતું બહિરાગમમ્।
XXXIX અથ સ તેષાં ગાલીલ્પ્રદેશસ્ય સર્વ્વેષુ ભજનગૃહેષુ કથાઃ પ્રચારયાઞ્ચક્રે ભૂતાનત્યાજયચ્ચ।
XL અનન્તરમેકઃ કુષ્ઠી સમાગત્ય તત્સમ્મુખે જાનુપાતં વિનયઞ્ચ કૃત્વા કથિતવાન્ યદિ ભવાન્ ઇચ્છતિ તર્હિ માં પરિષ્કર્ત્તું શક્નોતિ।
XLI તતઃ કૃપાલુ ર્યીશુઃ કરૌ પ્રસાર્ય્ય તં સ્પષ્ટ્વા કથયામાસ
XLII મમેચ્છા વિદ્યતે ત્વં પરિષ્કૃતો ભવ। એતત્કથાયાઃ કથનમાત્રાત્ સ કુષ્ઠી રોગાન્મુક્તઃ પરિષ્કૃતોઽભવત્।
XLIII તદા સ તં વિસૃજન્ ગાઢમાદિશ્ય જગાદ

XLIV સાવધાનો ભવ કથામિમાં કમપિ મા વદ; સ્વાત્માનં યાજકં દર્શય, લોકેભ્યઃ સ્વપરિષ્કૃતેઃ પ્રમાણદાનાય મૂસાનિર્ણીતં યદ્દાનં તદ્દુત્સૃજસ્વ ચ।
XLV કિન્તુ સ ગત્વા તત્ કર્મ્મ ઇત્થં વિસ્તાર્ય્ય પ્રચારયિતું પ્રારેભે તેનૈવ યીશુઃ પુનઃ સપ્રકાશં નગરં પ્રવેષ્ટું નાશક્નોત્ તતોહેતોર્બહિઃ કાનનસ્થાને તસ્યૌ; તથાપિ ચતુર્દ્દિગ્ભ્યો લોકાસ્તસ્ય સમીપમાયયુઃ।

# II

I તદનન્તરં યીશૌ કતિપયદિનાનિ વિલમ્બ્ય પુનઃ કફર્નાહૂમ્નગરં પ્રવિષ્ટે સ ગૃહ આસ્ત ઇતિ કિંવદન્ત્યા તત્ક્ષણં તત્સમીપં બહવો લોકા આગત્ય સમુપતસ્થુઃ,
II તસ્માદ્ ગૃહમધ્યે સર્વ્વેષાં કૃતે સ્થાનં નાભવદ્ દ્વારસ્ય ચતુર્દિક્ષ્વપિ નાભવત્, તત્કાલે સ તાન્ પ્રતિ કથાં પ્રચારયાઞ્ચક્રે।
III તતઃ પરં લોકાશ્ચતુર્ભિ ર્માનવૈરેકં પક્ષાઘાતિનં વાહયિત્વા તત્સમીપમ્ આનિન્યુઃ।
IV કિન્તુ જનાનાં બહુત્વાત્ તં યીશોઃ સમ્મુખમાનેતું ન શક્નુવન્તો યસ્મિન્ સ્થાને સ આસ્તે તદુપરિગૃહપૃષ્ઠં ખનિત્વા છિદ્રં કૃત્વા તેન માર્ગેણ સશય્યં પક્ષાઘાતિનમ્ અવરોહયામાસુઃ।
V તતો યીશુસ્તેષાં વિશ્વાસં દૃષ્ટ્વા તં પક્ષાઘાતિનં બભાષે હે વત્સ તવ પાપાનાં માર્જનં ભવતુ।
VI તદા કિયન્તોઽધ્યાપકાસ્તત્રોપવિશન્તો મનોભિ ર્વિતર્કયાઞ્ચક્રુઃ, એષ મનુષ્ય એતાદૃશીમીશ્વરનિન્દાં કથાં કુતઃ કથયતિ?
VII ઈશ્વરં વિના પાપાનિ માર્ષ્ટું કસ્ય સામર્થ્યમ્ આસ્તે?
VIII ઇત્થં તે વિતર્કયન્તિ યીશુસ્તત્ક્ષણં મનસા તદ્ બુદ્ધ્વા તાનવદદ્ યૂયમન્તઃકરણૈઃ કુત એતાનિ વિતર્કયથ?
IX તદનન્તરં યીશુસ્તત્સ્થાનાત્ પુનઃ સમુદ્રતટં યયૌ; લોકનિવહે તત્સમીપમાગતે સ તાન્ સમુપદિદેશ।
X કિન્તુ પૃથિવ્યાં પાપાનિ માર્ષ્ટું મનુષ્યપુત્રસ્ય સામર્થ્યમસ્તિ, એતદ્ યુષ્માન્ જ્ઞાપયિતું (સ તસ્મૈ પક્ષાઘાતિને કથયામાસ)
XI ઉત્તિષ્ઠ તવ શય્યાં ગૃહીત્વા સ્વગૃહં યાહિ, અહં ત્વામિદમ્ આજ્ઞાપયામિ।
XII તતઃ સ તત્ક્ષણમ્ ઉત્થાય શય્યાં ગૃહીત્વા સર્વ્વેષાં સાક્ષાત્ જગામ; સર્વ્વે વિસ્મિતા એતાદૃશં કર્મ્મ વયમ્ કદાપિ નાપશ્યામ, ઇમાં કથાં કથયિત્વેશ્વરં ધન્યમબ્રુવન્।
XIII તદનન્તરં યીશુસ્તત્સ્થાનાત્ પુનઃ સમુદ્રતટં યયૌ; લોકનિવહે તત્સમીપમાગતે સ તાન્ સમુપદિદેશ।
XIV અથ ગચ્છન્ કરસઞ્ચયગૃહ ઉપવિષ્ટમ્ આલ્ફીયપુત્રં લેવિં દૃષ્ટ્વા તમાહૂય કથિતવાન્ મત્પશ્ચાત્ ત્વામામચ્છ તતઃ સ ઉત્થાય તત્પશ્ચાદ્ યયૌ।
XV અનન્તરં યીશૌ તસ્ય ગૃહે ભોક્તુમ્ ઉપવિષ્ટે બહવઃ કરમઞ્ચાયિનઃ પાપિનશ્ચ તેન તચ્છિષ્યૈશ્ચ સહોપવિવિશુઃ, યતો બહવસ્તત્પશ્ચાદાજગ્મુઃ।
XVI તદા સ કરમઞ્ચાયિભિઃ પાપિભિશ્ચ સહ ખાદતિ, તદ્ દૃષ્ટ્વાધ્યાપકાઃ ફિરૂશિનશ્ચ તસ્ય શિષ્યાનૂચુઃ કરમઞ્ચાયિભિઃ પાપિભિશ્ચ સહાયં કુતો ભુંક્તે પિવતિ ચ?
XVII તદ્વાક્યં શ્રુત્વા યીશુઃ પ્રત્યુવાચ,અરોગિલોકાનાં ચિકિત્સકેન પ્રયોજનં નાસ્તિ, કિન્તુ રોગિણામેવ; અહં ધાર્મ્મિકાનાહ્વાતું નાગતઃ કિન્તુ મનો વ્યાવર્ત્તયિતું પાપિન એવ।
XVIII તતઃ પરં યોહનઃ ફિરૂશિનાઞ્ચોપવાસાચારિશિષ્યા યીશોઃ સમીપમ્ આગત્ય કથયામાસુઃ, યોહનઃ ફિરૂશિનાઞ્ચ શિષ્યા ઉપવસન્તિ કિન્તુ ભવતઃ શિષ્યા નોપવસન્તિ કિં કારણમસ્ય?
XIX તદા યીશુસ્તાન્ બભાષે યાવત્ કાલં સખિભિઃ સહ કન્યાયા વરસ્તિષ્ઠતિ તાવત્કાલં તે કિમુપવસ્તું શક્નુવન્તિ? યાવત્કાલં વરસ્તૈઃ સહ તિષ્ઠતિ તાવત્કાલં ત ઉપવસ્તું ન શક્નુવન્તિ।
XX યસ્મિન્ કાલે તેભ્યઃ સકાશાદ્ વરો નેષ્યતે સ કાલ આગચ્છતિ, તસ્મિન્ કાલે તે જના ઉપવત્સ્યન્તિ।
XXI કોપિ જનઃ પુરાતનવસ્ત્રે નૂતનવસ્ત્રં ન સીવ્યતિ, યતો નૂતનવસ્ત્રેણ સહ સેવને કૃતે જીર્ણં વસ્ત્રં છિદ્યતે તસ્માત્ પુન ર્મહત્ છિદ્રં જાયતે।
XXII કોપિ જનઃ પુરાતનકુતૂષુ નૂતનં દ્રાક્ષારસં ન સ્થાપયતિ, યતો નૂતનદ્રાક્ષારસસ્ય તેજસા તાઃ કુત્વો વિદીર્ય્યન્તે તતો દ્રાક્ષારસશ્ચ પતતિ કુત્વશ્ચ નશ્યન્તિ, અતએવ નૂતનદ્રાક્ષારસો નૂતનકુતૂષુ સ્થાપનીયઃ।
XXIII તદનન્તરં યીશુ ર્યદા વિશ્રામવારે શસ્યક્ષેત્રેણ ગચ્છતિ તદા તસ્ય શિષ્યા ગચ્છન્તઃ શસ્યમઞ્જરીશ્છેત્તું પ્રવૃત્તાઃ।
XXIV અતઃ ફિરૂશિનો યીશવે કથયામાસુઃ પશ્યતુ વિશ્રામવાસરે યત્ કર્મ્મ ન કર્ત્તવ્યં તદ્ ઇમે કુતઃ કુર્વ્વન્તિ?
XXV તદા સ તેભ્યોઽકથયત્ દાયૂદ્ તત્સંઙ્ગિનશ્ચ ભક્ષ્યાભાવાત્ ક્ષુધિતાઃ સન્તો યત્ કર્મ્મ કૃતવન્તસ્તત્ કિં યુષ્માભિ ર્ન પઠિતમ્?
XXVI અબિયાથર્નામકે મહાયાજકતાં કુર્વ્વતિ સ કથમીશ્વરસ્યાવાસં પ્રવિશ્ય યે દર્શનીયપૂપા યાજકાન્ વિનાન્યસ્ય કસ્યાપિ ન ભક્ષ્યાસ્તાનેવ બુભુજે સઙ્ગિલોકેભ્યોઽપિ દદૌ।
XXVII સોઽપરમપિ જગાદ, વિશ્રામવારો મનુષ્યાર્થમેવ નિરૂપિતોઽસ્તિ કિન્તુ મનુષ્યો વિશ્રામવારાર્થં નૈવ।
XXVIII મનુષ્યપુત્રો વિશ્રામવારસ્યાપિ પ્રભુરાસ્તે।

# III

I અનન્તરં યીશુઃ પુન ર્ભજનગૃહં પ્રવિષ્ટસ્તસ્મિન્ સ્થાને શુષ્કહસ્ત એકો માનવ આસીત્।
II સ વિશ્રામવારે તમરોગિણં કરિષ્યતિ નવેત્યત્ર બહવસ્તમ્ અપવદિતું છિદ્રમપેક્ષિતવન્તઃ।
III તદા સ તં શુષ્કહસ્તં મનુષ્યં જગાદ મધ્યસ્થાને ત્વમુત્તિષ્ઠ।
IV તતઃ પરં સ તાન્ પપ્રચ્છ વિશ્રામવારે હિતમહિતં તથા હિ પ્રાણરક્ષા વા પ્રાણનાશ એષાં મધ્યે કિં કરણીયં ? કિન્તુ તે નિઃશબ્દાસ્તસ્થુઃ।
V તદા સ તેષામન્તઃકરણાનાં કાઠિન્યાદ્ધેતો ર્દુઃખિતઃ ક્રોધાત્ ચર્તુિદશો દૃષ્ટવાન્ તં માનુષં ગદિતવાન્ તં હસ્તં વિસ્તારય, તતસ્તેન હસ્તે વિસ્તૃતે તદ્ધસ્તોઽન્યહસ્તવદ્ અરોગો જાતઃ।

VI અથ ફિરૂશિનઃ પ્રસ્થાય તં નાશયિતું હેરોદીયૈઃ સહ મન્ત્રયિતુમારેભિરે।

VII અતએવ યીશુસ્તત્સ્થાનં પરિત્યજ્ય શિષ્યૈઃ સહ પુનઃ સાગરસમીપં ગતઃ;

VIII તતો ગાલીલ્યિહૂદા-યિરૂશાલમ્-ઇદોમ્-યર્દન્નદીપારસ્થાનેભ્યો લોકસમૂહસ્તસ્ય પશ્ચાદ્ ગતઃ; તદન્યઃ સોરસીદનોઃ
સમીપવાસિલોકસમૂહશ્ચ તસ્ય મહાકર્મ્મણાં વાર્ત્તં શ્રુત્વા તસ્ય સન્નિધિમાગતઃ।

IX તદા લોકસમૂહશ્ચેત્ તસ્યોપરિ પતતિ ઇત્યાશઙ્ક્ય સ નાવમેકાં નિકટે સ્થાપયિતું શિષ્યાનાદિષ્ટવાન્।

X યતોઽનેકમનુષ્યાણામારોગ્યકરણાદ્ વ્યાધિગ્રસ્તાઃ સર્વ્વે તં સ્પ્રષ્ટું પરસ્પરં બલેન યત્નવન્તઃ।

XI અપરઞ્ચ અપવિત્રભૂતાસ્તં દૃષ્ટ્વા તચ્ચરણયોઃ પતિત્વા પ્રોચૈઃ પ્રોચુઃ, ત્વમીશ્વરસ્ય પુત્રઃ।

XII કિન્તુ સ તાન્ દૃઢમ્ આજ્ઞાપ્ય સ્વં પરિચાયિતું નિષિદ્ધવાન્।

XIII અનન્તરં સ પર્વ્વતમારુહ્ય યં યં પ્રતિચ્છા તં તમાહૂતવાન્ તતસ્તે તત્સમીપમાગતાઃ।

XIV તદા સ દ્વાદશજનાન્ સ્વેન સહ સ્થાતું સુસંવાદપ્રચારાય પ્રેરિતા ભવિતું

XV સર્વ્વપ્રકારવ્યાધીનાં શમનકરણાય પ્રભાવં પ્રાપ્તું ભૂતાન્ ત્યાજયિતુઞ્ચ નિયુક્તવાન્।

XVI તેષાં નામાનીમાનિ, શિમોન્ સિવદિપુત્રો

XVII યાકૂબ્ તસ્ય ભ્રાતા યોહન્ ચ આન્દ્રિયઃ ફિલિપો બર્થલમયઃ,

XVIII મથી થોમા ચ આલ્ફીયપુત્રો યાકૂબ્ થદ્દીયઃ કિનાનીયઃ શિમોન્ યસ્તં પરહસ્તેષ્વર્પયિષ્યતિ સ ઈષ્કરિયોતીયયિહૂદાશ્ચ।

XIX સ શિમોને પિતર ઇત્યુપનામ દદૌ યાકૂબ્યોહન્ભ્યાં ચ બિનેરિગિશ્ અર્થતો મેઘનાદપુત્રાવિત્યુપનામ દદૌ।

XX અનન્તરં તે નિવેશનં ગતાઃ, કિન્તુ તત્રાપિ પુનર્મહાન્ જનસમાગમો ઽભવત્ તસ્માત્તે ભોક્તુમપ્યવકાશં ન પ્રાપ્તાઃ।

XXI તતસ્તસ્ય સુહૃલ્લોકા ઇમાં વાર્ત્તાં પ્રાપ્ય સ હતજ્ઞાનોભૂદ્ ઇતિ કથાં કથયિત્વા તં ધૃત્વાનેતું ગતાઃ।

XXII અપરઞ્ચ યિરૂશાલમ આગતા યે યેઽધ્યાપકાસ્તે જગદુરયં પુરુષો ભૂતપત્યાબિષ્ટસ્તેન ભૂતપતિના ભૂતાન્ ત્યાજયતિ।

XXIII તતસ્તાનાહૂય યીશુ દૃષ્ટાન્તૈઃ કથાં કથિતવાન્ શૈતાન્ કથં શૈતાનં ત્યાજયિતું શક્નોતિ?

XXIV કિઞ્ચન રાજ્યં યદિ સ્વવિરોધેન પૃથગ્ ભવતિ તર્હિ તદ્ રાજ્યં સ્થિરં સ્થાતું ન શક્નોતિ।

XXV તથા કસ્યાપિ પરિવારો યદિ પરસ્પરં વિરોધી ભવતિ તર્હિ સોપિ પરિવારઃ સ્થિરં સ્થાતું ન શક્નોતિ।

XXVI તદ્વત્ શૈતાન્ યદિ સ્વવિપક્ષતયા ઉત્તિષ્ઠન્ ભિન્નો ભવતિ તર્હિ સોપિ સ્થિરં સ્થાતું ન શક્નોતિ કિન્તૂચ્છિન્નો ભવતિ।

XXVII અપરઞ્ચ પ્રબલં જનં પ્રથમં ન બદ્ધા કોપિ તસ્ય ગૃહં પ્રવિશ્ય દ્રવ્યાણિ લુણ્ઠયિતું ન શક્નોતિ, તં બદ્ધ્વૈવ તસ્ય ગૃહસ્ય
દ્રવ્યાણિ લુણ્ઠયિતું શક્નોતિ।

XXVIII અતોહેતો ર્યુષ્મભ્યમહં સત્યં કથયામિ મનુષ્યાણાં સન્તાના યાનિ યાનિ પાપાનીશ્વરનિન્દાઞ્ચ કુર્વ્વન્તિ તેષાં
તત્સર્વ્વેષામપરાધાનાં ક્ષમા ભવિતું શક્નોતિ,

XXIX કિન્તુ યઃ કશ્ચિત્ પવિત્રમાત્માનં નિન્દતિ તસ્યાપરાધસ્ય ક્ષમા કદાપિ ન ભવિષ્યતિ સોનન્તદણ્ડસ્યાર્હો ભવિષ્યતિ।

XXX તસ્યાપવિત્રભૂતોઽસ્તિ તેષામેતત્કથાહેતોઃ સ ઇત્થં કથિતવાન્।

XXXI અથ તસ્ય માતા ભ્રાતૃગણશ્ચાગત્ય બહિસ્તિષ્ઠન્તો લોકાન્ પ્રેષ્ય તમાહૂતવન્તઃ।

XXXII તતસ્તત્સન્નિધૌ સમુપવિષ્ટા લોકાસ્તં બભાષિરે પશ્ય બહિસ્તવ માતા ભ્રાતરશ્ચ ત્વામ્ અન્વિચ્છન્તિ।

XXXIII તદા સ તાન્ પ્રત્યુવાચ મમ માતા કા ભ્રાતરો વા કે? તતઃ પરં સ સ્વમીપોપવિષ્ટાન્ શિષ્યાન્ પ્રતિ અવલોકનં કૃત્વા
કથયામાસ

XXXIV પશ્યતૈતે મમ માતા ભ્રાતરશ્ચ।

XXXV યઃ કશ્ચિદ્ ઈશ્વરસ્યેષ્ટાં ક્રિયાં કરોતિ સ એવ મમ ભ્રાતા ભગિની માતા ચ।

# IV

I અનન્તરં સ સમુદ્રતટે પુનરુપદેષ્ટું પ્રારેભે, તતસ્તત્ર બહુજનાનાં સમાગમાત્ સ સાગરોપરિ નૌકામારુહ્ય સમુપવિષ્ટઃ; સર્વ્વે લોકાઃ
સમુદ્રકૂલે તસ્થુઃ।

II તદા સ દૃષ્ટાન્તકથાભિ ર્બહૂપદિષ્ટવાન્ ઉપદિશંશ્ચ કથિતવાન્,

III અવધાનં કુરુત, એકો બીજવપ્તા બીજાનિ વપ્તું ગતઃ;

IV વપનકાલે કિયન્તિ બીજાનિ માર્ગપાશ્વે પતિતાનિ, તત આકાશીયપક્ષિણ એત્ય તાનિ ચખાદુઃ।

V કિયન્તિ બીજાનિ સ્વલ્પમૃત્તિકાવત્પાષાણભૂમૌ પતિતાનિ તાનિ મૃદોલ્પત્વાત્ શીઘ્રમઙ્કુરિતાનિ;

VI કિન્તૂદિતે સૂર્ય્યે દગ્ધાનિ તથા મૂલાનો નાધોગતત્વાત્ શુષ્કાણિ ચ।

VII કિયન્તિ બીજાનિ કણ્ટકિવનમધ્યે પતિતાનિ તતઃ કણ્ટકાનિ સંવૃદ્ધ્ય તાનિ જગ્રસુસ્તાનિ ન ચ ફલિતાનિ।

VIII તથા કિયન્તિ બીજાન્યુત્તમભૂમૌ પતિતાનિ તાનિ સંવૃદ્ધ્ય ફલાન્યુત્પાદિતાનિ કિયન્તિ બીજાનિ ત્રિંશદ્ગુણાનિ કિયન્તિ
ષષ્ટિગુણાનિ કિયન્તિ શતગુણાનિ ફલાનિ ફલિતવન્તિ।

IX અથ સ તાનવદત્ યસ્ય શ્રોતું કર્ણૌ સ્તઃ સ શૃણોતુ।

X તદનન્તરં નિર્જનસમયે તત્સઙ્ગિનો દ્વાદશશિષ્યાશ્ચ તં તદ્દૃષ્ટાન્તવાક્યસ્યાર્થં પપ્રચ્છુઃ।

XI તદા સ તાનુદિતવાન્ ઈશ્વરરાજ્યસ્ય નિગૂઢવાક્યં બોદ્ધું યુષ્માકમધિકારોઽસ્તિ;

XII કિન્તુ યે વહિર્ભૂતાઃ "તે પશ્યન્તઃ પશ્યન્તિ કિન્તુ ન જાનન્તિ, શૃણ્વન્તઃ શૃણ્વન્તિ કિન્તુ ન બુધ્યન્તે, ચેત્તૈ ર્મનઃસુ કદાપિ
પરિવર્ત્તિતેષુ તેષાં પાપાન્યમોચયિષ્યન્ત," અતોહેતોસ્તાન્ પ્રતિ દૃષ્ટાન્તૈરેવ તાનિ મયા કથિતાનિ।

XIII અથ સ કથિતવાન્ યૂયં કિમેતદ્ દૃષ્ટાન્તવાક્યં ન બુધ્યધ્વે? તર્હિ કથં સર્વ્વાન્ દૃષ્ટાન્તાન ભોત્સ્યધ્વે?

XIV બીજવપ્તા વાક્યરૂપાણિ બીજાનિ વપતિ;

XV તત્ર યે યે લોકા વાક્યં શૃણ્વન્તિ, કિન્તુ શ્રુતમાત્રાત્ શૈતાન્ શીઘ્રમાગત્ય તેષાં મનઃસૂપ્તાનિ તાનિ વાક્યરૂપાણિ બીજાન્યપનયતિ
તએવ ઉપ્તબીજમાર્ગપાર્શ્વસ્વરૂપાઃ।
XVI યે જના વાક્યં શ્રુત્વા સહસા પરમાનન્દેન ગૃહ્લન્તિ, કિન્તુ હૃદિ સ્થૈર્ય્યાભાવાત્ કિઞ્ચિત્ કાલમાત્રં તિષ્ઠન્તિ તત્પશ્ચાત્
તદ્વાક્યહેતોઃ
XVII કુત્રચિત્ ક્લેશે ઉપદ્રવે વા સમુપસ્થિતે તદૈવ વિઘ્નં પ્રાપ્નુવન્તિ તએવ ઉપ્તબીજપાષાણભૂમિસ્વરૂપાઃ।
XVIII યે જનાઃ કથાં શૃણ્વન્તિ કિન્તુ સાંસારિકી ચિન્તા ધનભ્રાન્તિ ર્વિષયલોભશ્ચ એતે સર્વ્વે ઉપસ્થાય તાં કથાં ગ્રસન્તિ તતઃ મા
વિફલા ભવતિ
XIX તએવ ઉપ્તબીજસકણ્ટકભૂમિસ્વરૂપાઃ।
XX યે જના વાક્યં શ્રુત્વા ગૃહ્લન્તિ તેષાં કસ્ય વા ત્રિંશદ્ગુણાનિ કસ્ય વા ષષ્ટિગુણાનિ કસ્ય વા શતગુણાનિ ફલાનિ ભવન્તિ તએવ
ઉપ્તબીજોર્વ્વરભૂમિસ્વરૂપાઃ।
XXI તદા સોઽપરમપિ કથિતવાન્ કોપિ જનો દીપાધારં પરિત્યજ્ય દ્રોણસ્યાધઃ ખટ્વાયા અધે વા સ્થાપયિતું દીપમાનયતિ કિં?
XXII અતોહેતો ર્યન્ન પ્રકાશયિષ્યતે તાદૃગ્ લુક્કાયિતં કિમપિ વસ્તુ નાસ્તિ; યદ્ વ્યક્તં ન ભવિષ્યતિ તાદૃશં ગુપ્તં કિમપિ વસ્તુ
નાસ્તિ।
XXIII યસ્ય શ્રોતું કર્ણૌ સ્તઃ સ શૃણોતુ।
XXIV અપરમપિ કથિતવાન્ યૂયં યદ્ યદ્ વાક્યં શૃણુથ તત્ર સાવધાના ભવત, યતો યૂયં યેન પરિમાણેન પરિમાથ તેનૈવ પરિમાણેન
યુષ્મદર્થમપિ પરિમાસ્યતે; શ્રોતારો યૂયં યુષ્મભ્યમધિકં દાસ્યતે।
XXV યસ્યાશ્રયે વર્દ્ધતે તસ્મૈ અપરમપિ દાસ્યતે, કિન્તુ યસ્યાશ્રયે ન વર્દ્ધતે તસ્ય યત્ કિઞ્ચિદસ્તિ તદપિ તસ્માન્ નેષ્યતે।
XXVI અનન્તરં સ કથિતવાન્ એકો લોકઃ ક્ષેત્રે બીજાન્યુપ્ત્વા
XXVII જાગરણનિદ્રાભ્યાં દિવાનિશં ગમયતિ, પરન્તુ તદ્બીજં તસ્યાજ્ઞાતરૂપેણાઙ્કુરયતિ વર્દ્ધતે ચ;
XXVIII યતોહેતોઃ પ્રથમતઃ પત્રાણિ તતઃ પરં કણિશાનિ તત્પશ્ચાત્ કણિશપૂર્ણાનિ શસ્યાનિ ભૂમિઃ સ્વયમુત્પાદયતિ;
XXIX કિન્તુ ફલેષુ પક્કેષુ શસ્યચ્છેદનકાલં જ્ઞાત્વા સ તત્ક્ષણં શસ્યાનિ છિનત્તિ, અનેન તુલ્યમીશ્વરરાજ્યં।
XXX પુનઃ સોઽકથયદ્ ઈશ્વરરાજ્યં કેન સમં? કેન વસ્તુના સહ વા તદુપમાસ્યામિ?
XXXI તત્ સર્ષપૈકેન તુલ્યં યતો મૃદિ વપનકાલે સર્ષપબીજં સર્વ્વપૃથિવીસ્થબીજાત્ ક્ષુદ્રં
XXXII કિન્તુ વપનાત્ પરમ્ અઙ્કુરયિત્વા સર્વ્વશાકાદ્ બૃહદ્ ભવતિ, તસ્ય બૃહત્યઃ શાખાશ્ચ જાયન્તે તતસ્તચ્છાયાં પક્ષિણ
આશ્રયન્તે।
XXXIII ઇત્થં તેષાં બોધાનુરૂપં સોઽનેકદૃષ્ટાન્તૈસ્તાનુપદિષ્ટવાન્,
XXXIV દૃષ્ટાન્તં વિના કામપિ કથાં તેભ્યો ન કથિતવાન્ પશ્ચાન્ નિર્જને સ શિષ્યાન્ સર્વ્વદૃષ્ટાન્તાર્થં બોધિતવાન્།
XXXV તદ્દિનસ્ય સન્ધ્યાયાં સ તેભ્યોઽકથયદ્ આગચ્છત વયં પારં યામ।
XXXVI તદા તે લોકાન્ વિસૃજ્ય તમવિલમ્બં ગૃહીત્વા નૌકયા પ્રતસ્થિરે; અપરા અપિ નાવસ્તયા સહ સ્થિતાઃ।
XXXVII તતઃ પરં મહાઝઞ્ભ્શગમાત્ નૌ ર્દોલાયમાના તરઙ્ગેણ જલૈઃ પૂર્ણાભવચ્ચ।
XXXVIII તદા સ નૌકાયશ્ચાદ્ભાગે ઉપધાને શિરો નિધાય નિદ્રિત આસીત્ તતસ્તે તં જાગરયિત્વા જગદુઃ, હે પ્રભો, અસ્માકં પ્રાણા
યાન્તિ કિમત્ર ભવતશ્ચિન્તા નાસ્તિ?
XXXIX તદા સ ઉત્થાય વાયું તર્જિતવાન્ સમુદ્રઞ્ચોક્તવાન્ શાન્તઃ સુસ્થિરશ્ચ ભવ; તતો વાયૌ નિવૃત્તેઽબ્ધિર્નિસ્તરઙ્ગોભૂત્།
XL તદા સ તાનુવાચ યૂયં કુત એતાદૃક્શઙ્કાકુલા ભવત? કિં વો વિશ્વાસો નાસ્તિ?
XLI તસ્માત્તેઽતીવભીતાઃ પરસ્પરં વક્તુમારેભિરે, અહો વાયુઃ સિન્ધુશ્ચાસ્ય નિદેશગ્રાહિણૌ કીદૃગયં મનુજઃ।

# V

I અથ તૂ સિન્ધુપારં ગત્વા ગિદેરીયપ્રદેશ ઉપતસ્થુઃ।
II નૌકાતો નિર્ગતમાત્રાદ્ અપવિત્રભૂતગ્રસ્ત એકઃ શ્મશાનાદેત્ય તં સાક્ષાચ્ ચકાર।
III સ શ્મશાનેઽવાત્સીત્ કોપિ તં શૃઙ્ખલેન બદ્ધ્વા સ્થાપયિતું નાશક્નોત્།
IV જનૈર્વારં નિગડૈઃ શૃઙ્ખલૈશ્ચ સ બદ્ધોપિ શૃઙ્ખલાન્યાકૃષ્ય મોચિતવાન્ નિગડાનિ ચ ભંક્ત્વા ખણ્ડં ખણ્ડં કૃતવાન્ કોપિ તં
વશીકર્ત્તું ન શશક।
V દિવાનિશં સદા પર્વ્વતં શ્મશાનઞ્ચ ભ્રમિત્વા ચીત્શબ્દં કૃતવાન્ ગ્રાવભિશ્ચ સ્વયં સ્વં કૃતવાન્།
VI સ યીશું દૂરાત્ પશ્યન્નેવ ધાવન્ તં પ્રણનામ ઉચૈરુવંશ્ચોવાચ,
VII હે સર્વ્વોપરિસ્થેશ્વરપુત્ર યીશો ભવતા સહ મે કઃ સમ્બન્ધઃ? અહં ત્વામીશ્વરેણ શાપયે માં મા યાતય।
VIII યતો યીશુસ્તં કથિતવાન્ રે અપવિત્રભૂત, અસ્માન્નરાદ્ બહિર્નિર્ગચ્છ।
IX અથ સ તં પૃષ્ટવાન્ કિન્તે નામ? તેન પ્રત્યુક્તં વયમનેકે ઽસ્મસ્તતોઽસ્મન્નામ બાહિની।
X તતોસ્માન્ દેશાન્ન પ્રેષયેતિ તે તં પ્રાર્થયન્ત।
XI તદાનીં પર્વ્વતં નિકષા બૃહન્ વરાહવ્રજશ્ચરન્નાસીત્།
XII તસ્માદ્ ભૂતા વિનયેન જગદુઃ, અમું વરાહવ્રજમ્ આશ્રયિતુમ્ અસ્માન્ પ્રહિણુ।
XIII યીશુનાનુજ્ઞાતાસ્તેઽપવિત્રભૂતા બહિર્નિર્યાય વરાહવ્રજં પ્રાવિશન્ તતઃ સર્વ્વે વરાહા વસ્તુતસ્તુ પ્રાયોદ્વિસહસ્રસંઙ્ખ્યકાઃ
કટકેન મહાજવાદ્ ધાવન્તઃ સિન્ધૌ પ્રાણાન્ જહુઃ।
XIV તસ્માદ્ વરાહપાલકાઃ પલાયમાનાઃ પુરે ગ્રામે ચ તદ્વાર્ત્તં કથયાઞ્ચક્રુઃ। તદા લોકા ઘટિતં તત્કાર્ય્યં દ્રષ્ટું બહિર્જગ્મુઃ
XV યીશોઃ સન્નિધિં ગત્વા તં ભૂતગ્રસ્તમ્ અર્થાદ્ બાહિનીભૂતગ્રસ્તં નરં સવસ્ત્રં સચેતનં સમુપવિષ્ટઞ્ચ દૃ ષ્ટ્વા બિભ્યુઃ।
XVI તતો દૃષ્ટતત્કાર્ય્યલોકાસ્તસ્ય ભૂતગ્રસ્તનરસ્ય વરાહવ્રજસ્યાપિ તાં ઘટનાં વર્ણયામાસુઃ।

XVII તતસ્તે સ્વસીમાતો બહિર્ગન્તું યીશું વિનેતુમારેભિરે।
XVIII અથ તસ્ય નૌકારોહણકાલે સ ભૂતમુક્તો ના યીશુના સહ સ્થાતું પ્રાર્થયતે;
XIX કિન્તુ સ તમનનુમત્ય કથિતવાન્ ત્વં નિજાત્મીયાનાં સમીપં ગૃહઞ્ચ ગચ્છ પ્રભુસ્ત્વયિ કૃપાં કૃત્વા યાનિ કર્મ્માણિ કૃતવાન્ તાનિ
તાન્ જ્ઞાપય।
XX અતઃ સ પ્રસ્થાય યીશુના કૃતં તત્સર્વ્વાશ્ચર્ય્યં કર્મ્મ દિકાપલિદેશે પ્રચારયિતું પ્રારબ્ધવાન્ તતઃ સર્વ્વે લોકા આશ્ચર્ય્યં મેનિરે।
XXI અનન્તરં યીશૌ નાવા પુનરન્યપાર ઉત્તીર્ણે સિન્ધુતટે ચ તિષ્ઠતિ સતિ તત્સમીપે બહુલોકાનાં સમાગમોઽભૂત્।
XXII અપરં યાયીર્ નામ્ના કશ્ચિદ્ ભજનગૃહસ્યાધિપ આગત્ય તં દૃષ્ટ્વૈવ ચરણયોઃ પતિત્વા બહુ નિવેદ્ય કથિતવાન્;
XXIII મમ કન્યા મૃતપ્રાયાભૂદ્ અતો ભવાનેત્ય તદારોગ્યાય તસ્યા ગાત્રે હસ્તમ્ અર્પયતુ તેનૈવ સા જીવિષ્યતિ।
XXIV તદા યીશુસ્તેન સહ ચલિતઃ કિન્તુ તત્પશ્ચાદ્ બહુલોકાશ્ચલિત્વા તાદ્ગાત્રે પતિતાઃ।
XXV અથ દ્વાદશવર્ષાણિ પ્રદરરોગેણ
XXVI શીર્ણા ચિકિત્સકાનાં નાનાચિકિત્સાભિશ્ચ દુઃખં ભુક્તવતી ચ સર્વ્વસ્વં વ્યયિત્વાપિ નારોગ્યં પ્રાપ્તા ચ પુનરપિ પીડિતાસીચ્ચ
XXVII યા સ્ત્રી સા યીશો ર્વાર્ત્તાં પ્રાપ્ય મનસાકથયત્ યદ્યહં તસ્ય વસ્ત્રમાત્ર સ્પ્રષ્ટું લભેયં તદા રોગહીના ભવિષ્યામિ।
XXVIII અતોહેતોઃ સા લોકારણ્યમધ્યે તત્પશ્ચાદાગત્ય તસ્ય વસ્ત્રં પસ્પર્શ।
XXIX તેનૈવ તત્ક્ષણં તસ્યા રક્તસ્રોતઃ શુષ્કં સ્વયં તસ્માદ્ રોગાન્મુક્તા ઇત્યપિ દેહેઽનુભૂતા।
XXX અથ સ્વસ્માત્ શક્તિ ર્નિર્ગતા યીશુરેતન્મનસા જ્ઞાત્વા લોકનિવહં પ્રતિ મુખં વ્યાવૃત્ય પૃષ્ટવાન્ કેન મદ્વસ્ત્રં સ્પૃષ્ટં?
XXXI તતસ્તસ્ય શિષ્યા ઊચુઃ ભવતો વપુષિ લોકાઃ સંઘર્ષન્તિ તદ્ દૃષ્ટ્વા કેન મદ્વસ્ત્રં સ્પૃષ્ટમિતિ કુતઃ કથયતિ?
XXXII કિન્તુ કેન તત્ કર્મ્મ કૃતં તદ્ દ્રષ્ટું યીશુશ્ચતુર્દિશો દૃષ્ટવાન્।
XXXIII તતઃ સા સ્ત્રી ભીતા કમ્પિતા ચ સતી સ્વસ્યા રુક્પ્રતિક્રિયા જાતેતિ જ્ઞાત્વાગત્ય તત્સમ્મુખે પતિત્વા સર્વ્વવૃત્તાન્તં સત્યં
તસ્મૈ કથયામાસ।
XXXIV તદાનીં યીશુસ્તાં ગદિતવાન્, હે કન્યે તવ પ્રતીતિસ્ત્વામ્ અરોગામકરોત્ ત્વં ક્ષેમેણ વ્રજ સ્વરોગાન્મુક્તા ચ તિષ્ઠ।
XXXV ઇતિવાક્યવદનકાલે ભજનગૃહાધિપસ્ય નિવેશનાલ્ લોકા એત્યાધિપં બભાષિરે તવ કન્યા મૃતા તસ્માદ્ ગુરું પુનઃ કુતઃ
ક્લિશ્નાસિ?
XXXVI કિન્તુ યીશુસ્તદ્ વાક્યં શ્રુત્વૈવ ભજનગૃહાધિપં ગદિતવાન્ મા ભૈષીઃ કેવલં વિશ્વાસિહિ।
XXXVII અથ પિતરો યાકૂબ્ તદ્ભ્રાતા યોહન્ ચ એતાન્ વિના કમપિ સ્વપશ્ચાદ્ યાતું નાન્વમન્યત।
XXXVIII તસ્ય ભજનગૃહાધિપસ્ય નિવેશનસમીપમ્ આગત્ય કલહં બહુરોદનં વિલાપઞ્ચ કુર્વ્વતો લોકાન્ દદર્શ।
XXXIX તસ્માન્ નિવેશનં પ્રવિશ્ય પ્રોક્તવાન્ યૂયં કુત ઇત્થં કલહં રોદનઞ્ચ કુરુથ? કન્યા ન મૃતા નિદ્રાતિ।
XL તસ્માત્તે તમુપજહસુઃ કિન્તુ યીશુઃ સર્વ્વાન બહિષ્કૃત્ય કન્યાયાઃ પિતરૌ સ્વસઙ્ગિનશ્ચ ગૃહીત્વા યત્ર કન્યાસીત્ તત્ સ્થાનં
પ્રવિષ્ટવાન્।
XLI અથ સ તસ્યાઃ કન્યાયા હસ્તૌ ધૃત્વા તાં બભાષે ટાલીથા કૂમી, અર્થતો હે કન્યે ત્વમુત્તિષ્ઠ ઇત્યાજ્ઞાપયામિ।
XLII તુનૈવ તત્ક્ષણં સા દ્વાદશવર્ષવયસ્કા કન્યા પોત્થાય ચલિતુમારેભે, ઇતઃ સર્વ્વે મહાવિસ્મયં ગતાઃ।
XLIII તત એતસ્યૈ કિઞ્ચિત્ ખાદ્યં દત્તેતિ કથયિત્વા એતત્કર્મ્મ કમપિ ન જ્ઞાપયતેતિ દૃઢમાદિષ્ટવાન્।

# VI

I અનન્તરં સ તત્સ્થાનાત્ પ્રસ્થાય સ્વપ્રદેશમાગતઃ શિષ્યાશ્ચ તત્પશ્ચાદ્ ગતાઃ।
II અથ વિશ્રામવારે સતિ સ ભજનગૃહે ઉપદેષ્ટુમારબ્ધવાન્ તતોઽનેકે લોકાસ્તત્કથાં શ્રુત્વા વિસ્મિત્ય જગદુઃ, અસ્ય મનુજસ્ય
ઈદૃશી આશ્ચર્ય્યક્રિયા કસ્માજ્ જાતા? તથા સ્વકરાભ્યામ્ ઇત્થમદ્ભુતં કર્મ્મ કર્ત્તુમ્ એતસ્મૈ કથં જ્ઞાનં દત્તમ્?
III કિમયં મરિયમઃ પુત્રસ્તક્ષા નો? કિમયં યાકૂબ્-યોસિ-યિહુદા-શિમોનાં ભ્રાતા નો? અસ્ય ભગિન્યઃ કિમિહાસ્માભિઃ સહ નો?
ઇત્થં તે તદર્થે પ્રત્યૂહં ગતાઃ।
IV તદા યીશુસ્તેભ્યોઽકથયત્ સ્વદેશં સ્વકુટુમ્બાન્ સ્વપરિજનાંશ્ચ વિના કુત્રાપિ ભવિષ્યદ્વાદી અસત્કૃતો ન ભવતિ।
V અપરઞ્ચ તેષામપ્રત્યયાત્ સ વિસ્મિતઃ કિયતાં રોગિણાં વપુઃષુ હસ્તમ્ અર્પયિત્વા કેવલં તેષામારોગ્યકરણાદ્ અન્યત્ કિમપિ
ચિત્રકાર્ય્યં કર્ત્તાં ન શક્તઃ।
VI અથ સ ચતુર્દિક્સ્થ ગ્રામાન્ ભ્રમિત્વા ઉપદિષ્ટવાન્
VII દ્વાદશશિષ્યાન્ આહૂય અમેધ્યભૂતાન્ વશીકર્ત્તાં શક્તિં દત્ત્વા તેષાં દ્વૌ દ્વૌ જનૌ પ્રેષિતવાન્।
VIII પુનરિત્યાદિશદ્ યૂયમ્ એકૈકાં યષ્ટિં વિના વસ્ત્રસંપુટઃ પૂપઃ કટિબન્ધે તામ્રખણ્ડઞ્ચ એષાં કિમપિ મા ગ્રહ્લીત,
IX માર્ગયાત્રાયૈ પાદેષૂપાનહૌ દત્ત્વા દ્વે ઉત્તરીયે મા પરિધદ્વ્વં।
X અપરમપ્યુક્તં તેન યૂયં યસ્યાં પુર્ય્યાં યસ્ય નિવેશનં પ્રવેક્ષ્યથ તાં પુરીં યાવન્ન ત્યક્ષ્યથ તાવત્ તન્નિવેશને સ્થાસ્યથ।
XI તત્ર યદિ કેપિ યુષ્માકમાતિથ્યં ન વિદધતિ યુષ્માકં કથાશ્ચ ન શૃણ્વન્તિ તર્હિ તત્સ્થાનાત્ પ્રસ્થાનસમયે તેષાં વિરુદ્ધં સાક્ષ્યં
દાતું સ્વપાદાનાસ્ફાલ્ય રજઃ સમ્પાતયત; અહં યુષ્માન્ યથાર્થં વચ્મિ વિચારદિને તન્નગરસ્યાવસ્થાતઃ સિદોમામોરયો ર્નગરયોરવસ્થા
સહ્યતરા ભવિષ્યતિ।
XII અથ તે ગત્વા લોકાનાં મનઃપરાવર્ત્તનીઃ કથા પ્રચારિતવન્તઃ।
XIII એવમનેકાન્ ભૂતાંશ્ચ ત્યાજિતવન્તસ્તથા તૈલેન મર્દ્દયિત્વા બહૂન્ જનાનરોગાનકાર્ષુઃ।
XIV ઇત્થં તસ્ય સુખ્યાતિશ્ચતુર્દિશો વ્યાપ્તા તદા હેરોદ્ રાજા તન્નિશમ્ય કથિતવાન્, યોહન્ મજ્જકઃ શ્મશાનાદ્ ઉત્થિત
અતોહેતોસ્તેન સર્વ્વા એતા અદ્ભુતક્રિયાઃ પ્રકાશન્તે।
XV અન્યેઽકથયન્ અયમ્ એલિયઃ, કેપિ કથિતવન્ત એષ ભવિષ્યદ્વાદી યદ્વા ભવિષ્યદ્વાદિનાં સદૃશ એકોયમ્।
XVI કિન્તુ હેરોદ્ ઇત્યાકર્ણ્ય ભાષિતવાન્ યસ્યાહં શિરશ્છિન્નવાન્ સ એવ યોહનયં સ શ્મશાનાદુદતિષ્ઠત્।

XVII પૂર્વ્વં સ્વભ્રાતુઃ ફિલિપસ્ય પત્ન્યા ઉદ્વાહં કૃતવન્તં હેરોદં યોહનવાદીત્ સ્વભાતૃવધૂ ર્ન વિવાહ્યા।
XVIII અતઃ કારણાત્ હેરોદ્ લોકં પ્રહિત્ય યોહનં ધૃત્વા બન્ધનાલયે બદ્ધવાન્।
XIX હેરોદિયા તસ્મૈ યોહને પ્રકુપ્ય તં હન્તુમ્ ઐચ્છત્ કિન્તુ ન શક્તા,
XX યસ્માદ્ હેરોદ્ તં ધાર્મ્મિકં સત્પુરુષઞ્ચ જ્ઞાત્વા સમ્મન્ય રક્ષિતવાન્; તત્કથાં શ્રુત્વા તદનુસારેણ બહૂનિ કર્મ્માણિ કૃતવાન્
હૃષ્ટમનાસ્તદુપદેશં શ્રુતવાંશ્ચ।
XXI કિન્તુ હેરોદ્ યદા સ્વજન્મદિને પ્રધાનલોકેભ્યઃ સેનાનીભ્યશ્ચ ગાલીલ્પ્રદેશીયશ્રેષ્ઠલોકેભ્યશ્ચ રાત્રૌ ભોજ્યમેકં કૃતવાન્
XXII તસ્મિન્ શુભદિને હેરોદિયાયાઃ કન્યા સમેત્ય તેષાં સમક્ષં સંનૃત્ય હેરોદસ્તેન સહોપવિષ્ટાનાઞ્ચ તોષમજીજનત્ તતા નૃપઃ
કન્યામાહ સ્મ મત્તો યદ્ યાચસે તદેવ તુભ્યં દાસ્યે।
XXIII શપથં કૃત્વાકથયત્ ચેદ્ રાજ્યાર્દ્ધમપિ યાચસે તદપિ તુભ્યં દાસ્યે।
XXIV તતઃ સા બહિ ર્ગત્વા સ્વમાતરં પપ્રચ્છ કિમહં યાચિષ્યે? તદા સાકથયત્ યોહનો મજ્જકસ્ય શિરઃ।
XXV અથ તૂર્ણં ભૂપસમીપમ્ એત્ય યાચમાનાવદત્ ક્ષણેસ્મિન્ યોહનો મજ્જકસ્ય શિરઃ પાત્રે નિધાય દેહિ, એતદ્ યાચેઽહં।
XXVI તસ્માત્ ભૂપોઽતિદુઃખિતઃ, તથાપિ સ્વશપથસ્ય સહભોજિનાઞ્ચાનુરોધાત્ તદનઙ્ગીકર્ત્તું ન શક્તઃ।
XXVII તત્ક્ષણં રાજા ઘાતકં પ્રેષ્ય તસ્ય શિર આનેતુમાદિષ્ટવાન્।
XXVIII તતઃ સ કારાગારં ગત્વા તચ્છિરશ્છિત્વા પાત્રે નિધાયાનીય તસ્યૈ કન્યાયૈ દત્તવાન્ કન્યા ચ સ્વમાત્રે દદૌ।
XXIX અનન્તરં યોહનઃ શિષ્યાસ્તદ્વાર્ત્તાં પ્રાપ્યાગત્ય તસ્ય કુણપં શ્મશાનેઽસ્થાપયન્।
XXX અથ પ્રેષિતા યીશોઃ સન્નિધૌ મિલિતા યદ્ યચ્ ચક્રુઃ શિક્ષયામાસુશ્ચ તત્સર્વ્વવાર્ત્તાસ્તસ્મૈ કથિતવન્તઃ।
XXXI સ તાનુવાચ યૂયં વિજનસ્થાનં ગત્વા વિશ્રામ્યત યતસ્તત્સન્નિધૌ બહુલોકાનાં સમાગમાત્ તે ભોક્તું નાવકાશં પ્રાપ્તાઃ।
XXXII તતસ્તે નાવા વિજનસ્થાનં ગુપ્તં ગગ્મુઃ।
XXXIII તતો લોકનિવહસ્તેષાં સ્થાનાન્તરયાનં દદર્શ, અનેકે તં પરિચિત્ય નાનાપુરેભ્યઃ પદૈર્વ્રજિત્વા જવેન તૈષામગ્રે યીશોઃ સમીપ
ઉપતસ્થુઃ।
XXXIV તદા યીશુ ર્નાવો બહિર્ગત્ય લોકારણ્યાનીં દૃષ્ટ્વા તેષુ કરુણાં કૃતવાન્ યતસ્તેઽરક્ષકમેષા ઇવાસન્ તદા સ તાન નાનાપ્રસઙ્ગાન્
ઉપદિષ્ટવાન્।
XXXV અથ દિવાન્તે સતિ શિષ્યા એત્ય યીશુમૂચિરે, ઇદં વિજનસ્થાનં દિનઞ્ચાવસન્નં।
XXXVI લોકાનાં કિમપિ ખાદ્યં નાસ્તિ, અતશ્ચતુર્દિક્ષુ ગ્રામાન્ ગન્તું ભોજ્યદ્રવ્યાણિ ક્રેતુઞ્ચ ભવાન્ તાન્ વિસૃજતુ।
XXXVII તદા સ તાનુવાચ યૂયમેવ તાન્ ભોજયત; તતસ્તે જગદુ ર્વયં ગત્વા દ્વિશતસંખ્યકૈ મુંદ્રાપાદૈઃ પૂપાન્ ક્રીત્વા કિં તાન્
ભોજયિષ્યામઃ?
XXXVIII તદા સ તાન્ પૃષ્ઠવાન્ યુષ્માકં સન્નિધૌ કતિ પૂપા આસતે? ગત્વા પશ્યત; તતસ્તે દૃષ્ટ્વા તમવદન્ પઞ્ચ પૂપા દ્વૌ મત્સ્યૌ
ચ સન્તિ।
XXXIX તદા સ લોકાન્ શસ્પોપરિ પંક્તિભિરુપવેશયિતુમ્ આદિષ્ટવાન્,
XL તતસ્તે શતં શતં જનાઃ પઞ્ચાશત્ પઞ્ચાશજ્જનાશ્ચ પંક્તિભિ ર્ભુવિ સમુપવિવિશુઃ।
XLI અથ સ તાન્ પઞ્ચપૂપાન્ મત્સ્યદ્વયઞ્ચ ધૃત્વા સ્વર્ગં પશ્યન્ ઈશ્વરગુણાન્ અન્વકીર્ત્તયત્ તાન્ પૂપાન્ ભંક્ત્વા લોકેભ્યઃ
પરિવેષયિતું શિષ્યેભ્યો દત્તવાન્ દ્વા મત્સ્યૌ ચ વિભજ્ય સર્વ્વેભ્યો દત્તવાન્।
XLII તતઃ સર્વ્વે ભુક્ત્વાતૃપ્યન્।
XLIII અનન્તરં શિષ્યા અવશિષ્ટૈઃ પૂપૈ ર્મત્સ્યૈશ્ચ પૂર્ણાન્ દ્વદશ ડલ્લકાન્ જગૃહુઃ।
XLIV તે ભોક્તારઃ પ્રાયઃ પઞ્ચ સહસ્રાણિ પુરુષા આસન્।
XLV અથ સ લોકાન્ વિસૃજન્નેવ નાવમારોઢું સ્વસ્માદગ્રે પારે બૈત્સૈદાપુરં યાતુઞ્ચ શિષ્યાન્ વાઢમાદિષ્ટવાન્।
XLVI તદા સ સર્વ્વાન્ વિસૃજ્ય પ્રાર્થયિતું પર્વ્વતં ગતઃ।
XLVII તતઃ સન્ધ્યાયાં સત્યાં નૌઃ સિન્ધુમધ્ય ઉપસ્થિતા કિન્તુ સ એકાકી સ્થલે સ્થિતઃ।
XLVIII અથ સમ્મુખવાતવહનાત્ શિષ્યા નાવં વાહયિત્વા પરિશ્રાન્તા ઇતિ જ્ઞાત્વા સ નિશાચતુર્થયામે સિન્ધૂપરિ પદ્ભ્યાં વ્રજન્
તેષાં સમીપમેત્ય તેષામગ્રે યાતુમ્ ઉદ્યતઃ।
XLIX કિન્તુ શિષ્યાઃ સિન્ધૂપરિ તં વ્રજન્તં દૃષ્ટ્વા ભૂતમનુમાય રુરુવુઃ,
L યતઃ સર્વ્વે તં દૃષ્ટ્વા વ્યાકુલિતાઃ। અતએવ યીશુસ્તત્ક્ષણં તૈઃ સહાલપ્ય કથિતવાન્, સુસ્થિરા ભૂત, અયમહં મા ભૈષ્ટ।
LI અથ નૌકામારુહ્ય તસ્મિન્ તેષાં સન્નિધિં ગતે વાતો નિવૃત્તઃ; તસ્માત્તે મનઃસુ વિસ્મિતા આશ્ચર્ય્યં મેનિરે।
LII યતસ્તે મનસાં કાઠિન્યાત્ તત્ પૂપીયમ્ આશ્ચર્ય્યં કર્મ્મ ન વિવિક્તવન્તઃ।
LIII અથ તે પારં ગત્વા ગિનેષરત્પ્રદેશમેત્ય તટ ઉપસ્થિતાઃ।
LIV તેષુ નૌકાતો બહિર્ગતેષુ તત્પ્રદેશીયા લોકાસ્તં પરિચિત્ય
LV ચતુર્દિક્ષુ ધાવન્તો યત્ર યત્ર રોગિણો નરા આસન્ તાન્ સર્વ્વાન ખટ્વોપરિ નિધાય યત્ર કુત્રચિત્ તદ્વાર્ત્તાં પ્રાપુઃ તત્ સ્થાનમ્
આનેતુમ્ આરેભિરે।
LVI તથા યત્ર યત્ર ગ્રામે યત્ર યત્ર પુરે યત્ર યત્ર પલ્લ્યાઞ્ચ તેન પ્રવેશઃ કૃતસ્તદ્વર્ત્મમધ્યે લોકાઃ પીડિતાન્ સ્થાપયિત્વા તસ્ય
ચેલગ્રન્થિમાત્રં સ્પ્રષ્ટુમ્ તેષામર્થે તદનુજ્ઞાં પ્રાર્થયન્તઃ યાવન્તો લોકાઃ પસ્પૃશુસ્તાવન્ત એવ ગદાન્મુક્તાઃ।

# VII

I અનન્તરં યિરૂશાલમ આગતાઃ ફિરૂશિનોઽધ્યાપકાશ્ચ યીશોઃ સમીપમ્ આગતાઃ।
II તે તસ્ય કિયતઃ શિષ્યાન્ અશુચિકરૈરર્થાદ અપ્રક્ષાલિતહસ્તૈ ર્ભુઞ્જતો દૃષ્ટ્વા તાનદૂષયન્।
III યતઃ ફિરૂશિનઃ સર્વ્વયિહૂદીયાશ્ચ પ્રાચાં પરમ્પરાગતવાક્યં સમ્મન્ય પ્રતલેન હસ્તાન્ અપ્રક્ષાલ્ય ન ભુઞ્જતે।

IV આપનાદાગત્ય મજ્જનં વિના ન ખાદન્તિ; તથા પાનપાત્રાણાં જલપાત્રાણાં પિત્તલપાત્રાણામ્ આસનાનાઞ્ચ જલે મજ્જનમ્
ઇત્યાદયોન્યેપિ બહવસ્તેષામાચારાઃ સન્તિ।
V તે ફિરૂશિનોઽધ્યાપકાશ્ચ યીશું પપ્રચ્છુઃ, તવ શિષ્યાઃ પ્રાચાં પરમ્પરાગતવાક્યાનુસારેણ નાચરન્તોઽપ્રક્ષાલિતકરૈઃ કુતો ભુજંતે?
VI તતઃ સ પ્રત્યુવાચ કપટિનો યુષ્માન્ ઉદ્દિશ્ય યિશયિયભવિષ્યદ્વાદી યુક્તમવાદીત્| યથા સ્વકીયૈરધરૈરેતે સમ્મન્યનતે સદૈવ માં|
કિન્તુ મત્તો વિપ્રકર્ષે સન્તિ તેષાં મનાંસિ ચ|
VII શિક્ષયન્તો બિધીન્ ન્નાજ્ઞા ભજન્તે માં મુધૈવ તે|
VIII યૂયં જલપાત્રપાનપાત્રાદીનિ મજ્જયન્તો મનુજપરમ્પરાગતવાક્યં રક્ષથ કિન્તુ ઈશ્વરાજ્ઞાં લંઘધ્વે; અપરા ઈદૃશ્યોનેકાઃ ક્રિયા
અપિ કુરુધ્વે|
IX અન્યઞ્ચાકથયત્ યૂયં સ્વપરમ્પરાગતવાક્યસ્ય રક્ષાર્થં સ્પષ્ટરૂપેણ ઈશ્વરાજ્ઞાં લોપયથ|
X યતો મૂસાદ્વારા પ્રોક્તમસ્તિ સ્વપિતરૌ સમ્મન્યધ્વં યસ્તુ માતરં પિતરં વા દુર્વ્વાક્યં વક્તિ સ નિતાન્તં હન્યતાં|
XI કિન્તુ મદીયેન યેન દ્રવ્યેણ તવોપકારોભવત્ તત્ કર્બ્બાણમર્થાદ્ ઈશ્વરાય નિવેદિતમ્ ઇદં વાક્યં યદિ કોપિ પિતરં માતરં વા
વક્તિ
XII તર્હિ યૂયં માતુઃ પિતુ ર્વોપકારં કર્ત્તાં તં વારયથ|
XIII ઇત્થં સ્વપ્રચારિતપરમ્પરાગતવાક્યેન યૂયમ્ ઈશ્વરાજ્ઞાં મુધા વિધદ્ધ્વે, ઈદૃશાન્યન્યાન્યનેકાનિ કર્મ્માણિ કુરુધ્વે|
XIV અથ સ લોકાનાહૂય બભાષે યૂયં સર્વ્વે મદ્વાક્યં શૃણુત બુધ્યધ્વઞ્ચ|
XV બાહ્યાદન્તરં પ્રવિશ્ય નરમમેધ્યં કર્ત્તાં શક્નોતિ ઈદૃશં કિમપિ વસ્તુ નાસ્તિ, વરમ્ અન્તરાદ્ બહિર્ગતં યદ્વસ્તુ તન્મનુજમ્ અમેધ્યં
કરોતિ|
XVI યસ્ય શ્રોતું શ્રોત્રે સ્તઃ સ શૃણોતુ|
XVII તતઃ સ લોકાન્ હિત્વા ગૃહમધ્યં પ્રવિષ્ટસ્તદા શિષ્યાસ્તદૃષ્ટાન્તવાક્યાર્થં પપ્રચ્છુઃ|
XVIII તસ્માત્ સ તાન્ જગાદ યૂયમપિ કિમેતાદૃગબોધાઃ? કિમપિ દ્રવ્યં બાહ્યાદન્તરં પ્રવિશ્ય નરમમેધ્યં કર્ત્તાં ન શક્નોતિ કથામિમાં
કિં ન બુધ્યધ્વે?
XIX તત્ તદન્તર્ન પ્રવિશતિ કિન્તુ કુક્ષિમધ્યં પ્રવિશતિ શેષે સર્વ્વભુક્તવસ્તુગ્રાહિણિ બહિર્દેશે નિર્યાતિ|
XX અપરમપ્યવાદીદ્ યન્નરાન્નિરેતિ તદેવ નરમમેધ્યં કરોતિ|
XXI યતોઽન્તરાદ્ અર્થાન્ માનવાનાં મનોભ્યઃ કુચિન્તા પરસ્ત્રીવેશ્યાગમનં
XXII નરવધશ્ચૌર્ય્યં લોભો દુષ્ટતા પ્રવઞ્ચના કામુકતા કુદૃષ્ટિરીશ્વરનિન્દા ગર્વ્વસ્તમ ઇત્યાદીનિ નિર્ગચ્છન્તિ|
XXIII એતાનિ સર્વ્વાણિ દુરિતાન્યન્તરાદેત્ય નરમમેધ્યં કુર્વ્વન્તિ|
XXIV અથ સ ઉત્થાય તત્સ્થાનાત્ સોરસીદોન્પુરપ્રદેશં જગામ તત્ર કિમપિ નિવેશનં પ્રવિશ્ય સર્વ્વૈરજ્ઞાતઃ સ્થાતું મતિઞ્ચક્રે કિન્તુ
ગુપ્તઃ સ્થાતું ન શશાક|
XXV યતઃ સુરફૈનિકીદેશીયયૂનાનીવંશોદ્ભવસ્ત્રિયાઃ કન્યા ભૂતગ્રસ્તાસીત્| સા સ્ત્રી તદ્વાર્ત્તાં પ્રાપ્ય તત્સમીપમાગત્ય તચ્ચરણયોઃ
પતિત્વા
XXVI સ્વકન્યાતો ભૂતં નિરાકર્ત્તાં તસ્મિન્ વિનયં કૃતવતી|
XXVII કિન્તુ યીશુસ્તામવદત્ પ્રથમં બાલકાસ્તૃપ્યન્તુ યતો બાલકાનાં ખાદ્યં ગૃહીત્વા કુક્કુરેભ્યો નિક્ષેપોઽનુચિતઃ|
XXVIII તદા સા સ્ત્રી તમવાદીત્ ભોઃ પ્રભો તત્ સત્યં તથાપિ મઞ્ચાધઃસ્થાઃ કુક્કુરા બાલાનાં કરપતિતાનિ ખાદ્યખણ્ડાનિ ખાદન્તિ|
XXIX તતઃ સોઽકથયદ્ એતત્કથાહેતોઃ સકુશલા યાહિ તવ કન્યાં ત્યક્ત્વા ભૂતો ગતઃ|
XXX અથ સા સ્ત્રી ગૃહં ગત્વા કન્યાં ભૂતત્યક્તાં શય્યાસ્થિતાં દદર્શ|
XXXI પુનશ્ચ સ સોરસીદોન્પુરપ્રદેશાત્ પ્રસ્થાય દિકાપલિદેશસ્ય પ્રાન્તરભાગેન ગાલીલ્જલધેઃ સમીપં ગતવાન્|
XXXII તદા લોકૈરેકં બધિરં કદ્વદઞ્ચ નરં તન્નિકટમાનીય તસ્ય ગાત્રે હસ્તમર્પયિતું વિનયઃ કૃતઃ|
XXXIII તતો યીશુ ર્લોકારણ્યાત્ તં નિર્જનમાનીય તસ્ય કર્ણયોઙ્ગુલી ર્દદૌ નિષ્ઠીવં દત્ત્વા ચ તજ્જિહ્વાં પસ્પર્શ|
XXXIV અનન્તરં સ્વર્ગં નિરીક્ષ્ય દીર્ઘં નિશ્વસ્ય તમવદત્ ઇતફતઃ અર્થાન્ મુક્તો ભૂયાત્|
XXXV તતસ્તત્ક્ષણં તસ્ય કર્ણૌ મુક્તૌ જિહ્વાયાશ્ચ જાડ્યાપગમાત્ સ સુસ્પષ્ટવાક્યમકથયત્|
XXXVI અથ સ તાન્ વાઢમિત્યાદિદેશ યૂયમિમાં કથાં કસ્મૈચિદપિ મા કથયત, કિન્તુ સ યતિ ન્યષેધત્ તે તતિ બાહુલ્યેન પ્રાચારયન્;
XXXVII તેઽતિચમત્કૃત્ય પરસ્પરં કથયામાસુઃ સ બધિરાય શ્રવણશક્તિં મૂકાય ચ કથનશક્તિં દત્ત્વા સર્વ્વં કર્મ્મોત્તમરૂપેણ ચકાર|

# VIII

I તદા તત્સમીપં બહવો લોકા આયાતા અતસ્તેષાં ભોજ્યદ્રવ્યાભાવાદ્ યીશુઃ શિષ્યાનાહૂય જગાદ,|
II લોકનિવહે મમ કૃપા જાયતે તે દિનત્રયં મયા સાર્દ્ધં સન્તિ તેષાં ભોજ્યં કિમપિ નાસ્તિ|
III તેષાં મધ્યેઽનેકે દૂરાદ્ આગતાઃ, અભુક્તેષુ તેષુ મયા સ્વગૃહમભિપ્રહિતેષુ તે પથિ ક્લમિષ્યન્તિ|
IV શિષ્યા અવાદિષુઃ, એતાવતો લોકાન્ તર્પયિતુમ્ અત્ર પ્રન્તરે પૂપાન્ પ્રાપ્તું કેન શક્યતે?
V તતઃ સ તાન્ પપ્રચ્છ યુષ્માકં કતિ પૂપાઃ સન્તિ? તેઽકથયન્ સપ્ત|
VI તતઃ સ તાલ્લોકાન્ ભુવિ સમુપવેષ્ટુમ્ આદિશ્ય તાન્ સપ્ત પૂપાન્ ધૃત્વા ઈશ્વરગુણાન્ અનુકીર્ત્તયામાસ, ભંક્ત્વા પરિવેષયિતું
શિષ્યાન્ પ્રતિ દદૌ, તતસ્તે લોકેભ્યઃ પરિવેષયામાસુઃ|
VII તથા તેષાં સમીપે યે ક્ષુદ્રમત્સ્યા આસન્ તાનપ્યાદાય ઈશ્વરગુણાન્ સંકીર્ત્ય પરિવેષયિતુમ્ આદિષ્ટવાન્|
VIII તતો લોકા ભુક્ત્વા તૃપ્તિં ગતા અવશિષ્ટખાદ્યૈઃ પૂર્ણાઃ સપ્તડલ્લકા ગૃહીતાશ્ચ|
IX એતે ભોક્તારઃ પ્રાયશ્ચતુઃ સહસ્રપુરુષા આસન્ તતઃ સ તાન્ વિસસર્જ|
X અથ સ શિષ્યૈઃ સહ નાવમારુહ્ય દલ્માનૂથાસીમામાગતઃ|

XI તતઃ પરં ફિરૂશિન આગત્ય તેન સહ વિવદમાનાસ્તસ્ય પરીક્ષાર્થમ્ આકાશીયચિહ્નં દ્રષ્ટું યાચિતવન્તઃ।
XII તદા સોઽન્તર્દીર્ઘં નિશ્વસ્યાકથયત્, એતે વિદ્યમાનનરાઃ કુતશ્ચિન્હં મૃગયન્તે? યુષ્માનહં યથાર્થં બ્રવીમિ લોકાનેતાન્ કિમપિ ચિહ્નં ન દર્શયિષ્યતે।
XIII અથ તાન્ હિત્વા પુન ર્નાવમ્ આરુહ્ય પારમગાત્।
XIV એતર્હિ શિષ્યૈઃ પૂપેષુ વિસ્મૃતેષુ નાવિ તેષાં સન્નિધૌ પૂપ એકએવ સ્થિતઃ।
XV તદાનીં યીશુસ્તાન્ આદિષ્ટવાન્ ફિરૂશિનાં હેરોદશ્ચ કિણ્વં પ્રતિ સતર્કાઃ સાવધાનાશ્ચ ભવત।
XVI તતસ્તેઽન્યોન્યં વિવેચનં કર્તુમ્ આરેભિરે, અસ્માકં સન્નિધૌ પૂપો નાસ્તીતિ હેતોરિદં કથયતિ।
XVII તદ્ બુદ્ધ્વા યીશુસ્તેભ્યોઽકથયત્ યુષ્માકં સ્થાને પૂપાભાવાત્ કુત ઇત્થં વિતર્કયથ? યૂયં કિમદ્યાપિ કિમપિ ન જાનીથ? બોદ્ધુઞ્ચ ન શક્નુથ? યાવદદ્ય કિં યુષ્માકં મનાંસિ કઠિનાનિ સન્તિ?
XVIII સત્સુ નેત્રેષુ કિં ન પશ્યથ? સત્સુ કર્ણેષુ કિં ન શૃણુથ? ન સ્મરથ ચ?
XIX યદાહં પઞ્ચપૂપાન્ પઞ્ચસહસ્રાણાં પુરુષાણાં મધ્યે ભંક્ત્વા દત્તવાન્ તદાનીં યૂયમ્ અવશિષ્ટપૂપૈઃ પૂર્ણાન્ કતિ ડલ્લકાન્ ગૃહીતવન્તઃ? તેઽકથયન્ દ્વાદશડલ્લકાન્।
XX અપરઞ્ચ યદા ચતુઃસહસ્રાણાં પુરુષાણાં મધ્યે પૂપાન્ ભંક્ત્વાદદાં તદા યૂયમ્ અતિરિક્તપૂપાનાં કતિ ડલ્લકાન્ ગૃહીતવન્તઃ? તે કથયામાસુઃ સપ્તડલ્લકાન્।
XXI તદા સ કથિતવાન્ તર્હિ યૂયમ્ અધુનાપિ કુતો બોદ્ધું ન શક્નુથ?
XXII અનન્તરં તસ્મિન્ બૈત્સૈદાનગરે પ્રાપ્તે લોકા અન્ધમેકં નરં તત્સમીપમાનીય તં સ્પ્રષ્ટું તં પ્રાર્થયાઞ્ચક્રિરે।
XXIII તદા તસ્યાન્ધસ્ય કરૌ ગૃહીત્વા નગરાદ્ બહિર્દેશં તં નીતવાન્; તન્નેત્રે નિષ્ઠીવં દત્ત્વા તદ્ગાત્રે હસ્તાવર્પયિત્વા તં પપ્રચ્છ, કિમપિ પશ્યસિ?
XXIV સ નેત્રે ઉન્મીલ્ય જગાદ, વૃક્ષવત્ મનુજાન્ ગચ્છતો નિરીક્ષે।
XXV તતો યીશુઃ પુનસ્તસ્ય નયનયો ર્હસ્તાવર્પયિત્વા તસ્ય નેત્રે ઉન્મીલયામાસ; તસ્માત્ સ સ્વસ્થો ભૂત્વા સ્પષ્ટરૂપં સર્વ્વલોકાન્ દદર્શ।
XXVI તતઃ પરં ત્વં ગ્રામં મા ગચ્છ ગ્રામસ્થં કમપિ ચ કિમપ્યનુક્ત્વા નિજગૃહં યાહીત્યાદિશ્ય યીશુસ્તં નિજગૃહં પ્રહિતવાન્।
XXVII અનન્તરં શિષ્યૈઃ સહિતો યીશુઃ કૈસરીયાફિલિપિપુરં જગામ, પથિ ગચ્છન્ તાનપૃચ્છત્ કોઽહમ્ અત્ર લોકાઃ કિં વદન્તિ?
XXVIII તે પ્રત્યૂચુઃ ત્વાં યોહનં મજ્જકં વદન્તિ કિન્તુ કેપિ કેપિ એલિયં વદન્તિ; અપરે કેપિ કેપિ ભવિષ્યદ્વાદિનામ્ એકો જન ઇતિ વદન્તિ।
XXIX અથ સ તાનપૃચ્છત્ કિન્તુ કોહમ્? ઇત્યત્ર યૂયં કિં વદથ? તદા પિતરઃ પ્રત્યવદત્ ભવાન્ અભિષિક્તસ્ત્રાતા।
XXX તતઃ સ તાન્ ગાઢમાદિશદ્ યૂયં મમ કથા કસ્મૈચિદપિ મા કથયત।
XXXI મનુષ્યપુત્રેણાવશ્યં બહવો યાતના ભોક્તવ્યાઃ પ્રાચીનલોકૈઃ પ્રધાનયાજકૈરધ્યાપકૈશ્ચ સ નિન્દિતઃ સન્ ઘાતયિષ્યતે તૃતીયદિને ઉત્થાસ્યતિ ચ, યીશુઃ શિષ્યાનુપદેષ્ટુમારભ્ય કથામિમાં સ્પષ્ટમાચષ્ટ।
XXXII તસ્માત્ પિતરસ્તસ્ય હસ્તૌ ધૃત્વા તં તર્જ્જિતવાન્।
XXXIII કિન્તુ સ મુખં પરાવર્ત્ય શિષ્યગણં નિરીક્ષ્ય પિતરં તર્જયિત્વાવાદીદ્ દૂરીભવ વિઘ્નકારિન્ ઈશ્વરીયકાર્ય્યાદપિ મનુષ્યકાર્ય્યં તુભ્યં રોચતતરાં।
XXXIV અથ સ લોકાન્ શિષ્યાંશ્ચાહૂય જગાદ યઃ કશ્ચિન્ મામનુગન્તુમ્ ઇચ્છતિ સ આત્માનં દામ્યતુ, સ્વક્રુશં ગૃહીત્વા મત્પશ્ચાદ્ આયાતુ।
XXXV યતો યઃ કશ્ચિત્ સ્વપ્રાણં રક્ષિતુમિચ્છતિ સ તં હારયિષ્યતિ, કિન્તુ યઃ કશ્ચિન્ મદર્થં સુસંવાદાર્થઞ્ચ પ્રાણં હારયતિ સ તં રક્ષિષ્યતિ।
XXXVI અપરઞ્ચ મનુજઃ સર્વ્વં જગત્ પ્રાપ્ય યદિ સ્વપ્રાણં હારયતિ તર્હિ તસ્ય કો લાભઃ?
XXXVII નરઃ સ્વપ્રાણવિનિમયેન કિં દાતું શક્નોતિ?
XXXVIII એતેષાં વ્યભિચારિણાં પાપિનાઞ્ચ લોકાનાં સાક્ષાદ્ યદિ કોપિ માં મત્કથાઞ્ચ લજ્જાસ્પદં જાનાતિ તર્હિ મનુજપુત્રો યદા ધર્મ્મદૂતૈઃ સહ પિતુઃ પ્રભાવેણાગમિષ્યતિ તદા સોપિ તં લજ્જાસ્પદં જ્ઞાસ્યતિ।

# IX

I અથ સ તાનવાદીત્ યુષ્મભ્યમહં યથાર્થં કથયામિ, ઈશ્વરરાજ્યં પરાક્રમેણોપસ્થિતં ન દૃષ્ટ્વા મૃત્યું નાસ્વાદિષ્યન્તે, અત્ર દણ્ડાયમાનાનાં મધ્યેપિ તાદૃશા લોકાઃ સન્તિ।
II અથ ષડ્દિનેભ્યઃ પરં યીશુઃ પિતરં યાકૂબં યોહનઞ્ચ ગૃહીત્વા ગિરેરુચ્ચસ્ય નિર્જનસ્થાનં ગત્વા તેષાં પ્રત્યક્ષે મૂર્ત્યન્તરં દધાર।
III તતસ્તસ્ય પરિધેયમ્ ઈદૃશમ્ ઉજ્જ્વલહિમપાણ્ડરં જાતં યદ્ જગતિ કોપિ રજકો ન તાદૃક્ પાણ્ડરં કર્ત્તાં શક્નોતિ।
IV અપરઞ્ચ એલિયો મૂસાશ્ચ તેભ્યો દર્શનં દત્ત્વા યીશુના સહ કથનં કર્ત્તુમારેભાતે।
V તદા પિતરો યીશુમવાદીત્ હે ગુરોઽસ્માકમત્ર સ્થિતિરુત્તમા, તતએવ વયં ત્વત્કૃતે એકાં મૂસાકૃતે એકામ્ એલિયકૃતે ચૈકાં, એતાસ્તિસ્રઃ કુટી ર્નિર્મ્મામ।
VI કિન્તુ સ યદુક્તવાન્ તત્ સ્વયં ન બુબુધે તતઃ સર્વ્વે બિભયાઞ્ચક્રુઃ।
VII એતર્હિ પયોદસ્તાન્ છાદયામાસ, મમયાં પ્રિયઃ પુત્રઃ કથાસુ તસ્ય મનાંસિ નિવેશયતેતિ નભોવાણી તન્મેઘાન્નિર્યયૌ।
VIII અથ હઠાત્તે ચતુર્દિશો દૃષ્ટ્વા યીશું વિના સ્વૈઃ સહિતં કમપિ ન દદૃશુઃ।
IX તતઃ પરં ગિરેરવરોહણકાલે સ તાન્ ગાઢમ્ દૂત્યાદિદેશ યાવન્નરસૂનોઃ શ્મશાનાદુત્થાનં ન ભવતિ, તાવત્ દર્શનસ્યાસ્ય વાર્ત્તા યુષ્માભિઃ કસ્મૈચિદપિ ન વક્તવ્યા।
X તદા શ્મશાનાદુત્થાનસ્ય કોભિપ્રાય ઇતિ વિચાર્ય્ય તે તદ્વાક્યં સ્વેષુ ગોપાયાઞ્ચક્રિરે।

XI અથ તે યીશું પપ્રચ્છુઃ પ્રથમત એલિયેનાગન્તવ્યમ્ ઇતિ વાક્યં કુત ઉપાધ્યાયા આહુઃ?
XII તદા સ પ્રત્યુવાચ , એલિયઃ પ્રથમમેત્ય સર્વ્વકાર્ય્યાણિ સાધયિષ્યતિ; નરપુત્રે ચ લિપિ ર્યથાસ્તે તથૈવ સોપિ બહુદુઃખં
પ્રાપ્યાવજ્ઞાસ્યતે।
XIII કિન્ત્વહં યુષ્માન્ વદામિ , એલિયાર્થે લિપિ ર્યથાસ્તે તથૈવ સ એત્ય યયૌ, લોકાઃ સ્વેચ્છાનુરૂપં તમભિવ્યવહરન્તિ સ્મ।
XIV અનન્તરં સ શિષ્યસમીપમેત્ય તેષાં ચતુઃપાર્શ્વે તૈઃ સહ બહુજનાન્ વિવદમાનાન્ અધ્યાપકાંશ્ચ દૃષ્ટવાન્;
XV કિન્તુ સર્વ્વલોકાસ્તં દૃષ્ટ્વૈવ ચમત્કૃત્ય તદાસન્નં ધાવન્તસ્તં પ્રણેમુઃ।
XVI તદા યીશુરધ્યાપકાનપ્રાક્ષીદ્ એતૈઃ સહ યૂયં કિં વિવદધ્વે?
XVII તતો લોકાનાં કશ્ચિદેકઃ પ્રત્યવાદીત્ હે ગુરો મમ સૂનું મૂકં ભૂતધૃતઞ્ચ ભવદાસન્નમ્ આનયં।
XVIII યદાસૌ ભૂતસ્તમાક્રમતે તદૈવ પાતસતિ તથા સ ફેણાયતે, દન્તૈર્દન્તાન્ ઘર્ષતિ ક્ષીણો ભવતિ ચ; તતો હેતોસ્તં ભૂતં ત્યાજયિતું
ભવચ્છિષ્યાન્ નિવેદિતવાન્ કિન્તુ તે ન શેકુઃ।
XIX તદા સ તમવાદીત્, રે અવિશ્વાસિનઃ સન્તાના યુષ્માભિઃ સહ કતિ કાલાનહં સ્થાસ્યામિ? અપરાન્ કતિ કાલાન્ વા વ
આચારાન્ સહિષ્યે? તં મદાસન્નમાનયત।
XX તતસ્તત્સન્નિધિં સ આનીયત કિન્તુ તં દૃષ્ટ્વૈવ ભૂતો બાલકં ધૃતવાન્; સ ચ ભૂમૌ પતિત્વા ફેણાયમાનો લુલોઠ।
XXI તદા સ તત્પિતરં પપ્રચ્છ, અસ્યેદૃશી દશા કતિ દિનાનિ ભૂતા? તતઃ સોવાદીત્ બાલ્યકાલાત્।
XXII ભૂતોયં તં નાશયિતું બહુવારાન્ વહ્નૌ જલે ચ ન્યક્ષિપત્ કિન્તુ યદિ ભવાન કિમપિ કર્ત્તાં શક્નોતિ તર્હિ દયાં કૃત્વાસ્માન્
ઉપકરોતુ।
XXIII તદા યીશુસ્તમવદત્ યદિ પ્રત્યેતું શક્નોષિ તર્હિ પ્રત્યયિને જનાય સર્વ્વં સાધ્યમ્।
XXIV તતસ્તત્ક્ષણં તદ્બાલકસ્ય પિતા પ્રોચ્ચૈ રૂવન્ સાશ્રુનેત્રઃ પ્રોવાચ, પ્રભો પ્રત્યેમિ મમાપ્રત્યયં પ્રતિકુરુ।
XXV અથ યીશુ ર્લોકસઙ્ઘં ધાવિત્વાયાન્તં દૃષ્ટ્વા તમપૂતભૂતં તર્જયિત્વા જગાદ, રે બધિર મૂક ભૂત ત્વમેતસ્માદ્ બહિર્ભવ પુનઃ
કદાપિ માશ્રયૈનં ત્વામહમ્ ઇત્યાદિશામિ।
XXVI તદા સ ભૂતશ્ચીત્શબ્દં કૃત્વા તમાપીડ્ય બહિર્જજામ, તતો બાલકો મૃતકલ્પો બભૂવ તસ્માદયં મૃતઇત્યનેકે કથયામાસુઃ।
XXVII કિન્તુ કરં ધૃત્વા યીશુનોત્થાપિતઃ સ ઉત્તસ્થૌ।
XXVIII અથ યીશૌ ગૃહં પ્રવિષ્ટે શિષ્યા ગુપ્તં તં પપ્રચ્છુઃ, વયમેનં ભૂતં ત્યાજયિતું કુતો ન શક્તાઃ?
XXIX સ ઉવાચ, પ્રાર્થનોપવાસૌ વિના કેનાપ્યન્યેન કર્મ્મણા ભૂતમીદૃશં ત્યાજયિતું ન શક્યં।
XXX અનન્તરં સ તત્સ્થાનાદિત્વા ગાલીલ્મધ્યેન યયૌ, કિન્તુ તત્ કોપિ જાનીયાદિતિ સ નૈચ્છત્।
XXXI અપરઞ્ચ સ શિષ્યાનુપદિશન્ બભાષે, નરપુત્રો નરહસ્તેષુ સમર્પયિષ્યતે તે ચ તં હનિષ્યન્તિ તૈસ્તસ્મિન્ હતે તૃતીયદિને સ
ઉત્થાસ્યતીતિ।
XXXII કિન્તુ તત્કથાં તે નાબુધ્યન્ત પ્રષ્ટુઞ્ચ બિભ્યઃ।
XXXIII અથ યીશુઃ કફર્નાહૂમ્પુરમાગત્ય મધ્યેગૃહઞ્ચેત્ય તાનપૃચ્છદ્ વર્ત્મમધ્યે યૂયમન્યોન્યં કિં વિવદધ્વે સ્મ?
XXXIV કિન્તુ તે નિરુત્તરાસ્તસ્થુ ર્યસ્માત્તેષાં કો મુખ્ય ઇતિ વર્ત્માનિ તેઽન્યોન્યં વ્યવદન્ત।
XXXV તતઃ સ ઉપવિશ્ય દ્વાદશશિષ્યાન્ આહૂય બભાષે યઃ કશ્ચિત્ મુખ્યો ભવિતુમિચ્છતિ સ સર્વ્વેભ્યો ગૌણઃ સર્વ્વેષાં સેવકશ્ચ
ભવતુ।
XXXVI તદા સ બાલકમેકં ગૃહીત્વા મધ્યે સમુપાવેશયત્ તતસ્તં ક્રોડે કૃત્વા તાનવાદાત્
XXXVII યઃ કશ્ચિદીદૃશસ્ય કસ્યાપિ બાલસ્યાતિથ્યં કરોતિ સ મમાતિથ્યં કરોતિ; યઃ કશ્ચિન્મમાતિથ્યં કરોતિ સ કેવલમ્ મમાતિથ્યં
કરોતિ તન્ન મત્પ્રેરકસ્યાપ્યાતિથ્યં કરોતિ।
XXXVIII અથ યોહન્ તમબ્રવીત્ હે ગુરો, અસ્માકમનનુગામિનમ્ એકં ત્વાન્નામ્ના ભૂતાન્ ત્યાજયન્તં વયં દૃષ્ટવન્તઃ,
અસ્માકમપશ્ચાદ્ગામિત્વાચ્ચ તં ન્યષેધામ।
XXXIX કિન્તુ યીશુરવદત્ તં મા નિષેધત્, યતો યઃ કશ્ચિન્ મન્નામ્ના ચિત્રં કર્મ્મ કરોતિ સ સહસા માં નિન્દિતું ન શક્નોતિ।
XL તથા યઃ કશ્ચિદ્ યુષ્માકં વિપક્ષતાં ન કરોતિ સ યુષ્માકમેવ સપક્ષઃ।
XLI યઃ કશ્ચિદ્ યુષ્માન્ ખ્રીષ્ટશિષ્યાન્ જ્ઞાત્વા મન્નામ્ના કંસૈકેન પાનીયં પાતું દદાતિ, યુષ્માનહં યથાર્થં વચ્મિ, સ ફલેન વઞ્ચિતો ન
ભવિષ્યતિ।
XLII કિન્તુ યદિ કશ્ચિન્ મયિ વિશ્વાસિનામેષાં ક્ષુદ્રપ્રાણિનામ્ એકસ્યાપિ વિઘ્નં જનયતિ, તર્હિ તસ્યૈતત્કર્મ્મ કરણાત્
કણ્ઠબદ્ધપેષણીકસ્ય તસ્ય સાગરાગાધજલ મજ્જનં ભદ્રં।
XLIII અતઃ સ્વકરો યદિ ત્વાં બાધતે તર્હિ તં છિન્ધિ;
XLIV યસ્માત્ યત્ર કીટા ન મ્રિયન્તે વહ્નિશ્ચ ન નિર્વ્વાતિ, તસ્મિન્ અનિર્વ્વાણાનલનરકે કરદ્વયવસ્તવ ગમનાત્ કરહીનસ્ય
સ્વર્ગપ્રવેશસ્તવ ક્ષેમં।
XLV યદિ તવ પાદો વિઘ્નં જનયતિ તર્હિ તં છિન્ધિ,
XLVI યતો યત્ર કીટા ન મ્રિયન્તે વહ્નિશ્ચ ન નિર્વ્વાતિ, તસ્મિન્ ઽનિર્વ્વાણવહ્નૌ નરકે દ્વિપાદવતસ્તવ નિક્ષેપાત્ પાદહીનસ્ય
સ્વર્ગપ્રવેશસ્તવ ક્ષેમં।
XLVII સ્વનેત્રં યદિ ત્વાં બાધતે તર્હિ તદપ્યુત્પાટય, યતો યત્ર કીટા ન મ્રિયન્તે વહ્નિશ્ચ ન નિર્વ્વાતિ,
XLVIII તસ્મિન ઽનિર્વ્વાણવહ્નૌ નરકે દ્વિનેત્રસ્ય તવ નિક્ષેપાદ્ એકનેત્રવત ઈશ્વરરાજ્યે પ્રવેશસ્તવ ક્ષેમં।
XLIX યથા સર્વ્વો બલિ ર્લવણાક્તઃ ક્રિયતે તથા સર્વ્વો જનો વહ્નિરૂપેણ લવણાક્તઃ કારિષ્યતે।
L લવણં ભદ્રં કિન્તુ યદિ લવણે સ્વાદુતા ન તિષ્ઠતિ, તર્હિ કથમ્ આસ્વાદ્યુક્તં કરિષ્યથ? યૂયં લવણયુક્તા ભવત પરસ્પરં પ્રેમ
કુરુત।

# X

I અનન્તરં સ તત્સ્થાનાત્ પ્રસ્થાય યર્દ્દનનદ્યાઃ પારે યિહૂદાપ્રદેશ ઉપસ્થિતવાન્, તત્ર તદન્તિકે લોકાનાં સમાગમે જાતે સ
નિજરીત્યનુસારેણ પુનસ્તાન્ ઉપદિદેશ।
II તદા ફિરૂશિનસ્તત્સમીપમ્ એત્ય તં પરીક્ષિતું પપ્રચ્છઃ સ્વજાયા મનુજાનાં ત્યજ્યા ન વેતિ?
III તતઃ સ પ્રત્યવાદીત્, અત્ર કાર્ય્યે મૂસા યુષ્માન્ પ્રતિ કિમાજ્ઞાપયત્?
IV ત ઊચુઃ ત્યાગપત્રં લેખિતું સ્વપત્નીં ત્યક્તુઞ્ચ મૂસાઽનુમન્યતે।
V તદા યીશુઃ પ્રત્યુવાચ, યુષ્માકં મનસાં કાઠિન્યાદ્ધેતો ર્મૂસા નિદેશમિમમ્ અલિખત્।
VI કિન્તુ સૃષ્ટેરાદૌ ઈશ્વરો નરાન્ પુંરૂપેણ સ્ત્રીરૂપેણ ચ સસર્જ।
VII "તતઃ કારણાત્ પુમાન્ પિતરં માતરઞ્ચ ત્યક્ત્વા સ્વજાયાયામ્ આસક્તો ભવિષ્યતિ,
VIII તૌ દ્વાવ્ એકાઙ્ગૌ ભવિષ્યતઃ। " તસ્માત્ તત્કાલમારભ્ય તૌ ન દ્વાવ્ એકાઙ્ગૌ।
IX અતઃ કારણાદ્ ઈશ્વરો યદયોજયત્ કોપિ નરસ્તન્ન વિયેજયેત્।
X અથ યીશુ ર્ગૃહં પ્રવિષ્ટસ્તદા શિષ્યાઃ પુનસ્તત્કથાં તં પપ્રચ્છુઃ।
XI તતઃ સોવદત્ કશ્ચિદ્ યદિ સ્વભાર્ય્યાં ત્યક્તવાન્યામ્ ઉદ્વહતિ તર્હિ સ સ્વભાર્ય્યાયાઃ પ્રાતિકૂલ્યેન વ્યભિચારી ભવતિ।
XII કાચિન્નારી યદિ સ્વપતિં હિત્વાન્યપુંસા વિવાહિતા ભવતિ તર્હિ સાપિ વ્યભિચારિણી ભવતિ।
XIII અથ સ યથા શિશૂન્ સ્પૃશેત્, તદર્થં લોકૈસ્તદન્તિકં શિશવ આનીયન્ત, કિન્તુ શિષ્યાસ્તાનાનીતવતસ્તર્જયામાસુઃ।
XIV યીશુસ્તદ્ દૃષ્ટ્વા ક્રુધ્યન્ જગાદ, મન્નિકટમ્ આગન્તું શિશૂન્ મા વારયત, યત એતાદૃશા ઈશ્વરરાજ્યાધિકારિણઃ।
XV યુષ્માનહં યથાર્થં વચ્મિ, યઃ કશ્ચિત્ શિશુવદ્ ભૂત્વા રાજ્યમીશ્વરસ્ય ન ગૃહ્લીયાત્ સ કદાપિ તદ્રાજ્યં પ્રવેષ્ટું ન શક્નોતિ।
XVI અનનતરં સ શિશૂનઙ્કે નિધાય તેષાં ગાત્રેષુ હસ્તૌ દત્ત્વાશિષં બભાષે।
XVII અથ સ વર્ત્મના યાતિ, એતર્હિ જન એકો ધાવન્ આગત્ય તત્સમ્મુખે જાનુની પાતયિત્વા પૃષ્ટવાન્, ભોઃ પરમગુરો, અનન્તાયુઃ
પ્રાપ્તયે મયા કિં કર્ત્તવ્યં?
XVIII તદા યીશુરુવાચ, માં પરમં કુતો વદસિ? વિનેશ્વરં કોપિ પરમો ન ભવતિ।
XIX પરસ્ત્રીં નાભિગચ્છ; નરં મા ઘાતય; સ્તેયં મા કુરુ; મૃષાસાક્ષ્યં મા દેહિ; હિંસાઞ્ચ મા કુરુ; પિતરૌ સમ્મન્યસ્વ; નિદેશા એતે
ત્વયા જ્ઞાતાઃ।
XX તતસ્તન પ્રત્યુક્તં, હે ગુરો બાલ્યકાલાદહં સર્વ્વાનેતાન્ આચરામિ।
XXI તદા યીશુસ્તં વિલોક્ય સ્નેહેન બભાષે, તવૈકસ્યાભાવ આસ્તે; ત્વં ગત્વા સર્વ્વસ્વં વિક્રીય દરિદ્રેભ્યો વિશ્રાણય, તતઃ સ્વર્ગે
ધનં પ્રાપ્સ્યસિ; તતઃ પરમ્ એત્ય ક્રુશં વહન્ મદનુવર્ત્તી ભવ।
XXII કિન્તુ તસ્ય બહુસમ્પદ્વિદ્યમાનત્વાત્ સ ઇમાં કથામાકર્ણ્ય વિષણો દુઃખિતશ્ચ સન્ જગામ।
XXIII અથ યીશુશ્ચતુર્દિશો નિરીક્ષ્ય શિષ્યાન્ અવાદીત્, ધનિલોકાનામ્ ઈશ્વરરાજ્યપ્રવેશઃ કીદૃગ્ દુષ્કરઃ।
XXIV તસ્ય કથાતઃ શિષ્યાશ્ચમચ્ચક્રુઃ, કિન્તુ સ પુનરવદત્, હે બાલકા યે ધને વિશ્વસન્તિ તેષામ્ ઈશ્વરરાજ્યપ્રવેશઃ કીદૃગ્ દુષ્કરઃ।
XXV ઈશ્વરરાજ્યે ધનિનાં પ્રવેશાત્ સૂચિરન્ધ્રેણ મહાઙ્ગસ્ય ગમનાગમનં સુકરં।
XXVI તદા શિષ્યા અતીવ વિસ્મિતાઃ પરસ્પરં પ્રોચુઃ, તર્હિ કઃ પરિત્રાણં પ્રાપ્તું શક્નોતિ?
XXVII તતો યીશુસ્તાન્ વિલોક્ય બભાષે, તન્ નરસ્યાસાધ્યં કિન્તુ નેશ્વરસ્ય, યતો હેતોરીશ્વરસ્ય સર્વ્વં સાધ્યમ્।
XXVIII તદા પિતર ઉવાચ, પશ્ય વયં સર્વ્વં પરિત્યજ્ય ભવતોનુગામિનો જાતાઃ।
XXIX તતો યીશુઃ પ્રત્યવદત્, યુષ્માનહં યથાર્થં વદામિ, મદર્થં સુસંવાદાર્થં વા યો જનઃ સદનં ભ્રાતરં ભગિનીં પિતરં માતરં જાયાં
સન્તાનાન્ ભૂમિ વા ત્યક્ત્વા
XXX ગૃહભ્રાતૃભગિનીપિતૃમાતૃપત્નીસન્તાનભૂમીનામિહ શતગુણાન્ પ્રેત્યાનન્તાયુશ્ચ ન પ્રાપ્નોતિ તાદૃશઃ કોપિ નાસ્તિ।
XXXI કિન્ત્વગ્રીયા અનેકે લોકાઃ શેષાઃ, શેષીયા અનેકે લોકાશ્ચાગ્રા ભવિષ્યન્તિ।
XXXII અથ યિરૂશાલમ્યાનકાલે યીશુસ્તેષામ્ અગ્રગામી બભૂવ, તસ્માત્તે ચિત્રં જ્ઞાત્વા પશ્ચાદ્ગામિનો ભૂત્વા બિભ્યુઃ। તદા સ પુન
ર્દ્વાદશશિષ્યાન્ ગૃહીત્વા સ્વીયં યદ્યદ્ ઘટિષ્યતે તત્તત્ તેભ્યઃ કથયિતું પ્રારેભે;
XXXIII પશ્યત વયં યિરૂશાલમ્પુરં યામઃ, તત્ર મનુષ્યપુત્રઃ પ્રધાનયાજકાનામ્ ઉપાધ્યાયાનાઞ્ચ કરેષુ સમર્પયિષ્યતે; તે ચ વધદણ્ડાજ્ઞાં
દાપયિત્વા પરદેશીયાનાં કરેષુ તં સમર્પયિષ્યન્તિ।
XXXIV તે તમુપહસ્ય કશયા પ્રહૃત્ય તદ્વપુષિ નિષ્ઠીવં નિક્ષિપ્ય તં હનિષ્યન્તિ, તતઃ સ તૃતીયદિને પ્રોત્થાસ્યતિ।
XXXV તતઃ સિવદેઃ પુત્રૌ યાકૂબ્યોહનૌ તદન્તિકમ્ એત્ય પ્રોચતુઃ, હે ગુરો યદ્ આવાભ્યાં યાચિષ્યતે તદસ્મદર્થં ભવાન્ કરોતુ
નિવેદનમિદમાવયોઃ।
XXXVI તતઃ સ કથિતવાન્, યુવાં કિમિચ્છથઃ? કિં મયા યુષ્મદર્થં કરણીયં?
XXXVII તદા તૌ પ્રોચતુઃ, આવયોરેકં દક્ષિણપાર્શ્વે વામપાર્શ્વે ચૈકં તવૈશ્વર્ય્યપદે સમુપવેષ્ટુમ્ આજ્ઞાપય।
XXXVIII કિન્તુ યીશુઃ પ્રત્યુવાચ યુવામજ્ઞાત્વેદં પ્રાર્થયેથે, યેન કંસેનાહં પાસ્યામિ તેન યુવાભ્યાં કિં પાતું શક્ષ્યતે? યસ્મિન્
મજ્જનેનાહં મજ્જિષ્યે તન્મજ્જને મજ્જયિતું કિં યુવાભ્યાં શક્ષ્યતે? તૌ પ્રત્યૂચતુઃ શક્ષ્યતે।
XXXIX તદા યીશુરવદત્ યેન કંસેનાહં પાસ્યામિ તેનાવશ્યં યુવામપિ પાસ્યથઃ, યેન મજ્જનેન ચાહં મજ્જિષ્યે તત્ર યુવામપિ
મજ્જિષ્યેથે।
XL કિન્તુ યેષામર્થમ્ ઇદં નિરૂપિતં, તાન્ વિહાયાન્યં કમપિ મમ દક્ષિણપાર્શ્વે વામપાર્શ્વે વા સમુપવેશયિતું મમાધિકારો નાસ્તિ।
XLI અથાન્યદશશિષ્યા ઇમાં કથાં શ્રુત્વા યાકૂબ્યોહન્ભ્યાં ચુકુપુઃ।
XLII કિન્તુ યીશુસ્તાન્ સમાહૂય બભાષે, અન્યદેશીયાનાં રાજત્વં યે કુર્વ્વન્તિ તે તેષામેવ પ્રભુત્વં કુર્વ્વન્તિ, તથા યે મહાલોકાસ્તે
તેષામ્ અધિપતિત્વં કુર્વ્વન્તીતિ યૂયં જાનીથ।
XLIII કિન્તુ યુષ્માકં મધ્યે ન તથા ભવિષ્યતિ, યુષ્માકં મધ્યે યઃ પ્રાધાન્યં વાઞ્છતિ સ યુષ્માકં સેવકો ભવિષ્યતિ,

XLIV યુષ્માકં યો મહાન્ ભવિતુમિચ્છતિ સ સર્વ્વેષાં કિઙ્કરો ભવિષ્યતિ।
XLV યતો મનુષ્યપુત્રઃ સેવ્યો ભવિતું નાગતઃ સેવાં કર્ત્તાં તથાનેકેષાં પરિત્રાણસ્ય મૂલ્યરૂપસ્વપ્રાણં દાતુઞ્ચાગતઃ।
XLVI અથ તે યિરીહોનગરં પ્રાપ્તાસ્તસ્માત્ શિષ્યૈ ર્લોકૈશ્ચ સહ યીશો ર્ગમનકાલે ટીમયસ્ય પુત્રો બર્ટીમયનામા અન્ધસ્તન્માર્ગપાર્શ્વે ભિક્ષાર્થમ્ ઉપવિષ્ટઃ।
XLVII સ નાસરતીયસ્ય યીશોરાગમનવાર્ત્તાં પ્રાપ્ય પ્રોચૈ ર્વક્તુમારેભે, હે યીશો દાયૂદઃ સન્તાન માં દયસ્વ।
XLVIII તતોનેકે લોકા મૌનીભવેતિ તં તર્જયામાસુઃ, કિન્તુ સ પુનરધિકમુચ્ચૈ ર્જગાદ, હે યીશો દાયૂદઃ સન્તાન માં દયસ્વ।
XLIX તદા યીશુઃ સ્થિત્વા તમાહ્વાતું સમાદિદેશ, તતો લોકાસ્તમન્ધમાહૂય બભાષિરે, હે નર, સ્થિરો ભવ, ઉત્તિષ્ઠ, સ ત્વામાહ્વયતિ।
L તદા સ ઉત્તરીયવસ્ત્રં નિક્ષિપ્ય પ્રોત્થાય યીશોઃ સમીપં ગતઃ।
LI તતો યીશુસ્તમવદત્ ત્વયા કિં પ્રાર્થ્યતે? તુભ્યમહં કિં કરિષ્યામી? તદા સોન્ધસ્તમુવાચ, હે ગુરો મદીયા દૃષ્ટિર્ભવેત્।
LII તતો યીશુસ્તમુવાચ યાહિ તવ વિશ્વાસસ્ત્વાં સ્વસ્થમકાર્ષીત્, તસ્માત્ તત્ક્ષણં સ દૃષ્ટિં પ્રાપ્ય પથા યીશોઃ પશ્ચાદ્ યયૌ।

# XI

I અનન્તરં તેષુ યિરૂશાલમઃ સમીપસ્થયો ર્બૈત્ફગીબૈથનીયપુરયોરન્તિકસ્થં જૈતુનનામાદ્રિમાગતેષુ યીશુઃ પ્રેષણકાલે દ્વૌ શિષ્યાવિદં વાક્યં જગાદ,
II યુવામમું સમ્મુખસ્થં ગ્રામં યાતં, તત્ર પ્રવિશ્ય યો નરં નાવહત્ તં ગર્દ્દભશાવકં દ્રક્ષ્યથસ્તં મોચયિત્વાનયતં।
III કિન્તુ યુવાં કર્મ્મેદં કુતઃ કુરુથઃ? કથામિમાં યદિ કોપિ પૃચ્છતિ તર્હિ પ્રભોરત્ર પ્રયોજનમસ્તીતિ કથિતે સ શીઘ્રં તમત્ર પ્રેષયિષ્યતિ।
IV તતસ્તૌ ગત્વા દ્વિમાર્ગમેલને કસ્યચિદ્ દ્વારસ્ય પાર્શ્વે તં ગર્દ્દભશાવકં પ્રાપ્ય મોચયતઃ,
V એતર્હિ તત્રોપસ્થિતલોકાનાં કશ્ચિદ્ અપૃચ્છત્, ગર્દ્દભશિશું કુતો મોચયથઃ?
VI તદા યીશોરાજ્ઞાનુસારેણ તેભ્યઃ પ્રત્યુદિતે તત્ક્ષણં તમાદાતું તેઽનુજજ્ઞુઃ।
VII અથ તૌ યીશોઃ સન્નિધિં ગર્દ્દભશિશુમ્ આનીય તદુપરિ સ્વવસ્ત્રાણિ પાતયામાસતુઃ; તતઃ સ તદુપરિ સમુપવિષ્ટઃ।
VIII તદાનેકે પથિ સ્વવાસાંસિ પાતયામાસુઃ, પરૈશ્ચ તરુશાખાશ્છિતવા માર્ગે વિકીર્ણાઃ।
IX અપરઞ્ચ પશ્ચાદ્ગામિનોઽગ્રગામિનશ્ચ સર્વ્વે જના ઉચૈઃસ્વરેણ વક્તુમારેભિરે, જય જય યઃ પરમેશ્વરસ્ય નામ્નાગચ્છતિ સ ધન્ય ઇતિ।
X તથાસ્માકમં પૂર્વ્વપુરુષસ્ય દાયૂદો યદ્રાજ્યં પરમેશ્વરનામ્નાયાતિ તદપિ ધન્યં, સર્વ્વસ્માદુચ્છ્રાયે સ્વર્ગે ઈશ્વરસ્ય જયો ભવેત્।
XI ઇત્થં યીશુ ર્યિરૂશાલમિ મન્દિરં પ્રવિશ્ય ચતુર્દિક્સ્થાનિ સર્વ્વાણિ વસ્તૂનિ દૃષ્ટવાન્; અથ સાયંકાલ ઉપસ્થિતે દ્વાદશશિષ્યસહિતો બૈથનિયં જગામ।
XII અપરેહનિ બૈથનિયાદ્ આગમનસમયે ક્ષુધાર્ત્તો બભૂવ।
XIII તતો દૂરે સપત્રમુડુમ્બરપાદપં વિલોક્ય તત્ર કિઞ્ચિત્ ફલં પ્રાપ્તું તસ્ય સન્નિકૃષ્ટં યયૌ, તદાનીં ફલપાતનસ્ય સમયો નાગચ્છતિ। તતસ્તત્રોપસ્થિતઃ પત્રાણિ વિના કિમપ્યપરં ન પ્રાપ્ય સ કથિતવાન્,
XIV અદ્યારભ્ય કોપિ માનવસ્ત્વત્તઃ ફલં ન ભુઞ્જીત; ઇમાં કથાં તસ્ય શિષ્યાઃ શુશ્રુવુઃ।
XV તદનન્તરં તેષુ યિરૂશાલમમાયાતેષુ યીશુ ર્મન્દિરં ગત્વા તત્રસ્થાનાં બણિજાં મુદ્રાસનાનિ પારાવતવિક્રેતૃણામ્ આસનાનિ ચ ન્યુબ્જયાઞ્ચકાર સર્વ્વાન્ ક્રેતૃન્ વિક્રેતૃંશ્ચ બહિશ્ચકાર।
XVI અપરં મન્દિરમધ્યેન કિમપિ પાત્રં વોઢું સર્વ્વજનં નિવારયામાસ।
XVII લોકાનુપદિશન્ જગાદ, મમ ગૃહં સર્વ્વજાતીયાનાં પ્રાર્થનાગૃહમ્ ઇતિ નામ્ના પ્રથિતં ભવિષ્યતિ એતત્ કિં શાસ્ત્રે લિખિતં નાસ્તિ? કિન્તુ યૂયં તદેવ ચોરાણાં ગહ્વરં કુરુથ।
XVIII ઇમાં વાણીં શ્રુત્વાધ્યાપકાઃ પ્રધાનયાજકાશ્ચ તં યથા નાશયિતું શક્નુવન્તિ તથોપાયં મૃગયામાસુઃ, કિન્તુ તસ્યોપદેશાત્ સર્વ્વે લોકા વિસ્મયં ગતા અતસ્તે તસ્માદ્ બિભ્યુઃ।
XIX અથ સાયંસમય ઉપસ્થિતે યીશુર્નગરાદ્ બહિર્વવ્રાજ।
XX અનન્તરં પ્રાતઃકાલે તે તેન માર્ગેણ ગચ્છન્તસ્તમુડુમ્બરમહીરુહં સમૂલં શુષ્કં દદૃશુઃ।
XXI તતઃ પિતરઃ પૂર્વ્વવાક્યં સ્મરન્ યીશું બભાષં, હે ગુરો પશ્યતુ ય ઉડુમ્બરવિટપી ભવતા શપ્તઃ સ શુષ્કો બભૂવ।
XXII તતો યીશુઃ પ્રત્યવાદીત્, યૂયમીશ્વરે વિશ્વસિત।
XXIII યુષ્માનહં યથાર્થં વદામિ કોપિ યદ્યેતદ્ગિરિં વદતિ, ત્વમુત્થાય ગત્વા જલધૌ પત, પ્રોક્તમિદં વાક્યમવશ્યં ઘટિષ્યતે, મનસા કિમપિ ન સન્દિહ્ય ચેદિદં વિશ્વસેત્ તર્હિ તસ્ય વાક્યાનુસારેણ તદ્ ઘટિષ્યતે।
XXIV અતો હેતોરહં યુષ્માન્ વચ્મિ, પ્રાર્થનાકાલે યદ્યદાકાંક્ષિષ્યધ્વે તત્તદવશ્યં પ્રાપ્સ્યથ, ઇત્થં વિશ્વસિત, તતઃ પ્રાપ્સ્યથ।
XXV અપરઞ્ચ યુષ્માસુ પ્રાર્થયિતું સમુત્થિતેષુ યદિ કોપિ યુષ્માકમ્ અપરાધી તિષ્ઠતિ, તર્હિ તં ક્ષમધ્વં, તથા કૃતે યુષ્માકં સ્વર્ગસ્થઃ પિતાપિ યુષ્માકમાગાંમિ ક્ષમિષ્યતે।
XXVI કિન્તુ યદિ ન ક્ષમધ્વે તર્હિ વઃ સ્વર્ગસ્થઃ પિતાપિ યુષ્માકમાગાંસિ ન ક્ષમિષ્યતે।
XXVII અનન્તરં તે પુન ર્યિરૂશાલમં પ્રવિવિશુઃ, યીશુ ર્યદા મધ્યેમન્દિરમ્ ઇતસ્તતો ગચ્છતિ, તદાનીં પ્રધાનયાજકા ઉપાધ્યાયાઃ પ્રાઞ્ચશ્ચ તદન્તિકમેત્ય કથામિમાં પપ્રચ્છુઃ,
XXVIII ત્વં કેનાદેશેન કર્મ્માણ્યેતાનિ કરોષિ? તથૈતાનિ કર્મ્માણિ કર્ત્તાં કેનાદિષ્ટોસિ?
XXIX તતો યીશુઃ પ્રતિગદિતવાન્ અહમપિ યુષ્માન્ એકકથાં પૃચ્છામિ, યદિ યૂયં તસ્યા ઉત્તરં કુરુથ, તર્હિ કયાજ્ઞયાહં કર્મ્માણ્યેતાનિ કરોમિ તદ્ યુષ્મભ્યં કથયિષ્યામિ।
XXX યોહનો મજ્જનમ્ ઈશ્વરાત્ જાતં કિં માનવાત્? તન્મહ્યં કથયત।
XXXI તે પરસ્પરં વિવેક્તું પ્રારેભિરે, તદ્ ઈશ્વરાદ્ બભૂવેતિ ચેદ્ વદામસ્તર્હિ કુતસ્તં ન પ્રત્યૈત? કથમેતાં કથયિષ્યતિ।
XXXII માનવાદ્ અભવદિતિ ચેદ્ વદામસ્તર્હિ લોકેભ્યો ભયમસ્તિ યતો હેતોઃ સર્વ્વે યોહનં સત્યં ભવિષ્યદ્વાદિનં મન્યન્તે।

XXXIII અતએવ તે યીશું પ્રત્યવાદિષુ ર્વયં તદ્ વક્તું ન શક્નુમઃ। યીશુરુવાચ, તર્હિ યેનાદેશેન કર્મ્માણ્યેતાનિ કરોમિ, અહમપિ
યુષ્મભ્યં તન્ન કથયિષ્યામિ।

# XII

I અનન્તરં યીશુ ર્દૃષ્ટાન્તેન તેભ્યઃ કથયિતુમારેભે, કશ્ચિદેકો દ્રાક્ષાક્ષેત્રં વિધાય તચ્ચતુર્દિક્ષુ વારણીં કૃત્વા તન્મધ્યે દ્રાક્ષાપેષણકુણ્ડમ્
અખનત્, તથા તસ્ય ગડમપિ નિર્મ્મિતવાન્ તતસ્તત્ક્ષેત્રં કૃષીવલેષુ સમર્પ્ય દૂરદેશં જગામ।
II તદનન્તરં ફલકાલે કૃષીવલેભ્યો દ્રાક્ષાક્ષેત્રફલાનિ પ્રાપ્તું તેષાં સવિધે ભૃત્યમ્ એકં પ્રાહિણોત્।
III કિન્તુ કૃષીવલાસ્તં ધૃત્વા પ્રહૃત્ય રિક્તહસ્તં વિસસૃજુઃ।
IV તતઃ સ પુનરન્યમેકં ભૃત્યં પ્રષયામાસ, કિન્તુ તે કૃષીવલાઃ પાષાણાઘાતૈસ્તસ્ય શિરો ભઙ્ક્ત્વા સાપમાનં તં વ્યસર્જન્।
V તતઃ પરં સોપરં દાસં પ્રાહિણોત્ તદા તે તં જઘ્નુઃ, એવમ્ અનેકેષાં કસ્યચિત્ પ્રહારઃ કસ્યચિદ્ વધશ્ચ તૈઃ કૃતઃ।
VI તતઃ પરં મયા સ્વપુત્રે પ્રહિતે તે તમવશ્યં સમ્મંસ્યન્તે, ઇત્યુક્ત્વાવશેષે તેષાં સન્નિધૌ નિજપ્રિયમ્ અદ્વિતીયં પુત્રં પ્રેષયામાસ।
VII કિન્તુ કૃષીવલાઃ પરસ્પરં જગદુઃ, એષ ઉત્તરાધિકારી, આગચ્છત વયમેનં હન્મસ્તથા કૃતે ઽધિકારોયમ્ અસ્માકં ભવિષ્યતિ।
VIII તતસ્તં ધૃત્વા હત્વા દ્રાક્ષાક્ષેત્રાદ્ બહિઃ પ્રાક્ષિપન્।
IX અનેનાસૌ દ્રાક્ષાક્ષેત્રપતિઃ કિં કરિષ્યતિ? સ એત્ય તાન્ કૃષીવલાન્ સંહત્ય તત્ક્ષેત્રમ્ અન્યેષુ કૃષીવલેષુ સમર્પયિષ્યતિ।
X અપરઞ્ચ, "સ્થપતયઃ કરિષ્યન્તિ ગ્રાવાણં યન્તુ તુચ્છકં। પ્રાધાનપ્રસ્તરઃ કોણે સ એવ સંભવિષ્યતિ।
XI એતત્ કર્મ્મ પરેશસ્યાંદ્ભુતં નો દૃષ્ટિતો ભવેત્।। " ઇમાં શાસ્ત્રીયાં લિપિં યૂયં કિં નાપાઠિષ્ટ?
XII તદાનીં સ તાનુદ્દિશ્ય તાં દૃષ્ટાન્તકથાં કથિતવાન્, ત ઇત્થં બુદ્ધ્વા તં ધર્ત્તામુદ્યતાઃ, કિન્તુ લોકેભ્યો બિભ્યુઃ, તદનન્તરં તે તં
વિહાય વવ્રજુઃ।
XIII અપરઞ્ચ તે તસ્ય વાક્યદોષં ધર્ત્તાં કતિપયાન્ ફિરૂશિનો હેરોદીયાંશ્ચ લોકાન્ તદન્તિકં પ્રેષયામાસુઃ।
XIV ત આગત્ય તમવદન્, હે ગુરો ભવાન્ તથ્યભાષી કસ્યાપ્યનુરોધં ન મન્યતે, પક્ષપાતઞ્ચ ન કરોતિ, યથાર્થત ઈશ્વરીયં માર્ગં
દર્શયતિ વયમેતત્ પ્રજાનીમઃ, કૈસરાય કરો દેયો ન વાં? વયં દાસ્યામો ન વા?
XV કિન્તુ સ તેષાં કપટં જ્ઞાત્વા જગાદ, કુતો માં પરીક્ષધ્વે? એકં મુદ્રાપાદં સમાનીય માં દર્શયત।
XVI તદા તૈરેકસ્મિન્ મુદ્રાપાદે સમાનીતે સ તાન્ પપ્રચ્છ, અત્ર લિખિતં નામ મૂર્ત્તિ ર્વા કસ્ય? તે પ્રત્યૂચુઃ, કૈસરસ્ય।
XVII તદા યીશુરવદત્ તર્હિ કૈસરસ્ય દ્રવ્યાણિ કૈસરાય દત્ત, ઈશ્વરસ્ય દ્રવ્યાણિ તુ ઈશ્વરાય દત્ત; તતસ્તે વિસ્મયં મેનિરે।
XVIII અથ મૃતાનામુત્થાનં યે ન મન્યન્તે તે સિદૂકિનો યીશોઃ સમીપમાગત્ય તં પપ્રચ્છુઃ;
XIX હે ગુરો કશ્ચિજ્જનો યદિ નિઃસન્તતિઃ સન્ ભાર્ય્યાયાં સત્યાં મ્રિયતે તર્હિ તસ્ય ભ્રાતા તસ્ય ભાર્ય્યાં ગૃહીત્વા ભ્રાતુ ર્વંશોત્પત્તિં
કરિષ્યતિ, વ્યવસ્થામિમાં મૂસા અસ્માન્ પ્રતિ વ્યલિખત્।
XX કિન્તુ કેચિત્ સપ્ત ભ્રાતર આસન્, તતસ્તેષાં જ્યેષ્ઠભ્રાતા વિવહ્ય નિઃસન્તતિઃ સન્ અમ્રિયત।
XXI તતો દ્વિતીયો ભ્રાતા તાં સ્ત્રિયમગૃહણત્ કિન્તુ સોપિ નિઃસન્તતિઃ સન્ અમ્રિયત; અથ તૃતીયોપિ ભ્રાતા તાદૃશોભવત્।
XXII ઇત્થં સપ્તૈવ ભ્રાતરસ્તાં સ્ત્રિયં ગૃહીત્વા નિઃસન્તાનાઃ સન્તોઽમ્રિયન્ત, સર્વ્વશેષે સાપિ સ્ત્રી મ્રિયતે સ્મ।
XXIII અથ મૃતાનામુત્થાનકાલે યદા ત ઉત્થાસ્યન્તિ તદા તેષાં કસ્ય ભાર્ય્યા સા ભવિષ્યતિ? યતસ્તે સપ્તૈવ તાં વ્યવહન્।
XXIV તતો યીશુઃ પ્રત્યુવાચ શાસ્ત્રમ્ ઈશ્વરશક્તિઞ્ચ યૂયમજ્ઞાત્વા કિમભ્રામ્યત ન?
XXV મૃતલોકાનામુત્થાનં સતિ તે ન વિવહન્તિ વાગ્દત્તા અપિ ન ભવન્તિ, કિન્તુ સ્વર્ગીયદૂતાનાં સદૃશા ભવન્તિ।
XXVI પુનશ્ચ "અહમ્ ઇબ્રાહીમ ઈશ્વર ઇસ્હાક ઈશ્વરો યાકૂબશ્ચેશ્વરઃ" યામિમાં કથાં સ્તમ્બમધ્યે તિષ્ઠન્ ઈશ્વરો મૂસામવાદીત્
મૃતાનામુત્થાનાર્થે સા કથા મૂસાલિખિતે પુસ્તકે કિં યુષ્માભિ ર્નાપાઠિ?
XXVII ઈશ્વરો જીવતાં પ્રભુઃ કિન્તુ મૃતાનાં પ્રભુ ર્ન ભવતિ, તસ્માદ્ધેતો ર્યૂયં મહાભ્રમેણ તિષ્ઠથ।
XXVIII એતર્હિ એકોધ્યાપક એત્ય તેષામિત્થં વિચારં શુશ્રાવ; યીશુસ્તેષાં વાક્યસ્ય સદુત્તરં દત્તવાન્ ઇતિ બુદ્ધ્વા તં પૃષ્ટવાન્
સર્વ્વાસામ્ આજ્ઞાનાં કા શ્રેષ્ઠા? તતો યીશુઃ પ્રત્યુવાચ,
XXIX "હે ઇસ્રાયેલ્લોકા અવધત્ત, અસ્માકં પ્રભુઃ પરમેશ્વર એક એવ,
XXX યૂયં સર્વ્વન્તઃકરણૈઃ સર્વ્વપ્રાણૈઃ સર્વ્વચિત્તૈઃ સર્વ્વશક્તિભિશ્ચ તસ્મિન્ પ્રભૌ પરમેશ્વરે પ્રીયધ્વં," ઇત્યાજ્ઞા શ્રેષ્ઠા।
XXXI તથા "સ્વપ્રતિવાસિનિ સ્વવત્ પ્રેમ કુરુધ્વં," એષા યા દ્વિતીયાજ્ઞા સા તાદૃશી; એતાભ્યાં દ્વાભ્યામ્ આજ્ઞાભ્યામ્ અન્યા
કાપ્યાજ્ઞા શ્રેષ્ઠા નાસ્તિ।
XXXII તદા સોધ્યાપકસ્તમવદત્, હે ગુરો સત્યં ભવાન્ યથાર્થં પ્રોક્તવાન્ યત એકસ્માદ્ ઈશ્વરાદ્ અન્યો દ્વિતીય ઈશ્વરો નાસ્તિ;
XXXIII અપરં સર્વ્વાન્તઃકરણૈઃ સર્વ્વપ્રાણૈઃ સર્વ્વચિત્તૈઃ સર્વ્વશક્તિભિશ્ચ ઈશ્વરે પ્રેમકરણં તથા સ્વમીપવાસિનિ સ્વવત્
પ્રેમકરણઞ્ચ સર્વ્વેભ્યો હોમબલિદાનાદિભ્યઃ શ્રષ્ઠં ભવતિ।
XXXIV તતો યીશુઃ સુબુદ્ધેરિવ તસ્યેદમ્ ઉત્તરં શ્રુત્વા તં ભાષિતવાન્ ત્વમીશ્વરસ્ય રાજ્યાન્ન દૂરોસિ। ઇતઃ પરં તેન સહ કસ્યાપિ
વાક્યસ્ય વિચારં કર્ત્તાં કસ્યાપિ પ્રગલ્ભતા ન જાતા।
XXXV અનન્તરં મધ્યેમન્દિરમ્ ઉપદિશન્ યીશુરિમં પ્રશ્નં ચકાર, અધ્યાપકા અભિષિક્તં (તારકં) કુતો દાયૂદઃ સન્તાનં વદન્તિ?
XXXVI સ્વયં દાયૂદ્ પવિત્રસ્યાત્મન આવેશેનેદં કથયામાસ। યથા। "મમ પ્રભુમિદં વાક્યવદત્ પરમેશ્વરઃ। તવ શત્રૂનહં યાવત્
પાદપીઠં કરોમિ ન। તાવત્ કાલં મદીયે ત્વં દક્ષપાર્શ્વ ઉપાવિશ। "
XXXVII યદિ દાયૂદ્ તં પ્રભૂં વદતિ તર્હિ કથં સ તસ્ય સન્તાનો ભવિતુમર્હતિ? ઇતરે લોકાસ્તત્કથાં શ્રુત્વાનનન્દુઃ।
XXXVIII તદાનીં સ તાનુપદિશ્ય કથિતવાન્ યે નરા દીર્ઘપરિધેયાનિ હટ્ટે વિપનૌ ચ
XXXIX લોકકૃતનમસ્કારાન્ ભજનગૃહે પ્રધાનાસનાનિ ભોજનકાલે પ્રધાનસ્થાનાનિ ચ કાઙ્ક્ષન્તે;

XL વિધવાનાં સર્વ્વસ્વં ગ્રસિત્વા છલાદ્ દીર્ઘકાલં પ્રાર્થયન્તે તેભ્ય ઉપાધ્યાયેભ્યઃ સાવધાના ભવત; તેઽધિકતરાન્ દણ્ડાન્
પ્રાપ્સ્યન્તિ।
XLI તદનન્તરં લોકા ભાણ્ડાગારે મુદ્રા યથા નિક્ષિપન્તિ ભાણ્ડાગારસ્ય સમ્મુખે સમુપવિશ્ય યીશુસ્તદવલુલોક; તદાનીં બહવો
ધનિનસ્તસ્ય મધ્યે બહૂનિ ધનાનિ નિરક્ષિપન્।
XLII પશ્ચાદ્ એકા દરિદ્રા વિધવા સમાગત્ય દ્વિપણમૂલ્યાં મુદ્રૈકાં તત્ર નિરક્ષિપત્।
XLIII તદા યીશુઃ શિષ્યાન્ આહૂય કથિતવાન્ યુષ્માનહં યથાર્થં વદામિ યે યે ભાણ્ડાગારેઽસ્મિન ધનાનિ નિઃક્ષિપન્તિ સ્મ તેભ્યઃ
સર્વ્વેભ્ય ઇયં વિધવા દરિદ્રાધિકમ્ નિઃક્ષિપતિ સ્મ।
XLIV યતસ્તે પ્રભૂતધનસ્ય કિઞ્ચિત્ નિરક્ષિપન્ કિન્તુ દીનેયં સ્વદિનયાપનયોગ્યં કિઞ્ચિદપિ ન સ્થાપયિત્વા સર્વ્વસ્વં નિરક્ષિપત્।

# XIII

I અનન્તરં મન્દિરાદ્ બહિર્ગમનકાલે તસ્ય શિષ્યાણામેકસ્તં વ્યાહૃતવાન્ હે ગુરો પશ્યતુ કીદૃશાઃ પાષાણાઃ કીદૃક્ ચ નિચયનં।
II તદા યીશુસ્તમ્ અવદત્ ત્વં કિમેતદ્ બૃહન્નિચયનં પશ્યસિ? અસ્યૈકપાષાણોપિ દ્વિતીયપાષાણોપરિ ન સ્થાસ્યતિ સર્વ્વે
ઽધઃક્ષેપ્સ્યન્તે।
III અથ યસ્મિન્ કાલે જૈતુન્ગિરૌ મન્દિરસ્ય સમ્મુખે સ સમુપવિષ્ટસ્તસ્મિન્ કાલે પિતરો યાકૂબ્ યોહન્ આન્દ્રિયશ્ચૈતે તં રહસિ
પપ્રચ્છુઃ,
IV એતા ઘટનાઃ કદા ભવિષ્યન્તિ? તથૈતત્સર્વ્વાસાં સિદ્ધ્યુપક્રમસ્ય વા કિં ચિહ્નં? તદસ્મભ્યં કથયતુ ભવાન્।
V તતો યાશુસ્તાન્ વક્તુમારેભે, કોપિ યથા યુષ્માન્ ન ભ્રામયતિ તથાત્ર યૂયં સાવધાના ભવત।
VI યતઃ ખ્રીષ્ટોહમિતિ કથયિત્વા મમ નામ્નાનેકે સમાગત્ય લોકાનાં ભ્રમં જનયિષ્યન્તિ;
VII કિન્તુ યૂયં રણસ્ય વાર્ત્તાં રણાડમ્બરઞ્ચ શ્રુત્વા મા વ્યાકુલા ભવત, ઘટના એતા અવશ્યમ્ભાવિન્યઃ; કિન્ત્વાપાતતો ન યુગાન્તો
ભવિષ્યતિ।
VIII દેશસ્ય વિપક્ષતયા દેશો રાજ્યસ્ય વિપક્ષતયા ચ રાજ્યમુત્થાસ્યતિ, તથા સ્થાને સ્થાને ભૂમિકમ્પો દુર્ભિક્ષં મહાક્લેશાશ્ચ
સમુપસ્થાસ્યન્તિ, સર્વ્વ એતે દુઃખસ્યારમ્ભાઃ।
IX કિન્તુ યૂયમ્ આત્માર્થે સાવધાનાસ્તિષ્ઠત, યતો લોકા રાજસભાયાં યુષ્માન્ સમર્પયિષ્યન્તિ, તથા ભજનગૃહે પ્રહરિષ્યન્તિ;
યૂયં મદર્થે દેશાધિપાન્ ભૂપાંશ્ચ પ્રતિ સાક્ષ્યદાનાય તેષાં સમ્મુખે ઉપસ્થાપયિષ્યધ્વે।
X શેષીભવનાત્ પૂર્વ્વં સર્વ્વાન્ દેશીયાન્ પ્રતિ સુસંવાદઃ પ્રચારયિષ્યતે।
XI કિન્તુ યદા તે યુષ્માન્ ધૃત્વા સમર્પયિષ્યન્તિ તદા યૂયં યદ્યદ્ ઉત્તરં દાસ્યથ, તદગ્ર તસ્ય વિવેચનં મા કુરુત તદર્થં કિઞ્ચિદપિ મા
ચિન્તયત ચ, તદાનીં યુષ્માકં મનઃસુ યદ્યદ્ વાક્યમ્ ઉપસ્થાપયિષ્યતે તદેવ વદિષ્યથ, યતો યૂયં ન તદ્વક્તારઃ કિન્તુ પવિત્ર આત્મા
તસ્ય વક્તા।।
XII તદા ભ્રાતા ભ્રાતરં પિતા પુત્રં ઘાતનાર્થં પરહસ્તેષુ સમર્પયિષ્યતે, તથા પત્યાનિ માતાપિત્રો ર્વિપક્ષતયા તૌ ઘાતયિષ્યન્તિ।
XIII મમ નામહેતોઃ સર્વ્વેષાં સવિધે યૂયં જુગુપ્સિતા ભવિષ્યથ, કિન્તુ યઃ કશ્ચિત્ શેષપર્ય્યન્તં ધૈર્ય્યમ્ આલમ્બિષ્યતે સએવ
પરિત્રાસ્યતે।
XIV દાનિયેલ્ભવિષ્યદ્વાદિના પ્રોક્તં સર્વ્વનાશિ જુગુપ્સિતઞ્ચ વસ્તુ યદા ત્વયોગ્યસ્થાને વિદ્યમાનં દ્રક્ષથ (યો જનઃ પઠતિ સ
બુધ્યતાં) તદા યે યિહૂદીયદેશે તિષ્ઠન્તિ તે મહીધ્રં પ્રતિ પલાયન્તાં;
XV તથા યો નરો ગૃહોપરિ તિષ્ઠતિ સ ગૃહમધ્યં નાવરોહતુ, તથા કિમપિ વસ્તુ ગ્રહીતું મધ્યેગૃહં ન પ્રવિશતુ;
XVI તથા ચ યો નરઃ ક્ષેત્રે તિષ્ઠતિ સોપિ સ્વવસ્ત્રં ગ્રહીતું પરાવૃત્ય ન વ્રજતુ।
XVII તદાનીં ગર્બ્ભવતીનાં સ્તન્યદાત્રીણાઞ્ચ યોષિતાં દુર્ગતિ ર્ભવિષ્યતિ।
XVIII યુષ્માકં પલાયનં શીતકાલે યથા ન ભવતિ તદર્થં પ્રાર્થયધ્વં।
XIX યતસ્તદા યાદૃશી દુર્ઘટના ઘટિષ્યતે તાદૃશી દુર્ઘટના ઈશ્વરસૃષ્ટેઃ પ્રથમમારભ્યાદ્ય યાવત્ કદાપિ ન જાતા ન જનિષ્યતે ચ।
XX અપરઞ્ચ પરમેશ્વરો યદિ તસ્ય સમયસ્ય સંક્ષેપં ન કરોતિ તર્હિ કસ્યાપિ પ્રાણભૃતો રક્ષા ભવિતું ન શક્ષ્યતિ, કિન્તુ યાન્ જનાન્
મનોનીતાન્ અકરોત્ તેષાં સ્વમનોનીતાનાં હેતોઃ સ તદનેહસં સંક્ષેપ્સ્યતિ।
XXI અન્યચ્ચ પશ્યત ખ્રીષ્ટોત્ર સ્થાને વા તત્ર સ્થાને વિદ્યતે, તસ્મિન્કાલે યદિ કશ્ચિદ્ યુષ્માન્ એતાદૃશં વાક્યં વ્યાહરતિ, તર્હિ
તસ્મિન્ વાક્યે ભૈવ વિશ્વસિત।
XXII યતોનેકે મિથ્યાખ્રીષ્ટા મિથ્યાભવિષ્યદ્વાદિનશ્ચ સમુપસ્થાય બહૂનિ ચિહ્નાન્યદ્ભુતાનિ કર્મ્માણિ ચ દર્શયિષ્યન્તિ; તથા યદિ
સમ્ભવતિ તર્હિ મનોનીતલોકાનામપિ મિથ્યામતિં જનયિષ્યન્તિ।
XXIII પશ્યત ઘટનાતઃ પૂર્વ્વં સર્વ્વકાર્ય્યસ્ય વાર્ત્તાં યુષ્મભ્યમદામ્, યૂયં સાવધાનાસ્તિષ્ઠત।
XXIV અપરઞ્ચ તસ્ય ક્લેશકાલસ્યાવ્યવહિતે પરકાલે ભાસ્કરઃ સાન્ધકારો ભવિષ્યતિ તથૈવ ચન્દ્રશ્ચન્દ્રિકાં ન દાસ્યતિ।
XXV નભઃસ્થાનિ નક્ષત્રાણિ પતિષ્યન્તિ, વ્યોમમણ્ડલસ્થા ગ્રહાશ્ચ વિચલિષ્યન્તિ।
XXVI તદાનીં મહાપરાક્રમેણ મહૈશ્વર્ય્યેણ ચ મેઘમારુહ્ય સમાયાન્તં માનવસુતં માનવાઃ સમીક્ષિષ્યન્તે।
XXVII અન્યચ્ચ સ નિજદૂતાન્ પ્રહિત્ય નભોભૂમ્યોઃ સીમાં યાવદ્ જગતશ્ચતુર્દિગ્ભ્યઃ સ્વમનોનીતલોકાન્ સંગ્રહીષ્યતિ।
XXVIII ઉડુમ્બરતરો ર્દૃષ્ટાન્તં શિક્ષધ્વં યદોડુમ્બરસ્ય તરો ર્નવીનાઃ શાખા જાયન્તે પલ્લવાદીનિ ચ ર્નિગચ્છન્તિ, તદા નિદાઘકાલઃ
સવિધો ભવતીતિ યૂયં જ્ઞાતું શક્નુથ।
XXIX તદ્વદ્ એતા ઘટના દૃષ્ટ્વા સ કાલો દ્વાર્ય્યુપસ્થિત ઇતિ જાનીત।
XXX યુષ્માનહં યથાર્થં વદામિ, આધુનિકલોકાનાં ગમનાત્ પૂર્વ્વં તાનિ સર્વ્વાણિ ઘટિષ્યન્તે।
XXXI દ્યાવાપૃથિવ્યો ર્વિચલિતયોઃ સત્યો ર્મદીયા વાણી ન વિચલિષ્યતિ।
XXXII અપરઞ્ચ સ્વર્ગસ્થદૂતગણો વા પુત્રો વા તાતાદન્યઃ કોપિ તં દિવસં તં દણ્ડં વા ન જ્ઞાપયતિ।

XXXIII અતઃ સ સમયઃ કદા ભવિષ્યતિ, એતજ્જ્ઞાનાભાવાદ્ યૂયં સાવધાનાસ્તિષ્ઠત, સતર્કાશ્ચ ભૂત્વા પ્રાર્થયધ્વં;
XXXIV યદ્વત્ કશ્ચિત્ પુમાન્ સ્વનિવેશનાદ્ દૂરદેશં પ્રતિ યાત્રાકરણકાલે દાસેષુ સ્વકાર્ય્યસ્ય ભારમર્પયિત્વા સર્વ્વાન્ સ્વે સ્વે કર્મ્મણિ
નિયોજયતિ; અપરં દૌવારિકં જાગરિતું સમાદિશ્ય યાતિ, તદ્વન્ નરપુત્રઃ।
XXXV ગૃહપતિઃ સાયંકાલે નિશીથે વા તૃતીયયામે વા પ્રાતઃકાલે વા કદાગમિષ્યતિ તદ્ યૂયં ન જાનીથ;
XXXVI સ હઠાદાગત્ય યથા યુષ્માન્ નિદ્રિતાન્ ન પશ્યતિ, તદર્થં જાગરિતાસ્તિષ્ઠત।
XXXVII યુષ્માનહં યદ્ વદામિ તદેવ સર્વ્વાન્ વદામિ, જાગરિતાસ્તિષ્ઠતેતિ।

# XIV

I તદા નિસ્તારોત્સવકિણ્વહીનપૂપોત્સવયોરારમ્ભસ્ય દિનદ્વયે ઽવશિષ્ટે પ્રધાનયાજકા અધ્યાપકાશ્ચ કેનાપિ છલેન યીશું ધર્ત્તાં
હન્તુઞ્ચ મૃગયાઞ્ચક્રિરે;
II કિન્તુ લોકાનાં કલહભયાદૂચિરે, નચોત્સવકાલ ઉચિતમેતદિતિ।
III અનન્તરં બૈથનિયાપુૃરે શિમોનકુષ્ઠિનો ગૃહે યોશૌ ભોક્તુમુપવિષ્ટે સતિ કાચિદ્ યોષિત્ પાણ્ડરપાષાણસ્ય સમ્પુટકેન
મહાર્ઘ્યોત્તમતૈલમ્ આનીય સમ્પુટકં ભંક્ત્વા તસ્યોત્તમાઙ્ગે તૈલધારાં પાતયાઞ્ચક્રે।
IV તસ્માત્ કેચિત્ સ્વાન્તે કુપ્યન્તઃ કથિતવંન્તઃ કુતોયં તૈલાપવ્યયઃ?
V યદ્યેતત્ તૈલ વ્યક્રેષ્યત તર્હિ મુદ્રાપાદશતત્રયાદપ્યધિકં તસ્ય પ્રાપ્તમૂલ્યં દરિદ્રલોકેભ્યો દાતુમશક્ષ્યત, કથામેતાં કથયિત્વા તયા
યોષિતા સાકં વાચાયુહ્યન્।
VI કિન્તુ યીશુરુવાચ, કુત એતસ્યૈ કૃચ્છ્રં દદાસિ? મહ્યમિયં કર્મ્મોત્તમં કૃતવતી।
VII દરિદ્રાઃ સર્વ્વદા યુષ્માભિઃ સહ તિષ્ઠન્તિ, તસ્માદ્ યૂયં યદેચ્છથ તદૈવ તાનુપકર્ત્તાં શક્નુથ, કિન્ત્વહં યુભાભિઃ સહ નિરન્તરં ન
તિષ્ઠામિ।
VIII અસ્યા યથાસાધ્યં તથૈવાકરોદિયં, શ્મશાનયાપનાત્ પૂર્વ્વં સમેત્ય મદ્વપુષિ તૈલમ્ અમર્દ્દયત્।
IX અહં યુષ્મભ્યં યથાર્થં કથયામિ, જગતાં મધ્યે યત્ર યત્ર સુસંવાદોયં પ્રચારયિષ્યતે તત્ર તત્ર યોષિત એતસ્યાઃ સ્મરણાર્થં
તત્કૃતકર્મ્મૈતત્ પ્રચારયિષ્યતે।
X તતઃ પરં દ્વાદશાનાં શિષ્યાણામેક ઈષ્કરિયોતીયયિહૂદાખ્યો યીશું પરકરેષુ સમર્પયિતું પ્રધાનયાજકાનાં સમીપમિયાય।
XI તે તસ્ય વાક્યં સમાકર્ણ્ય સન્તુષ્ટાઃ સન્તસ્તસ્મૈ મુદ્રા દાતું પ્રત્યજાનત; તસ્માત્ સ તં તેષાં કરેષુ સમર્પણાયોપાયં મૃગયામાસ।
XII અનન્તરં કિણ્વશૂન્યપૂપોત્સવસ્ય પ્રથમેઽહનિ નિસ્તારોત્મવાર્થં મેષમારણાસમયે શિષ્યાસ્તં પપ્રચ્છઃ કુત્ર ગત્વા વયં
નિસ્તારોત્સવસ્ય ભોજ્યમાસાદયિષ્યામઃ? કિમિચ્છતિ ભવાન્?
XIII તદાનીં સ તેષાં દ્વયં પ્રેરયન્ બભાષે યુવયોઃ પુરમધ્યં ગતયોઃ સતો ર્યો જનઃ સજલકુમ્ભં વહન્ યુવાં સાક્ષાત્ કરિષ્યતિ તસ્યૈવ
પશ્ચાદ્ યાતં;
XIV સ યત્ સદનં પ્રવેક્ષ્યતિ તદ્ભવનપતિં વદતં, ગુરુરાહ યત્ર સશિષ્યોહં નિસ્તારોત્સવીયં ભોજનં કરિષ્યામિ, સા ભોજનશાલા
કુત્રાસ્તિ?
XV તતઃ સ પરિષ્કૃતાં સુસજ્જિતાં બૃહતીચઞ્ચ યાં શાલાં દર્શયિષ્યતિ તસ્યામસ્મદર્થં ભોજ્યદ્રવ્યાણ્યાસાદયતં।
XVI તતઃ શિષ્યૌ પ્રસ્થાય પુરં પ્રવિશ્ય સ યથોક્તવાન્ તથૈવ પ્રાપ્ય નિસ્તારોત્સવસ્ય ભોજ્યદ્રવ્યાણિ સમાસાદયેતામ્।
XVII અનન્તરં યીશુઃ સાયંકાલે દ્વાદશભિઃ શિષ્યૈઃ સાર્દ્ધં જગામ;
XVIII સર્વ્વેષુ ભોજનાય પ્રોપવિષ્ટેષુ સ તાનુદિતવાન્ યુષ્માનહં યથાર્થં વ્યાહરામિ, અત્ર યુષ્માકમેકો જનો યો મયા સહ ભુંક્તે
માં પરકેરેષુ સમર્પયિષ્યતે।
XIX તદાનીં તે દુઃખિતાઃ સન્ત એકૈકશસ્તં પ્રષ્ટુમારબ્ધવન્તઃ સ કિમહં? પશ્ચાદ્ અન્ય એકોભિદધે સ કિમહં?
XX તતઃ સ પ્રત્યવદદ્ એતેષાં દ્વાદશાનાં યો જનો મયા સમં ભોજનાપાત્રે પાણિં મજ્જયિષ્યતિ સ એવ।
XXI મનુજતનયમધિ યાદૃશં લિખિતમાસ્તે તદનુરૂપા ગતિસ્તસ્ય ભવિષ્યતિ, કિન્તુ યો જનો માનવસુતં સમર્પયિષ્યતે હન્ત તસ્ય
જન્માભાવે સતિ ભદ્રમભવિષ્યત્।
XXII અપરઞ્ચ તેષાં ભોજનસમયે યીશુઃ પૂપં ગૃહીત્વેશ્વરગુણાન્ અનુકીર્ત્ય ભઙ્ક્ત્વા તેભ્યો દત્ત્વા બભાષે, એતદ્ ગૃહીત્વા
ભુઞ્જીધ્વમ્ એતન્મમ વિગ્રહરૂપં।
XXIII અનન્તરં સ કંસં ગૃહીત્વેશ્વરસ્ય ગુણાન્ કીર્ત્તયિત્વા તેભ્યો દદૌ, તતસ્તે સર્વ્વે પપુઃ।
XXIV અપરં સ તાનવાદીદ્ બહૂનાં નિમિત્તં પાતિતં મમ નવીનનિયમરૂપં શોણિતમેતત્।
XXV યુષ્માનહં યથાર્થં વદામિ, ઈશ્વરસ્ય રાજ્યે યાવત્ સદ્યોજાતં દ્રાક્ષારસં ન પાસ્યામિ,તાવદહં દ્રાક્ષાફલરસં પુન ર્ન પાસ્યામિ।
XXVI તદનન્તરં તે ગીતમેકં સંગીય બહિ ર્જૈતુનં શિખરિણં યયુઃ
XXVII અથ યીશુસ્તાનુવાચ નિશાયામસ્યાં મયિ યુષ્માકં સર્વ્વેષાં પ્રત્યૂહો ભવિષ્યતિ યતો લિખિતમાસ્તે યથા, મેષાણાં રક્ષકઞ્ચાહં
પ્રહરિષ્યામિ વૈ તતઃ। મેષાણાં નિવહો નૂનં પ્રવિકીર્ણો ભવિષ્યતિ।
XXVIII કન્તુ મદુત્થાને જાતે યુષ્માકમગ્રેઽહં ગાલીલં વ્રજિષ્યામિ।
XXIX તદા પિતરઃ પ્રતિબભાષે, યદ્યપિ સર્વ્વેષાં પ્રત્યૂહો ભવતિ તથાપિ મમ નૈવ ભવિષ્યતિ।
XXX તતો યીશુરુક્તાવાન્ અહં તુભ્યં તથ્યં કથયામિ, ક્ષણાદાયામદ્ય કુક્કુટસ્ય દ્વિતીયવારરવણાત્ પૂર્વ્વં ત્વં વારત્રયં
મામપહ્નોષ્યસે।
XXXI કિન્તુ સ ગાઢં વ્યાહરદ્ યદ્યપિ ત્વયા સાર્દ્ધં મમ પ્રાણો યાતિ તથાપિ કથમપિ ત્વાં નાપહ્નોષ્યે; સર્વ્વેઽપીતરે તથૈવ બભાષિરે।
XXXII અપરઞ્ચ તેષુ ગેત્શિમાનીનામકં સ્થાન ગતેષુ સ શિષ્યાન્ જગાદ, યાવદહં પ્રાર્થયે તાવદત્ર સ્થાને યૂયં સમુપવિશત।
XXXIII અથ સ પિતરં યાકૂબં યોહનઞ્ચ ગૃહીત્વા વવ્રાજ; અત્યન્તં ત્રાસિતો વ્યાકુલિતશ્ચ તેભ્યઃ કથયામાસ,
XXXIV નિધનકાલવત્ પ્રાણો મેઽતીવ દઃખમેતિ, યૂયં જાગ્રતોત્ર સ્થાને તિષ્ઠત।

XXXV તતઃ સ કિઞ્ચિદ્દૂરં ગત્વા ભૂમાવધોમુખઃ પતિત્વા પ્રાર્થિતવાનેતત્, યદિ ભવિતું શક્યં તર્હિ દુઃખસમયોયં મત્તો દૂરીભવતુ।
XXXVI અપરમુદિતવાન્ હે પિત હે પિતઃ સર્વ્વં ત્વયા સાધ્યં, તતો હેતોરિમં કંસં મત્તો દૂરીકુરુ, કિન્તુ તન્ મમેચ્છાતો ન તવેચ્છાતો ભવતુ।
XXXVII તતઃ પરં સ એત્ય તાન્ નિદ્રિતાન્ નિરીક્ષ્ય પિતરં પ્રોવાચ, શિમોન્ ત્વં કિં નિદ્રાસિ? ઘટિકામેકામ્ અપિ જાગરિતું ન શક્નોષિ?
XXXVIII પરીક્ષાયાં યથા ન પતથ તદર્થં સચેતનાઃ સન્તઃ પ્રાર્થયધ્વં; મન ઉદ્યુક્તમિતિ સત્યં કિન્તુ વપુરશક્તિકં।
XXXIX અથ સ પુનર્વ્રજિત્વા પૂર્વ્વવત્ પ્રાર્થયાઞ્ચક્રે।
XL પરાવૃત્યાગત્ય પુનરપિ તાન્ નિદ્રિતાન્ દદર્શ તદા તેષાં લોચનાનિ નિદ્રયા પૂર્ણાનિ, તસ્માત્તસ્મૈ કા કથા કથયિતવ્યા ત એતદ્ બોદ્ધું ન શેકુઃ।
XLI તતઃપરં તૃતીયવારં આગત્ય તેભ્યો ઽકથયદ્ ઇદાનીમપિ શયિત્વા વિશ્રામ્યથ? યથેષ્ટં જાતં, સમયશ્ચોપસ્થિતઃ પશ્યત માનવતનયઃ પાપિલોકાનાં પાણિષુ સમર્પ્યતે।
XLII ઉત્તિષ્ઠત, વયં વ્રજામો યો જનો માં પરપાણિષુ સમર્પયિષ્યતે પશ્યત સ સમીપમાયાતઃ।
XLIII ઇમાં કથાં કથયતિ સ, એતર્હિદ્વાદશાનામેકો યિહૂદા નામા શિષ્યઃ પ્રધાનયાજકાનામ્ ઉપાધ્યાયાનાં પ્રાચીનલોકાનાઞ્ચ સન્નિધેઃ ખડ્ગલગુડધારિણો બહુલોકાન્ ગૃહીત્વા તસ્ય સમીપ ઉપસ્થિતવાન્।
XLIV અપરઞ્ચાસૌ પરપાણિષુ સમર્પયિતા પૂર્વ્વમિતિ સઙ્કેતં કૃતવાન્ યમહં ચુમ્બિષ્યામિ સ એવાસૌ તમેવ ધૃત્વા સાવધાનં નયત।
XLV અતો હેતોઃ સ આગત્યૈવ યોશોઃ સવિધં ગત્વા હે ગુરો હે ગુરો, ઇત્યુક્ત્વા તં ચુચુમ્બ।
XLVI તદા તે તદુપરિ પાણીનર્પયિત્વા તં દધ્નુઃ।
XLVII તતસ્તસ્ય પાર્શ્વસ્થાનાં લોકાનામેકઃ ખડ્ગં નિષ્કોષયન્ મહાયાજકસ્ય દાસમેકં પ્રહૃત્ય તસ્ય કર્ણં ચિચ્છેદ।
XLVIII પશ્ચાદ્ યીશુસ્તાન્ વ્યાજહાર ખડ્ગાન્ લગુડાંશ્ચ ગૃહીત્વા માં કિં ચૌરં ધર્ત્તું સમાયાતાઃ?
XLIX મધ્યેમન્દિરં સમુપદિશન્ પ્રત્યહં યુષ્માભિઃ સહ સ્થિતવાનતહં, તસ્મિન્ કાલે યૂયં માં નાદીધરત, કિન્ત્વનેન શાસ્ત્રીયં વચનં સેધનીયં।
L તદા સર્વ્વે શિષ્યાસ્તં પરિત્યજ્ય પલાયાઞ્ચક્રિરે।
LI અથૈકો યુવા માનવો નગ્નકાયે વસ્ત્રમેકં નિધાય તસ્ય પશ્ચાદ્ વ્રજન્ યુવલોકૈ ર્ધૃતો
LII વસ્ત્રં વિહાય નગ્નઃ પલાયાઞ્ચક્રે।
LIII અપરઞ્ચ યસ્મિન્ સ્થાને પ્રધાનયાજકા ઉપાધ્યાયાઃ પ્રાચીનલોકાશ્ચ મહાયાજકેન સહ સદસિ સ્થિતાસ્તસ્મિન્ સ્થાને મહાયાજકસ્ય સમીપં યીશું નિન્યુઃ।
LIV પિતરો દૂરે તત્પશ્ચાદ્ ઇત્વા મહાયાજકસ્યાટ્ટાલિકાં પ્રવિશ્ય કિઙ્કરૈઃ સહોપવિશ્ય વહ્નિતાપં જગ્રાહ।
LV તદાનીં પ્રધાનયાજકા મન્ત્રિણશ્ચ યીશું ઘાતયિતું તત્પ્રાતિકૂલ્યેન સાક્ષિણો મૃગયાઞ્ચક્રિરે, કિન્તુ ન પ્રાપ્તાઃ।
LVI અનેકૈસ્તદ્વિરુદ્ધં મૃષાસાક્ષ્યે દત્તેપિ તેષાં વાક્યાનિ ન સમગચ્છન્ત।
LVII સર્વ્વશેષે કિયન્ત ઉત્થાય તસ્ય પ્રાતિકૂલ્યેન મૃષાસાક્ષ્યં દત્ત્વા કથયામાસુઃ,
LVIII ઇદં કરકૃતમન્દિરં વિનાશ્ય દિનત્રયમધ્યે પુનરપરમ્ અકરકૃતં મન્દિરં નિર્મ્માસ્યામિ, ઇતિ વાક્યમ્ અસ્ય મુખાત્ શ્રુતમસ્માભિરિતિ।
LIX કિન્તુ તત્રાપિ તેષાં સાક્ષ્યકથા ન સઙ્ગાતાઃ।
LX અથ મહાયાજકો મધ્યેસભમ્ ઉત્થાય યીશું વ્યાજહાર, એતે જનાસ્ત્વયિ યત્ સાક્ષ્યમદુઃ ત્વમેતસ્ય કિમપ્યુત્તરં કિં ન દાસ્યસિ?
LXI કિન્તુ સ કિમપ્યુત્તરં ન દત્વા મૌનીભૂય તસ્થૌ; તતો મહાયાજકઃ પુનરપિ તં પૃષ્ટાવાન્ ત્વં સચ્ચિદાનન્દસ્ય તનયો ઽભિષિક્તસ્ત્રતા?
LXII તદા યીશુસ્તં પ્રોવાચ ભવામ્યહમ્ યૂયઞ્ચ સર્વ્વશક્તિમતો દક્ષીણપાર્શ્વે સમુપવિશન્તં મેઘ મારુહ્ય સમાયાન્તઞ્ચ મનુષ્યપુત્રં સન્દ્રક્ષ્યથ।
LXIII તદા મહાયાજકઃ સ્વં વમનં છિત્વા વ્યાવહરત્
LXIV કિમસ્માકં સાક્ષિભિઃ પ્રયોજનમ્? ઈશ્વરનિન્દાવાક્યં યુષ્માભિરશ્રાવિ કિં વિચારયથ? તદાનીં સર્વ્વે જગદુરયં નિધનદણ્ડમર્હતિ।
LXV તતઃ કશ્ચિત્ કશ્ચિત્ તદ્વપુષિ નિષ્ઠીવં નિચિક્ષેપ તથા તન્મુખમાચ્છાદ્ય ચપેટેન હત્વા ગદિતવાન્ ગણયિત્વા વદ, અનુચરાશ્ચ ચપેટૈસ્તમાજઘ્નુઃ
LXVI તતઃ પરં પિતરેઽટ્ટાલિકાધઃકોષ્ઠે તિષ્ઠતિ મહાયાજકસ્યૈકા દાસી સમેત્ય
LXVII તં વિહ્નિતાપં ગૃહ્લન્તં વિલોક્ય તં સુનિરીક્ષ્ય બભાષે ત્વમપિ નાસરતીયયીશોઃ સઙ્ગિનામ્ એકો જન આસીઃ।
LXVIII કિન્તુ સોપહ્નુત્ય જગાદ તમહં ન વદ્મિ ત્વં યત્ કથયમિ તદપ્યહં ન બુદ્ધ્યે। તદાનીં પિતરે ચત્વરં ગતવતિ કુ◌ક્કુટો રુરાવ।
LXIX અથાન્યા દાસી પિતરં દૃષ્ટ્વા સમીપસ્થાન્ જનાન્ જગાદ અયં તેષામેકો જનઃ।
LXX તતઃ સ દ્વિતીયવારમ્ અપહ્નુતવાન્ પશ્ચાત્ તત્રસ્થા લોકાઃ પિતરં પ્રોચુસ્ત્વમવશ્યં તેષામેકો જનઃ યતસ્ત્વં ગાલીલીયો નર ઇતિ તવોચ્ચારણં પ્રકાશયતિ।
LXXI તદા સ શપથાભિશાપૌ કૃત્વા પ્રોવાચ યૂયં કથાં કથયથ તં નરં ન જાનેઽહં।
LXXII તદાનીં દ્વિતીયવારં કુક્કુટો ઽરાવીત્। કુક્કુટસ્ય દ્વિતીયરવાત્ પૂર્વ્વં ત્વં માં વારત્રયમ્ અપહ્નોષ્યસિ, ઇતિ યદ્વાક્યં યીશુના સમુદિતં તત્ તદા સંસ્મૃત્ય પિતરો રોદિતુમ્ આરભત।

# XV

I અથ પ્રભાતે સતિ પ્રધાનયાજકાઃ પ્રાઞ્ચ ઉપાધ્યાયાઃ સર્વ્વે મન્ત્રિણશ્ચ સભાં કૃત્વા યીશું બન્ધયિત્વ પીલાતાખ્યસ્ય દેશાધિપતેઃ સવિધં નીત્વા સમર્પયામાસુઃ।
II તદા પીલાતસ્તં પૃષ્ટવાન્ ત્વં કિં યિહૂદીયલોકાનાં રાજા? તતઃ સ પ્રત્યુક્તવાન્ સત્યં વદસિ।
III અપરં પ્રધાનયાજકાસ્તસ્ય બહુષુ વાક્યેષુ દોષમારોપયાઞ્ચક્રુઃ કિન્તુ સ કિમપિ ન પ્રત્યુવાચ।
IV તદાનીં પીલાતસ્તં પુનઃ પપ્રચ્છ ત્વં કિં નોત્તરયસિ? પશ્યૈતે ત્વદ્વિરુદ્ધં કતિષુ સાક્ષ્યેષુ સાક્ષં દદતિ।
V કન્તુ યીશુસ્તદાપિ નોત્તરં દદૌ તતઃ પીલાત આશ્ચર્ય્યં જગામ।
VI અપરઞ્ચ કારાબદ્ધે કસ્મિંશ્ચિત્ જને તન્મહોત્સવકાલે લોકૈ ર્યાચિતે દેશાધિપતિસ્તં મોચયતિ।
VII યે ચ પૂર્વ્વમુપપ્લવમકાર્ષુરુપપ્લવે વધમપિ કૃતવન્તસ્તેષાં મધ્યે તદાનોં બરબ્બાનામક એકો બદ્ધ આસીત્।
VIII અતો હેતોઃ પૂર્વ્વાપરીયાં રીતિકથાં કથયિત્વા લોકા ઉચ્ચૈરુવન્તઃ પીલાતસ્ય સમક્ષં નિવેદયામાસુઃ।
IX તદા પીલાતસ્તાનાચખ્યૌ તર્હિ કિં યિહૂદીયાનાં રાજાનં મોચયિષ્યામિ? યુષ્માભિઃ કિમિષ્યતે?
X યતઃ પ્રધાનયાજકા ઈર્ષ્યાત એવ યીશું સમાર્પયન્નિતિ સ વિવેદ।
XI કિન્તુ યથા બરબ્બાં મોચયતિ તથા પ્રાર્થયિતું પ્રધાનયાજકા લોકાન્ પ્રવર્ત્તયામાસુઃ।
XII અથ પીલાતઃ પુનઃ પૃષ્ટવાન્ તર્હિ યં યિહૂદીયાનાં રાજેતિ વદથ તસ્ય કિં કરિષ્યામિ યુષ્માભિઃ કિમિષ્યતે?
XIII તદા તે પુનરપિ પ્રોચ્ચૈઃ પ્રોચુસ્તં ક્રુશે વેધય।
XIV તસ્માત્ પીલાતઃ કથિતવાન્ કુતઃ? સ કિં કુકર્મ્મ કૃતવાન્? કિન્તુ તે પુનશ્ચ રુવન્તો વ્યાજહ્રુસ્તં ક્રુશે વેધય।
XV તદા પીલાતઃ સર્વ્વાલ્લોકાન્ તોષયિતુમિચ્છન્ બરબ્બાં મોચયિત્વા યીશું કશાભિઃ પ્રહૃત્ય ક્રુશે વેદ્ધું તં સમર્પયામ્બભૂવ।
XVI અનન્તરં સૈન્યગણોઽટ્ટાલિકામ્ અર્થાદ્ અધિપતે ર્ગૃહં યીશું નીત્વા સેનાનિવહં સમાહુયત્।
XVII પશ્ચાત્ તે તં ધૂમલવર્ણવસ્ત્રં પરિધાપ્ય કણ્ટકમુકુટં રચયિત્વા શિરસિ સમારોપ્ય
XVIII હે યિહૂદીયાનાં રાજન્ નમસ્કાર ઇત્યુક્ત્વા તં નમસ્કર્ત્તામારેભિરે।
XIX તસ્યોત્તમાઙ્ગે વેત્રાઘાતં ચક્રુસ્તદ્ગાત્રે નિષ્ઠીવઞ્ચ નિચિક્ષિપુઃ, તથા તસ્ય સમ્મુખે જાનુપાતં પ્રણોમુઃ
XX ઇત્થમુપહસ્ય ધૂમ્રવર્ણવસ્ત્રમ્ ઉત્તાર્ય્ય તસ્ય વસ્ત્રં તં પર્ય્યધાપયન્ ક્રુશે વેદ્ધું બહિર્નિન્યુશ્ચ।
XXI તતઃ પરં સેકન્દરસ્ય રુફસ્ય ચ પિતા શિમોન્નામા કુરીણીયલોક એકઃ કુતશ્ચિદ્ ગ્રામાદેત્ય પથિ યાતિ તં તે યીશોઃ ક્રુશં વોઢું બલાદ્ દધ્નુઃ।
XXII અથ ગુલ્ગલ્તા અર્થાત્ શિરઃકપાલનામકં સ્થાનં યીશુમાનીય
XXIII તે ગન્ધરસમિશ્રિતં દ્રાક્ષારસં પાતું તસ્મૈ દદુઃ કિન્તુ સ ન જગ્રાહ।
XXIV તસ્મિન્ ક્રુશે વિદ્ધે સતિ તેષામેકૈકશઃ કિં પ્રાપ્સ્યતીતિ નિર્ણયાય
XXV તસ્ય પરિધેયાનાં વિભાગાર્થં ગુટિકાપાતં ચક્રુઃ।
XXVI અપરમ્ એષ યિહૂદીયાનાં રાજેતિ લિખિતં દોષપત્રં તસ્ય શિરઊર્દ્વ્વમ્ આરોપયાઞ્ચક્રુઃ।
XXVII તસ્ય વામદક્ષિણયો દ્વૌ ચૌરૌ ક્રુશયો ર્વિવિધાતે।
XXVIII તેનૈવ "અપરાધિજનૈઃ સાર્દ્ધં સ ગણિતો ભવિષ્યતિ," ઇતિ શાસ્ત્રોક્તં વચનં સિદ્ધમભૂત।
XXIX અનન્તરં માર્ગે યે યે લોકા ગમનાગમને ચક્રુસ્તે સર્વ્વ એવ શિરાંસ્યાન્દોલ્ય નિન્દન્તો જગદુઃ, રે મન્દિરનાશક રે દિનત્રયમધ્યે તન્નિર્મ્માયિક,
XXX અધુનાત્માનમ્ અવિત્વા ક્રુશાદવરોહ।
XXXI કિઞ્ચ પ્રધાનયાજકા અધ્યાપકાશ્ચ તદ્વત્ તિરસ્કૃત્ય પરસ્પરં ચચક્ષિરે એષ પરાનાવત્ કિન્તુ સ્વમવિતું ન શક્નોતિ।
XXXII યદીસ્રાયેલો રાજાભિષિક્તસ્ત્રાતા ભવતિ તર્હ્યધુનૈન ક્રુશાદવરોહતુ વયં તદ્ દૃષ્ટ્વા વિશ્વસિષ્યામઃ; કિઞ્ચ યૌ લોકૌ તેન સાર્દ્ધં ક્રુશે ડવિધ્યેતાં તાવપિ તં નિર્ભર્ત્સયામાસતુઃ।
XXXIII અથ દ્વિતીયયામાત્ તૃતીયયામં યાવત્ સર્વ્વો દેશઃ સાન્ધકારોભૂત્।
XXXIV તતસ્તૃતીયપ્રહરે યીશુરુચ્ચૈરવદત્ એલી એલી લામા શિવક્તની અર્થાદ્ "હે મદીશ મદીશ ત્વં પર્ય્યત્યાક્ષીઃ કુતો હિ માં?"
XXXV તદા સમીપસ્થલોકાનાં કેચિત્ તદ્વાક્યં નિશમ્યાચખ્યુઃ પશ્યૈષ એલિયમ્ આહૂયતિ।
XXXVI તત એકો જનો ધાવિત્વાગત્ય સ્પઞ્જે ડમ્લરસં પૂરયિત્વા તં નડાગ્રે નિધાય પાતું તસ્મૈ દત્ત્વાવદત્ તિષ્ઠ એલિય એનમવરોહયિતુમ્ એતિ ન વેતિ પશ્યામિ।
XXXVII અથ યીશુરુચ્ચૈઃ સમાહૂય પ્રાણાન્ જહૌ।
XXXVIII તદા મન્દિરસ્ય જવનિકોર્દ્વ્વાદધઃર્ય્યન્તા વિદીર્ણા દ્વિખણ્ડાભૂત્।
XXXIX કિઞ્ચ ઇત્થમુચ્ચૈરાહૂય પ્રાણાન્ ત્યજન્તં તં દૃષ્દ્વા તદ્રક્ષણાય નિયુક્તો યઃ સેનાપતિરાસીત્ સોવદત્ નરોયમ્ ઈશ્વરપુત્ર ઇતિ સત્યમ્।
XL તદાનીં મગ્દલીની મરિસમ્ કનિષ્ઠયાકૂબો યોસેશ્ચ માતાન્યમરિયમ્ શાલોમી ચ યાઃ સ્ત્રિયો
XLI ગાલીલ્પ્રદેશે યીશું સેવિત્વા તદનુગામિન્યો જાતા ઇમાસ્તદન્યાશ્ચ યા અનેકા નાર્યો યીશુના સાર્દ્ધં યિરૂશાલમમાયાતાસ્તાશ્ચ દૂરાત્ તાનિ દદૃશુઃ।
XLII અથાસાદનદિનસ્યાર્થાદ્ વિશ્રામવારાત્ પૂર્વ્વદિનસ્ય સાયંકાલ આગત
XLIII ઈશ્વરરાજ્યાપેક્ષ્યરિમથીયયૂષફ્નામા માન્યમન્ત્રી સમેત્ય પીલાતસવિધં નિર્ભયો ગત્વા યીશોર્દેહં યયાચે।
XLIV કિન્તુ સ ઇદાનીં મૃતઃ પીલાત ઇત્યસમ્ભવં મત્વા શતસેનાપતિમાહૂય સ કદા મૃત ઇતિ પપ્રચ્છ।
XLV શતસેમનાપતિમુખાત્ તજ્જ્ઞાત્વા યૂષફે યીશોર્દેહં દદૌ।

XLVI પશ્ચાત્ સ સૂક્ષ્મં વાસઃ ક્રીત્વા યીશોઃ કાયમવરોહ્ય તેન વાસસા વેષ્ટાયિત્વા ગિરૌ ખાતશ્મશાને સ્થાપિતવાન્ પાષાણં લોઠયિત્વા દ્વારિ નિદધે।
XLVII કિન્તુ યત્ર સોસ્થાપ્યત તત મગ્દલીની મરિયમ્ યોસિમાતૃમરિયમ્ ચ દદૃશતૃઃ।

# XVI

I અથ વિશ્રામવારે ગતે મગ્દલીની મરિયમ્ યાકૂબમાતા મરિયમ્ શાલોમી ચેમાસ્તં મર્દ્દયિતું સુગન્ધિદ્રવ્યાણિ ક્રીત્વા
II સપ્તાહપ્રથમદિનેઽતિપ્રત્યૂષે સૂર્ય્યોદયકાલે શ્મશાનમુપગતાઃ।
III કિન્તુ શ્મશાનદ્વારપાષાણોઽતિબૃહન્ તં કોઽપસારયિષ્યતીતિ તાઃ પરસ્પરં ગદન્તિ!
IV એતર્હિ નિરીક્ષ્ય પાષાણો દ્વારો ડપસારિત ઇતિ દદૃશુઃ।
V પશ્ચાત્તાઃ શ્મશાનં પ્રવિશ્ય શુક્લવર્ણદીર્ઘપરિચ્છદાવૃતમેકં યુવાનં શ્મશાનદક્ષિણપાર્શ્વ ઉપવિષ્ટં દૃષ્ટ્વા ચમચ્ચક્રુઃ।
VI સોઽવદત્, માભૈષ્ટ યૂયં ક્રુશે હતં નાસરતીયયીશું ગવેષયથ સોત્ર નાસ્તિ શ્મશાનાદુદસ્થાત્; તૈ ર્યત્ર સ સ્થાપિતઃ સ્થાનં તદિદં પશ્યત।
VII કિન્તુ તેન યથોક્તં તથા યુષ્માકમગ્રે ગાલીલં યાસ્યતે તત્ર સ યુષ્માન્ સાક્ષાત્ કરિષ્યતે યૂયં ગત્વા તસ્ય શિષ્યેભ્યઃ પિતરાય ચ વાર્ત્તામિમાં કથયત।
VIII તાઃ કમ્પિતા વિસ્તિતાશ્ચ તૂર્ણં શ્મશાનાદ્ બહિર્ગત્વા પલાયન્ત ભયાત્ કમપિ કિમપિ નાવદંશ્ચ।
IX અપરં યીશુઃ સપ્તાહપ્રથમદિને પ્રત્યૂષે શ્મશાનાદુત્થાય યસ્યાઃ સપ્તભૂતાસ્ત્યાજિતાસ્તસ્યૈ મગ્દલીનીમરિયમે પ્રથમં દર્શનં દદૌ।
X તતઃ સા ગત્વા શોકરોદનકૃદ્ભ્યોઽનુગતલોકેભ્યસ્તાં વાર્ત્તાં કથયામાસ।
XI કિન્તુ યીશુઃ પુનર્જીવન્ તસ્યૈ દર્શનં દત્તવાનિતિ શ્રુત્વા તે ન પ્રત્યયન્।
XII પશ્ચાત્ તેષાં દ્વાયો ર્ગ્રામયાનકાલે યીશુરન્યવેશં ધૃત્વા તાભ્યાં દર્શન દદૌ!
XIII તાવપિ ગત્વાન્યશિષ્યેભ્યસ્તાં કથાં કથયાઞ્ચક્રતુઃ કિન્તુ તયોઃ કથામપિ તે ન પ્રત્યયન્।
XIV શેષત એકાદશશિષ્યેષુ ભોજનોપવિષ્ટેષુ યીશુસ્તેભ્યો દર્શનં દદૌ તથોત્થાનાત્ પરં તદ્દર્શનપ્રાપ્તલોકાનાં કથાયામવિશ્વાસકરણાત્ તેષામવિશ્વાસમનઃકાઠિન્યાભ્યાં હેતુભ્યાં સ તાંસ્તર્જિતવાન્।
XV અથ તાનાચખ્યૌ યૂયં સર્વ્વજગદ્ ગત્વા સર્વ્વજનાન્ પ્રતિ સુસંવાદં પ્રચારયત।
XVI તત્ર યઃ કશ્ચિદ્ વિશ્વસ્ય મજ્જિતો ભવેત્ સ પરિત્રાસ્યતે કિન્તુ યો ન વિશ્વસિષ્યતિ સ દણ્ડયિષ્યતે।
XVII કિઞ્ચ યે પ્રત્યેષ્યન્તિ તૈરીદૃગ્ આશ્ચર્ય્યં કર્મ્મ પ્રકાશયિષ્યતે તે મન્નામ્ના ભૂતાન્ ત્યાજયિષ્યન્તિ ભાષા અન્યાશ્ચ વદિષ્યન્તિ।
XVIII અપરં તૈઃ સર્પેષુ ધૃતેષુ પ્રાણનાશકવસ્તુનિ પીતે ચ તેષાં કાપિ ક્ષતિ ર્ન ભવિષ્યતિ; રોગિણાં ગાત્રેષુ કરાર્પિતે તેઽરોગા ભવિષ્યન્તિ ચ।
XIX અથ પ્રભુસ્તાનિત્યાદિશ્ય સ્વર્ગં નીતઃ સન્ પરમેશ્વરસ્ય દક્ષિણ ઉપવિવેશ।
XX તતસ્તે પ્રસ્થાય સર્વ્વત્ર સુસંવાદીયકથાં પ્રચારયિતુમારેભિરે પ્રભુસ્તુ તેષાં સહાયઃ સન્ પ્રકાશિતાશ્ચર્ય્યક્રિયાભિસ્તાં કથાં પ્રમાણવતીં ચકાર। ઇતિ।

# લૂકલિખિતઃ સુસંવાદઃ

I પ્રથમતો યે સાક્ષિણો વાક્યપ્રચારકાશ્ચાસન્ તેઽસ્માકં મધ્યે યદ્યત્ સપ્રમાણં વાક્યમર્પયન્તિ સ્મ
II તદનુસારતોઽન્યેપિ બહવસ્તદ્વૃત્તાન્તં રચયિતું પ્રવૃત્તાઃ।
III અતએવ હે મહામહિમથિયફિલ્ ત્વં યા યાઃ કથા અશિક્ષ્યથાસ્તાસાં દૃઢપ્રમાણાનિ યથા પ્રાપ્નોષિ
IV તદર્થં પ્રથમમારભ્ય તાનિ સર્વ્વાણિ જ્ઞાત્વાહમપિ અનુક્રમાત્ સર્વ્વવૃત્તાન્તાન્ તુભ્યં લેખિતું મતિમકાર્ષમ્।
V યિહૂદાદેશીયહેરોદ્નામકે રાજત્વં કુર્વ્વતિ અબીયયાજકસ્ય પર્ય્યાયાધિકારી સિખરિયનામક એકો યાજકો હારોણવંશોદ્ભવા
ઇલીશેવાખ્યા
VI તસ્ય જાયા દ્વાવિમૌ નિર્દોષૌ પ્રભોઃ સર્વ્વાજ્ઞા વ્યવસ્થાશ્ચ સંમન્ય ઈશ્વરદૃષ્ટૌ ધાર્મ્મિકાવાસ્તામ્।
VII તયોઃ સન્તાન એકોપિ નાસીત્, યત ઇલીશેવા બન્ધ્યા તૌ દ્વાવેવ વૃદ્ધાવભવતામ્।
VIII યદા સ્વપર્ય્યાનુક્રમેણ સિખરિય ઈશ્વાસ્ય સમક્ષં યાજકીયં કર્મ્મ કરોતિ
IX તદા યજ્ઞસ્ય દિનપરિપાટ્યા પરમેશ્વરસ્ય મન્દિરે પ્રવેશકાલે ધૂપજ્વાલનં કર્મ્મ તસ્ય કરણીયમાસીત્।
X તદ્ધૂપજ્વાલનકાલે લોકનિવહે પ્રાર્થનાં કર્ત્તું બહિસ્તિષ્ઠતિ
XI સતિ સિખરિયો યસ્યાં વેદ્યાં ધૂપં જ્વાલયતિ તદ્દક્ષિણપાર્શ્વે પરમેશ્વરસ્ય દૂત એક ઉપસ્થિતો દર્શનં દદૌ।
XII તં દૃષ્ટ્વા સિખરિય ઉદ્વિવિજે શશઙ્કે ચ।
XIII તદા સ દૂતસ્તં બભાષે હે સિખરિય મા ભૈસ્તવ પ્રાર્થના ગ્રાહ્યા જાતા તવ ભાર્ય્યા ઇલીશેવા પુત્રં પ્રસોષ્યતે તસ્ય નામ યોહન્
ઇતિ કરિષ્યસિ।
XIV કિઞ્ચ ત્વં સાનન્દઃ સહર્ષશ્ચ ભવિષ્યસિ તસ્ય જન્મનિ બહવ આનન્દિષ્યન્તિ ચ।
XV યતો હેતોઃ સ પરમેશ્વરસ્ય ગોચરે મહાન્ ભવિષ્યતિ તથા દ્રાક્ષારસં સુરાં વા કિમપિ ન પાસ્યતિ, અપરં જન્મારભ્ય
પવિત્રેણાત્મના પરિપૂર્ણઃ
XVI સન્ ઇસ્રાયેલ્વંશીયાન્ અનેકાન્ પ્રભોઃ પરમેશ્વરસ્ય માર્ગમાનેષ્યતિ।
XVII સન્તાનાન્ પ્રતિ પિતૃણાં મનાંસિ ધર્મ્મજ્ઞાનં પ્રત્યનાજ્ઞાગ્રાહિણશ્ચ પરાવર્ત્તયિતું, પ્રભોઃ પરમેશ્વરસ્ય સેવાર્થમ્ એકાં
સજ્જિતજાતિં વિધાતુઞ્ચ સ એલિયરૂપાત્મશક્તિપ્રાપ્તસ્તસ્યાગ્રે ગમિષ્યતિ।
XVIII તદા સિખરિયો દૂતમવાદીત્ કથમેતદ્ વેત્સ્યામિ? યતોહં વૃદ્ધો મમ ભાર્ય્યા ચ વૃદ્ધા।
XIX તતો દૂતઃ પ્રત્યુવાચ પશ્યેશ્વરસ્ય સાક્ષાદ્વર્ત્તી જિબ્રાયેલ્નામા દૂતોહં ત્વયા સહ કથાં ગદિતું તુભ્યમિમાં શુભવાર્ત્તાં દાતુઞ્ચ
પ્રેષિતઃ।
XX કિન્તુ મદીયં વાક્યં કાલે ફલિષ્યતિ તત્ ત્વયા ન પ્રતીતમ્ અતઃ કારણાદ્ યાવદેવ તાનિ ન સેત્સ્યન્તિ તાવત્ ત્વં વક્તુંમશક્તો
મૂકો ભવ।
XXI તદાનીં યે યે લોકાઃ સિખરિયમપૈક્ષન્ત તે મધ્યેમન્દિરં તસ્ય બહુવિલમ્બાદ્ આશ્ચર્ય્યં મેનિરે।
XXII સ બહિરાગતો યદા કિમપિ વાક્યં વક્તુમશક્તઃ સઙ્કેતં કૃત્વા નિઃશબ્દસ્તસ્યૌ તદા મધ્યેમન્દિરં કસ્યચિદ્ દર્શનં તેન પ્રાપ્તમ્
ઇતિ સર્વ્વે બુબુધિરે।
XXIII અનન્તરં તસ્ય સેવનપર્ય્યાયે સમ્પૂર્ણે સતિ સ નિજગેહં જગામ।
XXIV કતિપયદિનેષુ ગતેષુ તસ્ય ભાર્ય્યા ઇલીશેવા ગર્ભ્ભવતી બભૂવ
XXV પશ્ચાત્ સા પઞ્ચમાસાન્ સંગોપ્યાકથયત્ લોકાનાં સમક્ષં મમાપમાનં ખણ્ડયિતું પરમેશ્વરો મયિ દૃષ્ટિં પાતયિત્વા કર્મ્મેદૃશં
કૃતવાન્।
XXVI અપરઞ્ચ તસ્યા ગર્બ્ભસ્ય ષષ્ઠે માસે જાતે ગાલીલ્પ્રદેશીયનાસરત્પુરે
XXVII દાયૂદો વંશીયાય યૂષફ્નામ્ને પુરુષાય યા મરિયમ્નામકુમારી વાગ્દત્તાસીત્ તસ્યાઃ સમીપં જિબ્રાયેલ્ દૂત ઈશ્વરેણ પ્રહિતઃ।
XXVIII સ ગત્વા જગાદ હે ઈશ્વરાનુગૃહીતકન્યે તવ શુભં ભૂયાત્ પ્રભુઃ પરમેશ્વરસ્તવ સહાયોસ્તિ નારીણાં મધ્યે ત્વમેવ ધન્યા।
XXIX તદાનીં સા તં દૃષ્ટ્વા તસ્ય વાક્યત ઉદ્વિજ્ય કીદૃશં ભાષણમિદમ્ ઇતિ મનસા ચિન્તયામાસ।
XXX તતો દૂતોઽવદત્ હે મરિયમ્ ભયં માકાર્ષીઃ, ત્વયિ પરમેશ્વરસ્યાનુગ્રહોસ્તિ।
XXXI પશ્ય ત્વં ગર્બ્ભં ધૃત્વા પુત્રં પ્રસોષ્યસે તસ્ય નામ યીશુરિતિ કરિષ્યસિ।
XXXII સ મહાન્ ભવિષ્યતિ તથા સર્વ્વેભ્યઃ શ્રેષ્ઠસ્ય પુત્ર ઇતિ ખ્યાસ્યતિ; અપરં પ્રભુઃ પરમેશ્વરસ્તસ્ય પિતુર્દાયૂદઃ સિંહાસનં
તસ્મૈ દાસ્યતિ;
XXXIII તથા સ યાકૂબો વંશોપરિ સર્વ્વદા રાજત્વં કરિષ્યતિ, તસ્ય રાજત્વસ્યાન્તો ન ભવિષ્યતિ।
XXXIV તદા મરિયમ્ તં દૂતં બભાષે નાહં પુરુષસઙ્ગં કરોમિ તર્હિ કથમેતત્ સમ્ભવિષ્યતિ?
XXXV તતો દૂતોઽકથયત્ પવિત્ર આત્મા ત્વામાશ્રાયિષ્યતિ તથા સર્વ્વશ્રેષ્ઠસ્ય શક્તિસ્તવોપરિ છાયાં કરિષ્યતિ તતો હેતોસ્તવ
ગર્બ્ભાદ્ યઃ પવિત્રબાલકો જનિષ્યતે સ ઈશ્વરપુત્ર ઇતિ ખ્યાતિં પ્રાપ્સ્યતિ।
XXXVI અપરઞ્ચ પશ્ય તવ જ્ઞાતિરિલીશેવા યાં સર્વ્વે બન્ધ્યામવદન્ ઇદાનીં સા વાર્દ્ધક્યે સન્તાનમેકં ગર્બ્ભેઽધારયત્ તસ્ય
ષષ્ઠમાસોભૂત્।
XXXVII કિમપિ કર્મ્મ નાસાધ્યમ્ ઈશ્વરસ્ય।
XXXVIII તદા મરિયમ્ જગાદ, પશ્ય પ્રભેરહં દાસી મહ્યં તવ વાક્યાનુસારેણ સર્વ્વમેતદ્ ઘટતામ્; અનનતરં દૂતસ્તસ્યાઃ સમીપાત્
પ્રતસ્થે।
XXXIX અથ કતિપયદિનાત્ પરં મરિયમ્ તસ્માત્ પર્વ્વતમયપ્રદેશીયયિહૂદાયા નગરમેકં શીઘ્રં ગત્વા

XL સિખરિયયાજકસ્ય ગૃહં પ્રવિશ્ય તસ્ય જાયામ્ ઇલીશેવાં સમ્બોધ્યાવદત્|
XLI તતો મરિયમઃ સમ્બોધનવાક્યે ઇલીશેવાયાઃ કર્ણયોઃ પ્રવિષ્ટમાત્રે સતિ તસ્યા ગર્બ્ભસ્થબાલકો નનર્ત્ત| તત ઇલીશેવા પવિત્રેણાત્મના પરિપૂર્ણા સતી
XLII પ્રોચ્ચૈર્ગદિતુમારેભે, યોષિતાં મધ્યે ત્વમેવ ધન્યા, તવ ગર્બ્ભસ્થઃ શિશુશ્ચ ધન્યઃ|
XLIII ત્વં પ્રભોર્માતા, મમ નિવેશને ત્વયા ચરણાવર્પિતૌ, મમાદ્ય સૌભાગ્યમેતત્|
XLIV પશ્ય તવ વાક્યે મમ કર્ણયોઃ પ્રવિષ્ટમાત્રે સતિ મમોદરસ્થઃ શિશુરાનન્દાન્ નનર્ત્ત|
XLV યા સ્ત્રી વ્યશ્વસીત્ સા ધન્યા, યતો હેતોસ્તાં પ્રતિ પરમેશ્વરોક્તં વાક્યં સર્વ્વં સિદ્ધં ભવિષ્યતિ|
XLVI તદાનીં મરિયમ્ જગાદ| ધન્યવાદં પરેશસ્ય કરોતિ મામકં મનઃ|
XLVII મમાત્મા તારકેશે ચ સમુલ્લાસં પ્રગચ્છતિ|
XLVIII અકરોત્ સ પ્રભુ ર્દુષ્ટિં સ્વદાસ્યા દુર્গતિં પ્રતિ| પશ્યાદ્યારભ્ય માં ધન્યાં વક્ષ્યન્તિ પુરુષાઃ સદા|
XLIX યઃ સર્વ્વશક્તિમાન્ યસ્ય નામાપિ ચ પવિત્રકં| સ એવ સુમહત્કર્મ્મ કૃતવાન્ મન્નિમિત્તકં|
L યે બિભ્યતિ જનાસ્તસ્માત્ તેષાં સન્તાનપંક્તિષુ| અનુકમ્પા તદીયા ચ સર્વ્વદૈવ સુતિષ્ઠતિ|
LI સ્વબાહુબલતસ્તેન પ્રાકાશ્યત પરાક્રમઃ| મનઃકુમન્ત્રણાસાર્દ્ધં વિકીર્ય્યન્તેઽભિમાનિનઃ|
LII સિંહાસનગતાલ્લોકાન્ બલિનશ્ચાવરોહ્ય સઃ| પદેષૂચ્ચેષુ લોકાંસ્તુ ક્ષુદ્રાન્ સંસ્થાપયત્યપિ|
LIII ક્ષુધિતાન્ માનવાન્ દ્રવ્યૈરુત્તમૈઃ પરિતર્પ્ય સઃ| સકલાન્ ધનિનો લોકાન્ વિસૃજેદ્ રિક્તહસ્તકાન્|
LIV ઇબ્રાહીમિ ચ તદ્વંશે યા દયાસ્તિ સદૈવ તાં| સ્મૃત્વા પુરા પિતૃણાં નો યથા સાક્ષાત્ પ્રતિશ્રુતં|
LV ઇસ્રાયેল્સેવકસ્તેન તથોપક્રિયતે સ્વયં||
LVI અનન્તરં મરિયમ્ પ્રાયેણ માસત્રયમ્ ઇલીશેવયા સહોષિત્વા વ્યાઘુય્ય નિજનિવેશનં યયૌ|
LVII તદનન્તરમ્ ઇલીશેવાયાઃ પ્રસવકાલ ઉપસ્થિતે સતિ સા પુત્રં પ્રાસોષ્ટ|
LVIII તતઃ પરમેશ્વરસ્તસ્યાં મહાનુગ્રહં કૃતવાન્ એતત્ શ્રુત્વા સમીપવાસિનઃ કુટુમ્બાશ્ચાગત્ય તયા સહ મુમુદિરે|
LIX તથાષ્ટમે દિને તે બાલકસ્ય ત્વચં છેત્તુમ્ એત્ય તસ્ય પિતૃનામાનુરૂપં તન્નામ સિખરિય ઇતિ કર્ત્તુમીષુઃ|
LX કિન્તુ તસ્ય માતાકથયત્ તન્ન, નામાસ્ય યોહન્ ઇતિ કર્ત્તવ્યમ્|
LXI તદા તે વ્યાહરન્ તવ વંશમધ્યે નામેદૃશં કસ્યાપિ નાસ્તિ|
LXII તતઃ પરં તસ્ય પિતરં સિખરિયં પ્રતિ સઙ્કેત્ય પપ્રચ્છુઃ શિશોઃ કિં નામ કારિષ્યતે?
LXIII તતઃ સ ફલકમેકં યાચિત્વા લિલેખ તસ્ય નામ યોહન્ ભવિષ્યતિ| તસ્માત્ સર્વ્વે આશ્ચર્ય્યં મેનિરે|
LXIV તત્ક્ષણં સિખરિયસ્ય જિહ્વાજાડ્યેઽપગતે સ મુખં વ્યાદાય સ્પષ્ટવર્ણમુચ્ચાર્ય્ય ઈશ્વરસ્ય ગુણાનુવાદં ચકાર|
LXV તસ્માચ્ચતુર્દિક્સ્થાઃ સમીપવાસિલોકા ભીતા એવમેતાઃ સર્વ્વાઃ કથા યિહૂદાયાઃ પર્વ્વતમયપ્રદેશસ્ય સર્વ્વત્ર પ્રચારિતાઃ|
LXVI તસ્માત્ શ્રોતારો મનઃસુ સ્થાપયિત્વા કથયામ્બભૂવુઃ કીદૃશોયં બાલો ભવિષ્યતિ? અથ પરમેશ્વરસ્તસ્ય સહાયોભૂત્|
LXVII તદા યોહનઃ પિતા સિખરિયઃ પવિત્રેણાત્મના પરિપૂર્ણઃ સન્ એતાદૃશં ભવિષ્યદ્વાક્યં કથયામાસ|
LXVIII ઇસ્રાયેલઃ પ્રભુ ર્યસ્તુ સ ધન્યઃ પરમેશ્વરઃ| અનુગૃહ્ય નિજાલ્લોકાન્ સ એવ પરિમોચયેત્|
LXIX વિપક્ષજનહસ્તેભ્યો યથા મોચ્યામહે વયં| યાવજ્જીવઞ્ચ ધર્મ્મેણ સારલ્યેન ચ નિર્ભયાઃ|
LXX સેવામહૈ તમેવૈકમ્ એતત્કારણમેવ ચ| સ્વકીયં સુપવિત્રઞ્ચ સંસ્મૃત્ય નિયમં સદા|
LXXI કૃપયા પુરુષાન્ પૂર્વ્વાન્ નિકષાર્થાત્તુ નઃ પિતુઃ| ઇબ્રાહીમઃ સમીપે યં શપથં કૃતવાન્ પુરા|
LXXII તમેવ સફલં કર્ત્તં તથા શત્રુગણસ્ય ચ| ઋ્‌તીયાકારિણશ્ચૈવ કરેભ્યો રક્ષણાય નઃ|
LXXIII સૃષ્ટેઃ પ્રથમતઃ સ્વીયૈઃ પવિત્રૈ ર્ભાવિવાદિભિઃ|
LXXIV યથોક્તવાન્ તથા સ્વસ્ય દાયૂદઃ સેવકસ્ય તુ|
LXXV વંશે ત્રાતારમેકં સ સમુત્પાદિતવાન્ સ્વયમ્|
LXXVI અતો હે બાલક ત્વન્તુ સર્વ્વેભ્યઃ શ્રેષ્ઠ એવ યઃ| તસ્યૈવ ભાવિવાદીતિ પ્રવિખ્યાતો ભવિષ્યસિ| અસ્માકં ચરણાન્ ક્ષેમે માર્ગે ચાલયિતું સદા| એવં ધ્વાન્તેઽર્થતો મૃત્યોશ્છાયાયાં યે તુ માનવાઃ|
LXXVII ઉપવિષ્ટાસ્તુ તાનેવ પ્રકાશયિતુમેવ હિ| કૃત્વા મહાનુકમ્પાં હિ યામેવ પરમેશ્વરઃ|
LXXVIII ઊર્દ્વ્વાત્ સૂર્ય્યમુદાય્યૈવાસ્મભ્યં પ્રાદાત્તુ દર્શનં| તયાનુકમ્પયા સ્વસ્ય લોકાનાં પાપમોચને|
LXXIX પરિત્રાણસ્ય તેભ્યો હિ જ્ઞાનવિશ્રાણનાય ચ| પ્રભો ર્માર્ગં પરિષ્કર્ત્તું તસ્યાગ્રાયી ભવિષ્યસિ||
LXXX અથ બાલકઃ શરીરેણ બુદ્ધ્યા ચ વર્દ્ધિતુમારેભે; અપરઞ્ચ સ ઇસ્રાયેલો વંશીયલોકાનાં સમીપે યાવન્ન પ્રકટીભૂતસ્તાસ્તાવત્ પ્રાન્તરે ન્યવસત્|

# II

I અપરઞ્ચ તસ્મિન્ કાલે રાજ્યસ્ય સર્વ્વેષાં લોકાનાં નામાનિ લેખયિતુમ્ અગસ્તકૈસર આજ્ઞાપયામાસ|
II તદનુસારેણ કુરીણિયનામનિ સુરિયાદેશસ્ય શાસકે સતિ નામલેખનં પ્રારેભે|
III અતો હેતો ર્નામ લેખિતું સર્વ્વે જનાઃ સ્વીયં સ્વીયં નગરં જગ્મુઃ|
IV તદાનીં યૂષફ્ નામ લેખિતું વાગ્દત્તયા સ્વભાર્ય્યયા ગર્બ્ભવત્યા મરિયમા સહ સ્વયં દાયૂદઃ સજાતિવંશ ઇતિ કારણાદ્ ગાલીલ્પ્રદેશસ્ય નાસરત્નગરાદ્
V યિહૂદાપ્રદેશસ્ય બૈત્લેહમાખ્યં દાયૂદ્નગરં જગામ|
VI અન્યચ્ચ તત્ર સ્થાને તયોસ્તિષ્ઠતોઃ સતો ર્મરિયમઃ પ્રસૂતિકાલ ઉપસ્થિતે
VII સા તં પ્રથમસુતં પ્રાસોષ્ટ કિન્તુ તસ્મિન્ વાસગૃહે સ્થાનાભાવાદ્ બાલકં વસ્ત્રેણ વેષ્ટયિત્વા ગોશાલાયાં સ્થાપયામાસ|
VIII અનન્તરં યે કિયન્તો મેષપાલકાઃ સ્વમેષવ્રજરક્ષાયૈ તત્પ્રદેશે સ્થિત્વા રજન્યાં પ્રાન્તરે પ્રહરિણઃ કર્મ્મ કુર્વ્વન્તિ,

IX તેષાં સમીપં પરમેશ્વરસ્ય દૂત આગત્યોપતસ્થૌ; તદા ચતુષ્પાર્શ્વે પરમેશ્વરસ્ય તેજસઃ પ્રકાશિતત્વાત્ તેઽતિશશઙ્કિરે।
X તદા સ દૂત ઉવાચ મા ભૈષ્ટ પશ્યતાદ્ય દાયૂદઃ પુરે યુષ્મન્નિમિત્તં ત્રાતા પ્રભુઃ ખ્રીષ્ટોઽજનિષ્ટ,
XI સર્વ્વેષાં લોકાનાં મહાનન્દજનકમ્ ઇમં મઙ્ગલવૃત્તાન્તં યુષ્માન્ જ્ઞાપયામિ।
XII યૂયં (તત્સ્થાનં ગત્વા) વસ્ત્રવેષ્ટિતં તં બાલકં ગોશાલાયાં શયનં દ્રક્ષ્યથ યુષ્માન્ પ્રતીદં ચિહ્નં ભવિષ્યતિ।
XIII દૂત ઇમાં કથાં કથિતવતિ તત્રાકસ્માત્ સ્વર્ગીયાઃ પૃતના આગત્ય કથામ્ ઇમાં કથયિત્વેશ્વરસ્ય ગુણાનન્વવાદિષુઃ, યથા,
XIV સર્વ્વોર્દ્ધ્વસ્થૈરીશ્વરસ્ય મહિમા સમ્પ્રકાશ્યતાં। શાન્તિર્ભૂયાત્ પૃથિવ્યાસ્તુ સન્તોષશ્ચ નરાન્ પ્રતિ॥
XV તતઃ પરં તેષાં સન્નિધે ર્દૂતગણે સ્વર્ગં ગતે મેષપાલકાઃ પરસ્પરમ્ અવેચન્ આગચ્છત પ્રભુઃ પરમેશ્વરો યાં ઘટનાં જ્ઞાપિતવાન્ તસ્યા યાથાર્થ્યં જ્ઞાતું વયમધુના બૈત્લેહમ્પુરં યામઃ।
XVI પશ્ચાત્ તે તૂર્ણં વ્રજિત્વા મરિયમં યૂષફં ગોશાલાયાં શયનં બાલકઞ્ચ દદૃશુઃ।
XVII ઇત્થં દૃષ્ટ્વા બાલકસ્યાર્થે પ્રોક્તાં સર્વ્વકથાં તે પ્રાચારયાઞ્ચક્રુઃ।
XVIII તતો યે લોકા મેષરક્ષકાણાં વદનેભ્યસ્તાં વાર્ત્તાં શુશ્રુવુસ્તે મહાશ્ચર્ય્યં મેનિરે।
XIX કિન્તુ મરિયમ્ એતત્સર્વ્વઘટનાનાં તાત્પર્ય્યં વિવિચ્ય મનસિ સ્થાપયામાસ।
XX તત્પશ્ચાદ્ દૂતવિજ્ઞપ્તાનુરૂપં શ્રુત્વા દૃષ્ટ્વા ચ મેષપાલકા ઈશ્વરસ્ય ગુણાનુવાદં ધન્યવાદઞ્ચ કુર્વ્વાણાઃ પરાવૃત્ય યયુઃ।
XXI અથ બાલકસ્ય ત્વક્છેદનકાલેઽષ્ટમદિવસે સમુપસ્થિતે તસ્ય ગર્બ્ભસ્થિતેઃ પુર્વ્વં સ્વર્ગીયદૂતો યથાજ્ઞાપયત્ તદનુરૂપં તે તન્નામધેયં યીશુરિતિ ચક્રિરે।
XXII તતઃ પરં મૂસાલિખિતવ્યવસ્થાયા અનુસારેણ મરિયમઃ શુચિત્વકાલ ઉપસ્થિતે,
XXIII "પ્રથમજઃ સર્વ્વઃ પુરુષસન્તાનઃ પરમેશ્વરે સમર્પ્યતાં," ઇતિ પરમેશ્વરસ્ય વ્યવસ્થયા
XXIV યીશું પરમેશ્વરે સમર્પયિતુમ્ શાસ્ત્રીયવિધ્યુક્તં કપોતદ્વયં પારાવતશાવકદ્વયં વા બલિં દાતું તે તં ગૃહીત્વા યિરૂશાલમમ્ આયયુઃ।
XXV યિરૂશાલમ્પુરનિવાસી શિમિયોન્નામા ધાર્મ્મિક એક આસીત્ સ ઇસ્રાયેલઃ સાન્ત્વનામપેક્ષ્ય તસ્થૌ કિઞ્ચ પવિત્ર આત્મા તસ્મિન્નાવિર્ભૂતઃ।
XXVI અપરં પ્રભુણા પરમેશ્વરેણાભિષિક્તે ત્રાતરિ ત્વયા ન દૃષ્ટે ત્વં ન મરિષ્યસીતિ વાક્યં પવિત્રેણ આત્મના તસ્મ પ્રાકથ્યત।
XXVII અપરઞ્ચ યદા યીશોઃ પિતા માતા ચ તદર્થં વ્યવસ્થાનુરૂપં કર્મ્મ કર્ત્તું તં મન્દિરમ્ આનિન્યતુસ્તદા
XXVIII શિમિયોન્ આત્મન આકર્ષણેન મન્દિરમાગત્ય તં ક્રોડે નિધાય ઈશ્વરસ્ય ધન્યવાદં કૃત્વા કથયામાસ, યથા,
XXIX હે પ્રભો તવ દાસોયં નિજવાક્યાનુસારતઃ। ઇદાનીન્તુ સકલ્યાણો ભવતા સંવિસૃજ્યતામ્।
XXX યતઃ સકલદેશસ્ય દીપ્તયે દીપ્તિરૂપકં।
XXXI ઇસ્રાયેલીયલોકસ્ય મહાગૌરવરૂપકં।
XXXII યં ત્રાયકં જનાનાન્તુ સમ્મુખે ત્વમજીજનઃ। સએવ વિદ્યતેઽસ્માકં ધ્રવં નયનનગોચરે॥
XXXIII તદાનીં તેનોક્તા એતાઃ સકલાઃ કથાઃ શ્રુત્વા તસ્ય માતા યૂષફ્ ચ વિસ્મયં મેનાતે।
XXXIV તતઃ પરં શિમિયોન્ તેભ્ય આશિષં દત્ત્વા તન્માતરં મરિયમમ્ ઉવાચ, પશ્ય ઇસ્રાયેલો વંશમધ્યે બહૂનાં પાતનાયોત્થાપનાય ચ તથા વિરોધપાત્રં ભવિતું, બહૂનાં ગુપ્તમનોગતાનાં પ્રકટીકરણાય બાલકોયં નિયુક્તોસ્તિ।
XXXV તસ્માત્ તવાપિ પ્રાણાઃ શૂલેન વ્યત્સ્યન્તે।
XXXVI અપરઞ્ચ આશેરસ્ય વંશીયફિનૂયેલો દુહિતા હન્નાખ્યા અતિજરતી ભવિષ્યદ્વાદિન્યેકા યા વિવાહાત્ પરં સપ્ત વત્સરાન્ પત્યા સહ ન્યવસત્ તતો વિધવા ભૂત્વા ચતુરશીતિવર્ષવયઃપર્ય્યનતં
XXXVII મન્દિરે સ્થિત્વા પ્રાર્થનોપવાસૈર્દિવાનિશમ્ ઈશ્વરમ્ અસેવત સાપિ સ્ત્રી તસ્મિન્ સમયે મન્દિરમાગત્ય
XXXVIII પરમેશ્વરસ્ય ધન્યવાદં ચકાર, યિરૂશાલમ્પુરવાસિનો યાવન્તો લોકા મુક્તિમપેક્ષ્ય સ્થિતાસ્તાન્ યીશોર્વૃત્તાન્તં જ્ઞાપયામાસ।
XXXIX ઇત્થં પરમેશ્વરસ્ય વ્યવસ્થાનુસારેણ સર્વ્વેષુ કર્મ્મસુ કૃતેષુ તૌ પુનશ્ચ ગાલીલો નાસરત્નામકં નિજનગરં પ્રતસ્થાતે।
XL તત્પશ્ચાદ્ બાલકઃ શરીરેણ વૃદ્ધિમેત્ય જ્ઞાનેન પરિપૂર્ણ આત્મના શક્તિમાંશ્ચ ભવિતુમારેભે તથા તસ્મિન્ ઈશ્વરાનુગ્રહો બભૂવ।
XLI તસ્ય પિતા માતા ચ પ્રતિવર્ષં નિસ્તારોત્સવસમયે યિરૂશાલમમ્ અગચ્છતામ્।
XLII અપરઞ્ચ યીશૌ દ્વાદશવર્ષવયસ્કે સતિ તૌ પર્વ્વસમયસ્ય રીત્યનુસારેણ યિરૂશાલમં ગત્વા
XLIII પાર્વ્વણં સમ્પાદ્ય પુનરપિ વ્યાઘુય્ય યાતઃ કિન્તુ યીશુર્બાલકો યિરૂશાલમિ તિષ્ઠતિ। યૂષફ્ તન્માતા ચ તદ્ અવિદિત્વા
XLIV સ સઙ્ગિભિઃ સહ વિદ્યત એતચ્ચ બુદ્ધ્વા દિનૈકગમ્યમાર્ગં જગ્મતુઃ। કિન્તુ શેષે જ્ઞાતિબન્ધૂનાં સમીપે મૃગયિત્વા તદ્દે◌શમપ્રાપ્ય
XLV તૌ પુનરપિ યિરૂશાલમમ્ પરાવૃત્યાગત્ય તં મૃગયાઞ્ચક્રતુઃ।
XLVI અથ દિનત્રયાત્ પરં પણ્ડિતાનાં મધ્યે તેષાં કથાઃ શૃણ્વન્ તત્ત્વં પૃચ્છંશ્ચ મન્દિરે સમુપવિષ્ટઃ સ તાભ્યાં દૃષ્ટઃ।
XLVII તદા તસ્ય બુદ્ધ્યા પ્રત્યુત્તરૈશ્ચ સર્વ્વે શ્રોતારો વિસ્મયમાપદ્યન્તે।
XLVIII તાદૃશં દૃષ્ટ્વા તસ્ય જનકો જનની ચ ચમચ્ચક્રતુઃ કિઞ્ચ તસ્ય માતા તમવદત્, હે પુત્ર, કથમાવાં પ્રતીત્થં સમાચરસ્ત્વમ્? પશ્ય તવ પિતાહઞ્ચ શોકાકુલૌ સન્તૌ ત્વામન્વિચ્છાવઃ સ્મ।
XLIX તતઃ સોવદત્ કુતો મામ્ અન્વૈચ્છતં? પિતુર્ગૃહે મયા સ્થાતવ્યમ્ એતત્ કિં યુવાભ્યાં ન જ્ઞાયતે?
L કિન્તુ તૌ તસ્યૈતદ્વાક્યસ્ય તાત્પર્ય્યં બોદ્ધું નાશક્નુતાં।
LI તતઃ પરં સ તાભ્યાં સહ નાસરતં ગત્વા તયોર્વશીભૂતસ્તસ્થૌ કિન્તુ સર્વ્વા એતાઃ કથાસ્તસ્ય માતા મનસિ સ્થાપયામાસ।
LII અથ યીશો ર્બુદ્ધિઃ શરીરઞ્ચ તથા તસ્મિન્ ઈશ્વરસ્ય માનવાનાઞ્ચાનુગ્રહો વર્દ્ધિતુમ્ આરેભે।

# III

I અનન્તરં તિબિરિયકૈસરસ્ય રાજત્વસ્ય પઞ્ચદશે વત્સરે સતિ યદા પન્તીયપીલાતો યિહૂદાદેશાધિપતિ ર્હેરોદ્ તુ ગાલીલ્પ્રદેશસ્ય રાજા ફિલિપનામા તસ્ય ભ્રાતા તુ યિતૂરિયાયાસ્ત્રાખોનીતિયાપ્રદેશસ્ય ચ રાજાસીત્ લુષાનીયનામા અવિલીનીદેશસ્ય રાજાસીત્

II હાનન્ કિયફાશ્ચેમૌ પ્રધાનયાજાકાવાસ્તાં તદાનીં સિખરિયસ્ય પુત્રાય યોહને મધ્યેપ્રાન્તરમ્ ઈશ્વરસ્ય વાક્યે પ્રકાશિતે સતિ

III સ યર્દ્દન ઉભયતટપ્રદેશાન્ સમેત્ય પાપમોચનાર્થં મનઃપરાવર્ત્તનસ્ય ચિહ્નરૂપં યન્મજ્જનં તદીયાઃ કથાઃ સર્વ્વત્ર પ્રચારયિતુમારેભે।

IV યિશયિયભવિષ્યદ્વક્તૃગ્રન્થે યાદૃશી લિપિરાસ્તે યથા, પરમેશસ્ય પન્થાનં પરિષ્કુરુત સર્વ્વતઃ। તસ્ય રાજપથઞ્ચૈવ સમાનં કુરુતાધુના।

V કારિષ્યન્તે સમુચ્છ્રાયાઃ સકલા નિમ્નભૂમયઃ। કારિષ્યન્તે નતાઃ સર્વ્વે પર્વ્વતાશ્ચોપપર્વ્વતાઃ। કારિષ્યન્તે ચ યા વક્રાસ્તાઃ સર્વ્વાઃ સરલા ભુવઃ। કારિષ્યન્તે સમાનાસ્તા યા ઉચ્ચનીચભૂમયઃ।

VI ઈશ્વરેણ કૃતં ત્રાણં દ્રક્ષ્યન્તિ સર્વ્વમાનવાઃ। ઇત્યેતત્ પ્રાન્તરે વાક્યં વદતઃ કસ્યચિદ્ રવઃ॥

VII યે યે લોકા મજ્જનાર્થં બહિરાયયુસ્તાન્ સોવદત્ રે રે સર્પવંશા આગામિનઃ કોપાત્ પલાયિતું યુષ્માન્ કશ્ચેતયામાસ?

VIII તસ્માદ્ ઇબ્રાહીમ્ અસ્માકં પિતા કથામીદૃશીં મનોભિ ર્ન કથયિત્વા યૂયં મનઃપરિવર્ત્તનયોગ્યં ફલં ફલત; યુષ્માનહં યથાર્થં વદામિ પાષાણેભ્ય એતેભ્ય ઈશ્વર ઇબ્રાહીમઃ સન્તાનોત્પાદને સમર્થઃ।

IX અપરઞ્ચ તરુમૂલેઽધુનાપિ પરશુઃ સંલગ્નોસ્તિ યસ્તરુરુત્તમં ફલં ન ફલતિ સ છિદ્યતેઽગ્નૌ નિક્ષિપ્યતે ચ।

X તદાનીં લોકાસ્તં પપ્રચ્છુસ્તર્હિ કિં કર્ત્તવ્યમસ્માભિઃ?

XI તતઃ સોવાદીત્ યસ્ય દ્વે વસને વિદ્યેતે સ વસ્ત્રહીનાયૈકં વિતરતુ કિઞ્ચ યસ્ય ખાદ્યદ્રવ્યં વિદ્યતે સોપિ તથૈવ કરોતુ।

XII તતઃ પરં કરસઞ્ચાયિનો મજ્જનાર્થમ્ આગત્ય પપ્રચ્છુઃ હે ગુરો કિં કર્ત્તવ્યમસ્માભિઃ?

XIII તતઃ સોકથયત્ નિરૂપિતાદધિકં ન ગૃહ્લિત।

XIV અનન્તરં સેનાગણ એત્ય પપ્રચ્છ કિમસ્માભિ ર્વા કર્ત્તવ્યમ્? તતઃ સોભિદધે કસ્ય કામપિ હાનિં મા કાર્ષ્ટ તથા મૃષાપવાદં મા કુરુત નિજવેતનેન ચ સન્તુષ્ય તિષ્ઠત।

XV અપરઞ્ચ લોકા અપેક્ષયા સ્થિત્વા સર્વ્વેપીતિ મનોભિ ર્વિતર્કયાઞ્ચક્રુઃ, યોહનયમ્ અભિષિક્તસ્ત્રાતા ન વેતિ?

XVI તદા યોહન્ સર્વ્વાન્ વ્યાજહાર, જલેઽહં યુષ્માન્ મજ્જયામિ સત્યં કિન્તુ યસ્ય પાદુકાબન્ધનં મોચયિતુમપિ ન યોગ્યોસ્મિ તાદૃશ એકો મત્તો ગુરુતરઃ પુમાન્ એતિ, સ યુષ્માન્ વહ્નિરૂપે પવિત્ર આત્મનિ મજ્જયિષ્યતિ।

XVII અપરઞ્ચ તસ્ય હસ્તે શૂર્પ આસ્તે સ સ્વશસ્યાનિ શુદ્ધરૂપં પ્રસ્ફોટ્ય ગોધૂમાન્ સર્વ્વાન્ ભાણ્ડાગારે સંગ્રહીષ્યતિ કિન્તુ બૂષાણિ સર્વ્વાણ્યનિર્વ્વાણવહ્નિના દાહયિષ્યતિ।

XVIII યોહન્ ઉપદેશેનેત્થં નાનાકથા લોકાનાં સમક્ષં પ્રચારયામાસ।

XIX અપરઞ્ચ હેરોદ્ રાજા ફિલિપ્નામ્નઃ સહોદરસ્ય ભાર્ય્યાં હેરોદિયામધિ તથાન્યાનિ યાનિ યાનિ કુકર્મ્માણિ કૃતવાન્ તદધિ ચ

XX યોહના તિરસ્કૃતો ભૂત્વા કારાગારે તસ્ય બન્ધનાદ્ અપરમપિ કુકર્મ્મ ચકાર।

XXI ઇતઃ પૂર્વ્વં યસ્મિન્ સમયે સર્વ્વે યોહના મજ્જિતાસ્તદાનીં યીશુરપ્યાગત્ય મજ્જિતઃ।

XXII તદનન્તરં તેન પ્રાર્થિતે મેઘદ્વારં મુક્તં તસ્માચ્ચ પવિત્ર આત્મા મૂર્ત્તિમાન્ ભૂત્વા કપોતવત્ તદુપર્ય્યવરુરોહ; તદા ત્વં મમ પ્રિયઃ પુત્રસ્ત્વયિ મમ પરમઃ સન્તોષ ઇત્યાકાશવાણી બભૂવ।

XXIII તદાનીં યીશુઃ પ્રાયેણ ત્રિંશદ્વર્ષવયસ્ક આસીત્। લૌકિકજ્ઞાને તુ સ યૂષફઃ પુત્રઃ,

XXIV યૂષફ્ એલેઃ પુત્રઃ, એલિર્મત્તતઃ પુત્રઃ, મત્તત્ લેવેઃ પુત્રઃ, લેવિ ર્મલ્કેઃ પુત્રઃ, મલ્કિર્યાન્નસ્ય પુત્રઃ; યાન્નો યૂષફઃ પુત્રઃ।

XXV યૂષફ્ મત્તથિયસ્ય પુત્રઃ, મત્તથિય આમોસઃ પુત્રઃ, આમોસ્ નહૂમઃ પુત્રઃ, નહૂમ્ ઇષ્લેઃ પુત્રઃ ઇષ્લિર્નગેઃ પુત્રઃ।

XXVI નગિર્માટઃ પુત્રઃ, માટ્ મત્તથિયસ્ય પુત્રઃ, મત્તથિયઃ શિમિયેઃ પુત્રઃ, શિમિયિર્યૂષફઃ પુત્રઃ, યૂષફ્ યિહૂદાઃ પુત્રઃ।

XXVII યિહૂદા યોહાનાઃ પુત્રઃ, યોહાના રીષાઃ પુત્રઃ, રીષાઃ સિરુબ્બાબિલઃ પુત્રઃ, સિરુબ્બાબિલ્ શલ્તીયેલઃ પુત્રઃ, શલ્તીયેલ્ નેરેઃ પુત્રઃ।

XXVIII નેરિર્મલ્કેઃ પુત્રઃ, મલ્કિઃ અદ્યઃ પુત્રઃ, અદ્દી કોષમઃ પુત્રઃ, કોષમ્ ઇલ્મોદદઃ પુત્રઃ, ઇલ્મોદદ્ એરઃ પુત્રઃ।

XXIX એર્ યોશેઃ પુત્રઃ, યોશિઃ ઇલીયેષરઃ પુત્રઃ, ઇલીયેષર્ યોરીમઃ પુત્રઃ, યોરીમ્ મત્તતઃ પુત્રઃ, મત્તત લેવેઃ પુત્રઃ।

XXX લેવિઃ શિમિયોનઃ પુત્રઃ, શિમિયોન્ યિહૂદાઃ પુત્રઃ, યિહૂદા યૂષુફઃ પુત્રઃ, યૂષુફ્ યોનનઃ પુત્રઃ, યાનન્ ઇલીયાકીમઃ પુત્રઃ।

XXXI ઇલિયાકીમ્ઃ મિલેયાઃ પુત્રઃ, મિલેયા મૈનનઃ પુત્રઃ, મૈનન્ મત્તત્તસ્ય પુત્રઃ, મત્તત્તો નાથનઃ પુત્રઃ, નાથન્ દાયૂદઃ પુત્રઃ।

XXXII દાયૂદ્ યિશયઃ પુત્રઃ, યિશય ઓબેદઃ પુત્ર, ઓબેદ્ બોયસઃ પુત્રઃ, બોયસ્ સલ્મોનઃ પુત્રઃ, સલ્મોન્ નહશોનઃ પુત્રઃ।

XXXIII નહશોન્ અમ્મીનાદબઃ પુત્રઃ, અમ્મીનાદબ્ અરામઃ પુત્રઃ, અરામ્ હિષ્રોણઃ પુત્રઃ, હિષ્રોણ્ પેરસઃ પુત્રઃ, પેરસ્ યિહૂદાઃ પુત્રઃ।

XXXIV યિહૂદા યાકૂબઃ પુત્રઃ, યાકૂબ્ ઇસ્હાકઃ પુત્રઃ, ઇસ્હાક્ ઇબ્રાહીમઃ પુત્રઃ, ઇબ્રાહીમ્ તેરહઃ પુત્રઃ, તેરહ્ નાહોરઃ પુત્રઃ।

XXXV નાહોર્ સિરુગઃ પુત્રઃ, સિરુગ્ રિય્વઃ પુત્રઃ, રિયૂઃ પેલગઃ પુત્રઃ, પેલગ્ એવરઃ પુત્રઃ, એવર્ શેલહઃ પુત્રઃ।

XXXVI શેલહ્ કૈનનઃ પુત્રઃ, કૈનન્ અર્ફક્ષદઃ પુત્રઃ, અર્ફક્ષદ્ શામઃ પુત્રઃ, શામ્ નોહઃ પુત્રઃ, નોહો લેમકઃ પુત્રઃ।

XXXVII લેમક્ મિથૂશેલહઃ પુત્રઃ, મિથૂશેલહ્ હનોકઃ પુત્રઃ, હનોક્ યેરદઃ પુત્રઃ, યેરદ્ મહલલેલઃ પુત્રઃ, મહલલેલ્ કૈનનઃ પુત્રઃ।

XXXVIII કૈનન્ ઇનોશઃ પુત્રઃ, ઇનોશ્ શેતઃ પુત્રઃ, શેત્ આદમઃ પુત્ર, આદમ્ ઈશ્વરસ્ય પુત્રઃ।

# IV

I તતઃ પરં યીશુઃ પવિત્રેણાત્મના પૂર્ણઃ સન્ યર્દ્દનનદ્યાઃ પરાવૃત્યાત્મના પ્રાન્તરં નીતઃ સન્ ચત્વારિંશદ્દિનાનિ યાવત્ શૈતાના પરીક્ષિતોઽભૂત્,

II કિઞ્ચ તાનિ સર્વ્વદિનાનિ ભોજનં વિના સ્થિતત્વાત્ કાલે પૂર્ણે સ ક્ષુધિતવાન્।

III તતઃ શૈતાનાગત્ય તમવદત્ ત્વં ચેદીશ્વરસ્ય પુત્રસ્તર્હિ પ્રસ્તરાનેતાન્ આજ્ઞયા પૂપાન્ કુરુ।

IV તદા યીશુરુવાચ, લિપિરીદૃશી વિદ્યતે મનુજઃ કેવલેન પૂપેન ન જીવતિ કિન્ત્વીશ્વરસ્ય સર્વ્વાભિરાજ્ઞાભિ ર્જીવતિ।

V તદા શૈતાન્ તમુચ્ચં પર્વ્વતં નીત્વા નિમિષૈકમધ્યે જગતઃ સર્વ્વરાજ્યાનિ દર્શિતવાન્।

VI પશ્ચાત્ તમવાદીત્ સર્વ્વમ્ એતદ્ વિભવં પ્રતાપઞ્ચ તુભ્યં દાસ્યામિ તન્ મયિ સમર્પિતમાસ્તે યં પ્રતિ મમેચ્છા જાયતે તસ્મૈ દાતું શક્નોમિ,

VII ત્વં ચેન્માં ભજસે તર્હિ સર્વ્વમેતત્ તવૈવ ભવિષ્યતિ।

VIII તદા યીશુસ્તં પ્રત્યુક્તવાન્ દૂરી ભવ શૈતાન્ લિપિરાસ્તે, નિજં પ્રભું પરમેશ્વરં ભજસ્વ કેવલં તમેવ સેવસ્વ ચ।

IX અથ શૈતાન્ તં યિરૂશાલમં નીત્વા મન્દિરસ્ય ચૂડાયા ઉપરિ સમુપવેશ્ય જગાદ ત્વં ચેદીશ્વરસ્ય પુત્રસ્તર્હિ સ્થાનાદિતો લમ્ફિત્વાધઃ

X પત યતો લિપિરાસ્તે, આજ્ઞાપયિષ્યતિ સ્વીયાન્ દૂતાન્ સ પરમેશ્વરઃ।

XI રક્ષિતું સર્વ્વમાર્ગે ત્વાં તેન ત્વચ્ચરણે યથા। ન લગેત્ પ્રસ્તરાઘાતસ્ત્વાં ધરિષ્યન્તિ તે તથા।

XII તદા યીશુના પ્રત્યુક્તમ્ ઇદમપ્યુક્તમસ્તિ ત્વં સ્વપ્રભું પરેશં મા પરીક્ષસ્વ।

XIII પશ્ચાત્ શૈતાન્ સર્વ્વપરીક્ષાં સમાપ્ય ક્ષણાત્તં ત્યક્ત્વા યયૌ।

XIV તદા યીશુરાત્મપ્રભાવાત્ પુનર્ગાલીલ્પ્રદેશં ગતસ્તદા તત્સુખ્યાતિશ્ચતુર્દિશં વ્યાનશે।

XV સ તેષાં ભજનગૃહેષુ ઉપદિશ્ય સર્વ્વૈઃ પ્રશંસિતો બભૂવ।

XVI અથ સ સ્વપાલનસ્થાનં નાસરત્પુરમેત્ય વિશ્રામવારે સ્વાચારાદ્ ભજનગેહં પ્રવિશ્ય પઠિતુમુત્તસ્થૌ।

XVII તતો યિશયિયભવિષ્યદ્વાદિનઃ પુસ્તકે તસ્ય કરદત્તે સતિ સ તત્ પુસ્તકં વિસ્તાર્ય્ય યત્ર વક્ષ્યમાણાનિ વચનાનિ સન્તિ તત્ સ્થાનં પ્રાપ્ય પપાઠ।

XVIII આત્મા તુ પરમેશસ્ય મદીયોપરિ વિદ્યતે। દરિદ્રેષુ સુસંવાદં વક્તું માં સોભિષિક્તવાન્। ભગ્નાન્તઃ કરણાલ્લોકાન્ સુસ્વસ્થાન્ કર્ત્તુમેવ ચ। બન્દીકૃતેષુ લોકેષુ મુક્તે ર્ઘોષયિતું વચઃ। નેત્રાણિ દાતુમન્ધેભ્યસ્ત્રાતું બદ્ધજનાનપિ।

XIX પરેશાનુગ્રહે કાલં પ્રચારયિતુમેવ ચ। સર્વ્વૈતત્કરણાર્થાય મામેવ પ્રહિણોતિ સઃ।।

XX તતઃ પુસ્તકં બદ્ધ્વા પરિચારકસ્ય હસ્તે સમર્પ્ય ચાસને સમુપવિષ્ટઃ, તતો ભજનગૃહે યાવન્તો લોકા આસન્ તે સર્વ્વેઽનન્યદૃષ્ટ્યા તં વિલુલોકિરે।

XXI અનન્તરમ્ અદ્યૈતાનિ સર્વ્વાણિ લિખિતવચનાનિ યુષ્માકં મધ્યે સિદ્ધાનિ સ ઇમાં કથાં તેભ્યઃ કથયિતુમારેભે।

XXII તતઃ સર્વ્વે તસ્મિન્ અન્વરજ્યન્ત, કિઞ્ચ તસ્ય મુખાન્નિર્ગતાભિરનુગ્રહસ્ય કથાભિશ્ચમત્કૃત્ય કથયામાસુઃ કિમયં યૂષફઃ પુત્રો ન?

XXIII તદા સોઽવાદીદ્ હે ચિકિત્સક સ્વમેવ સ્વસ્થં કુરુ કફર્નાહૂમિ યદ્યત્ કૃતવાન્ તદશ્રૌષ્મ તાઃ સર્વ્વાઃ ક્રિયા અત્ર સ્વદેશે કુરુ કથામેતાં યૂયમેવાવશ્યં માં વદિષ્યથ।

XXIV પુનઃ સોવાદીદ્ યુષ્માનહં યથાર્થં વદામિ, કોપિ ભવિષ્યદ્વાદી સ્વદેશે સત્કારં ન પ્રાપ્નોતિ।

XXV અપરઞ્ચ યથાર્થં વચ્મિ, એલિયસ્ય જીવનકાલે યદા સાર્દ્ધત્રિતયવર્ષાણિ યાવત્ જલદપ્રતિબન્ધાત્ સર્વ્વસ્મિન્ દેશે મહાદુર્ભિક્ષમ્ અજનિષ્ટ તદાનીમ્ ઇસ્રાયેલો દેશસ્ય મધ્યે બહ્વ્યો વિધવા આસન્,

XXVI કિન્તુ સીદોન્પ્રદેશીયસારિફત્પુરનિવાસિનીમ્ એકાં વિધવાં વિના કસ્યાશ્ચિદપિ સમીપે એલિયઃ પ્રેરિતો નાભૂત્।

XXVII અપરઞ્ચ ઇલીશાયભવિષ્યદ્વાદિવિદ્યમાનતાકાલે ઇસ્રાયેલ્દેશે બહવઃ કુષ્ઠિન આસન્ કિન્તુ સુરીયદેશીયં નામાન્કુષ્ઠિનં વિના કોપ્યન્યઃ પરિષ્કૃતો નાભૂત્।

XXVIII ઇમાં કથાં શ્રુત્વા ભજનગેહસ્થિતા લોકાઃ સક્રોધમ્ ઉત્થાય

XXIX નગરાત્તં બહિષ્કૃત્ય યસ્ય શિખરિણ ઉપરિ તેષાં નગરં સ્થાપિતમાસ્તે તસ્માન્નિક્ષેપ્તું તસ્ય શિખરં તં નિન્યુઃ

XXX કિન્તુ સ તેષાં મધ્યાદપસૃત્ય સ્થાનાન્તરં જગામ।

XXXI તતઃ પરં યીશુર્ગાલીલ્પ્રદેશીયકફર્નાહૂમ્નગર ઉપસ્થાય વિશ્રામવારે લોકાનુપદેષ્ટુમ્ આરબ્ધવાન્।

XXXII તદુપદેશાત્ સર્વ્વે ચમચ્ચક્રુ ર્યતસ્તસ્ય કથા ગુરુતરા આસન્।

XXXIII તદાનીં તદ્ભજનગેહસ્થિતોઽમેધ્યભૂતગ્રસ્ત એકો જન ઉચ્ચૈઃ કથયામાસ,

XXXIV હે નાસરતીયયીશોઽસ્માન્ ત્યજ, ત્વયા સહાસ્માકં કઃ સમ્બન્ધઃ? કિમસ્માન્ વિનાશયિતુમાયાસિ? ત્વમીશ્વરસ્ય પવિત્રો જન એતદહં જાનામિ।

XXXV તદા યીશુસ્તં તર્જયિત્વાવદત્ મૌની ભવ ઇતો બહિર્ભવ; તતઃ સોમેધ્યભૂતસ્તં મધ્યસ્થાને પાતયિત્વા કિઞ્ચિદપ્યહિંસિત્વા તસ્માદ્ બહિર્ગતવાન્।

XXXVI તતઃ સર્વ્વે લોકાશ્ચમત્કૃત્ય પરસ્પરં વક્તુમારેભિરે કોયં ચમત્કારઃ। એષ પ્રભાવેણ પરાક્રમેણ ચામેધ્યભૂતાન્ આજ્ઞાપયતિ તેનૈવ તે બહિર્ગચ્છન્તિ।

XXXVII અનન્તરં ચતુર્દિક્સ્થદેશાન્ તસ્ય સુખ્યાતિર્વ્યાપ્નોત્।

XXXVIII તદનન્તરં સ ભજનગેહાદ્ બહિરાગત્ય શિમોનો નિવેશનં પ્રવિવેશ તદા તસ્ય શ્વશ્રૂર્જ્વરેણાત્યન્તં પીડિતાસીત્ શિષ્યાસ્તદર્થં તસ્મિન્ વિનયં ચક્રુઃ।

XXXIX તતઃ સ તસ્યાઃ સમીપે સ્થિત્વા જ્વરં તર્જયામાસ તેનૈવ તાં જ્વરોઽત્યાક્ષીત્ તતઃ સા તત્ક્ષણમ્ ઉત્થાય તાન્ સિષેવે।

XL અથ સૂર્ય્યાસ્તકાલે સ્વેષાં યે યે જના નાનારોગૈઃ પીડિતા આસન્ લોકાસ્તાન્ યીશોઃ સમીપમ્ આનિન્યુઃ, તદા સ એકૈકસ્ય ગાત્રે કરમર્પયિત્વા તાનરોગાન્ ચકાર।

XLI તતો ભૂતા બહુભ્યો નિર્ગત્ય ચીત્શબ્દં કૃત્વા ચ બભાષિરે ત્વમીશ્વરસ્ય પુત્રોઽભિષિક્તત્રાતા; કિન્તુ સોભિષિક્તત્રાતેતિ તે વિવિદુરેતસ્માત્ કારણાત્ તાન્ તર્જયિત્વા તદ્વક્તું નિષિષેધ।

XLII અપરઞ્ચ પ્રભાતે સતિ સ વિજનસ્થાનં પ્રતસ્થે પશ્ચાત્ જનાસ્તમન્વિચ્છન્તસ્તન્નિકટં ગત્વા સ્થાનાન્તરગમનાર્થં તમન્વરુન્ધન્।

XLIII કિન્તુ સ તાન્ જગાદ, ઈશ્વરીયરાજ્યસ્ય સુસંવાદં પ્રચારયિતુમ્ અન્યાનિ પુરાણ્યપિ મયા યાતવ્યાનિ યતસ્તદર્થમેવ પ્રેરિતોહં।

XLIV અથ ગાલીલો ભજનગેહેષુ સ ઉપદિદેશ।

# V

I અનન્તરં યીશુરેકદા ગિનેષરથ્દસ્ય તીર ઉત્તિષ્ઠતિ, તદા લોકા ઈશ્વરીયકથાં શ્રોતું તદુપરિ પ્રપતિતાઃ।
II તદાનીં સ હ્રદસ્ય તીરસમીપે નૌદ્વયં દદર્શ કિઞ્ચ મત્સ્યોપજીવિનો નાવં વિહાય જાલં પ્રક્ષાલયન્તિ।
III તતસ્તયોર્દ્વયો ર્મધ્યે શિમોનો નાવમારુહ્ય તીરાત્ કિઞ્ચિદ્દૂરં યાતું તસ્મિન્ વિનયં કૃત્વા નૌકાયામુપવિશ્ય લોકાન્ પ્રોપદિષ્ટવાન્।
IV પશ્ચાત્ તં પ્રસ્તાવં સમાપ્ય સ શિમોનં વ્યાજહાર, ગભીરં જલં ગત્વા મત્સ્યાન્ ધર્ત્તું જાલં નિક્ષિપ।
V તતઃ શિમોન બભાષે, હે ગુરો યદ્યપિ વયં કૃત્સ્નાં યામિનીં પરિશ્રમ્ય મત્સ્યૈકમપિ ન પ્રાપ્તાસ્તથાપિ ભવતો નિદેશતો જાલં
ક્ષિપામઃ।
VI અથ જાલે ક્ષિપ્તે બહુમત્સ્યપતનાદ્ આનાયઃ પ્રચ્છિન્નઃ।
VII તસ્માદ્ ઉપકર્ત્તુમ્ અન્યનૌસ્થાન્ સઙ્ગિન આયાતુમ્ ઇઙ્ગિતેન સમાહ્વયન્ તતસ્ત આગત્ય મત્સ્યૈ ર્નૌદ્વયં પ્રપૂરયામાસુ ર્યૈ ર્નૌદ્વયં
પ્રમગ્નમ્।
VIII તદા શિમોન્પિતરસ્તદ્ વિલોક્ય યીશોશ્ચરણયોઃ પતિત્વા, હે પ્રભોહં પાપી નરો મમ નિકટાદ્ ભવાન્ યાતુ, ઇતિ કથિતવાન્।
IX યતો જાલે પતિતાનાં મત્સ્યાનાં યૂથાત્ શિમોન્ તત્સઙ્ગિનશ્ચ ચમત્કૃતવન્તઃ; શિમોનઃ સહકારિણૌ સિવદેઃ પુત્રૌ યાકૂબ્ યોહન્
ચેમૌ તાદૃશૌ બભૂવતુઃ।
X તદા યીશુઃ શિમોનં જગાદ મા ભૈષીરદ્યારભ્ય ત્વં મનુષ્યધરો ભવિષ્યસિ।
XI અનન્તરં સર્વ્વાસુ નૌસુ તીરમ્ આનીતાસુ તે સર્વ્વાન્ પરિત્યજ્ય તસ્ય પશ્ચાદ્ગામિનો બભૂવુઃ।
XII તતઃ પરં યીશૌ કસ્મિંશ્ચિત્ પુરે તિષ્ઠતિ જન એકઃ સર્વ્વાઙ્ગકુષ્ઠસ્તં વિલોક્ય તસ્ય સમીપે ન્યુબ્જઃ પતિત્વા સવિનયં વક્તુમારેભે,
હે પ્રભો યદિ ભવાનિચ્છતિ તર્હિ માં પરિષ્કર્ત્તું શક્નોતિ।
XIII તદાનીં સ પાણિં પ્રસાર્ય્ય તદઙ્ગં સ્પૃશન્ બભાષે ત્વં પરિષ્ક્રિયસ્વેતિ મમેચ્છાસ્તિ તતસ્તત્ક્ષણં સ કુષ્ઠાત્ મુક્તઃ।
XIV પશ્ચાત્ સ તમાજ્ઞાપયામાસ કથામિમાં કસ્મૈચિદ્ અકથયિત્વા યાજકસ્ય સમીપઞ્ચ ગત્વા સ્વં દર્શય, લોકેભ્યો
નિજપરિષ્કૃતત્વસ્ય પ્રમાણદાનાય મૂસાજ્ઞાનુસારેણ દ્રવ્યમુત્મૃજસ્વ ચ।
XV તથાપિ યીશોઃ સુખ્યાતિ ર્બહુ વ્યાપ્તુમારેભે કિઞ્ચ તસ્ય કથાં શ્રોતું સ્વીયરોગેભ્યો મોક્તુઞ્ચ લોકા આજગ્મુઃ।
XVI અથ સ પ્રાન્તરં ગત્વા પ્રાર્થયાઞ્ચક્રે।
XVII અપરઞ્ચ એકદા યીશુરુપદિશતિ, એતર્હિ ગાલીલ્યિહૂદાપ્રદેશયોઃ સર્વ્વનગરેભ્યો યિરૂશાલમશ્ચ કિયન્તઃ ફિરૂશિલોકા
વ્યવસ્થાપકાશ્ચ સમાગત્ય તદન્તિકે સમુપવિવિશુઃ, તસ્મિન્ કાલે લોકાનામારોગ્યકારણાત્ પ્રભોઃ પ્રભાવઃ પ્રચકાશે।
XVIII પશ્ચાત્ કિયન્તો લોકા એકં પક્ષાઘાતિનં ખટ્વાયાં નિધાય યીશોઃ સમીપમાનેતું સમ્મુખે સ્થાપયિતુઞ્ચ વ્યાપ્રિયન્ત।
XIX કિન્તુ બહુજનનિવહસમ્વાધાત્ ન શક્નુવન્તો ગૃહોપરિ ગત્વા ગૃહપૃષ્ઠં ખનિત્વા તં પક્ષાઘાતિનં સખટ્વં ગૃહમધ્યે યીશોઃ
સમ્મુખે ઽવરોહયામાસુઃ।
XX તદા યીશુસ્તેષામ્ ઈદૃશં વિશ્વાસં વિલોક્ય તં પક્ષાઘાતિનં વ્યાજહાર, હે માનવ તવ પાપમક્ષમ્યત।
XXI તસ્માદ્ અધ્યાપકાઃ ફિરૂશિનશ્ચ ચિત્તૈરિત્થં પ્રચિન્તિતવન્તઃ, એષ જન ઈશ્વરં નિન્દતિ કોયં? કેવલમીશ્વરં વિના પાપં ક્ષન્તું
કઃ શક્નોતિ?
XXII તદા યીશુસ્તેષામ્ ઇત્થં ચિન્તનં વિદિત્વા તેભ્યોકથયદ્ યૂયં મનોભિઃ કુતો વિતર્કયથ?
XXIII તવ પાપક્ષમા જાતા યદ્વા ત્વમુત્થાય વ્રજ એતયો ર્મધ્યે કા કથા સુકથ્યા?
XXIV કિન્તુ પૃથિવ્યાં પાપં ક્ષન્તું માનવસુતસ્ય સામર્થ્યમસ્તીતિ યથા યૂયં જ્ઞાતું શક્નુથ તદર્થં (સ તં પક્ષાઘાતિનં જગાદ) ઉત્તિષ્ઠ
સ્વશય્યાં ગૃહીત્વા ગૃહં યાહીતિ ત્વામાદિશામિ।
XXV તસ્માત્ સ તત્ક્ષણમ્ ઉત્થાય સર્વ્વેષાં સાક્ષાત્ નિજશયનીયં ગૃહીત્વા ઈશ્વરં ધન્યં વદન્ નિજનિવેશનં યયૌ।
XXVI તસ્માત્ સર્વ્વે વિસ્મય પ્રાપ્તા મનઃસુ ભીતાશ્ચ વયમદ્યાસમ્ભવકાર્ય્યાણ્યદર્શામ ઇત્યુક્ત્વા પરમેશ્વરં ધન્યં પ્રોદિતાઃ।
XXVII તતઃ પરં બહિર્ગચ્છન્ કરસઞ્ચયસ્થાને લેવિનામાનં કરસઞ્ચાયકં દૃષ્ટ્વા યીશુસ્તમભિદધે મમ પશ્ચાદેહિ।
XXVIII તસ્માત્ સ તત્ક્ષણાત્ સર્વ્વં પરિત્યજ્ય તસ્ય પશ્ચાદિયાય।
XXIX અનન્તરં લેવિ ર્નિજગૃહે તદર્થં મહાભોજ્યં ચકાર, તદા તૈઃ સહાનેકે કરસઞ્ચાયિનસ્તદન્યલોકાશ્ચ ભોક્તુમુપવિવિશુઃ।
XXX તસ્માત્ કારણાત્ ચણ્ડાલાનાં પાપિલોકાનાઞ્ચ સઙ્ગે યૂયં કુતો ભંગ્ધ્વે પિવથ ચેતિ કથાં કથયિત્વા ફિરૂશિનોઽધ્યાપકાશ્ચ તસ્ય
શિષ્યૈઃ સહ વાગ્યુદ્ધં કર્ત્તુમારેભિરે।
XXXI તસ્માદ્ યીશુસ્તાન્ પ્રત્યવોચદ્ અરોગલોકાનાં ચિકિત્સકેન પ્રયોજનં નાસ્તિ કિન્તુ સરોગાણામેવ।
XXXII અહં ધાર્મ્મિકાન્ આહ્વાતું નાગતોસ્મિ કિન્તુ મનઃ પરાવર્ત્તયિતું પાપિન એવ।
XXXIII તતસ્તે પ્રોચુઃ, યોહનઃ ફિરૂશિનાઞ્ચ શિષ્યા વારંવારમ્ ઉપવસન્તિ પ્રાર્થયન્તે ચ કિન્તુ તવ શિષ્યાઃ કુતો ભુઞ્જતે પિવન્તિ
ચ?
XXXIV તદા સ તાનાચખ્યૌ વરે સઙ્ગે તિષ્ઠતિ વરસ્ય સખિગણં કિમુપવાસયિતું શક્નુથ?
XXXV કિન્તુ યદા તેષાં નિકટાદ્ વરો નેષ્યતે તદા તે સમુપવત્સ્યન્તિ।
XXXVI સોપરમપિ દૃષ્ટાન્તં કથયામ્બભૂવ પુરાતનવસ્ત્રે કોપિ નુતનવસ્ત્રં ન સીવ્યતિ યતસ્તેન સેવનેન જીર્ણવસ્ત્રં છિદ્યતે,
નૂતનપુરાતનવસ્ત્રયો ર્મેલઞ્ચ ન ભવતિ।
XXXVII પુરાતન્યાં કુત્વાં કોપિ નુતનં દ્રાક્ષારસં ન નિદધાતિ, યતો નવીનદ્રાક્ષારસસ્ય તેજસા પુરાતની કુતૂ ર્વિદીર્ય્યતે તતો દ્રાક્ષારસઃ
પતતિ કુતૂશ્ચ નશ્યતિ।
XXXVIII તતો હેતો ર્નૂતન્યાં કુત્વાં નવીનદ્રાક્ષારસઃ નિધાતવ્યસ્તેનોભયસ્ય રક્ષા ભવતિ।
XXXIX અપરઞ્ચ પુરાતનં દ્રાક્ષારસં પીત્વા કોપિ નૂતનં ન વાઞ્છતિ, યતઃ સ વક્તિ નૂતનાત્ પુરાતનમ્ પ્રશસ્તમ્।

# VI

I અચરઞ્ચ પર્વ્વણો દ્વિતીયદિનાત્ પરં પ્રથમવિશ્રામવારે શસ્યક્ષેત્રેણ યીશોર્ગમનકાલે તસ્ય શિષ્યાઃ કણિશં છિત્ત્વા કરેષુ મર્દ્દયિત્વા
ખાદિતુમારેભિરે।
II તસ્માત્ કિયન્તઃ ફિરૂશિનસ્તાનવદન્ વિશ્રામવારે યત્ કર્મ્મ ન કર્ત્તવ્યં તત્ કુતઃ કુરુથ?
III યીશુઃ પ્રત્યુવાચ દાયૂદ્ તસ્ય સઙ્ગિનશ્ચ ક્ષુધાર્ત્તાઃ કિં ચક્રુઃ સ કથમ્ ઈશ્વરસ્ય મન્દિરં પ્રવિશ્ય
IV યે દર્શનીયાઃ પૂપા યાજકાન્ વિનાન્યસ્ય કસ્યાપ્યભોજનીયાસ્તાનાનીય સ્વયં બુભજે સઙ્ગિભ્યોપિ દદૌ તત્ કિં યુષ્માભિઃ કદાપિ
નાપાઠિ?
V પશ્ચાત્ સ તાનવદત્ મનુજસુતો વિશ્રામવારસ્યાપિ પ્રભુ ર્ભવતિ।
VI અનન્તરમ્ અન્યવિશ્રામવારે સ ભજનગેહં પ્રવિશ્ય સમુપદિશતિ। તદા તત્સ્થાને શુષ્કદક્ષિણકર એકઃ પુમાન્ ઉપતસ્થિવાન્।
VII તસ્માદ્ અધ્યાપકાઃ ફિરૂશિનશ્ચ તસ્મિન્ દોષમારોપયિતું સ વિશ્રામવારે તસ્ય સ્વાસ્થ્યં કરોતિ નવેતિ પ્રતીક્ષિતુમારેભિરે।
VIII તદા યીશુસ્તેષાં ચિન્તાં વિદિત્વા તં શુષ્કકરં પુમાંસં પ્રોવાચ, ત્વમુત્થાય મધ્યસ્થાને તિષ્ઠ।
IX તસ્માત્ તસ્મિન્ ઉત્થિતવતિ યીશુસ્તાન્ વ્યાજહાર, યુષ્માન્ ઇમાં કથાં પૃચ્છામિ, વિશ્રામવારે હિતમ્ અહિતં વા, પ્રાણરક્ષણં
પ્રાણનાશનં વા, એતેષાં કિં કર્મ્મકરણીયમ્?
X પશ્ચાત્ ચતુર્દિક્ષુ સર્વ્વાન્ વિલોક્ય તં માનવં બભાષે, નિજકરં પ્રસારય; તતસ્તેન તથા કૃત ઇતરકરવત્ તસ્ય હસ્તઃ
સ્વસ્થોભવત્।
XI તસ્માત્ તે પ્રચણ્ડકોપાન્વિતા યીશું કિં કરિષ્યન્તીતિ પરસ્પરં પ્રમન્ત્રિતાઃ।
XII તતઃ પરં સ પર્વ્વતમારુહ્યેશ્વરમુદ્દિશ્ય પ્રાર્થયમાનઃ કૃત્સ્નાં રાત્રિં યાપિતવાન્।
XIII અથ દિને સતિ સ સર્વ્વાન્ શિષ્યાન્ આહૂતવાન્ તેષાં મધ્યે
XIV પિતરનામ્ના ખ્યાતઃ શિમોન્ તસ્ય ભ્રાતા આન્દ્રિયશ્ચ યાકૂબ્ યોહન્ ચ ફિલિપ્ બર્થલમયશ્ચ
XV મથિઃ થોમા આલ્ફીયસ્ય પુત્રો યાકૂબ્ જ્વલન્તનામ્ના ખ્યાતઃ શિમોન્
XVI ચ યાકૂબો ભ્રાતા યિહૂદાશ્ચ તં યઃ પરકરેષુ સમર્પયિષ્યતિ સ ઈષ્કરીયોતીયયિહૂદાશ્ચૈતાન્ દ્વાદશ જનાન્ મનોનીતાન્ કૃત્વા
સ જગ્રાહ તથા પ્રેરિત ઇતિ તેષાં નામ ચકાર।
XVII તતઃ પરં સ તૈઃ સહ પર્વ્વતાદવરુહ્ય ઉપત્યકાયાં તસ્થૌ તતસ્તસ્ય શિષ્યસઙ્ઘો યિહૂદાદેશાદ્ યિરૂશાલમશ્ચ સોરઃ સીદોનશ્ચ
જલધે રોધસો જનનિહાશ્ચ એત્ય તસ્ય કથાશ્રવણાર્થં રોગમુક્ત્યર્થઞ્ચ તસ્ય સમીપે તસ્થુઃ।
XVIII અમેધ્યભૂતગ્રસ્તાશ્ચ તન્નિકટમાગત્ય સ્વાસ્થ્યં પ્રાપુઃ।
XIX સર્વ્વેષાં સ્વાસ્થ્યકરણપ્રભાવસ્ય પ્રકાશિતત્વાત્ સર્વ્વે લોકા એત્ય તં સ્પ્રષ્ટું યેતિરે।
XX પશ્ચાત્ સ શિષ્યાન્ પ્રતિ દૃષ્ટિં કુત્વા જગાદ, હે દરિદ્રા યૂયં ધન્યા યત ઈશ્વરીયે રાજ્યે વોઽધિકારોસ્તિ।
XXI હે અધુના ક્ષુધિતલોકા યૂયં ધન્યા યતો યૂયં તર્પ્સ્યથ; હે ઇહ રોદિનો જના યૂયં ધન્યા યતો યૂયં હસિષ્યથ।
XXII યદા લોકા મનુષ્યસૂનો ર્નામહેતો ર્યુષ્માન્ ઋ◌ૃતીયિષ્યન્તે પૃથક્ કૃત્વા નિન્દિષ્યન્તિ, અધમાનિવ યુષ્માન્ સ્વસમીપાદ્
દૂરીકરિષ્યન્તિ ચ તદા યૂયં ધન્યાઃ।
XXIII સ્વર્ગે યુષ્માકં યથેષ્ટં ફલં ભવિષ્યતિ, એતદર્થં તસ્મિન્ દિને પ્રોલ્લસત આનન્દેન નૃત્યત ચ, તેષાં પૂર્વ્વપુરુષાશ્ચ
ભવિષ્યદ્વાદિનઃ પ્રતિ તથૈવ વ્યવાહરન્।
XXIV કિન્તુ હા હા ધનવન્તો યૂયં સુખં પ્રાપ્નુત। હન્ત પરિતૃપ્તા યૂયં ક્ષુધિતા ભવિષ્યથ;
XXV ઇહ હસન્તો યૂયં વત યુષ્માભિઃ શોચિતવ્યં રોદિતવ્યઞ્ચ।
XXVI સર્વ્વૈલાકૈ ર્યુષ્માકં સુખ્યાતૌ કૃતાયાં યુષ્માકં દુર્ગતિ ર્ભવિષ્યતિ યુષ્માકં પૂર્વ્વપુરુષા મૃષાભવિષ્યદ્વાદિનઃ પ્રતિ તદ્વત્ કૃતવન્તઃ।
XXVII હે શ્રોતારો યુષ્મભ્યમહં કથયામિ, યૂયં શત્રુષુ પ્રીયધ્વં યે ચ યુષ્માન્ દ્વિષન્તિ તેષામપિ હિતં કુરુત।
XXVIII યે ચ યુષ્માન્ શપન્તિ તેભ્ય આશિષં દત્ત યે ચ યુષ્માન્ અવમન્યન્તે તેષાં મઙ્ગલં પ્રાર્થયધ્વં।
XXIX યદિ કશ્ચિત્ તવ કપોલે ચપેટાઘાતં કરોતિ તર્હિ તં પ્રતિ કપોલમ્ અન્યં પરાવર્ત્ત્ય સમ્મુખીકુરુ પુનશ્ચ યદિ કશ્ચિત્ તવ
ગાત્રીયવસ્ત્રં હરતિ તર્હિ તં પરિધેયવસ્ત્રમ્ અપિ ગ્રહીતું મા વારય।
XXX યસ્ત્વાં યાચતે તસ્મૈ દેહિ, યશ્ચ તવ સમ્પત્તિં હરતિ તં મા યાચસ્વ।
XXXI પરેભ્યઃ સ્વાન્ પ્રતિ યથાચરણમ્ અપેક્ષધ્વે પરાન્ પ્રતિ યૂયમપિ તથાચરત।
XXXII યે જના યુષ્માસુ પ્રીયન્તે કેવલં તેષુ પ્રીયમાણેષુ યુષ્માકં કિં ફલં? પાપિલોકા અપિ સ્વેષુ પ્રીયમાણેષુ પ્રીયન્તે।
XXXIII યદિ હિતકારિણ એવ હિતં કુરુથ તર્હિ યુષ્માકં કિં ફલં? પાપિલોકા અપિ તથા કુર્વ્વન્તિ।
XXXIV યેભ્ય ઋણપરિશોધસ્ય પ્રાપ્તિપ્રત્યાશાસ્તે કેવલં તેષુ ઋણે સમર્પિતે યુષ્માકં કિં ફલં? પુનઃ પ્રાપ્ત્યાશયા પાપીલોકા અપિ
પાપિજનેષુ ઋણમ્ અર્પયન્તિ।
XXXV અતો યૂયં રિપુષ્વપિ પ્રીયધ્વં, પરહિતં કુરુત ચ; પુનઃ પ્રાપ્ત્યાશાં ત્યક્ત્વા ઋણમર્પયત, તથા કૃતે યુષ્માકં મહાફલં
ભવિષ્યતિ, યૂયઞ્ચ સર્વ્વપ્રધાનસ્ય સન્તાના ઇતિ ખ્યાતિં પ્રાપ્સ્યથ, યતો યુષ્માકં પિતા કૃતઘ્નાનાં દુર્વૃત્તાનાઞ્ચ હિતમાચરતિ।
XXXVI અત એવ સ યથા દયાલુ ર્યૂયમપિ તાદૃશા દયાલવો ભવત।
XXXVII અપરઞ્ચ પરાન્ દોષિણો મા કુરુત તસ્માદ્ યૂયં દોષીકૃતા ન ભવિષ્યથ; અદણ્ડ્યાન્ મા દણ્ડયત તસ્માદ્ યૂયમપિ દણ્ડં ન
પ્રાપ્સ્યથ; પરેષાં દોષાન્ ક્ષમધ્વં તસ્માદ્ યુષ્માકમપિ દોષાઃ ક્ષમિષ્યન્તે।
XXXVIII દાનાનિદત્ત તસ્માદ્ યૂયં દાનાનિ પ્રાપ્સ્યથ, વરઞ્ચ લોકાઃ પરિમાણપાત્રં પ્રદલય્ય સઞ્ચાલ્ય પ્રોઞ્ચાલ્ય પરિપૂર્ય્ય યુષ્માકં
ક્રોડેષુ સમર્પયિષ્યન્તિ; યૂયં યેન પરિમાણેન પરિમાથ તેનૈવ પરિમાણેન યુષ્મત્કૃતે પરિમાસ્યતે।
XXXIX અથ સ તેભ્યો દૃષ્ટાન્તકથામકથયત્, અન્ધો જનઃ કિમન્ધં પન્થાનં દર્શયિતું શક્નોતિ? તસ્માદ્ ઉભાવપિ કિં ગર્ત્તે ન
પતિષ્યતઃ?

XL ગુરોઃ શિષ્યો ન શ્રેષ્ઠઃ કિન્તુ શિષ્યે સિદ્ધે સતિ સ ગુરુતુલ્યો ભવિતું શક્નોતિ।
XLI અપરઞ્ચ ત્વં સ્વચક્ષુષિ નાસામ્ અદૃષ્ટ્વા તવ ભ્રાતુશ્ચક્ષુષિ યત્તૃણમસ્તિ તદેવ કુતઃ પશ્યસિ?
XLII સ્વચક્ષુષિ યા નાસા વિદ્યતે તામ્ અજ્ઞાત્વા, ભ્રાતસ્તવ નેત્રાત્ તૃણં બહિઃ કરોમીતિ વાક્યં ભ્રાતરં કથં વક્તું શક્નોષિ? હે કપટિન્ પૂર્વ્વં સ્વનયનાત્ નાસાં બહિઃ કુરુ તતો ભ્રાતુશ્ચક્ષુષસ્તૃણં બહિઃ કર્ત્તું સુદૃષ્ટિં પ્રાપ્સ્યસિ।
XLIII અન્યચ્ચ ઉત્તમસ્તરુઃ કદાપિ ફલમનુત્તમં ન ફલતિ, અનુત્તમતરુશ્ચ ફલમુત્તમં ન ફલતિ કારણાદતઃ ફલૈસ્તરવો જ્ઞાયન્તે।
XLIV કણ્ટકિપાદપાત્ કોપિ ઉડુમ્બરફલાનિ ન પાતયતિ તથા શૃગાલકોલિવૃક્ષાદપિ કોપિ દ્રાક્ષાફલં ન પાતયતિ।
XLV તદ્વત્ સાધુલોકોઽન્તઃકરણરૂપાત્ સુભાણ્ડાગારાદ્ ઉત્તમાનિ દ્રવ્યાણિ બહિઃ કરોતિ, દુષ્ટો લોકશ્ચાન્તઃકરણરૂપાત્ કુભાણ્ડાગારાત્ કુત્સિતાનિ દ્રવ્યાણિ નિર્ગમયતિ યતોઽન્તઃકરણાનાં પૂર્ણભાવાનુરૂપાણિ વચાંસિ મુખાન્નિર્ગચ્છન્તિ।
XLVI અપરઞ્ચ મમાજ્ઞાનુરૂપં નાચરિત્વા કુતો માં પ્રભો પ્રભો ઇતિ વદથ?
XLVII યઃ કશ્ચિન્ મમ નિકટમ્ આગત્ય મમ કથા નિશમ્ય તદનુરૂપં કર્મ્મ કરોતિ સ કસ્ય સદૃશો ભવતિ તદહં યુષ્માન્ જ્ઞાપયામિ।
XLVIII યો જનો ગભીરં ખનિત્વા પાષાણસ્થલે ભિત્તિં નિર્મ્માય સ્વગૃહં રચયતિ તેન સહ તસ્યોપમા ભવતિ; યત આપ્લાવિજલમેત્ય તસ્ય મૂલે વેગેન વહદપિ તદ્ગેહં લાડયિતું ન શક્નોતિ યતસ્તસ્ય ભિત્તિઃ પાષાણોપરિ તિષ્ઠતિ।
XLIX કિન્તુ યઃ કશ્ચિન્ મમ કથાઃ શ્રુત્વા તદનુરૂપં નાચરતિ સ ભિત્તિં વિના મૃદુપરિ ગૃહનિર્મ્માત્રા સમાનો ભવતિ; યત આપ્લાવિજલમાગત્ય વેગેન યદા વહતિ તદા તદ્ગૃહં પતતિ તસ્ય મહત્ પતનં જાયતે।

# VII

I તતઃ પરં સ લોકાનાં કર્ણગોચરે તાન્ સર્વ્વાન્ ઉપદેશાન્ સમાપ્ય યદા કફર્નાહૂમ્પુરં પ્રવિશતિ
II તદા શતસેનાપતેઃ પ્રિયદાસ એકો મૃતકલ્પઃ પીડિત આસીત્।
III અતઃ સેનાપતિ ર્યીશો ર્વાર્ત્તાં નિશમ્ય દાસસ્યારોગ્યકરણાય તસ્યાગમનાર્થં વિનયકરણાય યિહૂદીયાન્ કિયતઃ પ્રાચઃ પ્રેષયામાસ।
IV તે યીશોરન્તિકં ગત્વા વિનયાતિશયં વક્તુમારેભિરે, સ સેનાપતિ ર્ભવતોનુગ્રહં પ્રાપ્તુમ્ અર્હતિ।
V યતઃ સોસ્મજ્જાતીયેષુ લોકેષુ પ્રીયતે તથાસ્મત્કૃતે ભજનગેહં નિર્મ્મિતવાન્।
VI તસ્માદ્ યીશુસ્તૈઃ સહ ગત્વા નિવેશનસ્ય સમીપં પ્રાપ, તદા સ શતસેનાપતિ ર્વક્ષ્યમાણવાક્યં તં વક્તું બન્ધૂન્ પ્રાહિણોત્। હે પ્રભો સ્વયં શ્રમો ન કર્ત્તવ્યો યદ્ ભવતા મદ્ગેહમધ્યે પાદાર્પણં ક્રિયેત તદપ્યહં નાર્હામિ,
VII કિઞ્ચાહં ભવત્સમીપં યાતુમપિ નાત્માનં યોગ્યં બુદ્ધવાન્, તતો ભવાન્ વાક્યમાત્રં વદતુ તેનૈવ મમ દાસઃ સ્વસ્થો ભવિષ્યતિ।
VIII યસ્માદ્ અહં પરાધીનોપિ મમાધીના યાઃ સેનાઃ સન્તિ તાસામ્ એકજનં પ્રતિ યાહીતિ મયા પ્રોક્તે સ યાતિ; તદન્યં પ્રતિ આયાહીતિ પ્રોક્તે સ આયાતિ; તથા નિજદાસં પ્રતિ એતત્ કુર્વ્વિતિ પ્રોક્તે સ તદેવ કરોતિ।
IX યીશુરિદં વાક્યં શ્રુત્વા વિસ્મયં યયૌ, મુખં પરાવર્ત્ય પશ્ચાદ્વર્ત્તિનો લોકાન્ બભાષે ચ, યુષ્માનહં વદામિ ઇસ્રાયેલો વંશમધ્યેપિ વિશ્વાસમીદૃશં ન પ્રાપ્નવં।
X તતસ્તે પ્રેષિતા ગૃહં ગત્વા તં પીડિતં દાસં સ્વસ્થં દદૃશુઃ।
XI પરેઽહનિ સ નાયીનાખ્યં નગરં જગામ તસ્યાનેકે શિષ્યા અન્યે ચ લોકાસ્તેન સાર્દ્ધં યયુઃ।
XII તેષુ તન્નગરસ્ય દ્વારસન્નિધિં પ્રાપ્તેષુ કિયન્તો લોકા એકં મૃતમનુજં વહન્તો નગરસ્ય બહિર્યાન્તિ, સ તન્માતુરેકપુત્રસ્તન્માતા ચ વિધવા; તયા સાર્દ્ધં તન્નગરીયા બહવો લોકા આસન્।
XIII પ્રભુસ્તાં વિલોક્ય સાનુકમ્પઃ કથયામાસ, મા રોદીઃ। સ સમીપમિત્વા ખટ્વાં પસ્પર્શ તસ્માદ્ વાહકાઃ સ્થગિતાસ્તમ્યુઃ;
XIV તદા સ ઉવાચ હે યુવમનુષ્ય ત્વમુત્તિષ્ઠ, ત્વામહમ્ આજ્ઞાપયામિ।
XV તસ્માત્ સ મૃતો જનસ્તત્ક્ષણમુત્થાય કથાં પ્રકથિતઃ; તતો યીશુસ્તસ્ય માતરિ તં સમર્પયામાસ।
XVI તસ્માત્ સર્વ્વે લોકાઃ શશઙ્કિરે; એકો મહાભવિષ્યદ્વાદી મધ્યેઽસ્માકમ્ સમુદૈત્, ઈશ્વરશ્ચ સ્વલોકાનન્વગૃહ્લાત્ કથામિમાં કથયિત્વા ઈશ્વરં ધન્યં જગદુઃ।
XVII તતઃ પરં સમસ્તં યિહૂદાદેશં તસ્ય ચતુર્દિક્સ્થદેશઞ્ચ તસ્યૈતત્કીર્ત્તિ વ્યાનશે।
XVIII તતઃ પરં યોહનઃ શિષ્યેષુ તં તદ્વૃત્તાન્તં જ્ઞાપિતવત્સુ
XIX સ સ્વશિષ્યાણાં દ્વૌ જનાવાહૂય યીશું પ્રતિ વક્ષ્યમાણં વાક્યં વક્તું પ્રેષયામાસ, યસ્યાગમનમ્ અપેક્ષ્ય તિષ્ઠામો વયં કિં સ એવ જનસ્ત્વં? કિં વયમન્યમપેક્ષ્ય સ્થાસ્યામઃ?
XX પશ્ચાત્તૌ માનવૌ ગત્વા કથયામાસતુઃ, યસ્યાગમનમ્ અપેક્ષ્ય તિષ્ઠામો વયં, કિં સએવ જનસ્ત્વં? કિં વયમન્યમપેક્ષ્ય સ્થાસ્યામઃ? કથામિમાં તુભ્યં કથયિતું યોહન્ મજ્જક આવાં પ્રેષિતવાન્।
XXI તસ્મિન્ દણ્ડે યીશૂરોગિણો મહાવ્યાધિમતો દુષ્ટભૂતગ્રસ્તાંશ્ચ બહૂન્ સ્વસ્થાન્ કૃત્વા, અનેકાન્ધેભ્યશ્ચક્ષુંષિ દત્ત્વા પ્રત્યુવાચ,
XXII યુવાં વ્રજતમ્ અન્ધા નેત્રાણિ ખઞ્જાશ્ચરણાનિ ચ પ્રાપ્નુવન્તિ, કુષ્ઠિનઃ પરિષ્ક્રિયન્તે, બધિરાઃ શ્રવણાનિ મૃતાશ્ચ જીવનાનિ પ્રાપ્નુવન્તિ, દરિદ્રાણાં સમીપેષુ સુસંવાદઃ પ્રચાર્ય્યતે, યં પ્રતિ વિઘ્નસ્વરૂપોહં ન ભવામિ સ ધન્યઃ,
XXIII એતાનિ યાનિ પશ્યથઃ શૃણુથશ્ચ તાનિ યોહનં જ્ઞાપયતમ્।
XXIV તયો ર્દૂતયો ર્ગતયોઃ સતો ર્યોહનિ સ લોકાન્ વક્તુમુપચક્રમે, યૂયં મધ્યેપ્રાન્તરં કિં દ્રષ્ટું નિરગમત? કિં વાયુના કમ્પિતં નડં?
XXV યૂયં કિં દ્રષ્ટું નિરગમત? કિં સૂક્ષ્મવસ્ત્રપરિધાયિનં કમપિ નરં? કિન્તુ યે સૂક્ષ્મમૃદુવસ્ત્રાણિ પરિદધતિ સૂત્તમાનિ દ્રવ્યાણિ ભુઞ્જતે ચ તે રાજધાનીષુ તિષ્ઠન્તિ।
XXVI તર્હિ યૂયં કિં દ્રષ્ટું નિરગમત? કિમેકં ભવિષ્યદ્વાદિનં? તદેવ સત્યં કિન્તુ સ પુમાન્ ભવિષ્યદ્વાદિનોપિ શ્રેષ્ઠ ઇત્યહં યુષ્માન્ વદામિ;
XXVII પશ્ય સ્વકીયદૂતન્તુ તવાગ્ર પ્રેષયામ્યહં। ગત્વા ત્વદીયમાર્ગન્તુ સ હિ પરિષ્કરિષ્યતિ। યદર્થે લિપિરિયમ્ આસ્તે સ એવ યોહન્।

XXVIII અતો યુષ્માનહં વદામિ સ્ત્રિયા ગર્ભજાતાનાં ભવિષ્યદ્વાદિનાં મધ્યે યોહનો મજ્જકાત્ શ્રેષ્ઠઃ કોપિ નાસ્તિ, તત્રાપિ
ઈશ્વરસ્ય રાજ્યે યઃ સર્વ્વસ્માત્ ક્ષુદ્રઃ સ યોહનોપિ શ્રેષ્ઠઃ।
XXIX અપરઞ્ચ સર્વ્વે લોકાઃ કરમઞ્ચાયિનશ્ચ તસ્ય વાક્યાનિ શ્રુત્વા યોહના મજ્જનેન મજ્જિતાઃ પરમેશ્વરં નિર્દોષં મેનિરે।
XXX કિન્તુ ફિરૂશિનો વ્યવસ્થાપકાશ્ચ તેન ન મજ્જિતાઃ સ્વાન્ પ્રતીશ્વરસ્યોપદેશં નિષ્ફલમ્ અકુર્વ્વન્।
XXXI અથ પ્રભુઃ કથયામાસ, ઇદાનીન્તનજનાન્ કેનોપમામિ? તે કસ્ય સદૃશાઃ?
XXXII યે બાલકા વિપણ્યામ્ ઉપવિશ્ય પરસ્પરમ્ આહૂય વાક્યમિદં વદન્તિ, વયં યુષ્માકં નિકટે વંશીરવાદિષ્મ, કિન્તુ યૂયં
નાનર્ત્તિષ્ટ, વયં યુષ્માકં નિકટ અરોદિષ્મ, કિન્તુ યુયં ન વ્યલપિષ્ટ, બાલકૈરેતાદૃશૈસ્તેષામ્ ઉપમા ભવતિ।
XXXIII યતો યોહન્ મજ્જક આગત્ય પૂપં નાખાદત્ દ્રાક્ષારસઞ્ચ નાપિવત્ તસ્માદ્ યૂયં વદથ, ભૂતગ્રસ્તોયમ્।
XXXIV તતઃ પરં માનવસુત આગત્યાખાદદપિવઞ્ચ તસ્માદ્ યૂયં વદથ, ખાદકઃ સુરાપશ્ચાણ્ડાલપાપિનાં બન્ધુરેકો જનો દૃશ્યતામ્।
XXXV કિન્તુ જ્ઞાનિનો જ્ઞાનં નિર્દોષં વિદુઃ।
XXXVI પશ્ચાદેકઃ ફિરૂશી યીશું ભોજનાય ન્યમન્ત્રયત્ તતઃ સ તસ્ય ગૃહં ગત્વા ભોક્તુમુપવિષ્ટઃ।
XXXVII એતર્હિ તત્ફિરૂશિનો ગૃહે યીશુ ર્ભેક્તુમ્ ઉપાવેક્ષીત્ તચ્છ્રુત્વા તન્નગરવાસિની કાપિ દુષ્ટા નારી પાણ્ડરપ્રસ્તરસ્ય સમ્પુટકે
સુગન્ધિતૈલમ્ આનીય
XXXVIII તસ્ય પશ્ચાત્ પાદયોઃ સન્નિધૌ તસ્યૌ રુદતી ચ નેત્રામ્બુભિસ્તસ્ય ચરણૌ પ્રક્ષાલ્ય નિજકચૈરમાર્ક્ષીત્, તતસ્તસ્ય ચરણૌ
ચુમ્બિત્વા તેન સુગન્ધિતૈલેન મમર્દ।
XXXIX તસ્માત્ સ નિમન્ત્રયિતા ફિરૂશી મનસા ચિન્તયામાસ, યદ્યયં ભવિષ્યદ્વાદી ભવેત્ તર્હિ એનં સ્પૃશતિ યા સ્ત્રી સા કા
કીદૃશી ચેતિ જ્ઞાતું શક્નુયાત્ યતઃ સા દુષ્ટા।
XL તદા યાશુસ્તં જગાદ, હે શિમોન્ ત્વાં પ્રતિ મમ કિઞ્ચિદ્ વક્તવ્યમસ્તિ; તસ્માત્ સ બભાષે, હે ગુરો તદ્ વદતુ।
XLI એકોત્તમર્ણસ્ય દ્વાવધમર્ણાવાસ્તાં, તયોરેકઃ પઞ્ચશતાનિ મુદ્રાપાદાન્ અપરશ્ચ પઞ્ચાશત્ મુદ્રાપાદાન્ ધારયામાસ।
XLII તદનન્તરં તયોઃ શોધ્યાભાવાત્ સ ઉત્તમર્ણસ્તયો રૃણે ચક્ષમે; તસ્માત્ તયોર્દ્વયોઃ કસ્તસ્મિન્ પ્રેષ્યતે બહુ? તદ્ બ્રૂહિ।
XLIII શિમોન્ પ્રત્યુવાચ, મયા બુધ્યતે યસ્યાધિકમ્ ઋણં ચક્ષમે સ ઇતિ; તતો યીશુસ્તં વ્યાજહાર, ત્વં યથાર્થં વ્યચારયઃ।
XLIV અથ તાં નારીં પ્રતિ વ્યાઘુટ્ય શિમોનમવોચત્, સ્ત્રીમિમાં પશ્યસિ? તવ ગૃહે મય્યાગતે ત્વં પાદપ્રક્ષાલનાર્થં જલં નાદાઃ કિન્તુ
યોષિદેષા નયનજલૈ ર્મમ પાદૌ પ્રક્ષાલ્ય કેશૈરમાર્ક્ષીત્।
XLV ત્વં માં નાચુમ્બીઃ કિન્તુ યોષિદેષા સ્વીયાગમનાદારભ્ય મદીયપાદૌ ચુમ્બિતું ન વ્યરંસ્ત।
XLVI ત્વઞ્ચ મદીયોત્તમાઙ્ગે કિઞ્ચિદપિ તૈલં નામર્દીઃ કિન્તુ યોષિદેષા મમ ચરણૌ સુગન્ધિતૈલેનામર્દીત્।
XLVII અતસ્ત્વાં વ્યાહરામિ, એતસ્યા બહુ પાપમક્ષમ્યત તતો બહુ પ્રીયતે કિન્તુ યસ્યાલ્પપાપં ક્ષમ્યતે સોલ્પં પ્રીયતે।
XLVIII તતઃ પરં સ તાં બભાષે, ત્વદીયં પાપમક્ષમ્યત।
XLIX તદા તેન સાર્દ્ધં યે ભોક્તુમ્ ઉપવિવિશુસ્તે પરસ્પરં વક્તુમારેભિરે, અયં પાપં ક્ષમતે ક એષઃ?
L કિન્તુ સ તાં નારીં જગાદ, તવ વિશ્વાસસ્ત્વાં પર્ય્યત્રાસ્ત ત્વં ક્ષેમેણ વ્રજ।

# VIII

I અપરઞ્ચ યીશુ ર્દ્વાદશભિઃ શિષ્યૈઃ સાર્દ્ધં નાનાનગરેષુ નાનાગ્રામેષુ ચ ગચ્છન્ ઇશ્વરીયરાજત્વસ્ય સુસંવાદં પ્રચારયિતું પ્રારેભે।
II તદા યસ્યાઃ સપ્ત ભૂતા નિરગચ્છન્ સા મગ્દલીનીતિ વિખ્યાતા મરિયમ્ હેરોદ્રાજસ્ય ગૃહાધિપતેઃ હોષે ર્ભાર્ય્યા યોહના શૂશાના
III પ્રભૃતયો યા બહ્વ્યઃ સ્ત્રિયઃ દુષ્ટભૂતેભ્યો રોગેભ્યશ્ચ મુક્તાઃ સત્યો નિજવિભૂતી ર્વ્યયિત્વા તમસેવન્ત, તાઃ સર્વ્વાસ્તેન સાર્દ્ધમ્
આસન્।
IV અનન્તરં નાનાનગરેભ્યો બહવો લોકા આગત્ય તસ્ય સમીપેઽમિલન્, તદા સ તેભ્ય એકાં દૃષ્ટાન્તકથાં કથયામાસ। એકઃ
કૃષીબલો બીજાનિ વપ્તું બહિર્જગામ,
V તતો વપનકાલે કતિપયાનિ બીજાનિ માર્ગપાર્શ્વે પેતુઃ, તતસ્તાનિ પદતલૈ ર્દલિતાનિ પક્ષિભિ ર્ભક્ષિતાનિ ચ।
VI કતિપયાનિ બીજાનિ પાષાણસ્થલે પતિતાનિ યદ્યપિ તાન્યઙ્કુરિતાનિ તથાપિ રસાભાવાત્ શુશુષુઃ।
VII કતિપયાનિ બીજાનિ કણ્ટકિવનમધ્યે પતિતાનિ તતઃ કણ્ટકિવનાનિ સંવૃદ્ધ્ય તાનિ જગ્રસુઃ।
VIII તદન્યાનિ કતિપયબીજાનિ ચ ભૂમ્યામુત્તમાયાં પેતુસ્તતસ્તાન્યઙ્કુરયિત્વા શતગુણાનિ ફલાનિ ફેલુઃ। સ ઇમા કથાં કથયિત્વા
પ્રોચ્ચૈઃ પ્રોવાચ, યસ્ય શ્રોતું શ્રોત્રે સ્તઃ સ શૃણોતુ।
IX તતઃ પરં શિષ્યાસ્તં પપ્રચ્છુરસ્ય દૃષ્ટાન્તસ્ય કિં તાત્પર્ય્યં?
X તતઃ સ વ્યાજહાર, ઈશ્વરીયરાજ્યસ્ય ગુહ્યાનિ જ્ઞાતું યુષ્મભ્યમધિકારો દીયતે કિન્ત્વન્યે યથા દૃષ્ટ્વાપિ ન પશ્યન્તિ શ્રુત્વાપિ
મ બુધ્યન્તે ચ તદર્થં તેષાં પુરસ્તાત્ તાઃ સર્વ્વાઃ કથા દૃષ્ટાન્તેન કથ્યન્તે।
XI દૃષ્ટાન્તસ્યાસ્યાભિપ્રાયઃ, ઈશ્વરીયકથા બીજસ્વરૂપા।
XII યે કથામાત્રં શૃણ્વન્તિ કિન્તુ પશ્ચાદ્ વિશ્વસ્ય યથા પરિત્રાણં ન પ્રાપ્નુવન્તિ તદાશયેન શૈતાનેત્ય હૃદયાત્ તાં કથામ્ અપહરતિ
ત એવ માર્ગપાર્શ્વસ્થભૂમિસ્વરૂપાઃ।
XIII યે કથં શ્રુત્વા સાનન્દં ગૃહ્લન્તિ કિન્ત્વબદ્ધમૂલત્વાત્ સ્વલ્પકાલમાત્રં પ્રતીત્ય પરીક્ષાકાલે ભ્રશ્યન્તિ તએવ
પાષાણભૂમિસ્વરૂપાઃ।
XIV યે કથાં શ્રુત્વા યાન્તિ વિષયચિન્તાયાં ધનલોભેન એ◌ૈહિકસુખે ચ મજ્જન્ત ઉપયુક્તફલાનિ ન ફલન્તિ ત
એવોપ્તબીજકણ્ટકિભૂસ્વરૂપાઃ।
XV કિન્તુ યે શ્રુત્વા સરલૈઃ શુદ્ધૈશ્ચાન્તઃકરણૈઃ કથાં ગૃહ્લન્તિ ધૈર્ય્યમ્ અવલમ્બ્ય ફલાન્યુત્પાદયન્તિ ચ ત એવોત્તમમૃત્સ્વરૂપાઃ।

XVI અપરઞ્ચ પ્રદીપં પ્રજ્વાલ્ય કોપિ પાત્રેણ નાચ્છાદયતિ તથા ખટ્વાધોપિ ન સ્થાપયતિ, કિન્તુ દીપાધારોપર્ય્યેવ સ્થાપયતિ, તસ્માત્ પ્રવેશકા દીપ્તિં પશ્યન્તિ।
XVII યન્ન પ્રકાશયિષ્યતે તાદૃગ્ અપ્રકાશિતં વસ્તુ કિમપિ નાસ્તિ યચ્ચ ન સુવ્યક્તં પ્રચારયિષ્યતે તાદૃગ્ ગૃપ્તં વસ્તુ કિમપિ નાસ્તિ।
XVIII અતો યૂયં કેન પ્રકારેણ શૃણુથ તત્ર સાવધાના ભવત, યસ્ય સમીપે બર્દ્ધતે તસ્મૈ પુનર્દાસ્યતે કિન્તુ યસ્યાશ્રયે ન બર્દ્ધતે તસ્ય યદ્યદસ્તિ તદપિ તસ્માત્ નેષ્યતે।
XIX અપરઞ્ચ યીશો ર્માતા ભ્રાતરશ્ચ તસ્ય સમીપં જિગમિષવઃ
XX કિન્તુ જનતાસમ્બાધાત્ તત્સન્નિધિં પ્રાપ્તું ન શેકુઃ। તત્પશ્ચાત્ તવ માતા ભ્રાતરશ્ચ ત્વાં સાક્ષાત્ ચિકીર્ષન્તો બહિસ્તિષ્ઠનતીતિ વાર્ત્તાયાં તસ્મૈ કથિતાયાં
XXI સ પ્રત્યુવાચ; યે જના ઈશ્વરસ્ય કથાં શ્રુત્વા તદનુરૂપમાચરન્તિ તએવ મમ માતા ભ્રાતરશ્ચ।
XXII અનન્તરં એકદા યીશુઃ શિષ્યૈઃ સાર્દ્ધં નાવમારુહ્ય જગાદ, આયાત વયં હ્રદસ્ય પારં યામઃ, તતસ્તે જગ્મુઃ।
XXIII તેષુ નૌકાં વાહયત્સુ સ નિદદ્રૌ;
XXIV અથાકસ્માત્ પ્રબલઝઞ્ભ્શગમાદ્ હ્રદે નૌકાયાં તરઙ્ગૈરાચ્છન્નાયાં વિપત્ તાન્ જગ્રાસ। તસ્માદ્ યીશોરન્તિકં ગત્વા હે ગુરો હે ગુરો પ્રાણા નો યાન્તીતિ ગદિત્વા તં જાગરયામ્બભૂવુઃ। તદા સ ઉત્થાય વાયું તરઙ્ગાંશ્ચ તર્જયામાસ તસ્માદુભૌ નિવૃત્ય સ્થિરૌ બભૂવતુઃ।
XXV સ તાન્ બભાષે યુષ્માકં વિશ્વાસઃ ક? તસ્માત્તે ભીતા વિસ્મિતાશ્ચ પરસ્પરં જગદુઃ, અહો કીદૃગયં મનુજઃ પવનં પાનીયઞ્ચાદિશતિ તદુભયં તદાદેશં વહતિ।
XXVI તતઃ પરં ગાલીલ્પ્રદેશસ્ય સમ્મુખસ્થગિદેરીયપ્રદેશે નૌકાયાં લગન્ત્યાં તટેઽવરોહમાવાદ્
XXVII બહુતિથકાલં ભૂતગ્રસ્ત એકો માનુષઃ પુરાદાગત્ય તં સાક્ષાચ્ચકાર। સ મનુષો વાસો ન પરિદધત્ ગૃહે ચ ન વસન્ કેવલં શ્મશાનમ્ અધ્યુવાસ।
XXVIII સ યીશું દૃષ્ટ્વૈવ ચીચ્છબ્દં ચકાર તસ્ય સમ્મુખે પતિત્વા પ્રોચ્ચૈર્જગાદ ચ, હે સર્વ્વપ્રધાનેશ્વરસ્ય પુત્ર, મયા સહ તવ કઃ સમ્બન્ધઃ? ત્વયિ વિનયં કરોમિ માં મા યાતય।
XXIX યતઃ સ તં માનુષં ત્યક્ત્વા યાતુમ્ અમેધ્યભૂતમ્ આદિદેશ; સ ભૂતસ્તં માનુષમ્ અસકૃદ્ દધાર તસ્માલ્લોકાઃ શૃઙ્ખલેન નિગડેન ચ બબન્ધુઃ; સ તદ્ ભંક્ત્વા ભૂતવશત્વાત્ મધ્યેપ્રાન્તરં યયૌ।
XXX અનન્તરં યીશુસ્તં પપ્રચ્છ તવ કિન્નામ? સ ઉવાચ, મમ નામ બાહિનો યતો બહવો ભૂતાસ્તમાશિશ્રિયુઃ।
XXXI અથ ભૂતા વિનયેન જગદુઃ, ગભીરં ગર્ત્તં ગન્તું માજ્ઞાપયાસ્માન્।
XXXII તદા પર્વ્વતોપરિ વરાહવ્રજશ્ચરતિ તસ્માદ્ ભૂતા વિનયેન પ્રોચુઃ, અમું વરાહવ્રજમ્ આશ્રયિતુમ્ અસ્માન્ અનુજાનીહિ; તતઃ સોનુજજ્ઞૌ।
XXXIII તતઃ પરં ભૂતાસ્તં માનુષં વિહાય વરાહવ્રજમ્ આશિશ્રિયુઃ વરાહવ્રજાશ્ચ તત્ક્ષણાત્ કટકેન ધાવન્તો હ્રદે પ્રાણાન્ વિજૃહુઃ।
XXXIV તદ્ દૃષ્ટ્વા શૂકરરક્ષકાઃ પલાયમાના નગરં ગ્રામઞ્ચ ગત્વા તત્સર્વ્વવૃત્તાન્તં કથયામાસુઃ।
XXXV તતઃ કિં વૃત્તમ્ એતદ્દર્શનાર્થં લોકા નિર્ગત્ય યીશોઃ સમીપં યયુઃ, તં માનુષં ત્યક્તભૂતં પરિહિતવસ્ત્રં સ્વસ્થમાનુષવદ્ યીશોશ્ચરણસન્નિધૌ સૂપવિશન્તં વિલોક્ય બિભ્યુઃ।
XXXVI યે લોકાસ્તસ્ય ભૂતગ્રસ્તસ્ય સ્વાસ્થ્યકરણં દદૃશુસ્તે તેભ્યઃ સર્વ્વવૃત્તાન્તં કથયામાસુઃ।
XXXVII તદનન્તરં તસ્ય ગિદેરીયપ્રદેશસ્ય ચતુર્દિક્સ્થા બહવો જના અતિત્રસ્તા વિનયેન તં જગદુઃ, ભવાન્ અસ્માકં નિકટાદ્ વ્રજતુ તસ્માત્ સ નાવમારુહ્ય તતો વ્યાઘુટ્ય જગામ।
XXXVIII તદાનીં ત્યક્તભૂતમનુજસ્તેન સહ સ્થાતું પ્રાર્થયાઞ્ચક્રે
XXXIX કિન્તુ તદર્થમ્ ઈશ્વરઃ કીદૃઙ્મહાકર્મ્મ કૃતવાન્ ઇતિ નિવેશનં ગત્વા વિજ્ઞાપય, યીશુઃ કથામેતાં કથયિત્વા તં વિસસર્જ। તતઃ સ વ્રજિત્વા યીશુસ્તદર્થં યન્મહાકર્મ્મ ચકાર તત્ પુરસ્ય સર્વ્વત્ર પ્રકાશયિતું પ્રારેભે।
XL અથ યીશૌ પરાવૃત્યાગતે લોકાસ્તં આદરેણ જગૃહુ ર્યસ્માત્તે સર્વ્વે તમપેક્ષાઞ્ચક્રિરે।
XLI તદનન્તરં યાયીર્નામ્નો ભજનગેહસ્યૈકોધિપ આગત્ય યીશોશ્ચરણયોઃ પતિત્વા સ્વનિવેશનાગમનાર્થં તસ્મિન્ વિનયં ચકાર,
XLII યતસ્તસ્ય દ્વાદશવર્ષવયસ્કા કન્યૈકાસીત્ સા મૃતકલ્પાભવત્। તતસ્તસ્ય ગમનકાલે માર્ગે લોકાનાં મહાન્ સમાગમો બભૂવ।
XLIII દ્વાદશવર્ષાણિ પ્રદરરોગગ્રસ્તા નાના વૈદ્યૈશ્ચિકિત્સિતા સર્વ્વસ્વં વ્યયિત્વાપિ સ્વાસ્થ્યં ન પ્રાપ્તા યા યોષિત્ સા યીશોઃ પશ્ચાદાગત્ય તસ્ય વસ્ત્રગ્રન્થિં પસ્પર્શ।
XLIV તસ્માત્ તત્ક્ષણાત્ તસ્યા રક્તસ્રાવો રુદ્ધઃ।
XLV તદાનીં યીશુરવદત્ કેનાહં સ્પૃષ્ટઃ? તતોઽનેકૈરનઙ્ગીકૃતે પિતરસ્તસ્ય સઙ્ગિનશ્ચાવદન્, હે ગુરો લોકા નિકટસ્થાઃ સન્તસ્તવ દેહે ઘર્ષયન્તિ, તથાપિ કેનાહં સ્પૃષ્ટઇતિ ભવાન્ કુતઃ પૃચ્છતિ?
XLVI યીશુઃ કથયામાસ, કેનાપ્યહં સ્પૃષ્ટો, યતો મત્તઃ શક્તિ ર્નિર્ગતેતિ મયા નિશ્ચિતમજ્ઞાયિ।
XLVII તદા સા નારી સ્વયં ન ગુપ્તેતિ વિદિત્વા કમ્પમાના સતી તસ્ય સમ્મુખે પપાત; યેન નિમિત્તેન તં પસ્પર્શ સ્પર્શમાત્રાચ્ચ યેન પ્રકારેણ સ્વસ્થાભવત્ તત્ સર્વ્વં તસ્ય સાક્ષાદાચખ્યૌ।
XLVIII તતઃ સ તાં જગાદ હે કન્યે સુસ્થિરા ભવ, તવ વિશ્વાસસ્ત્વાં સ્વસ્થામ્ અકાર્ષીત્ ત્વં ક્ષેમેણ યાહિ।
XLIX યીશોરેતદ્વાક્યવદનકાલે તસ્યાધિપતે ર્નિવેશનાત્ કશ્ચિલ્લોક આગત્ય તં બભાષે, તવ કન્યા મૃતા ગુરું મા ક્લિશાન।
L કિન્તુ યીશુસ્તદાકર્ણ્યાધિપતિં વ્યાજહાર, મા ભૈષીઃ કેવલં વિશ્વસિહિ તસ્માત્ સા જીવિષ્યતિ।
LI અથ તસ્ય નિવેશને પ્રાપ્તે સ પિતરં યોહનં યાકૂબઞ્ચ કન્યાયા માતરં પિતરઞ્ચ વિના, અન્યં કઞ્ચન પ્રવેષ્ટું વારયામાસ।
LII અપરઞ્ચ યે રુદન્તિ વિલપન્તિ ચ તાન્ સર્વ્વાન્ જનાન્ ઉવાચ, યૂયં મા રોદિષ્ટ કન્યા ન મૃતા નિદ્રાતિ।
LIII કિન્તુ સા નિશ્ચિતં મૃતેતિ જ્ઞાત્વા તે તમુપજહસુઃ।

LIV પશ્ચાત્ સ સર્વ્વાન્ બહિઃ કૃત્વા કન્યાયાઃ કરૌ ધૃત્વાજુહુવે, હે કન્યે ત્વમુત્તિષ્ઠ,
LV તસ્માત્ તસ્યાઃ પ્રાણેષુ પુનરાગતેષુ સા તત્ક્ષણાદ્ ઉત્તસ્યૌ। તદાનીં તસ્યૈ કિઞ્ચિદ્ ભક્ષ્યં દાતુમ્ આદિદેશ।
LVI તતસ્તસ્યાઃ પિતરૌ વિસ્મયં ગતૌ કિન્તુ સ તાવાદિદેશ ઘટનાયા એતસ્યાઃ કથાં કસ્મૈચિદપિ મા કથયતં।

# IX

I તતઃ પરં સ દ્વાદશશિષ્યાનાહૂય ભૂતાન્ ત્યાજયિતું રોગાન્ પ્રતિકર્ત્તુઞ્ચ તેભ્યઃ શક્તિમાધિપત્યઞ્ચ દદૌ।
II અપરઞ્ચ ઈશ્વરીયરાજ્યસ્ય સુસંવાદં પ્રકાશયિતુમ્ રોગિણામારોગ્યં કર્તુઞ્ચ પ્રેરણકાલે તાન્ જગાદ।
III યાત્રાર્થં યષ્ટિ ર્વસ્ત્રપુટકં ભક્ષ્યં મુદ્રા દ્વિતીયવસ્ત્રમ્, એષાં કિમપિ મા ગૃહ્લીત।
IV યૂયઞ્ચ યન્નિવેશનં પ્રવિશથ નગરત્યાગપર્ય્યનતં તન્નિવેશને તિષ્ઠત।
V તત્ર યદિ કસ્યચિત્ પુરસ્ય લોકા યુષ્માકમાતિથ્યં ન કુર્વ્વન્તિ તર્હિ તસ્માન્નગરાદ્ ગમનકાલે તેષાં વિરુદ્ધં સાક્ષ્યાર્થં યુષ્માકં
પદધૂલીઃ સમ્પાતયત।
VI અથ તે પ્રસ્થાય સર્વ્વત્ર સુસંવાદં પ્રચારયિતું પીડિતાન્ સ્વસ્થાન્ કર્ત્તુઞ્ચ ગ્રામેષુ ભ્રમિતું પ્રારેભિરે।
VII એતર્હિ હેરોદ્ રાજા યીશોઃ સર્વ્વકર્મ્મણાં વાર્ત્તાં શ્રુત્વા ભૃશમુદ્વિવિજે
VIII યતઃ કેચિદૂચુર્યોહન્ શ્મશાનાદુદતિષ્ઠત્। કેચિદૂચુઃ, એલિયો દર્શનં દત્તવાન્; એવમન્યલોકા ઊચુઃ પૂર્વ્વીયઃ કશ્ચિદ્ ભવિષ્યદ્વાદી
સમુત્થિતઃ।
IX કિન્તુ હેરોદુવાચ યોહનઃ શિરોઽહમછિનદમ્ ઇદાનીં યસ્યેદૃક્કર્મ્મણાં વાર્ત્તાં પ્રાપ્નોમિ સ કઃ? અથ સ તં દ્રષ્ટુમ્ ઐચ્છત્।
X અનન્તરં પ્રેરિતાઃ પ્રત્યાગત્ય યાનિ યાનિ કર્મ્માણિ ચક્રુસ્તાનિ યીશવે કથયામાસુઃ તતઃ સ તાન્ બૈત્સૈદાનામકનગરસ્ય વિજનં
સ્થાનં નીત્વા ગુપ્તં જગામ।
XI પશ્ચાલ્ લોકાસ્તદ્ વિદિત્વા તસ્ય પશ્ચાદ્ યયુઃ; તતઃ સ તાન્ નયન્ ઈશ્વરીયરાજ્યસ્ય પ્રસઙ્ગમુક્તવાન્, યેષાં ચિકિત્સયા
પ્રયોજનમ્ આસીત્ તાન્ સ્વસ્થાન્ ચકાર ચ।
XII અપરઞ્ચ દિવાવસન્ને સતિ દ્વાદશશિષ્યા યીશોરન્તિકમ્ એત્ય કથયામાસુઃ, વયમત્ર પ્રાન્તરસ્થાને તિષ્ઠામઃ, તતો નગરાણિ
ગ્રામાણિ ગત્વા વાસસ્થાનાનિ પ્રાપ્ય ભક્ષ્યદ્રવ્યાણિ ક્રેતું જનનિવહં ભવાન્ વિસૃજતુ।
XIII તદા સ ઉવાચ, યૂયમેવ તાન્ ભેજયધ્વં; તતસ્તે પ્રોચુરસ્માકં નિકટે કેવલં પઞ્ચ પૂપા દ્વૌ મત્સ્યૌ ચ વિદ્યન્તે, અતએવ
સ્થાનાન્તરમ્ ઇત્વા નિમિત્તમેતેષાં ભક્ષ્યદ્રવ્યેષુ ન ક્રીતેષુ ન ભવતિ।
XIV તત્ર પ્રાયેણ પઞ્ચસહસ્રાણિ પુરુષા આસન્।
XV તદા સ શિષ્યાન્ જગાદ પઞ્ચાશત્ પઞ્ચાશજ્જનૈઃ પંક્તીકૃત્ય તાનુપવેશયત, તસ્માત્ તે તદનુસારેણ સર્વ્વલોકાનુપવેશયાપાસુઃ।
XVI તતઃ સ તાન્ પઞ્ચ પૂપાન્ મીનદ્વયઞ્ચ ગૃહીત્વા સ્વર્ગં વિલોક્યેશ્વરગુણાન્ કીર્ત્તયાઞ્ચક્રે ભઙ્ક્ત્વા ચ લોકેભ્યઃ પરિવેષણાર્થં
શિષ્યેષુ સમર્પયામ્બભૂવ।
XVII તતઃ સર્વ્વે ભુક્ત્વા તૃપ્તિં ગતા અવશિષ્ટાનાઞ્ચ દ્વાદશ ડલ્લકાન્ સંજગૃહુઃ।
XVIII અથૈકદા નિર્જને શિષ્યૈઃ સહ પ્રાર્થનાકાલે તાન્ પપ્રચ્છ, લોકા માં કં વદન્તિ?
XIX તતસ્તે પ્રાચુઃ, ત્વાં યોહન્મજ્જકં વદન્તિ; કેચિત્ ત્વામ્ એલિયં વદન્તિ, પૂર્વ્વકાલિકઃ કશ્ચિદ્ ભવિષ્યદ્વાદી શ્મશાનાદ્
ઉદતિષ્ઠદ્ ઇત્યપિ કેચિદ્ વદન્તિ।
XX તદા સ ઉવાચ, યૂયં માં કં વદથ? તતઃ પિતર ઉક્તવાન્ ત્વમ્ ઈશ્વરાભિષિક્તઃ પુરુષઃ।
XXI તદા સ તાન્ દૃઢમાદિદેશ, કથામેતાં કસ્મૈચિદપિ મા કથયત।
XXII સ પુનરુવાચ, મનુષ્યપુત્રેણ વહુયાતના ભોક્તવ્યાઃ પ્રાચીનલોકૈઃ પ્રધાનયાજકૈરધ્યાપકૈશ્ચ સોવજ્ઞાય હન્તવ્યઃ કિન્તુ
તૃતીયદિવસે શ્મશાનાત્ તેનોત્થાતવ્યમ્।
XXIII અપરં સ સર્વ્વાનુવાચ, કશ્ચિદ્ યદિ મમ પશ્ચાદ્ ગન્તું વાઞ્છતિ તર્હિ સ સ્વં દામ્યતુ, દિને દિને ક્રુશં ગૃહીત્વા ચ મમ
પશ્ચાદાગચ્છતુ।
XXIV યતો યઃ કશ્ચિત્ સ્વપ્રાણાન્ રિરક્ષિષતિ સ તાન્ હારયિષ્યતિ, યઃ કશ્ચિન્ મદર્થં પ્રાણાન્ હારયિષ્યતિ સ તાન્ રક્ષિષ્યતિ।
XXV કશ્ચિદ્ યદિ સર્વ્વં જગત્ પ્રાપ્નોતિ કિન્તુ સ્વપ્રાણાન્ હારયતિ સ્વયં વિનશ્યતિ ચ તર્હિ તસ્ય કો લાભઃ?
XXVI પુન ર્યઃ કશ્ચિન્ માં મમ વાક્યં વા લજ્જાસ્પદં જાનાતિ મનુષ્યપુત્રો યદા સ્વસ્ય પિતુશ્ચ પવિત્રાણાં દૂતાનાઞ્ચ તેજોભિઃ
પરિવેષ્ટિત આગમિષ્યતિ તદા સોપિ તં લજ્જાસ્પદં જ્ઞાસ્યતિ।
XXVII કિન્તુ યુષ્માનહં યથાર્થં વદામિ, ઈશ્વરીયરાજત્વં ન દૃષ્ટ્વા મૃત્યું નાસ્વાદિષ્યન્તે, એતાદૃશાઃ કિયન્તો લોકા અત્ર સ્થનેઽપિ
દણ્ડાયમાનાઃ સન્તિ।
XXVIII એતદાખ્યાનકથનાત્ પરં પ્રાયેણાષ્ટસુ દિનેષુ ગતેષુ સ પિતરં યોહનં યાકૂબઞ્ચ ગૃહીત્વા પ્રાર્થયિતું પર્વ્વતમેકં સમારુરોહ।
XXIX અથ તસ્ય પ્રાર્થનકાલે તસ્ય મુખાકૃતિરન્યરૂપા જાતા, તદીયં વસ્ત્રમુજ્જ્વલશુક્લં જાતં।
XXX અપરઞ્ચ મૂસા એલિયશ્ચોભૌ તેજસ્વિનૌ દૃષ્ટૌ
XXXI તૌ તેન યિરૂશાલમ્પુરે યો મૃત્યુઃ સાધિષ્યતે તદીયાં કથાં તેન સાર્દ્ધં કથયિતુમ્ આરેભાતે।
XXXII તદા પિતરાદયઃ સ્વસ્ય સઙ્ગિનો નિદ્રયાકૃષ્ટા આસન્ કિન્તુ જાગરિત્વા તસ્ય તેજસ્તેન સાર્દ્ધમ્ ઉત્તિષ્ઠન્તૌ જનૌ ચ દદૃશુઃ।
XXXIII અથ તયોરુભયો ર્ગમનકાલે પિતરો યીશું બભાષે, હે ગુરોઽસ્માકં સ્થાનેઽસ્મિન્ સ્થિતિઃ શુભા, તત એકા ત્વદર્થા, એકા
મૂસાર્થા, એકા એલિયાર્થા, ઇતિ તિસ્રઃ કુટ્યોસ્માભિ ર્નિર્મ્મીયન્તાં, ઇમાં કથાં સ ન વિવિચ્ય કથયામાસ।
XXXIV અપરઞ્ચ તદ્વાક્યવદનકાલે પયોદ એક આગત્ય તેષામુપરિ છાયાં ચકાર, તતસ્તન્મધ્યે તયોઃ પ્રવેશાત્ તે શશઙ્કિરે।
XXXV તદા તસ્માત્ પયોદાદ્ ઇયમાકાશીયા વાણી નિર્જગામ, મમાયં પ્રિયઃ પુત્ર એતસ્ય કથાયાં મનો નિધત્ત।
XXXVI ઇતિ શબ્દે જાતે તે યીશુમેકાકિનં દદૃશુઃ કિન્તુ તે તદાનીં તસ્ય દર્શનસ્ય વાચમેકામપિ નોક્ત્વા મનઃસુ સ્થાપયામાસુઃ।
XXXVII પરેઽહનિ તેષુ તસ્માચ્છૈલાદ્ અવરૂઢેષુ તં સાક્ષાત્ કર્ત્તું બહવો લોકા આજગ્મુઃ।

XXXVIII તેષાં મધ્યાદ્ એકો જન ઉચ્ચૈરુવાચ, હે ગુરો અહં વિનયં કરોમિ મમ પુત્રં પ્રતિ કૃપાદૃષ્ટિં કરોતુ, મમ સ એવૈકઃ પુત્રઃ।

XXXIX ભૂતેન ધૃતઃ સન્ સં પ્રસભં ચીચ્છબ્દં કરોતિ તન્મુખાત્ ફેણા નિર્ગચ્છન્તિ ચ, ભૂત ઇત્થં વિદાર્ય્ય ક્લિષ્ટ્વા પ્રાયશસ્તં ન ત્યજતિ।

XL તસ્માત્ તં ભૂતં ત્યાજયિતું તવ શિષ્યસમીપે ન્યવેદયં કિન્તુ તે ન શેકુઃ।

XLI તદા યીશુરવાદીત્, રે આવિશ્વાસિન્ વિપથગામિન્ વંશ કતિકાલાન્ યુષ્માભિઃ સહ સ્થાસ્યામ્યહં યુષ્માકમ્ આચરણાનિ ચ સહિષ્યે? તવ પુત્રમિહાનય।

XLII તતસ્તસ્મિન્નાગતમાત્રે ભૂતસ્તં ભૂમૌ પાતયિત્વા વિદદાર; તદા યીશુસ્તમમેધ્યં ભૂતં તર્જયિત્વા બાલકં સ્વસ્થં કૃત્વા તસ્ય પિતરિ સમર્પયામાસ।

XLIII ઈશ્વરસ્ય મહાશક્તિમ્ ઇમાં વિલોક્ય સર્વ્વે ચમચ્ચક્રુઃ; ઇત્થં યીશોઃ સર્વ્વાભિઃ ક્રિયાભિઃ સર્વ્વૈર્લોકૈરાશ્ચર્ય્યે મન્યમાને સતિ સ શિષ્યાન્ બભાષે,

XLIV કથેયં યુષ્માકં કર્ણેષુ પ્રવિશતુ, મનુષ્યપુત્રો મનુષ્યાણાં કરેષુ સમર્પયિષ્યતે।

XLV કિન્તુ તે તાં કથાં ન બુબુધિરે, સ્પષ્ટત્વાભાવાત્ તસ્યા અભિપ્રાયસ્તેષાં બોધગમ્યો ન બભૂવ; તસ્યા આશયઃ ક ઇત્યપિ તે ભયાત્ પ્રષ્ટું ન શેકુઃ।

XLVI તદનન્તરં તેષાં મધ્યે કઃ શ્રેષ્ઠઃ કથામેતાં ગૃહીત્વા તે મિથો વિવાદં ચક્રુઃ।

XLVII તતો યીશુસ્તેષાં મનોભિપ્રાયં વિદિત્વા બાલકમેકં ગૃહીત્વા સ્વસ્ય નિકટે સ્થાપયિત્વા તાન્ જગાદ,

XLVIII યો જનો મમ નામ્નાસ્ય બાલાસ્યાતિથ્યં વિદધાતિ સ મમાતિથ્યં વિદધાતિ, યશ્ચ મમાતિથ્યં વિદધાતિ સ મમ પ્રેરકસ્યાતિથ્યં વિદધાતિ, યુષ્માકં મધ્યેયઃ સ્વં સર્વ્વસ્માત્ ક્ષુદ્રં જાનીતે સ એવ શ્રેષ્ઠો ભવિષ્યતિ।

XLIX અપરઞ્ચ યોહન્ વ્યાજહાર હે પ્રભો તવ નામ્ના ભૂતાન્ ત્યાજયન્તં માનુષમ્ એકં દૃષ્ટવન્તો વયં, કિન્ત્વસ્માકમ્ અપશ્ચાદ્ ગામિત્વાત્ તં ન્યષેધામ્। તદાનીં યીશુરુવાચ,

L તં મા નિષેધત, યતો યો જનોસ્માકં ન વિપક્ષઃ સ એવાસ્માકં સપક્ષો ભવતિ।

LI અનન્તરં તસ્યારોહણસમય ઉપસ્થિતે સ સ્થિરચેતા યિરૂશાલમં પ્રતિ યાત્રાં કર્ત્તું નિશ્ચિત્યાગ્રે દૂતાન્ પ્રેષયામાસ।

LII તસ્માત્ તે ગત્વા તસ્ય પ્રયોજનીયદ્રવ્યાણિ સંગ્રહીતું શોમિરોણીયાનાં ગ્રામં પ્રવિવિશુઃ।

LIII કિન્તુ સ યિરૂશાલમં નગરં યાતિ તતો હેતો ર્લોકાસ્તસ્યાતિથ્યં ન ચક્રુઃ।

LIV અતએવ યાકૂબ્યોહનૌ તસ્ય શિષ્યૌ તદ્ દૃષ્ટ્વા જગદતુઃ, હે પ્રભો એલિયો યથા ચકાર તથા વયમપિ કિં ગગણાદ્ આગન્તુમ્ એતાન્ ભસ્મીકર્ત્તુઞ્ચ વહ્નિમાજ્ઞાપયામઃ? ભવાન્ કિમિચ્છતિ?

LV કિન્તુ સ મુખં પરાવર્ત્ય તાન્ તર્જયિત્વા ગદિતવાન્ યુષ્માકં મનોભાવઃ કઃ, ઇતિ યૂયં ન જાનીથ।

LVI મનુજસુતો મનુજાનાં પ્રાણાન્ નાશયિતું નાગચ્છત્, કિન્તુ રક્ષિતુમ્ આગચ્છત્। પશ્ચાદ્ ઇતરગ્રામં તે યયુઃ।

LVII તદનન્તરં પથિ ગમનકાલે જન એકસ્તં બભાષે, હે પ્રભો ભવાન્ યત્ર યાતિ ભવતા સહાહમપિ તત્ર યાસ્યામિ।

LVIII તદાનીં યીશુસ્તમુવાચ, ગોમાયૂનાં ગર્ત્તા આસતે, વિહાયસીયવિહગાનાં નીડાનિ ચ સન્તિ, કિન્તુ માનવતનયસ્ય શિરઃ સ્થાપયિતું સ્થાનં નાસ્તિ।

LIX તતઃ પરં સ ઇતરજનં જગાદ, ત્વં મમ પશ્ચાદ્ એહિ; તતઃ સ ઉવાચ, હે પ્રભો પૂર્વ્વં પિતરં શ્મશાને સ્થાપયિતું મામાદિશતુ।

LX તદા યીશુરુવાચ, મૃતા મૃતાન્ શ્મશાને સ્થાપયન્તુ કિન્તુ ત્વં ગત્વેશ્વરીયરાજ્યસ્ય કથાં પ્રચારય।

LXI તતોન્યઃ કથયામાસ, હે પ્રભો મયાપિ ભવતઃ પશ્ચાદ્ ગંસ્યતે, કિન્તુ પૂર્વ્વં મમ નિવેશનસ્ય પરિજનાનામ્ અનુમતિં ગ્રહીતુમ્ અહમાદિશ્યૈ ભવતા।

LXII તદાનીં યીશુસ્તં પ્રોક્તવાન્, યો જનો લાઙ્ગલે કરમર્પયિત્વા પશ્ચાત્ પશ્યતિ સ ઈશ્વરીયરાજ્યં નાર્હતિ।

# X

I તતઃ પરં પ્રભુરપરાન્ સપ્તતિશિષ્યાન્ નિયુજ્ય સ્વયં યાનિ નગરાણિ યાનિ સ્થાનાનિ ચ ગમિષ્યતિ તાનિ નગરાણિ તાનિ સ્થાનાનિ ચ પ્રતિ દ્વૌ દ્વૌ જનૌ પ્રહિતવાન્।

II તેભ્યઃ કથયામાસ ચ શસ્યાનિ બહૂનીતિ સત્યં કિન્તુ છેદકા અલ્પે; તસ્માદ્ધેતોઃ શસ્યક્ષેત્રે છેદકાન્ અપરાનપિ પ્રેષયિતું ક્ષેત્રસ્વામિનં પ્રાર્થયધ્વં।

III યૂયં યાત, પશ્યત, વૃકાણાં મધ્યે મેષશાવકાનિવ યુષ્માન્ પ્રહિણોમિ।

IV યૂયં ક્ષુદ્રં મહદ્ વા વસનસમ્પુટકં પાદુકાશ્ચ મા ગૃહ્લીત, માર્ગમધ્યે કમપિ મા નમત ચ।

V અપરઞ્ચ યૂયં યદ્ યત્ નિવેશનં પ્રવિશથ તત્ર નિવેશનસ્યાસ્ય મઙ્ગલં ભૂયાદિતિ વાક્યં પ્રથમં વદત।

VI તસ્માત્ તસ્મિન્ નિવેશને યદિ મઙ્ગલપાત્રં સ્થાસ્યતિ તર્હિ તન્મઙ્ગલં તસ્ય ભવિષ્યતિ, નોચેત્ યુષ્માન્ પ્રતિ પરાવર્ત્તિષ્યતે।

VII અપરઞ્ચ તે યત્કિઞ્ચિદ્ દાસ્યન્તિ તદેવ ભુક્ત્વા પીત્વા તસ્મિન્નિવેશને સ્થાસ્યથ; યતઃ કર્મ્મકારી જનો ભૃતિમ્ અર્હતિ; ગૃહાદ્ ગૃહં મા યાસ્યથ।

VIII અન્યચ્ચ યુષ્માસુ કિમપિ નગરં પ્રવિષ્ટેષુ લોકા યદિ યુષ્માકમ્ આતિથ્યં કરિષ્યન્તિ, તર્હિ યત્ ખાદ્યમ્ ઉપસ્થાસ્યન્તિ તદેવ ખાદિષ્યથ।

IX તન્નગરસ્થાન્ રોગિણઃ સ્વસ્થાન્ કરિષ્યથ, ઈશ્વરીયં રાજ્યં યુષ્માકમ્ અન્તિકમ્ આગમત્ કથામેતાઞ્ચ પ્રચારયિષ્યથ।

X કિન્તુ કિમપિ પુરં યુષ્માસુ પ્રવિષ્ટેષુ લોકા યદિ યુષ્માકમ્ આતિથ્યં ન કરિષ્યન્તિ, તર્હિ તસ્ય નગરસ્ય પન્થાનં ગત્વા કથામેતાં વદિષ્યથ,

XI યુષ્માકં નગરીયા યા ધૂલ્યોઽસ્માસુ સમલગન્ તા અપિ યુષ્માકં પ્રાતિકૂલ્યેન સાક્ષ્યાર્થં સમ્પાતયામઃ; તથાપીશ્વરરાજ્યં યુષ્માકં સમીપમ્ આગતમ્ ઇતિ નિશ્ચિતં જાનીત।

XII અહં યુષ્મભ્યં યથાર્થં કથયામિ, વિચારદિને તસ્ય નગરસ્ય દશાતઃ સિદોમો દશા સહ્યા ભવિષ્યતિ।

XIII હા હા કોરાસીન્ નગર, હા હા બૈત્સૈદાનગર યુવયોર્મધ્યે યાદૃશાનિ આશ્ચર્ય્યાણિ કર્મ્માણ્યક્રિયન્ત, તાનિ કર્મ્માણિ યદિ
સોરસીદોનો ર્નગરયોરકારિષ્યન્ત, તદા ઇતો બહુદિનપૂર્વ્વં તન્નિવાસિનઃ શણવસ્ત્રાણિ પરિધાય ગાત્રેષુ ભસ્મ વિલિપ્ય સમુપવિશ્ય
સમખેત્સ્યન્ત।
XIV અતો વિચારદિવસે યુષ્માકં દશાતઃ સોરસીદોન્નિવાસિનાં દશા સહ્યા ભવિષ્યતિ।
XV હે કફર્નાહૂમ્, ત્વં સ્વર્ગં યાવદ્ ઉન્નતા કિન્તુ નરકં યાવત્ ન્યગ્ભવિષ્યસિ।
XVI યો જનો યુષ્માકં વાક્યં ગૃહ્લાતિ સ મમૈવ વાક્યં ગૃહ્લાતિ; કિઞ્ચ યો જનો યુષ્માકમ્ અવજ્ઞાં કરોતિ સ મમૈવાવજ્ઞાં કરોતિ; યો
જનો મમાવજ્ઞાં કરોતિ ચ સ મત્પ્રેરકસ્યૈવાવજ્ઞાં કરોતિ।
XVII અથ તે સપ્તતિશિષ્યા આનન્દેન પ્રત્યાગત્ય કથયામાસુઃ, હે પ્રભો ભવતો નામ્ના ભૂતા અપ્યસ્માકં વશીભવન્તિ।
XVIII તદાનીં સ તાન્ જગાદ, વિદ્યુતમિવ સ્વર્ગાત્ પતન્તં શૈતાનમ્ અદર્શમ્।
XIX પશ્યત સર્પાન્ વૃશ્ચિકાન્ રિપોઃ સર્વ્વપરાક્રમાંશ્ચ પદતલૈ ર્દલયિતું યુષ્મભ્યં શક્તિં દદામિ તસ્માદ્ યુષ્માકં કાપિ હાનિ ર્ન
ભવિષ્યતિ।
XX ભૂતા યુષ્માકં વશીભવન્તિ, એતન્નિમિત્તત્ મા સમુલ્લસત, સ્વર્ગે યુષ્માકં નામાનિ લિખિતાનિ સન્તીતિ નિમિત્તં સમુલ્લસત।
XXI તદ્ઘટિકાયાં યીશુ ર્મનસિ જાતાહ્લાદઃ કથયામાસ હે સ્વર્ગપૃથિવ્યોરેકાધિપતે પિતસ્ત્વં જ્ઞાનવતાં વિદુષાઞ્ચ લોકાનાં પુરસ્તાત્
સર્વ્વમેતદ્ અપ્રકાશ્ય બાલકાનાં પુરસ્તાત્ પ્રાકાશય એતસ્માદ્ધેતોસ્ત્વાં ધન્યં વદામિ, હે પિતરિત્થં ભવતુ યદ્ એતદેવ તવ ગોચર
ઉત્તમમ્।
XXII પિત્રા સર્વ્વાણિ મયિ સમર્પિતાનિ પિતરં વિના કોપિ પુત્રં ન જાનાતિ કિઞ્ચ પુત્રં વિના યસ્મૈ જનાય પુત્રસ્તં પ્રકાશિતવાન્ તઞ્ચ
વિના કોપિ પિતરં ન જાનાતિ।
XXIII તપઃ પરં સ શિષ્યાન્ પ્રતિ પરાવૃત્ય ગુપ્તં જગાદ, યૂયમેતાનિ સર્વ્વાણિ પશ્યથ તતો યુષ્માકં ચક્ષૂંષિ ધન્યાનિ।
XXIV યુષ્માનહં વદામિ, યૂયં યાનિ સર્વ્વાણિ પશ્યથ તાનિ બહવો ભવિષ્યદ્વાદિનો ભૂપતયશ્ચ દ્રષ્ટુમિચ્છન્તોપિ દ્રષ્ટું ન પ્રાપ્નુવન્,
યુષ્માભિ ર્યા યાઃ કથાશ્ચ શ્રૂયન્તે તાઃ શ્રોતુમિચ્છન્તોપિ શ્રોતું નાલભન્ત।
XXV અનન્તરમ્ એકો વ્યવસ્થાપક ઉત્થાય તં પરીક્ષિતું પપ્રચ્છ, હે ઉપદેશક અનન્તાયુષઃ પ્રાપ્તયે મયા કિં કરણીયં?
XXVI યીશુઃ પ્રત્યુવાચ, અત્રાર્થે વ્યવસ્થાયાં કિં લિખિતમસ્તિ? ત્વં કીદૃક્ પઠસિ?
XXVII તતઃ સોવદત્, ત્વં સર્વ્વાન્તઃકરણૈઃ સર્વ્વપ્રાણૈઃ સર્વ્વશક્તિભિઃ સર્વ્વચિત્તૈશ્ચ પ્રભૌ પરમેશ્વરે પ્રેમ કુરુ, સમીપવાસિનિ
સ્વવત્ પ્રેમ કુરુ ચ।
XXVIII તદા સ કથયામાસ, ત્વં યથાર્થં પ્રત્યવોચઃ, ઇત્થમ્ આચર તેનૈવ જીવિષ્યસિ।
XXIX કિન્તુ સ જનઃ સ્વં નિર્દ્દોષં જ્ઞાપયિતું યીશું પપ્રચ્છ, મમ સમીપવાસી કઃ? તતો યીશુઃ પ્રત્યુવાચ,
XXX એકો જનો યિરૂશાલમ્પુરાદ્ યિરીહોપુરં યાતિ, એતર્હિ દસ્યૂનાં કરેષુ પતિતે તે તસ્ય વસ્ત્રાદિકં હૃતવન્તઃ તમાહત્ય મૃતપ્રાયં
કૃત્વા ત્યક્ત્વા યયુઃ।
XXXI અકસ્માદ્ એકો યાજકસ્તેન માર્ગેણ ગચ્છન્ તં દૃષ્ટ્વા માર્ગાન્યપાર્શ્વેન જગામ।
XXXII ઇત્થમ્ એકો લેવીયસ્તત્સ્થાનં પ્રાપ્ય તસ્યાન્તિકં ગત્વા તં વિલોક્યાન્યેન પાર્શ્વેન જગામ।
XXXIII કિન્ત્વેકઃ શોમિરોણીયો ગચ્છન્ તત્સ્થાનં પ્રાપ્ય તં દૃષ્ટ્વાદયત।
XXXIV તસ્યાન્તિકં ગત્વા તસ્ય ક્ષતેષુ તૈલં દ્રાક્ષારસઞ્ચ પ્રક્ષિપ્ય ક્ષતાનિ બદ્ધ્વા નિજવાહનોપરિ તમુપવેશ્ય પ્રવાસીયગૃહમ્
આનીય તં સિષેવે।
XXXV પરસ્મિન્ દિવસે નિજગમનકાલે દ્વૌ મુદ્રાપાદૌ તદ્ગૃહસ્વામિને દત્ત્વાવદત્ જનમેનં સેવસ્વ તત્ર યોઽધિકો વ્યયો ભવિષ્યતિ
તમહં પુનરાગમનકાલે પરિશોત્સ્યામિ।
XXXVI એષાં ત્રયાણાં મધ્યે તસ્ય દસ્યુહસ્તપતિતસ્ય જનસ્ય સમીપવાસી કઃ? ત્વયા કિં બુધ્યતે?
XXXVII તતઃ સ વ્યવસ્થાપકઃ કથયામાસ યસ્તસ્મિન્ દયાં ચકાર। તદા યીશુઃ કથયામાસ ત્વમપિ ગત્વા તથાચર।
XXXVIII તતઃ પરં તે ગચ્છન્ત એકં ગ્રામં પ્રવિવિશુઃ; તદા મર્થાનામા સ્ત્રી સ્વગૃહે તસ્યાતિથ્યં ચકાર।
XXXIX તસ્માત્ મરિયમ્ નામધેયા તસ્યા ભગિની યીશોઃ પદસમીપ ઉવવિશ્ય તસ્યોપદેશકથાં શ્રોતુમારેભે।
XL કિન્તુ મર્થા નાનાપરિચર્ય્યાયાં વ્યગ્રા બભૂવ તસ્માદ્ધેતોસ્તસ્ય સમીપમાગત્ય બભાષે; હે પ્રભો મમ ભગિની કેવલં મમોપરિ
સર્વ્વકર્મ્મણાં ભારમ્ અર્પિતવતી તત્ર ભવતા કિઞ્ચિદપિ ન મનો નિધીયતે કિમ્? મમ સાહાય્યં કર્ત્તું ભવાન્ તામાદિશતુ।
XLI તતો યીશુઃ પ્રત્યુવાચ હે મર્થે હે મર્થે, ત્વં નાનાકાર્ય્યેષુ ચિન્તિતવતી વ્યગ્રા ચાસિ,
XLII કિન્તુ પ્રયોજનીયમ્ એકમાત્રમ્ આસ્તે। અપરઞ્ચ યમુત્તમં ભાગં કોપિ હર્ત્તું ન શક્નોતિ સએવ મરિયમા વૃતઃ।

# XI

I અનન્તરં સ કસ્મિંશ્ચિત્ સ્થાને પ્રાર્થયત તત્સમાપ્તૌ સત્યાં તસ્યૈકઃ શિષ્યસ્તં જગાદ હે પ્રભો યોહન્ યથા સ્વશિષ્યાન્ પ્રાર્થયિતુમ્
ઉપદિષ્ટવાન્ તથા ભવાનપ્યસ્માન્ ઉપદિશતુ।
II તસ્માત્ સ કથયામાસ, પ્રાર્થનકાલે યૂયમ્ ઇત્થં કથયધ્વં, હે અસ્માકં સ્વર્ગસ્થપિતસ્તવ નામ પૂજ્યં ભવતુ; તવ રાજત્વં ભવતુ;
સ્વર્ગે યથા તથા પૃથિવ્યામપિ તવેચ્છયા સર્વ્વં ભવતુ।
III પ્રત્યહમ્ અસ્માકં પ્રયોજનીયં ભોજ્યં દેહિ।
IV યથા વયં સર્વ્વાન્ અપરાધિનઃ ક્ષમામહે તથા ત્વમપિ પાપાન્યસ્માકં ક્ષમસ્વ। અસ્માન્ પરીક્ષાં માનય કિન્તુ પાપાત્મનો રક્ષ।
V પશ્ચાત્ સોપરમપિ કથિતવાન્ યદિ યુષ્માકં કસ્યચિદ્ બન્ધુસ્તિષ્ઠતિ નિશીથે ચ તસ્ય સમીપં સ ગત્વા વદતિ,
VI હે બન્ધો પથિક એકો બન્ધુ ર્મમ નિવેશનમ્ આયાતઃ કિન્તુ તસ્યાતિથ્યં કર્ત્તું મમાન્તિકે કિમપિ નાસ્તિ, અતએવ પૂપત્રયં મહ્યમ્
ઋણં દેહિ;

VII તદા સ યદિ ગૃહમધ્યાત્ પ્રતિવદતિ માં મા ક્લિશાન, ઇદાનીં દ્વારં રુદ્ધં શયને મયા સહ બાલકાશ્ચ તિષ્ઠન્તિ તુભ્યં દાતુમ્ ઉત્થાતું ન શક્નોમિ,
VIII તર્હિ યુષ્માનહં વદામિ, સ યદિ મિત્રતયા તસ્મૈ કિમપિ દાતું નોત્તિષ્ઠતિ તથાપિ વારં વારં પ્રાર્થનાત ઉત્થાપિતઃ સન્ યસ્મિન્ તસ્ય પ્રયોજનં તદેવ દાસ્યતિ।
IX અતઃ કારણાત્ કથયામિ, યાચધ્વં તતો યુષ્મભ્યં દાસ્યતે, મૃગયધ્વં તત ઉદ્દેશં પ્રાપ્સ્યથ, દ્વારમ્ આહત તતો યુષ્મભ્યં દ્વારં મોક્ષ્યતે।
X યો યાચતે સ પ્રાપ્નોતિ, યો મૃગયતે સ એવોદ્દેશં પ્રાપ્નોતિ, યો દ્વારમ્ આહન્તિ તદર્થં દ્વારં મોચ્યતે।
XI પુત્રેણ પૂપે યાચિતે તસ્મૈ પાષાણં દદાતિ વા મત્સ્યે યાચિતે તસ્મૈ સર્પં દદાતિ
XII વા અણ્ડે યાચિતે તસ્મૈ વૃશ્ચિકં દદાતિ યુષ્માકં મધ્યે ક એતાદૃશઃ પિતાસ્તે?
XIII તસ્માદેવ યૂયમભદ્રા અપિ યદિ સ્વસ્વબાલકેભ્ય ઉત્તમાનિ દ્રવ્યાણિ દાતું જાનીથ તર્હ્યસ્માકં સ્વર્ગસ્થઃ પિતા નિજયાચકેભ્યઃ કિં પવિત્રમ્ આત્માનં ન દાસ્યતિ?
XIV અનન્તરં યીશુના કસ્માચ્ચિદ્ એકસ્મિન્ મૂકભૂતે ત્યાજિતે સતિ સ ભૂતત્યક્તો માનુષો વાક્યં વક્તુમ્ આરેભે; તતો લોકાઃ સકલા આશ્ચર્ય્યં મેનિરે।
XV કિન્તુ તેષાં કેચિદૂચુ ર્જનોયં બાલસિબૂબા અર્થાદ્ ભૂતરાજેન ભૂતાન્ ત્યાજયતિ।
XVI તં પરીક્ષિતું કેચિદ્ આકાશીયમ્ એકં ચિહ્નં દર્શયિતું તં પ્રાર્થયાઞ્ચક્રિરે।
XVII તદા સ તેષાં મનઃકલ્પનાં જ્ઞાત્વા કથયામાસ, કસ્યચિદ્ રાજ્યસ્ય લોકા યદિ પરસ્પરં વિરુન્ધન્તિ તર્હિ તદ્ રાજ્યમ્ નશ્યતિ; કેચિદ્ ગૃહસ્થા યદિ પરસ્પરં વિરુન્ધન્તિ તર્હિ તેપિ નશ્યન્તિ।
XVIII તથૈવ શૈતાનપિ સ્વલોકાન્ યદિ વિરુણદ્ધિ તદા તસ્ય રાજ્યં કથં સ્થાસ્યતિ? બાલસિબૂબાહં ભૂતાન્ ત્યાજયામિ યૂયમિતિ વદથ।
XIX યદ્યહં બાલસિબૂબા ભૂતાન્ ત્યાજયામિ તર્હિ યુષ્માકં સન્તાનાઃ કેન ત્યાજયન્તિ? તસ્માત્ તએવ કથાયા એતસ્યા વિચારયિતારો ભવિષ્યન્તિ।
XX કિન્તુ યદ્યહમ્ ઈશ્વરસ્ય પરાક્રમેણ ભૂતાન્ ત્યાજયામિ તર્હિ યુષ્માકં નિકટમ્ ઈશ્વરસ્ય રાજ્યમવશ્યમ્ ઉપતિષ્ઠતિ।
XXI બલવાન્ પુમાન્ સુસજ્જમાનો યતિકાલં નિજાટ્ટાલિકાં રક્ષતિ તતિકાલં તસ્ય દ્રવ્યં નિરુપદ્રવં તિષ્ઠતિ।
XXII કિન્તુ તસ્માદ્ અધિકબલઃ કશ્ચિદાગત્ય યદિ તં જયતિ તર્હિ યેષુ શસ્ત્રાસ્ત્રેષુ તસ્ય વિશ્વાસ આસીત્ તાનિ સર્વ્વાણિ હૃત્વા તસ્ય દ્રવ્યાણિ ગૃહ્લાતિ।
XXIII અતઃ કારણાદ્ યો મમ સપક્ષો ન સ વિપક્ષઃ, યો મયા સહ ન સંગૃહ્લાતિ સ વિકિરતિ।
XXIV અપરઞ્ચ અમેધ્યભૂતો માનુષસ્યાન્તર્નિર્ગત્ય શુષ્કસ્થાને ભ્રાન્ત્વા વિશ્રામં મૃગયતે કિન્તુ ન પ્રાપ્ય વદતિ મમ યસ્માદ્ ગૃહાદ્ આગતોહં પુનસ્તદ્ ગૃહં પરાવૃત્ય યામિ।
XXV તતો ગત્વા તદ્ ગૃહં માર્જિતં શોભિતઞ્ચ દૃષ્ટ્વા
XXVI તત્ક્ષણમ્ અપગત્ય સ્વસ્માદપિ દુર્મ્મતીન્ અપરાન્ સપ્તભૂતાન્ સહાનયતિ તે ચ તદ્ગૃહં પવિશ્ય નિવસન્તિ। તસ્માત્ તસ્ય મનુષ્યસ્ય પ્રથમદશાતઃ શેષદશા દુઃખતરા ભવતિ।
XXVII અસ્યાઃ કથાયાઃ કથનકાલે જનતામધ્યસ્થા કાચિન્નારી તમુચ્ચૈઃસ્વરં પ્રોવાચ, યા યોષિત્ ત્વાં ગર્બ્ભેઽધારયત્ સ્તન્યમપાયયચ્ચ સૈવ ધન્યા।
XXVIII કિન્તુ સોકથયત્ યે પરમેશ્વરસ્ય કથાં શ્રુત્વા તદનુરૂપમ્ આચરન્તિ તએવ ધન્યાઃ।
XXIX તતઃ પરં તસ્યાન્તિકે બહુલોકાનાં સમાગમે જાતે સ વક્તુમારેભે, આધુનિકા દુષ્ટલોકાશ્ચિહ્નં દ્રષ્ટુમિચ્છન્તિ કિન્તુ યૂનસ્ભવિષ્યદ્વાદિનશ્ચિહ્નં વિનાન્યત્ કિઞ્ચિચ્ચિહ્નં તાન્ ન દર્શયિષ્યતે।
XXX યૂનસ્ તુ યથા નીનિવીયલોકાનાં સમીપે ચિહ્નરૂપોભવત્ તથા વિદ્યમાનલોકાનામ્ એષાં સમીપે મનુષ્યપુત્રોપિ ચિહ્નરૂપો ભવિષ્યતિ।
XXXI વિચારસમયે ઇદાનીન્તનલોકાનાં પ્રાતિકૂલ્યેન દક્ષિણદેશીયા રાજ્ઞી પ્રોત્થાય તાન્ દોષિણઃ કરિષ્યતિ, યતઃ સા રાજ્ઞી સુલેમાન ઉપદેશકથાં શ્રોતું પૃથિવ્યાઃ સીમાત આગચ્છત્ કિન્તુ પશ્યત સુલેમાનોપિ ગુરુતર એકો જનોઽસ્મિન્ સ્થાને વિદ્યતે।
XXXII અપરઞ્ચ વિચારસમયે નીનિવીયલોકા અપિ વર્ત્તમાનકાલિકાનાં લોકાનાં વૈપરીત્યેન પ્રોત્થાય તાન્ દોષિણઃ કરિષ્યન્તિ, યતો હેતોસ્તે યૂનસો વાક્યાત્ ચિત્તાનિ પરિવર્ત્તયામાસુઃ કિન્તુ પશ્યત યૂનસોતિગુરુતર એકો જનોઽસ્મિન્ સ્થાને વિદ્યતે।
XXXIII પ્રદીપં પ્રજ્વાલ્ય દ્રોણસ્યાધઃ કુત્રાપિ ગુપ્તસ્થાને વા કોપિ ન સ્થાપયતિ કિન્તુ ગૃહપ્રવેશિભ્યો દીપ્તિં દાતં દીપાધારોપર્ય્યેવ સ્થાપયતિ।
XXXIV દેહસ્ય પ્રદીપશ્ચક્ષુસ્તસ્માદેવ ચક્ષુ ર્યદિ પ્રસન્નં ભવતિ તર્હિ તવ સર્વ્વશરીરં દીપ્તિમદ્ ભવિષ્યતિ કિન્તુ ચક્ષુ ર્યદિ મલીમસં તિષ્ઠતિ તર્હિ સર્વ્વશરીરં સાન્ધકારં સ્થાસ્યતિ।
XXXV અસ્માત્ કારણાત્ તવાન્તઃસ્થં જ્યોતિ ર્યથાન્ધકારમયં ન ભવતિ તદર્થે સાવધાનો ભવ।
XXXVI યતઃ શરીરસ્ય કુત્રાપ્યંશે સાન્ધકારે ન જાતે સર્વ્વં યદિ દીપ્તિમત્ તિષ્ઠતિ તર્હિ તુભ્યં દીપ્તિદાયિપ્રોજ્જ્વલન્ પ્રદીપ ઇવ તવ સવર્વશરીરં દીપ્તિમદ્ ભવિષ્યતિ।
XXXVII એતત્કથાયાઃ કથનકાલે ફિરુશ્યેકો ભેજનાય તં નિમન્ત્રયામાસ, તતઃ સ ગત્વા ભોક્તુમ્ ઉપવિવેશ।
XXXVIII કિન્તુ ભોજનાત્ પૂર્વ્વં નામાઙ્ક્ષીત્ એતદ્ દૃષ્ટ્વા સ ફિરુશ્યાશ્ચર્ય્યં મેને।
XXXIX તદા પ્રભુસ્તં પ્રોવાચ યૂયં ફિરૂશિલોકાઃ પાનપાત્રાણાં ભોજનપાત્રાણાઞ્ચ બહિઃ પરિષ્કુરુથ કિન્તુ યુષ્માકમન્ત દૌરાત્મ્યૈ ર્દુષ્ક્રિયાભિશ્ચ પરિપૂર્ણં તિષ્ઠતિ।
XL હે સર્વ્વે નિર્બોધા યો બહિઃ સસર્જ સ એવ કિમન્ત ર્ન સસર્જ?
XLI તત એવ યુષ્માભિરન્તઃકરણં (ઈશ્વરાય) નિવેદ્યતાં તસ્મિન્ કૃતે યુષ્માકં સર્વ્વાણિ શુચિતાં યાસ્યન્તિ।

XLII કિન્તુ હન્ત ફિરૂશિગણા યૂયં ન્યાયમ્ ઈશ્વરે પ્રેમ ચ પરિત્યજ્ય પોદિનાયા અરુદાદીનાં સર્વ્વેષાં શાકાનાઞ્ચ દશમાંશાન્ દત્થ કિન્તુ પ્રથમં પાલયિત્વા શેષસ્યાલઙ્ઘનં યુષ્માકમ્ ઉચિતમાસીત્|

XLIII હા હા ફિરૂશિનો યૂયં ભજનગેહે પ્રોચ્ચાસને આપણેષુ ચ નમસ્કારેષુ પ્રીયધ્વે|

XLIV વત કપટિનોઽધ્યાપકાઃ ફિરૂશિનશ્ચ લોકાયત્ શ્મશાનમ્ અનુપલભ્ય તદુપરિ ગચ્છન્તિ યૂયમ્ તાદૃગપ્રકાશિતશ્મશાનવાદ્ ભવથ|

XLV તદાનીં વ્યવસ્થાપકાનામ્ એકા યીશુમવદત્, હે ઉપદેશક વાક્યેનેદૃશેનાસ્માસ્વપિ દોષમ્ આરોપયસિ|

XLVI તતઃ સ ઉવાચ, હા હા વ્યવસ્થાપકા યૂયમ્ માનુષાણામ્ ઉપરિ દુઃસહ્યાન્ ભારાન્ ન્યસ્યથ કિન્તુ સ્વયમ્ એકાઙ્ગુલ્યાપિ તાન્ ભારાન્ ન સ્પૃશથ|

XLVII હન્ત યુષ્માકં પૂર્વ્વપુરુષા યાન્ ભવિષ્યદ્વાદિનોઽવધિષુસ્તેષાં શ્મશાનાનિ યૂયં નિર્મ્માથ|

XLVIII તેનૈવ યૂયં સ્વપૂર્વ્વપુરુષાણાં કર્મ્માણિ સંમન્યધ્વે તદેવ સપ્રમાણં કુરુથ ચ, યતસ્તે તાનવધિષુઃ યૂયં તેષાં શ્મશાનાનિ નિર્મ્માથ|

XLIX અતએવ ઈશ્વરસ્ય શાસ્ત્રે પ્રોક્તમસ્તિ તેષામન્તિકે ભવિષ્યદ્વાદિનઃ પ્રેરિતાંશ્ચ પ્રેષયિષ્યામિ તતસ્તે તેષાં કાંશ્ચન હનિષ્યન્તિ કાંશ્ચન તાડશિષ્યન્તિ|

L એતસ્માત્ કારણાત્ હાબિલઃ શોણિતપાતમારભ્ય મન્દિરયજ્ઞવેદ્યો ર્મધ્યે હતસ્ય સિખરિયસ્ય રક્તપાતપર્ય્યન્તં

LI જગતઃ સૃષ્ટિમારભ્ય પૃથિવ્યાં ભવિષ્યદ્વાદિનાં યતિરક્તપાતા જાતાસ્તતીનામ્ અપરાધદણ્ડા એષાં વર્ત્તમાનલોકાનાં ભવિષ્યન્તિ, યુષ્માનહં નિશ્ચિતં વદામિ સર્વ્વે દણ્ડા વંશસ્યાસ્ય ભવિષ્યન્તિ|

LII હા હા વ્યવસ્થપકા યૂયં જ્ઞાનસ્ય કુઞ્જિકાં હૃત્વા સ્વયં ન પ્રવિષ્ટા યે પ્રવેષ્ટુઞ્ચ પ્રયાસિનસ્તાનપિ પ્રવેષ્ટું વારિતવન્તઃ|

LIII ઇત્થં કથાકથનાદ્ અધ્યાપકાઃ ફિરૂશિનશ્ચ સતર્કાઃ

LIV સન્તસ્તમપવદિતું તસ્ય કથાયા દોષં ધર્ત્તમિચ્છન્તો નાનાખ્યાનકથનાય તં પ્રવર્ત્તયિતું કોપયિતુઞ્ચ પ્રારેભિરે|

# XII

I તદાનીં લોકાઃ સહસ્રં સહસ્રમ્ આગત્ય સમુપસ્થિતાસ્તત એકૈકો ઽન્યેષામુપરિ પતિતુમ્ ઉપચક્રમે; તદા યીશુઃ શિષ્યાન્ બભાષે, યૂયં ફિરૂશિનાં કિણ્વરૂપકાપટ્યે વિશેષેણ સાવધાનાસ્તિષ્ઠત|

II યતો યન્ન પ્રકાશયિષ્યતે તદાચ્છન્નં વસ્તુ કિમપિ નાસ્તિ; તથા યન્ન જ્ઞાસ્યતે તદ્ ગુપ્તં વસ્તુ કિમપિ નાસ્તિ|

III અન્ધકારે તિષ્ઠનતો યાઃ કથા અકથયત તાઃ સર્વ્વાઃ કથા દીપ્તૌ શ્રોષ્યન્તે નિર્જને કર્ણે ચ યદકથયત ગૃહપૃષ્ઠાત્ તત્ પ્રચારયિષ્યતે|

IV હે બન્ધવો યુષ્માનહં વદામિ, યે શરીરસ્ય નાશં વિના કિમપ્યપરં કર્ત્તું ન શક્નુવન્તિ તેભ્યો મા ભૈષ્ટ|

V તર્હિ કસ્માદ્ ભેતવ્યમ્ ઇત્યહં વદામિ, યઃ શરીરં નાશયિત્વા નરકં નિક્ષેપ્તું શક્નોતિ તસ્માદેવ ભયં કુરુત, પુનરપિ વદામિ તસ્માદેવ ભયં કુરુત|

VI પઞ્ચ ચટકપક્ષિણઃ કિં દ્વાભ્યાં તામ્રખણ્ડાભ્યાં ન વિક્રીયન્તે? તથાપીશ્વરસ્તેષામ્ એકમપિ ન વિસ્મરતિ|

VII યુષ્માકં શિરઃકેશા અપિ ગણિતાઃ સન્તિ તસ્માત્ મા વિભીત બહુચટકપક્ષિભ્યોપિ યૂયં બહુમૂલ્યાઃ|

VIII અપરં યુષ્મભ્યં કથયામિ યઃ કશ્ચિન્ માનુષાણાં સાક્ષાન્ માં સ્વીકરોતિ મનુષ્યપુત્ર ઈશ્વરદૂતાનાં સાક્ષાત્ તં સ્વીકરિષ્યતિ|

IX કિન્તુ યઃ કશ્ચિન્માનુષાણાં સાક્ષાન્મામ્ અસ્વીકરોતિ તમ્ ઈશ્વરસ્ય દૂતાનાં સાક્ષાદ્ અહમ્ અસ્વીકરિષ્યામિ|

X અન્યચ્ચ યઃ કશ્ચિન્ મનુજસુતસ્ય નિન્દાભાવેન કાઞ્ચિત્ કથાં કથયતિ તસ્ય તત્પાપસ્ય મોચનં ભવિષ્યતિ કિન્તુ યદિ કશ્ચિત્ પવિત્રમ્ આત્માનં નિન્દતિ તર્હિ તસ્ય તત્પાપસ્ય મોચનં ન ભવિષ્યતિ|

XI યદા લોકા યુષ્માન્ ભજનગેહં વિચારકર્તૃરાજ્યકર્તૃણાં સમ્મુખઞ્ચ નેષ્યન્તિ તદા કેન પ્રકારેણ કિમુત્તરં વદિષ્યથ કિં કથયિષ્યથ ચેત્યત્ર મા ચિન્તયત;

XII યતો યુષ્માભિર્યદ્ યદ્ વક્તવ્યં તત્ તસ્મિન્ સમયએવ પવિત્ર આત્મા યુષ્માન્ શિક્ષયિષ્યતિ|

XIII તતઃ પરં જનતામધ્યસ્થઃ કશ્ચિજ્જનસ્તં જગાદ હે ગુરો મયા સહ પૈતૃકં ધનં વિભક્તું મમ ભ્રાતરમાજ્ઞાપયતુ ભવાન્|

XIV કિન્તુ સ તમવદત્ હે મનુષ્ય યુવયો ર્વિચારં વિભાગઞ્ચ કર્ત્તું માં કો નિયુક્તવાન્?

XV અનન્તરં સ લોકાનવદત્ લોભે સાવધાનાઃ સતર્કાશ્ચ તિષ્ઠત, યતો બહુસમ્પત્તિપ્રાપ્ત્યા મનુષ્યસ્યાયુ ર્ન ભવતિ|

XVI પશ્ચાદ્ દૃષ્ટાન્તકથામુત્થાપ્ય કથયામાસ, એકસ્ય ધનિનો ભૂમૌ બહૂનિ શસ્યાનિ જાતાનિ|

XVII તતઃ સ મનસા ચિન્તયિત્વા કથયામ્બભૂવ મમૈતાનિ સમુત્પન્નાનિ દ્રવ્યાણિ સ્થાપયિતું સ્થાનં નાસ્તિ કિં કરિષ્યામિ?

XVIII તતોવદદ્ ઇત્થં કરિષ્યામિ, મમ સર્વ્વભાણ્ડાગારાણિ ભઙ્ક્ત્વા બૃહદ્ભાણ્ડાગારાણિ નિર્મ્માય તન્મધ્યે સર્વ્વફલાનિ દ્રવ્યાણિ ચ સ્થાપયિષ્યામિ|

XIX અપરં નિજમનો વદિષ્યામિ, હે મનો બહુવત્સરાર્થં નાનાદ્રવ્યાણિ સઞ્ચિતાનિ સન્તિ વિશ્રામં કુરુ ભુક્ત્વા પીત્વા કૌતુકઞ્ચ કુરુ| કિન્ત્વીશ્વરસ્તમ્ અવદત્,

XX રે નિર્બોધ અદ્ય રાત્રૌ તવ પ્રાણાસ્ત્વત્તો નેષ્યન્તે તત એતાનિ યાનિ દ્રવ્યાણિ ત્વયાસાદિતાનિ તાનિ કસ્ય ભવિષ્યન્તિ?

XXI અતએવ યઃ કશ્ચિદ્ ઈશ્વરસ્ય સમીપે ધનસઞ્ચયમકૃત્વા કેવલં સ્વનિકટે સઞ્ચયં કરોતિ સોપિ તાદૃશઃ|

XXII અથ સ શિષ્યેભ્યઃ કથયામાસ, યુષ્માનહં વદામિ, કિં ખાદિષ્યામઃ? કિં પરિધાસ્યામઃ? ઇત્યુક્ત્વા જીવનસ્ય શરીરસ્ય ચાર્થં ચિન્તાં મા કાર્ષ્ટ|

XXIII ભક્ષ્યાજ્જીવનં ભૂષણાચ્છરીરઞ્ચ શ્રેષ્ઠં ભવતિ|

XXIV કાકપક્ષિણાં કાર્ય્યં વિચારયત, તે ન વપન્તિ શસ્યાનિ ચ ન છિન્દન્તિ, તેષાં ભાણ્ડાગારાણિ ન સન્તિ કોષાશ્ચ ન સન્તિ, તથાપીશ્વરસ્તેભ્યો ભક્ષ્યાણિ દદાતિ, યૂયં પક્ષિભ્યઃ શ્રેષ્ઠતરા ન કિં?

XXV અપરઞ્ચ ભાવયિત્વા નિજાયુષઃ ક્ષણમાત્રં વર્દ્ધયિતું શક્નોતિ, એતાદૃશો લાકો યુષ્માકં મધ્યે કોસ્તિ?

XXVI અતએવ ક્ષુદ્રં કાર્ય્યં સાધયિતુમ્ અસમર્થા યૂયમ્ અન્યસ્મિન્ કાર્ય્યે કુતો ભાવયથ?

XXVII અન્યચ્ચ કામ્પિલપુષ્પં કથં વર્દ્ધતે તદાપિ વિચારયત, તત્ કઞ્ચન શ્રમં ન કરોતિ તન્તૂંશ્ચ ન જનયતિ કિન્તુ યુષ્મભ્યં યથાર્થં કથયામિ સુલેમાન્ બહ્વૈશ્વર્ય્યાન્વિતોપિ પુષ્પસ્યાસ્ય સદૃશો વિભૂષિતો નાસીત્|

XXVIII અદ્ય ક્ષેત્રે વર્ત્તમાનં શ્વશ્ચૂલ્લ્યાં ક્ષેપ્સ્યમાનં યત્ તૃણં, તસ્મૈ યદીશ્વર ઇત્થં ભૂષયતિ તર્હિ હે અલ્પપ્રત્યયિનો યુષ્માન કિં ન પરિધાપયિષ્યતિ?

XXIX અતએવ કિં ખાદિષ્યામઃ? કિં પરિધાસ્યામઃ? એતદર્થં મા ચેષ્ટધ્વં મા સંદિગ્ધ્વઞ્ચ|

XXX જગતો દેવાર્ચ્ચકા એતાનિ સર્વ્વાણિ ચેષ્ટનતે; એષુ વસ્તુષુ યુષ્માકં પ્રયોજનમાસ્તે ઇતિ યુષ્માકં પિતા જાનાતિ|

XXXI અતએવેશ્વરસ્ય રાજ્યાર્થં સચેષ્ટા ભવત તથા કૃતે સર્વ્વાણ્યેતાનિ દ્રવ્યાણિ યુષ્મભ્યં પ્રદાયિષ્યન્તે|

XXXII હે ક્ષુદ્રમેષવ્રજ યૂયં મા ભૈષ્ટ યુષ્મભ્યં રાજ્યં દાતું યુષ્માકં પિતુઃ સમ્મતિરસ્તિ|

XXXIII અતએવ યુષ્માકં યા યા સમ્પત્તિરસ્તિ તાં તાં વિક્રીય વિતરત, યત્ સ્થાનં ચૌરા નાગચ્છન્તિ, કીટાશ્ચ ન ક્ષાયયન્તિ તાદૃશે સ્વર્ગે નિજાર્થમ્ અજરે સમ્પુટકે ઽક્ષયં ધનં સઞ્ચિનુત ચ;

XXXIV યતો યત્ર યુષ્માકં ધનં વર્ત્તતે તત્રેવ યુષ્માકં મનઃ|

XXXV અપરઞ્ચ યૂયં પ્રદીપં જ્વાલયિત્વા બદ્ધકટયસ્તિષ્ઠત;

XXXVI પ્રભુ ર્વિવાહાદાગત્ય યદૈવ દ્વારમાહન્તિ તદૈવ દ્વારં મોચયિતું યથા ભૃત્યા અપેક્ષ્ય તિષ્ઠન્તિ તથા યૂયમપિ તિષ્ઠત|

XXXVII યતઃ પ્રભુરાગત્ય યાન્ દાસાન્ સચેતનાન્ તિષ્ઠતો દ્રક્ષ્યતિ તએવ ધન્યાઃ; અહં યુષ્માન્ યથાર્થં વદામિ પ્રભુસ્તાન્ ભોજનાર્થમ્ ઉપવેશ્ય સ્વયં બદ્ધકટિઃ સમીપમેત્ય પરિવેષયિષ્યતિ|

XXXVIII યદિ દ્વિતીયે તૃતીયે વા પ્રહરે સમાગત્ય તથૈવ પશ્યતિ, તર્હિ તએવ દાસા ધન્યાઃ|

XXXIX અપરઞ્ચ કસ્મિન્ ક્ષણે ચૌરા આગમિષ્યન્તિ ઇતિ યદિ ગૃહપતિ ર્જ્ઞાતું શક્નોતિ તદાવશ્યં જાગ્રન્ નિજગૃહે સન્ધિં કર્ત્તયિતું વારયતિ યૂયમેતદ્ વિત્ત|

XL અતએવ યૂયમપિ સજ્જમાનાસ્તિષ્ઠત યતો યસ્મિન્ ક્ષણે તં નાપ્રેક્ષધ્વે તસ્મિન્નેવ ક્ષણે મનુષ્યપુત્ર આગમિષ્યતિ|

XLI તદા પિતરઃ પપ્રચ્છ, હે પ્રભો ભવાન્ કિમસ્માન્ ઉદ્દિશ્ય કિં સર્વ્વાન્ ઉદ્દિશ્ય દૃષ્ટાન્તકથામિમાં વદતિ?

XLII તતઃ પ્રભુઃ પ્રોવાચ, પ્રભુઃ સમુચિતકાલે નિજપરિવારાર્થં ભોજ્યપરિવેષણાય યં તત્પદે નિયોક્ષ્યતિ તાદૃશો વિશ્વાસ્યો બોદ્ધા કર્મ્માધીશઃ કોસ્તિ?

XLIII પ્રભુરાગત્ય યમ્ એતાદૃશે કર્મ્મણિ પ્રવૃત્તં દ્રક્ષ્યતિ સએવ દાસો ધન્યઃ|

XLIV અહં યુષ્માન્ યથાર્થં વદામિ સ તં નિજસર્વ્વસ્વસ્યાધિપતિં કરિષ્યતિ|

XLV કિન્તુ પ્રભુર્વિલમ્બેનાગમિષ્યતિ, ઇતિ વિચિન્ત્ય સ દાસો યદિ તદન્યદાસીદાસાન્ પ્રહર્ત્તુમ્ ભોક્તું પાતું મદિતુઞ્ચ પ્રારભતે,

XLVI તર્હિ યદા પ્રભું નાપેક્ષિષ્યતે યસ્મિન્ ક્ષણે સોઽચેતનશ્ચ સ્થાસ્યતિ તસ્મિન્નેવ ક્ષણે તસ્ય પ્રભુરાગત્ય તં પદભ્રષ્ટં કૃત્વા વિશ્વાસહીનૈઃ સહ તસ્ય અંશં નિરૂપયિષ્યતિ|

XLVII યો દાસઃ પ્રભે◌ારાજ્ઞાં જ્ઞાત્વાપિ સજ્જિતો ન તિષ્ઠતિ તદાજ્ઞાનુસારેણ ચ કાર્ય્યં ન કરોતિ સોનેકાન્ પ્રહારાન્ પ્રાપ્સ્યતિ;

XLVIII કિન્તુ યો જનોઽજ્ઞાત્વા પ્રહારાર્હં કર્મ્મ કરોતિ સોલ્પપ્રહારાન્ પ્રાપ્સ્યતિ| યતો યસ્મૈ બાહુલ્યેન દત્તં તસ્માદેવ બાહુલ્યેન ગ્રહીષ્યતે, માનુષા યસ્ય નિકટે બહુ સમર્પયન્તિ તસ્માદ્ બહુ યાચન્તે|

XLIX અહં પૃથિવ્યામ્ અનૈક્યરૂપં વહ્નિ નિક્ષેપ્તુમ્ આગતોસ્મિ, સ ચેદ્ ઇદાનીમેવ પ્રજ્વલતિ તત્ર મમ કા ચિન્તા?

L કિન્તુ યેન મજ્જનેનાહં મગ્નો ભવિષ્યામિ યાવત્કાલં તસ્ય સિદ્ધિ ર્ન ભવિષ્યતિ તાવદહં કતિકષ્ટં પ્રાપ્સ્યામિ|

LI મેલનં કર્ત્તું જગદ્ આગતોસ્મિ યૂયં કિમિત્થં બોધધ્વે? યુષ્માન્ વદામિ ન તથા, કિન્ત્વહં મેલનાભાવં કર્ત્તુમ્ આગતોસ્મિ|

LII યસ્માદેતત્કાલમારભ્ય એકત્રસ્થપરિજનાનાં મધ્યે પઞ્ચજનાઃ પૃથગ્ ભૂત્વા ત્રયો જના દ્વયોર્જનયોઃ પ્રતિકૂલા દ્વૌ જનૌ ચ ત્રયાણાં જનાનાં પ્રતિકૂલૌ ભવિષ્યન્તિ|

LIII પિતા પુત્રસ્ય વિપક્ષઃ પુત્રશ્ચ પિતુ ર્વિપક્ષો ભવિષ્યતિ માતા કન્યાયા વિપક્ષા કન્યા ચ માતુ ર્વિપક્ષા ભવિષ્યતિ, તથા શ્વશ્રૂર્બધ્વા વિપક્ષા બધૂશ્ચ શ્વશ્ર્વા વિપક્ષા ભવિષ્યતિ|

LIV સ લોકેભ્યોપરમપિ કથયામાસ, પશ્ચિમદિશિ મેઘોદ્ગમં દૃષ્ટ્વા યૂયં હઠાદ્ વદથ વૃષ્ટિ ર્ભવિષ્યતિ તતસ્તથૈવ જાયતે|

LV અપરં દક્ષિણતો વાયૌ વાતિ સતિ વદથ નિદાઘો ભવિષ્યતિ તતઃ સોપિ જાયતે|

LVI રે રે કપટિન આકાશસ્ય ભૂમ્યાશ્ચ લક્ષણં બોદ્ધું શક્નુથ,

LVII કિન્તુ કાલસ્યાસ્ય લક્ષણં કુતો બોદ્ધું ન શક્નુથ? યૂયઞ્ચ સ્વયં કુતો ન ન્યાય્યં વિચારયથ?

LVIII અપરઞ્ચ વિવાદિના સાર્દ્ધં વિચારયિતુઃ સમીપં ગચ્છન્ પથિ તસ્માદુદ્ધારં પ્રાપ્તું યતસ્વ નોચેત્ સ ત્વાં ધૃત્વા વિચારયિતુઃ સમીપં નયતિ| વિચારયિતા યદિ ત્વાં પ્રહર્ત્તુઃ સમીપં સમર્પયતિ પ્રહર્ત્તા ત્વાં કારાયાં બધ્નાતિ

LIX તર્હિ ત્વામહં વદામિ ત્વયા નિઃશેષં કપર્દકેષુ ન પરિશોધિતેષુ ત્વં તતો મુક્તિં પ્રાપ્તું ન શક્ષ્યસિ|

# XIII

I અપરઞ્ચ પીલાતો યેષાં ગાલીલીયાનાં રક્તાનિ બલીનાં રક્તૈઃ સહામિશ્રયત્ તેષાં ગાલીલીયાનાં વૃત્તાન્તં કતિપયજના ઉપસ્થાપ્ય યીશવે કથયામાસુઃ|

II તતઃ સ પ્રત્યુવાચ તેષાં લોકાનામ્ એતાદૃશી દુર્ગતિ ર્ઘટિતા તત્કારણાદ્ યૂયં કિમન્યેભ્યો ગાલીલીયેભ્યોપ્યધિકપાપિનસ્તાન્ બોધધ્વે?

III યુષ્માનહં વદામિ તથા ન કિન્તુ મનઃસુ ન પરાવર્ત્તિતેષુ યૂયમપિ તથા નંક્ષ્યથ|

IV અપરઞ્ચ શીલોહનામ્ન ઉચ્ચગૃહસ્ય પતનાદ્ યેઽષ્ટાદશજના મૃતાસ્તે યિરૂશાલમિ નિવાસિસર્વ્વલોકેભ્યોઽધિકાપરાધિનઃ કિં યૂયમિત્યં બોધધ્વે?

V યુષ્માનહં વદામિ તથા ન કિન્તુ મનઃસુ ન પરિવર્ત્તિતેષુ યૂયમપિ તથા નંક્ષ્યથ|

VI અનન્તરં સ ઇમાં દૃષ્ટાન્તકથામકથયદ્ એકો જનો દ્રાક્ષાક્ષેત્રમધ્ય એકમુડુમ્બરવૃક્ષં રોપિતવાન્। પશ્ચાત્ સ આગત્ય તસ્મિન્
ફલાનિ ગવેષયામાસ,
VII કિન્તુ ફલાપ્રાપ્તેઃ કારણાદ્ ઉદ્યાનકારં ભૃત્યં જગાદ, પશ્ય વત્સરત્રયં યાવદાગત્ય એતસ્મિન્નુડુમ્બરતરૌ ક્ષલાન્યન્વિચ્છામિ,
કિન્તુ નૈકમપિ પ્રપ્નોમિ તરુરયં કુતો વૃથા સ્થાનં વ્યાપ્ય તિષ્ઠતિ? એનં છિન્ધિ।
VIII તતો ભૃત્યઃ પ્રત્યુવાચ, હે પ્રભો પુનર્વર્ષમેકં સ્થાતુમ્ આદિશ; એતસ્ય મૂલસ્ય ચતુર્દિક્ષુ ખનિત્વાહમ્ આલવાલં સ્થાપયામિ।
IX તતઃ ફલિતું શક્નોતિ યદિ ન ફલતિ તર્હિ પશ્ચાત્ છેત્સ્યસિ।
X અથ વિશ્રામવારે ભજનગેહે યીશુરુપદિશતિ
XI તસ્મિત્ સમયે ભૂતગ્રસ્તત્વાત્ કુબ્જીભૂયાષ્ટાદશવર્ષાણિ યાવત્ કેનાપ્યુપાયેન ઋજુ ર્ભવિતું ન શક્નોતિ યા દુર્બ્બલા સ્ત્રી,
XII તાં તત્રોપસ્થિતાં વિલોક્ય યીશુસ્તામાહૂય કથિતવાન્ હે નારિ તવ દૌર્બ્બલ્યાત્ ત્વં મુક્તા ભવ।
XIII તતઃ પરં તસ્યા ગાત્રે હસ્તાર્પણમાત્રાત્ સા ઋજુર્ભૂત્વેશ્વરસ્ય ધન્યવાદં કર્ત્તુમારેભે।
XIV કિન્તુ વિશ્રામવારે યીશુના તસ્યાઃ સ્વાસ્થ્યકરણાદ્ ભજનગેહસ્યાધિપતિઃ પ્રકુપ્ય લોકાન્ ઉવાચ, ષટ્સુ દિનેષુ લોકૈઃ કર્મ્મ
કર્ત્તવ્યં તસ્માદ્ધેતોઃ સ્વાસ્થ્યાર્થં તેષુ દિનેષુ આગચ્છત, વિશ્રામવારે માગચ્છત।
XV તદા પભુઃ પ્રત્યુવાચ રે કપટિનો યુષ્માકમ્ એકૈકો જનો વિશ્રામવારે સ્વીયં સ્વીયં વૃષભં ગર્દભં વા બન્ધનાન્મોચયિત્વા જલં
પાયયિતું કિં ન નયતિ?
XVI તર્હ્યાષ્ટાદશવત્સરાન્ યાવત્ શૈતાના બદ્ધા ઇબ્રાહીમઃ સન્તતિરિયં નારી કિં વિશ્રામવારે ન મોચયિતવ્યા?
XVII એષુ વાક્યેષુ કથિતેષુ તસ્ય વિપક્ષાઃ સલજ્જા જાતાઃ કિન્તુ તેન કૃતસર્વ્વમહાકર્મ્મકારણાત્ લોકનિવહઃ સાનન્દોઽભવત્।
XVIII અનન્તરં સોવદદ્ ઈશ્વરસ્ય રાજ્યં કસ્ય સદૃશં? કેન તદુપમાસ્યામિ?
XIX યત્ સર્ષપબીજં ગૃહીત્વા કશ્ચિજ્જન ઉદ્યાન ઉપ્તવાન્ તદ્ બીજમઙ્કુરિતં સત્ મહાવૃક્ષોઽજાયત, તતસ્તસ્ય શાખાસુ
વિહાયસીયવિહગા આગત્ય ન્યૂષુઃ, તદ્રાજ્યં તાદૃશેન સર્ષપબીજેન તુલ્યં।
XX પુનઃ કથયામાસ, ઈશ્વરસ્ય રાજ્યં કસ્ય સદૃશં વદિષ્યામિ? યત્ કિણ્વં કાચિત્ સ્ત્રી ગૃહીત્વા દ્રોણત્રયપરિમિતગોધૂમચૂર્ણેષુ
સ્થાપયામાસ,
XXI તતઃ ક્રમેણ તત્ સર્વ્વગોધૂમચૂર્ણં વ્યાપ્નોતિ, તસ્ય કિણ્વસ્ય તુલ્યમ્ ઈશ્વરસ્ય રાજ્યં।
XXII તતઃ સ યિરૂશાલમ્નગરં પ્રતિ યાત્રાં કૃત્વા નગરે નગરે ગ્રામે ગ્રામે સમુપદિશન્ જગામ।
XXIII તદા કશ્ચિજ્જનસ્તં પપ્રચ્છ, હે પ્રભો કિં કેવલમ્ અલ્પે લોકાઃ પરિત્રાસ્યન્તે?
XXIV તતઃ સ લોકાન્ ઉવાચ, સંકીર્ણદ્વારેણ પ્રવેષ્ટું યતધ્વં, યતોહં યુષ્માન્ વદામિ, બહવઃ પ્રવેષ્ટું ચેષ્ટિષ્યન્તે કિન્તુ ન શક્ષ્યન્તિ।
XXV ગૃહપતિનોત્થાય દ્વારે રુદ્ધે સતિ યદિ યૂયં બહિઃ સ્થિત્વા દ્વારમાહત્ય વદથ, હે પ્રભો હે પ્રભો અસ્મત્કારણાદ્ દ્વારં મોચયતુ,
તતઃ સ ઇતિ પ્રતિવક્ષ્યતિ, યૂયં કુત્રત્યા લોકા ઇત્યહં ન જાનામિ।
XXVI તદા યૂયં વદિષ્યથ, તવ સાક્ષાદ્ વયં ભોજનં પાનઞ્ચ કૃતવન્તઃ, ત્વઞ્ચાસ્માકં નગરસ્ય પથિ સમુપદિષ્ટવાન્।
XXVII કિન્તુ સ વક્ષ્યતિ, યુષ્માનહં વદામિ, યૂયં કુત્રત્યા લોકા ઇત્યહં ન જાનામિ; હે દુરાચારિણો યૂયં મત્તો દૂરીભવત।
XXVIII તદા ઇબ્રાહીમં ઇસ્હાકં યાકૂબઞ્ચ સર્વ્વભવિષ્યદ્વાદિનશ્ચ ઈશ્વરસ્ય રાજ્યં પ્રાપ્તાન્ સ્વાંશ્ચ બહિષ્કૃતાન્ દૃષ્ટ્વા યૂયં રોદનં
દન્તૈર્દન્તઘર્ષણઞ્ચ કરિષ્યથ।
XXIX અપરઞ્ચ પૂર્વ્વપશ્ચિમદક્ષિણોત્તરદિગ્ભ્યો લોકા આગત્ય ઈશ્વરસ્ય રાજ્યે નિવત્સ્યન્તિ।
XXX પશ્યતેત્થં શેષીયા લોકા અગ્રા ભવિષ્યન્તિ, અગ્રીયા લોકાશ્ચ શેષા ભવિષ્યન્તિ।
XXXI અપરઞ્ચ તસ્મિન્ દિને કિયન્તઃ ફિરૂશિન આગત્ય યીશું પ્રોચુઃ, બહિર્ગચ્છ, સ્થાનાદસ્માત્ પ્રસ્થાનં કુરુ, હેરોદ્ ત્વાં
જિઘાંસતિ।
XXXII તતઃ સ પ્રત્યવોચત્ પશ્યતાદ્ય શ્વશ્ચ ભૂતાન્ વિહાપ્ય રોગિણોઽરોગિણઃ કૃત્વા તૃતીયેહ્નિ સેત્સ્યામિ, કથામેતાં યૂયમિત્વા
તં ભૂરિમાયં વદત।
XXXIII તત્રાપ્યદ્ય શ્વઃ પરશ્વશ્ચ મયા ગમનાગમને કર્ત્તવ્યે, યતો હેતો ર્યિરૂશાલમો બહિઃ કુત્રાપિ કોપિ ભવિષ્યદ્વાદી ન ઘાનિષ્યતે।
XXXIV હે યિરૂશાલમ્ હે યિરૂશાલમ્ ત્વં ભવિષ્યદ્વાદિનો હંસિ તવાન્તિકે પ્રેરિતાન્ પ્રસ્તરૈર્મારયસિ ચ, યથા કુક્કુટી નિજપક્ષાધઃ
સ્વશાવકાન્ સંગૃહ્લાતિ, તથાહમપિ તવ શિશૂન્ સંગ્રહીતું કતિવારાન્ ઐચ્છં કિન્તુ ત્વં નૈચ્છઃ।
XXXV પશ્યત યુષ્માકં વાસસ્થાનાનિ પ્રોચ્છિદ્યમાનાનિ પરિત્યક્તાનિ ચ ભવિષ્યન્તિ; યુષ્માનહં યથાર્થં વદામિ, યઃ પ્રભો
ર્નામ્નાગચ્છતિ સ ધન્ય ઇતિ વાચં યાવત્કાલં ન વદિષ્યથ, તાવત્કાલં યૂયં માં ન દ્રક્ષ્યથ।

# XIV

I અનન્તરં વિશ્રામવારે યીશૌ પ્રધાનસ્ય ફિરૂશિનો ગૃહે ભોક્તું ગતવતિ તે તં વીક્ષિતુમ્ આરેભિરે।
II તદા જલોદરી તસ્ય સમ્મુખે સ્થિતઃ।
III તતઃ સ વ્યવસ્થાપકાન્ ફિરૂશિનશ્ચ પપ્રચ્છ, વિશ્રામવારે સ્વાસ્થ્યં કર્ત્તવ્યં ન વા? તતસ્તે કિમપિ ન પ્રત્યૂચુઃ।
IV તદા સ તં રોગિણં સ્વસ્થં કૃત્વા વિસસર્જ;
V તાનુવાચ ચ યુષ્માકં કસ્યચિદ્ ગર્દ્દભો વૃષભો વા ચેદ્ ગર્ત્તે પતતિ તર્હિ વિશ્રામવારે તત્ક્ષણં સ કિં તં નોત્થાપયિષ્યતિ?
VI તતસ્તે કથાયા એતસ્યાઃ કિમપિ પ્રતિવક્તું ન શેકુઃ।
VII અપરઞ્ચ પ્રધાનસ્થાનમનોનીતત્વકરણં વિલોક્ય સ નિમન્ત્રિતાન્ એતદુપદેશકથાં જગાદ,
VIII ત્વં વિવાહાદિભોજ્યેષુ નિમન્ત્રિતઃ સન્ પ્રધાનસ્થાને મોપાવેક્ષીઃ। ત્વત્તો ગૌરવાન્વિતનિમન્ત્રિતજન આયાતે
IX નિમન્ત્રયિતાગત્ય મનુષ્યાયૈતસ્મૈ સ્થાનં દેહીતિ વાક્યં ચેદ્ વક્ષ્યતિ તર્હિ ત્વં સઙ્કુચિતો ભૂત્વા સ્થાન ઇતરસ્મિન્ ઉપવેષ્ટુમ્
ઉદ્યંસ્યસિ।

X અસ્માત્ કારણાદેવ ત્વં નિમન્ત્રિતો ગત્વાઽપ્રધાનસ્થાન ઉપવિશ, તતો નિમન્ત્રયિતાગત્ય વદિષ્યતિ, હે બન્ધો પ્રોચ્ચસ્થાનં ગત્વોપવિશ, તથા સતિ ભોજનોપવિષ્ટાનાં સકલાનાં સાક્ષાત્ ત્વં માન્યો ભવિષ્યસિ।
XI યઃ કશ્ચિત્ સ્વમુન્નમયતિ સ નમયિષ્યતે, કિન્તુ યઃ કશ્ચિત્ સ્વં નમયતિ સ ઉન્નમયિષ્યતે।
XII તદા સ નિમન્ત્રયિતારં જનમપિ જગાદ, મધ્યાહ્ને રાત્રૌ વા ભોજ્યે કૃતે નિજબન્ધુગણો વા ભ્રાતૃગણો વા જ્ઞાતિગણો વા ધનિગણો વા સમીપવાસિગણો વા એતાન્ ન નિમન્ત્રય, તથા કૃતે ચેત્ તે ત્વાં નિમન્ત્રયિષ્યન્તિ, તર્હિ પરિશોધો ભવિષ્યતિ।
XIII કિન્તુ યદા ભેજ્યં કરોષિ તદા દરિદ્રશુષ્કકરખઞ્ચાન્ધાન્ નિમન્ત્રય,
XIV તત આશિષં લપ્સ્યસે, તેષુ પરિશોધં કર્ત્તુમશક્નુવત્સુ શ્મશાનાદ્ધાર્મ્મિકાનામુત્થાનકાલે ત્વં ફલાં લપ્સ્યસે।
XV અનન્તરં તાં કથાં નિશમ્ય ભોજનોપવિષ્ટઃ કશ્ચિત્ કથયામાસ, યો જન ઈશ્વરસ્ય રાજ્યે ભોક્તું લપ્સ્યતે સએવ ધન્યઃ।
XVI તતઃ સ ઉવાચ, કશ્ચિત્ જનો રાત્રૌ ભોજ્યં કૃત્વા બહૂન્ નિમન્ત્રયામાસ।
XVII તતો ભોજનસમયે નિમન્ત્રિતલોકાન્ આહ્વાતું દાસદ્વારા કથયામાસ, ખદ્યદ્રવ્યાણિ સર્વ્વાણિ સમાસાદિતાનિ સન્તિ, યૂયમાગચ્છત।
XVIII કિન્તુ તે સર્વ્વ એકૈકં છલં કૃત્વા ક્ષમાં પ્રાર્થયાઞ્ચક્રિરે। પ્રથમો જનઃ કથયામાસ, ક્ષેત્રમેકં ક્રીતવાનહં તદેવ દ્રષ્ટું મયા ગન્તવ્યમ્, અતએવ માં ક્ષન્તું તં નિવેદય।
XIX અન્યો જનઃ કથયામાસ, દશવૃષાનહં ક્રીતવાન્ તાન્ પરીક્ષિતું યામિ તસ્માદેવ માં ક્ષન્તું તં નિવેદય।
XX અપરઃ કથયામાસ, વ્યૂઢવાનહં તસ્માત્ કારણાદ્ યાતું ન શક્નોમિ।
XXI પશ્ચાત્ સ દાસો ગત્વા નિજપ્રભોઃ સાક્ષાત્ સર્વ્વવૃત્તાન્તં નિવેદયામાસ, તતોસૌ ગૃહપતિઃ કુપિત્વા સ્વદાસં વ્યાજહાર, ત્વં સત્વરં નગરસ્ય સન્નિવેશાન્ માર્ગાંશ્ચ ગત્વા દરિદ્રશુષ્કકરખઞ્ચાન્ધાન્ અત્રાનય।
XXII તતો દાસોઽવદત્, હે પ્રભો ભવત આજ્ઞાનુસારેણાક્રિયત તથાપિ સ્થાનમસ્તિ।
XXIII તદા પ્રભુઃ પુન ર્દાસાયાકથયત્, રાજપથાન્ વૃક્ષમૂલાનિ ચ યાત્વા મદીયગૃહપૂરણાર્થં લોકાનાગન્તું પ્રવર્ત્તય।
XXIV અહં યુષ્મભ્યં કથયામિ, પૂર્વ્વનિમન્ત્રિતાનમેકોપિ મમાસ્ય રાત્રિભોજ્યસ્યાસ્વાદં ન પ્રાપ્સ્યતિ।
XXV અનન્તરં બહુષુ લોકેષુ યીશોઃ પશ્ચાદ્ વ્રજિતેષુ સત્સુ સ વ્યાઘુટ્ય તેભ્યઃ કથયામાસ,
XXVI યઃ કશ્ચિન્ મમ સમીપમ્ આગત્ય સ્વસ્ય માતા પિતા પત્ની સન્તાના ભ્રાતરો ભગિન્યો નિજપ્રાણાશ્ચ, એતેભ્યઃ સર્વ્વેભ્યો મય્યધિકં પ્રેમ ન કરોતિ, સ મમ શિષ્યો ભવિતું ન શક્ષ્યતિ।
XXVII યઃ કશ્ચિત્ સ્વીયં ક્રુશં વહન્ મમ પશ્ચાન્ન ગચ્છતિ, સોપિ મમ શિષ્યો ભવિતું ન શક્ષ્યતિ।
XXVIII દુર્ગનિર્મ્માણે કતિવ્યયો ભવિષ્યતિ, તથા તસ્ય સમાપ્તિકરણાર્થં સમ્પત્તિરસ્તિ ન વા, પ્રથમમુપવિશ્ય એતન્ન ગણયતિ, યુષ્માકં મધ્ય એતાદૃશઃ કોસ્તિ?
XXIX નોચેદ્ ભિત્તિં કૃત્વા શેષે યદિ સમાપયિતું ન શક્ષ્યતિ,
XXX તર્હિ માનુષોયં નિચેતુમ્ આરભત સમાપયિતું નાશક્નોત્, ઇતિ વ્યાહૃત્ય સર્વ્વે તમુપહસિષ્યન્તિ।
XXXI અપરઞ્ચ ભિન્નભૂપતિના સહ યુદ્ધં કર્ત્તુમ્ ઉદ્યમ્ય દશસહસ્રાણિ સૈન્યાનિ ગૃહીત્વા વિંશતિસહસ્રેઃ સૈન્યૈઃ સહિતસ્ય સમીપવાસિનઃ સમ્મુખં યાતું શક્ષ્યામિ ન વેતિ પ્રથમં ઉપવિશ્ય ન વિચારયતિ એતાદૃશો ભૂમિપતિઃ કઃ?
XXXII યદિ ન શક્નોતિ તર્હિ રિપાવતિદૂરે તિષ્ઠતિ સતિ નિજદૂતં પ્રેષ્ય સન્ધિં કર્ત્તું પ્રાર્થયેત।
XXXIII તદ્વદ્ યુષ્માકં મધ્યે યઃ કશ્ચિન્ મદર્થં સર્વ્વસ્વં હાતું ન શક્નોતિ સ મમ શિષ્યો ભવિતું ન શક્ષ્યતિ।
XXXIV લવણમ્ ઉત્તમમ્ ઇતિ સત્યં, કિન્તુ યદિ લવણસ્ય લવણત્વમ્ અપગચ્છતિ તર્હિ તત્ કથં સ્વાદુયુક્તં ભવિષ્યતિ?
XXXV તદ ભૂમ્યર્થમ્ આલવાલરાશ્યર્થમપિ ભદ્રં ન ભવતિ; લોકાસ્તદ્ બહિઃ ક્ષિપન્તિ। યસ્ય શ્રોતું શ્રોત્રે સ્તઃ સ શૃણોતુ।

# XV

I તદા કરસઞ્ચાયિનઃ પાપિનશ્ચ લોકા ઉપદેશકથાં શ્રોતું યીશોઃ સમીપમ્ આગચ્છન્।
II તતઃ ફિરૂશિન ઉપાધ્યાયાશ્ચ વિવદમાનાઃ કથયામાસુઃ એષ માનુષઃ પાપિભિઃ સહ પ્રણયં કૃત્વા તૈઃ સાર્દ્ધં ભુંક્તે।
III તદા સ તેભ્ય ઇમાં દૃષ્ટાન્તકથાં કથિતવાન્,
IV કસ્યચિત્ શતમેષેષુ તિષ્ઠત્મુ તેષામેકં સ યદિ હારયતિ તર્હિ મધ્યેપ્રાન્તરમ્ એકોનશતમેષાન્ વિહાય હારિતમેષસ્ય ઉદ્દેશપ્રાપ્તિપર્ય્યનતં ન ગવેષયતિ, એતાદૃશો લોકો યુષ્માકં મધ્યે ક આસ્તે?
V તસ્યોદ્દેશં પ્રાપ્ય હૃષ્ટમનાસ્તં સ્કન્ધે નિધાય સ્વસ્થાનમ્ આનીય બન્ધુબાન્ધવસમીપવાસિન આહૂય વક્તિ,
VI હારિતં મેષં પ્રાપ્તોહમ્ અતો હેતો ર્મયા સાર્દ્ધમ્ આનન્દત।
VII તદ્વદહં યુષ્માન્ વદામિ, યેષાં મનઃપરાવર્ત્તનસ્ય પ્રયોજનં નાસ્તિ, તાદૃશૈકોનશતધાર્મ્મિકકારણાદ્ ય આનન્દસ્તસ્માદ્ એકસ્ય મનઃપરિવર્ત્તિનઃ પાપિનઃ કારણાત્ સ્વર્ગે ઽધિકાનન્દો જાયતે।
VIII અપરઞ્ચ દશાનાં રૂપ્યખણ્ડાનામ્ એકખણ્ડે હારિતે પ્રદીપં પ્રજ્વાલ્ય ગૃહં સમ્માર્જ્ય તસ્ય પ્રાપ્તિં યાવદ્ યત્નેન ન ગવેષયતિ, એતાદૃશી યોષિત્ કાસ્તે?
IX પ્રાપ્તે સતિ બન્ધુબાન્ધવસમીપવાસિનીરાહૂય કથયતિ, હારિતં રૂપ્યખણ્ડં પ્રાપ્તાહં તસ્માદેવ મયા સાર્દ્ધમ્ આનન્દત।
X તદ્વદહં યુષ્માન્ વ્યાહરામિ, એકેન પાપિના મનસિ પરિવર્ત્તિતે, ઈશ્વરસ્ય દૂતાનાં મધ્યેપ્યાનન્દો જાયતે।
XI અપરઞ્ચ સ કથયામાસ, કસ્યચિદ્ દ્વૌ પુત્રાવાસ્તાં,
XII તયોઃ કનિષ્ઠઃ પુત્રઃ પિત્રે કથયામાસ, હે પિતસ્તવ સમ્પત્ત્યા યમંશં પ્રાપ્સ્યામ્યહં વિભજ્ય તં દેહિ, તતઃ પિતા નિજાં સમ્પત્તિં વિભજ્ય તાભ્યાં દદૌ।
XIII કતિપયાત્ કાલાત્ પરં સ કનિષ્ઠપુત્રઃ સમસ્તં ધનં સંગૃહ્ય દૂરદેશં ગત્વા દુષ્ટાચરણેન સર્વ્વાં સમ્પત્તિં નાશયામાસ।
XIV તસ્ય સર્વ્વધને વ્યયં ગતે તદ્દેશે મહાદુર્ભિક્ષં બભૂવ, તતસ્તસ્ય દૈન્યદશા ભવિતુમ્ આરેભે।

XV તતઃ પરં સ ગત્વા તદ્દેશીયં ગૃહસ્થમેકમ્ આશ્રયત; તતઃ સતં શૂકરવ્રજં ચારયિતું પ્રાન્તરં પ્રેષયામાસ।

XVI કેનાપિ તસ્મૈ ભક્ષ્યાદાનાત્ સ શૂકરફલવલ્કલેન પિચિણ્ડપૂરણાં વવાઞ્છ।

XVII શેષે સ મનસિ ચેતનાં પ્રાપ્ય કથયામાસ, હા મમ પિતુઃ સમીપે કતિ કતિ વેતનભુજો દાસા યથેષ્ટં તતોધિકઞ્ચ ભક્ષ્યં પ્રાપ્નુવન્તિ કિન્ત્વહં ક્ષુધા મુમૂર્ષુઃ।

XVIII અહમુત્થાય પિતુઃ સમીપં ગત્વા કથામેતાં વદિષ્યામિ, હે પિતર્ ઈશ્વરસ્ય તવ ચ વિરુદ્ધં પાપમકરવમ્

XIX તવ પુત્રઇતિ વિખ્યાતો ભવિતું ન યોગ્યોસ્મિ ચ, માં તવ વૈતનિકં દાસં કૃત્વા સ્થાપય।

XX પશ્ચાત્ સ ઉત્થાય પિતુઃ સમીપં જગામ; તતસ્તસ્ય પિતાતિદૂરે તં નિરીક્ષ્ય દયાઞ્ચક્રે, ધાવિત્વા તસ્ય કણ્ઠં ગૃહીત્વા તં ચુચુમ્બ ચ।

XXI તદા પુત્ર ઉવાચ, હે પિતર્ ઈશ્વરસ્ય તવ ચ વિરુદ્ધં પાપમકરવં, તવ પુત્રઇતિ વિખ્યાતો ભવિતું ન યોગ્યોસ્મિ ચ।

XXII કિન્તુ તસ્ય પિતા નિજદાસાન્ આદિદેશ, સર્વ્વોત્તમવસ્ત્રાણ્યાનીય પરિધાપયતૈનં હસ્તે ચાઙ્ગુરીયકમ્ અર્પયત પાદયોશ્ચોપાનહૌ સમર્પયત;

XXIII પુષ્ટં ગોવત્સમ્ આનીય મારયત ચ તં ભુક્ત્વા વયમ્ આનન્દામ।

XXIV યતો મમ પુત્રોયમ્ અમ્રિયત પુનરજીવીદ્ હારિતશ્ચ લબ્ધોભૂત્ તતસ્ત આનન્દિતુમ્ આરેભિરે।

XXV તત્કાલે તસ્ય જ્યેષ્ઠઃ પુત્રઃ ક્ષેત્ર આસીત્। અથ સ નિવેશનસ્ય નિકટં આગચ્છન્ નૃત્યાનાં વાદ્યાનાઞ્ચ શબ્દં શ્રુત્વા

XXVI દાસાનામ્ એકમ્ આહૂય પપ્રચ્છ, કિં કારણમસ્ય?

XXVII તતઃ સોવાદીત્, તવ ભ્રાતાગમત્, તવ તાતશ્ચ તં સુશરીરં પ્રાપ્ય પુષ્ટં ગોવત્સં મારિતવાન્।

XXVIII તતઃ સ પ્રકુપ્ય નિવેશનાન્તઃ પ્રવેષ્ટું ન સમ્મેને; તતસ્તસ્ય પિતા બહિરાગત્ય તં સાધયામાસ।

XXIX તતઃ સ પિતરં પ્રત્યુવાચ, પશ્ય તવ કાઞ્ચિદપ્યાજ્ઞાં ન વિલંઘ્ય બહૂન્ વત્સરાન્ અહં ત્વાં સેવે તથાપિ મિત્રૈઃ સાર્દ્ધમ્ ઉત્સવં કર્ત્તું કદાપિ છાગમેકમપિ મહ્યં નાદદાઃ;

XXX કિન્તુ તવ યઃ પુત્રો વેશ્યાગમનાદિભિસ્તવ સમ્પત્તિમ્ અપવ્યયિતવાન્ તસ્મિન્નાગતમાત્રે તસ્યૈવ નિમિત્તં પુષ્ટં ગોવત્સં મારિતવાન્।

XXXI તદા તસ્ય પિતાવોચત્, હે પુત્ર ત્વં સર્વ્વદા મયા સહાસિ તસ્માન્ મમ યદ્યદાસ્તે તત્સર્વ્વં તવ।

XXXII કિન્તુ તવાયં ભ્રાતા મૃતઃ પુનરજીવીદ્ હારિતશ્ચ ભૂત્વા પ્રાપ્તોભૂત્, એતસ્માત્ કારણાદ્ ઉત્સવાનન્દૌ કર્ત્તુમ્ ઉચિતમસ્માકમ્।

# XVI

I અપરઞ્ચ યીશુઃ શિષ્યેભ્યોન્યામેકાં કથાં કથયામાસ કસ્યચિદ્ ધનવતો મનુષ્યસ્ય ગૃહકાર્ય્યાધીશે સમ્પત્તેરપવ્યયેઽપવાદિતે સતિ

II તસ્ય પ્રભુસ્તમ્ આહૂય જગાદ, ત્વયિ યામિમાં કથાં શૃણોમિ સા કીદૃશી? ત્વં ગૃહકાર્ય્યાધીશકર્મ્મણો ગણનાં દર્શય ગૃહકાર્ય્યાધીશપદે ત્વં ન સ્થાસ્યસિ।

III તદા સ ગૃહકાર્ય્યાધીશો મનસા ચિન્તયામાસ, પ્રભુ ર્યદિ માં ગૃહકાર્ય્યાધીશપદાદ્ ભ્રંશયતિ તર્હિ કિં કરિષ્યેઽહં? મૃદં ખનિતું મમ શક્તિ ર્નાસ્તિ ભિક્ષિતુઞ્ચ લજ્જિષ્યેઽહં।

IV અતએવ મયિ ગૃહકાર્ય્યાધીશપદાત્ ચ્યુતે સતિ યથા લોકા મહ્યમ્ આશ્રયં દાસ્યન્તિ તદર્થં યત્કર્મ્મ મયા કરણીયં તન્ નિર્ણીયતે।

V પશ્ચાત્ સ સ્વપ્રભોરેકૈકમ્ અધમર્ણમ્ આહૂય પ્રથમં પપ્રચ્છ, ત્વત્તો મે પ્રભુણા કતિ પ્રાપ્યમ્?

VI તતઃ સ ઉવાચ, એકશતાઢકતૈલાનિ; તદા ગૃહકાર્ય્યાધીશઃ પ્રોવાચ, તવ પત્રમાનીય શીઘ્રમુપવિશ્ય તત્ર પઞ્ચાશતં લિખ।

VII પશ્ચાદન્યમેકં પપ્રચ્છ, ત્વત્તો મે પ્રભુણા કતિ પ્રાપ્યમ્? તતઃ સોવાદીદ્ એકશતાઢકગોધૂમાઃ; તદા સ કથયામાસ, તવ પત્રમાનીય અશીતિં લિખ।

VIII તેનૈવ પ્રભુસ્તમયથાર્થકૃતમ્ અધીશં તદ્બુદ્ધિનૈપુણ્યાત્ પ્રશશંસ; ઇત્થં દીપ્તિરૂપસન્તાનેભ્ય એતત્સંસારસ્ય સન્તાના વર્ત્તમાનકાલેઽધિકબુદ્ધિમન્તો ભવન્તિ।

IX અતો વદામિ યૂયમપ્યયથાર્થેન ધનેન મિત્રાણિ લભધ્વં તતો યુષ્માસુ પદભ્રષ્ટેષ્વપિ તાનિ ચિરકાલમ્ આશ્રયં દાસ્યન્તિ।

X યઃ કશ્ચિત્ ક્ષુદ્રે કાર્ય્યે વિશ્વાસ્યો ભવતિ સ મહતિ કાર્ય્યેપિ વિશ્વાસ્યો ભવતિ, કિન્તુ યઃ કશ્ચિત્ ક્ષુદ્રે કાર્ય્યેઽવિશ્વાસ્યો ભવતિ સ મહતિ કાર્ય્યેપ્યવિશ્વાસ્યો ભવતિ।

XI અતએવ અયથાર્થેન ધનેન યદિ યૂયમવિશ્વાસ્યા જાતાસ્તર્હિ સત્યં ધનં યુષ્માકં કરેષુ કઃ સમર્પયિષ્યતિ?

XII યદિ ચ પરધનેન યૂયમ્ અવિશ્વાસ્યા ભવથ તર્હિ યુષ્માકં સ્વકીયધનં યુષ્મભ્યં કો દાસ્યતિ?

XIII કોપિ દાસ ઉભૌ પ્રભૂ સેવિતું ન શક્નોતિ, યત એકસ્મિન્ પ્રીયમાણોઽન્યસ્મિન્નપ્રીયતે યદ્વા એકં જનં સમાદૃત્ય તદન્યં તુચ્છીકરોતિ તદ્વદ્ યૂયમપિ ધનેશ્વરૌ સેવિતું ન શક્નુથ।

XIV તદૈતાઃ સર્વ્વાઃ કથાઃ શ્રુત્વા લોભિફિરૂશિનસ્તમુપજહસુઃ।

XV તતઃ સ ઉવાચ, યૂયં મનુષ્યાણાં નિકટે સ્વાન્ નિર્દોષાન્ દર્શયથ કિન્તુ યુષ્માકમ્ અન્તઃકરણાનીશ્વરો જાનાતિ, યત્ મનુષ્યાણામ્ અતિ પ્રશંસ્યં તદ્ ઈશ્વરસ્ય ઘૃણ્યં।

XVI યોહન આગમનપર્ય્યનતં યુષ્માકં સમીપે વ્યવસ્થાભવિષ્યદ્વાદિનાં લેખનાનિ ચાસન્ તતઃ પ્રભૃતિ ઈશ્વરરાજ્યસ્ય સુસંવાદઃ પ્રચરતિ, એકૈકો લોકસ્તન્મધ્યં યત્નેન પ્રવિશતિ ચ।

XVII વરં નભસઃ પૃથિવ્યાશ્ચ લોપો ભવિષ્યતિ તથાપિ વ્યવસ્થાયા એકબિન્દોરપિ લોપો ન ભવિષ્યતિ।

XVIII યઃ કશ્ચિત્ સ્વીયાં ભાર્ય્યાં વિહાય સ્ત્રિયમન્યાં વિવહતિ સ પરદારાન્ ગચ્છતિ, યશ્ચ તા ત્યક્તાં નારીં વિવહતિ સોપિ પરદારાન ગચ્છતિ।

XIX એકો ધની મનુષ્યઃ શુક્લાનિ સૂક્ષ્માણિ વસ્ત્રાણિ પર્ય્યદધાત્ પ્રતિદિનં પરિતોષરૂપેણાભુંક્તાપિવચ્ચ।

XX સર્વ્વાઙ્ગે ક્ષતયુક્ત ઇલિયાસરનામા કશ્ચિદ્ દરિદ્રસ્તસ્ય ધનવતો ભોજનપાત્રાત્ પતિતમ્ ઉચ્છિષ્ટં ભોક્તું વાઞ્છન્ તસ્ય દ્વારે પતિત્વાતિષ્ઠત્;
XXI અથ શ્વાન આગત્ય તસ્ય ક્ષતાન્યલિહન્|
XXII કિયત્કાલાત્પરં સ દરિદ્રઃ પ્રાણાન્ જહૌ; તતઃ સ્વર્ગીયદૂતાસ્તં નીત્વા ઇબ્રાહીમઃ ક્રોડ ઉપવેશયામાસુઃ|
XXIII પશ્ચાત્ સ ધનવાનપિ મમાર, તં શ્મશાને સ્થાપયામાસુશ્ચ; કિન્તુ પરલોકે સ વેદનાકુલઃ સન્ ઊર્દ્ધ્વાં નિરીક્ષ્ય બહુદૂરાદ્ ઇબ્રાહીમં તત્ક્રોડ ઇલિયાસરઞ્ચ વિલોક્ય રુવન્નુવાચ;
XXIV હે પિતર્ ઇબ્રાહીમ્ અનુગૃહ્ય અઙ્ગુલ્યગ્રભાગં જલે મજ્જયિત્વા મમ જિહ્વાં શીતલાં કર્ત્તુમ્ ઇલિયાસરં પ્રેરય, યતો વહ્નિશિખાતોહં વ્યથિતોસ્મિ|
XXV તદા ઇબ્રાહીમ્ બભાષે, હે પુત્ર ત્વં જીવન્ સમ્પદં પ્રાપ્તવાન્ ઇલિયાસરસ્તુ વિપદં પ્રાપ્તવાન્ એતત્ સ્મર, કિન્તુ સમ્પ્રતિ તસ્ય સુખં તવ ચ દુઃખં ભવતિ|
XXVI અપરમપિ યુષ્માકમ્ અસ્માકઞ્ચ સ્થાનયો ર્મધ્યે મહદ્વિચ્છેદોઽસ્તિ તત એતત્સ્થાનસ્ય લોકાસ્તત્ સ્થાનં યાતું યદ્વા તત્સ્થાનસ્ય લોકા એતત્ સ્થાનમાયાતું ન શક્નુવન્તિ|
XXVII તદા સ ઉક્તવાન્, હે પિતસ્તર્હિ ત્વાં નિવેદયામિ મમ પિતુ ર્ગેહે યે મમ પઞ્ચ ભ્રાતરઃ સન્તિ
XXVIII તે યથૈતદ્ યાતનાસ્થાનં નાયાસ્યન્તિ તથા મન્ત્રણાં દાતું તેષાં સમીપમ્ ઇલિયાસરં પ્રેરય|
XXIX તત ઇબ્રાહીમ્ ઉવાચ, મૂસાભવિષ્યદ્વાદિનાઞ્ચ પુસ્તકાનિ તેષાં નિકટે સન્તિ તે તદ્વચનાનિ મન્યન્તાં|
XXX તદા સ નિવેદયામાસ, હે પિતર્ ઇબ્રાહીમ્ ન તથા, કિન્તુ યદિ મૃતલોકાનાં કશ્ચિત્ તેષાં સમીપં યાતિ તર્હિ તે મનાંસિ વ્યાઘોટયિષ્યન્તિ|
XXXI તત ઇબ્રાહીમ્ જગાદ, તે યદિ મૂસાભવિષ્યદ્વાદિનાઞ્ચ વચનાનિ ન મન્યન્તે તર્હિ મૃતલોકાનાં કસ્મિંશ્ચિદ્ ઉત્થિતેપિ તે તસ્ય મન્ત્રણાં ન મંસ્યન્તે|

# XVII

I ઇતઃ પરં યીશુઃ શિષ્યાન્ ઉવાચ, વિઘ્નૈરવશ્યમ્ આગન્તવ્યં કિન્તુ વિઘ્ના યેન ઘટિષ્યન્તે તસ્ય દુર્ગતિ ર્ભવિષ્યતિ|
II એતેષાં ક્ષુદ્રપ્રાણિનામ્ એકસ્યાપિ વિઘ્નજનનાત્ કણ્ઠબદ્ધપેષણીકસ્ય તસ્ય સાગરાગાધજલે મજ્જનં ભદ્રં|
III યૂયં સ્વેષુ સાવધાનાસ્તિષ્ઠત; તવ ભ્રાતા યદિ તવ કિઞ્ચિદ્ અપરાધ્યતિ તર્હિ તં તર્જય, તેન યદિ મનઃ પરિવર્ત્તયતિ તર્હિ તં ક્ષમસ્વ|
IV પુનરેકદિનમધ્યે યદિ સ તવ સપ્તકૃત્વોઽપરાધ્યતિ કિન્તુ સપ્તકૃત્વ આગત્ય મનઃ પરિવર્ત્ય મયાપરાદ્ધમ્ ઇતિ વદતિ તર્હિ તં ક્ષમસ્વ|
V તદા પ્રેરિતાઃ પ્રભુમ્ અવદન્ અસ્માકં વિશ્વાસં વર્દ્ધય|
VI પ્રભુરુવાચ, યદિ યુષ્માકં સર્ષપૈકપ્રમાણો વિશ્વાસોસ્તિ તર્હિ ત્વં સમૂલમુત્પાટિતો ભૂત્વા સમુદ્રે રોપિતો ભવ કથાયામ્ એતસ્યામ્ એતદુડુમ્બરાય કથિતાયાં સ યુષ્માકમાજ્ઞાવહો ભવિષ્યતિ|
VII અપરં સ્વદાસે હલં વાહયિત્વા વા પશૂન્ ચારયિત્વા ક્ષેત્રાદ્ આગતે સતિ તં વદતિ, એહિ ભોક્તુમુપવિશ, યુષ્માકમ્ એતાદૃશઃ કોસ્તિ?
VIII વરઞ્ચ પૂર્વ્વં મમ ખાદ્યમાસાદ્ય યાવદ્ ભુઞ્જે પિવામિ ચ તાવદ્ બદ્ધકટિઃ પરિચર પશ્ચાત્ ત્વમપિ ભોક્ષ્યસે પાસ્યસિ ચ કથામીદૃશીં કિં ન વક્ષ્યતિ?
IX તેન દાસેન પ્રભોરાજ્ઞાનુરૂપે કર્મ્મણિ કૃતે પ્રભુઃ કિં તસ્મિન્ બાધિતો જાતઃ? નેત્થં બુધ્યતે મયા|
X ઇત્થં નિરૂપિતેષુ સર્વ્વકર્મ્મસુ કૃતેષુ સત્મુ યૂયમપીદં વાક્યં વદથ, વયમ્ અનુપકારિણો દાસા અસ્માભિર્યદ્યત્કર્ત્તવ્યં તન્માત્રમેવ કૃતં|
XI સ યિરૂશાલમિ યાત્રાં કુર્વ્વન્ શોમિરોણગાલીલ્પ્રદેશમધ્યેન ગચ્છતિ,
XII એતર્હિ કુત્રચિદ્ ગ્રામે પ્રવેશમાત્રે દશકુષ્ઠિનસ્તં સાક્ષાત્ કૃત્વા
XIII દૂરે તિષ્ઠનત ઉચ્ચૈ ર્વક્તુમારેભિરે, હે પ્રભો યીશો દયસ્વાસ્માન્|
XIV તતઃ સ તાન્ દૃષ્ટ્વા જગાદ, યૂયં યાજકાનાં સમીપે સ્વાન્ દર્શયત, તતસ્તે ગચ્છન્તો રોગાત્ પરિષ્કૃતાઃ|
XV તદા તેષામેકઃ સ્વં સ્વસ્થં દૃષ્ટ્વા પ્રોચ્ચૈરીશ્વરં ધન્યં વદન્ વ્યાઘુટ્યાયાતો યીશો ર્ગુણાનનુવદન્ તચ્ચરણાધોભૂમૌ પપાત;
XVI સ ચાસીત્ શોમિરોણી|
XVII તદા યીશુરવદત્, દશજનાઃ કિં ન પરિષ્કૃતાઃ? તહ્યન્યે નવજનાઃ કુત્ર?
XVIII ઈશ્વરં ધન્યં વદન્તમ્ એનં વિદેશિનં વિના કોપ્યન્યો ન પ્રાપ્યત|
XIX તદા સ તમુવાચ, ત્વમુત્થાય યાહિ વિશ્વાસસ્તે ત્વાં સ્વસ્થં કૃતવાન્|
XX અથ કદેશ્વરસ્ય રાજત્વં ભવિષ્યતીતિ ફિરૂશિભિઃ પૃષ્ટે સ પ્રત્યુવાચ, ઈશ્વરસ્ય રાજત્વમ્ ઐશ્વર્ય્યદર્શનેન ન ભવિષ્યતિ|
XXI અત એતસ્મિન્ પશ્ય તસ્મિન્ વા પશ્ય, ઇતિ વાક્યં લોકા વક્તું ન શક્ષ્યન્તિ, ઈશ્વરસ્ય રાજત્વં યુષ્માકમ્ અન્તરેવાસ્તે|
XXII તતઃ સ શિષ્યાન્ જગાદ, યદા યુષ્માભિ ર્મનુજસુતસ્ય દિનમેકં દ્રષ્ટુમ્ વાઞ્છિષ્યતે કિન્તુ ન દર્શિષ્યતે, ઈદૃક્કાલ આયાતિ|
XXIII તદાત્ર પશ્ય વા તત્ર પશ્યેતિ વાક્યં લોકા વક્ષ્યન્તિ, કિન્તુ તેષાં પશ્ચાત્ મા યાત, માનુગચ્છત ચ|
XXIV યતસ્તડિદ્ યથાકાશૈકદિશ્યુદિય તદન્યામપિ દિશં વ્યાપ્ય પ્રકાશતે તદ્વત્ નિજદિને મનુજસૂનુઃ પ્રકાશિષ્યતે|
XXV કિન્તુ તત્પૂર્વ્વં તેનાનેકાનિ દુઃખાનિ ભોક્તવ્યાન્યેતદ્વર્ત્તમાનલોકૈશ્ચ સોઽવજ્ઞાતવ્યઃ|
XXVI નોહસ્ય વિદ્યમાનકાલે યથાભવત્ મનુષ્યસૂનોઃ કાલેપિ તથા ભવિષ્યતિ|
XXVII યાવત્કાલં નોહો મહાપોતં નારોહદ્ આપ્લાવિવાર્ય્યેત્ય સર્વ્વં નાનાશયચ્ચ તાવત્કાલં યથા લોકા અભુઞ્જતાપિવન્ વ્યવહન્ વ્યવાહયંશ્ચ;
XXVIII ઇત્થં લોટો વર્ત્તમાનકાલેપિ યથા લોકા ભોજનપાનક્રયવિક્રયરોપણગૃહનિર્મ્માણકર્મ્મસુ પ્રાવર્ત્તન્ત,

XXIX કિન્તુ યદા લોટ્ સિદોમો નિર્જગામ તદા નભસઃ સગન્ધકાગ્નિવૃષ્ટિ ર્ભૂત્વા સર્વ્વં વ્યનાશયત્
XXX તદ્વન્ માનવપુત્રપ્રકાશદિનેપિ ભવિષ્યતિ।
XXXI તદા યદિ કશ્ચિદ્ ગૃહોપરિ તિષ્ઠતિ તર્હિ સ ગૃહમધ્યાત્ કિમપિ દ્રવ્યમાનેતુમ્ અવરુહ્ય નૈતુ; યશ્ચ ક્ષેત્રે તિષ્ઠતિ સોપિ
વ્યાઘુટ્ય નાયાતુ।
XXXII લોટઃ પત્નીં સ્મરત।
XXXIII યઃ પ્રાણાન્ રક્ષિતું ચેષ્ટિષ્યતે સ પ્રાણાન્ હારયિષ્યતિ યસ્તુ પ્રાણાન્ હારયિષ્યતિ સએવ પ્રાણાન્ રક્ષિષ્યતિ।
XXXIV યુષ્માનહં વચ્મિ તસ્યાં રાત્રૌ શય્યૈકગતયો ર્લોકયોરેકો ધારિષ્યતે પરસ્ત્યક્ષ્યતે।
XXXV સ્ત્રિયૌ યુગપત્ પેષણીં વ્યાવર્ત્તયિષ્યતસ્તયોરેકા ધારિષ્યતે પરાત્યક્ષ્યતે।
XXXVI પુરુષૌ ક્ષેત્રે સ્થાસ્યતસ્તયોરેકો ધારિષ્યતે પરસ્ત્યક્ષ્યતે।
XXXVII તદા તે પપ્રચ્છુઃ, હે પ્રભો કુત્રેત્થં ભવિષ્યતિ? તતઃ સ ઉવાચ, યત્ર શવસ્તિષ્ઠતિ તત્ર ગૃધ્રા મિલન્તિ।

# XVIII

I અપરઞ્ચ લોકૈરક્લાન્તૈ ર્નિરન્તરં પ્રાર્થયિતવ્યમ્ ઇત્યાશયેન યીશુના દૃષ્ટાન્ત એકઃ કથિતઃ।
II કુત્રચિન્નગરે કશ્ચિત્ પ્રાડ્વિવાક આસીત્ સ ઈશ્વરાન્નાબિભેત્ માનુષાંશ્ચ નામન્યત।
III અથ તત્પુરવાસિની કાચિદ્વિધવા તત્સમીપમેત્ય વિવાદિના સહ મમ વિવાદં પરિષ્કુર્વ્વિતિ નિવેદયામાસ।
IV તતઃ સ પ્રાડ્વિવાકઃ કિયદ્દિનાનિ ન તદઙ્ગીકૃતવાન્ પશ્ચાચ્ચિત્તે ચિન્તયામાસ, યદ્યપીશ્વરાન્ન બિભેમિ મનુષ્યાનપિ ન મન્યે
V તથાપ્યેષા વિધવા માં ક્લિશ્નાતિ તસ્માદસ્યા વિવાદં પરિષ્કરિષ્યામિ નોચેત્ સા સદાગત્ય માં વ્યગ્રં કરિષ્યતિ।
VI પશ્ચાત્ પ્રભુરવદદ્ અસાવન્યાયપ્રાડ્વિવાકો યદાહ તત્ર મનો નિધધ્વં।
VII ઈશ્વરસ્ય યે ઽભિરુચિતલોકા દિવાનિશં પ્રાર્થયન્તે સ બહુદિનાનિ વિલમ્બ્યાપિ તેષાં વિવાદાન્ કિં ન પરિષ્કરિષ્યતિ?
VIII યુષ્માનહં વદામિ ત્વરયા પરિષ્કરિષ્યતિ, કિન્તુ યદા મનુષ્યપુત્ર આગમિષ્યતિ તદા પૃથિવ્યાં કિમીદૃશં વિશ્વાસં પ્રાપ્સ્યતિ?
IX યે સ્વાન્ ધાર્મ્મિકાન્ જ્ઞાત્વા પરાન્ તુચ્છીકુર્વ્વન્તિ એતાદૃગ્ભ્યઃ, કિયદ્ભ્ય ઇમં દૃષ્ટાન્તં કથયામાસ।
X એકઃ ફિરૂશ્યપરઃ કરસઞ્ચાયી દ્વાવિમૌ પ્રાર્થયિતું મન્દિરં ગતૌ।
XI તતોઽસૌ ફિરૂશ્યેકપાર્શ્વે તિષ્ઠન્ હે ઈશ્વર અહમન્યલોકવત્ લોઠયિતાન્યાયી પારદારિકશ્ચ ન ભવામિ અસ્ય
કરસઞ્ચાયિનસ્તુલ્યશ્ચ ન, તસ્માત્ત્વાં ધન્યં વદામિ।
XII સપ્તસુ દિનેષુ દિનદ્વયમુપવસામિ સર્વ્વસમ્પત્તે ર્દશમાંશં દદામિ ચ, એતત્કથાં કથયન્ પ્રાર્થયામાસ।
XIII કિન્તુ સ કરસઞ્ચાયિ દૂરે તિષ્ઠન્ સ્વર્ગં દ્રષ્ટું નેચ્છન્ વક્ષસિ કરાઘાતં કુર્વ્વન્ હે ઈશ્વર પાપિષ્ઠં માં દયસ્વ, ઇત્થં પ્રાર્થયામાસ।
XIV યુષ્માનહં વદામિ, તયોર્દ્વયો ર્મધ્યે કેવલઃ કરસઞ્ચાયી પુણ્યવત્ત્વેન ગણિતો નિજગૃહં જગામ, યતો યઃ કશ્ચિત્ સ્વમુન્નમયતિ
સ નામયિષ્યતે કિન્તુ યઃ કશ્ચિત્ સ્વં નમયતિ સ ઉન્નમયિષ્યતે।
XV અથ શિશૂનાં ગાત્રસ્પર્શાર્થં લોકાસ્તાન્ તસ્ય સમીપમાનિન્યુઃ શિષ્યાસ્તદ્ દૃષ્ટ્વાનેતૃન્ તર્જયામાસુઃ,
XVI કિન્તુ યીશુસ્તાનાહૂય જગાદ, મન્નિકટમ્ આગન્તું શિશૂન્ અનુજાનીધ્વં તાંશ્ચ મા વારયત; યત ઈશ્વરરાજ્યાધિકારિણ એષાં
સદૃશાઃ।
XVII અહં યુષ્માન્ યથાર્થં વદામિ, યો જનઃ શિશોઃ સદૃશો ભૂત્વા ઈશ્વરરાજ્યં ન ગૃહ્લાતિ સ કેનાપિ પ્રકારેણ તત્ પ્રવેષ્ટું ન
શક્નોતિ।
XVIII અપરમ્ એકોધિપતિસ્તં પપ્રચ્છ, હે પરમગુરો, અનન્તાયુષઃ પ્રાપ્તયે મયા કિં કર્ત્તવ્યં?
XIX યીશુરુવાચ, માં કુતઃ પરમં વદસિ? ઈશ્વરં વિના કોપિ પરમો ન ભવતિ।
XX પરદારાન્ મા ગચ્છ, નરં મા જહિ, મા ચોરય, મિથ્યાસાક્ષ્યં મા દેહિ, માતરં પિતરઞ્ચ સંમન્યસ્વ, એતા યા આજ્ઞાઃ સન્તિ
તાસ્ત્વં જાનાસિ।
XXI તદા સ ઉવાચ, બાલ્યકાલાત્ સર્વ્વા એતા આચરામિ।
XXII ઇતિ કથાં શ્રુત્વા યીશુસ્તમવદત્, તથાપિ તવૈકં કર્મ્મ ન્યૂનમાસ્તે, નિજં સર્વ્વસ્વં વિક્રીય દરિદ્રેભ્યો વિતર, તસ્માત્ સ્વર્ગે ધનં
પ્રાપ્સ્યસિ; તત આગત્ય મમાનુગામી ભવ।
XXIII કિન્ત્વેતાં કથાં શ્રુત્વા સોધિપતિઃ શુશોચ, યતસ્તસ્ય બહુધનમાસીત્।
XXIV તદા યીશુસ્તમતિશોકાન્વિતં દૃષ્ટ્વા જગાદ, ધનવતામ્ ઈશ્વરરાજ્યપ્રવેશઃ કીદૃગ્ દુષ્કરઃ।
XXV ઈશ્વરરાજ્યે ધનિનઃ પ્રવેશાત્ સૂચેશ્છિદ્રેણ મહાઙ્ગસ્ય ગમનાગમને સુકરે।
XXVI શ્રોતારઃ પપ્રચ્છુસ્તર્હિ કેન પરિત્રાણં પ્રાપ્સ્યતે?
XXVII સ ઉક્તવાન્, યન્ માનુષેણાશક્યં તદ્ ઈશ્વરેણ શક્યં।
XXVIII તદા પિતર ઉવાચ, પશ્ય વયં સર્વ્વસ્વં પરિત્યજ્ય તવ પશ્ચાદ્ગામિનોઽભવામ।
XXIX તતઃ સ ઉવાચ, યુષ્માનહં યથાર્થં વદામિ, ઈશ્વરરાજ્યાર્થં ગૃહં પિતરૌ ભ્રાતૃગણં જાયાં સન્તાનાંશ્ચ ત્યક્તવા
XXX ઇહ કાલે તતોઽધિકં પરકાલે ઽનન્તાયુશ્ચ ન પ્રાપ્સ્યતિ લોક ઈદૃશઃ કોપિ નાસ્તિ।
XXXI અનન્તરં સ દ્વાદશશિષ્યાનાહૂય બભાષે, પશ્યત વયં યિરૂશાલમ્નગરં યામઃ, તસ્માત્ મનુષ્યપુત્રે ભવિષ્યદ્વાદિભિરુક્તં
યદસ્તિ તદનુરૂપં તં પ્રતિ ઘટિષ્યતે;
XXXII વસ્તુતસ્તુ સોઽન્યદેશીયાનાં હસ્તેષુ સમર્પયિષ્યતે, તે તમુપહસિષ્યન્તિ, અન્યાયમાચરિષ્યન્તિ તદ્વપુષિ નિષ્ઠીવં
નિક્ષેપ્સ્યન્તિ, કશાભિઃ પ્રહૃત્ય તં હનિષ્યન્તિ ચ,
XXXIII કિન્તુ તૃતીયદિને સ શ્મશાનાદ્ ઉત્થાસ્યતિ।
XXXIV એતસ્યાઃ કથાયા અભિપ્રાયં કિઞ્ચિદપિ તે બોદ્ધું ન શેકુઃ તેષાં નિકટેઽસ્પષ્ટતવાત્ તસ્યૈતાસાં કથાનામ્ આશયં તે જ્ઞાતું ન
શેકુશ્ચ।

XXXV અથ તસ્મિન્ યિરીહોઃ પુરસ્યાન્તિકં પ્રાપ્તે કશ્ચિદન્ધઃ પથઃ પાર્શ્વ ઉપવિશ્ય ભિક્ષામ્ અકરોત્

XXXVI સ લોકસમૂહસ્ય ગમનશબ્દં શ્રુત્વા તત્કારણં પૃષ્ટવાન્།

XXXVII નાસરતીયયીશુર્યાતીતિ લોકૈરુક્તે સ ઉચ્ચૈર્વક્તુમારેભે,

XXXVIII હે દાયૂદઃ સન્તાન યીશો માં દયસ્વ।

XXXIX તતોગ્રગામિનસ્તં મૌની તિષ્ઠેતિ તર્જયામાસુઃ કિન્તુ સ પુનારુવન્ ઉવાચ, હે દાયૂદઃ સન્તાન માં દયસ્વ।

XL તદા યીશુઃ સ્થગિતો ભૂત્વા સ્વાન્તિકે તમાનેતુમ્ આદિદેશ।

XLI તતઃ સ તસ્યાન્તિકમ્ આગમત્, તદા સ તં પપ્રચ્છ, ત્વં કિમિચ્છસિ? ત્વદર્થમહં કિં કરિષ્યામિ? સ ઉક્તવાન્, હે પ્રભોઽહં
દ્રષ્ટું લભૈ।

XLII તદા યીશુરુવાચ, દૃષ્ટિશક્તિં ગૃહાણ તવ પ્રત્યયસ્ત્વાં સ્વસ્થં કૃતવાન્།

XLIII તતસ્તત્ક્ષણાત્ તસ્ય ચક્ષુષી પ્રસન્ને; તસ્માત્ સ ઈશ્વરં ધન્યં વદન્ તત્પશ્ચાદ્ યયૌ, તદાલોક્ય સર્વ્વે લોકા ઈશ્વરં પ્રશંસિતુમ્
આરેભિરે।

# XIX

I યદા યીશુ ર્યિરીહોપુરં પ્રવિશ્ય તન્મધ્યેન ગચ્છંસ્તદા

II સક્કેયનામા કરસઞ્ચાયિનાં પ્રધાનો ધનવાનેકો

III યીશુઃ કીદૃગિતિ દ્રષ્ટું ચેષ્ટિતવાન્ કિન્તુ ખર્વ્વત્વાલ્લોકસંઘમધ્યે તદ્દર્શનમપ્રાપ્ય

IV યેન પથા સ યાસ્યતિ તત્પથેઽગ્રે ધાવિત્વા તં દ્રષ્ટુમ્ ઉડુમ્બરતરુમારુરોહ।

V પશ્ચાદ્ યીશુસ્તત્સ્થાનમ્ ઇત્વા ઊર્દ્ધ્વં વિલોક્ય તં દૃષ્ટ્વાવાદીત્, હે સક્કેય ત્વં શીઘ્રમવરોહ મયાદ્ય ત્વદ્ગેહે વસ્તવ્યં।

VI તતઃ સ શીઘ્રમવરુહ્ય સાહ્લાદં તં જગ્રાહ।

VII તદ્ દૃષ્ટ્વા સર્વ્વે વિવદમાના વક્તુમારેભિરે, સોતિથિત્વેન દુષ્ટલોકગૃહં ગચ્છતિ।

VIII કિન્તુ સક્કેયો દણ્ડાયમાનો વક્તુમારેભે, હે પ્રભો પશ્ય મમ યા સમ્પત્તિરસ્તિ તદર્દ્ધં દરિદ્રેભ્યો દદે, અપરમ્ અન્યાયં કૃત્વા
કસ્માદપિ યદિ કદાપિ કિઞ્ચિત્ મયા ગૃહીતં તર્હિ તચ્ચતુર્ગુણં દદામિ।

IX તદા યીશુસ્તમુક્તવાન્ અયમપિ ઇબ્રાહીમઃ સન્તાનોઽતઃ કારણાદ્ અદ્યાસ્ય ગૃહે ત્રાણમુપસ્થિતં।

X યદ્ હારિતં તત્ મૃગયિતું રક્ષિતુઞ્ચ મનુષ્યપુત્ર આગતવાન્།

XI અથ સ યિરૂશાલમઃ સમીપ ઉપાતિષ્ઠદ્ ઈશ્વરરાજત્વસ્યાનુષ્ઠાનં તદૈવ ભવિષ્યતીતિ લોકૈરન્વભૂયત, તસ્માત્ સ શ્રોતૃભ્યઃ
પુનર્દૃષ્ટાન્તકથામ્ ઉત્થાપ્ય કથયામાસ।

XII કોપિ મહાલ્લોકો નિજાર્થં રાજત્વપદં ગૃહીત્વા પુનરાગન્તું દૂરદેશં જગામ।

XIII યાત્રાકાલે નિજાન્ દશદાસાન્ આહૂય દશસ્વર્ણમુદ્રા દત્ત્વા મમાગમનપર્ય્યન્તં વાણિજ્યં કુરુતેત્યાદિદેશ।

XIV કિન્તુ તસ્ય પ્રજાસ્તમવજ્ઞાય મનુષ્યમેનમ્ અસ્માકમુપરિ રાજત્વં ન કારયિવ્યામ ઇમાં વાર્તાં તન્નિકટે પ્રેરયામાસુઃ।

XV અથ સ રાજત્વપદં પ્રાપ્યાગતવાન્ એકૈકો જનો બાણિજ્યેન કિં લબ્ધવાન્ ઇતિ જ્ઞાતું યેષુ દાસેષુ મુદ્રા અર્પયત્ તાન્
આહૂયાનેતુમ્ આદિદેશ।

XVI તદા પ્રથમ આગત્ય કથિતવાન્, હે પ્રભો તવ તયૈકયા મુદ્રયા દશમુદ્રા લબ્ધાઃ।

XVII તતઃ સ ઉવાચ ત્વમુત્તમો દાસઃ સ્વલ્પેન વિશ્વાસ્યો જાત ઇતઃ કારણાત્ ત્વં દશનગરાણામ્ અધિપો ભવ।

XVIII દ્વિતીય આગત્ય કથિતવાન્, હે પ્રભો તવૈકયા મુદ્રયા પઞ્ચમુદ્રા લબ્ધાઃ।

XIX તતઃ સ ઉવાચ, ત્વં પઞ્ચાનાં નગરાણામધિપતિ ર્ભવ।

XX તતોન્ય આગત્ય કથયામાસ, હે પ્રભો પશ્ય તવ યા મુદ્રા અહં વસ્ત્રે બદ્ધ્વાસ્થાપયં સેયં।

XXI ત્વં કૃપણો યન્નાસ્થાપયસ્તદપિ ગૃહ્લાસિ, યન્નાવપસ્તદેવ ચ છિનત્સિ તતોહં ત્વત્તો ભીતઃ।

XXII તદા સ જગાદ, રે દુષ્ટદાસ તવ વાક્યેન ત્વાં દોષિણં કરિષ્યામિ, યદહં નાસ્થાપયં તદેવ ગૃહ્લામિ, યદહં નાવપઞ્ચ તદેવ
છિનદ્મિ, એતાદૃશઃ કૃપણોહમિતિ યદિ ત્વં જાનાસિ,

XXIII તર્હિ મમ મુદ્રા બણિજાં નિકટે કુતો નાસ્થાપયઃ? તયા કૃતેઽહમ્ આગત્ય કુસીદેન સાર્દ્ધં નિજમુદ્રા અપ્રાપ્સ્યમ્།

XXIV પશ્ચાત્ સ સમીપસ્થાન્ જનાન્ આજ્ઞાપયત્ અસ્માત્ મુદ્રા આનીય યસ્ય દશમુદ્રાઃ સન્તિ તસ્મૈ દત્ત।

XXV તે પ્રોચુઃ પ્રભોઽસ્ય દશમુદ્રાઃ સન્તિ।

XXVI યુષ્માનહં વદામિ યસ્યાશ્રયે વદ્ધતે ઙધિકં તસ્મૈ દાયિષ્યતે, કિન્તુ યસ્યાશ્રયે ન વર્દ્ધતે તસ્ય યદ્યદસ્તિ તદપિ તસ્માન્
નાયિષ્યતે।

XXVII કિન્તુ મમાધિપતિત્વસ્ય વશત્વે સ્થાતુમ્ અસમ્મન્યમાના યે મમ રિપવસ્તાનાનીય મમ સમક્ષં સંહરત।

XXVIII ઇત્યુપદેશકથાં કથયિત્વા સોગ્રગઃ સન્ યિરૂશાલમપુરં યયૌ।

XXIX તતો બૈત્ફગીબૈથનીયાગ્રામયોઃ સમીપે જૈતુનાદ્રેરન્તિકમ્ ઇત્વા શિષ્યદ્વયમ્ ઇત્યુક્ત્વા પ્રેષયામાસ,

XXX યુવામમું સમ્મુખસ્થગ્રામં પ્રવિશ્યૈવ યં કોપિ માનુષઃ કદાપિ નારોહત્ તં ગર્દ્દભશાવકં બદ્ધં દ્રક્ષ્યથસ્તં મોચયિત્વાનયતં।

XXXI તત્ર કુતો મોચયથઃ? ઇતિ ચેત્ કોપિ વક્ષ્યતિ તર્હિ વક્ષ્યથઃ પ્રભોરત્ર પ્રયોજનમ્ આસ્તે।

XXXII તદા તૌ પ્રરિતૌ ગત્વા તત્કથાાનુસારેણ સર્વ્વં પ્રાપ્તૌ।

XXXIII ગર્દભશાવકમોચનકાલે તત્વામિન ઊચુઃ, ગર્દભશાવકં કુતો મોચયથઃ?

XXXIV તાવૂચતુઃ પ્રભોરત્ર પ્રયોજનમ્ આસ્તે।

XXXV પશ્ચાત્ તૌ તં ગર્દભશાવકં યીશોરન્તિકમાનીય તત્પૃષ્ઠે નિજવસનાનિ પાતયિત્વા તદુપરિ યીશુમારોહયામાસતુઃ।

XXXVI અથ યાત્રાકાલે લોકાઃ પથિ સ્વવસ્ત્રાણિ પાતયિતુમ્ આરેભિરે।

XXXVII અપરં જૈતુનાદ્રેરુપત્યકામ્ ઇત્વા શિષ્યસંઘઃ પૂર્વ્વદૃષ્ટાનિ મહાકર્મ્માણિ સ્મૃત્વા,

XXXVIII યો રાજા પ્રભો ર્નામ્નાયાતિ સ ધન્યઃ સ્વર્ગે કુશલં સર્વ્વોચ્ચે જયધ્વનિ ર્ભવતુ, કથામેતાં કથયિત્વા સાનન્દમ્ ઉચૈરીશ્વરં
ધન્યં વક્તુમારેભે।
XXXIX તદા લોકારણ્યમધ્યસ્થાઃ કિયન્તઃ ફિરૂશિનસ્તત્ શ્રુત્વા યીશું પ્રોચુઃ, હે ઉપદેશક સ્વશિષ્યાન્ તર્જય।
XL સ ઉવાચ, યુષ્માનહં વદામિ યદ્યમી નીરવાસ્તિષ્ઠન્તિ તર્હિ પાષાણા ઉચૈઃ કથાઃ કથયિષ્યન્તિ।
XLI પશ્ચાત્ તત્પુરાન્તિકમેત્ય તદવલોક્ય સાશ્રુપાતં જગાદ,
XLII હા હા ચેત્ ત્વમગ્રેઽજ્ઞાસ્યથાઃ, તવાસ્મિન્નેવ દિને વા યદિ સ્વમઙ્ગલમ્ ઉપાલપ્સ્યથાઃ, તર્હ્યુત્તમમ્ અભવિષ્યત્, કિન્તુ
ક્ષણેસ્મિન્ તત્તવ દૃષ્ટેરગોચરમ્ ભવતિ।
XLIII ત્વં સ્વત્રાણકાલે ન મનો ન્યધત્થા ઇતિ હેતો ર્યત્કાલે તવ રિપવસ્ત્વાં ચતુર્દિક્ષુ પ્રાચીરેણ વેષ્ટયિત્વા રોત્સ્યન્તિ
XLIV બાલકૈઃ સાર્દ્ધં ભૂમિસાત્ કરિષ્યન્તિ ચ ત્વન્મધ્યે પાષાણૈકોપિ પાષાણોપરિ ન સ્થાસ્યતિ ચ, કાલ ઈદૃશ ઉપસ્થાસ્યતિ।
XLV અથ મધ્યેમન્દિરં પ્રવિશ્ય તત્રત્યાન્ ક્રયિવિક્રયિણો બહિષ્કુર્વ્વન્
XLVI અવદત્ મદ્ગૃહં પ્રાર્થનાગૃહમિતિ લિપિરાસ્તે કિન્તુ યૂયં તદેવ ચૈરાણાં ગહ્વરં કુરુથ।
XLVII પશ્ચાત્ સ પ્રત્યહં મધ્યેમન્દિરમ્ ઉપદિદેશ; તતઃ પ્રધાનયાજકા અધ્યાપકાઃ પ્રાચીનાશ્ચ તં નાશયિતું ચિચેષ્ટિરે;
XLVIII કિન્તુ તદુપદેશે સર્વ્વે લોકા નિવિષ્ટચિત્તાઃ સ્થિતાસ્તસ્માત્ તે તત્કર્ત્તું નાવકાશં પ્રાપુઃ।

# XX

I અથૈકદા યીશુ ર્મનિદરે સુસંવાદં પ્રચારયન્ લોકાનુપદિશતિ, એતર્હિ પ્રધાનયાજકા અધ્યાપકાઃ પ્રાઞ્ચશ્ચ તન્નિકટમાગત્ય પપ્રચ્છુઃ
II કયાજ્ઞયા ત્વં કર્મ્માણ્યેતાનિ કરોષિ? કો વા ત્વામાજ્ઞાપયત્? તદસ્માન્ વદ।
III સ પ્રત્યુવાચ, તર્હિ યુષ્માનપિ કથામેકાં પૃચ્છામિ તસ્યોત્તરં વદત।
IV યોહનો મજ્જનમ્ ઈશ્વરસ્ય માનુષાણાં વાજ્ઞાતો જાતં?
V તતસ્તે મિથો વિવિચ્ય જગદુઃ, યદીશ્વરસ્ય વદામસ્તર્હિ તં કુતો ન પ્રત્યૈત સ ઇતિ વક્ષ્યતિ।
VI યદિ મનુષ્યસ્યેતિ વદામસ્તર્હિ સર્વ્વે લોકા અસ્માન્ પાષાણૈ ર્હનિષ્યન્તિ યતો યોહન્ ભવિષ્યદ્વાદીતિ સર્વ્વે દૃઢં જાનન્તિ।
VII અતએવ તે પ્રત્યૂચુઃ કસ્યાજ્ઞયા જાતમ્ ઇતિ વક્તું ન શક્નુમઃ।
VIII તદા યીશુરવદત્ તર્હિ કયાજ્ઞયા કર્મ્માણ્યેતાતિ કરોમીતિ ચ યુષ્માન્ ન વક્ષ્યામિ।
IX અથ લોકાનાં સાક્ષાત્ સ ઇમાં દૃષ્ટાન્તકથાં વક્તુમારેભે, કશ્ચિદ્ દ્રાક્ષાક્ષેત્રં કૃત્વા તત્ ક્ષેત્રં કૃષીવલાનાં હસ્તેષુ સમર્પ્ય બહુકાલાર્થં
દૂરદેશં જગામ।
X અથ ફલકાલે ફલાનિ ગ્રહીતુ કૃષીવલાનાં સમીપે દાસં પ્રાહિણોત્ કિન્તુ કૃષીવલાસ્તં પ્રહૃત્ય રિક્તહસ્તં વિસસર્જુઃ।
XI તતઃ સોધિપતિઃ પુનરન્યં દાસં પ્રેષયામાસ, તે તમપિ પ્રહૃત્ય કુવ્યવહૃત્ય રિક્તહસ્તં વિસસૃજુઃ।
XII તતઃ સ તૃતીયવારમ્ અન્યં પ્રાહિણોત્ તે તમપિ ક્ષતાઙ્ગં કૃત્વા બહિ ર્નિચિક્ષિપુઃ।
XIII તદા ક્ષેત્રપતિ ર્વિચારયામાસ, મમેદાનીં કિં કર્ત્તવ્યં? મમ પ્રિયે પુત્રે પ્રહિતે તે તમવશ્યં દૃષ્ટ્વા સમાદરિષ્યન્તે।
XIV કિન્તુ કૃષીવલાસ્તં નિરીક્ષ્ય પરસ્પરં વિવિચ્ય પ્રોચુઃ, અયમુત્તરાધિકારી આગચ્છતૈનં હન્મસ્તતોધિકારોસ્માકં ભવિષ્યતિ।
XV તતસ્તે તં ક્ષેત્રાદ્ બહિ ર્નિપાત્ય જઘ્નુસ્તસ્માત્ સ ક્ષેત્રપતિસ્તાન્ પ્રતિ કિં કરિષ્યતિ?
XVI સ આગત્ય તાન્ કૃષીવલાન્ હત્વા પરેષાં હસ્તેષુ તત્ક્ષેત્રં સમર્પયિષ્યતિ; ઇતિ કથાં શ્રુત્વા તે ઽવદન્ એતાદૃશી ઘટના ન ભવતુ।
XVII કિન્તુ યીશુસ્તાનવલોક્ય જગાદ, તર્હિ, સ્થપતયઃ કરિષ્યન્તિ ગ્રાવાણં યન્તુ તુચ્છકં પ્રધાનપ્રસ્તરઃ કોણે સ એવ હિ
ભવિષ્યતિ। એતસ્ય શાસ્ત્રીયવચનસ્ય કિં તાત્પર્ય્યં?
XVIII અપરં તત્પાષાણોપરિ યઃ પતિષ્યતિ સ ભંક્ષ્યતે કિન્તુ યસ્યોપરિ સ પાષાણઃ પતિષ્યતિ સ તેન ધૂલિવચ્ ચૂર્ણીભવિષ્યતિ।
XIX સોસ્માકં વિરુદ્ધં દૃષ્ટાન્તમિમં કથિતવાન્ ઇતિ જ્ઞાત્વા પ્રધાનયાજકા અધ્યાપકાશ્ચ તદૈવ તં ધર્ત્તું વવાઞ્છુઃ કિન્તુ લોકેભ્યો
બિભ્યુઃ।
XX અતએવ તં પ્રતિ સતર્કાઃ સન્તઃ કથં તદ્વાક્યદોષં ધૃત્વા તં દેશાધિપસ્ય સાધુવેશધારિણશ્ચરાન્ તસ્ય સમીપે પ્રેષયામાસુઃ।
XXI તદા તે તં પપ્રચ્છુઃ, હે ઉપદેશક ભવાન્ યથાર્થં કથયન્ ઉપદિશતિ, કમપ્યનપેક્ષ્ય સત્યત્વેનૈશ્વરં માર્ગમુપદિશતિ,
વયમેતજ્જાનીમઃ।
XXII કૈસરરાજાય કરોસ્માભિ ર્દેયો ન વા?
XXIII સ તેષાં વઞ્ચનં જ્ઞાત્વાવદત્ કુતો માં પરીક્ષધ્વે? માં મુદ્રામેકં દર્શયત।
XXIV ઇહ લિખિતા મૂર્તિરિયં નામ ચ કસ્ય? તેઽવદન્ કૈસરસ્ય।
XXV તદા સ ઉવાચ, તર્હિ કૈસરસ્ય દ્રવ્યં કૈસરાય દત્ત; ઈશ્વરસ્ય તુ દ્રવ્યમીશ્વરાય દત્ત।
XXVI તસ્માલ્લોકાનાં સાક્ષાત્ તત્કથાયાઃ કમપિ દોષં ધર્ત્તુમપ્રાપ્ય તે તસ્યોત્તરાદ્ આશ્ચર્ય્યં મન્યમાના મૌનિનસ્તસ્થુઃ।
XXVII અપરઞ્ચ શ્મશાનાદુત્થાનાનઙ્ગીકારિણાં સિદૂકિનાં કિયન્તો જના આગત્ય તં પપ્રચ્છુઃ,
XXVIII હે ઉપદેશક શાસ્ત્રે મૂસા અસ્માન્ પ્રતીતિ લિલેખ યસ્ય ભ્રાતા ભાર્ય્યાયાં સત્યાં નિઃસન્તાનો મ્રિયતે સ તજ્જાયાં વિવહ્ય
તદ્વંશમ્ ઉત્પાદયિષ્યતિ।
XXIX તથાચ કેચિત્ સપ્ત ભ્રાતર આસન્ તેષાં જ્યેષ્ઠો ભ્રાતા વિવહ્ય નિરપત્યઃ પ્રાણાન્ જહૌ।
XXX અથ દ્વિતીયસ્તસ્ય જાયાં વિવહ્ય નિરપત્યઃ સન્ મમાર। તૃતીયશ્ચ તામેવ વ્યુવાહ;
XXXI ઇત્થં સપ્ત ભ્રાતરસ્તામેવ વિવહ્ય નિરપત્યાઃ સન્તો મમ્રુઃ।
XXXII શેષે સા સ્ત્રી ચ મમાર।
XXXIII અતએવ શ્મશાનાદુત્થાનકાલે તેષાં સપ્તજનાનાં કસ્ય સા ભાર્ય્યા ભવિષ્યતિ? યતઃ સા તેષાં સપ્તાનામેવ ભાર્ય્યાસીત્।
XXXIV તદા યીશુઃ પ્રત્યુવાચ, એતસ્ય જગતો લોકા વિવહન્તિ વાગ્દત્તાશ્ચ ભવન્તિ
XXXV કિન્તુ યે તજ્જગત્પ્રાપ્તિયોગ્યત્વેન ગણિતાં ભવિષ્યન્તિ શ્મશાનાચ્ચોત્થાસ્યન્તિ તે ન વિવહન્તિ વાગ્દત્તાશ્ચ ન ભવન્તિ,

XXXVI તે પુન ર્ન મ્રિયન્તે કિન્તુ શ્મશાનાદુત્થાપિતાઃ સન્ત ઈશ્વરસ્ય સન્તાનાઃ સ્વર્ગીયદૂતાનાં સદૃશાશ્ચ ભવન્તિ।
XXXVII અધિકન્તુ મૂસાઃ સ્તમ્બોપાખ્યાને પરમેશ્વર ઈબ્રાહીમ ઈશ્વર ઇસ્હાક ઈશ્વરો યાકૂબશ્ચેશ્વર ઇત્યુક્ત્વા મૃતાનાં શ્મશાનાદ્
ઉત્થાનસ્ય પ્રમાણં લિલેખ।
XXXVIII અતએવ ય ઈશ્વરઃ સ મૃતાનાં પ્રભુ ર્ન કિન્તુ જીવતામેવ પ્રભુઃ, તન્નિકટે સર્વ્વે જીવન્તઃ સન્તિ।
XXXIX ઇતિ શ્રુત્વા કિયન્તોધ્યાપકા ઊચુઃ, હે ઉપદેશક ભવાન્ ભદ્રં પ્રત્યુક્તવાન્।
XL ઇતઃ પરં તં કિમપિ પ્રષ્ટં તેષાં પ્રગલ્ભતા નાભૂત્।
XLI પશ્ચાત્ સ તાન્ ઉવાચ, યઃ ખ્રીષ્ટઃ સ દાયૂદઃ સન્તાન એતાં કથાં લોકાઃ કથં કથયન્તિ?
XLII યતઃ મમ પ્રભુમિદં વાક્યમવદત્ પરમેશ્વરઃ। તવ શત્રૂનહં યાવત્ પાદપીઠં કરોમિ ન। તાવત્ કાલં મદીયે ત્વં દક્ષપાર્શ્વ ઉપાવિશ।
XLIII ઇતિ કથાં દાયૂદ્ સ્વયં ગીતગ્રન્થેઽવદત્।
XLIV અતએવ યદિ દાયૂદ્ તં પ્રભું વદતિ, તર્હિ સ કથં તસ્ય સન્તાનો ભવતિ?
XLV પશ્ચાદ્ યીશુઃ સર્વ્વજનાનાં કર્ણગોચરે શિષ્યાનુવાચ,
XLVI યેઽધ્યાપકા દીર્ઘપરિચ્છદં પરિધાય ભ્રમન્તિ, હટ્ટાપણયો ર્નમસ્કારે ભજનગેહસ્ય પ્રોચ્ચાસને ભોજનગૃહસ્ય પ્રધાનસ્થાને
ચ પ્રીયન્તે
XLVII વિધવાનાં સર્વ્વસ્વં ગ્રસિત્વા છલેન દીર્ઘકાલં પ્રાર્થયન્તે ચ તેષુ સાવધાના ભવત, તેષામુગ્રદણ્ડો ભવિષ્યતિ।

# XXI

I અથ ધનિલોકા ભાણ્ડાગારે ધનં નિક્ષિપન્તિ સ તદેવ પશ્યતિ,
II એતર્હિ કાચિદ્દીના વિધવા પણદ્વયં નિક્ષિપતિ તદ્ દદર્શ।
III તતો યીશુરુવાચ યુષ્માનહં યથાર્થં વદામિ, દરિદ્રેયં વિધવા સર્વ્વેભ્યોધિકં ન્યક્ષેપ્સીત્,
IV યતોન્યે સ્વપ્રાજ્યધનેભ્ય ઈશ્વરાય કિઞ્ચિત્ ન્યક્ષેપ્સુઃ, કિન્તુ દરિદ્રેયં વિધવા દિનયાપનાર્થં સ્વસ્ય યત્ કિઞ્ચિત્ સ્થિતં તત્ સર્વ્વં
ન્યક્ષેપ્સીત્।
V અપરઞ્ચ ઉત્તમપ્રસ્તરૈરુત્સૃષ્ટવ્યૈશ્ચ મન્દિરં સુશોભતેતરાં કૈશ્ચિદિત્યુક્તે સ પ્રત્યુવાચ
VI યૂયં યદિદં નિચયનં પશ્યથ, અસ્ય પાષાણૈકોપ્યન્યપાષાણોપરિ ન સ્થાસ્યતિ, સર્વ્વે ભૂસાદ્ભવિષ્યન્તિ કાલોયમાયાતિ।
VII તદા તે પપ્રચ્છુઃ, હે ગુરો ઘટનેદૃશી કદા ભવિષ્યતિ? ઘટનાયા એતસ્યસશ્ચિહ્નં વા કિં ભવિષ્યતિ?
VIII તદા સ જગાદ, સાવધાના ભવત યથા યુષ્માકં ભ્રમં કોપિ ન જનયતિ, ખીષ્ટોહમિત્યુક્ત્વા મમ નામ્ના બહવ ઉપસ્થાસ્યન્તિ
સ કાલઃ પ્રાયેણોપસ્થિતઃ, તેષાં પશ્ચાન્મા ગચ્છત।
IX યુદ્ધસ્યોપપ્લવસ્ય ચ વાર્ત્તાં શ્રુત્વા મા શઙ્કધ્વં, યતઃ પ્રથમમ્ એતા ઘટના અવશ્યં ભવિષ્યન્તિ કિન્તુ નાપાતે યુગાન્તો ભવિષ્યતિ।
X અપરઞ્ચ કથયામાસ, તદા દેશસ્ય વિપક્ષત્વેન દેશો રાજ્યસ્ય વિપક્ષત્વેન રાજ્યમ્ ઉત્થાસ્યતિ,
XI નાનાસ્થાનેષુ મહાભૂકમ્પો દુર્ભિક્ષં મારી ચ ભવિષ્યન્તિ, તથા વ્યોમમણ્ડલસ્ય ભયઙ્કરદર્શનાન્યશ્ચર્ય્યલક્ષણાનિ ચ
પ્રકાશયિષ્યન્તે।
XII કિન્તુ સર્વ્વાસામેતાસાં ઘટનાનાં પૂર્વ્વં લોકા યુષ્માન્ ધૃત્વા તાડયિષ્યન્તિ, ભજનાલયે કારાયાઞ્ચ સમર્પયિષ્યન્તિ મમ
નામકારણાદ્ યુષ્માન્ ભૂપાનાં શાસકાનાઞ્ચ સમ્મુખં નેષ્યન્તિ ચ।
XIII સાક્ષ્યાર્થમ્ એતાનિ યુષ્માન્ પ્રતિ ઘટિષ્યન્તે।
XIV તદા કિમુત્તરં વક્તવ્યમ્ એતત્ ન ચિન્તયિષ્યામ ઇતિ મનઃસુ નિશ્ચિતનુત।
XV વિપક્ષા યસ્માત્ કિમપ્યુત્તરમ્ આપત્તિઞ્ચ કર્ત્તું ન શક્ષ્યન્તિ તાદૃશં વાક્પટુત્વં જ્ઞાનઞ્ચ યુષ્મભ્યં દાસ્યામિ।
XVI કિઞ્ચ યૂયં પિત્રા માત્રા ભ્રાત્રા બન્ધુના જ્ઞાત્યા કુટુમ્બેન ચ પરકરેષુ સમર્પયિષ્યધ્વે; તતસ્તે યુષ્માકં કઞ્ચન કઞ્ચન ઘાતયિષ્યન્તિ।
XVII મમ નામ્નઃ કારણાત્ સર્વ્વૈ ર્મનુષ્યૈ ર્યૂયમ્ ઋતીયિષ્યધ્વે।
XVIII કિન્તુ યુષ્માકં શિરઃકેશૈકોપિ ન વિનંક્ષ્યતિ,
XIX તસ્માદેવ ધૈર્ય્યમવલમ્બ્ય સ્વસ્વપ્રાણાન્ રક્ષત।
XX અપરઞ્ચ યિરૂશાલમ્પુરં સૈન્યવેષ્ટિતં વિલોક્ય તસ્યોચ્છિન્નતાયાઃ સમયઃ સમીપ ઇત્યવગમિષ્યથ।
XXI તદા યિહૂદાદેશસ્થા લોકાઃ પર્વ્વતં પલાયન્તાં, યે ચ નગરે તિષ્ઠન્તિ તે દેશાન્તરં પલાયન્તા, યે ચ ગ્રામે તિષ્ઠન્તિ તે નગરં ન
પ્રવિશન્તુ,
XXII યતસ્તદા સમુચિતદણ્ડનાય ધર્મ્મપુસ્તકે યાનિ સર્વ્વાણિ લિખિતાનિ તાનિ સફલાનિ ભવિષ્યન્તિ।
XXIII કિન્તુ યા યાસ્તદા ગર્ભવત્યઃ સ્તન્યદાવ્યશ્ચ તામાં દુર્ગતિ ર્ભવિષ્યતિ, યત એતાલ્લોકાન્ પ્રતિ કોપો દેશે ચ વિષમદુર્ગતિ
ર્ઘટિષ્યતે।
XXIV વસ્તુતસ્તુ તે ખઙ્ગધારપરિવ્વઙ્ગં લપ્સ્યન્તે બદ્ધાઃ સન્તઃ સર્વ્વદેશેષુ નાયિષ્યન્તે ચ કિઞ્ચાન્યદેશીયાનાં સમયોપસ્થિતિપર્ય્યન્તં
યિરૂશાલમ્પુરં તૈઃ પદતલૈ ર્દલયિષ્યતે।
XXV સૂર્ય્યચન્દ્રનક્ષત્રેષુ લક્ષણાદિ ભવિષ્યન્તિ, ભુવિ સર્વ્વદેશીયાનાં દુઃખં ચિન્તા ચ સિન્ધૌ વીચીનાં તર્જનં ગર્જનઞ્ચ ભવિષ્યન્તિ।
XXVI ભૂભૌ ભાવિઘટનાં ચિન્તયિત્વા મનુજા ભિયામૃતકલ્પા ભવિષ્યન્તિ, યતો વ્યોમમણ્ડલે તેજસ્વિનો દોલાયમાના
ભવિષ્યન્તિ।
XXVII તદા પરાક્રમેણા મહાતેજસા ચ મેઘારૂઢં મનુષ્યપુત્રમ્ આયાન્તં દ્રક્ષ્યન્તિ।
XXVIII કિન્ત્વેતાસાં ઘટનાનામારમ્ભે સતિ યૂયં મસ્તકાન્યુત્તોલ્ય ઊર્દ્ધ્વં દ્રક્ષ્યથ, યતો યુષ્માકં મુક્તેઃ કાલઃ સવિધો ભવિષ્યતિ।
XXIX તતસ્તેનૈતદૃષ્ટાન્તકથા કથિતા, પશ્યત ઉડુમ્બરાદિવૃક્ષાણાં
XXX નવીનપત્રાણિ જાતાનીતિ દૃષ્ટ્વા નિદાવકાલ ઉપસ્થિત ઇતિ યથા યૂયં જ્ઞાતું શક્નુથ,
XXXI તથા સર્વ્વાસામાસાં ઘટનાનામ્ આરમ્ભે દૃષ્ટે સતીશ્વરસ્ય રાજત્વં નિકટમ્ ઇત્યપિ જ્ઞાસ્યથ।

XXXII યુષ્માનહં યથાર્થં વદામિ, વિદ્યમાનલોકાનામેષાં ગમનાત્ પૂર્વ્વમ્ એતાનિ ઘટિષ્યન્તે।
XXXIII નભોભુવોર્લોપો ભવિષ્યતિ મમ વાક્ તુ કદાપિ લુપ્તા ન ભવિષ્યતિ।
XXXIV અતએવ વિષમાશનેન પાનેન ચ સાંમારિકચિન્તાભિશ્ચ યુષ્માકં ચિત્તેષુ મત્તેષુ તદ્દિનમ્ અકસ્માદ્ યુષ્માન્ પ્રતિ યથા
નોપતિષ્ઠતિ તદર્થં સ્વેષુ સાવધાનાસ્તિષ્ઠત।
XXXV પૃથિવીસ્થસર્વ્વલોકાન્ પ્રતિ તદ્દિનમ્ ઉન્માથ ઇવ ઉપસ્થાસ્યતિ।
XXXVI યથા યૂયમ્ એતદ્ભાવિઘટના ઉત્તર્ત્તું મનુજસુતસ્ય સમ્મુખે સંસ્થાતુઞ્ચ યોગ્યા ભવથ કારણાદસ્માત્ સાવધાનાઃ સન્તો
નિરન્તરં પ્રાર્થયધ્વં।
XXXVII અપરઞ્ચ સ દિવા મન્દિર ઉપદિશ્ય રાચૈ જૈતુનાદ્રિં ગત્વાતિષ્ઠત્।
XXXVIII તતઃ પ્રત્યૂષે લાકાસ્તત્કથાં શ્રોતું મન્દિરે તદન્તિકમ્ આગચ્છન્।

# XXII

I અપરઞ્ચ કિણ્વશૂન્યપૂપોત્સવસ્ય કાલ ઉપસ્થિતે
II પ્રધાનયાજકા અધ્યાયકાશ્ચ યથા તં હન્તું શક્નુવન્તિ તથોપાયામ્ અચેષ્ટન્ત કિન્તુ લોકેભ્યો બિભ્યુઃ।
III એતસ્તિન્ સમયે દ્વાદશશિષ્યેષુ ગણિત ઈષ્કરિયોતીયરૂઢિમાન્ યો યિહૂદાસ્તસ્યાન્તઃકરણં શૈતાનાશ્રિતત્વાત્
IV સ ગત્વા યથા યીશું તેષાં કરેષુ સમર્પયિતું શક્નોતિ તથા મન્ત્રણાં પ્રધાનયાજકૈઃ સેનાપતિભિશ્ચ સહ ચકાર।
V તેન તે તુષ્ટાસ્તસ્મૈ મુદ્રાં દાતું પણં ચક્રુઃ।
VI તતઃ સોઙ્ગીકૃત્ય યથા લોકાનામગોચરે તં પરકરેષુ સમર્પયિતું શક્નોતિ તથાવકાશં ચેષ્ટિતુમારેભે।
VII અથ કિણ્વશૂન્યપૂપોત્મવદિને, અર્થાત્ યસ્મિન્ દિને નિસ્તારોત્સવસ્ય મેષો હન્તવ્યસ્તસ્મિન્ દિને
VIII યીશુઃ પિતરં યોહનઞ્ચાહૂય જગાદ, યુવાં ગત્વાસ્માકં ભોજનાર્થં નિસ્તારોત્સવસ્ય દ્રવ્યાણ્યાસાદયતં।
IX તદા તૌ પપ્રચ્છતુઃ કુચાસાદયાવો ભવતઃ કેચ્છા?
X તદા સોવાદીત્, નગરે પ્રવિષ્ટે કશ્ચિજ્જલકુમ્ભમાદાય યુવાં સાક્ષાત્ કરિષ્યતિ સ યન્નિવેશનં પ્રવિશતિ યુવામપિ તન્નિવેશનં
તત્પશ્ચાદિત્વા નિવેશનપતિમ્ ઇતિ વાક્યં વદતં,
XI યત્રાહં નિસ્તારોત્સવસ્ય ભોજ્યં શિષ્યૈઃ સાર્દ્ધં ભોક્તું શક્નોમિ સાતિથિશાલા કુત્ર? કથામિમાં પ્રભુસ્ત્વાં પૃચ્છતિ।
XII તતઃ સ જનો દ્વિતીયપ્રકોષ્ઠીયમ્ એકં શસ્તં કોષ્ઠં દર્શયિષ્યતિ તત્ર ભોજ્યમાસાદયતં।
XIII તતસ્તૌ ગત્વા તદ્વાક્યાનુસારેણ સર્વ્વં દૃષ્દ્વા તત્ર નિસ્તારોત્સવીયં ભોજ્યમાસાદયામાસતુઃ।
XIV અથ કાલ ઉપસ્થિતે યીશુ ર્દ્વાદશભિઃ પ્રેરિતૈઃ સહ ભોક્તુમુપવિશ્ય કથિતવાન્
XV મમ દુઃખભોગાત્ પૂર્વ્વં યુભાભિઃ સહ નિસ્તારોત્સવસ્યૈતસ્ય ભોજ્યં ભોક્તું મયાતિવાઞ્છા કૃતા।
XVI યુષ્માન્ વદામિ, યાવત્કાલમ્ ઈશ્વરરાજ્યે ભોજનં ન કરિષ્યે તાવત્કાલમ્ ઇદં ન ભોક્ષ્યે।
XVII તદા સ પાનપાત્રમાદાય ઈશ્વરસ્ય ગુણાન્ કીર્ત્તયિત્વા તેભ્યો દત્વાવદત્, ઇદં ગૃહ્લીત યૂયં વિભજ્ય પિવત।
XVIII યુષ્માન્ વદામિ યાવત્કાલમ્ ઈશ્વરરાજત્વસ્ય સંસ્થાપનં ન ભવતિ તાવદ્ દ્રાક્ષાફલરસં ન પાસ્યામિ।
XIX તતઃ પૂપં ગૃહીત્વા ઈશ્વરગુણાન્ કીર્ત્તયિત્વા ભઙ્ક્તા તેભ્યો દત્વાવદત્, યુષ્મદર્થં સમર્પિતં યન્મમ વપુસ્તદિદં, એતત્ કર્મ્મ
મમ સ્મરણાર્થં કુરુધ્વં।
XX અથ ભોજનાન્તે તાદૃશં પાત્રં ગૃહીત્વાવદત્, યુષ્મત્કૃતે પાતિતં યન્મમ રક્તં તેન નિર્ણીતનવનિયમરૂપં પાનપાત્રમિદં।
XXI પશ્યત યો માં પરકરેષુ સમર્પયિષ્યતિ સ મયા સહ ભોજનાસન ઉપવિશતિ।
XXII યથા નિરૂપિતમાસ્તે તદનુસારેણા મનુષ્યપુત્રસ્ય ગતિ ર્ભવિષ્યતિ કિન્તુ યસ્તં પરકરેષુ સમર્પયિષ્યતિ તસ્ય સન્તાપો
ભવિષ્યતિ।
XXIII તદા તેષાં કો જન એતત્ કર્મ્મ કરિષ્યતિ તત્ તે પરસ્પરં પ્રષ્ટુમારેભિરે।
XXIV અપરં તેષાં કો જનઃ શ્રેષ્ઠત્વેન ગણયિષ્યતે, અત્રાર્થે તેષાં વિવાદોભવત્।
XXV અસ્માત્ કારણાત્ સોવદત્, અન્યદેશીયાનાં રાજાનઃ પ્રજાનામુપરિ પ્રભુત્વં કુર્વ્વન્તિ દારુણશાસનં કૃત્વાપિ તે ભૂપતિત્વેન
વિખ્યાતા ભવન્તિ ચ।
XXVI કિન્તુ યુષ્માકં તથા ન ભવિષ્યતિ, યો યુષ્માકં શ્રેષ્ઠો ભવિષ્યતિ સ કનિષ્ઠવદ્ ભવતુ, યશ્ચ મુખ્યો ભવિષ્યતિ સ સેવકવદ્ભવતુ।
XXVII ભોજનોપવિષ્ટપરિચારકયોઃ કઃ શ્રેષ્ઠઃ? યો ભોજનાયોપવિશતિ સ કિં શ્રેષ્ઠો ન ભવતિ? કિન્તુ યુષ્માકં મધ્યેઽહં
પરિચારકઇવાસ્મિ।
XXVIII અપરઞ્ચ યુયં મમ પરીક્ષાકાલે પ્રથમમારભ્ય મયા સહ સ્થિતા
XXIX એતત્કારણાત્ પિત્રા યથા મદર્થં રાજ્યમેકં નિરૂપિતં તથાહમપિ યુષ્મદર્થં રાજ્યં નિરૂપયામિ।
XXX તસ્માન્ મમ રાજ્યે ભોજનાસને ચ ભોજનપાને કરિષ્યધ્વે સિંહાસનેષૂપવિશ્ય ચેસ્રાયેલીયાનાં દ્વાદશવંશાનાં વિચારં
કરિષ્યધ્વે।
XXXI અપરં પ્રભુરુવાચ, હે શિમોન્ પશ્ય તિતઉના ધાન્યાનીવ યુષ્માન્ શૈતાન્ ચાલયિતુમ્ ઐચ્છત્,
XXXII કિન્તુ તવ વિશ્વાસસ્ય લોપો યથા ન ભવતિ એતત્ ત્વદર્થં પ્રાર્થિતં મયા, ત્વન્મનસિ પરિવર્ત્તિતે ચ ભ્રાતૃણાં મનાંસિ
સ્થિરીકુરુ।
XXXIII તદા સોવદત્, હે પ્રભોહં ત્વયા સાર્દ્ધં કારાં મૃતિઞ્ચ યાતું મજ્જિતોસ્મિ।
XXXIV તતઃ સ ઉવાચ, હે પિતર ત્વાં વદામિ, અદ્ય કુક્કુટરવાત્ પૂર્વ્વં ત્વં મત્પરિચયં વારત્રયમ્ અપહ્નોષ્યસે।
XXXV અપરં સ પપ્રચ્છ, યદા મુદ્રાસમ્પુટં ખાદ્યપાત્રં પાદુકાઞ્ચ વિના યુષ્માન્ પ્રાહિણવં તદા યુષ્માકં કસ્યાપિ ન્યૂનતાસીત્? તે
પ્રોચુઃ કસ્યાપિ ન।

XXXVI તદા સોવદત્ કિન્તિવદાનીં મુદ્રાસમ્પુટં ખાદ્યપાત્રં વા યસ્યાસ્તિ તેન તદ્ગ્રહીતવ્યં, યસ્ય ચ કૃપાણો઼ નાસ્તિ તેન સ્વવસ્ત્રં
વિક્રીય સ ક્રેતવ્યઃ।
XXXVII યતો યુષ્માનહં વદામિ, અપરાધિજનૈઃ સાર્દ્ધં ગણિતઃ સ ભવિષ્યતિ। ઇદં યચ્છાસ્ત્રીયં વચનં લિખિતમસ્તિ તન્મયિ
ફલિષ્યતિ યતો મમ સમ્બન્ધીયં સર્વ્વં સેત્સ્યતિ।
XXXVIII તદા તે પ્રોચુઃ પ્રભો પશ્ય ઇમૌ કૃપાણૌ। તતઃ સોવદદ્ એતૌ યથેષ્ટૌ।
XXXIX અથ સ તસ્માદ્બહિ ર્ગત્વા સ્વાચારાનુસારેણ જૈતુનનામાદ્રિં જગામ શિષ્યાશ્ચ તત્પશ્ચાદ્ યયુઃ।
XL તત્રોપસ્થાય સ તાનુવાચ, યથા પરીક્ષાયાં ન પતથ તદર્થં પ્રાર્થયધ્વં।
XLI પશ્ચાત્ સ તસ્માદ્ એકશરક્ષેપાદ્ બહિ ર્ગત્વા જાનુની પાતયિત્વા એતત્ પ્રાર્થયાઞ્ચક્રે,
XLII હે પિત ર્યદિ ભવાન્ સમ્મન્યતે તર્હિ કંસમેનં મમાન્તિકાદ્ દૂરય કિન્તુ મદિચ્છાનુરૂપં ન ત્વદિચ્છાનુરૂપં ભવતુ।
XLIII તદા તસ્મૈ શક્તિં દાતું સ્વર્ગીયદૂતો દર્શનં દદૌ।
XLIV પશ્ચાત્ સોત્યન્તં યાતનયા વ્યાકુલો ભૂત્વા પુનર્દૃઢં પ્રાર્થયાઞ્ચક્રે, તસ્માદ્ બૃહચ્છોણિતબિન્દવ ઇવ તસ્ય સ્વેદબિન્દવઃ
પૃથિવ્યાં પતિતુમારેભિરે।
XLV અથ પ્રાર્થનાત ઉત્થાય શિષ્યાણાં સમીપમેત્ય તાન્ મનોદુઃખિનો નિદ્રિતાન્ દૃષ્ટ્વાવદત્
XLVI કુતો નિદ્રાથ? પરીક્ષાયામ્ અપતનાર્થં પ્રર્થયધ્વં।
XLVII એતત્કથાયાઃ કથનકાલે દ્વાદશશિષ્યાણાં મધ્યે ગણિતો યિહૂદાનામા જનતાસહિતસ્તેષામ્ અગ્રે ચલિત્વા યીશોશ્ચુમ્બનાર્થં
તદન્તિકમ્ આયયૌ।
XLVIII તદા યીશુરુવાચ, હે યિહૂદા કિં ચુમ્બનેન મનુષ્યપુત્રં પરકરેષુ સમર્પયસિ?
XLIX તદા યદ્યદ્ ઘટિષ્યતે તદનુમાય સઙ્ગિભિરુક્તં, હે પ્રભો વયં કિ ખઙ્ગેન ઘાતયિષ્યામઃ?
L તત એકઃ કરવાલેનાહત્ય પ્રધાનયાજકસ્ય દાસસ્ય દક્ષિણં કર્ણં ચિચ્છેદ।
LI અધૂના નિવર્ત્તસ્વ ઇત્યુક્ત્વા યીશુસ્તસ્ય શ્રુતિં સ્પૃષ્ટ્વા સ્વસ્થં ચકાર।
LII પશ્ચાદ્ યીશુઃ સમીપસ્થાન્ પ્રધાનયાજકાન્ મન્દિરસ્ય સેનાપતીન્ પ્રાચીનાંશ્ચ જગાદ, યૂયં કૃપાણાન્ યષ્ટીંશ્ચ ગૃહીત્વા માં કિં
ચોરં ધર્ત્તુમાયાતાઃ?
LIII યદાહં યુષ્માભિઃ સહ પ્રતિદિનં મન્દિરેઽતિષ્ઠં તદા માં ધર્ત્તં ન પ્રવૃત્તાઃ, કિન્ત્વિદાનીં યુષ્માકં સમયોન્ધકારસ્ય ચાધિપત્યમસ્તિ।
LIV અથ તે તં ધૃત્વા મહાયાજકસ્ય નિવેશનં નિન્યુઃ। તતઃ પિતરો દૂરે દૂરે પશ્ચાદિત્વા
LV બૃહત્કોષ્ઠસ્ય મધ્યે યત્રાગ્નિં જ્વાલયિત્વા લોકાઃ સમેત્યોપવિષ્ટાસ્તત્ર તૈઃ સાર્દ્ધમ્ ઉપવિવેશ।
LVI અથ વહ્નિસન્નિધૌ સમુપવેશકાલે કાચિદ્દાસી મનો નિવિશ્ય તં નિરીક્ષ્યાવદત્ પુમાનયં તસ્ય સઙ્ગેઽસ્થાત્।
LVII કિન્તુ સ તદ્ અપહ્નુત્યાવાદીત્ હે નારિ તમહં ન પરિચિનોમિ।
LVIII ક્ષણાન્તરેઽન્યજનસ્તં દૃષ્ટ્વાબ્રવીત્ ત્વમપિ તેષાં નિકરસ્યૈકજનોસિ। પિતરઃ પ્રત્યુવાચ હે નર નાહમસ્મિ।
LIX તતઃ સાર્દ્ધદણ્ડદ્વયાત્ પરં પુનરન્યો જનો નિશ્ચિત્ય બભાષે, એષ તસ્ય સઙ્ગીતિ સત્યં યતોયં ગાલીલીયો લોકઃ।
LX તદા પિતર ઉવાચ હે નર ત્વં યદ્ વદમિ તદહં બોદ્ધું ન શક્નોમિ, ઇતિ વાક્યે કથિતમાત્રે કુક્કુટો રુરાવ।
LXI તદા પ્રભુણા વ્યાઘુટ્ય પિતરે નિરીક્ષિતે કૃકવાકુરવાત્ પૂર્વ્વં માં ત્રિરપહ્નોષ્યસે ઇતિ પૂર્વોક્તં તસ્ય વાક્યં પિતરઃ સ્મૃત્વા
LXII બહિર્ગત્વા મહાખેદેન ચક્રન્દ।
LXIII તદા યૈ ર્યીશુર્ધૃતસ્તે તમુપહસ્ય પ્રહર્ત્તુમારેભિરે।
LXIV વસ્ત્રેણ તસ્ય દૃશૌ બદ્ધ્વા કપોલે ચપેટાઘાતં કૃત્વા પપ્રચ્છુઃ, કસ્તે કપોલે ચપેટાઘાતં કૃતવાન્? ગણયિત્વા તદ્ વદ।
LXV તદન્યત્ તદ્વિરુદ્ધં બહુનિન્દાવાક્યં વક્તુમારેભિરે।
LXVI અથ પ્રભાતે સતિ લોકપ્રાઞ્ચઃ પ્રધાનયાજકા અધ્યાપકાશ્ચ સભાં કૃત્વા મધ્યેસભં યીશુમાનીય પપ્રચ્છુઃ, ત્વમ્ અભિષિક્તોસિ
ન વાસ્માન્ વદ।
LXVII સ પ્રત્યુવાચ, મયા તસ્મિન્નુક્તેઽપિ યૂયં ન વિશ્વસિષ્યથ।
LXVIII કસ્મિંશ્ચિદ્વાક્યે યુષ્માન્ પૃષ્ટેઽપિ માં ન તદુત્તરં વક્ષ્યથ ન માં ત્યક્ષ્યથ ચ।
LXIX કિન્ત્વિતઃ પરં મનુજસુતઃ સર્વ્વશક્તિમત ઈશ્વરસ્ય દક્ષિણે પાર્શ્વે સમુપવેક્ષ્યતિ।
LXX તતસ્તે પપ્રચ્છુઃ, ર્તિહ ત્વમીશ્વરસ્ય પુત્રઃ? સ કથયામાસ, યૂયં યથાર્થં વદથ સ એવાહં।
LXXI તદા તે સર્વ્વે કથયામાસુઃ, ર્તિહ સાક્ષ્યેઽન્સસ્મિન્ અસ્માકં કિં પ્રયોજનં? અસ્ય સ્વમુખાદેવ સાક્ષ્યં પ્રાપ્તમ્।

# XXIII

I તતઃ સભાસ્થાઃ સર્વ્વલોકા ઉત્થાય તં પીલાતસમ્મુખં નીત્વાપ્રોદ્ય વક્તુમારેભિરે,
II સ્વમભિષિક્તં રાજાનં વદન્તં કૈમરરાજાય કરદાનં નિષેધન્તં રાજ્યવિપર્ય્યયં કુર્ત્તું પ્રવર્ત્તમાનમ્ એન પ્રાપ્તા વયં।
III તદા પીલાતસ્તં પૃષ્ટવાન્ ત્વં કિં યિહૂદીયાનાં રાજા? સ પ્રત્યુવાચ ત્વં સત્યમુક્તવાન્।
IV તદા પીલાતઃ પ્રધાનયાજકાદિલોકાન્ જગાદ, અહમેતસ્ય કમપ્યપરાધં નાપ્તવાન્।
V તતસ્તે પુનઃ સાહમિનો ભૂત્વાવદન્, એષ ગાલીલ એતત્સ્થાનપર્ય્યન્તે સર્વ્વસ્મિન્ યિહૂદાદેશે સર્વ્વાલ્લોકાનુપદિશ્ય કુપ્રવૃત્તિં
ગ્રાહીતવાન્।
VI તદા પીલાતો ગાલીલપ્રદેશસ્ય નામ શ્રુત્વા પપ્રચ્છ, કિમયં ગાલીલીયો લોકઃ?
VII તતઃ સ ગાલીલ્પ્રદેશીયહેરોદ્રાજસ્ય તદા સ્થિતેસ્તસ્ય સમીપે યીશું પ્રેષયામાસ।
VIII તદા હેરોદ્ યીશું વિલોક્ય સન્તુતોષ, યતઃ સ તસ્ય બહુવૃત્તાન્તશ્રવણાત્ તસ્ય કિઞ્ચિદાશ્ચર્ય્યકર્મ્મ પશ્યતિ ઇત્યાશાં કૃત્વા
બહુકાલમારભ્ય તં દ્રષ્ટું પ્રયાસં કૃતવાન્।
IX તસ્માત્ તં બહુકથાઃ પપ્રચ્છ કિન્તુ સ તસ્ય કસ્યાપિ વાક્યસ્ય પ્રત્યુત્તરં નોવાચ।

X અથ પ્રધાનયાજકા અધ્યાપકાશ્ચ પ્રોત્તિષ્ઠન્તઃ સાહસેન તમપવદિતું પ્રારેભિરે।
XI હેરોદ્ તસ્ય સેનાગણશ્ચ તમવજ્ઞાય ઉપહાસત્વેન રાજવસ્ત્રં પરિધાપ્ય પુનઃ પીલાતં પ્રતિ તં પ્રાહિણોત્।
XII પૂર્વ્વં હેરોદ્પીલાતયોઃ પરસ્પરં વૈરભાવ આસીત્ કિન્તુ તદ્દિને દ્વયો ર્મેલનં જાતમ્।
XIII પશ્ચાત્ પીલાતઃ પ્રધાનયાજકાન્ શાસકાન્ લોકાંશ્ચ યુગપદાહૂય બભાષે,
XIV રાજ્યવિપર્ય્યયકારકોયમ્ ઇત્યુક્ત્વા મનુષ્યમેનં મમ નિકટમાનૈષ્ટ કિન્તુ પશ્યત યુષ્માકં સમક્ષમ્ અસ્ય વિચારં કૃત્વાપિ પ્રોક્તાપવાદાનુરૂપેણાસ્ય કોપ્યપરાધઃ સપ્રમાણો ન જાતઃ,
XV યૂયઞ્ચ હેરોદઃ સન્નિધૌ પ્રેષિતા મયા તત્રાસ્ય કોપ્યપરાધસ્તેનાપિ ન પ્રાપ્તઃ। પશ્યતાનેન વધહેેતુકં કિમપિ નાપરાદ્ધં।
XVI તસ્માદેનં તાડયિત્વા વિહાસ્યામિ।
XVII તત્રોત્સવે તેષામેકો મોચયિતવ્યઃ।
XVIII ઇતિ હેતોસ્તે પ્રોચ્ચૈરેકદા પ્રોચુઃ, એનં દૂરીકૃત્ય બરબ્બાનામાનં મોચય।
XIX સ બરબ્બા નગર ઉપપ્લવવધાપરાધાભ્યાં કારાયાં બદ્ધ આસીત્।
XX કિન્તુ પીલાતો યીશું મોચયિતું વાઞ્છન્ પુનસ્તાનુવાચ।
XXI તથાપ્યેનં ક્રુશે વ્યધ ક્રુશે વ્યધેતિ વદન્તસ્તે રુરુવુઃ।
XXII તતઃ સ તૃતીયવારં જગાદ કુતઃ? સ કિં કર્મ્મ કૃતવાન્? નાહમસ્ય કમપિ વધાપરાધં પ્રાપ્તઃ કેવલં તાડયિત્વામું ત્યજામિ।
XXIII તથાપિ તે પુનરેનં ક્રુશે વ્યધ ઇત્યુક્ત્વા પ્રોચ્ચૈર્દૃઢં પ્રાર્થયાઞ્ચક્રિરે;
XXIV તતઃ પ્રધાનયાજકાદીનાં કલરવે પ્રબલે સતિ તેષાં પ્રાર્થનારૂપં કર્ત્તું પીલાત આદિદેશ।
XXV રાજદ્રોહવધયોરપરાધેન કારાસ્થં યં જનં તે યયાચિરે તં મોચયિત્વા યીશું તેષામિચ્છાયાં સમાર્પયત્।
XXVI અથ તે યીશું ગૃહીત્વા યાન્તિ, એતર્હિ ગ્રામાદાગતં શિમોનનામાનં કુરીણીયં જનં ધૃત્વા યીશોઃ પશ્ચાન્નેતું તસ્ય સ્કન્ધે ક્રુશમર્પયામાસુઃ।
XXVII તતો લોાકારણ્યમધ્યે બહુસ્ત્રિયો રુદત્યો વિલપન્ત્યશ્ચ યીશોઃ પશ્ચાદ્ યયુઃ।
XXVIII કિન્તુ સ વ્યાઘુટ્ય તા ઉવાચ, હે યિરૂશાલમો નાર્ય્યો યુયં મદર્થં ન રુદિત્વા સ્વાર્થં સ્વાપત્યાર્થઞ્ચ રુદિતિ;
XXIX પશ્યત યઃ કદાપિ ગર્ભવત્યો નાભવન્ સ્તન્યઞ્ચ નાપાયયન્ તાદૃશી ર્વન્ધ્યા યદા ધન્યા વક્ષ્યન્તિ સ કાલ આયાતિ।
XXX તદા હે શૈલા અસ્માકમુપરિ પતત, હે ઉપશૈલા અસ્માનાચ્છાદયત કથામીદૃશીં લોકા વક્ષ્યન્તિ।
XXXI યતઃ સતેજસિ શાખિનિ ચેદેતદ્ ઘટતે તર્હિ શુષ્કશાખિનિ કિં ન ઘટિષ્યતે?
XXXII તદા તે હન્તું દ્વાવપરાધિનૌ તેન સાર્દ્ધં નિન્યુઃ।
XXXIII અપરં શિરઃકપાલનામકસ્થાનં પ્રાપ્ય તં ક્રુશે વિવિધુઃ; તદ્વયોરપરાધિનોરેકં તસ્ય દક્ષિણો તદન્યં વામે ક્રુશે વિવિધુઃ।
XXXIV તદા યીશુરકથયત્, હે પિતરેતાન્ ક્ષમસ્વ યત એતે યત્ કર્મ્મ કુર્વ્વન્તિ તન્ ન વિદુઃ; પશ્ચાત્તે ગુટિકાપાતં કૃત્વા તસ્ય વસ્ત્રાણિ વિભજ્ય જગૃહુઃ।
XXXV તત્ર લોકસંઘસ્તિષ્ઠન્ દદર્શ; તે તેષાં શાસકાશ્ચ તમુપહસ્ય જગદુઃ, એષ ઇતરાન્ રક્ષિતવાન્ યદીશ્વરેણાભિરુચિતો ઽભિષિક્તસ્ત્રાતા ભવતિ તર્હિ સ્વમધુના રક્ષતુ।
XXXVI તદન્યઃ સેનાગણા એત્ય તસ્મૈ અમ્લરસં દત્વા પરિહસ્ય પ્રોવાચ,
XXXVII ચેત્ત્વં યિહૂદીયાનાં રાજાસિ તર્હિ સ્વં રક્ષ।
XXXVIII યિહૂદીયાનાં રાજેતિ વાક્યં યૂનાનીયરોમીયેબ્રીયાક્ષરૈ ર્લિખિતં તચ્છિરસ ઊર્દ્ધ્વેઽસ્થાપ્યત।
XXXIX તદોભયપાર્શ્વયો ર્વિદ્ધૌ યાવપરાધિનૌ તયોરેકસ્તં વિનિન્દ્ય બભાષે, ચેત્ત્વમ્ અભિષિક્તોસિ તર્હિ સ્વમાવાઞ્ચ રક્ષ।
XL કિન્ત્વન્યસ્તં તર્જયિત્વાવદત્, ઈશ્વરાત્તવ કિઞ્ચિદપિ ભયં નાસ્તિ કિં? ત્વમપિ સમાનદણ્ડોસિ,
XLI યોગ્યપાત્રે આવાં સ્વસ્વકર્મ્મણાં સમુચિતફલં પ્રાપ્નુવઃ કિન્ત્વનેન કિમપિ નાપરાદ્ધં।
XLII અથ સ યીશું જગાદ હે પ્રભે ભવાન્ સ્વરાજ્યપ્રવેશકાલે માં સ્મરતુ।
XLIII તદા યીશુઃ કથિતવાન્ ત્વાં યથાર્થં વદામિ ત્વમદ્યૈવ મયા સાર્દ્ધં પરલોકસ્ય સુખસ્થાનં પ્રાપ્સ્યસિ।
XLIV અપરઞ્ચ દ્વિતીયયામાત્ તૃતીયયામપર્ય્યન્તં રવેસ્તેજસોન્તર્હિતત્વાત્ સર્વ્વદેશોઽન્ધકારેણાવૃતો
XLV મન્દિરસ્ય યવનિકા ચ છિદ્યમાના દ્વિધા બભૂવ।
XLVI તતો યીશુરુચ્ચૈરુવાચ, હે પિત ર્મમાત્માનં તવ કરે સમર્પયે, ઇત્યુક્ત્વા સ પ્રાણાન્ જહૌ।
XLVII તદૈતા ઘટના દૃષ્ટ્વા શતસેનાપતિરીશ્વરં ધન્યમુક્ત્વા કથિતવાન્ અયં નિતાન્તં સાધુમનુષ્ય આસીત્।
XLVIII અથ યાવન્તો લોકા દ્રષ્ટુમ્ આગતાસ્તે તા ઘટના દૃષ્ટ્વા વક્ષઃસુ કરાઘાતં કૃત્વા વ્યાઘુટ્ય ગતાઃ।
XLIX યીશો ર્જ્ઞાતયો યા યા યોષિતશ્ચ ગાલીલસ્તેન સાર્દ્ધમાયાતાસ્તા અપિ દૂરે સ્થિત્વા તત્ સર્વ્વં દદૃશુઃ।
L તદા યિહૂદીયાનાં મન્ત્રણાં ક્રિયાઞ્ચાસમ્મન્યમાન ઈશ્વરસ્ય રાજત્વમ્ અપેક્ષમાણો
LI યિહૂદિદેશીયો ઽરિમથીયનગરીયો યૂષફ્નામા મન્ત્રી ભદ્રો ધાર્મ્મિકશ્ચ પુમાન્
LII પીલાતાન્તિકં ગત્વા યીશો ર્દેહં યયાચે।
LIII પશ્ચાદ્ વપુરવરોહ્ય વાસસા સંવેષ્ટ્ય યત્ર કોપિ માનુષો નાસ્થાપ્યત તસ્મિન્ શૈલે સ્વાતે શ્મશાને તદસ્થાપયત્।
LIV તદ્દિનમાયોજનીયં દિનં વિશ્રામવારશ્ચ સમીપઃ।
LV અપરં યીશુના સાર્દ્ધં ગાલીલ આગતા યોષિતઃ પશ્ચાદિત્વા શ્મશાને તત્ર યથા વપુઃ સ્થાપિતં તચ્ચ દૃષ્ટ્વા
LVI વ્યાઘુટ્ય સુગન્ધિદ્રવ્યતૈલાનિ કૃત્વા વિધિવદ્ વિશ્રામવારે વિશ્રામં ચક્રુઃ।

# XXIV

I અથ સપ્તાહપ્રથમદિનેઽતિપ્રત્યૂષે તા યોષિતઃ સમ્પાદિતં સુગન્ધિદ્રવ્યં ગૃહીત્વા તદન્યાભિઃ કિયતીભિઃ સ્ત્રીભિઃ સહ શ્મશાનં યયુઃ।

II કિન્તુ શ્મશાનદ્વારાત્ પાષાણમપસારિતં દૃષ્ટ્વા
III તાઃ પ્રવિશ્ય પ્રભો ર્દેહમપ્રાપ્ય
IV વ્યાકુલા ભવન્તિ એતર્હિ તેજોમયવસ્ત્રાન્વિતૌ દ્વૌ પુરુષૌ તાસાં સમીપે સમુપસ્થિતૌ
V તસ્માત્તાઃ શઙ્કાયુક્તા ભૂમાવધોમુખ્યસ્યસ્થુઃ। તદા તૌ તા ઊચતુ ર્મૃતાનાં મધ્યે જીવન્તં કુતો મૃગયથ?
VI સોત્ર નાસ્તિ સ ઉદસ્થાત્
VII પાપિનાં કરેષુ સમર્પિતેન ક્રુશે હતેન ચ મનુષ્યપુત્રેણ તૃતીયદિવસે શ્મશાનાદુત્થાતવ્યમ્ ઇતિ કથાં સ ગલીલિ તિષ્ઠન્ યુષ્મભ્યં
કથિતવાન્ તાં સ્મરત।
VIII તદા તસ્ય સા કથા તાસાં મનઃસુ જાતા।
IX અનન્તરં શ્મશાનાદ્ ગત્વા તા એકાદશશિષ્યાદિભ્યઃ સર્વ્વેભ્યસ્તાં વાર્ત્તાં કથયામાસુઃ।
X મગ્દલીનીમરિયમ્, યોહના, યાકૂબો માતા મરિયમ્ તદન્યાઃ સઙ્ગિન્યો યોષિતશ્ચ પ્રેરિતેભ્ય એતાઃ સર્વ્વા વાર્ત્તાઃ કથયામાસુઃ
XI કિન્તુ તાસાં કથામ્ અનર્થકાખ્યાનમાત્રં બુદ્ધ્વા કોપિ ન પ્રત્યૈત્
XII તદા પિતર ઉત્થાય શ્મશાનાન્તિકં દધાવ, તત્ર ચ પ્રહ્વો ભૂત્વા પાર્શ્વૈકસ્થાપિતં કેવલં વસ્ત્રં દદર્શ; તસ્માદાશ્ચર્ય્યં મન્યમાનો
યદઘટત તન્મનસિ વિચારયન્ પ્રતસ્થે।
XIII તસ્મિન્નેવ દિને દ્વૌ શિય્યૌ યિરૂશાલમશ્ચતુષ્ક્રોશાન્તરિતમ્ ઇમ્માયુગ્રામં ગચ્છન્તૌ
XIV તાસાં ઘટનાનાં કથામકથયતાં
XV તયોરાલાપવિચારયોઃ કાલે યીશુરાગત્ય તાભ્યાં સહ જગામ
XVI કિન્તુ યથા તૌ તં ન પરિચિનુતસ્તદર્થં તયો ર્દૃષ્ટિઃ સંરુદ્ધા।
XVII સ તૌ પૃષ્ટવાન્ યુવાં વિષણ્ણૌ કિં વિચારયન્તૌ ગચ્છથઃ?
XVIII તતસ્તયોઃ ક્લિયપાનામા પ્રત્યુવાચ યિરૂશાલમપુરેઽધુના યાન્યઘટન્ત ત્વં કેવલવિદેશી કિં તદ્વૃત્તાન્તં ન જાનાસિ?
XIX સ પપ્રચ્છ કા ઘટનાઃ? તદા તૌ વક્તુમારેભાતે યીશુનામા યો નાસરતીયો ભવિષ્યદ્વાદી ઈશ્વરસ્ય માનુષાણાઞ્ચ સાક્ષાત્ વાક્યે
કર્મ્મણિ ચ શક્તિમાનાસીત્
XX તમ્ અસ્માકં પ્રધાનયાજકા વિચારકાશ્ચ કેનાપિ પ્રકારેણ ક્રુશે વિદ્ધ્વા તસ્ય પ્રાણાનનાશયન્ તદીયા ઘટનાઃ;
XXI કિન્તુ ય ઇસ્રાયેલીયલોકાન્ ઉદ્ધારયિષ્યતિ સ એવાયમ્ ઇત્યાશાસ્માભિઃ કૃતા। તદ્યથા તથાસ્તુ તસ્યા ઘટનાયા અદ્ય દિનત્રયં
ગતં।
XXII અધિકન્ત્વસ્માકં સઙ્ગિનીનાં કિયત્સ્ત્રીણાં મુખેભ્યોઽસમ્ભવવાક્યમિદં શ્રુતં;
XXIII તાઃ પ્રત્યૂષે શ્મશાનં ગત્વા તત્ર તસ્ય દેહમ્ અપ્રાપ્ય વ્યાઘુટ્યેત્વા પ્રોક્તવત્યઃ સ્વર્ગીસદૂતૌ દૃષ્ટાવસ્માભિસ્તૌ ચાવાદિષ્ટાં સ
જીવિતવાન્
XXIV તતોસ્માકં કૈશ્ચિત્ શ્મશાનમગમ્યત તેઽપિ સ્ત્રીણાં વાક્યાનુરૂપં દૃષ્ટવન્તઃ કિન્તુ તં નાપશ્યન્
XXV તદા સ તાવુવાચ, હે અબોધૌ હે ભવિષ્યદ્વાદિભિરુક્તવાક્યં પ્રત્યેતું વિલમ્બમાનૌ;
XXVI એતત્સર્વ્વદુઃખં ભુક્ત્વા સ્વભૂતિપ્રાપ્તિઃ કિં ખ્રીષ્ટસ્ય ન ન્યાય્યા?
XXVII તતઃ સ મૂસાગ્રન્થમારભ્ય સર્વ્વભવિષ્યદ્વાદિનાં સર્વ્વશાસ્ત્રે સ્વસ્મિન્ લિખિતાખ્યાનાભિપ્રાયં બોધયામાસ।
XXVIII અથ ગમ્યગ્રામાભ્યર્ણં પ્રાપ્ય તેનાગ્રે ગમનલક્ષણે દર્શિતે
XXIX તૌ સાધયિત્વાવદતાં સહાવાભ્યાં તિષ્ઠ દિને ગતે સતિ રાત્રિરભૂત્; તતઃ સ તાભ્યાં સાર્દ્ધં સ્થાતું ગૃહં યયૌ।
XXX પશ્ચાદ્ભોજનોપવેશકાલે સ પૂપં ગૃહીત્વા ઈશ્વરગુણાન્ જગાદ તઞ્ચ ભંક્ત્વા તાભ્યાં દદૌ।
XXXI તદા તયો ર્દૃષ્ટૌ પ્રસન્નાયાં તં પ્રત્યભિજ્ઞતુઃ કિન્તુ સ તયોઃ સાક્ષાદન્તર્દધે।
XXXII તતસ્તૌ મિથોભિધાતુમ્ આરબ્ધવન્તૌ ગમનકાલે યદા કથામકથયત્ શાસ્ત્રાર્થઞ્ચબોધયત્ તદાવયો ર્બુદ્ધિઃ કિં ન પ્રાજ્વલત્?
XXXIII તૌ તત્ક્ષણાદુત્થાય યિરૂશાલમપુરં પ્રત્યાયયતુઃ, તત્સ્થાને શિષ્યાણામ્ એકાદશાનાં સઙ્ગિનાઞ્ચ દર્શનં જાતં।
XXXIV તે પ્રોચુઃ પ્રભુરુદતિષ્ઠદ્ ઇતિ સત્યં શિમોને દર્શનમદાચ્ચ।
XXXV તતઃ પથઃ સર્વ્વઘટનાયાઃ પૂપભઞ્જનેન તત્પરિચયસ્ય ચ સર્વ્વવૃત્તાન્તં તૌ વક્તુમારેભાતે।
XXXVI ઇત્થં તે પરસ્પરં વદન્તિ તત્કાલે યીશુઃ સ્વયં તેષાં મધ્ય પ્રોત્થય યુષ્માકં કલ્યાણં ભૂયાદ્ ઇત્યુવાચ,
XXXVII કિન્તુ ભૂતં પશ્યામ ઇત્યનુમાય તે સમુદ્વિવિજિરે ત્રેષુશ્ચ।
XXXVIII સ ઉવાચ, કુતો દુઃખિતા ભવથ? યુષ્માકં મનઃસુ સન્દેહ ઉદેતિ ચ કુતઃ?
XXXIX એષોહં, મમ કરૌ પશ્યત વરં સ્પૃષ્ટ્વા પશ્યત, મમ યાદૃશાનિ પશ્યથ તાદૃશાનિ ભૂતસ્ય માંસાસ્થીનિ ન સન્તિ।
XL ઇત્યુક્ત્વા સ હસ્તપાદાન્ દર્શયામાસ।
XLI તેઽસમ્ભવં જ્ઞાત્વા સાનન્દા ન પ્રત્યયન્। તતઃ સ તાન્ પપ્રચ્છ, અત્ર યુષ્માકં સમીપે ખાદ્યં કિઞ્ચિદસ્તિ?
XLII તતસ્તે કિયદ્દગ્ધમત્સ્યં મધુ ચ દદુઃ
XLIII સ તદાદાય તેષાં સાક્ષાદ્ બુભુજે
XLIV કથયામાસ ચ મૂસાવ્યવસ્થાયાં ભવિષ્યદ્વાદિનાં ગ્રન્થેષુ ગીતપુસ્તકે ચ મયિ યાનિ સર્વ્વાણિ વચનાનિ લિખિતાનિ
તદનુરૂપાણિ ઘટિષ્યન્તે યુષ્માભિઃ સાર્દ્ધં સ્થિત્વાહં યદેતદ્વાક્યમ્ અવદં તદિદાનીં પ્રત્યક્ષમભૂત્।
XLV અથ તેભ્યઃ શાસ્ત્રબોધાધિકારં દત્વાવદત્,
XLVI ખ્રીષ્ટેનેત્થં મૃતિયાતના ભોક્તવ્યા તૃતીયદિને ચ શ્મશાનાદુત્થાતવ્યઞ્ચેતિ લિપિરસ્તિ;
XLVII તન્નામ્ના યિરૂશાલમમારભ્ય સર્વ્વદેશે મનઃપરાવર્ત્તનસ્ય પાપમોચનસ્ય ચ સુસંવાદઃ પ્રચારયિતવ્યઃ,
XLVIII એષુ સર્વ્વેષુ યૂયં સાક્ષિણઃ।
XLIX અપરઞ્ચ પશ્યત પિત્રા યત્ પ્રતિજ્ઞાતં તત્ પ્રેષયિષ્યામિ, અતએવ યાવત્કાલં યૂયં સ્વર્ગીયાં શક્તિં ન પ્રાપ્સ્યથ તાવત્કાલં
યિરૂશાલમ્નગરે તિષ્ઠત।

L અથ સ તાન્ બૈથનીયાપર્ય્યન્તં નીત્વા હસ્તાવુત્તોલ્ય આશિષ વક્તુમારેભે
LI આશિષં વદન્નેવ ચ તેભ્યઃ પૃથગ્ ભૂત્વા સ્વર્ગાય નીતોઽભવત્|
LII તદા તે તં ભજમાના મહાનન્દેન યિરૂશાલમં પ્રત્યાજગ્મુઃ|
LIII તતો નિરન્તરં મન્દિરે તિષ્ઠન્ત ઈશ્વરસ્ય પ્રશંસાં ધન્યવાદઞ્ચ કર્ત્તમ્ આરેભિરે| ઇતિ||

# યોહનલિખિતઃ સુસંવાદઃ

I આદૌ વાદ આસીત્ સ ચ વાદ ઈશ્વરેણ સાર્ધમાસીત્ સ વાદઃ સ્વયમીશ્વર એવ।
II સ આદાવીશ્વરેણ સહાસીત્।
III તેન સર્વ્વં વસ્તુ સસૃજે સર્વ્વેષુ સૃષ્ટવસ્તુષુ કિમપિ વસ્તુ તેનાસૃષ્ટં નાસ્તિ।
IV સ જીવનસ્યાકારઃ, તચ્ચ જીવનં મનુષ્યાણાં જ્યોતિઃ
V તજ્જ્યોતિરન્ધકારે પ્રચકાશે કિન્ત્વન્ધકારસ્તન્ન જગ્રાહ।
VI યોહન્ નામક એકો મનુજ ઈશ્વરેણ પ્રેષયાઞ્ચક્રે।
VII તદ્વારા યથા સર્વ્વે વિશ્વસન્તિ તદર્થં સ તજ્જ્યોતિષિ પ્રમાણં દાતું સાક્ષિસ્વરૂપો ભૂત્વાગમત્,
VIII સ સ્વયં તજ્જ્યોતિ ર્ન કિન્તુ તજ્જ્યોતિષિ પ્રમાણં દાતુમાગમત્।
IX જગત્યાગત્ય યઃ સર્વ્વમનુજેભ્યો દીપ્તિં દદાતિ તદેવ સત્યજ્યોતિઃ।
X સ યજ્જગદસૃજત્ તન્મધ્ય એવ સ આસીત્ કિન્તુ જગતો લોકાસ્તં નાજાનન્।
XI નિજાધિકારં સ આગચ્છત્ કિન્તુ પ્રજાસ્તં નાગૃહ્લન્।
XII તથાપિ યે યે તમગૃહ્લન્ અર્થાત્ તસ્ય નામ્નિ વ્યશ્વસન્ તેભ્ય ઈશ્વરસ્ય પુત્રા ભવિતુમ્ અધિકારમ્ અદદાત્।
XIII તેષાં જનિઃ શોણિતાન્ન શારીરિકાભિલાષાન્ન માનવાનામિચ્છાતો ન કિન્ત્વીશ્વરાદભવત્।
XIV સ વાદો મનુષ્યરૂપેણાવતીર્ય્ય સત્યતાનુગ્રહાભ્યાં પરિપૂર્ણઃ સન્ સાર્ધમ્ અસ્માભિ ર્ન્યવસત્ તતઃ પિતુરદ્વિતીયપુત્રસ્ય યોગ્યો
યો મહિમા તં મહિમાનં તસ્યાપશ્યામ।
XV તતો યોહનપિ પ્રચાર્ય્ય સાક્ષ્યમિદં દત્તવાન્ યો મમ પશ્ચાદ્ આગમિષ્યતિ સ મત્તો ગુરુતરઃ; યતો મત્પૂર્વ્વં સ વિદ્યમાન આસીત્;
યદર્થમ્ અહં સાક્ષ્યમિદમ્ અદાં સ એષઃ।
XVI અપરઞ્ચ તસ્ય પૂર્ણતાયા વયં સર્વ્વે ક્રમશઃ ક્રમશોનુગ્રહં પ્રાપ્તાઃ।
XVII મૂસાદ્વારા વ્યવસ્થા દત્તા કિન્ત્વનુગ્રહઃ સત્યત્વઞ્ચ યીશુખ્રીષ્ટદ્વારા સમુપાતિષ્ઠતાં।
XVIII કોપિ મનુજ ઈશ્વરં કદાપિ નાપશ્યત્ કિન્તુ પિતુઃ ક્રોડસ્થોઽદ્વિતીયઃ પુત્રસ્તં પ્રકાશયત્।
XIX ત્વં કઃ? ઇતિ વાક્યં પ્રેષ્ટું યદા યિહૂદીયલોકા યાજકાન્ લેવિલોકાંશ્ચ યિરૂશાલમો યોહનઃ સમીપે પ્રેષયામાસુઃ,
XX તદા સ સ્વીકૃતવાન્ નાપહ્નૂતવાન્ નાહમ્ અભિષિક્ત ઇત્યઙ્ગીકૃતવાન્।
XXI તદા તેઽપૃચ્છન્ તર્હિ કો ભવાન્? કિં એલિયઃ? સોવદત્ ન; તતસ્તેઽપૃચ્છન્ તર્હિ ભવાન્ સ ભવિષ્યદ્વાદી? સોવદત્ નાહં
સઃ।
XXII તદા તેઽપૃચ્છન્ તર્હિ ભવાન્ કઃ? વયં ગત્વા પ્રેરકાન્ ત્વયિ કિં વક્ષ્યામઃ? સ્વસ્મિન્ કિં વદસિ?
XXIII તદા સોવદત્। પરમેશસ્ય પન્થાનં પરિષ્કુરુત સર્વ્વતઃ। ઇતીદં પ્રાન્તરે વાક્યં વદતઃ કસ્યચિદ્રવઃ। કથામિમાં યસ્મિન્ યિશયિયો
ભવિષ્યદ્વાદી લિખિતવાન્ સોહમ્।
XXIV યે પ્રેષિતાસ્તે ફિરૂશિલોકાઃ।
XXV તદા તેઽપૃચ્છન્ યદિ નાભિષિક્તોસિ એલિયોસિ ન સ ભવિષ્યદ્વાદ્યપિ નાસિ ચ, તર્હિ લોકાન્ મજ્જયસિ કુતઃ?
XXVI તતો યોહન્ પ્રત્યવોચત્, તોયેઽહં મજ્જયામીતિ સત્યં કિન્તુ યં યૂયં ન જાનીથ તાદૃશ એકો જનો યુષ્માકં મધ્ય ઉપતિષ્ઠતિ।
XXVII સ મત્પશ્ચાદ્ આગતોપિ મત્પૂર્વ્વં વર્ત્તમાન આસીત્ તસ્ય પાદુકાબન્ધનં મોચયિતુમપિ નાહં યોગ્યોસ્મિ।
XXVIII યર્દ્દનનદ્યાઃ પારસ્થબૈથબારાયાં યસ્મિન્સ્થાને યોહનમજ્જયત્ તસ્મિન સ્થાને સર્વ્વમેતદ્ અઘટત।
XXIX પરેઽહનિ યોહન્ સ્વનિકટમાગચ્છન્તં યિશું વિલોક્ય પ્રાવોચત્ જગતઃ પાપમોચકમ્ ઈશ્વરસ્ય મેષશાવકં પશ્યત।
XXX યો મમ પશ્ચાદાગમિષ્યતિ સ મત્તો ગુરુતરઃ, યતો હેતોર્મત્પૂર્વ્વં સોઽવર્ત્તત યસ્મિન્નહં કથામિમાં કથિતવાન્ સ એવાયં।
XXXI અપરં નાહમેનં પ્રત્યભિજ્ઞાતવાન્ કિન્તુ ઇસ્રાયેલ્લોકા એનં યથા પરિચિન્વન્તિ તદભિપ્રાયેણાહં જલે મજ્જયિતુમાગચ્છમ્।
XXXII પુનશ્ચ યોહનપરમેકં પ્રમાણં દત્વા કથિતવાન્ વિહાયસઃ કપોતવદ્ અવતરન્તમાત્માનમ્ અસ્યોપર્ય્યવતિષ્ઠન્તં ચ
દૃષ્ટવાનહમ્।
XXXIII નાહમેનં પ્રત્યભિજ્ઞાતવાન્ ઇતિ સત્યં કિન્તુ યો જલે મજ્જયિતું માં પ્રૈરયત્ સ એવેમાં કથામકથયત્ યસ્યોપર્ય્યાત્માનમ્
અવતરન્તમ્ અવતિષ્ઠન્તઞ્ચ દ્રક્ષયસિ સએવ પવિત્રે આત્મનિ મજ્જયિષ્યતિ।
XXXIV અવસ્તન્નિરીક્ષ્યાયમ્ ઈશ્વરસ્ય તનય ઇતિ પ્રમાણં દદામિ।
XXXV પરેઽહનિ યોહન્ દ્વાભ્યાં શિષ્યાભ્યાં સાર્દ્ધં તિષ્ઠન્
XXXVI યિશું ગચ્છન્તં વિલોક્ય ગદિતવાન્, ઈશ્વરસ્ય મેષશાવકં પશ્યતં।
XXXVII ઇમાં કથાં શ્રુત્વા દ્વૌ શિષ્યૌ યીશોઃ પશ્ચાદ્ ઈયતુઃ।
XXXVIII તતો યીશુઃ પરાવૃત્ય તૌ પશ્ચાદ્ આગચ્છન્તૌ દૃષ્ટ્વા પૃષ્ટવાન્ યુવાં કિં ગવેશયથઃ? તાવપૃચ્છતાં હે રબ્બિ અર્થાત્ હે
ગુરો ભવાન્ કુત્ર તિષ્ઠતિ?
XXXIX તતઃ સોવાદિત્ એત્ય પશ્યતં। તતો દિવસસ્ય તૃતીયપ્રહરસ્ય ગતત્વાત્ તૌ તદ્દિનં તસ્ય સઙ્ગેઽસ્થાતાં।
XL યૌ દ્વૌ યોહનો વાક્યં શ્રુત્વા યિશોઃ પશ્ચાદ્ આગમતાં તયોઃ શિમોન્પિતરસ્ય ભ્રાતા આન્દ્રિયઃ
XLI સ ઇત્વા પ્રથમં નિજસોદરં શિમોનં સાક્ષાત્પ્રાપ્ય કથિતવાન્ વયં ખ્રીષ્ટમ્ અર્થાત્ અભિષિક્તપુરુષં સાક્ષાત્કૃતવન્તઃ।
XLII પશ્ચાત્ સ તં યિશોઃ સમીપમ્ આનયત્। તદા યીશુસ્તં દૃષ્ટ્વાવદત્ ત્વં યૂનસઃ પુત્રઃ શિમોન્ કિન્તુ ત્વન્નામધેયં કૈફાઃ વા પિતરઃ
અર્થાત્ પ્રસ્તરો ભવિષ્યતિ।
XLIII પરેઽહનિ યીશૌ ગાલીલં ગન્તું નિશ્ચિતચેતસિ સતિ ફિલિપનામાનં જનં સાક્ષાત્પ્રાપ્યાવોચત્ મમ પશ્ચાદ્ આગચ્છ।

XLIV બૈત્સૈદાનામ્નિ યસ્મિન્ ગ્રામે પિતરાન્દ્રિયયોર્વાસ આસીત્ તસ્મિન્ ગ્રામે તસ્ય ફિલિપસ્ય વસતિરાસીત્।
XLV પશ્ચાત્ ફિલિપો નિથનેલં સાક્ષાત્પ્રાપ્યાવદત્ મૂસા વ્યવસ્થા ગ્રન્થે ભવિષ્યદ્વાદિનાં ગ્રન્થેષુ ચ યસ્યાખ્યાનં લિખિતમાસ્તે તં
યૂષફઃ પુત્રં નાસરતીયં યીશું સાક્ષાદ્ અકાર્ષ્મ વયં।
XLVI તદા નિથનેલ્ કથિતવાન્ નાસરન્નગરાત કિં કશ્ચિદુત્તમ ઉત્પન્તું શક્નોતિ? તતઃ ફિલિપો ઽવોચત્ એત્ય પશ્ય।
XLVII અપરઞ્ચ યીશુઃ સ્વસ્ય સમીપં તમ્ આગચ્છન્તં દૃષ્ટ્વા વ્યાહૃતવાન્, પશ્યાયં નિષ્કપટઃ સત્ય ઇસ્રાયેલ્લોકઃ।
XLVIII તતઃ સોવદદ્, ભવાન્ માં કથં પ્રત્યભિજાનાતિ? યીશુરવાદીત્ ફિલિપસ્ય આહ્વાનાત્ પૂર્વ્વં યદા ત્વમુડુમ્બરસ્ય
તરોર્મૂલેઽસ્થાસ્તદા ત્વામદર્શમ્।
XLIX નિથનેલ્ અચકથત્, હે ગુરો ભવાન્ નિતાન્તમ્ ઈશ્વરસ્ય પુત્રોસિ, ભવાન્ ઇસ્રાયેલ્વંશસ્ય રાજા।
L તતો યીશુ ર્વ્યાહરત્, ત્વામુડુમ્બરસ્ય પાદપસ્ય મૂલે દૃષ્ટવાનાહં મમૈતસ્માદ્વાક્યાત્ કિં ત્વં વ્યશ્વસીઃ? એતસ્માદપ્યાશ્ચર્ય્યાણિ
કાર્ય્યાણિ દ્રક્ષ્યસિ।
LI અન્યચ્ચાવાદીદ્ યુષ્માનહં યથાર્થં વદામિ, ઇતઃ પરં મોચિતે મેઘદ્વારે તસ્માન્મનુજસૂનુના ઈશ્વરસ્ય દૂતગણમ્
અવરોહન્તમારોહન્તઞ્ચ દ્રક્ષ્યથ।

# II

I અનન્તરં ત્રુતીયદિવસે ગાલીલ્ પ્રદેશિયે કાન્નાનામ્નિ નગરે વિવાહ આસીત્ તત્ર ચ યીશોર્માતા તિષ્ઠત્।
II તસ્મૈ વિવાહાય યીશુસ્તસ્ય શિષ્યાશ્ચ નિમન્ત્રિતા આસન્।
III તદનન્તરં દ્રાક્ષારસસ્ય ન્યૂનત્વાદ્ યીશોર્માતા તમવદત્ એતેષાં દ્રાક્ષારસો નાસ્તિ।
IV તદા સ તામવોચત્ હે નારિ મયા સહ તવ કિં કાર્ય્યં? મમ સમય ઇદાનીં નોપતિષ્ઠતિ।
V તતસ્તસ્ય માતા દાસાનવોચદ્ અયં યદ્ વદતિ તદેવ કુરુત।
VI તસ્મિન્ સ્થાને યિહૂદીયાનાં શુચિત્વકરણવ્યવહારાનુસારેણાઢકૈકજલધરાણિ પાષાણમયાનિ ષડ્વૃહત્પાત્રાણિઆસન્।
VII તદા યીશુસ્તાન્ સર્વ્વકલશાન્ જલૈઃ પૂરયિતું તાનાજ્ઞાપયત્, તતસ્તે સર્વ્વાન્ કુમ્ભાનાકર્ણં જલૈઃ પર્ય્યપૂરયન્।
VIII અથ તેભ્યઃ કિઞ્ચિદુત્તાર્ય્ય ભોજ્યાધિપાતેઃસમીપં નેતું સ તાનાદિશત્, તે તદનયન્।
IX અપરઞ્ચ તજ્જલં કથં દ્રાક્ષારસોઽભવત્ તજ્જલવાહકાદાસા જ્ઞાતું શક્તાઃ કિન્તુ તદ્ભોજ્યાધિપો જ્ઞાતું નાશક્નોત્ તદવલિહ્ય
વરં સંમ્બોદ્યાવદત,
X લોકાઃ પ્રથમં ઉત્તમદ્રાક્ષારસં દદતિ તષુ યથેષ્ટં પિતવત્સુ તસ્મા કિઞ્ચિદનુત્તમઞ્ચ દદતિ કિન્તુ ત્વમિદાનીં યાવત્ ઉત્તમદ્રાક્ષારસં
સ્થાપયસિ।
XI ઇત્થં યીશુર્ગાલીલપ્રદેશે આશ્ચર્ય્યકાર્મ્મ પ્રારમ્ભ નિજમહિમાનં પ્રાકાશયત્ તતઃ શિષ્યાસ્તસ્મિન્ વ્યશ્વસન્।
XII તતઃ પરમ્ સ નિજમાત્રુભ્રાત્રુસ્શિષ્યૈઃ સાર્દ્ધં કફર્નાહૂમમ્ આગમત્ કિન્તુ તત્ર બહૂદિનાનિ આતિષ્ઠત્।
XIII તદનન્તરં યિહૂદિયાનાં નિસ્તારોત્સવે નિકટમાગતે યીશુ ર્યિરૂશાલમ્ નગરમ્ આગચ્છત્।
XIV તતો મન્દિરસ્ય મધ્યે ગોમેષપારાવતવિક્રયિણો વાણિજશ્ચોપવિષ્ટાન્ વિલોક્ય
XV રજ્જુભિઃ કશાં નિર્મ્માય સર્વ્વગોમેષાદિભિઃ સાર્દ્ધં તાન્ મન્દિરાદ્ દૂરીકૃતવાન્।
XVI વણિજાં મુદ્રાદિ વિકીર્ય્ય આસનાનિ ન્યૂબ્જીકૃત્ય પારાવતવિક્રયિભ્યોઽકથયદ્ અસ્માત્ સ્થાનાત્ સર્વાણ્યેતાનિ નયત, મમ
પિતુગૃહં વાણિજ્યગૃહં મા કાર્ષ્ટ।
XVII તસ્માત્ તન્મન્દિરાર્થ ઉદ્યોગો યસ્તુ સ ગ્રસતીવ મામ્। ઇમાં શાસ્ત્રીયલિપિં શિષ્યાઃસમસ્મરન્।
XVIII તતઃ પરમ્ યિહૂદીયલોકા યીષિમવદન્ તવમિદૃશકર્મ્મકરણાત્ કિં ચિહ્નમસ્માન્ દર્શયસિ?
XIX તતો યીશુસ્તાનવોચદ્ યુષ્માભિરે તસ્મિન્ મન્દિરે નાશિતે દિનત્રયમધ્યેઽહં તદ્ ઉત્થાપયિષ્યામિ।
XX તદા યિહૂદિયા વ્યાહાર્ષુઃ, એતસ્ય મન્દિરસ નિર્મ્માણેન ષટ્ચત્વારિંશદ્ વત્સરા ગતાઃ, ત્વં કિં દિનત્રયમધ્યે તદ્
ઉત્થાપયિષ્યસિ?
XXI કિન્તુ સ નિજદેહરૂપમન્દિરે કથામિમાં કથિતવાન્।
XXII સ યદેતાદૃશં ગદિતવાન્ તચ્છિષ્યાઃ શ્મશાનાત્ તદીયોત્થાને સતિ સ્મૃત્વા ધર્મ્મગ્રન્થે યીશુનોક્તકથાયાં ચ વ્યશ્વસિષુઃ।
XXIII અનન્તરં નિસ્તારોત્સવસ્ય ભોજ્યસમયે યિરૂશાલમ્ નગરે તત્કૃતાશ્ચર્ય્યકર્મ્માણિ વિલોક્ય બહુભિસ્તસ્ય નામનિ વિશ્વસિતં।
XXIV કિન્તુ સ તેષાં કરેષુ સ્વં ન સમર્પયત્, યતઃ સ સર્વ્વાનવૈત્।
XXV સ માનવેષુ કસ્યચિત્ પ્રમાણં નાપેક્ષત યતો મનુજાનાં મધ્યે યદ્યદસ્તિ તત્તત્ સોજાનાત્।

# III

I નિકદિમનામા યિહૂદીયાનામ્ અધિપતિઃ ફિરૂશી ક્ષણદાયાં
II યીશૌરભ્યર્ણમ્ આવ્રજ્ય વ્યાહાર્ષીત્, હે ગુરો ભવાન્ ઈશ્વરાદ્ આગત્ એક ઉપદેષ્ટા, એતદ્ અસ્માભિર્જ્ઞાયતે; યતો ભવતા
યાન્યાશ્ચર્ય્યકર્મ્માણિ ક્રિયન્તે પરમેશ્વરસ્ય સાહાય્યં વિના કેનાપિ તત્તત્કર્મ્માણિ કર્ત્તું ન શક્યન્તે।
III તદા યીશુરુત્તરં દત્તવાન્ તવાહં યથાર્થતરં વ્યાહરામિ પુનર્જન્મનિ ન સતિ કોપિ માનવ ઈશ્વરસ્ય રાજ્યં દ્રષ્ટું ન શક્નોતિ।
IV તતો નિકદીમઃ પ્રત્યવોચત્ મનુજો વૃદ્ધો ભૂત્વા કથં જનિષ્યતે? સ કિં પુન ર્માતૃર્જઠરં પ્રવિશ્ય જનિતું શક્નોતિ?
V યીશુરવાદીદ્ યથાર્થતરમ્ અહં કથયામિ મનુજે તોયાત્મભ્યાં પુન ર્ન જાતે સ ઈશ્વરસ્ય રાજ્યં પ્રવેષ્ટું ન શક્નોતિ।
VI માંસાદ્ યત્ જાયતે તન્ માંસમેવ તથાત્મનો યો જાયતે સ આત્મૈવ।
VII યુષ્માભિઃ પુન ર્જનિતવ્યં મમૈતસ્યાં કથાયામ્ આશ્ચર્યં મા મંસ્થાઃ।
VIII સદાગતિર્યાં દિશમિચ્છતિ તસ્યામેવ દિશિ વાતિ, ત્વં તસ્ય સ્વનં શુણોષિ કિન્તુ સ કુત આયાતિ કુત્ર યાતિ વા કિમપિ ન
જાનાસિ તદ્વાદ્ આત્મનઃ સકાશાત્ સર્વ્વેષાં મનુજાનાં જન્મ ભવતિ।

IX તદા નિકદીમઃ પૃષ્ટવાન્ એતત્ કથં ભવિતું શક્નોતિ?

X યીશુઃ પ્રત્યક્તવાન્ ત્વમિસ્રાયેલો ગુરુર્ભૂત્વાપિ કિમેતાં કથાં ન વેત્સિ?

XI તુભ્યં યથાર્થં કથયામિ, વયં યદ્ વિદ્મસ્તદ્ વચ્મઃ યંચ્ચ પશ્યામસ્તસ્યૈવ સાક્ષ્યં દદ્મઃ કિન્તુ યુષ્માભિરસ્માકં સાક્ષિત્વં ન ગૃહ્યતે།

XII એતસ્ય સંસારસ્ય કથાયાં કથિતાયાં યદિ યૂયં ન વિશ્વસિથ તર્હિ સ્વર્ગીયાયાં કથાયાં કથં વિશ્વસિષ્યથ?

XIII યઃ સ્વર્ગેઽસ્તિ યં ચ સ્વર્ગાદ્ અવારોહત્ તં માનવતનયં વિના કોપિ સ્વર્ગં નારોહત્།

XIV અપરઞ્ચ મૂસા યથા પ્રાન્તરે સર્પં પ્રોત્થાપિતવાન્ મનુષ્યપુત્રોઽપિ તથૈવોત્થાપિતવ્યઃ;

XV તસ્માદ્ યઃ કશ્ચિત્ તસ્મિન્ વિશ્વસિષ્યતિ સોઽવિનાશ્યઃ સન્ અનન્તાયુઃ પ્રાપ્સ્યતિ།

XVI ઈશ્વર ઇત્થં જગદદયત યત્ સ્વમદ્વિતીયં તનયં પ્રાદદાત્ તતો યઃ કશ્ચિત્ તસ્મિન્ વિશ્વસિષ્યતિ સોઽવિનાશ્યઃ સન્ અનન્તાયુઃ પ્રાપ્સ્યતિ།

XVII ઈશ્વરો જગતો લોકાન્ દણ્ડયિતું સ્વપુત્રં ન પ્રેષ્ય તાન્ પરિત્રાતું પ્રેષિતવાન્།

XVIII અતએવ યઃ કશ્ચિત્ તસ્મિન્ વિશ્વસિતિ સ દણ્ડાર્હો ન ભવતિ કિન્તુ યઃ કશ્ચિત્ તસ્મિન્ ન વિશ્વસિતિ સ ઇદાનીમેવ દણ્ડાર્હો ભવતિ,યતઃ સ ઈશ્વરસ્યાદ્વિતીયપુત્રસ્ય નામનિ પ્રત્યયં ન કરોતિ།

XIX જગતો મધ્યે જ્યોતિઃ પ્રાકાશત કિન્તુ મનુષ્યાણાં કર્મ્મણાં દૃષ્ટત્વાત્ તે જ્યોતિષોપિ તિમિરે પ્રીયન્તે એતદેવ દણ્ડસ્ય કારણાં ભવતિ།

XX યઃ કુકર્મ્મ કરોતિ તસ્યાચારસ્ય દૃષ્ટત્વાત્ સ જ્યોતિરૃતીયિત્વા તન્નિકટં નાયાતિ;

XXI કિન્તુ યઃ સત્કર્મ્મ કરોતિ તસ્ય સર્વ્વાણિ કર્મ્માણીશ્વરેણ કૃતાનીતિ સથા પ્રકાશતે તદભિપ્રાયેણ સ જ્યોતિષઃ સન્નિધિમ્ આયાતિ།

XXII તતઃ પરમ્ યીશુઃ શિષ્યૈઃ સાર્દ્ધં યિહૂદીયદેશં ગત્વા તત્ર સ્થિત્વા મજ્જયિતુમ્ આરભત།

XXIII તદા શાલમ્ નગરસ્ય સમીપસ્થાયિનિ ઐનન્ ગ્રામે બહુતરતોયસ્થિતેસ્તત્ર યોહન્ અમજ્જયત્ તથા ચ લોકા આગત્ય તેન મજ્જિતા અભવન્།

XXIV તદા યોહન્ કારાયાં ન બદ્ધઃ།

XXV અપરઞ્ચ શાચકર્મ્મણિ યોહાનઃ શિષ્યૈઃ સહ યિહૂદીયલોકાનાં વિવાદે જાતે, તે યોહનઃ સંન્નિધિં ગત્વાકથયન્,

XXVI હે ગુરો યર્દ્દનનદ્યાઃ પારે ભવતા સાર્દ્ધં ય આસીત્ યસ્મિંશ્ચ ભવાન્ સાક્ષ્યં પ્રદદાત્ પશ્યતુ સોપિ મજ્જયતિ સર્વ્વે તસ્ય સમીપં યાન્તિ ચ།

XXVII તદા યોહન્ પ્રત્યવોચદ્ ઈશ્વરેણ ન દત્તે કોપિ મનુજઃ કિમપિ પ્રાપ્તું ન શક્નોતિ།

XXVIII અહં અભિષિક્તો ન ભવામિ કિન્તુ તદગ્રે પ્રેષિતોસ્મિ યામિમાં કથાં કથિતવાનાહં તત્ર યૂયં સર્વ્વે સાક્ષિણઃ સ્થ།

XXIX યો જનઃ કન્યાં લભતે સ એવ વરઃ કિન્તુ વરસ્ય સન્નિધૌ દણ્ડાયમાનં તસ્ય યન્મિત્રં તેન વરસ્ય શબ્દે શ્રુતેઽતીવાહ્લાદ્યતે મમાપિ તદ્વદ્ આનન્દસિદ્ધિર્જાતા།

XXX તેન ક્રમશો વર્દ્ધિતવ્યં કિન્તુ મયા હ્સિતવ્યં།

XXXI ય ઊર્દ્ધ્વાદાગચ્છત્ સ સર્વ્વેષાં મુખ્યો યશ્ચ સંસારાદ્ ઉદપદ્યત સ સાંસારિકઃ સંસારીયાં કથાઞ્ચ કથયતિ યસ્તુ સ્વર્ગાદાગચ્છત્ સ સર્વ્વેષાં મુખ્યઃ།

XXXII સ યદપશ્યદશૃણોચ્ચ તસ્મિન્નેવ સાક્ષ્યં દદાતિ તથાપિ પ્રાયશઃ કશ્ચિત્ તસ્ય સાક્ષ્યં ન ગૃહ્લાતિ;

XXXIII કિન્તુ યો ગૃહ્લાતિ સ ઈશ્વરસ્ય સત્યવાદિત્વં મુદ્રાઙ્ગિતં કરોતિ།

XXXIV ઈશ્વરેણ યઃ પ્રેરિતઃ સએવ ઈશ્વરીયકથાં કથયતિ યત ઈશ્વર આત્માનં તસ્મૈ અપરિમિતમ્ અદદાત્།

XXXV પિતા પુત્રે સ્નેહં કૃત્વા તસ્ય હસ્તે સર્વ્વાણિ સમર્પિતવાન્།

XXXVI યઃ કશ્ચિત્ પુત્રે વિશ્વસિતિ સ એવાનન્તમ્ પરમાયુઃ પ્રાપ્નોતિ કિન્તુ યઃ કશ્ચિત્ પુત્રે ન વિશ્વસિતિ સ પરમાયુષો દર્શનં ન પ્રાપ્નોતિ કિન્ત્વીશ્વરસ્ય કોપભાજનં ભૂત્વા તિષ્ઠતિ།

# IV

I યીશુઃ સ્વયં નામજ્જયત્ કેવલં તસ્ય શિષ્યા અમજ્જયત્ કિન્તુ યોહનોઽધિકશિષ્યાન્ સ કરોતિ મજ્જયતિ ચ,

II ફિરૂશિન ઇમાં વાર્ત્તામશૃણ્વન્ ઇતિ પ્રભુરવગત્ય

III યિહૂદીયદેશં વિહાય પુન ર્ગાલીલમ્ આગત્།

IV તતઃ શોમિરોણપ્રદેશસ્ય મદ્યેન તેન ગન્તવ્યે સતિ

V યાકૂબ્ નિજપુત્રાય યૂષફે યાં ભૂમિમ્ અદદાત્ તત્સમીપસ્થાયિ શોમિરોણપ્રદેશસ્ય સુખાર્ નામ્ના વિખ્યાતસ્ય નગરસ્ય સન્નિધાવુપાસ્થાત્།

VI તત્ર યાકૂબઃ પ્રહિરાસીત્; તદા દ્વિતીયયામવેલાયાં જાતાયાં સ માર્ગે શ્રમાપન્નસ્તસ્ય પ્રહેઃ પાર્શ્વે ઉપાવિશત્།

VII એતર્હિ કાચિત્ શોમિરોણીયા યોષિત્ તોયોત્તોલનાર્થમ્ તત્રાગમત્

VIII તદા શિષ્યાઃ ખાદ્યદ્રવ્યાણિ ક્રેતું નગરમ્ અગચ્છન્།

IX યીશુઃ શોમિરોણીયાં તાં યોષિતમ્ વ્યાહાર્ષીત્ મહ્યં કિઞ્ચિત્ પાનીયં પાતું દેહિ། કિન્તુ શોમિરોણીયૈઃ સાકં યિહૂદીયલોકા ન વ્યવાહરન્ તસ્માદ્ધેતોઃ સાકથયત્ શોમિરોણીયા યોષિતદહં ત્વં યિહૂદીયોસિ કથં મત્તઃ પાનીયં પાતુમ્ ઇચ્છસિ?

X તતો યીશુરવદદ્ ઈશ્વરસ્ય યદ્દાનં તત્કીદૃક્ પાનીયં પાતું મહ્યં દેહિ ય ઇત્થં ત્વાં યાચતે સ વા ક ઇતિ ચેદજ્ઞાસ્યથાસ્તર્હિ તમયાચિષ્યથાઃ સ ચ તુભ્યમમૃતં તોયમદાસ્યત્།

XI તદા સા સીમન્તિની ભાષિતવતિ, હે મહેચ્છ પ્રહિર્ગમ્ભીરો ભવતો નીરોત્તોલનપાત્રં નાસ્તી ચ તસ્માત્ તદમૃતં કીલાલં કુતઃ પ્રાપ્સ્યસિ?

XII યોસ્મભ્યમ્ ઇમમન્ધૂં દદૌ, યસ્ય ચ પરિજના ગોમેષાદયશ્ચ સર્વ્વેઽસ્ય પ્રહેઃ પાનીયં પપુરેતાદૃશો યોસ્માકં પૂર્વ્વપુરુષો યાકૂબ્ તસ્માદપિ ભવાન્ મહાન્ કિં?

XIII તતો યીશુરકથયદ્ ઇદં પાનીયં સઃ પિવતિ સ પુનસ્તૃષાર્ત્તો ભવિષ્યતિ,

XIV કિન્તુ મયા દત્તં પાનીયં યઃ પિવતિ સ પુનઃ કદાપિ તૃષાર્ત્તો ન ભવિષ્યતિ। મયા દત્તમ્ ઇદં તોયં તસ્યાન્તઃ પ્રસ્રવણરૂપં ભૂત્વા અનન્તાયુર્યાવત્ સ્રોષ્યતિ।

XV તદા સા વનિતાકથયત્ હે મહેચ્છ તર્હિ મમ પુનઃ પીપાસા યથા ન જાયતે તોયોત્તોલનાય યથાત્રાગમનં ન ભવતિ ચ તદર્થં મહ્યં તત્તોયં દેહી।

XVI તતો યીશૂરવદદ્યાહિ તવ પતિમાહૂય સ્થાનેઽત્રાગચ્છ।

XVII સા વામાવદત્ મમ પતિર્નાસ્તિ। યીશુરવદત્ મમ પતિર્નાસ્તીતિ વાક્યં ભદ્રમવોચઃ।

XVIII યતસ્તવ પઞ્ચ પતયોભવન્ અધુના તુ ત્વયા સાર્દ્ધં યસ્તિષ્ઠતિ સ તવ ભર્ત્તા ન વાક્યમિદં સત્યમવાદિઃ।

XIX તદા સા મહિલા ગદિતવતિ હે મહેચ્છ ભવાન્ એકો ભવિષ્યદ્વાદીતિ બુદ્ધં મયા।

XX અસ્માકં પિતૃલોકા એતસ્મિન્ શિલોચ્ચયેઽભજન્ત, કિન્તુ ભવદ્ભિરુચ્યતે યિરૂશાલમ્ નગરે ભજનયોગ્યં સ્થાનમાસ્તે।

XXI યીશુરવોચત્ હે યોષિત્ મમ વાક્યે વિશ્વસિહિ યદા યૂયં કેવલશૈલેઽસ્મિન્ વા યિરૂશાલમ્ નગરે પિતુર્ભજનં ન કરિષ્યધ્વે કાલ એતાદૃશ આયાતિ।

XXII યૂયં યં ભજધ્વે તં ન જાનીથ, કિન્તુ વયં યં ભજામહે તં જાનીમહે, યતો યિહૂદીયલોકાનાં મધ્યાત્ પરિત્રાણં જાયતે।

XXIII કિન્તુ યદા સત્યભક્તા આત્મના સત્યરૂપેણ ચ પિતુર્ભજનં કરિષ્યન્તે સમય એતાદૃશ આયાતિ, વરમ્ ઇદાનીમપિ વિદ્યતે ; યત એતાદૃશો ભત્કાન્ પિતા ચેષ્ટતે।

XXIV ઈશ્વર આત્મા; તતસ્તસ્ય યે ભક્તાસ્તૈઃ સ આત્મના સત્યરૂપેણ ચ ભજનીયઃ।

XXV તદા સા મહિલાવાદીત્ ખ્રીષ્ટનામ્ના વિખ્યાતોઽભિષિક્તઃ પુરુષ આગમિષ્યતીતિ જાનામિ સ ચ સર્વ્વાઃ કથા અસ્માન્ જ્ઞાપયિષ્યતિ।

XXVI તતો યીશુરવદત્ ત્વયા સાર્દ્ધં કથનં કરોમિ યોઽહમ્ અહમેવ સ પુરુષઃ।

XXVII એતસ્મિન્ સમયે શિષ્યા આગત્ય તથા સ્ત્રિયા સાર્દ્ધં તસ્ય કથોપકથને મહાશ્ચર્ય્યમ્ અમન્યન્ત તથાપિ ભવાન્ કિમિચ્છતિ? યદ્વા કિમર્થમ્ એતયા સાર્દ્ધં કથાં કથયતિ? ઇતિ કોપિ નાપૃચ્છત્।

XXVIII તતઃ પરં સા નારી કલશં સ્થાપયિત્વા નગરમધ્યં ગત્વા લોકેભ્યોકથાયદ્

XXIX અહં યદ્યત્ કર્મ્માકરવં તત્સર્વ્વં મહ્યમકથયદ્ એતાદૃશં માનવમેકમ્ આગત્ય પશ્યત રુ કિમ્ અભિષિક્તો ન ભવતિ ?

XXX તતસ્તે નગરાદ્ બહિરાગત્ય તાતસ્ય સમીપમ્ આયન્।

XXXI એતર્હિ શિષ્યાઃ સાધયિત્વા તં વ્યાહાર્ષુઃ હે ગુરો ભવાન્ કિઞ્ચિદ્ ભૂક્તાં।

XXXII તતઃ સોવદદ્ યુષ્માભિર્યન્ન જ્ઞાયતે તાદૃશં ભક્ષ્યં મમાસ્તે।

XXXIII તદા શિષ્યાઃ પરસ્પરં પ્રષ્ટુમ્ આરમ્ભન્ત, કિમસ્મૈ કોપિ કિમપિ ભક્ષ્યમાનીય દત્તવાન્?

XXXIV યીશુરવોચત્ મત્પ્રેરકસ્યાભિમતાનુરૂપકરણં તસ્યૈવ કર્મ્મસિદ્ધિકારણઞ્ચ મમ ભક્ષ્યં।

XXXV માસચતુષ્ટયે જાતે શસ્યકર્ત્તનસમયો ભવિષ્યતીતિ વાક્યં યુષ્માભિઃ કિં નોદ્યતે? કિન્ત્વહં વદામિ, શિર ઉત્તોલ્ય ક્ષેત્રાણિ પ્રતિ નિરીક્ષ્ય પશ્યત, ઇદાનીં કર્ત્તનયોગ્યાનિ શુક્લવર્ણાન્યભવન્।

XXXVI યશ્છિનત્તિ સ વેતનં લભતે અનન્તાયુઃસ્વરૂપં શસ્યં સ ગૃહ્લાતિ ચ, તેનૈવ વપ્તા છેત્તા ચ યુગપદ્ આનન્દતઃ।

XXXVII ઇત્થં સતિ વપત્યેકશ્છિનત્ત્યન્ય ઇતિ વચનં સિદ્ધ્યતિ।

XXXVIII યત્ર યૂયં ન પર્ય્યશ્રામ્યત તાદૃશં શસ્યં છેત્તું યુષ્માન્ પ્રૈરયમ્ અન્યે જનાઃપર્ય્યશ્રામ્યન્ યૂયં તેષાં શ્રગસ્ય ફલમ્ અલભધ્વમ્।

XXXIX યસ્મિન્ કાલે યદ્યત્ કર્મ્માકાર્ષં તત્સર્વ્વં સ મહ્યમ્ અકથયત્ તસ્યા વનિતાયા ઇદં સાક્ષ્યવાક્યં શ્રુત્વા તન્નગરનિવાસિનો બહવઃ શોમિરોણીયલોકા વ્યશ્વસન્।

XL તથા ચ તસ્યાન્તિકે સમુપસ્થાય સ્વેષાં સન્નિધૌ કતિચિદ્ દિનાનિ સ્થાતું તસ્મિન્ વિનયમ્ અકુર્વ્વાન તસ્માત્ સ દિનદ્વયં તત્સ્થાને ન્યવષ્ટત્

XLI તતસ્તસ્યોપદેશેન બહવોઽપરે વિશ્વસ્ય

XLII તાં યોષામવદન્ કેવલં તવ વાક્યેન પ્રતીમ ઇતિ ન, કિન્તુ સ જગતોઽભિષિક્તસ્ત્રાતેતિ તસ્ય કથાં શ્રુત્વા વયં સ્વયમેવાજ્ઞાસમહિ।

XLIII સ્વદેશે ભવિષ્યદ્વક્તુઃ સત્કારો નાસ્તીતિ યદ્યપિ યીશુઃ પ્રમાણં દત્વાકથયત્

XLIV તથાપિ દિવસદ્વયાત્ પરં સ તસ્માત્ સ્થાનાદ્ ગાલીલં ગતવાન્।

XLV અનન્તરં યે ગાલીલી લિયલોકા ઉત્સવે ગતા ઉત્સવસમયે યિરૂશલમ્ નગરે તસ્ય સર્વ્વાઃ ક્રિયા અપશ્યન્ તે ગાલીલમ્ આગતં તમ્ આગૃહ્લન્।

XLVI તતઃ પરમ્ યીશુ ર્યસ્મિન્ કાન્નાનગરે જલં દ્રાક્ષારસમ્ આકરોત્ તત્ સ્થાનં પુનરગાત્। તસ્મિન્નેવ સમયે કસ્યચિદ્ રાજસભાસ્તારસ્ય પુત્રઃ કફર્નાહૂમપુરી રોગગ્રસ્ત આસીત્।

XLVII સ યેહૂદીયદેશાદ્ યીશો ર્ગાલીલાગમનવાર્ત્તાં નિશમ્ય તસ્ય સમીપં ગત્વા પ્રાર્થ્ય વ્યાહૃતવાન્ મમ પુત્રસ્ય પ્રાયેણ કાલ આસન્નઃ ભવાન્ આગત્ય તં સ્વસ્થં કરોતુ।

XLVIII તદા યીશુરકથયદ્ આશ્ચર્ય્યં કર્મ્મ ચિત્રં ચિહ્નં ચ ન દૃષ્ટા યૂયં ન પ્રત્યેષ્યથ।

XLIX તતઃ સ સભાસદવદત્ હે મહેચ્છ મમ પુત્રે ન મૃતે ભવાનાગચ્છતુ।

L યીશુસ્તમવદદ્ ગચ્છ તવ પુત્રોઽજીવીત્ તદા યીશુનોક્તવાક્યે સ વિશ્વસ્ય ગતવાન્।

LI ગમનકાલે માર્ગમધ્યે દાસાસ્તં સાક્ષાત્પ્રાપ્યાવદન્ ભવતઃ પુત્રોઽજીવીત્।

LII તતઃ કં કાલમારભ્ય રોગપ્રતીકારારમ્ભો જાતા ઇતિ પૃષ્ટે તૈરુક્તં હ્યઃ સાર્દ્ધદણ્ડદ્વયાધિકદ્વિતીયયામે તસ્ય જ્વરત્યાગોઽભવત્।

LIII તદા યીશુસ્તસ્મિન્ ક્ષણે પ્રોક્તવાન્ તવ પુત્રોઽજીવીત્ પિતા તદ્બુદ્ધ્વા સપરિવારો વ્યશ્વસીત્|
LIV યિહૂદીયદેશાદ્ આગત્ય ગાલીલિ યીશુરેતદ્ દ્વિતીયમ્ આશ્ચર્ય્યકર્મ્માકરોત્|

# V

I તતઃ પરં યિહૂદીયાનામ્ ઉત્સવ ઉપસ્થિતે યીશુ ર્યિરૂશાલમં ગતવાન્|
II તસ્મિન્નગરે મેષનામ્નો દ્વારસ્ય સમીપે ઇબ્રીયભાષયા બૈથેસ્દા નામ્ના પિષ્કરિણી પઞ્ચઘટ્ટયુક્તાસીત્|
III તસ્યાસ્તેષુ ઘટ્ટેષુ કિલાલકમ્પનમ્ અપેક્ષ્ય અન્ધખઞ્ચશુષ્કાઙ્ગાદયો બહવો રોગિણઃ પતન્તસ્તિષ્ઠન્તિ સ્મ|
IV યતો વિશેષકાલે તસ્ય સરસો વારિ સ્વર્ગીયદૂત એત્યાકમ્પયત્ તત્કીલાલકમ્પનાત્ પરં યઃ કશ્ચિદ્ રોગી પ્રથમં પાનીયમવારોહત્
સ એવ તત્ક્ષણાદ્ રોગમુક્તોઽભવત્|
V તદાષ્ટાત્રિંશદ્વર્ષાણિ યાવદ્ રોગગ્રસ્ત એકજનસ્તસ્મિન્ સ્થાને સ્થિતવાન્|
VI યીશુસ્તં શયિતં દૃષ્ટ્વા બહુકાલિકરોગીતિ જ્ઞાત્વા વ્યાહૃતવાન્ ત્વં કિં સ્વસ્થો બુભૂષસિ?
VII તતો રોગી કથિતવાન્ હે મહેચ્છ યદા કીલાલં કમ્પતે તદા માં પુષ્કરિણીમ્ અવરોહયિતું મમ કોપિ નાસ્તિ, તસ્માન્ મમ
ગમનકાલે કશ્ચિદન્યોઽગ્રો ગત્વા અવરોહતિ|
VIII તદા યીશુરકથયદ્ ઉત્તિષ્ઠ, તવ શય્યામુત્તોલ્ય ગૃહીત્વા યાહિ|
IX સ તત્ક્ષણાત્ સ્વસ્થો ભૂત્વા શય્યામુત્તોલ્યાદાય ગતવાન્ કિન્તુ તદ્દિનં વિશ્રામવારઃ|
X તસ્માદ્ યિહૂદીયાઃ સ્વસ્થં નરં વ્યાહરન્ અદ્ય વિશ્રામવારે શયનીયમાદાય ન યાતવ્યમ્|
XI તતઃ સ પ્રત્યવોચદ્ યો માં સ્વસ્થમ્ અકાર્ષીત્ શયનીયમ્ ઉત્તોલ્યાદાય યાતું માં સ એવાદિશત્|
XII તદા તેઽપૃચ્છન્ શયનીયમ્ ઉત્તોલ્યાદાય યાતું ય આજ્ઞાપયત્ સ કઃ?
XIII કિન્તુ સ ક ઇતિ સ્વસ્થીભૂતો નાજાનાદ્ યતસ્તસ્મિન્ સ્થાને જનતાસત્ત્વાદ્ યીશુઃ સ્થાનાન્તરમ્ આગમત્|
XIV તતઃ પરં યેશુ ર્મન્દિરે તં નરં સાક્ષાત્પ્રાપ્યાકથયત્ પશ્યેદાનીમ્ અનામયો જાતોસિ યથાધિકા દુર્દશા ન ઘટતે તદ્ધેતોઃ પાપં કર્મ્મ
પુનર્માકાર્ષીઃ|
XV તતઃ સ ગત્વા યિહૂદીયાન્ અવદદ્ યીશુ ર્મામ્ અરોગિણમ્ અકાર્ષીત્|
XVI તતો યીશુ ર્વિશ્રામવારે કર્મ્મેદૃશં કૃતવાન્ ઇતિ હેતો ર્યિહૂદીયાસ્તં તાડયિત્વા હન્તુમ્ અચેષ્ટન્ત|
XVII યીશુસ્તાનાખ્યત્ મમ પિતા યત્ કાર્ય્યં કરોતિ તદનુરૂપમ્ અહમપિ કરોતિ|
XVIII તતો યિહૂદીયાસ્તં હન્તું પુનરયતન્ત યતો વિશ્રામવારં નામન્યત તદેવ કેવલં ન અધિકન્તુ ઈશ્વરં સ્વપિતરં પ્રોચ્ય
સ્વમપીશ્વરતુલ્યં કૃતવાન્|
XIX પશ્ચાદ્ યીશુરવદદ્ યુષ્માનહં યથાર્થતરં વદામિ પુત્રઃ પિતરં યદ્યત્ કર્મ્મ કુર્વ્વન્તં પશ્યતિ તદતિરિક્તં સ્વેચ્છાતઃ કિમપિ કર્મ્મ
કર્ત્તું ન શક્નોતિ| પિતા યત્ કરોતિ પુત્રોપિ તદેવ કરોતિ|
XX પિતા પુત્રે સ્નેહં કરોતિ તસ્માત્ સ્વયં યદ્યત્ કર્મ્મ કરોતિ તત્સર્વ્વં પુત્રં દર્શયતિ ; યથા ચ યુષ્માકં આશ્ચર્ય્યજ્ઞાનં જનિષ્યતે
તદર્થમ્ ઇતોપિ મહાકર્મ્મ તં દર્શયિષ્યતિ|
XXI વસ્તુતસ્તુ પિતા યથા પ્રમિતાન્ ઉત્થાપ્ય સજિવાન્ કરોતિ તદ્વત્ પુત્રોપિ યં યં ઇચ્છતિ તં તં સજીવં કરોતિ|
XXII સર્વ્વે પિતરં યથા સત્કુર્વ્વન્તિ તથા પુત્રમપિ સત્કારયિતું પિતા સ્વયં કસ્યાપિ વિચારમકૃત્વા સર્વ્વવિચારાણાં ભારં પુત્રે
સમર્પિતવાન્|
XXIII યઃ પુત્રં સત્ કરોતિ સ તસ્ય પ્રેરકમપિ સત્ કરોતિ|
XXIV યુષ્માનાહં યથાર્થતરં વદામિ યો જનો મમ વાક્યં શ્રુત્વા મત્પ્રેરકે વિશ્વસિતિ સોનન્તાયુઃ પ્રાપ્નોતિ કદાપિ દણ્ડબાજનં ન
ભવતિ નિધનાદુત્થાય પરમાયુઃ પ્રાપ્નોતિ|
XXV અહં યુષ્માનતિયથાર્થં વદામિ યદા મૃતા ઈશ્વરપુત્રસ્ય નિનાદં શ્રોષ્યન્તિ યે ચ શ્રોષ્યન્તિ તે સજીવા ભવિષ્યન્તિ સમય
એતાદૃશ આયાતિ વરમ્ ઇદાનીમપ્યુપતિષ્ઠતિ|
XXVI પિતા યથા સ્વયઞ્જીવી તથા પુત્રાય સ્વયઞ્જીવિત્વાધિકારં દત્તવાન્|
XXVII સ મનુષ્યપુત્રઃ એતસ્માત્ કારણાત્ પિતા દણ્ડકરણાધિકારમપિ તસ્મિન્ સમર્પિતવાન્|
XXVIII એતદર્થે યૂયમ્ આશ્ચર્ય્યં ન મન્યધ્વં યતો યસ્મિન્ સમયે તસ્ય નિનાદં શ્રુત્વા શ્મશાનસ્થાઃ સર્વ્વે બહિરાગમિષ્યન્તિ સમય
એતાદૃશ ઉપસ્થાસ્યતિ|
XXIX તસ્માદ્ યે સત્કર્મ્માણિ કૃતવન્તસ્ત ઉત્થાય આયુઃ પ્રાપ્સ્યન્તિ યે ચ કુકર્મ્માણિ કૃતવન્તસ્ત ઉત્થાય દણ્ડં પ્રાપ્સ્યન્તિ|
XXX અહં સ્વયં કિમપિ કર્ત્તું ન શક્નોમિ યથા શુણોમિ તથા વિચારયામિ મમ વિચારઞ્ચ ન્યાય્યઃ યતોહં સ્વીયાભીષ્ટં નેહિત્વા
મત્પ્રેરયિતુઃ પિતુરિષ્ટમ્ ઈહે|
XXXI યદિ સ્વસ્મિન્ સ્વયં સાક્ષ્યં દદામિ તર્હિ તત્સાક્ષ્યમ્ આગ્રાહ્યં ભવતિ ;
XXXII કિન્તુ મદર્થેઽપરો જનઃ સાક્ષ્યં દદાતિ મદર્થે તસ્ય યત્ સાક્ષ્યં તત્ સત્યમ્ એતદપ્યહં જાનામિ|
XXXIII યુષ્માભિ ર્યોહનં પ્રતિ લોકેષુ પ્રેરિતેષુ સ સત્યકથાયાં સાક્ષ્યમદદાત્|
XXXIV માનુષાદહં સાક્ષ્યં નોપેક્ષે તથાપિ યૂયં યથા પરિત્રયધ્વે તદર્થમ્ ઇદં વાક્યં વદામિ|
XXXV યોહન્ દેદીપ્યમાનો દીપ ઇવ તેજસ્વી સ્થિતવાન્ યૂયમ્ અલ્પકાલં તસ્ય દીપ્ત્યાનન્દિતું સમમન્યધ્વં|
XXXVI કિન્તુ તત્પ્રમાણાદપિ મમ ગુરુતરં પ્રમાણં વિદ્યતે પિતા માં પ્રેષ્ય યદ્યત્ કર્મ્મ સમાપયિતું શક્તિમદદાત્ મયા કૃતં તત્તત્
કર્મ્મ મદર્થે પ્રમાણં દદાતિ|
XXXVII યઃ પિતા માં પ્રેરિતવાન્ મોપિ મદર્થે પ્રમાણં દદાતિ| તસ્ય વાક્યં યુષ્માભિઃ કદાપિ ન શ્રુતં તસ્ય રૂપઞ્ચ ન દૃષ્ટં
XXXVIII તસ્ય વાક્યઞ્ચ યુષ્માકમ્ અન્તઃ કદાપિ સ્થાનં નાપ્નોતિ યતઃ સ યં પ્રેષિતવાન્ યૂયં તસ્મિન્ ન વિશ્વસિથ|

XXXIX ધર્મ્મપુસ્તકાનિ યૂયમ્ આલોચયધ્વં તૈ ર્વાક્યૈરનન્તાયુઃ પ્રાપ્સ્યામ ઇતિ યૂયં બુધ્યધ્વે તદ્ધર્મ્મપુસ્તકાનિ મદર્થે પ્રમાણં દદતિ।
XL તથાપિ યૂયં પરમાયુઃપ્રાપ્તયે મમ સંનિધિમ્ ન જિગમિષથ।
XLI અહં માનુષેભ્યઃ સત્કારં ન ગૃહ્લામિ।
XLII અહં યુષ્માન્ જાનામિ; યુષ્માકમન્તર ઈશ્વરપ્રેમ નાસ્તિ।
XLIII અહં નિજપિતુ ર્નામ્નાગતોસ્મિ તથાપિ માં ન ગૃહ્લીથ કિન્તુ કશ્ચિદ્ યદિ સ્વનામ્ના સમાગમિષ્યતિ તર્હિ તં ગ્રહીષ્યથ।
XLIV યૂયમ્ ઈશ્વરાત્ સત્કારં ન ચિષ્ટત્વા કેવલં પરસ્પરં સત્કારમ્ ચેદ્ આદધ્વે તર્હિ કથં વિશ્વસિતું શક્નુથ?
XLV પુતુઃ સમીપેઽહં યુષ્માન્ અપવદિષ્યામીતિ મા ચિન્તયત યસ્મિન્, યસ્મિન્ યુષ્માકં વિશ્વસઃ સએવ મૂસા યુષ્માન્ અપવદતિ।
XLVI યદિ યૂયં તસ્મિન્ વ્યશ્વસિષ્યત તર્હિ મય્યપિ વ્યશ્વસિષ્યત, યત્ સ મયિ લિખિતવાન્।
XLVII તતો યદિ તેન લિખિતવાનિ ન પ્રતિથ તર્હિ મમ વાક્યાનિ કથં પ્રત્યેષ્યથ?

# VI

I તતઃ પરં યીશુ ર્ગાલીલ્ પ્રદેશીયસ્ય તિવિરિયાનામ્નઃ સિન્ધોઃ પારં ગતવાન્।
II તતો વ્યાધિમલ્લોકસ્વાસ્થ્યકરણરૂપાણિ તસ્યાશ્ચર્ય્યાણિ કર્મ્માણિ દૃષ્ટ્વા બહવો જનાસ્તત્પશ્ચાદ્ અગચ્છન્।
III તતો યીશુઃ પર્વ્વતમારુહ્ય તત્ર શિષ્યૈઃ સાકમ્।
IV તસ્મિન્ સમય નિસ્તારોત્સવનામ્નિ યિહૂદીયાનામ ઉત્સવ ઉપસ્થિતે
V યીશુ ર્નેત્રે ઉત્તોલ્ય બહુલોકાન્ સ્વસમીપાગતાન્ વિલોક્ય ફિલિપં પૃષ્ટવાન્ એતેષાં ભોજનાય ભોજદ્રવ્યાણિ વયં કુત્ર ક્રેતું
શક્નુમઃ?
VI વાક્યમિદં તસ્ય પરીક્ષાર્થમ્ અવાદીત્ કિન્તુ યત્ કરિષ્યતિ તત્ સ્વયમ્ અજાનાત્।
VII ફિલિપઃ પ્રત્યવોચત્ એતેષામ્ એકૈકો યદ્યલ્પમ્ અલ્પં પ્રાપ્નોતિ તર્હિ મુદ્રાપાદદ્વિશતેન ક્રીતપૂપા અપિ ન્યૂના ભવિષ્યન્તિ।
VIII શિમોન્ પિતરસ્ય ભ્રાતા આન્દ્રિયાખ્યઃ શિષ્યાણામેકો વ્યાહૃતવાન્
IX અત્ર કસ્યચિદ્ બાલકસ્ય સમીપે પઞ્ચ યાવપૂપાઃ ક્ષુદ્રમત્સ્યદ્વયઞ્ચ સન્તિ કિન્તુ લોકાનાં એતાવાતાં મધ્યે તૈઃ કિં ભવિષ્યતિ?
X પશ્ચાદ્ યીશુરવદત્ લોકાનુપવેશયત તત્ર બહુયવસસત્ત્વાત્ પઞ્ચસહસ્ત્રેભ્યો ન્યૂના અધિકા વા પુરુષા ભૂમ્યામ્ ઉપાવિશન્।
XI તતો યીશુસ્તાન્ પૂપાનાદાય ઈશ્વરસ્ય ગુણાન્ કીર્ત્તયિત્વા શિષ્યેષુ સમાર્પયત્ તતસ્તે તેભ્ય ઉપવિષ્ટલોકેભ્યઃ પૂપાન્
યથેષ્ટમત્સ્યઞ્ચ પ્રાદુઃ।
XII તેષુ તૃપ્તેષુ સ તાનવોચદ્ એતેષાં કિઞ્ચિદપિ યથા નાપચીયતે તથા સર્વ્વાણ્યવશિષ્ટાનિ સંગૃહ્લીત।
XIII તતઃ સર્વ્વેષાં ભોજનાત્ પરં તે તેષાં પઞ્ચાનાં યાવપૂપાનાં અવશિષ્ટાન્યખિલાનિ સંગૃહ્ય દ્વાદશડલ્લકાન્ અપૂરયન્।
XIV અપરં યીશોરેતાદૃશીમ્ આશ્ચર્ય્યક્રિયાં દૃષ્ટ્વા લોકા મિથો વક્તુમારેભિરે જગતિ યસ્યાગમનં ભવિષ્યતિ સ એવાયમ્ અવશ્યં
ભવિષ્યદ્વક્તા।
XV અતએવ લોકા આગત્ય તમાક્રમ્ય રાજાનં કરિષ્યન્તિ યીશુસ્તેષામ્ ઈદૃશં માનસં વિજ્ઞાય પુનશ્ચ પર્વ્વતમ્ એકાકી ગતવાન્।
XVI સાયંકાલ ઉપસ્થિતે શિષ્યા જલધિતટં વ્રજિત્વા નાવમારુહ્ય નગરદિશિ સિન્ધૌ વાહયિત્વાગમન્।
XVII તસ્મિન્ સમયે તિમિર ઉપાતિષ્ઠત્ કિન્તુ યીષુસ્તેષાં સમીપં નાગચ્છત્।
XVIII તદા પ્રબલપવનવહનાત્ સાગરે મહાતરઙ્ગો ભવિતુમ્ આરેભે।
XIX તતસ્તે વાહયિત્વા દ્વિત્રાન્ ક્રોશાન્ ગતાઃ પશ્ચાદ્ યીશું જલધેરુપરિ પદ્ભ્યાં વ્રજન્તં નૌકાન્તિકમ્ આગચ્છન્તં વિલોક્ય
ત્રાસયુક્તા અભવન્
XX કિન્તુ સ તાનુક્તવાન્ અયમહં મા ભૈષ્ટ।
XXI તદા તે તં સ્વૈરં નાવિ ગૃહીતવન્તઃ તદા તત્ક્ષણાદ્ ઉદ્દિષ્ટસ્થાને નૌરુપાસ્થાત્।
XXII યયા નાવા શિષ્યા અગચ્છન્ તદન્યા કાપિ નૌકા તસ્મિન્ સ્થાને નાસીત્ તતો યીશુઃ શિષ્યૈઃ સાકં નાગમત્ કેવલાઃ શિષ્યા
અગમન્ એતત્ પારસ્થા લોકા જ્ઞાતવન્તઃ।
XXIII કિન્તુ તતઃ પરં પ્રભુ ર્યત્ર ઈશ્વરસ્ય ગુણાન્ અનુકીર્ત્ત્ય લોકાન્ પૂપાન્ અભોજયત્ તત્સ્થાનસ્ય સમીપસ્થતિવિરિયાયા
અપરાસ્તરણય આગમન્।
XXIV યીશુસ્તત્ર નાસ્તિ શિષ્યા અપિ તત્ર ના સન્તિ લોકા ઇતિ વિજ્ઞાય યીશું ગવેષયિતું તરણિભિઃ કફર્નાહૂમ્ પુરં ગતાઃ।
XXV તતસ્તે સરિત્પતેઃ પારે તં સાક્ષાત્ પ્રાપ્ય પ્રાવોચન્ હે ગુરો ભવાન્ અત્ર સ્થાને કદાગમત્?
XXVI તદા યીશુસ્તાન્ પ્રત્યવાદીદ્ યુષ્માનહં યથાર્થતરં વદામિ આશ્ચર્ય્યકર્મ્મદર્શનાદ્ધેતો ર્ન કિન્તુ પૂપભોજનાત્ તેન તૃપ્તત્વાઞ્ચ
માં ગવેષયથ।
XXVII ક્ષયણીયભક્ષ્યાર્થં મા શ્રામિષ્ટ કિન્ત્વન્તાયુર્ભક્ષ્યાર્થં શ્રામ્યત, તસ્માત્ તાદૃશં ભક્ષ્યં મનુજપુત્રો યુષ્માભ્યં દાસ્યતિ; તસ્મિન્
તાત ઈશ્વરઃ પ્રમાણં પ્રાદાત્।
XXVIII તદા તેઽપૃચ્છન્ ઈશ્વરાભિમતં કર્મ્મ કર્ત્તુમ્ અસ્માભિઃ કિં કર્ત્તવ્યં?
XXIX તતો યીશુરવદદ્ ઈશ્વરો યં પ્રૈરયત્ તસ્મિન્ વિશ્વસનમ્ ઈશ્વરાભિમતં કર્મ્મ।
XXX તદા તે વ્યાહરન્ ભવતા કિં લક્ષણં દર્શિતં યદ્દૃષ્ટ્વા ભવતિ વિશ્વસિષ્યામઃ? ત્વયા કિં કર્મ્મ કૃતં?
XXXI અસ્માકં પૂર્વ્વપુરુષા મહાપ્રાન્તરે માન્નાં ભોક્તું પ્રાપુઃ યથા લિપિરાસ્તે। સ્વર્ગીયાણિ તુ ભક્ષ્યાણિ પ્રદદૌ પરમેશ્વરઃ।
XXXII તદા યીશુરવદદ્ અહં યુષ્માનતિયથાર્થં વદામિ મૂસા યુષ્માભ્યં સ્વર્ગીયં ભક્ષ્યં નાદાત્ કિન્તુ મમ પિતા યુષ્માભ્યં સ્વર્ગીયં
પરમં ભક્ષ્યં દદાતિ।
XXXIII યઃ સ્વર્ગાદવરુહ્ય જગતે જીવનં દદાતિ સ ઈશ્વરદત્તભક્ષ્યરૂપઃ।
XXXIV તદા તે પ્રાવોચન્ હે પ્રભો ભક્ષ્યમિદં નિત્યમસ્મભ્યં દદાતુ।

XXXV યીશુરવદદ્ અહમેવ જીવનરૂપં ભક્ષ્યં યો જનો મમ સન્નિધિમ્ આગચ્છતિ સ જાતુ ક્ષુધાર્ત્તો ન ભવિષ્યતિ, તથા યો જનો
માં પ્રત્યેતિ સ જાતુ તૃષાર્ત્તો ન ભવિષ્યતિ।
XXXVI માં દૃષ્ટ્વાપિ યૂયં ન વિશ્વસિથ યુષ્માનહમ્ ઇત્યવોચં।
XXXVII પિતા મહ્યં યાવતો લોકાનદદાત્ તે સર્વ્વ એવ મમાન્તિકમ્ આગમિષ્યન્તિ યઃ કશ્ચિચ્ચ મમ સન્નિધિમ્ આયાસ્યતિ તં
કેનાપિ પ્રકારેણ ન દૂરીકરિષ્યામિ।
XXXVIII નિજાભિમતં સાધયિતું ન હિ કિન્તુ પ્રેરયિતુરભિમતં સાધયિતું સ્વર્ગાદ્ આગતોસ્મિ।
XXXIX સ યાન્ યાન્ લોકાન્ મહ્યમદદાત્ તેષામેકમપિ ન હારયિત્વા શેષદિને સર્વ્વાનહમ્ ઉત્થાપયામિ ઇદં મત્પ્રેરયિતુઃ
પિતુરભિમતં।
XL યઃ કશ્ચિન્ માનવસુતં વિલોક્ય વિશ્વસિતિ સ શેષદિને મયોત્થાપિતઃ સન્ અનન્તાયુઃ પ્રાપ્સ્યતિ ઇતિ મત્પ્રેરકસ્યાભિમતં।
XLI તદા સ્વર્ગાદ્ યદ્ ભક્ષ્યમ્ અવારોહત્ તદ્ ભક્ષ્યમ્ અહમેવ યિહૂદીયલોકાસ્તસ્યૈતદ્ વાક્યે વિવદમાના વક્તુમારેભિરે
XLII યૂષફઃ પુત્રો યીશુ ર્યસ્ય માતાપિતરૌ વયં જાનીમ એષ કિં સએવ ન? તર્હિ સ્વર્ગાદ્ અવારોહમ્ ઇતિ વાક્યં કથં વક્તિ?
XLIII તદા યીશુસ્તાન્ પ્રત્યવદત્ પરસ્પરં મા વિવદધ્વં
XLIV મત્પ્રેરકેણ પિત્રા નાકૃષ્ટઃ કોપિ જનો મમાન્તિકમ્ આયાતું ન શક્નોતિ કિન્ત્વાગતં જનં ચરમેઽહ્નિ પ્રોત્થાપયિષ્યામિ।
XLV તે સર્વ્વ ઈશ્વરેણ શિક્ષિતા ભવિષ્યન્તિ ભવિષ્યદ્વાદિનાં ગ્રન્થેષુ લિપિરિત્થમાસ્તે અતો યઃ કશ્ચિત્ પિતુઃ સકાશાત્ શ્રુત્વા
શિક્ષતે સ એવ મમ સમીપમ્ આગમિષ્યતિ।
XLVI ય ઈશ્વરાદ્ અજાયત તં વિના કોપિ મનુષ્યો જનકં નાદર્શત્ કેવલઃ સએવ તાતમ્ અદ્રાક્ષીત્।
XLVII અહં યુષ્માન્ યથાર્થતરં વદામિ યો જનો મયિ વિશ્વાસં કરોતિ સોનન્તાયુઃ પ્રાપ્નોતિ।
XLVIII અહમેવ તજ્જીવનભક્ષ્યં।
XLIX યુષ્માકં પૂર્વ્વપુરુષા મહાપ્રાન્તરે મન્નાભક્ષ્યં ભૂક્ત્તાપિ મૃતાઃ
L કિન્તુ યદ્ભક્ષ્યં સ્વર્ગાદાગચ્છત્ તદ્ યદિ કશ્ચિદ્ ભુઙ્ક્તે તર્હિ સ ન મ્રિયતે।
LI યજ્જીવનભક્ષ્યં સ્વર્ગાદાગચ્છત્ સોહમેવ ઇદં ભક્ષ્યં યો જનો ભુઙ્ક્તે સ નિત્યજીવી ભવિષ્યતિ। પુનશ્ચ જગતો જીવનાર્થમહં
યત્ સ્વકીયપિશિતં દાસ્યામિ તદેવ મયા વિતરિતં ભક્ષ્યમ્।
LII તસ્માદ્ યિહૂદીયાઃ પરસ્પરં વિવદમાના વક્તુમારેભિરે એષ ભોજનાર્થં સ્વીયં પલલં કથમ્ અસ્મભ્યં દાસ્યતિ?
LIII તદા યીશુસ્તાન્ આવોચદ્ યુષ્માનહં યથાર્થતરં વદામિ મનુષ્યપુત્રસ્યામિષે યુષ્માભિ ર્ન ભુક્ત્તે તસ્ય રુધિરે ચ ન પીતે જીવનેન
સાર્દ્ધં યુષ્માકં સમ્બન્ધો નાસ્તિ।
LIV યો મમામિષં સ્વાદતિ મમ સુધિરઞ્ચ પિવતિ સોનન્તાયુઃ પ્રાપ્નોતિ તતઃ શેષેઽહ્નિ તમહમ્ ઉત્થાપયિષ્યામિ।
LV યતો મદીયમામિષં પરમં ભક્ષ્યં તથા મદીયં શોણિતં પરમં પેયં।
LVI યો જનો મદીયં પલલં સ્વાદતિ મદીયં રુધિરઞ્ચ પિવતિ સ મયિ વસતિ તસ્મિન્નહઞ્ચ વસામિ।
LVII મત્પ્રેરયિત્રા જીવતા તાતેન યથાહં જીવામિ તદ્વદ્ યઃ કશ્ચિન્ મામત્તિ સોપિ મયા જીવિષ્યતિ।
LVIII યદ્ભક્ષ્યં સ્વર્ગાદાગચ્છત્ તદિદં યન્માન્નાં સ્વાદિત્વા યુષ્માકં પિતરોઽમ્રિયન્ત તાદૃશમ્ ઇદં ભક્ષ્યં ન ભવતિ ઇદં ભક્ષ્યં યો
ભક્ષતિ સ નિત્યં જીવિષ્યતિ।
LIX યદા કફર્નાહૂમ્ પુર્ય્યાં ભજનગેહે ઉપાદિશત્ તદા કથા એતા અકથયત્।
LX તદેત્થં શ્રુત્વા તસ્ય શિષ્યાણામ્ અનેકે પરસ્પરમ્ અકથયન્ ઇદં ગાઢં વાક્યં વાક્યમીદૃશં કઃ શ્રોતું શક્નુયાત્?
LXI કિન્તુ યીશુઃ શિષ્યાણામ્ ઇત્થં વિવાદં સ્વચિત્તે વિજ્ઞાય કથિતવાન્ ઇદં વાક્યં કિં યુષ્માકં વિઘ્નં જનયતિ?
LXII યદિ મનુજસુતં પૂર્વ્વવાસસ્થાનમ્ ઊર્દ્ધ્વં ગચ્છન્તં પશ્યથ તર્હિ કિં ભવિષ્યતિ?
LXIII આત્મૈવ જીવનદાયકઃ વપુ ર્નિષ્ફલં યુષ્મભ્યમહં યાનિ વચાંસિ કથયામિ તાન્યાત્મા જીવનઞ્ચ।
LXIV કિન્તુ યુષ્માકં મધ્યે કેચન અવિશ્વાસિનઃ સન્તિ કે કે ન વિશ્વસન્તિ કો વા તં પરકરેષુ સમર્પયિષ્યતિ તાન્ યીશુરાપ્રથમાદ્
વેત્તિ।
LXV અપરમપિ કથિતવાન્ અસ્માત્ કારણાદ્ અકથયં પિતુઃ સકાશાત્ શક્તિમપ્રાપ્ય કોપિ મમાન્તિકમ્ આગન્તું ન શક્નોતિ।
LXVI તત્કાલેઽનેકે શિષ્યા વ્યાઘુટ્ય તેન સાર્દ્ધં પુન ર્નાગચ્છન્।
LXVII તદા યીશુ ર્દ્વાદશશિષ્યાન્ ઉક્ત્તવાન્ યૂયમપિ કિં યાસ્યથ?
LXVIII તતઃ શિમોન્ પિતરઃ પ્રત્યવોચત્ હે પ્રભો કસ્યાભ્યર્ણં ગમિષ્યામઃ?
LXIX અનન્તજીવનદાયિન્યો યાઃ કથાસ્તાસ્તવૈવ। ભવાન્ અમરેશ્વરસ્યાભિષિક્તપુત્ર ઇતિ વિશ્વસ્ય નિશ્ચિતં જાનીમઃ।
LXX તદા યીશુરવદત્ કિમહં યુષ્માકં દ્વાદશજનાન્ મનોનીતાન્ ન કૃતવાન્? કિન્તુ યુષ્માકં મધ્યેપિ કશ્ચિદેકો વિઘ્નકારી વિદ્યતે।
LXXI ઇમાં કથં સ શિમોનઃ પુત્રમ્ ઈષ્કરીયોતીયં યિહૂદામ્ ઉદ્દિશ્ય કથિતવાન્ યતો દ્વાદશાનાં મધ્યે ગણિતઃ સ તં પરકરેષુ
સમર્પયિષ્યતિ।

# VII

I તતઃ પરં યિહૂદીયલોકાસ્તં હન્તું સમૈહન્ત તસ્માદ્ યીશુ ર્યિહૂદાપ્રદેશે પર્ય્યટિતું નેચ્છન્ ગાલીલ્ પ્રદેશે પર્ય્યટિતું પ્રારભત।
II કિન્તુ તસ્મિન્ સમયે યિહૂદીયાનાં દૂષ્યવાસનામોત્સવ ઉપસ્થિતે
III તસ્ય ભ્રાતરસ્તમ્ અવદન્ યાનિ કર્મ્માણિ ત્વયા ક્રિયન્તે તાનિ યથા તવ શિષ્યાઃ પશ્યન્તિ તદર્થં ત્વમિતઃ સ્થાનાદ્ યિહૂદીયદેશં
વ્રજ।
IV યઃ કશ્ચિત્ સ્વયં પ્રચિકાશિષતિ સ કદાપિ ગુપ્તં કર્મ્મ ન કરોતિ યદીદૃશં કર્મ્મ કરોષિ તર્હિ જગતિ નિજં પરિચાયય।
V યતસ્તસ્ય ભ્રાતરોપિ તં ન વિશ્વસન્તિ।
VI તદા યીશુસ્તાન્ અવોચત્ મમ સમય ઇદાનીં નોપતિષ્ઠતિ કિન્તુ યુષ્માકં સમયઃ સતતમ્ ઉપતિષ્ઠતિ।

VII જગતો લોકા યુષ્માન્ ઋતીયિતું ન શક્નુવન્તિ કિન્તુ મામેવ ઋતીયન્તે યતસ્તેષાં કર્મ્માણિ દુષ્ટાનિ તત્ર સાક્ષ્યમિદમ્ અહં દદામિ।
VIII અતએવ યૂયમ્ ઉત્સવેઽસ્મિન્ યાત નાહમ્ ઇદાનીમ્ અસ્મિન્નુત્સવે યામિ યતો મમ સમય ઇદાનીં ન સમ્પૂર્ણઃ।
IX ઇતિ વાક્યમ્ ઉક્ત્વા સ ગાલીલિ સ્થિતવાન્
X કિન્તુ તસ્ય ભ્રાતૃષુ તત્ર પ્રસ્થિતેષુ સત્સુ સોઽપ્રકટ ઉત્સવમ્ અગચ્છત્।
XI અનન્તરમ્ ઉત્સવમ્ ઉપસ્થિતા યિહૂદીયાસ્તં મૃગયિત્વાપૃચ્છન્ સ કુત્ર?
XII તતો લોકાનાં મધ્યે તસ્મિન્ નાનાવિધા વિવાદા ભવિતુમ્ આરબ્ધવન્તઃ। કેચિદ્ અવોચન્ સ ઉત્તમઃ પુરુષઃ કેચિદ્ અવોચન્ ન
તથા વરં લોકાનાં ભ્રમં જનયતિ।
XIII કિન્તુ યિહૂદીયાનાં ભયાત્ કોપિ તસ્ય પક્ષે સ્પષ્ટં નાકથયત્।
XIV તતઃ પરમ્ ઉત્સવસ્ય મધ્યસમયે યીશુ ર્મન્દિરં ગત્વા સમુપદિશતિ સ્મ।
XV તતો યિહૂદીયા લોકા આશ્ચર્ય્યં જ્ઞાત્વાકથયન્ એષા માનુષો નાધીત્યા કથમ્ એતાદૃશો વિદ્વાનભૂત્?
XVI તદા યીશુઃ પ્રત્યવોચદ્ ઉપદેશોયં ન મમ કિન્તુ યો માં પ્રેષિતવાન્ તસ્ય।
XVII યો જનો નિદેશં તસ્ય ગ્રહીષ્યતિ મમોપદેશો મત્તો ભવતિ કિમ્ ઈશ્વરાદ્ ભવતિ સ ગનસ્તજ્જ્ઞાતું શક્ષ્યતિ।
XVIII યો જનઃ સ્વતઃ કથયતિ સ સ્વીયં ગૌરવમ્ ઈહતે કિન્તુ યઃ પ્રેરયિતુ ર્ગૌરવમ્ ઈહતે સ સત્યવાદી તસ્મિન્ કોપ્યધર્મ્મો નાસ્તિ।
XIX મૂસા યુષ્મભ્યં વ્યવસ્થાગ્રન્થં કિં નાદદાત્? કિન્તુ યુષ્માકં કોપિ તાં વ્યવસ્થાં ન સમાચરતિ। માં હન્તું કુતો યતધ્વે?
XX તદા લોકા અવદન્ ત્વં ભૂતગ્રસ્તસ્ત્વાં હન્તું કો યતતે?
XXI તતો યીશુરવોચદ્ એકં કર્મ્મ મયાકારિ તસ્માદ્ યૂયં સર્વ્વ મહાશ્ચર્ય્યં મન્યધ્વે।
XXII મૂસા યુષ્મભ્યં ત્વક્છેદવિધિં પ્રદદૌ સ મૂસાતો ન જાતઃ કિન્તુ પિતૃપુરુષેભ્યો જાતઃ તેન વિશ્રામવારેઽપિ માનુષાણાં ત્વક્છેદં
કુરુથ।
XXIII અતએવ વિશ્રામવારે મનુષ્યાણાં ત્વક્છેદે કૃતે યદિ મૂસાવ્યવસ્થામઙ્ગનં ન ભવતિ તર્હિ મયા વિશ્રામવારે માનુષઃ
સમ્પૂર્ણરૂપેણ સ્વસ્થોઽકારિ તત્કારણાદ્ યૂયં કિં મહ્યં કુપ્યથ?
XXIV સપક્ષપાતં વિચારમકૃત્વા ન્યાય્યં વિચારં કુરુત।
XXV તદા યિરૂશાલમ્ નિવાસિનઃ કતિપયજના અકથયન્ ઇમે યં હન્તું ચેષ્ટન્તે સ એવાયં કિં ન?
XXVI કિન્તુ પશ્યત નિર્ભયઃ સન્ કથાં કથયતિ તથાપિ કિમપિ અ વદન્ત્યેતે અયમેવાભિષિક્તો ભવતીતિ નિશ્ચિતં કિમધિપતયો
જાનન્તિ?
XXVII મનુજોયં કસ્માદાગમદ્ ઇતિ વયં જાનોમઃ કિન્ત્વભિષિક્ત આગતે સ કસ્માદાગતવાન્ ઇતિ કોપિ જ્ઞાતું ન શક્ષ્યતિ।
XXVIII તદા યીશુ ર્મધ્યેમન્દિરમ્ ઉપદિશન્ ઉચ્ચૈઃકારમ્ ઉક્તવાન્ યૂયં કિં માં જાનીથ? કસ્માચ્ચાગતોસ્મિ તદપિ કિં જાનીથ?
નાહં સ્વત આગતોસ્મિ કિન્તુ યઃ સત્યવાદી સએવ માં પ્રેષિતવાન્ યૂયં તં ન જાનીથ।
XXIX તમહં જાને તેનાહં પ્રેરિત અગતોસ્મિ।
XXX તસ્માદ્ યિહૂદીયાસ્તં ધર્ત્તુમ્ ઉદ્યતાસ્તથાપિ કોપિ તસ્ય ગાત્રે હસ્તં નાર્પયદ્ યતો હેતોસ્તદા તસ્ય સમયો નોપતિષ્ઠતિ।
XXXI કિન્તુ બહવો લોકાસ્તસ્મિન્ વિશ્વસ્ય કથિતવાન્તોઽભિષિક્તપુરુષ આગત્ય માનુષસ્યાસ્ય ક્રિયાભ્યઃ કિમ્ અધિકા
આશ્ચર્ય્યાઃ ક્રિયાઃ કરિષ્યતિ?
XXXII તતઃ પરં લોકાસ્તસ્મિન્ ઇત્થં વિવદન્તે ફિરૂશિનઃ પ્રધાનયાજકાઞ્ચેતિ શ્રુતવન્તસ્તં ધૃત્વા નેતું પદાતિગણં પ્રેષયામાસુઃ।
XXXIII તતો યીશુરવદદ્ અહમ્ અલ્પદિનાનિ યુષ્માભિઃ સાર્દ્ધં સ્થિત્વા મત્પ્રેરયિતુઃ સમીપં યાસ્યામિ।
XXXIV માં મૃગયિષ્યધ્વે કિન્તૂદ્દેશં ન લપ્સ્યધ્વે રત્ર સ્થાસ્યામિ તત્ર યૂયં ગન્તું ન શક્ષ્યથ।
XXXV તદા યિહૂદીયાઃ પરસ્પરં વક્તુમારેભિરે અસ્યોદ્દેશં ન પ્રાપ્સ્યામ એતાદૃશં કિં સ્થાનં યાસ્યતિ? ભિન્નદેશે વિકીર્ણાનાં
યિહૂદીયાનાં સન્નિધિમ્ એષ ગત્વા તાન્ ઉપદેક્ષ્યતિ કિં?
XXXVI નો ચેત્ માં ગવેષયિષ્યથ કિન્તૂદ્દેશં ન પ્રાપ્સ્યથ એષ કોદૃશં વાક્યમિદં વદતિ?
XXXVII અનન્તરમ્ ઉત્સવસ્ય ચરમેઽહનિ અર્થાત્ પ્રધાનદિને યીશુરુત્તિષ્ઠન્ ઉચ્ચૈઃકારમ્ આહ્વયન્ ઉદિતવાન્ યદિ કશ્ચિત્ તૃષાર્ત્તો
ભવતિ તર્હિ મમાન્તિકમ્ આગત્ય પિવતુ।
XXXVIII યઃ કશ્ચિન્મયિ વિશ્વસિતિ ધર્મ્મગ્રન્થસ્ય વચનાનુસારેણ તસ્યાભ્યન્તરતોઽમૃતતોયસ્ય સ્રોતાંસિ નિર્ગમિષ્યન્તિ।
XXXIX યે તસ્મિન્ વિશ્વસન્તિ ત આત્માનં પ્રાપ્સ્યન્તીત્યર્થે સ ઇદં વાક્યં વ્યાહૃતવાન્ એતત્કાલં યાવદ્ યીશુ ર્વિભવં ન
પ્રાપ્તસ્તસ્માત્ પવિત્ર આત્મા નાદીયત।
XL એતાં વાણીં શ્રુત્વા બહવો લોકા અવદન્ અયમેવ નિશ્ચિતં સ ભવિષ્યદ્વાદી।
XLI કેચિદ્ અકથયન્ એષએવ સોભિષિક્તઃ કિન્તુ કેચિદ્ અવદન્ સોભિષિક્તઃ કિં ગાલીલ્ પ્રદેશે જનિષ્યતે?
XLII સોભિષિક્તો દાયૂદો વંશે દાયૂદો જન્મસ્થાને બૈત્લેહમિ પત્તને જનિષ્યતે ધર્મ્મગ્રન્થે કિમિત્થં લિખિતં નાસ્તિ?
XLIII ઇત્થં તસ્મિન્ લોકાનાં ભિન્નવાક્યતા જાતા।
XLIV કતિપયલોકાસ્તં ધર્ત્તુમ્ ઐચ્છન્ તથાપિ તદ્વપુષિ કોપિ હસ્તં નાર્પયત્।
XLV અનન્તરં પાદાતિગણે પ્રધાનયાજકાનાં ફિરૂશિનાઞ્ચ સમીપમાગતવતિ તે તાન્ અપૃચ્છન્ કુતો હેતોસ્તં નાનયત?
XLVI તદા પદાતયઃ પ્રત્યવદન્ સ માનવ ઇવ કોપિ કદાપિ નોપાદિશત્।
XLVII તતઃ ફિરૂશિનઃ પ્રાવોચન્ યૂયમપિ કિમભ્રામિષ્ટ?
XLVIII અધિપતીનાં ફિરૂશિનાઞ્ચ કોપિ કિં તસ્મિન્ વ્યશ્વસીત્?
XLIX યે શાસ્ત્રં ન જાનન્તિ ત ઇમેઽધમલોકાએવ શાપગ્રસ્તાઃ।
L તદા નિકદીમનામા તેષામેકો યઃ ક્ષણદાયાં યીશોઃ સન્નિધિમ્ અગાત્ સ ઉક્તવાન્
LI તસ્ય વાક્યે ન શ્રુતે કર્મ્માણિ ચ ન વિદિતે ઽસ્માકં વ્યવસ્થા કિં કઞ્ચન મનુજં દોષીકરોતિ?

LII તતસ્તે વ્યાહરન્ ત્વમપિ કિં ગાલીલીયલોકઃ? વિવિચ્ય પશ્ય ગલીલિ કોપિ ભવિષ્યદ્વાદી નોત્પદ્યતે।
LIII તતઃ પરં સર્વ્વે સ્વં સ્વં ગૃહં ગતાઃ કિન્તુ યીશુ ર્જૈતુનનામાનં શિલોચ્ચયં ગતવાન્॥

# VIII

I પ્રત્યૂષે યીશુઃ પનર્મન્દિરમ્ આગચ્છત્
II તતઃ સર્વ્વેષુ લોકેષુ તસ્ય સમીપ આગતેષુ સ ઉપવિશ્ય તાન્ ઉપદેષ્ટુમ્ આરભત।
III તદા અધ્યાપકાઃ ફિરૂશિનશ્ચ વ્યભિચારકર્મ્મણિ ધૃતં સ્ત્રિયમેકામ્ આનિય સર્વ્વેષાં મધ્યે સ્થાપયિત્વા વ્યાહરન્
IV હે ગુરો યોષિતમ્ ઇમાં વ્યભિચારકર્મ્મ કુર્વ્વાણાં લોકા ધૃતવન્તઃ।
V એતાદૃશલોકાઃ પાષાણાઘાતેન હન્તવ્યા ઇતિ વિધિર્મૂસાવ્યવસ્થાગ્રન્થે લિખિતોસ્તિ કિન્તુ ભવાન્ કિમાદિશતિ?
VI તે તમપવદિતું પરીક્ષાભિપ્રાયેણ વાક્યમિદમ્ અપૃચ્છન્ કિન્તુ સ પ્રહ્વીભૂય ભૂમાવઙ્ગુલ્યા લેખિતુમ્ આરભત।
VII તતસ્તૈઃ પુનઃ પુનઃ પૃષ્ટ ઉત્થાય કથિતવાન્ યુષ્માકં મધ્યે યો જનો નિરપરાધી સએવ પ્રથમમ્ એનાં પાષાણેનાહન્તુ।
VIII પશ્ચાત્ સ પુનશ્ચ પ્રહ્વીભૂય ભૂમૌ લેખિતુમ્ આરભત।
IX તાં કથં શ્રુત્વા તે સ્વસ્વમનસિ પ્રબોધં પ્રાપ્ય જ્યેષ્ઠાનુક્રમં એકૈકશઃ સર્વ્વે બહિરગચ્છન્ તતો યીશુરેકાકી તયક્તોભવત્
મધ્યસ્થાને દણ્ડાયમાના સા યોષા ચ સ્થિતા।
X તત્પશ્ચાદ્ યીશુરુત્થાય તાં વનિતાં વિના કમપ્યપરં ન વિલોક્ય પૃષ્ટવાન્ હે વામે તવાપવાદકાઃ કુત્ર? કોપિ ત્વાં કિં ન દણ્ડયતિ?
XI સાવદત્ હે મહેચ્છ કોપિ ન તદા યીશુરવોચત્ નાહમપિ દણ્ડયામિ યાહિ પુનઃ પાપં માકાર્ષીઃ।
XII તતો યીશુઃ પુનરપિ લોકેભ્ય ઇત્થં કથયિતુમ્ આરભત જગતોહં જ્યોતિઃસ્વરૂપો યઃ કશ્ચિન્ મત્પશ્ચાદ ગચ્છતિ સ તિમિરે ન
ભ્રમિત્વા જીવનરૂપાં દીપ્તિં પ્રાપ્સ્યતિ।
XIII તતઃ ફિરૂશિનોઽવાદિષુસ્ત્વં સ્વાર્થે સ્વયં સાક્ષ્યં દદાસિ તસ્માત્ તવ સાક્ષ્યં ગ્રાહ્યં ન ભવતિ।
XIV તદા યીશુઃ પ્રત્યુદિતવાન્ યદ્યપિ સ્વાર્થેઽહં સ્વયં સાક્ષ્યં દદામિ તથાપિ મત્ સાક્ષ્યં ગ્રાહ્યં યસ્માદ્ અહં કુત આગતોસ્મિ ક્વ
યામિ ચ તદહં જાનામિ કિન્તુ કુત આગતોસ્મિ કુત્ર ગચ્છામિ ચ તદ્ યૂયં ન જાનીથ।
XV યૂયં લૌકિકં વિચારયથ નાહં કિમપિ વિચારયામિ।
XVI કિન્તુ યદિ વિચારયામિ તર્હિ મમ વિચારો ગ્રહીતવ્યો યતોહમ્ એકાકી નાસ્મિ પ્રેરયિતા પિતા મયા સહ વિદ્યતે।
XVII દ્વયો ર્જનયોઃ સાક્ષ્યં ગ્રહણીયં ભવતીતિ યુષ્માકં વ્યવસ્થાગ્રન્થે લિખિતમસ્તિ।
XVIII અહં સ્વાર્થે સ્વયં સાક્ષિત્વં દદામિ યશ્ચ મમ તાતો માં પ્રેરિતવાન્ સોપિ મદર્થે સાક્ષ્યં દદાતિ।
XIX તદા તેઽપૃચ્છન્ તવ તાતઃ કુત્ર? તતો યીશુઃ પ્રત્યવાદીદ્ યૂયં માં ન જાનીથ મત્પિતરઞ્ચ ન જાનીથ યદિ મામ્ અક્ષાસ્યત તર્હિ
મમ તાતમપ્યક્ષાસ્યત।
XX યીશુ ર્મન્દિર ઉપદિશ્ય ભણ્ડાગારે કથા એતા અકથયત્ તથાપિ તં પ્રતિ કોપિ કરં નોદતોલયત્।
XXI તતઃ પરં યીશુઃ પુનરુદિતવાન્ અધુનાહં ગચ્છામિ યૂયં માં ગવેષયિષ્યથ કિન્તુ નિજૈઃ પાપૈ ર્મરિષ્યથ યત્ સ્થાનમ્ અહં
યાસ્યામિ તત્ સ્થાનમ્ યૂયં યાતું ન શક્ષ્યથ।
XXII તદા યિહૂદીયાઃ પ્રાવોચન્ કિમયમ્ આત્મઘાતં કરિષ્યતિ? યતો યત્ સ્થાનમ્ અહં યાસ્યામિ તત્ સ્થાનમ્ યૂયં યાતું ન શક્ષ્યથ
ઇતિ વાક્યં બ્રવીતિ।
XXIII તતો યીશુસ્તેભ્યઃ કથિતવાન્ યૂયમ્ અધઃસ્થાનીયા લોકા અહમ્ ઊર્દ્વ્વસ્થાનીયઃ યૂયમ્ એતજ્જગત્સમ્બન્ધીયા અહમ્
એતજ્જગત્સમ્બન્ધીયો ન।
XXIV તસ્માત્ કથિતવાન્ યૂયં નિજૈઃ પાપૈ ર્મરિષ્યથ યતોહં સ પુમાન્ ઇતિ યદિ ન વિશ્વસિથ તર્હિ નિજૈઃ પાપૈ ર્મરિષ્યથ।
XXV તદા તે ઽપૃચ્છન્ કસ્ત્વં? તતો યીશુઃ કથિતવાન્ યુષ્માકં સન્નિધૌ યસ્ય પ્રસ્તાવમ્ આ પ્રથમાત્ કરોમિ સએવ પુરુષોહં।
XXVI યુષ્માસુ મયા બહુવાક્યં વક્તવ્યં વિચારયિતવ્યઞ્ચ કિન્તુ મત્પ્રેરયિતા સત્યવાદી તસ્ય સમીપે યદહં શ્રુતવાન્ તદેવ જગતે
કથયામિ।
XXVII કિન્તુ સ જનકે વાક્યમિદં પ્રોક્તવાન્ ઇતિ તે નાબુધ્યન્ત।
XXVIII તતો યીશુરકથયદ્ યદા મનુષ્યપુત્રમ્ ઊર્દ્ધ્વ ઉત્થાપયિષ્યથ તદાહં સ પુમાન્ કેવલઃ સ્વયં કિમપિ કર્મ્મ ન કરોમિ કિન્તુ
તાતો યથા શિક્ષયતિ તદનુસારેણ વાક્યમિદં વદામીતિ ચ યૂયં જ્ઞાતું શક્ષ્યથ।
XXIX મત્પ્રેરયિતા પિતા મામ્ એકાકિનં ન ત્યજતિ સ મયા સાર્દ્ધં તિષ્ઠતિ યતોહં તદભિમતં કર્મ્મ સદા કરોમિ।
XXX તદા તસ્યૈતાનિ વાક્યાનિ શ્રુત્વા બહુવસ્તાસ્મિન્ વ્યશ્વસન્।
XXXI યે યિહૂદીયા વ્યશ્વસન્ યીશુસ્તેભ્યોઽકથયત્
XXXII મમ વાક્યે યદિ યૂયમ્ આસ્થાં કુરુથ તર્હિ મમ શિષ્યા ભૂત્વા સત્યત્વં જ્ઞાસ્યથ તતઃ સત્યતયા યુષ્માકં મોક્ષો ભવિષ્યતિ।
XXXIII તદા તે પ્રત્યવાદિષુઃ વયમ્ ઇબ્રાહીમો વંશઃ કદાપિ કસ્યાપિ દાસા ન જાતાસ્તર્હિ યુષ્માકં મુક્તિ ર્ભવિષ્યતીતિ વાક્યં કથં
બ્રવીષિ?
XXXIV તદા યીશુઃ પ્રત્યવદદ્ યુષ્માનહં યથાર્થતરં વદામિ યઃ પાપં કરોતિ સ પાપસ્ય દાસઃ।
XXXV દાસશ્ચ નિરન્તરં નિવેશને ન તિષ્ઠતિ કિન્તુ પુત્રો નિરન્તરં તિષ્ઠતિ।
XXXVI અતઃ પુત્રો યદિ યુષ્માન્ મોચયતિ તર્હિ નિતાન્તમેવ મુક્તા ભવિષ્યથ।
XXXVII યુયમ્ ઇબ્રાહીમો વંશ ઇત્યહં જાનામિ કિન્તુ મમ કથા યુષ્માકમ્ અન્તઃકરણેષુ સ્થાનં ન પ્રાપ્નુવન્તિ તસ્માદ્ધેતો ર્માં હન્તુમ્
ઈહધ્વે।
XXXVIII અહં સ્વપિતુઃ સમીપે યદપશ્યં તદેવ કથયામિ તથા યૂયમપિ સ્વપિતુઃ સમીપે યદપશ્યત તદેવ કુરુધ્વે।
XXXIX તદા તે પ્રત્યવોચન્ ઇબ્રાહીમ્ અસ્માકં પિતા તતો યીશુરકથયદ્ યદિ યૂયમ્ ઇબ્રાહીમઃ સન્તાના અભવિષ્યત તર્હિ
ઇબ્રાહીમ આચારણવદ્ આચરિષ્યત।

XL ઈશ્વરસ્ય મુખાત્ સત્યં વાક્યં શ્રુત્વા યુષ્માન્ જ્ઞાપયામિ યોહં તં માં હન્તું ચેષ્ટધ્વે ઇબ્રાહીમ્ એતાદૃશં કર્મ્મ ન ચકાર।
XLI યૂયં સ્વસ્વપિતુઃ કર્મ્માણિ કુરુથ તદા તૈરુક્તં ન વયં જારજાતા અસ્માકમ્ એકએવ પિતાસ્તિ સ એવેશ્વરઃ
XLII તતો યીશુના કથિતમ્ ઈશ્વરો યદિ યુષ્માકં તાતોભવિષ્યત્ તર્હિ યૂયં મયિ પ્રેમાકરિષ્યત યતોહમ્ ઈશ્વરાન્નિર્ગત્યાગતોસ્મિ
સ્વતો નાગતોહં સ માં પ્રાહિણોત્।
XLIII યૂયં મમ વાક્યમિદં ન બુધ્યધ્વે કુતઃ? યતો યૂયં મમોપદેશં સોઢું ન શક્નુથ।
XLIV યૂયં શૈતાન્ પિતુઃ સન્તાના એતસ્માદ્ યુષ્માકં પિતુરભિલાષં પૂરયથ સ આ પ્રથમાત્ નરઘાતી તદન્તઃ સત્યત્વસ્ય લેશોપિ
નાસ્તિ કારણાદતઃ સ સત્યતાયાં નાતિષ્ઠત્ સ યદા મૃષા કથયતિ તદા નિજસ્વભાવાનુસારેણૈવ કથયતિ યતો સ મૃષાભાષી
મૃષોત્પાદકશ્ચ।
XLV અહં તથ્યવાક્યં વદામિ કારણાદસ્માદ્ યૂયં માં ન પ્રતીથ।
XLVI મયિ પાપમસ્તીતિ પ્રમાણં યુષ્માકં કો દાતું શક્નોતિ? યદ્યહં તથ્યવાક્યં વદામિ તર્હિ કુતો માં ન પ્રતિથ?
XLVII યઃ કશ્ચન ઈશ્વરીયો લોકઃ સ ઈશ્વરીયકથાયાં મનો નિધત્તે યૂયમ્ ઈશ્વરીયલોકા ન ભવથ તન્નિદાનાત્ તત્ર ન મનાંસિ નિધદ્વે।
XLVIII તદા યિહૂદીયાઃ પ્રત્યવાદિષુઃ ત્વમેકઃ શોમિરોણીયો ભૂતગ્રસ્તશ્ચ વયં કિમિદં ભદ્રં નાવાદિષ્મ?
XLIX તતો યીશુઃ પ્રત્યવાદીત્ નાહં ભૂતગ્રસ્તઃ કિન્તુ નિજતાતં સમ્મન્યે તસ્માદ્ યૂયં મામ્ અપમન્યધ્વે।
L અહં સ્વસુખ્યાતિં ન ચેષ્ટે કિન્તુ ચેષ્ટિતા વિચારયિતા ચાપર એક આસ્તે।
LI અહં યુષ્મભ્યમ્ અતીવ યથાર્થં કથયામિ યો નરો મદીયં વાચં મન્યતે સ કદાચન નિધનં ન દ્રક્ષ્યતિ।
LII યિહૂદીયાસ્તમવદન્ ત્વં ભૂતગ્રસ્ત ઇતીદાનીમ્ અવૈષ્મ। ઇબ્રાહીમ્ ભવિષ્યદ્વાદિનઞ્ચ સર્વ્વે મૃતાઃ કિન્તુ ત્વં ભાષસે યો નરો મમ
ભારતીં ગૃહ્લાતિ સ જાતુ નિધાનાસ્વાદં ન લપ્સ્યતે।
LIII તર્હિ ત્વં કિમ્ અસ્માકં પૂર્વ્વપુરુષાદ્ ઇબ્રાહીમોપિ મહાન્? યસ્માત્ સોપિ મૃતઃ ભવિષ્યદ્વાદિનોપિ મૃતાઃ ત્વં સ્વં કં પુમાંસં
મનુષે?
LIV યીશુઃ પ્રત્યવોચદ્ યદ્યહં સ્વં સ્વયં સમ્મન્યે તર્હિ મમ તત્ સમ્મનનં કિમપિ ન કિન્તુ મમ તાતો યં યૂયં સ્વીયમ્ ઈશ્વરં ભાષધ્વે
સએવ માં સમ્મનુતે।
LV યૂયં તં નાવગચ્છથ કિન્ત્વહં તમવગચ્છામિ તં નાવગચ્છામીતિ વાક્યં યદિ વદામિ તર્હિ યૂયમિવ મૃષાભાષી ભવામિ કિન્ત્વહં
તમવગચ્છામિ તદાક્ષામપિ ગૃહ્લામિ।
LVI યુષ્માકં પૂર્વ્વપુરુષ ઇબ્રાહીમ્ મમ સમયં દ્રષ્ટુમ્ અતીવાવાઞ્છત્ તન્નિરીક્ષ્યાનન્દચ્ચ।
LVII તદા યિહૂદીયા અપૃચ્છન્ તવ વયઃ પઞ્ચાશદ્વત્સરા ન ત્વં કિમ્ ઇબ્રાહીમમ્ અદ્રાક્ષીઃ?
LVIII યીશુઃ પ્રત્યવાદીદ્ યુષ્માનહં યથાર્થતરં વદામિ ઇબ્રાહીમો જન્મનઃ પૂર્વ્વકાલમારભ્યાહં વિદ્યે।
LIX તદા તે પાષાણાન્ ઉત્તોલ્ય તમાહન્તુમ્ ઉદયચ્છન્ કિન્તુ યીશુ ર્ગુપ્તો મન્તિરાદ્ બહિર્ગત્ય તેષાં મધ્યેન પ્રસ્થિતવાન્।

# IX

I તતઃ પરં યીશુર્ગચ્છન્ માર્ગમધ્યે જન્માન્ધં નરમ્ અપશ્યત્।
II તતઃ શિષ્યાસ્તમ્ અપૃચ્છન્ હે ગુરો નરોયં સ્વપાપેન વા સ્વપિત્રાઃ પાપેનાન્ધોઽજાયત?
III તતઃ સ પ્રત્યુદિતવાન્ એતસ્ય વાસ્ય પિત્રોઃ પાપાદ્ એતાદૃશોભૂદ ઇતિ નહિ કિન્ત્વનેન યથેશ્વરસ્ય કર્મ્મ પ્રકાશ્યતે તદ્ધેતોરેવ।
IV દિને તિષ્ઠતિ મત્પ્રેરયિતુઃ કર્મ્મ મયા કર્ત્તવ્યં યદા કિમપિ કર્મ્મ ન ક્રિયતે તાદૃશી નિશાગચ્છતિ।
V અહં યાવત્કાલં જગતિ તિષ્ઠામિ તાવત્કાલં જગતો જ્યોતિઃસ્વરૂપોસ્મિ।
VI ઇત્યુક્ત્વા ભૂમૌ નિષ્ઠીવં નિક્ષિપ્ય તેન પઙ્કં કૃતવાન્
VII પશ્ચાત્ તત્પઙ્કેન તસ્યાન્ધસ્ય નેત્રે પ્રલિપ્ય તમિત્યાદિશત્ ગત્વા શિલોહે ઽર્થાત્ પ્રેરિતનામ્નિ સરસિ સ્નાહિ। તતોન્ધો ગત્વા
તત્રાસ્નાત્ તતઃ પ્રન્નચક્ષુ ર્ભૂત્વા વ્યાઘુટ્યાગાત્।
VIII અપરઞ્ચ સમીપવાસિનો લોકા યે ચ તં પૂર્વ્વમન્ધમ્ અપશ્યન્ તે બક્તુમ્ આરભન્ત યોન્ધલોકો વર્ત્મન્યુપવિશ્યાભિક્ષત સ
એવાયં જનઃ કિં ન ભવતિ?
IX કેચિદવદન્ સ એવ કેચિદવોચન્ તાદૃશો ભવતિ કિન્તુ સ સ્વયમબ્રવીત્ સ એવાહં ભવામિ।
X અતએવ તે ઽપૃચ્છન્ ત્વં કથં દૃષ્ટિં પાપ્તવાન્?
XI તતઃ સોવદદ્ યીશનામક એકો જનો મમ નયને પઙ્કેન પ્રલિપ્ય ઇત્યાજ્ઞાપયત્ શિલોહકાસારં ગત્વા તત્ર સ્નાહિ। તતસ્તત્ર ગત્વા
મયિ સ્નાતે દૃષ્ટિમહં લબ્ધવાન્।
XII તદા તે ઽવદન્ સ પુમાન્ કુત્ર? તેનોક્તં નાહં જાનામિ।
XIII અપરં તસ્મિન્ પૂર્વ્વાન્ધે જને ફિરૂશિનાં નિકટમ્ આનીતે સતિ ફિરૂશિનોપિ તમપૃચ્છન્ કથં દૃષ્ટિં પ્રાપ્તોસિ?
XIV તતઃ સ કથિતવાન્ સ પઙ્કેન મમ નેત્રે ઽલિમ્પત્ પશ્ચાદ્ સ્નાત્વા દૃષ્ટિમલભે।
XV કિન્તુ યીશુ ર્વિશ્રામવારે કર્દ્દમં કૃત્વા તસ્ય નયને પ્રસન્નેઽકરોદ્ ઇતિકારણાત્ કતિપયફિરૂશિનોઽવદન્
XVI સ પુમાન્ ઈશ્વરાન્ન યતઃ સ વિશ્રામવારં ન મન્યતે। તતોન્યે કેચિત્ પ્રત્યવદન્ પાપી પુમાન્ કિમ્ એતાદૃશમ્ આશ્ચર્ય્યં કર્મ્મ કર્ત્તું
શક્નોતિ?
XVII ઇત્થં તેષાં પરસ્પરં ભિન્નવાક્યત્વમ્ અભવત્। પશ્ચાત્ તે પુનરપિ તં પૂર્વ્વાન્ધં માનુષમ્ અપ્રાક્ષુઃ યો જનસ્તવ ચક્ષુષી પ્રસન્ને
કૃતવાન્ તસ્મિન્ ત્વં કિં વદસિ? સ ઉક્તવાન્ સ ભવિશદ્વાદી।
XVIII સ દૃષ્ટિમ્ આપ્તવાન્ ઇતિ યિહૂદીયાસ્તસ્ય દૃષ્ટિં પ્રાપ્તસ્ય જનસ્ય પિત્રો ર્મુખાદ્ અશ્રુત્વા ન પ્રત્યયન્।
XIX અતએવ તે તાવપૃચ્છન્ યુવયો ર્યં પુત્રં જન્માન્ધં વદથઃ સ કિમયં? તર્હીદાનીં કથં દ્રષ્ટું શક્નોતિ?
XX તતસ્તસ્ય પિતરૌ પ્રત્યવોચતામ્ અયમ્ આવયોઃ પુત્ર આ જનેરન્ધશ્ચ તદપ્યાવાં જાનીવઃ

XXI કિન્ત્વધુના કથં દૃષ્ટિં પ્રાપ્તવાન્ તદાવાં ન્ જાનીવઃ કોસ્ય ચક્ષુષી પ્રસન્ને કૃતવાન્ તદપિ ન જાનીવ એષ વયઃપ્રાપ્ત એનં પૃચ્છત સ્વકથાં સ્વયં વક્ષ્યતિ।

XXII યિહૂદીયાનાં ભયાત્ તસ્ય પિતરૌ વાક્યમિદમ્ અવદતાં યતઃ કોપિ મનુષ્યો યદિ યીશુમ્ અભિષિક્તં વદતિ તર્હિ સ ભજનગૃહાદ્ દૂરીકારિષ્યતે યિહૂદીયા ઇતિ મન્ત્રણામ્ અકુર્વ્વન્

XXIII અતસ્તસ્ય પિતરૌ વ્યાહરતામ્ એષ વયઃપ્રાપ્ત એનં પૃચ્છત।

XXIV તદા તે પુનશ્ચ તં પૂર્વ્વાન્ધમ્ આહૂય વ્યાહરન્ ઈશ્વરસ્ય ગુણાન્ વદ એષ મનુષ્યઃ પાપીતિ વયં જાનીમઃ।

XXV તદા સ ઉક્તવાન્ સ પાપી ન વેતિ નાહં જાને પૂર્વામન્ધ આસમહમ્ અધુના પશ્યામીતિ માત્રં જાનામિ।

XXVI તે પુનરપૃચ્છન્ સ ત્વાં પ્રતિ કિમકરોત્? કથં નેત્રે પ્રસન્ને ઽકરોત્?

XXVII તતઃ સોવાદીદ્ એકકૃત્વોકથયં યૂયં ન શૃણુથ તર્હિ કુતઃ પુનઃ શ્રોતુમ્ ઇચ્છથ? યૂયમપિ કિં તસ્ય શિષ્યા ભવિતુમ્ ઇચ્છથ?

XXVIII તદા તે તં તિરસ્કૃત્ય વ્યાહરન્ ત્વં તસ્ય શિષ્યો વયં મૂસાઃ શિષ્યાઃ।

XXIX મૂસાવક્ત્રેણેશ્વરો જગાદ તજ્જાનીમઃ કિન્ત્વેષ કુત્રત્યલોક ઇતિ ન જાનીમઃ।

XXX સોવદદ્ એષ મમ લોચને પ્રસન્ને ઽકરોત્ તથાપિ કુત્રત્યલોક ઇતિ યૂયં ન જાનીથ એતદ્ આશ્ચર્ય્યં ભવતિ।

XXXI ઈશ્વરઃ પાપિનાં કથાં ન શૃણોતિ કિન્તુ યો જનસ્તસ્મિન્ ભક્તિં કૃત્વા તદિષ્ટક્રિયાં કરોતિ તસ્યૈવ કથાં શૃણોતિ એતદ્ વયં જાનીમઃ।

XXXII કોપિ મનુષ્યો જન્માન્ધાય ચક્ષુષી અદદાત્ જગદારમ્ભાદ્ એતાદૃશીં કથાં કોપિ કદાપિ નાશૃણોત્।

XXXIII અસ્માદ્ એષ મનુષ્યો યદીશ્વરાન્નાજાયત તર્હિ કિઞ્ચિદપીદૃશં કર્મ્મ કર્ત્તું નાશક્નોત્।

XXXIV તે વ્યાહરન્ ત્વં પાપાદ્ અજાયથાઃ કિમસ્માન્ ત્વં શિક્ષયસિ? પશ્ચાત્તે તં બહિરકુર્વ્વન્।

XXXV તદનન્તરં યિહૂદીયૈઃ સ બહિરક્રિયત યીશુરિતિ વાર્ત્તાં શ્રુત્વા તં સાક્ષાત્ પ્રાપ્ય પૃષ્ટવાન્ ઈશ્વરસ્ય પુત્રે ત્વં વિશ્વસિષિ?

XXXVI તદા સ પ્રત્યવોચત્ હે પ્રભો સ કો યત્ તસ્મિન્નહં વિશ્વસિમિ?

XXXVII તતો યીશુઃ કથિતવાન્ ત્વં તં દૃષ્ટવાન્ ત્વયા સાકં યઃ કથં કથયતિ સએવ સઃ।

XXXVIII તદા હે પ્રભો વિશ્વસિમીત્યુક્ત્વા સ તં પ્રણામત્।

XXXIX પશ્ચાદ્ યીશુઃ કથિતવાન્ નયનહીના નયનાનિ પ્રાપ્નુવન્તિ નયનવન્તશ્ચાન્ધા ભવન્તીત્યભિપ્રાયેણ જગદાહમ્ આગચ્છમ્।

XL એતત્ શ્રુત્વા નિકટસ્થાઃ કતિપયાઃ ફિરૂશિનો વ્યાહરન્ વયમપિ કિમન્ધાઃ?

XLI તદા યીશુરવાદીદ્ યદ્યન્ધા અભવત તર્હિ પાપાનિ નાતિષ્ઠન્ કિન્તુ પશ્યામીતિ વાક્યવદનાદ્ યુષ્માકં પાપાનિ તિષ્ઠન્તિ।

# X

I અહં યુષ્માનતિયથાર્થં વદામિ, યો જનો દ્વારેણ ન પ્રવિશ્ય કેનાપ્યન્યેન મેષગૃહં પ્રવિશતિ સ એવ સ્તેનો દસ્યુશ્ચ।

II યો દ્વારેણ પ્રવિશતિ સ એવ મેષપાલકઃ।

III દૌવારિકસ્તસ્મૈ દ્વારં મોચયતિ મેષગણશ્ચ તસ્ય વાક્યં શૃણોતિ સ નિજાન્ મેષાન્ સ્વસ્વનામ્નાહૂય બહિઃ કૃત્વા નયતિ।

IV તથા નિજાન્ મેષાન્ બહિઃ કૃત્વા સ્વયં તેષામ્ અગ્રે ગચ્છતિ, તતો મેષાસ્તસ્ય શબ્દં બુધ્યન્તે, તસ્માત્ તસ્ય પશ્ચાદ્ વ્રજન્તિ।

V કિન્તુ પરસ્ય શબ્દં ન બુધ્યન્તે તસ્માત્ તસ્ય પશ્ચાદ્ વ્રજિષ્યન્તિ વરં તસ્ય સમીપાત્ પલાયિષ્યન્તે।

VI યીશુસ્તેભ્ય ઇમાં દૃષ્ટાન્તકથામ્ અકથયત્ કિન્તુ તેન કથિતકથાયાસ્તાત્પર્ય્યં તે નાબુધ્યન્ત।

VII અતો યીશુઃ પુનરકથયત્, યુષ્માનાહં યથાર્થતરં વ્યાહરામિ, મેષગૃહસ્ય દ્વારમ્ અહમેવ।

VIII મયા ન પ્રવિશ્ય ય આગચ્છન્ તે સ્તેના દસ્યવશ્ચ કિન્તુ મેષાસ્તેષાં કથા નાશૃણ્વન્।

IX અહમેવ દ્વારસ્વરૂપઃ, મયા યઃ કશ્ચિત પ્રવિશતિ સ રક્ષાં પ્રાપ્સ્યતિ તથા બહિરન્તશ્ચ ગમનાગમને કૃત્વા ચરણસ્થાનં પ્રાપ્સ્યતિ।

X યો જનસ્તેનઃ સ કેવલં સ્તૈન્યબધવિનાશાન્ કર્ત્તુમેવ સમાયાતિ કિન્ત્વહમ્ આયુ દર્તુમ્ અર્થાત્ બાહૂલ્યેન તદેવ દાતુમ્ આગચ્છમ્।

XI અહમેવ સત્યમેષપાલકો યસ્તુ સત્યો મેષપાલકઃ સ મેષાર્થં પ્રાણત્યાગં કરોતિ;

XII કિન્તુ યો જનો મેષપાલકો ન, અર્થાદ્ યસ્ય મેષા નિજા ન ભવન્તિ, ય એતાદૃશો વૈતનિકઃ સ વૃકમ્ આગચ્છન્તં દૃષ્ટ્વા મેજવ્રજં વિહાય પલાયતે, તસ્માદ્ વૃકસ્તં વ્રજં ધૃત્વા વિકિરતિ।

XIII વૈતનિકઃ પલાયતે યતઃ સ વેતનાર્થી મેષાર્થં ન ચિન્તયતિ।

XIV અહમેવ સત્યો મેષપાલકઃ, પિતા માં યથા જાનાતિ, અહઞ્ચ યથા પિતરં જાનામિ,

XV તથા નિજાન્ મેષાનપિ જાનામિ, મેષાશ્ચ માં જાનાન્તિ, અહઞ્ચ મેષાર્થં પ્રાણત્યાગં કરોમિ।

XVI અપરઞ્ચ એતદ્ ગૃહીય મેષેભ્યો ભિન્ના અપિ મેષા મમ સન્તિ તે સકલા આનયિતવ્યાઃ; તે મમ શબ્દં શ્રોષ્યન્તિ તત એકો વ્રજ એકો રક્ષકો ભવિષ્યતિ।

XVII પ્રાણાનહં ત્યક્ત્વા પુનઃ પ્રાણાન્ ગ્રહીષ્યામિ, તસ્માત્ પિતા મયિ સ્નેહં કરોતિ।

XVIII કશ્ચિજ્જનો મમ પ્રાણાન્ હન્તું ન શક્નોતિ કિન્તુ સ્વયં તાન્ સમર્પયામિ તાન્ સમર્પયિતું પુનર્ગ્રહીતુઞ્ચ મમ શક્તિરાસ્તે ભારમિમં સ્વપિતુઃ સકાશાત્ પ્રાપ્તોહમ્।

XIX અસ્માદુપદેશાત્ પુનશ્ચ યિહૂદીયાનાં મધ્યે ભિન્નવાક્યતા જાતા।

XX તતો બહવો વ્યાહરન્ એષ ભૂતગ્રસ્ત ઉન્મત્તશ્ચ, કુત એતસ્ય કથાં શૃણુથ?

XXI કેચિદ્ અવદન્ એતસ્ય કથા ભૂતગ્રસ્તસ્ય કથાવન્ન ભવન્તિ, ભૂતઃ કિમ્ અન્ધાય ચક્ષુષી દાતું શક્નોતિ?

XXII શીતકાલે યિરૂશાલમિ મન્દિરોત્સર્ગપર્વ્વણ્યુપસ્થિતે

XXIII યીશુઃ સુલેમાનો નિઃસારેણ ગમનાગમને કરોતિ,

XXIV એતસ્મિન્ સમયે યિહૂદીયાસ્તં વેષ્ટયિત્વા વ્યાહરન્ કતિ કાલાન્ અસ્માકં વિચિકિત્સાં સ્થાપયિષ્યામિ? યદ્યભિષિક્તો ભવતિ તર્હિ તત્ સ્પષ્ટં વદ।

XXV તદા યીશુઃ પ્રત્યવદદ્ અહમ્ અચકથં કિન્તુ યૂયં ન પ્રતીથ, નિજપિતુ ર્નામ્ના યાં યાં ક્રિયાં કરોમિ સા ક્રિયૈવ મમ સાક્ષિસ્વરૂપા।
XXVI કિન્ત્વહં પૂર્વ્વમકથયં યૂયં મમ મેષા ન ભવથ, કારણાદસ્માન્ ન વિશ્વસિથ।
XXVII મમ મેષા મમ શબ્દં શૃણ્વન્તિ તાનહં જાનામિ તે ચ મમ પશ્ચાદ્ ગચ્છન્તિ।
XXVIII અહં તેભ્યોઽનન્તાયુ ર્દદામિ, તે કદાપિ ન નંક્ષ્યન્તિ કોપિ મમ કરાત્ તાન્ હર્ત્તું ન શક્ષ્યતિ।
XXIX યો મમ પિતા તાન્ મહ્યં દત્તવાન્ સ સર્વ્વસ્માત્ મહાન્, કોપિ મમ પિતુઃ કરાત્ તાન્ હર્ત્તું ન શક્ષ્યતિ।
XXX અહં પિતા ચ દ્વયોરેકત્વમ્।
XXXI તતો યિહૂદીયાઃ પુનરપિ તં હન્તું પાષાણાન્ ઉદતોલયન્।
XXXII યીશુઃ કથિતવાન્ પિતુઃ સકાશાદ્ બહૂન્યુત્તમકર્મ્માણિ યુષ્માકં પ્રાકાશયં તેષાં કસ્ય કર્મ્મણઃ કારણાન્ માં પાષાણૈરાહન્તુમ્ ઉદ્યતાઃ સ્થ?
XXXIII યિહૂદીયાઃ પ્રત્યવદન્ પ્રશસ્તકર્મ્મહેતો ર્ન કિન્તુ ત્વં માનુષઃ સ્વમીશ્વરમ્ ઉક્ત્વેશ્વરં નિન્દસિ કારણાદસ્માત્ ત્વાં પાષાણૈર્હન્મઃ।
XXXIV તદા યીશુઃ પ્રત્યુક્તવાન્ મયા કથિતં યૂયમ્ ઈશ્વરા એતદ્વચનં યુષ્માકં શાસ્ત્રે લિખિતં નાસ્તિ કિં?
XXXV તસ્માદ્ યેષામ્ ઉદ્દેશે ઈશ્વરસ્ય કથા કથિતા તે યદીશ્વરગણા ઉચ્યન્તે ધર્મ્મગ્રન્થસ્યાપ્યન્યથા ભવિતું ન શક્યં,
XXXVI તર્હ્યાહમ્ ઈશ્વરસ્ય પુત્ર ઇતિ વાક્યસ્ય કથનાત્ યૂયં પિત્રાભિષિક્તં જગતિ પ્રેરિતઞ્ચ પુમાંસં કથમ્ ઈશ્વરનિન્દકં વાદય?
XXXVII યદ્યહં પિતુઃ કર્મ્મ ન કરોમિ તર્હિ માં ન પ્રતીત;
XXXVIII કિન્તુ યદિ કરોમિ તર્હિ મયિ યુષ્માભિઃ પ્રત્યયે ન કૃતેઽપિ કાર્ય્યે પ્રત્યયઃ ક્રિયતાં, તતો મયિ પિતાસ્તીતિ પિતર્ય્યહમ્ અસ્મીતિ ચ ક્ષાત્વા વિશ્વસિષ્યથ।
XXXIX તદા તે પુનરપિ તં ધર્ત્તુમ્ અચેષ્ટન્ત કિન્તુ સ તેષાં કરેભ્યો નિસ્તીર્ય્ય
XL પુન ર્યર્દ્દન્ અદ્યાસ્તટે યત્ર પુર્વ્વં યોહન્ અમજ્જયત્ તત્રાગત્ય ન્યવસત્।
XLI તતો બહવો લોકાસ્તત્સમીપમ્ આગત્ય વ્યાહરન્ યોહન્ કિમપ્યાશ્ચર્ય્યં કર્મ્મ નાકરોત્ કિન્ત્વસ્મિન્ મનુષ્યે યા યઃ કથા અકથયત્ તાઃ સર્વ્વાઃ સત્યાઃ;
XLII તત્ર ચ બહવો લોકાસ્તસ્મિન્ વ્યશ્વસન્।

# XI

I અનન્તરં મરિયમ્ તસ્યા ભગિની મર્થા ચ યસ્મિન્ વૈથનીયાગ્રામે વસતસ્તસ્મિન્ ગ્રામે ઇલિયાસર્ નામા પીડિત એક આસીત્।
II યા મરિયમ્ પ્રભું સુગન્ધિતેલૈન મર્દ્દયિત્વા સ્વકેશૈસ્તસ્ય ચરણૌ સમમાર્જત્ તસ્યા ભ્રાતા સ ઇલિયાસર્ રોગી।
III અપરઞ્ચ હે પ્રભો ભવાન્ યસ્મિન્ પ્રીયતે સ એવ પીડિતોસ્તીતિ કથાં કથયિત્વા તસ્ય ભગિન્યૌ પ્રેષિતવત્યૌ।
IV તદા યીશુરિમાં વાર્ત્તાં શ્રુત્વાકથયત પીડેયં મરણાર્થં ન કિન્ત્વીશ્વરસ્ય મહિમાર્થમ્ ઈશ્વરપુત્રસ્ય મહિમપ્રકાશાર્થઞ્ચ જાતા।
V યીશુ ર્યદ્યપિમર્થાયાં તદ્ભગિન્યામ્ ઇલિયાસરિ ચાપ્રીયત,
VI તથાપિ ઇલિયાસરઃ પીડાયાઃ કથં શ્રુત્વા યત્ર આસીત્ તત્રૈવ દિનદ્વયમતિષ્ઠત્।
VII તતઃ પરમ્ સ શિષ્યાનકથયદ્ વયં પુન ર્યિહૂદીયપ્રદેશં યામઃ।
VIII તતસ્તે પ્રત્યવદન્, હે ગુરો સ્વલ્પદિનાનિ ગતાનિ યિહૂદીયાસ્ત્વાં પાષાણૈ ર્હન્તુમ્ ઉદ્યતાસ્તથાપિ કિં પુનસ્તત્ર યાસ્યસિ?
IX યીશુઃ પ્રત્યવદત્, એકસ્મિન્ દિને કિં દ્વાદશઘટિકા ન ભવન્તિ? કોપિ દિવા ગચ્છન્ ન સ્ખલતિ યતઃ સ એતજ્જગતો દીપ્તિં પ્રાપ્નોતિ।
X કિન્તુ રાત્રૌ ગચ્છન્ સ્ખલતિ યતો હેતોસ્તત્ર દીપ્તિ ર્નાસ્તિ।
XI ઇમાં કથાં કથયિત્વા સ તાનવદદ્, અસ્માકં બન્ધુઃ ઇલિયાસર્ નિદ્રિતોભૂદ્ ઇદાનીં તં નિદ્રાતો જાગરયિતું ગચ્છામિ।
XII યીશુ ર્મૃતૌ કથામિમાં કથિતવાન્ કિન્તુ વિશ્રામાર્થં નિદ્રાયાં કથિતવાન્ ઇતિ જ્ઞાત્વા શિષ્યા અકથયન્,
XIII હે ગુરો સ યદિ નિદ્રાતિ તર્હિ ભદ્રમેવ।
XIV તદા યીશુઃ સ્પષ્ટં તાન્ વ્યાહરત્, ઇલિયાસર્ અમ્રિયત;
XV કિન્તુ યૂયં યથા પ્રતીથ તદર્થમહં તત્ર ન સ્થિતવાન્ ઇત્યસ્માદ્ યુષ્મન્નિમિત્તમ્ આહ્લાદિતોહં, તથાપિ તસ્ય સમીપે યામ।
XVI તદા થોમા યં દિદુમં વદન્તિ સ સઙ્ગિનઃ શિષ્યાન્ અવદદ્ વયમપિ ગત્વા તેન સાર્દ્ધં મ્રિયામહૈ।
XVII યીશુસ્તત્રોપસ્થાય ઇલિયાસરઃ શ્મશાને સ્થાપનાત્ ચત્વારિ દિનાનિ ગતાનીતિ વાર્ત્તાં શ્રુતવાન્।
XVIII વૈથનીયા યિરૂશાલમઃ સમીપસ્થા ક્રોશૈકમાત્રાન્તરિતા;
XIX તસ્માદ્ બહવો યિહૂદીયા મર્થાં મરિયમઞ્ચ ભ્યાતૃશોકાપન્નાં સાન્ત્વયિતું તયોઃ સમીપમ્ આગચ્છન્।
XX મર્થા યીશોરાગમનવાર્તાં શ્રુત્વૈવ તં સાક્ષાદ્ અકરોત્ કિન્તુ મરિયમ્ ગેહ ઉપવિશ્ય સ્થિતા।
XXI તદા મર્થા યીશુમવાદત્, હે પ્રભો યદિ ભવાન્ અત્રાસ્થાસ્યત્ તર્હિ મમ ભ્રાતા નામરિષ્યત્।
XXII કિન્ત્વિદાનીમપિ યદ્ ઈશ્વરે પ્રાર્થયિષ્યતે ઈશ્વરસ્તદ્ દાસ્યતીતિ જાનેઽહં।
XXIII યીશુરવાદીત્ તવ ભ્રાતા સમુત્થાસ્યતિ।
XXIV મર્થા વ્યાહરત્ શેષદિવસે સ ઉત્થાનસમયે પ્રોત્થાસ્યતીતિ જાનેઽહં।
XXV તદા યીશુઃ કથિતવાન્ અહમેવ ઉત્થાપયિતા જીવયિતા ચ યઃ કશ્ચન મયિ વિશ્વસિતિ સ મૃત્વાપિ જીવિષ્યતિ;
XXVI યઃ કશ્ચન ચ જીવન્ મયિ વિશ્વસિતિ સ કદાપિ ન મરિષ્યતિ, અસ્યાં કથાયાં કિં વિશ્વસિષિ?
XXVII સાવદત્ પ્રભો યસ્યાવતરણાપેક્ષાસ્તિ ભવાન્ સએવાભિષિક્ત ઈશ્વરપુત્ર ઇતિ વિશ્વસિમિ।
XXVIII ઇતિ કથાં કથયિત્વા સા ગત્વા સ્વાં ભગિનીં મરિયમં ગુપ્તમાહૂય વ્યાહરત્ ગુરુરુપતિષ્ઠતિ ત્વામાહૂયતિ ચ।
XXIX કથામિમાં શ્રુત્વા સા તૂર્ણમ્ ઉત્થાય તસ્ય સમીપમ્ અગચ્છત્।
XXX યીશુ ર્ગ્રામમધ્યં ન પ્રવિશ્ય યત્ર મર્થા તં સાક્ષાદ્ અકરોત્ તત્ર સ્થિતવાન્।

XXXI યે યિહૂદીયા મરિયમા સાકં ગૃહે તિષ્ઠન્તસ્તામ્ અસાન્ત્વયન તે તાં ક્ષિપ્રમ્ ઉત્થાય ગચ્છન્તિં વિલોક્ય વ્યાહરન્, સ શ્મશાને
રોદિતું યાતિ, ઇત્યુક્ત્વા તે તસ્યાઃ પશ્ચાદ્ અગચ્છન્।
XXXII યત્ર યીશુરતિષ્ઠત્ તત્ર મરિયમ્ ઉપસ્થાય તં દૃષ્ટ્વા તસ્ય ચરણયોઃ પતિત્વા વ્યાહરત્ હે પ્રભો યદિ ભવાન્ અત્રાસ્થાસ્યત્
તર્હિ મમ ભ્રાતા નામરિષ્યત્।
XXXIII યીશુસ્તાં તસ્યાઃ સઙ્ગિનો યિહૂદીયાંશ્ચ રુદતો વિલોક્ય શોકાર્ત્તઃ સન્ દીર્ઘં નિશ્વસ્ય કથિતવાન્ તં કુત્રાસ્થાપયત?
XXXIV તે વ્યાહરન્, હે પ્રભો ભવાન્ આગત્ય પશ્યતુ।
XXXV યીશુના ક્રન્દિતં।
XXXVI અતએવ યિહૂદીયા અવદન્, પશ્યતાયં તસ્મિન્ કિદૃગ્ અપ્રિયત।
XXXVII તેષાં કેચિદ્ અવદન્ યોન્ધાય ચક્ષુષી દત્તવાન્ સ કિમ્ અસ્ય મૃત્યું નિવારયિતું નાશક્નોત્?
XXXVIII તતો યીશુઃ પુનરન્તર્દીર્ઘં નિશ્વસ્ય શ્મશાનાન્તિકમ્ અગચ્છત્। તત્ શ્મશાનમ્ એકં ગહ્વરં તન્મુખે પાષાણ એક આસીત્।
XXXIX તદા યીશુરવદદ્ એનં પાષાણમ્ અપસારયત, તતઃ પ્રમીતસ્ય ભગિની મર્થાવદત્ પ્રભો, અધુના તત્ર દુર્ગન્ધો જાતઃ, યતોદ્ય
ચત્વારિ દિનાનિ શ્મશાને સ તિષ્ઠતિ।
XL તદા યીશુરવાદીત્, યદિ વિશ્વસિષિ તર્હીશ્વરસ્ય મહિમપ્રકાશં દ્રક્ષ્યસિ કથામિમાં કિં તુભ્યં નાકથયં?
XLI તદા મૃતસ્ય શ્મશાનાત્ પાષાણોઽપસારિતે યીશુરૂર્દ્ધ્વં પશ્યન્ અકથયત્, હે પિત ર્મમ નેવેસનમ્ અશૃણોઃ કારણાદસ્માત્ ત્વાં
ધન્યં વદામિ।
XLII ત્વં સતતં શૃણોષિ તદપ્યહં જાનામિ, કિન્તુ ત્વં માં યત્ પ્રૈરયસ્તદ્ યથાસ્મિન્ સ્થાને સ્થિતા લોકા વિશ્વસન્તિ તદર્થમ્ ઇદં
વાક્યં વદામિ।
XLIII ઇમાં કથાં કથયિત્વા સ પ્રોચ્ચૈરાહ્વયત્, હે ઇલિયાસર્ બહિરાગચ્છ।
XLIV તતઃ સ પ્રમીતઃ શ્મશાનવસ્ત્રૈ ર્બદ્ધહસ્તપાદો ગાત્રમાર્જનવાસસા બદ્ધમુખશ્ચ બહિરાગચ્છત્। યીશુરુદિતવાન્ બન્ધનાનિ
મોચયિત્વા ત્યજતૈનં।
XLV મરિયમઃ સમીપમ્ આગતા યે યિહૂદીયલોકાસ્તદા યીશોરેતત્ કર્મ્માપશ્યન્ તેષાં બહવો વ્યશ્વસન્,
XLVI કિન્તુ કેચિદન્યે ફિરૂશિનાં સમીપં ગત્વા યીશોરેતસ્ય કર્મ્મણો વાર્ત્તામ્ અવદન્।
XLVII તતઃ પરં પ્રધાનયાજકાઃ ફિરૂશિનાશ્ચ સભાં કૃત્વા વ્યાહરન્ વયં કિં કુર્મ્મઃ? એષ માનવો બહૂન્યાશ્ચર્ય્યકર્મ્માણિ કરોતિ।
XLVIII યદીદૃશં કર્મ્મ કર્ત્તું ન વારયામસ્તર્હિ સર્વ્વે લોકાસ્તસ્મિન્ વિશ્વસિષ્યન્તિ રોમિલોકાશ્ચાગત્યાસ્માકમ્ અનયા રાજધાન્યા
સાર્દ્ધં રાજ્યમ્ આછેત્સ્યન્તિ।
XLIX તદા તેષાં કિયફાનામા યસ્તસ્મિન્ વત્સરે મહાયાજકપદે ન્યયુજ્યત સ પ્રત્યવદદ્ યૂયં કિમપિ ન જાનીથ;
L સમગ્રદેશસ્ય વિનાશતોપિ સર્વ્વલોકાર્થમ્ એકસ્ય જનસ્ય મરણમ્ અસ્માકં મઙ્ગલહેતુકમ્ એતસ્ય વિવેચનામપિ ન કુરુથ।
LI એતાં કથાં સ નિજબુદ્ધ્યા વ્યાહરદ્ ઇતિ ન,
LII કિન્તુ યીશૂસ્તદ્દેશીયાનાં કારણાત્ પ્રાણાન્ ત્યક્ષ્યતિ, દિશિ દિશિ વિકીર્ણાન્ ઈશ્વરસ્ય સન્તાનાન્ સંગૃહ્યૈકજાતિં કરિષ્યતિ ચ,
તસ્મિન્ વત્સરે કિયફા મહાયાજકત્વપદે નિયુક્તઃ સન્ ઇદં ભવિષ્યદ્વાક્યં કથિતવાન્।
LIII તદ્દિનમારભ્ય તે કથં તં હન્તું શક્નુવન્તીતિ મન્ત્રણાં કર્ત્તું પ્રારેભિરે।
LIV અતએવ યિહૂદીયાનાં મધ્યે યીશુઃ સપ્રકાશં ગમનાગમને અકૃત્વા તસ્માદ્ ગત્વા પ્રાન્તરસ્ય સમીપસ્થાયિપ્રદેશસ્યેફ્રાયિમ્
નામ્નિ નગરે શિષ્યૈઃ સાકં કાલં યાપયિતું પ્રારેભે।
LV અનન્તરં યિહૂદીયાનાં નિસ્તારોત્સવે નિકટવર્ત્તિનિ સતિ તદુત્સવાત્ પૂર્વ્વં સ્વાન્ શુચીન્ કર્ત્તું બહવો જના ગ્રામેભ્યો યિરૂશાલમ્
નગરમ્ આગચ્છન્,
LVI યીશોરન્વેષણં કૃત્વા મન્દિરે દણ્ડાયમાનાઃ સન્તઃ પરસ્પરં વ્યાહરન્, યુષ્માકં કીદૃશો બોધો જાયતે? સ કિમ્ ઉત્સવેઽસ્મિન્
અત્રાગમિષ્યતિ?
LVII સ ચ કુત્રાસ્તિ યદ્યેતત્ કશ્ચિદ્ વેત્તિ તર્હિ દર્શયતુ પ્રધાનયાજકાઃ ફિરૂશિનશ્ચ તં ધર્ત્તું પૂર્વ્વમ્ ઇમામ્ આજ્ઞાં પ્રાચારયન્।

# XII

I નિસ્તારોત્સવાત્ પૂર્વ્વં દિનષટ્કે સ્થિતે યીશુ ર્યં પ્રમીતમ્ ઇલિયાસરં શ્મશાનાદ્ ઉદસ્થાપરત્ તસ્ય નિવાસસ્થાનં બૈથનિયાગ્રામમ્
આગચ્છત્।
II તત્ર તદર્થં રજન્યાં ભોજ્યે કૃતે મર્થા પર્ય્યવેષયદ્ ઇલિયાસર્ ચ તસ્ય સઙ્ગિભિઃ સાર્દ્ધં ભોજનાસન ઉપાવિશત્।
III તદા મરિયમ્ અર્દ્ધસેટકં બહુમૂલ્યં જટામાંસીયં તૈલમ્ આનીય યીશોશ્ચરણયો ર્મર્દ્દયિત્વા નિજકેશ ર્માર્ષ્ટુમ્ આરભત; તદા
તૈલસ્ય પરિમલેન ગૃહમ્ આમોદિતમ્ અભવત્।
IV યઃ શિમોનઃ પુત્ર ઈષ્કરિયોતીયો યિહૂદાનામા યીશું પરકરેષુ સમર્પયિષ્યતિ સ શિષ્યસ્તદા કથિતવાન્,
V એતત્તૈલં ત્રિભિઃ શતૈ ર્મુદ્રાપદૈ ર્વિક્રીતં સદ્ દરિદ્રેભ્યઃ કુતો નાદીયત?
VI સ દરિદ્રલોકાર્થમ્ અચિન્તયદ્ ઇતિ ન, કિન્તુ સ ચૌર એવં તન્નિકટે મુદ્રાસમ્પુટકસ્થિત્યા તન્મધ્યે યદતિષ્ઠત્ તદપાહરત્ તસ્માત્
કારણાદ્ ઇમાં કથામકથયત્।
VII તદા યીશુરકથયદ્ એનાં મા વારય સા મમ શ્મશાનસ્થાપનદિનાર્થં તદરક્ષયત્।
VIII દરિદ્રા યુષ્માકં સન્નિધૌ સર્વ્વદા તિષ્ઠન્તિ કિન્ત્વહં સર્વ્વદા યુષ્માકં સન્નિધૌ ન તિષ્ઠામિ।
IX તતઃ પરં યીશુસ્તત્રાસ્તીતિ વાર્त्તાં શ્રુત્વા બહવો યિહૂદીયાસ્તં શ્મશાનાદુત્થાપિતમ્ ઇલિયાસરઞ્ચ દ્રષ્ટું તત્ સ્થાનમ્ આગચ્છન।
X તદા પ્રધાનયાજકાસ્તમ્ ઇલિયાસરમપિ સંહર્ત્તુમ્ અમન્ત્રયન્ ;
XI યતસ્તેન બહવો યિહૂદીયા ગત્વા યીશૌ વ્યશ્વસન્।
XII અનન્તરં યીશુ ર્યિરૂશાલમ્ નગરમ્ આગચ્છતીતિ વાર્ત્તાં શ્રુત્વા પરેઽહનિ ઉત્સવાગતા બહવો લોકાઃ

XIII ખર્જ્જૂરપત્રાદ્યાનીય તં સાક્ષાત્ કર્ત્તું બહિરાગત્ય જય જયેતિ વાચં પ્રોચ્ચૈ ર્વક્તુમ્ આરભન્ત, ઇસ્રાયેલો યો રાજા
પરમેશ્વરસ્ય નામ્નાગચ્છતિ સ ધન્યઃ।
XIV તદા "હે સિયોનઃ કન્યે મા ભૈષીઃ પશ્યાયં તવ રાજા ગર્દ્દભશાવકમ્ આરુહ્યાગચ્છતિ"
XV ઇતિ શાસ્ત્રીયવચનાનુસારેણ યીશુરેકં યુવગર્દ્દભં પ્રાપ્ય તદુપર્ય્યારોહત્।
XVI અસ્યાઃ ઘટનાયાસ્તાત્પર્ય્યં શિષ્યાઃ પ્રથમં નાબુધ્યન્ત, કિન્તુ યીશૌ મહિમાનં પ્રાપ્તે સતિ વાક્યમિદં તસ્મિન અકથ્યત લોકાશ્ચ
તમ્પ્રતીત્થમ્ અકુર્વ્વન્ ઇતિ તે સ્મૃતવન્તઃ।
XVII સ ઇલિયાસરં શ્મશાનાદ્ આગન્તુમ્ આહ્વતવાન્ શ્મશાનાચ્ચ ઉદસ્થાપયદ્ યે યે લોકાસ્તત્કર્મ્ય સાક્ષાદ્ અપશ્યન્ તે પ્રમાણં
દાતુમ્ આરભન્ત।
XVIII સ એતાદૃશમ્ અદ્ભુતં કર્મ્મકરોત્ તસ્ય જનશ્રુતે ર્લોકાસ્તં સાક્ષાત્ કર્ત્તુમ્ આગચ્છન્।
XIX તતઃ ફિરૂશિનઃ પરસ્પરં વક્તુમ્ આરભન્ત યુષ્માકં સર્વ્વાશ્ચેષ્ટા વૃથા જાતાઃ, ઇતિ કિં યૂયં ન બુધ્યધ્વે? પશ્યત સર્વ્વે
લોકાસ્તસ્ય પશ્ચાદ્વર્ત્તિનોભવન્।
XX ભજનં કર્ત્તુમ્ ઉત્સવાગતાનાં લોકાનાં કતિપયા જના અન્યદેશીયા આસન્,
XXI તે ગાલીલીયબૈત્સૈદાનિવાસિનઃ ફિલિપસ્ય સમીપમ્ આગત્ય વ્યાહરન્ હે મહેચ્છ વયં યીશું દ્રષ્ટુમ્ ઇચ્છામઃ।
XXII તતઃ ફિલિપો ગત્વા આન્દ્રિયમ્ અવદત્ પશ્ચાદ્ આન્દ્રિયફિલિપૌ યીશવે વાર્ત્તામ્ અકથયતાં।
XXIII તદા યીશુઃ પ્રત્યુદિતવાન્ માનવસુતસ્ય મહિમપ્રાપ્તિસમય ઉપસ્થિતઃ।
XXIV અહં યુષ્માનતિયથાર્થં વદામિ, ધાન્યબીજં મૃત્તિકાયાં પતિત્વા યદિ ન મૃયતે તર્હ્યેકાકી તિષ્ઠતિ કિન્તુ યદિ મૃયતે તર્હિ
બહુગુણં ફલં ફલતિ।
XXV યો જને ̆ નિજપ્રાણાન્ પ્રિયાન્ જાનાતિ સ તાન્ હારયિષ્યતિ કિન્તુ યે ̆ જન ઇહલોકે નિજપ્રાણાન્ અપ્રિયાન્ જાનાતિ
સે ̆નન્તાયુઃ પ્રાપ્તું તાન્ રક્ષિષ્યતિ।
XXVI કશ્ચિદ્ યદિ મમ સેવકો ભવિતું વાઞ્છતિ તર્હિ સ મમ પશ્ચાદ્ગામી ભવતુ, તસ્માદ્ અહં યત્ર તિષ્ઠામિ મમ સેવકે ̆પિ તત્ર
સ્થાસ્યતિ; યો જનો માં સેવતે મમ પિતાપિ તં સમ્મંસ્યતે।
XXVII સામ્પ્રતં મમ પ્રાણા વ્યાકુલા ભવન્તિ, તસ્માદ્ હે પિતર એતસ્માત્ સમયાન્ માં રક્ષ, ઇત્યહં કિં પ્રાર્થયિષ્યે? કિન્ત્વહમ્
એતત્સમયાર્થમ્ અવતીર્ણવાન્।
XXVIII હે પિત: સ્વનામ્નો મહિમાનં પ્રકાશય; તનૈવ સ્વનામ્નો મહિમાનમ્ અહં પ્રાકાશયં પુનરપિ પ્રકાશયિષ્યામિ, એષા
ગગણીયા વાણી તસ્મિન્ સમયેઽજાયત।
XXIX તચ્છ્રુત્વા સમીપસ્થલોકાનાં કેચિદ્ અવદન્ મેઘોઽગર્જીત્, કેચિદ્ અવદન્ સ્વર્ગીયદૂતોઽનેન સહ કથામચકથત્।
XXX તદા યીશુઃ પ્રત્યવાદીત્, મદર્થં શબ્દોયં નાભૂત્ યુષ્મદર્થમેવાભૂત્।
XXXI અધુના જગતોસ્ય વિચાર: સમ્પત્સ્યતે, અધુનાસ્ય જગતઃ પતી રાજ્યાત્ ચ્યોષ્યતિ।
XXXII યદ્યઈ પૃથિવ્યા ઊર્દ્ધ્વે પ્રોત્થાપિતોસ્મિ તર્હિ સર્વ્વાન્ માનવાન્ સ્વસમીપમ્ આકર્ષિષ્યામિ।
XXXIII કથં તસ્ય મૃતિ ર્ભવિષ્યતિ, એતદ્ બોધયિતું સ ઇમાં કથામ્ અકથયત્।
XXXIV તદા લોકા અકથયન્ સોભિષિક્તઃ સર્વ્વદા તિષ્ઠતીતિ વ્યવસ્થાગ્રન્થે શ્રુતમ્ અસ્માભિઃ, તર્હિ મનુષ્યપુત્રઃ પ્રોત્થાપિતો
ભવિષ્યતીતિ વાક્યં કથં વદસિ? મનુષ્યપુત્રોયં કઃ?
XXXV તદા યીશુરકથાયદ્ યુષ્માભિઃ સાર્દ્ધમ્ અલ્પદિનાનિ જ્યોતિરાસ્તે, યથા યુષ્માન્ અન્ધકારો નાચ્છાદયતિ તદર્થં યાવત્કાલં
યુષ્માભિઃ સાર્દ્ધં જ્યોતિસ્તિષ્ઠતિ તાવત્કાલં ગચ્છત; યો જનોઽન્ધકારે ગચ્છતિ સ કુત્ર યાતીતિ ન જાનાતિ।
XXXVI અતએવ યાવત્કાલં યુષ્માકં નિકટે જ્યોતિરાસ્તે તાવત્કાલં જ્યોતીરૂપસન્તાના ભવિતું જ્યોતિષિ વિશ્વસિત; ઇમાં કથાં
કથયિત્વા યીશુઃ પ્રસ્થાય તેભ્યઃ સ્વં ગુપ્તવાન્।
XXXVII યદ્યપિ યીશુસ્તેષાં સમક્ષમ્ એતાવદાશ્ચર્ય્યકર્મ્માણિ કૃતવાન્ તથાપિ તે તસ્મિન્ ન વ્યશ્વસન્।
XXXVIII અતએવ કઃ પ્રત્યેતિ સુસંવાદં પરેશાસ્મત્ પ્રચારિતં? પ્રકાશતે પરેશસ્ય હસ્તઃ કસ્ય ચ સન્નિધૌ?
યિશયિયભવિષ્યદ્વાદિના યદેતદ્ વાક્યમુક્તં તત્ સફલમ્ અભવત્।
XXXIX તે પ્રત્યેતું નાશન્કુવન્ તસ્મિન્ યિશયિયભવિષ્યદ્વાદિ પુનરવાદીદ્,
XL યદા, "તે નયનૈ ર્ન પશ્યન્તિ બુદ્ધિભિશ્ચ ન બુધ્યન્તે તૈ ર્મનઃસુ પરિવર્ત્તિતેષુ ચ તાનહં યથા સ્વસ્થાન્ ન કરોમિ તથા સ તેષાં
લોચનાન્યન્ધાનિ કૃત્વા તેષામન્તઃકરણાનિ ગાઢાનિ કરિષ્યતિ। "
XLI યિશયિયો યદા યીશો ર્મહિમાનં વિલોક્ય તસ્મિન્ કથામકથયત્ તદા ભવિષ્યદ્વાક્યમ્ ઈદૃશં પ્રકાશયત્।
XLII તથાપ્યધિપતિનાં બહવસ્તસ્મિન્ પ્રત્યાયન્। કિન્તુ ફિરૂશિનસ્તાન્ ભજનગૃહાદ્ દૂરીકુર્વ્વન્તીતિ ભયાત્ તે તં ન સ્વીકૃતવન્તઃ।
XLIII યત ઈશ્વરસ્ય પ્રશંસાતો માનવાનાં પ્રશંસાયાં તેઽપ્રિયન્ત।
XLIV તદા યીશુરુચ્ચૈઃકારમ્ અકથયદ્ યો જનો મયિ વિશ્વસિતિ સ કેવલે મયિ વિશ્વસિતીતિ ન, સ મત્પ્રેરકેઽપિ વિશ્વસિતિ।
XLV યો જનો માં પશ્યતિ સ મત્પ્રેરકમપિ પશ્યતિ।
XLVI યો જનો માં પ્રત્યેતિ સ યથાન્ધકારે ન તિષ્ઠતિ તદર્થમ્ અહં જ્યોતિઃસ્વરૂપો ભૂત્વા જગત્યસ્મિન્ અવતીર્ણવાન્।
XLVII મમ કથાં શ્રુત્વા યદિ કશ્ચિન્ ન વિશ્વસિતિ તર્હિ તમહં દોષિણં ન કરોમિ, યતો હેતો ર્જગતો જનાનાં દોષાન્ નિશ્ચિતાન્
કર્ત્તું નાગત્ય તાન્ પરિચાતુમ્ આગતોસ્મિ।
XLVIII યઃ કશ્ચિન્ માં ન શ્રદ્ધાય મમ કથં ન ગૃહ્લાતિ, અન્યસ્તં દોષિણં કરિષ્યતિ વસ્તુતસ્તુ યાં કથામહમ્ અચકથં સા કથા
ચરમેઽન્હિ તં દોષિણં કરિષ્યતિ।
XLIX યતો હેતોરહં સ્વતઃ કિમપિ ન કથયામિ, કિં કિં મયા કથયિતવ્યં કિં સમુપદેષ્ટવ્યઞ્ચ ઇતિ મત્પ્રેરયિતા પિતા મામાજ્ઞાપયત્।
L તસ્ય સાજ્ઞા અનન્તાયુરિત્યહં જાનામિ, અતએવાહં યત્ કથયામિ તત્ પિતા યથાજ્ઞાપયત્ તથૈવ કથયામ્યહમ્।

# XIII

I નિસ્તારોત્સવસ્ય કિઞ્ચિત્કાલાત્ પૂર્વ્વં પૃથિવ્યાઃ પિતુઃ સમીપગમનસ્ય સમયઃ સન્નિકર્ષોભૂદ્ ઇતિ જ્ઞાત્વા યીશુરાપ્રથમાદ્ યેષુ જગત્પ્રવાસિષ્વાત્મીયલોકેષ પ્રેમ કરોતિ સ્મ તેષુ શેષં યાવત્ પ્રેમ કૃતવાન્|

II પિતા તસ્ય હસ્તે સર્વ્વં સમર્પિતવાન્ સ્વયમ્ ઈશ્વરસ્ય સમીપાદ્ આગચ્છદ્ ઈશ્વરસ્ય સમીપં યાસ્યતિ ચ, સર્વ્વાણ્યેતાનિ જ્ઞાત્વા રજન્યાં ભોજને સમ્પૂર્ણે સતિ,

III યદા શૈતાન્ તં પરહસ્તેષુ સમર્પયિતું શિમોનઃ પુત્રસ્ય ઈષ્કારિયોતિયસ્ય યિહૂદા અન્તઃકરણે કુપ્રવૃત્તિં સમાર્પયત્,

IV તદા યીશુ ર્ભોજનાસનાદ્ ઉત્થાય ગાત્રવસ્ત્રં મોચયિત્વા ગાત્રમાર્જનવસ્ત્રં ગૃહીત્વા તેન સ્વકટિમ્ અબધ્નાત્,

V પશ્ચાદ્ એકપાત્રે જલમ્ અભિષિચ્ય શિષ્યાણાં પાદાન્ પ્રક્ષાલ્ય તેન કટિબદ્ધગાત્રમાર્જનવાસસા માર્ષ્ટું પ્રારભત|

VI તતઃ શિમોન્પિતરસ્ય સમીપમાગતે સ ઉક્તવાન્ હે પ્રભો ભવાન્ કિં મમ પાદૌ પ્રક્ષાલયિષ્યતિ?

VII યીશુરુદિતવાન્ અહં યત્ કરોમિ તત્ સમ્પ્રતિ ન જાનાસિ કિન્તુ પશ્ચાજ્ જ્ઞાસ્યસિ|

VIII તતઃ પિતરઃ કથિતવાન્ ભવાન્ કદાપિ મમ પાદૌ ન પ્રક્ષાલયિષ્યતિ| યીશુરકથયદ્ યદિ ત્વાં ન પ્રક્ષાલયે તર્હિ મયિ તવ કોપ્યંશો નાસ્તિ|

IX તદા શિમોન્પિતરઃ કથિતવાન્ હે પ્રભો તર્હિ કેવલપાદૌ ન, મમ હસ્તૌ શિરશ્ચ પ્રક્ષાલયતુ|

X તતો યીશુરવદદ્ યો જનો ધૌતસ્તસ્ય સર્વ્વાઙ્ગપરિષ્કૃતત્વાત્ પાદૌ વિનાન્યાઙ્ગસ્ય પ્રક્ષાલનાપેક્ષા નાસ્તિ| યૂયં પરિષ્કૃતા ઇતિ સત્યં કિન્તુ ન સર્વ્વે,

XI યતો યો જનસ્તં પરકરેષુ સમર્પયિષ્યતિ તં સ જ્ઞાતવાન; અતએવ યૂયં સર્વ્વે ન પરિષ્કૃતા ઇમાં કથાં કથિતવાન્|

XII ઇત્થં યીશુસ્તેષાં પાદાન્ પ્રક્ષાલ્ય વસ્ત્રં પરિધાયાસને સમુપવિશ્ય કથિતવાન્ અહં યુષ્માન્ પ્રતિ કિં કર્મ્માકાર્ષં જાનીથ?

XIII યૂયં માં ગુરું પ્રભુઞ્ચ વદથ તત્ સત્યમેવ વદથ યતોહં સએવ ભવામિ|

XIV યદ્યહં પ્રભુ ર્ગુરુશ્ચ સન્ યુષ્માકં પાદાન્ પ્રક્ષાલિતવાન્ તર્હિ યુષ્માકમપિ પરસ્પરં પાદપ્રક્ષાલનમ્ ઉચિતમ્|

XV અહં યુષ્માન્ પ્રતિ યથા વ્યવાહરં યુષ્માન્ તથા વ્યવહર્ત્તુમ્ એકં પન્થાનં દર્શિતવાન્|

XVI અહં યુષ્માનતિયથાર્થં વદામિ, પ્રભો ર્દાસો ન મહાન્ પ્રેરકાચ્ચ પ્રેરિતો ન મહાન્|

XVII ઇમાં કથાં વિદિત્વા યદિ તદનુસારતઃ કર્મ્માણિ કુરુથ તર્હિ યૂયં ધન્યા ભવિષ્યથ|

XVIII સર્વ્વેષુ યુષ્માસુ કથામિમાં કથયામિ ઇતિ ન, યે મમ મનોનીતાસ્તાનહં જાનામિ, કિન્તુ મમ ભક્ષ્યાણિ યો ભુઙ્ક્તે મત્પ્રાણપ્રાતિકૂલ્યતઃ| ઉત્થાપયતિ પાદસ્ય મૂલં સ એષ માનવઃ| યદેતદ્ ધર્મ્મપુસ્તકસ્ય વચનં તદનુસારેણાવશ્યં ઘટિષ્યતે|

XIX અહં સ જન ઇત્યત્ર યથા યુષ્માકં વિશ્વાસો જાયતે તદર્થં એતાદૃશઘટનાત્ પૂર્વ્વમ્ અહમિદાનીં યુષ્મભ્યમકથયમ્|

XX અહં યુષ્માનતીવ યથાર્થં વદામિ, મયા પ્રેરિતં જનં યો ગૃહ્લાતિ સ મામેવ ગૃહ્લાતિ યશ્ચ માં ગૃહ્લાતિ સ મત્પ્રેરકં ગૃહ્લાતિ|

XXI એતાં કથાં કથયિત્વા યીશુ ર્દુઃખી સન્ પ્રમાણં દત્ત્વા કથિતવાન્ અહં યુષ્માનતિયથાર્થં વદામિ યુષ્માકમ્ એકો જનો માં પરકરેષુ સમર્પયિષ્યતિ|

XXII તતઃ સ કમુદ્દિશ્ય કથામેતાં કથિતવાન્ ઇત્યત્ર સન્દિગ્ધાઃ શિષ્યાઃ પરસ્પરં મુખમાલોકયિતું પ્રારભન્ત|

XXIII તસ્મિન્ સમયે યીશુ ર્યસ્મિન્ અપ્રીયત સ શિષ્યસ્તસ્ય વક્ષઃસ્થલમ્ અવાલમ્બત|

XXIV શિમોન્પિતરસ્તં સઙ્કેતેનાવદત્, અયં કમુદ્દિશ્ય કથામેતામ્ કથયતીતિ પૃચ્છ|

XXV તદા સ યીશો ર્વક્ષઃસ્થલમ્ અવલમ્બ્ય પૃષ્ઠવાન્, હે પ્રભો સ જનઃ કઃ?

XXVI તતો યીશુઃ પ્રત્યવદદ્ એકખણ્ડં પૂપં મજ્જયિત્વા યસ્મૈ દાસ્યામિ સએવ સઃ; પશ્ચાત્ પૂપખણ્ડમેકં મજ્જયિત્વા શિમોનઃ પુત્રાય ઈષ્કરિયોતીયાય યિહૂદૈ દત્તવાન્|

XXVII તસ્મિન્ દત્તે સતિ શૈતાન્ તમાશ્રયત્; તદા યીશુસ્તમ્ અવદત્ ત્વં યત્ કરિષ્યસિ તત્ ક્ષિપ્રં કુરુ|

XXVIII કિન્તુ સ યેનાશયેન તાં કથામકથાયત્ તમ્ ઉપવિષ્ટલોકાનાં કોપિ નાબુધ્યત;

XXIX કિન્તુ યિહૂદાઃ સમીપે મુદ્રાસમ્પુટકસ્થિતેઃ કેચિદ્ ઇત્થમ્ અબુધ્યન્ત પાર્વ્વણાસાદનાર્થં કિમપિ દ્રવ્યં ક્રેતું વા દરિદ્રેભ્યઃ કિઞ્ચિદ્ વિતરિતું કથિતવાન્|

XXX તદા પૂપખણ્ડગ્રહણાત્ પરં સ તૂર્ણં બહિરગચ્છત્; રાત્રિશ્ચ સમુપસ્થિતા|

XXXI યિહૂદે બહિર્ગતે યીશુરકથયદ્ ઇદાનીં માનવસુતસ્ય મહિમા પ્રકાશતે તેનેશ્વરસ્યાપિ મહિમા પ્રકાશતે|

XXXII યદિ તેનેશ્વરસ્ય મહિમા પ્રકાશતે તર્હીશ્વરોપિ સ્વેન તસ્ય મહિમાનં પ્રકાશયિષ્યતિ તૂર્ણમેવ પ્રકાશયિષ્યતિ|

XXXIII હે વત્સા અહં યુષ્માભિઃ સાર્દ્ધં કિઞ્ચિત્કાલમાત્રમ્ આસે, તતઃ પરં માં મૃગયિષ્યધ્વે કિન્ત્વહં યત્સ્થાનં યામિ તત્સ્થાનં યૂયં ગન્તું ન શક્ષ્યથ, યામિમાં કથાં યિહૂદીયેભ્યઃ કથિતવાન્ તથાધુના યુષ્મભ્યમપિ કથયામિ|

XXXIV યૂયં પરસ્પરં પ્રીયધ્વમ્ અહં યુષ્માસુ યથા પ્રીયે યૂયમપિ પરસ્પરમ્ તથૈવ પ્રીયધ્વં, યુષ્માન્ ઇમાં નવીનામ્ આજ્ઞામ્ આદિશામિ|

XXXV તેનૈવ યદિ પરસ્પરં પ્રીયધ્વે તર્હિ લક્ષણેનાનેન યૂયં મમ શિષ્યા ઇતિ સર્વ્વે જ્ઞાતું શક્ષ્યન્તિ|

XXXVI શિમોનપિતરઃ પૃષ્ઠવાન્ હે પ્રભો ભવાન્ કુત્ર યાસ્યતિ? તતો યીશુઃ પ્રત્યવદત્, અહં યત્સ્થાનં યામિ તત્સ્થાનં સામ્પ્રતં મમ પશ્ચાદ્ ગન્તું ન શક્નોષિ કિન્તુ પશ્ચાદ્ ગમિષ્યસિ|

XXXVII તદા પિતરઃ પ્રત્યુદિતવાન્, હે પ્રભો સામ્પ્રતં કુતો હેતોસ્તવ પશ્ચાદ્ ગન્તું ન શક્નોમિ? ત્વદર્થં પ્રાણાન્ દાતું શક્નોમિ|

XXXVIII તતો યીશુઃ પ્રત્યુક્તવાન્ મન્નિમિત્તં કિં પ્રાણાન્ દાતું શક્નોષિ? ત્વામહં યથાર્થં વદામિ, કુક્કુટરવણાત્ પૂર્વ્વં ત્વં ત્રિ ર્મામ્ અપહ્નોષ્યસે|

# XIV

I મનોદુઃખિનો મા ભૂત; ઈશ્વરે વિશ્વસિત મયિ ચ વિશ્વસિત|

II મમ પિતુ ગૃહે બહૂનિ વાસસ્થાનિ સન્તિ નો ચેત્ પૂર્વ્વં યુષ્માન્ અજ્ઞાપયિષ્યં યુષ્મદર્થં સ્થાનં સજ્જયિતું ગચ્છામિ|

III યદિ ગત્વાહં યુષ્મન્નિમિત્તં સ્થાનં સજ્જયામિ તર્હિ પનરાગત્ય યુષ્માન્ સ્વસમીપં નેષ્યામિ, તતો યત્રાહં તિષ્ઠામિ તત્ર યૂયમપિ સ્થાસ્યથ।

IV અહં યત્સ્થાનં બ્રજામિ તત્સ્થાનં યૂયં જાનીથ તસ્ય પન્થાનમપિ જાનીથ।

V તદા થોમા અવદત્, હે પ્રભો ભવાન્ કુત્ર યાતિ તદ્વયં ન જાનીમઃ, તર્હિ કથં પન્થાનં જ્ઞાતું શક્નુમઃ?

VI યીશુરકથયદ્ અહમેવ સત્યજીવનરૂપપથો મયા ન ગન્તા કોપિ પિતુઃ સમીપં ગન્તું ન શક્નોતિ।

VII યદિ મામ્ અજ્ઞાસ્યત તર્હિ મમ પિતરમપ્યજ્ઞાસ્યત કિન્ત્વધુનાતસ્તં જાનીથ પશ્યથ ચ।

VIII તદા ફિલિપઃ કથિતવાન્, હે પ્રભો પિતરં દર્શય તસ્માદસ્માકં યથેષ્ટં ભવિષ્યતિ।

IX તતો યીશુઃ પ્રત્યાવાદીત્, હે ફિલિપ યુષ્માભિઃ સાર્દ્ધમ્ એતાવદ્દિનાનિ સ્થિતમપિ માં કિં ન પ્રત્યભિજાનાસિ? યો જનો મામ્ અપશ્યત્ સ પિતરમપ્યપશ્યત્ તર્હિ પિતરમ્ અસ્માન્ દર્શયેતિ કથાં કથં કથયસિ?

X અહં પિતરિ તિષ્ઠામિ પિતા મયિ તિષ્ઠતીતિ કિં ત્વં ન પ્રત્યષિ? અહં યદ્વાક્યં વદામિ તત્ સ્વતો ન વદામિ કિન્તુ યઃ પિતા મયિ વિરાજતે સ એવ સર્વ્વકર્મ્માણિ કરાતિ।

XI અતએવ પિતર્ય્યહં તિષ્ઠામિ પિતા ચ મયિ તિષ્ઠતિ મમાસ્યાં કથાયાં પ્રત્યયં કુરુત, નો ચેત્ કર્મ્મહેતોઃ પ્રત્યયં કુરુત।

XII અહં યુષ્માનતિયથાર્થં વદામિ, યો જનો મયિ વિશ્વસિતિ સોહમિવ કર્મ્માણિ કરિષ્યતિ વરં તતોપિ મહાકર્મ્માણિ કરિષ્યતિ યતો હેતોરહં પિતુઃ સમીપં ગચ્છામિ।

XIII યથા પુત્રેણ પિતુ ર્મહિમા પ્રકાશતે તદર્થં મમ નામ પ્રોચ્ય યત્ પ્રાર્થયિષ્યધ્વે તત્ સફલં કરિષ્યામિ।

XIV યદિ મમ નામ્ના યત્ કિઞ્ચિદ્ યાચધ્વે તર્હિ તદહં સાધયિષ્યામિ।

XV યદિ મયિ પ્રીયધ્વે તર્હિ મમાજ્ઞાઃ સમાચરત।

XVI તતો મયા પિતુઃ સમીપે પ્રાર્થિતે પિતા નિરન્તરં યુષ્માભિઃ સાર્દ્ધં સ્થાતુમ્ ઇતરમેકં સહાયમ્ અર્થાત્ સત્યમયમ્ આત્માનં યુષ્માકં નિકટં પ્રેષયિષ્યતિ।

XVII એતજ્જગતો લોકાસ્તં ગ્રહીતું ન શક્નુવન્તિ યતસ્તે તં નાપશ્યન્ નાજનંશ્ચ કિન્તુ યૂયં જાનીથ યતો હેતોઃ સ યુષ્માકમન્ત ર્નિવસતિ યુષ્માકં મધ્યે સ્થાસ્યતિ ચ।

XVIII અહં યુષ્માન્ અનાથાન્ કૃત્વા ન યાસ્યામિ પુનરપિ યુષ્માકં સમીપમ્ આગમિષ્યામિ।

XIX કિયત્કાલરત્ પરમ્ અસ્ય જગતો લોકા માં પુન ર્ન દ્રક્ષ્યન્તિ કિન્તુ યૂયં દ્રક્ષ્યથ;અહં જીવિષ્યામિ તસ્માત્ કારણાદ્ યૂયમપિ જીવિષ્યથ।

XX પિતર્ય્યહમસ્મિ મયિ ચ યૂયં સ્થ, તથાહં યુષ્માસ્વસ્મિ તદપિ તદા જ્ઞાસ્યથ।

XXI યો જનો મમાજ્ઞા ગૃહીત્વા તા આચરતિ સએવ મયિ પ્રીયતે; યો જનશ્ચ મયિ પ્રીયતે સએવ મમ પિતુઃ પ્રિયપાત્રં ભવિષ્યતિ, તથાહમપિ તસ્મિન્ પ્રીત્વા તસ્મૈ સ્વં પ્રકાશયિષ્યામિ।

XXII તદા ઈષ્કરિયોતીયાદ્ અન્યો યિહૂદાસ્તમવદત્, હે પ્રભો ભવાન્ જગતો લોકાનાં સન્નિધૌ પ્રકાશિતો ન ભૂત્વાસ્માકં સન્નિધૌ કુતઃ પ્રકાશિતો ભવિષ્યતિ?

XXIII તતો યીશુઃ પ્રત્યુદિતવાન્, યો જનો મયિ પ્રીયતે સ મમાજ્ઞા અપિ ગૃહ્લાતિ, તેન મમ પિતાપિ તસ્મિન્ પ્રેષ્યતે, આવાઞ્ચ તન્નિકટમાગત્ય તેન સહ નિવત્સ્યાવઃ।

XXIV યો જનો મયિ ન પ્રીયતે સ મમ કથા અપિ ન ગૃહ્લાતિ પુનશ્ચ યામિમાં કથાં યૂયં શૃણુથ સા કથા કેવલસ્ય મમ ન કિન્તુ મમ પ્રેરકો યઃ પિતા તસ્યાપિ કથા।

XXV ઇદાનીં યુષ્માકં નિકટે વિદ્યમાનોહમ્ એતાઃ સકલાઃ કથાઃ કથયામિ।

XXVI કિન્ત્વિતઃ પરં પિત્રા યઃ સહાયોઽર્થાત્ પવિત્ર આત્મા મમ નામ્નિ પ્રેરયિષ્યતિ સ સર્વ્વં શિક્ષયિત્વા મયોક્તાઃ સમસ્તાઃ કથા યુષ્માન્ સ્મારયિષ્યતિ।

XXVII અહં યુષ્માકં નિકટે શાન્તિં સ્થાપયિત્વા યામિ, નિજાં શાન્તિં યુષ્મભ્યં દદામિ, જગતો લોકા યથા દદાતિ તથાહં ન દદામિ; યુષ્માકમ્ અન્તઃકરણાનિ દુઃખિતાનિ ભીતાનિ ચ ન ભવન્તુ।

XXVIII અહં ગત્વા પુનરપિ યુષ્માકં સમીપમ્ આગમિષ્યામિ મયોક્તં વાક્યમિદં યૂયમ્ અશ્રૌષ્ટ; યદિ મય્યપ્રેષ્યધ્વં તર્હ્યહં પિતુઃ સમીપં ગચ્છામિ મમાસ્યાં કથાયાં યૂયમ્ અહ્લાદિષ્યધ્વં યતો મમ પિતા મત્તોપિ મહાન્।

XXIX તસ્યા ઘટનાયાઃ સમયે યથા યુષ્માકં શ્રદ્ધા જાયતે તદર્થમ્ અહં તસ્યા ઘટનાયાઃ પૂર્વ્વમ્ ઇદાનીં યુષ્માન્ એતાં વાર્ત્તાં વદામિ।

XXX ઇતઃ પરં યુષ્માભિઃ સહ મમ બહવ આલાપા ન ભવિષ્યન્તિ યતઃ કારણાદ્ એતસ્ય જગતઃ પતિરાગચ્છતિ કિન્તુ મયા સહ તસ્ય કોપિ સમ્બન્ધો નાસ્તિ।

XXXI અહં પિતરિ પ્રેમ કરોમિ તથા પિતુ ર્વિધિવત્ કર્મ્માણિ કરોમીતિ યેન જગતો લોકા જાનન્તિ તદર્થમ્ ઉત્તિષ્ઠત વયં સ્થાનાદસ્માદ્ ગચ્છામ।

# XV

I અહં સત્યદ્રાક્ષાલતાસ્વરૂપો મમ પિતા તૂદ્યાનપરિચારકસ્વરૂપઞ્ચ।

II મમ યાસુ શાખાસુ ફલાનિ ન ભવન્તિ તાઃ સ છિનત્તિ તથા ફલવત્યઃ શાખા યથાધિકફલાનિ ફલન્તિ તદર્થં તાઃ પરિષ્કરોતિ।

III ઇદાનીં મયોક્તોપદેશેન યૂયં પરિષ્કૃતાઃ।

IV અતઃ કારણાત્ મયિ તિષ્ઠત તેનાહમપિ યુષ્માસુ તિષ્ઠામિ, યતો હેતો ર્દ્રાક્ષાલતાયામ્ અસંલગ્ના શાખા યથા ફલવતી ભવિતું ન શક્નોતિ તથા યૂયમપિ મય્યતિષ્ઠન્તઃ ફલવન્તો ભવિતું ન શક્નુથ।

V અહં દ્રાક્ષાલતાસ્વરૂપો યૂયઞ્ચ શાખાસ્વરૂપાઃ; યો જનો મયિ તિષ્ઠતિ યત્ર ચાહં તિષ્ઠામિ, સ પ્રચૂરફલૈઃ ફલવાન્ ભવતિ, કિન્તુ માં વિના યૂયં કિમપિ કર્ત્તું ન શક્નુથ।

VI યઃ કશ્ચિન્ મયિ ન તિષ્ઠતિ સ શુષ્કશાખેવ બહિ ર્નિક્ષિપ્યતે લોકાશ્ચ તા આહૃત્ય વહ્નૌ નિક્ષિપ્ય દાહયન્તિ।

VII યદિ યૂયં મયિ તિષ્ઠથ મમ કથા ચ યુષ્માસુ તિષ્ઠતિ તર્હિ યદ્ વાઞ્છિત્વા યાચિષ્યધ્વે યુષ્માકં તદેવ સફલં ભવિષ્યતિ।
VIII યદિ યૂયં પ્રચૂરફલવન્તો ભવથ તર્હિ તદ્ધારા મમ પિતુ ર્મહિમા પ્રકાશિષ્યતે તથા યૂયં મમ શિષ્યા ઇતિ પરિક્ષાયિષ્યધ્વે।
IX પિતા યથા મયિ પ્રીતવાન્ અહમપિ યુષ્માસુ તથા પ્રીતવાન્ અતો હેતો ર્યૂયં નિરન્તરં મમ પ્રેમપાત્રાણિ ભૂત્વા તિષ્ઠત।
X અહં યથા પિતુરાજ્ઞા ગૃહીત્વા તસ્ય પ્રેમભાજનં તિષ્ઠામિ તથૈવ યૂયમપિ યદિ મમાજ્ઞા ગૃહ્લીથ તર્હિ મમ પ્રેમભાજનાનિ સ્થાસ્યથ।
XI યુષ્મન્નિમિત્તં મમ ય આહ્લાદઃ સ યથા ચિરં તિષ્ઠતિ યુષ્માકમ્ આનન્દશ્ચ યથા પૂર્ય્યતે તદર્થં યુષ્મભ્યમ્ એતાઃ કથા અત્રકથમ્।
XII અહં યુષ્માસુ યથા પ્રીયે યૂયમપિ પરસ્પરં તથા પ્રીયધ્વમ્ એષા મમાજ્ઞા।
XIII મિત્રાણાં કારણાત્ સ્વપ્રાણદાનપર્ય્યન્તં યત્ પ્રેમ તસ્માન્ મહાપ્રેમ કસ્યાપિ નાસ્તિ।
XIV અહં યદ્યદ્ આદિશામિ તત્તદેવ યદિ યૂયમ્ આચરત તર્હિ યૂયમેવ મમ મિત્રાણિ।
XV અદ્યારભ્ય યુષ્માન્ દાસાન્ ન વદિષ્યામિ યત્ પ્રભુ ર્યત્ કરોતિ દાસસ્તદ્ ન જાનાતિ; કિન્તુ પિતુઃ સમીપે યદ્યદ્ અશૃણવં તત્
સર્વ્વં યૂષ્માન્ અજ્ઞાપયમ્ તત્કારણાદ્ યુષ્માન્ મિત્રાણિ પ્રોક્તવાન્।
XVI યૂયં માં રોચિતવન્ત ઇતિ ન, કિન્ત્વહમેવ યુષ્માન્ રોચિતવાન્ યૂયં ગત્વા યથા ફલાન્યુત્પાદયથ તાનિ ફલાનિ ચાક્ષયાણિ
ભવન્તિ, તદર્થં યુષ્માન્ ન્યજુનજં તસ્માન્ મમ નામ પ્રોચ્ય પિતરં યત્ કિઞ્ચિદ્ યાચિષ્યધ્વે તદેવ સ યુષ્મભ્યં દાસ્યતિ।
XVII યૂયં પરસ્પરં પ્રીયધ્વમ્ અહમ્ ઇત્યાજ્ઞાપયામિ।
XVIII જગતો લોકૈ ર્યુષ્માસુ ઋતીયિતેષુ તે પૂર્વ્વં મામેવાર્ત્તીયન્ત ઇતિ યૂયં જાનીથ।
XIX યદિ યૂયં જગતો લોકા અભવિષ્યત તર્હિ જગતો લોકા યુષ્માન્ આત્મીયાન્ બુદ્દ્ધ્વાપ્રેષ્યન્ત; કિન્તુ યૂયં જગતો લોકા ન
ભવથ, અહં યુષ્માન્ અસ્માજ્જગતોऽરોચયમ્ એતસ્માત્ કારણાજ્જગતો લોકા યુષ્માન્ ઋતીયન્તે।
XX દાસઃ પ્રભો ર્મહાન્ ન ભવતિ મમૈતત્ પૂર્વ્વીયં વાક્યં સ્મરત; તે યદિ મામેવાતાડયન્ તર્હિ યુષ્માનપિ તાડયિષ્યન્તિ, યદિ મમ
વાક્યં ગૃહ્લન્તિ તર્હિ યુષ્માકમપિ વાક્યં ગ્રહીષ્યન્તિ।
XXI કિન્તુ તે મમ નામકારણાદ્ યુષ્માન્ પ્રતિ તાદૃશં વ્યવહરિષ્યન્તિ યતો યો માં પ્રેરિતવાન્ તં તે ન જાનન્તિ।
XXII તેષાં સન્નિધિમ્ આગત્ય યદ્યહં નાકથયિષ્યં તર્હિ તેષાં પાપં નાભવિષ્યત્ કિન્ત્વધુના તેષાં પાપમાચ્છાદયિતુમ્ ઉપાયો નાસ્તિ।
XXIII યો જનો મામ્ ઋતીયતે સ મમ પિતરમપિ ઋતીયતે।
XXIV યાદૃશાનિ કર્મ્માણિ કેનાપિ કદાપિ નાક્રિયન્ત તાદૃશાનિ કર્મ્માણિ યદિ તેષાં સાક્ષાદ્ અહં નાકરિષ્યં તર્હિ તેષાં પાપં
નાભવિષ્યત્ કિન્ત્વધુના તે દૃષ્ટ્વાપિ માં મમ પિતરઞ્ચાર્ત્તીયન્ત।
XXV તસ્માત્ તેऽકારણં મામ્ ઋતીયન્તે યદેતદ્ વચનં તેષાં શાસ્ત્રે લિખિતમાસ્તે તત્ સફલમ્ અભવત્।
XXVI કિન્તુ પિતુ ર્નિર્ગતં યં સહાયમર્થાત્ સત્યમયમ્ આત્માનં પિતુઃ સમીપાદ્ યુષ્માકં સમીપે પ્રેષયિષ્યામિ સ આગત્ય મયિ
પ્રમાણં દાસ્યતિ।
XXVII યૂયં પ્રથમમારભ્ય મયા સાર્દ્ધં તિષ્ઠથ તસ્માદ્ધેતો ર્યૂયમપિ પ્રમાણં દાસ્યથ।

# XVI

I યુષ્માકં યથા વાધા ન જાયતે તદર્થં યુષ્માન્ એતાનિ સર્વ્વવાક્યાનિ વ્યાહરં।
II લોકા યુષ્માન્ ભજનગૃહેભ્યો દૂરીકરિષ્યન્તિ તથા યસ્મિન્ સમયે યુષ્માન્ હત્વા ઈશ્વરસ્ય તુષ્ટિ જનકં કર્મ્માકુર્મ્મ ઇતિ મંસ્યન્તે
સ સમય આગચ્છન્તિ।
III તે પિતરં માઞ્ચ ન જાનન્તિ, તસ્માદ્ યુષ્માન્ પ્રતીદૃશમ્ આચરિષ્યન્તિ।
IV અતો હેતાઃ સમયે સમુપસ્થિતે યથા મમ કથા યુષ્માકં મનઃસુઃ સમુપતિષ્ઠતિ તદર્થં યુષ્માભ્યમ્ એતાં કથાં કથયામિ યુષ્માભિઃ
સાર્દ્ધમ્ અહં તિષ્ઠન્ પ્રથમં તાં યુષ્મભ્યં નાકથયં।
V સામ્પ્રતં સ્વસ્ય પ્રેરયિતુઃ સમીપં ગચ્છામિ તથાપિ ત્વં ક્ક ગચ્છસિ કથામેતાં યુષ્માકં કોપિ માં ન પૃચ્છતિ।
VI કિન્તુ મયોક્તાભિરાભિઃ કથાભિ ર્યૂષ્માકમ્ અન્તઃકરણાનિ દુઃખેન પૂર્ણાન્યભવન્।
VII તથાપ્યહં યથાર્થં કથયામિ મમ ગમનં યુષ્માકં હિતાર્થમેવ, યતો હેતો ર્ગમને ન કૃતે સહાયો યુષ્માકં સમીપં નાગમિષ્યતિ કિન્તુ
યદિ ગચ્છામિ તર્હિ યુષ્માકં સમીપે તં પ્રેષયિષ્યામિ।
VIII તતઃ સ આગત્ય પાપપુણ્યદણ્ડેષુ જગતો લોકાનાં પ્રબોધં જનયિષ્યતિ।
IX તે મયિ ન વિશ્વસન્તિ તસ્માદ્ધેતોઃ પાપપ્રબોધં જનયિષ્યતિ।
X યુષ્માકમ્ અદૃશ્યઃ સન્નહં પિતુઃ સમીપં ગચ્છામિ તસ્માદ્ પુણ્યે પ્રબોધં જનયિષ્યતિ।
XI એતજ્જગતોऽધિપતિ ર્દણ્ડાજ્ઞાં પ્રાપ્નોતિ તસ્માદ્ દણ્ડે પ્રબોધં જનયિષ્યતિ।
XII યુષ્મભ્યં કથયિતું મમાનેકાઃ કથા આસતે, તાઃ કથા ઇદાનીં યૂયં સોઢું ન શક્નુથ;
XIII કિન્તુ સત્યમય આત્મા યદા સમાગમિષ્યતિ તદા સર્વ્વં સત્યં યુષ્માન્ નેષ્યતિ, સ સ્વતઃ કિમપિ ન વદિષ્યતિ કિન્તુ યચ્છ્રોષ્યતિ
તદેવ કથયિત્વા ભાવિકાર્ય્યં યુષ્માન્ જ્ઞાપયિષ્યતિ।
XIV મમ મહિમાનં પ્રકાશયિષ્યતિ યતો મદીયાં કથાં ગૃહીત્વા યુષ્માન્ બોધયિષ્યતિ।
XV પિતુ ર્યદ્યદ્ આસ્તે તત્ સર્વ્વં મમ તસ્માદ્ કારણાદ્ અવાદિષં સ મદીયાં કથાં ગૃહીત્વા યુષ્માન્ બોધયિષ્યતિ।
XVI કિયત્કાલાત્ પરં યૂયં માં દ્રષ્ટું ન લપ્સ્યધ્વે કિન્તુ કિયત્કાલાત્ પરં પુન ર્દ્રષ્ટું લપ્સ્યધ્વે યતોહં પિતુઃ સમીપં ગચ્છામિ।
XVII તતઃ શિષ્યાણાં કિયન્તો જનાઃ પરસ્પરં વદિતુમ્ આરભન્ત, કિયત્કાલાત્ પરં માં દ્રષ્ટું ન લપ્સ્યધ્વે કિન્તુ કિયત્કાલાત્ પરં
પુન ર્દ્રષ્ટું લપ્સ્યધ્વે યતોહં પિતુઃ સમીપં ગચ્છામિ, ઇતિ યદ્ વાક્યમ્ અયં વદતિ તત્ કિં?
XVIII તતઃ કિયત્કાલાત્ પરમ્ ઇતિ તસ્ય વાક્યં કિં? તસ્ય વાક્યસ્યાભિપ્રાયં વયં બોદ્ધું ન શક્નુમસ્તૈરિતિ
XIX નિગદિતે યીશુસ્તેષાં પ્રશ્નેચ્છાં જ્ઞાત્વા તેભ્યોऽકથયત્ કિયત્કાલાત્ પરં માં દ્રષ્ટું ન લપ્સ્યધ્વે, કિન્તુ કિયત્કાલાત્ પરં પૂન ર્દ્રષ્ટું
લપ્સ્યધ્વે, યામિમાં કથામકથયં તસ્યા અભિપ્રાયં કિં યૂયં પરસ્પરં મૃગયધ્વે?

XX યુષ્માનહમ્ અતિયથાર્થં વદામિ યૂયં ક્રન્દિષ્યથ વિલપિષ્યથ ચ, કિન્તુ જગતો લોકા આનન્દિષ્યન્તિ; યૂયં શોકાકુલા ભવિષ્યથ કિન્તુ શોકાત્ પરં આનન્દયુક્તા ભવિષ્યથ।

XXI પ્રસવકાલ ઉપસ્થિતે નારી યથા પ્રસવવેદનયા વ્યાકુલા ભવતિ કિન્તુ પુત્રે ભૂમિષ્ઠે સતિ મનુષ્યૈકો જન્મના નરલોકે પ્રવિષ્ટ ઇત્યાનન્દાત્ તસ્યાસ્તત્સર્વ્વં દુઃખં મનસિ ન તિષ્ઠતિ,

XXII તથા યૂયમપિ સામ્પ્રતં શોકાકુલા ભવથ કિન્તુ પુનરપિ યુષ્મભ્યં દર્શનં દાસ્યામિ તેન યુષ્માકમ્ અન્તઃકરણાનિ સાનન્દાનિ ભવિષ્યન્તિ, યુષ્માકં તમ્ આનન્દઞ્ચ કોપિ હર્ત્તું ન શક્ષ્યતિ।

XXIII તસ્મિન્ દિવસે કામપિ કથાં માં ન પ્રક્ષ્યથ। યુષ્માનહમ્ અતિયથાર્થં વદામિ, મમ નામ્ના યત્ કિઞ્ચિદ્ પિતરં યાચિષ્યધ્વે તદેવ સ દાસ્યતિ।

XXIV પૂર્વ્વં મમ નામ્ના કિમપિ નાયાચધ્વં, યાચધ્વં તતઃ પ્રાપ્સ્યથ તસ્માદ્ યુષ્માકં સમ્પૂર્ણાનન્દો જનિષ્યતે।

XXV ઉપમાકથાભિઃ સર્વ્વાણ્યેતાનિ યુષ્માન્ જ્ઞાપિતવાન્ કિન્તુ યસ્મિન્ સમયે ઉપમયા નોક્ત્વા પિતુઃ કથાં સ્પષ્ટં જ્ઞાપયિષ્યામિ સમય એતાદૃશ આગચ્છતિ।

XXVI તદા મમ નામ્ના પ્રાર્થયિષ્યધ્વે ઽહં યુષ્મન્નિમિત્તં પિતરં વિનેષ્યે કથામિમાં ન વદામિ;

XXVII યતો યૂયં મયિ પ્રેમ કુરુથ, તથાહમ્ ઈશ્વરસ્ય સમીપાદ્ આગતવાન્ ઇત્યપિ પ્રતીથ, તસ્માદ્ કારણાત્ કારણાત્ પિતા સ્વયં યુષ્માસુ પ્રીયતે।

XXVIII પિતુઃ સમીપાજ્જજદ્ આગતોસ્મિ જગત્ પરિત્યજ્ય ચ પુનરપિ પિતુઃ સમીપં ગચ્છામિ।

XXIX તદા શિષ્યા અવદન્, હે પ્રભો ભવાન્ ઉપમયા નોક્ત્વાધુના સ્પષ્ટં વદતિ।

XXX ભવાન્ સર્વ્વજ્ઞઃ કેનચિત્ પૃષ્ટો ભવિતુમપિ ભવતઃ પ્રયોજનં નાસ્તીત્યધુનાસ્માકં સ્થિરજ્ઞાનં જાતં તસ્માદ્ ભવાન્ ઈશ્વરસ્ય સમીપાદ્ આગતવાન્ ઇત્યત્ર વયં વિશ્વસિમઃ।

XXXI તતો યીશુઃ પ્રત્યવાદીદ્ ઇદાનીં કિં યૂયં વિશ્વસિથ?

XXXII પશ્યત સર્વ્વે યૂયં વિકીર્ણાઃ સન્તો મામ્ એકાકિનં પીરત્યજ્ય સ્વં સ્વં સ્થાનં ગમિષ્યથ, એતાદૃશઃ સમય આગચ્છતિ વરં પ્રાયેણોપસ્થિતવાન્; તથાપ્યહં નૈકાકી ભવામિ યતઃ પિતા મયા સાર્દ્ધમ્ આસ્તે।

XXXIII યથા મયા યુષ્માકં શાન્તિ ર્જાયતે તદર્થમ્ એતાઃ કથા યુષ્મભ્યમ્ અચકથં; અસ્મિન્ જગતિ યુષ્માકં ક્લેશો ઘટિષ્યતે કિન્ત્વક્ષોભા ભવત યતો મયા જગજ્જિતં।

# XVII

I તતઃ પરં યીશુરેતાઃ કથાઃ કથયિત્વા સ્વર્ગં વિલોક્યૈતત્ પ્રાર્થયત્, હે પિતઃ સમય ઉપસ્થિતવાન્; યથા તવ પુત્રસ્તવ મહિમાનં પ્રકાશયતિ તદર્થં ત્વં નિજપુત્રસ્ય મહિમાનં પ્રકાશય।

II ત્વં યોલ્લોકાન્ તસ્ય હસ્તે સમર્પિતવાન્ સ યથા તેભ્યોઽનન્તાયુ ર્દદાતિ તદર્થં ત્વં પ્રાણિમાત્રાણામ્ અધિપતિત્વભારં તસ્મૈ દત્તવાન્।

III યસ્ત્વમ્ અદ્વિતીયઃ સત્ય ઈશ્વરસ્ત્વયા પ્રેરિતશ્ચ યીશુઃ ખ્રીષ્ટ એતયોરુભયોઃ પરિચયે પ્રાપ્તેઽનન્તાયુ ર્ભવતિ।

IV ત્વં યસ્ય કર્મ્મણો ભારં મહ્યં દત્તવાન્, તત્ સમ્પન્નં કૃત્વા જગત્યસ્મિન્ તવ મહિમાનં પ્રાકાશયં।

V અતએવ હે પિત ર્જગત્યવિદ્યમાને ત્વયા સહ તિષ્ઠતો મમ યો મહિમાસીત્ સમ્પ્રતિ તવ સમીપે માં તં મહિમાનં પ્રાપય।

VI અન્યચ્ચ ત્વમ્ એતજ્જગતો યાલ્લોકાન્ મહ્યમ્ અદદા અહં તેભ્યસ્તવ નામ્નસ્તત્ત્વજ્ઞાનમ્ અદદાં, તે તવૈવાસન્, ત્વં તાન્ મહ્યમદદાઃ, તસ્માત્તે તવોપદેશમ્ અગૃહ્લન્।

VII ત્વં મહ્યં યત્ કિઞ્ચિદ્ અદદાસ્તત્સર્વ્વં ત્વત્તો જાયતે ઇત્યધુનાજાનન્।

VIII મહ્યં યમુપદેશમ્ અદદા અહમપિ તેભ્યસ્તમુપદેશમ્ અદદાં તેપિ તમગૃહ્લન્ ત્વત્તોહં નિર્ગત્ય ત્વયા પ્રેરિતોભવમ્ અત્ર ચ વ્યશ્વસન્।

IX તેષામેવ નિમિત્તં પ્રાર્થયેઽહં જગતો લોકનિમિત્તં ન પ્રાર્થયે કિન્તુ યાલ્લોકાન્ મહ્યમ્ અદદાસ્તેષામેવ નિમિત્તં પ્રાર્થયેઽહં યતસ્તે તવૈવાસતે।

X યે મમ તે તવ યે ચ તવ તે મમ તથા તૈ ર્મમ મહિમા પ્રકાશ્યતે।

XI સામ્પ્રતમ્ અસ્મિન્ જગતિ મમાવસ્થિતેઃ શેષમ્ અભવત્ અહં તવ સમીપં ગચ્છામિ કિન્તુ તે જગતિ સ્થાસ્યન્તિ; હે પવિત્ર પિતરાવયો ર્યથૈકત્વમાસ્તે તથા તેષામપ્યેકત્વં ભવતિ તદર્થં યાલ્લોકાન્ મહ્યમ્ અદદાસ્તાન્ સ્વનામ્ના રક્ષ।

XII યાવન્તિ દિનાનિ જગત્યસ્મિન્ તૈઃ સહાહમાસં તાવન્તિ દિનાનિ તાન્ તવ નામ્નાહં રક્ષિતવાન્; યાલ્લોકાન્ મહ્યમ્ અદદાસ્તાન્ સર્વ્વાન્ અહમરક્ષં, તેષાં મધ્યે કેવલં વિનાશપાત્રં હારિતં તેન ધર્મ્મપુસ્તકસ્ય વચનં પ્રત્યક્ષં ભવતિ।

XIII કિન્ત્વધુના તવ સન્નિધિં ગચ્છામિ મયા યથા તેષાં સમ્પૂર્ણાનન્દો ભવતિ તદર્થમહં જગતિ તિષ્ઠન્ એતાઃ કથા અકથયમ્।

XIV તવોપદેશં તેભ્યોઽદદાં જગતા સહ યથા મમ સમ્બન્ધો નાસ્તિ તથા જજતા સહ તેષામપિ સમ્બન્ધાભાવાજ્ જગતો લોકાસ્તાન્ ઋતીયન્તે।

XV ત્વં જગતસ્તાન્ ગૃહાણેતિ ન પ્રાર્થયે કિન્ત્વશુભાદ્ રક્ષેતિ પ્રાર્થયેહમ્।

XVI અહં યથા જગત્સમ્બન્ધીયો ન ભવામિ તથા તેપિ જગત્સમ્બન્ધીયા ન ભવન્તિ।

XVII તવ સત્યકથયા તાન્ પવિત્રીકુરુ તવ વાક્યમેવ સત્યં।

XVIII ત્વં યથા માં જગતિ પ્રૈરયસ્તથાહમપિ તાન્ જગતિ પ્રૈરયં।

XIX તેષાં હિતાર્થં યથાહં સ્વં પવિત્રીકરોમિ તથા સત્યકથયા તેપિ પવિત્રીભવન્તુ।

XX કેવલં એતેષામર્થે પ્રાર્થયેઽહમ્ ઇતિ ન કિન્ત્વેતેષામુપદેશેન યે જના મયિ વિશ્વસિષ્યન્તિ તેષામપ્યર્થે પ્રાર્થયેઽહમ્।

XXI હે પિતસ્તેષાં સર્વ્વેષામ્ એકત્વં ભવતુ તવ યથા મયિ મમ ચ યથા ત્વય્યેકત્વં તથા તેષામપ્યાવયોરેકત્વં ભવતુ તેન ત્વં માં પ્રેરિતવાન્ ઇતિ જગતો લોકાઃ પ્રતિયન્તુ।

XXII યથાવયોરેકત્વં તથા તેષામપ્યેકત્વં ભવતુ તેષ્વહં મયિ ચ ત્વમ્ ઇત્થં તેષાં સમ્પૂર્ણમેકત્વં ભવતુ, ત્વં પ્રેરિતવાન્ ત્વં મયિ યથા
પ્રીયસે ચ તથા તેષ્વપિ પ્રીતવાન્ એતદ્યથા જગતો લોકા જાનન્તિ
XXIII તદર્થં ત્વં યં મહિમાનં મહ્યમ્ અદદાસ્તં મહિમાનમ્ અહમપિ તેભ્યો દત્તવાન્।
XXIV હે પિત ર્જગતો નિર્મ્માણાત્ પૂર્વ્વં મયિ સ્નેહં કૃત્વા યં મહિમાનં દત્તવાન્ મમ તં મહિમાનં યથા તે પશ્યન્તિ તદર્થં યાલ્લોકાન્
મહ્યં દત્તવાન્ અહં યત્ર તિષ્ઠામિ તેપિ યથા તત્ર તિષ્ઠન્તિ મમૈષા વાઞ્છા।
XXV હે યથાર્થિક પિત ર્જગતો લોકૈસ્ત્વય્યજ્ઞાતેપિ ત્વામહં જાને ત્વં માં પ્રેરિતવાન્ ઇતીમે શિષ્યા જાનન્તિ।
XXVI યથાહં તેષુ તિષ્ઠામિ તથા મયિ યેન પ્રેમ્ના પ્રેમાકરોસ્તત્ તેષુ તિષ્ઠતિ તદર્થં તવ નામાહં તાન્ જ્ઞાપિતવાન્ પુનરપિ
જ્ઞાપયિષ્યામિ।

# XVIII

I તાઃ કથાઃ કથયિત્વા યીશુઃ શિષ્યાનાદાય કિદ્રોન્નામકં સ્રોત ઉત્તીર્ય્ય શિષ્યૈઃ સહ તત્રત્યોદ્યાનં પ્રાવિશત્।
II કિન્તુ વિશ્વાસઘાતિયિહૂદાસ્તત્ સ્થાનં પરિચીયતે યતો યીશુઃ શિષ્યૈઃ સાર્દ્ધં કદાચિત્ તત્ સ્થાનમ્ અગચ્છત્।
III તદા સ યિહૂદાઃ સૈન્યગણં પ્રધાનયાજકાનાં ફિરૂશિનાઞ્ચ પદાતિગણઞ્ચ ગૃહીત્વા પ્રદીપાન્ ઉલ્કાન્ અસ્ત્રાણિ ચાદાય તસ્મિન્
સ્થાન ઉપસ્થિતવાન્।
IV સ્વં પ્રતિ યદ્ ઘટિષ્યતે તજ્ જ્ઞાત્વા યીશુરગ્રેસરઃ સન્ તાનપૃચ્છત્ કં ગવેષયથ?
V તે પ્રત્યવદન્, નાસરતીયં યીશું; તતો યીશુરવાદીદ્ અહમેવ સઃ; તૈઃ સહ વિશ્વાસઘાતી યિહૂદાશ્ચાતિષ્ઠત્।
VI તદાહમેવ સ તસ્યૈતાં કથાં શ્રુત્વૈવ તે પશ્ચાદેત્ય ભૂમૌ પતિતાઃ।
VII તતો યીશુઃ પુનરપિ પૃષ્ઠવાન્ કં ગવેષયથ? તતસ્તે પ્રત્યવદન્ નાસરતીયં યીશું।
VIII તદા યીશુઃ પ્રત્યુદિતવાન્ અહમેવ સ ઇમાં કથામચકથમ્; યદિ મામન્વિચ્છથ તર્હીમાન્ ગન્તું મા વારયત।
IX ઇત્થં ભૂતે મહ્યં યાલ્લોકાન્ અદદાસ્તેષામ્ એકમપિ નાહારયમ્ ઇમાં યાં કથાં સ સ્વયમકથયત્ સા કથા સફલા જાતા।
X તદા શિમોન્પિતરસ્ય નિકટે ખઙ્ગસ્થિતેઃ સ તં નિષ્કોષં કૃત્વા મહાયાજકસ્ય માલ્ખનામાનં દાસમ્ આહત્ય તસ્ય દક્ષિણકર્ણં
છિન્નવાન્।
XI તતો યીશુઃ પિતરમ્ અવદત્, ખઙ્ગં કોષે સ્થાપય મમ પિતા મહ્યં પાતું યં કંસમ્ અદદાત્ તેનાહં કિં ન પાસ્યામિ?
XII તદા સૈન્યગણઃ સેનાપતિ ર્યિહૂદીયાનાં પદાતયશ્ચ યીશું ધૃત્વા બદ્ધ્વા હાનન્નામ્નઃ કિયફાઃ શ્વશુરસ્ય સમીપં પ્રથમમ્ અનયન્।
XIII સ કિયફાસ્તસ્મિન્ વત્સરે મહાયાજત્વપદે નિયુક્તઃ
XIV સન્ સાધારણલોકાનાં મઙ્ગલાર્થમ્ એકજનસ્ય મરણમુચિતમ્ ઇતિ યિહૂદીયૈઃ સાર્દ્ધમ્ અમન્ત્રયત્।
XV તદા શિમોન્પિતરોઽન્યૈકશિષ્યશ્ચ યીશોઃ પશ્ચાદ્ અગચ્છતાં તસ્યાન્યશિષ્યસ્ય મહાયાજકેન પરિચિતત્વાત્ સ યીશુના સહ
મહાયાજકસ્યાટ્ટાલિકાં પ્રાવિશત્।
XVI કિન્તુ પિતરો બહિર્દ્વારસ્ય સમીપેઽતિષ્ઠદ્ અતએવ મહાયાજકેન પરિચિતઃ સ શિષ્યઃ પુનર્બહિર્ગત્વા દૌવારિકાયૈ કથયિત્વા
પિતરમ્ અભ્યન્તરમ્ આનયત્।
XVII તદા સ દ્વારરક્ષિકા પિતરમ્ અવદત્ ત્વં કિં ન તસ્ય માનવસ્ય શિષ્યઃ? તતઃ સોવદદ્ અહં ન ભવામિ।
XVIII તતઃ પરં યત્સ્થાને દાસાઃ પદાતયશ્ચ શીતહેતોરઙ્ગારૈ ર્વહ્નિં પ્રજ્વાલ્ય તાપં સેવિતવન્તસ્તત્સ્થાને પિતરસ્તિષ્ઠન્ તૈઃ સહ
વહ્નિતાપં સેવિતુમ્ આરભત।
XIX તદા શિષ્યેષૂપદેશે ચ મહાયાજકેન યીશુઃ પૃષ્ટઃ
XX સન્ પ્રત્યુક્તવાન્ સર્વ્વલોકાનાં સમક્ષં કથામકથયં ગુપ્તં કામપિ કથાં ન કથયિત્વા યત્ સ્થાનં યિહૂદીયાઃ સતતં ગચ્છન્તિ તત્ર
ભજનગેહે મન્દિરે ચાશિક્ષયં।
XXI મત્તઃ કુતઃ પૃચ્છસિ? યે જના મદુપદેશમ્ અશૃણ્વન્ તાનેવ પૃચ્છ યદ્યદ્ અવદં તે તત્ જાનિન્ત।
XXII તદેત્થં પ્રત્યુદિતત્વાત્ નિકટસ્થપદાતિ ર્યીશું ચપેટેનાહત્ય વ્યાહરત્ મહાયાજકમ્ એવં પ્રતિવદસિ?
XXIII તતો યીશુઃ પ્રતિગદિતવાન્ યદ્યયથાર્થમ્ અચકથં તર્હિ તસ્યાયથાર્થસ્ય પ્રમાણં દેહિ, કિન્તુ યદિ યથાર્થં તર્હિ કુતો હેતો ર્મામ્
અતાડયઃ?
XXIV પૂર્વ્વં હાનન્ સબન્ધનં તં કિયફામહાયાજકસ્ય સમીપં પ્રૈષયત્।
XXV શિમોન્પિતરસ્તિષ્ઠન્ વહ્નિતાપં સેવતે, એતસ્મિન્ સમયે કિયન્તસ્તમ્ અપૃચ્છન્ ત્વં કિમ્ એતસ્ય જનસ્ય શિષ્યો ન? તતઃ
સોપહ્નુત્યાબ્રવીદ્ અહં ન ભવામિ।
XXVI તદા મહાયાજકસ્ય યસ્ય દાસસ્ય પિતરઃ કર્ણમચ્છિનત્ તસ્ય કુટુમ્બઃ પ્રત્યુદિતવાન્ ઉદ્યાને તેન સહ તિષ્ઠન્તં ત્વાં કિં
નાપશ્યં?
XXVII કિન્તુ પિતરઃ પુનરપહ્નુત્ય કથિતવાન્; તદાનીં કુક્કુટોઽરૌત્।
XXVIII તદનન્તરં પ્રત્યૂષે તે કિયફાગૃહાદ્ અધિપતે ર્ગૃહં યીશુમ્ અનયન્ કિન્તુ યસ્મિન્ અશુચિત્વે જાતે તૈ ર્નિસ્તારોત્સવે ન
ભોક્તવ્યં, તસ્ય ભયાદ્ યિહૂદીયાસ્તદ્ગૃહં નાવિશન્।
XXIX અપરં પીલાતો બહિરાગત્ય તાન્ પૃષ્ઠવાન્ એતસ્ય મનુષ્યસ્ય કં દોષં વદથ?
XXX તદા તે પેત્યવદન્ દુષ્કર્મ્મકારિણિ ન સતિ ભવતઃ સમીપે નૈનં સમાર્પયિષ્યામઃ।
XXXI તતઃ પીલાતોઽવદદ્ યૂયમેનં ગૃહીત્વા સ્વેષાં વ્યવસ્થયા વિચારયત। તદા યિહૂદીયાઃ પ્રત્યવદન્ કસ્યાપિ મનુષ્યસ્ય પ્રાણદણ્ડં
કર્ત્તું નાસ્માકમ્ અધિકારોઽસ્તિ।
XXXII એવં સતિ યીશુઃ સ્વસ્ય મૃત્યૌ યાં કથાં કથિતવાન્ સા સફલાભવત્।
XXXIII તદનન્તરં પીલાતઃ પુનરપિ તદ્ રાજગૃહં ગત્વા યીશુમાહૂય પૃષ્ટવાન્ ત્વં કિં યિહૂદીયાનાં રાજા?
XXXIV યીશુઃ પ્રત્યવદત્ ત્વમ્ એતાં કથાં સ્વતઃ કથયસિ કિમન્યઃ કશ્ચિન્ મયિ કથિતવાન્?

XXXV પીલાતોઽવદદ્ અહં કિં યિહૂદીયઃ? તવ સ્વદેશીયા વિશેષતઃ પ્રધાનયાજકા મમ નિકટે ત્વાં સમાર્પયન, ત્વં કિં કૃતવાન્?
XXXVI યીશુઃ પ્રત્યવદત્ મમ રાજ્યમ્ એતજ્જગત્સમ્બન્ધીયં ન ભવતિ યદિ મમ રાજ્યં જગત્સમ્બન્ધીયમ્ અભવિષ્યત્ તર્હિ
યિહૂદીયાનાં હસ્તેષુ યથા સમર્પિતો નાભવં તદર્થં મમ સેવકા અયોત્સ્યન્ કિન્તુ મમ રાજ્યમ્ ઐહિકં ન।
XXXVII તદા પીલાતઃ કથિતવાન્, તર્હિ ત્વં રાજા ભવસિ? યીશુઃ પ્રત્યુક્તવાન્ ત્વં સત્યં કથયસિ, રાજાહં ભવામિ; સત્યતાયાં
સાક્ષ્યં દાતું જનિં ગૃહીત્વા જગત્યસ્મિન્ અવતીર્ણવાન્, તસ્માત્ સત્યધર્મ્મપક્ષપાતિનો મમ કથાં શૃણ્વન્તિ।
XXXVIII તદા સત્યં કિં? એતાં કથાં પષ્ટ્વા પીલાતઃ પુનરપિ બહિર્ગત્વા યિહૂદીયાન્ અભાષત, અહં તસ્ય કમપ્યપરાધં ન
પ્રાપ્નોમિ।
XXXIX નિસ્તારોત્સવસમયે યુષ્માભિરભિરુચિત એકો જનો મયા મોચયિતવ્ય એષા યુષ્માકં રીતિરસ્તિ, અતએવ યુષ્માકં નિકટે
યિહૂદીયાનાં રાજાનં કિં મોચયામિ, યુષ્માકમ્ ઇચ્છા કા?
XL તદા તે સર્વ્વે રુવન્તો વ્યાહરન્ એનં માનુષં નહિ બરબ્બાં મોચય। કિન્તુ સ બરબ્બા દસ્યુરાસીત્।

# XIX

I પીલાતો યીશુમ્ આનીય કશયા પ્રાહારયત્।
II પશ્ચાત્ સેનાગણઃ કણ્ટકનિર્મ્મિતં મુકુટં તસ્ય મસ્તકે સમર્પ્ય વાર્त्તાકીવર્ણં રાજપરિચ્છદં પરિધાપ્ય,
III હે યિહૂદીયાનાં રાજન્ નમસ્કાર ઇત્યુક્ત્વા તં ચપેટેનાહન્તુમ્ આરભત।
IV તદા પીલાતઃ પુનરપિ બહિર્ગત્વા લોકાન્ અવદત્, અસ્ય કમપ્યપરાધં ન લભેઽહં, પશ્યત તદ્ યુષ્માન્ જ્ઞાપયિતું યુષ્માકં સન્નિધૌ
બહિરેનમ્ આનયામિ।
V તતઃ પરં યીશુઃ કણ્ટકમુકુટવાન્ વાર્ત્તાકીવર્ણવસનવાંશ્ચ બહિરાગચ્છત્। તતઃ પીલાત ઉક્તવાન્ એનં મનુષ્યં પશ્યત।
VI તદા પ્રધાનયાજકાઃ પદાતયશ્ચ તં દૃષ્ટ્વા, એનં ક્રુશે વિધ, એનં ક્રુશે વિધ, ઇત્યુક્ત્વા રવિતું આરભન્ત। તતઃ પીલાતઃ કથિતવાન્
યૂયં સ્વયમ્ એનં નીત્વા ક્રુશે વિધત, અહમ્ એતસ્ય કમપ્યપરાધં ન પ્રાપ્તવાન્।
VII યિહૂદીયાઃ પ્રત્યવદન્ અસ્માકં યા વ્યવસ્થાસ્તે તદનુસારેણાસ્ય પ્રાણહનનમ્ ઉચિતં યતોયં સ્વમ્ ઈશ્વરસ્ય પુત્રમવદત્।
VIII પીલાત ઇમાં કથાં શ્રુત્વા મહાત્રાસયુક્તઃ
IX સન્ પુનરપિ રાજગૃહ આગત્ય યીશું પૃષ્ટવાન્ ત્વં કુત્રત્યો લોકઃ? કિન્તુ યીશસ્તસ્ય કિમપિ પ્રત્યુત્તરં નાવદત્।
X ૧૦ તતઃ પીલાત્ કથિતવાન ત્વં કિં મયા સાર્દ્ધં ન સંલપિષ્યસિ ? ત્વાં ક્રુશે વેધિતું વા મોચયિતું શક્તિ ર્મમાસ્તે ઇતિ કિં ત્વં ન
જાનાસિ ? તદા યીશુઃ પ્રત્યવદદ્ ઈશ્વરેણાદŸ‍ં મમોપરિ તવ કિમપ્યધિપતિત્વં ન વિદ્યતે, તથાપિ યો જનો માં તવ હસ્તે સમાર્પયત્
તસ્ય મહાપાતકં જાતમ્।
XI તદા યીશુઃ પ્રત્યવદદ્ ઈશ્વરેણાદત્તં મમોપરિ તવ કિમપ્યધિપતિત્વં ન વિદ્યતે, તથાપિ યો જનો માં તવ હસ્તે સમાર્પયત્ તસ્ય
મહાપાતકં જાતમ્।
XII તદારભ્ય પીલાતસ્તં મોચયિતું ચેષ્ટિતવાન્ કિન્તુ યિહૂદીયા રુવન્તો વ્યાહરન્ યદીમં માનવં ત્યજસિ તર્હિ ત્વં કૈસરસ્ય મિત્રં
ન ભવસિ, યો જનઃ સ્વં રાજાનં વક્તિ સએવ કૈમરસ્ય વિરુદ્ધાં કથાં કથયતિ।
XIII એતાં કથાં શ્રુત્વા પીલાતો યીશું બહિરાનીય નિસ્તારોત્સવસ્ય આસાદનદિનસ્ય દ્વિતીયપ્રહરાત્ પૂર્વ્વં પ્રસ્તરબન્ધનનામ્નિ
સ્થાને ઽર્થાત્ ઇબ્રીયભાષયા યદ્ ગબ્બિથા કથ્યતે તસ્મિન્ સ્થાને વિચારાસન ઉપાવિશત્।
XIV અનન્તરં પીલાતો યિહૂદીયાન્ અવદત્, યુષ્માકં રાજાનં પશ્યત।
XV કિન્તુ એનં દૂરીકુરુ, એનં દૂરીકુરુ, એનં ક્રુશે વિધ, ઇતિ કથાં કથયિત્વા તે રવિતુમ્ આરભન્ત; તદા પીલાતઃ કથિતવાન્ યુષ્માકં
રાજાનં કિં ક્રુશે વેધિષ્યામિ? પ્રધાનયાજકા ઉત્તરમ્ અવદન્ કૈસરં વિના કોપિ રાજાસ્માકં નાસ્તિ।
XVI તતઃ પીલાતો યીશું ક્રુશે વેધિતું તેષાં હસ્તેષુ સમાર્પયત્, તતસ્તે તં ધૃત્વા નીતવન્તઃ।
XVII તતઃ પરં યીશુઃ ક્રુશં વહન્ શિરઃકપાલમ્ અર્થાદ્ યદ્ ઇબ્રીયભાષયા ગુલ્ગલ્તાં વદન્તિ તસ્મિન્ સ્થાન ઉપસ્થિતઃ।
XVIII તતસ્તે મધ્યસ્થાને તં તસ્યોભયપાર્શ્વે દ્વાવપરૌ ક્રુશેઽવિધન્।
XIX અપરમ્ એષ યિહૂદીયાનાં રાજા નાસરતીયયીશુઃ, ઇતિ વિજ્ઞાપનં લિખિત્વા પીલાતસ્તસ્ય ક્રુશોપરિ સમયોજયત્।
XX સા લિપિઃ ઇબ્રીયયૂનાનીયરોમીયભાષાભિ ર્લિખિતા; યીશોઃ ક્રુશવેધનસ્થાનં નગરસ્ય સમીપં, તસ્માદ્ બહવો યિહૂદીયાસ્તાં
પઠિતુમ્ આરભન્ત।
XXI યિહૂદીયાનાં પ્રધાનયાજકાઃ પીલાતમિતિ ન્યવેદયન્ યિહૂદીયાનાં રાજેતિ વાક્યં ન કિન્તુ એષ સ્વં યિહૂદીયાનાં રાજાનમ્
અવદદ્ ઇત્થં લિખતુ।
XXII તતઃ પીલાત ઉત્તરં દત્તવાન્ યલ્લેખનીયં તલ્લિખિતવાન્।
XXIII ઇત્થં સેનાગણો યીશું ક્રુશે વિધિત્વા તસ્ય પરિધેયવસ્ત્રં ચતુરો ભાગાન્ કૃત્વા એકૈકસેના એકૈકભાગમ્ અગૃહ્લત્
તસ્યોત્તરીયવસ્ત્રઞ્ચાગૃહ્લત્। કિન્તૂત્તરીયવસ્ત્રં સૂચિસેવનં વિના સર્વ્વમ્ ઊતં।
XXIV તસ્માત્તે વ્યાહરન્ એતત્ કઃ પ્રાપ્સ્યતિ? તન્ન ખણ્ડયિત્વા તત્ર ગુટિકાપાતં કરવામ। વિભજન્તેઽધરીયં મે વસનં તે પરસ્પરં।
મમોત્તરીયવસ્ત્રાર્થં ગુટિકાં પાતયન્તિ ચ। ઇતિ યદ્વાક્યં ધર્મ્મપુસ્તકે લિખિતમાસ્તે તત્ સેનાગણેનેત્થં વ્યવહરણાત્ સિદ્ધમભવત્।
XXV તદાનીં યીશો ર્માતા માતુ ર્ભગિની ચ યા ક્લિયપા ભાર્ય્યા મરિયમ્ મગ્દલીની મરિયમ્ ચ એતાસ્તસ્ય ક્રુશસ્ય સન્નિધૌ
સમતિષ્ઠન્।
XXVI તતો યીશુઃ સ્વમાતરં પ્રિયતમશિષ્યઞ્ચ સમીપે દણ્ડાયમાનૌ વિલોક્ય માતરમ્ અવદત્, હે યોષિદ્ એનં તવ પુત્રં પશ્ય,
XXVII શિષ્યન્ત્વવદત્, એનાં તવ માતરં પશ્ય। તતઃ સ શિષ્યસ્તદ્ઘટિકાયાં તાં નિજગૃહં નીતવાન્।
XXVIII અનન્તરં સર્વ્વં કર્મ્માધુના સમ્પન્નમભૂત્ યીશુરિતિ જ્ઞાત્વા ધર્મ્મપુસ્તકસ્ય વચનં યથા સિદ્ધં ભવતિ તદર્થમ્ અકથયત્ મમ
પિપાસા જાતા।

XXIX તતસ્તસ્મિન્ સ્થાને અમ્લરસેન પૂર્ણપાત્રસ્થિત્યા તે સ્પઞ્જમેકં તદમ્લરસેનાર્દ્રીકૃત્ય એસોબ્નલે તદ્ યોજયિત્વા તસ્ય મુખસ્ય
સન્નિધાવસ્થાપયન્|
XXX તદા યીશુરમ્લરસં ગૃહીત્વા સર્વ્વં સિદ્ધમ્ ઇતિ કથાં કથયિત્વા મસ્તકં નમયન્ પ્રાણાન્ પર્ય્યત્યજત્|
XXXI તદ્દિનમ્ આસાદનદિનં તસ્માત્ પરેઽહનિ વિશ્રામવારે દેહા યથા ક્રુશોપરિ ન તિષ્ઠન્તિ, યતઃ સ વિશ્રામવારો મહાદિનમાસીત્,
તસ્માદ્ યિહૂદીયાઃ પીલાતનિકટં ગત્વા તેષાં પાદભઞ્જનસ્ય સ્થાનાન્તરનયનસ્ય ચાનુમતિં પ્રાર્થયન્ત|
XXXII અતઃ સેના આગત્ય યીશુના સહ ક્રુશે હતયોઃ પ્રથમદ્વિતીયચોરયોઃ પાદાન્ અભઞ્જન્;
XXXIII કિન્તુ યીશોઃ સન્નિધિં ગત્વા સ મૃત ઇતિ દૃષ્ટ્વા તસ્ય પાદૌ નાભઞ્જન્|
XXXIV પશ્ચાદ્ એકો યોદ્ધા શૂલાઘાતેન તસ્ય કુક્ષિમ્ અવિધત્ તત્ક્ષણાત્ તસ્માદ્ રક્તં જલઞ્ચ નિરગચ્છત્|
XXXV યો જનોઽસ્ય સાક્ષ્યં દદાતિ સ સ્વયં દૃષ્ટવાન્ તસ્યેદં સાક્ષ્યં સત્યં તસ્ય કથા યુષ્માકં વિશ્વાસં જનયિતું યોગ્યા તત્ સ
જાનાતિ|
XXXVI તસ્યૈકમ્ અસ્થ્યપિ ન ભંક્ષ્યતે,
XXXVII તદ્વદ્ અન્યશાસ્ત્રેપિ લિખ્યતે, યથા, "દૃષ્ટિપાતં કરિષ્યન્તિ તેઽવિધન્ યન્તુ તમ્પ્રતિ| "
XXXVIII અરિમથીયનગરસ્ય યૂષફ્નામા શિષ્ય એક આસીત્ કિન્તુ યિહૂદીયેભ્યો ભયાત્ પ્રકાશિતો ન ભવતિ; સ યીશો ર્દેહં નેતું
પીલાતસ્યાનુમતિં પ્રાર્થયત, તતઃ પીલાતેનાનુમતે સતિ સ ગત્વા યીશો ર્દેહમ્ અનયત્|
XXXIX અપરં યો નિકદીમો રાત્રૌ યીશોઃ સમીપમ્ અગચ્છત્ સોપિ ગન્ધરસેન મિશ્રિતં પ્રાયેણ પઞ્ચાશત્સેટકમગુરું
ગૃહીત્વાગચ્છત્|
XL તતસ્તે યિહૂદીયાનાં શ્મશાને સ્થાપનરીત્યનુસારેણ તત્સુગન્ધિદ્રવ્યેણ સહિતં તસ્ય દેહં વસ્ત્રેણાવેષ્ટયન્|
XLI અપરઞ્ચ યત્ર સ્થાને તં ક્રુશેઽવિધન્ તસ્ય નિકટસ્થોદ્યાને યત્ર કિમપિ મૃતદેહં કદાપિ નાસ્થાપ્યત તાદૃશમ્ એકં નૂતનં શ્મશાનમ્
આસીત્|
XLII યિહૂદીયાનામ્ આસાદનદિનાગમનાત્ તે તસ્મિન્ સમીપસ્થશ્મશાને યીશુમ્ અશાયયન્|

# XX

I અનન્તરં સપ્તાહસ્ય પ્રથમદિને ઽતિપ્રત્યૂષે ઽન્ધકારે તિષ્ઠતિ મગ્દલીની મરિયમ્ તસ્ય શ્મશાનસ્ય નિકટં ગત્વા શ્મશાનસ્ય મુખાત્
પ્રસ્તરમપસારિતમ્ અપશ્યત્|
II પશ્ચાદ્ ધાવિત્વા શિમોન્પિતરાય યીશોઃ પ્રિયતમશિષ્યાય ચેદમ્ અકથયત્, લોકાઃ શ્મશાનાત્ પ્રભું નીત્વા કુત્રાસ્થાપયન્ તદ્
વક્તું ન શક્નોમિ|
III અતઃ પિતરઃ સોન્યશિષ્યશ્ચ બર્હિ ર્ભૂત્વા શ્મશાનસ્થાનં ગન્તુમ્ આરભેતાં|
IV ઉભયોર્ધાવતોઃ સોન્યશિષ્યઃ પિતરં પશ્ચાત્ ત્યક્ત્વા પૂર્વ્વં શ્મશાનસ્થાન ઉપસ્થિતવાન્|
V તદા પ્રહ્વીભૂય સ્થાપિતવસ્ત્રાણિ દૃષ્ટવાન્ કિન્તુ ન પ્રાવિશત્|
VI અપરં શિમોન્પિતર આગત્ય શ્મશાનસ્થાનં પ્રવિશ્ય
VII સ્થાપિતવસ્ત્રાણિ મસ્તકસ્ય વસ્ત્રઞ્ચ પૃથક્ સ્થાનાન્તરે સ્થાપિતં દૃષ્ટવાન્|
VIII તતઃ શ્મશાનસ્થાનં પૂર્વ્વમ્ આગતો યોન્યશિષ્યઃ સોપિ પ્રવિશ્ય તાદૃશં દૃષ્ટા વ્યશ્વસીત્|
IX યતઃ શ્મશાનાત્ સ ઉત્થાપયિતવ્ય એતસ્ય ધર્મ્મપુસ્તકવચનસ્ય ભાવં તે તદા વોદ્ધું નાશન્કુવન્|
X અનન્તરં તૌ દ્વૌ શિષ્યૌ સ્વં સ્વં ગૃહં પરાવૃત્યાગચ્છતામ્|
XI તતઃ પરં મરિયમ્ શ્મશાનદ્વારસ્ય બહિઃ સ્થિત્વા રોદિતુમ્ આરભત તતો રુદતી પ્રહ્વીભૂય શ્મશાનં વિલોક્ય
XII યીશોઃ શયનસ્થાનસ્ય શિરઃસ્થાને પદતલે ચ દ્વયો ર્દિશો ર્દ્વૌ સ્વર્ગીયદૂતાવુપવિષ્ટૌ સમપશ્યત્|
XIII તૌ પૃષ્ટવન્તૌ હે નારિ કુતો રોદિષિ? સાવદત્ લોકા મમ પ્રભું નીત્વા કુત્રાસ્થાપયન્ ઇતિ ન જાનામિ|
XIV ઇત્યુક્ત્વા મુખં પરાવૃત્ય યીશું દણ્ડાયમાનમ્ અપશ્યત્ કિન્તુ સ યીશુરિતિ સા જ્ઞાતું નાશક્નોત્|
XV તદા યીશુસ્તામ્ અપૃચ્છત્ હે નારિ કુતો રોદિષિ? કં વા મૃગયસે? તતઃ સા તમ્ ઉદ્યાનસેવકં જ્ઞાત્વા વ્યાહરત્, હે મહેચ્છ ત્વં
યદીતઃ સ્થાનાત્ તં નીતવાન્ તર્હિ કુત્રાસ્થાપયસ્તદ્ વદ તત્સ્થાનાત્ તમ્ આનયામિ|
XVI તદા યીશુસ્તામ્ અવદત્ હે મરિયમ્| તતઃ સા પરાવૃત્ય પ્રત્યવદત્ હે રબ્બૂની અર્થાત્ હે ગુરો|
XVII તદા યીશુરવદત્ માં મા ધર, ઇદાનીં પિતુઃ સમીપે ઊર્દ્ધ્વગમનં ન કરોમિ કિન્તુ યો મમ યુષ્માકઞ્ચ પિતા મમ
યુષ્માકઞ્ચેશ્વરસ્તસ્ય નિકટ ઊર્દ્ધ્વગમનં કર્ત્તુમ્ ઉદ્યતોસ્મિ, ઇમાં કથાં ત્વં ગત્વા મમ ભ્રાતૃગણં જ્ઞાપય|
XVIII તતો મગ્દલીનીમરિયમ્ તત્ક્ષણાદ્ ગત્વા પ્રભુસ્તસ્યૈ દર્શનં દત્ત્વા કથા એતા અકથયદ્ ઇતિ વાર્ત્તાં શિષ્યેભ્યોઽકથયત્|
XIX તતઃ પરં સપ્તાહસ્ય પ્રથમદિનસ્ય સન્ધ્યાસમયે શિષ્યા એકત્ર મિલિત્વા યિહૂદીયેભ્યો ભિયા દ્વારરુદ્ધમ્ અકુર્વ્વન્, એતસ્મિન્
કાલે યીશુસ્તેષાં મધ્યસ્થાને તિષ્ઠન્ અકથયદ્ યુષ્માકં કલ્યાણં ભૂયાત્|
XX ઇત્યુક્ત્વા નિજહસ્તં કુક્ષિઞ્ચ દર્શિતવાન્, તતઃ શિષ્યાઃ પ્રભું દૃષ્ટ્વા હૃષ્ટા અભવન્|
XXI યીશુઃ પુનરવદદ્ યુષ્માકં કલ્યાણં ભૂયાત્ પિતા યથા માં પ્રૈષયત્ તથાહમપિ યુષ્માન્ પ્રેષયામિ|
XXII ઇત્યુક્ત્વા સ તેષામુપરિ દીર્ઘપ્રશ્વાસં દત્ત્વા કથિતવાન્ પવિત્રમ્ આત્માનં ગૃહ્લીત|
XXIII યૂયં યેષાં પાપાનિ મોચયિષ્યથ તે મોચયિષ્યન્તે યેષાઞ્ચ પાપાતિ ન મોચયિષ્યથ તે ન મોચયિષ્યન્તે|
XXIV દ્વાદશમધ્યે ગણિતો યમજો થોમાનામા શિષ્યો યીશોરાગમનકાલૈ તૈઃ સાર્દ્ધં નાસીત્|
XXV અતો વયં પ્રભૂમ્ અપશ્યામેતિ વાક્યેઽન્યશિષ્યૈરુક્તે સોવદત્, તસ્ય હસ્તયો ર્લૌહકીલકાનાં ચિહ્નં ન વિલોક્ય તચ્ચિહ્નમ્
અઙ્ગુલ્યા ન સ્પૃષ્ટ્વા તસ્ય કુક્ષૌ હસ્તં નારોપ્ય ચાહં ન વિશ્વસિષ્યામિ|

XXVI અપરમ્ અષ્ટમેઽહ્નિ ગતે સતિ થોમાસહિતઃ શિષ્યગણ એકત્ર મિલિત્વા દ્વારં રુદ્ધ્વાભ્યન્તર આસીત્, એતર્હિ યીશુસ્તેષાં મધ્યસ્થાને તિષ્ઠન્ અકથયત્, યુષ્માકં કુશલં ભૂયાત્।
XXVII પશ્ચાત્ થામૈ કથિતવાન્ ત્વમ્ અઙ્ગુલીમ્ અત્રાર્પયિત્વા મમ કરૌ પશ્ય કરં પ્રસાર્ય્ય મમ કુક્ષાવર્પય નાવિશ્વસ્ય।
XXVIII તદા થોમા અવદત્, હે મમ પ્રભો હે મદીશ્વર।
XXIX યીશુરકથયત્, હે થોમા માં નિરીક્ષ્ય વિશ્વસિષિ યે ન દૃષ્ટ્વા વિશ્વસન્તિ તએવ ધન્યાઃ।
XXX એતદન્યાનિ પુસ્તકેઽસ્મિન્ અલિખિતાનિ બહૂન્યાશ્ચર્ય્યકર્મ્માણિ યીશુઃ શિષ્યાણાં પુરસ્તાદ્ અકરોત્।
XXXI કિન્તુ યીશુરીશ્વરસ્યાભિષિક્તઃ સુત એવેતિ યથા યૂયં વિશ્વસિથ વિશ્વસ્ય ચ તસ્ય નામ્ના પરમાયુઃ પ્રાપ્નુથ તદર્થમ્ એતાનિ સર્વ્વાણ્યલિખ્યન્ત।

# XXI

I તતઃ પરં તિબિરિયાજલધેસ્તટે યીશુઃ પુનરપિ શિષ્યેભ્યો દર્શનં દત્તવાન્ દર્શનસ્યાખ્યાનમિદમ્।
II શિમોન્પિતરઃ યમજથોમા ગાલીલીયકાન્નાનગરનિવાસી નિથનેલ્ સિવદેઃ પુત્રાવન્યૌ દ્વૌ શિષ્યૌ ચૈતેષ્વેકત્ર મિલિતેષુ શિમોન્પિતરોઽકથયત્ મત્સ્યાન્ ધર્તું યામિ।
III તતસ્તે વ્યાહરન્ તર્હિ વયમપિ ત્વયા સાર્દ્ધં યામઃ તદા તે બહિર્ગતાઃ સન્તઃ ક્ષિપ્રં નાવમ્ આરોહન્ કિન્તુ તસ્યાં રજન્યામ્ એકમપિ ન પ્રાપ્નુવન્।
IV પ્રભાતે સતિ યીશુસ્તટે સ્થિતવાન્ કિન્તુ સ યીશુરિતિ શિષ્યા જ્ઞાતું નાશક્નુવન્।
V તદા યીશુરપૃચ્છત્, હે વત્સા સન્નિધૌ કિઞ્ચિત્ ખાદ્યદ્રવ્યમ્ આસ્તે? તેઽવદન્ કિમપિ નાસ્તિ।
VI તદા સોઽવદત્ નૌકાયા દક્ષિણપાર્શ્વે જાલં નિક્ષિપત તતો લપ્સ્યધ્વે, તસ્માત્ તૈ ર્નિક્ષિપ્તે જાલે મત્સ્યા એતાવન્તોઽપતન્ યેન તે જાલમાકૃષ્ય નોત્તોલયિતું શક્તાઃ।
VII તસ્માદ્ યીશોઃ પ્રિયતમશિષ્યઃ પિતરાયાકથયત્ એષ પ્રભુ ર્ભવેત્, એષ પ્રભુરિતિ વાચં શ્રુત્વૈવ શિમોન્ નગ્નતાહેતો ર્મત્સ્યધારિણ ઉત્તરીયવસ્ત્રં પરિધાય હ્રદં પ્રત્યુદલમ્ફયત્।
VIII અપરે શિષ્યા મત્સ્યૈઃ સાર્દ્ધં જાલમ્ આકર્ષન્તઃ ક્ષુદ્રનૌકાં વાહયિત્વા કૂલમાનયન્ તે કૂલાદ્ અતિદૂરે નાસન્ દ્વિશતહસ્તેભ્યો દૂર આસન્ ઇત્યનુમીયતે।
IX તીરં પ્રાપ્તૈસ્તૈસ્તત્ર પ્રજ્વલિતાગ્નિસ્તદુપરિ મત્સ્યાઃ પૂપાશ્ચ દૃષ્ટાઃ।
X તતો યીશુરકથયદ્ યાન્ મત્સ્યાન્ અધરત તેષાં કતિપયાન્ આનયત।
XI અતઃ શિમોન્પિતરઃ પરાવૃત્ય ગત્વા બૃહદ્ભિસ્ત્રિપઞ્ચાશદધિકશતમત્સ્યૈઃ પરિપૂર્ણં તજ્જાલમ્ આકૃષ્યોદતોલયત્ કિન્ત્વેતાવદ્ભિ ર્મત્સ્યૈરપિ જાલં નાછિદ્યત।
XII અનન્તરં યીશુસ્તાન્ અવાદીત્ યૂયમાગત્ય ભુંગ્ધ્વં; તદા સએવ પ્રભુરિતિ જ્ઞાતત્વાત્ ત્વં કઃ? ઇતિ પ્રષ્ટું શિષ્યાણાં કસ્યાપિ પ્રગલ્ભતા નાભવત્।
XIII તતો યીશુરાગત્ય પૂપાન્ મત્સ્યાંશ્ચ ગૃહીત્વા તેભ્યઃ પર્ય્યવેષયત્।
XIV ઇત્થં શ્મશાનાદુત્થાનાત્ પરં યીશુઃ શિષ્યેભ્યસ્તૃતીયવારં દર્શનં દત્તવાન્।
XV ભોજને સમાપ્તે સતિ યીશુઃ શિમોન્પિતરં પૃષ્ટવાન્, હે યૂનસઃ પુત્ર શિમોન્ ત્વં કિમ્ એતેભ્યોઽધિકં મયિ પ્રીયસે? તતઃ સ ઉદિતવાન્ સત્યં પ્રભો ત્વયિ પ્રીયેઽહં તદ્ ભવાન્ જાનાતિ; તદા યીશુરકથયત્ તર્હિ મમ મેષશાવકગણં પાલય।
XVI તતઃ સ દ્વિતીયવારં પૃષ્ટવાન્ હે યૂનસઃ પુત્ર શિમોન્ ત્વં કિં મયિ પ્રીયસે? તતઃ સ ઉક્તવાન્ સત્યં પ્રભો ત્વયિ પ્રીયેઽહં તદ્ ભવાન્ જાનાતિ; તદા યીશુરકથયત તર્હિ મમ મેષગણં પાલય।
XVII પશ્ચાત્ સ તૃતીયવારં પૃષ્ટવાન્, હે યૂનસઃ પુત્ર શિમોન્ ત્વં કિં મયિ પ્રીયસે? એતદ્વાક્યં તૃતીયવારં પૃષ્ટવાન્ તસ્માત્ પિતરો દુઃખિતો ભૂત્વાઽકથયત્ હે પ્રભો ભવતઃ કિમપ્યગોચરં નાસ્તિ ત્વય્યહં પ્રીયે તદ્ ભવાન્ જાનાતિ; તતો યીશુરવદત્ તર્હિ મમ મેષગણં પાલય।
XVIII અહં તુભ્યં યથાર્થં કથયામિ યૌવનકાલે સ્વયં બદ્ધકટિ ર્યત્રેચ્છા તત્ર યાતવાન્ કિન્ત્વિતઃ પરં વૃદ્ધે વયસિ હસ્તં વિસ્તારયિષ્યસિ, અન્યજનસ્ત્વાં બદ્ધ્વા યત્ર ગન્તું તવેચ્છા ન ભવતિ ત્વાં ધૃત્વા તત્ર નેષ્યતિ।
XIX ફલતઃ કીદૃશેન મરણેન સ ઈશ્વરસ્ય મહિમાનં પ્રકાશયિષ્યતિ તદ્ બોધયિતું સ ઇતિ વાક્યં પ્રોક્તવાન્। ઇત્યુક્તે સતિ સ તમવોચત્ મમ પશ્ચાદ્ આગચ્છ।
XX યો જનો રાત્રિકાલે યીશો ર્વક્ષોઽવલમ્બ્ય, હે પ્રભો કો ભવન્તં પરકરેષુ સમર્પયિષ્યતીતિ વાક્યં પૃષ્ટવાન્, તં યીશોઃ પ્રિયતમશિષ્યં પશ્ચાદ્ આગચ્છન્તં
XXI પિતરો મુખં પરાવર્ત્ત્ય વિલોક્ય યીશું પૃષ્ટવાન્, હે પ્રભો એતસ્ય માનવસ્ય કીદૃશી ગતિ ર્ભવિષ્યતિ?
XXII સ પ્રત્યવદત્, મમ પુનરાગમનપર્ય્યન્તં યદિ તં સ્થાપયિતુમ્ ઇચ્છામિ તત્ર તવ કિં? ત્વં મમ પશ્ચાદ્ આગચ્છ।
XXIII તસ્માત્ સ શિષ્યો ન મરિષ્યતીતિ ભ્રાતૃગણમધ્યે કિંવદન્તી જાતા કિન્તુ સ ન મરિષ્યતીતિ વાક્યં યીશુ ર્નાવદત્ કેવલં મમ પુનરાગમનપર્ય્યન્તં યદિ તં સ્થાપયિતુમ્ ઇચ્છામિ તત્ર તવ કિં? ઇતિ વાક્યમ્ ઉક્તવાન્।
XXIV યો જન એતાનિ સર્વ્વાણિ લિખિતવાન્ અત્ર સાક્ષ્યઞ્ચ દત્તવાન્ સએવ સ શિષ્યઃ, તસ્ય સાક્ષ્યં પ્રમાણમિતિ વયં જાનીમઃ।
XXV યીશુરેતેભ્યોઽપરાણ્યપિ બહૂનિ કર્મ્માણિ કૃતવાન્ તાનિ સર્વ્વાણિ યદ્યેકૈકં કૃત્વા લિખ્યન્તે તર્હિ ગ્રન્થા એતાવન્તો ભવન્તિ તેષાં ધારણે પૃથિવ્યાં સ્થાનં ન ભવતિ। ઇતિ।।

# પ્રેરિતાનાં કર્મ્મણામાખ્યાનં

I હે થિયફિલ, યીશુઃ સ્વમનોનીતાન્ પ્રેરિતાન્ પવિત્રેણાત્મના સમાદિશ્ય યસ્મિન્ દિને સ્વર્ગમારોહત્ યાં યાં ક્રિયામકરોત્ યદ્યદ્
ઉપાદિશચ્ચ તાનિ સર્વ્વાણિ પૂર્વ્વં મયા લિખિતાનિ।
II સ સ્વનિધનદુઃખભોગાત્ પરમ્ અનેકપ્રત્યયક્ષપ્રમાણૈઃ સ્વં સજીવં દર્શયિત્વા
III ચત્વારિંશદ્દિનાનિ યાવત્ તેભ્યઃ પ્રેરિતેભ્યો દર્શનં દત્ત્વેશ્વરીયરાજ્યસ્ય વર્ણનમ અકરોત્।
IV અનન્તરં તેષાં સભાં કૃત્વા ઇત્યાજ્ઞાપયત્, યૂયં યિરૂશાલમોઽન્યત્ર ગમનમકૃત્વા યસ્તિન્ પિત્રાઙ્ગીકૃતે મમ વદનાત્ કથા અશૃણુત
તત્પ્રાપ્તિમ્ અપેક્ષ્ય તિષ્ઠત।
V યોહન્ જલે મજ્જિતવાન્ કિન્ત્વલ્પદિનમધ્યે યૂયં પવિત્ર આત્મનિ મજ્જિતા ભવિષ્યથ।
VI પશ્ચાત્ તે સર્વ્વે મિલિત્વા તમ્ અપૃચ્છન્ હે પ્રભો ભવાન્ કિમિદાનીં પુનરપિ રાજ્યમ્ ઇસ્રાયેલીયલોકાનાં કરેષુ સમર્પયિષ્યતિ?
VII તતઃ સોવદત્ યાન્ સર્વ્વાન્ કાલાન્ સમયાંશ્ચ પિતા સ્વવશેઽસ્થાપયત્ તાન્ જ્ઞાતૃં યુષ્માકમ્ અધિકારો ન જાયતે।
VIII કિન્તુ યુષ્માસુ પવિત્રસ્યાત્મન આવિર્ભાવે સતિ યૂયં શક્તિં પ્રાપ્ય યિરૂશાલમિ સમસ્તયિહૂદાશોમિરોણદેશયોઃ પૃથિવ્યાઃ
સીમાં યાવદ્ યાવન્તો દેશાસ્તેષુ યર્વ્વેષુ ચ મયિ સાક્ષ્યં દાસ્યથ।
IX ઇતિ વાક્યમુક્ત્વા સ તેષાં સમક્ષં સ્વર્ગં નીતોઽભવત્, તતો મેઘમારુહ્ય તેષાં દૃષ્ટેરગોચરોઽભવત્।
X યસ્મિન્ સમયે તે વિહાયસં પ્રત્યનન્યદૃષ્ટ્યા તસ્ય તાદૃશમ્ ઊર્દ્ધ્વગમનમ્ અપશ્યન્ તસ્મિન્નેવ સમયે શુક્લવસ્ત્રૌ દ્વૌ જનૌ તેષાં
સન્નિધૌ દણ્ડાયમાનૌ કથિતવન્તૌ,
XI હે ગાલીલીયલોકા યૂયં કિમર્થં ગગણં પ્રતિ નિરીક્ષ્ય દણ્ડાયમાનાસ્તિષ્ઠથ? યુષ્માકં સમીપાત્ સ્વર્ગં નીતો યો યીશુસ્તં યૂયં યથા
સ્વર્ગમ્ આરોહન્તમ્ અદર્શમ્ તથા સ પુનશ્ચાગમિષ્યતિ।
XII તતઃ પરં તે જૈતુનનામ્નઃ પર્વ્વતાદ્ વિશ્રામવારસ્ય પથઃ પરિમાણમ્ અર્થાત્ પ્રાયેણાર્દ્ધક્રોશં દુરસ્થં યિરૂશાલમ્નગરં
પરાવૃત્યાગચ્છન્।
XIII નગરં પ્રવિશ્ય પિતરો યાકૂબ્ યોહન્ આન્દ્રિયઃ ફિલિપઃ થોમા બર્થજમયો મથિરાલ્ફીયપુત્રો યાકૂબ્ ઉદ્યોગા◌ી શિમોન્ યાકૂબો
ભ્રાતા યિહૂદા એતે સર્વ્વે યત્ર સ્થાને પ્રવસન્તિ તસ્મિન્ ઉપરિતનપ્રકોષ્ઠે પ્રાવિશન્।
XIV પશ્ચાદ્ ઇમે કિયત્યઃ સ્ત્રિયશ્ચ યીશો ર્માતા મરિયમ્ તસ્ય ભ્રાતરશ્ચૈતે સર્વ્વ એકચિત્તીભૂત સતતં વિનયેન વિનયેન પ્રાર્થયન્ત।
XV તસ્મિન્ સમયે તત્ર સ્થાને સાકલ્યેન વિંશત્યધિકશતં શિષ્યા આસન્। તતઃ પિતરસ્તેષાં મધ્યે તિષ્ઠન્ ઉક્તવાન્
XVI હે ભ્રાતૃગણ યીશુધારિણાં લોકાનાં પથદર્શકો યો યિહૂદાસ્તસ્મિન્ દાયૂદા પવિત્ર આત્મા યાં કથાં કથયામાસ તસ્યાઃ
પ્રત્યક્ષીભવનસ્યાવશ્યકત્વમ્ આસીત્।
XVII સ જનોઽસ્માકં મધ્યવર્ત્તી સન્ અસ્યાઃ સેવાયા અંશમ્ અલભત।
XVIII તદનન્તરં કુકર્મ્મણા લબ્ધં યન્મૂલ્યં તેન ક્ષેત્રમેકં ક્રીતમ્ અપરં તસ્મિન્ અધોમુખે ભૃમૌ પતિતે સતિ તસ્યોદરસ્ય વિદીર્ણત્વાત્
સર્વ્વા નાડ્યો નિરગચ્છન્।
XIX એતાં કથાં યિરૂશાલમ્નિવાસિનઃ સર્વ્વે લોકા વિદાન્તિ; તેષાં નિજભાષયા તત્ક્ષેત્રઞ્ચ હકલ્દામા, અર્થાત્ રક્તક્ષેત્રમિતિ
વિખ્યાતમાસ્તે।
XX અન્યચ્ચ, નિકેતનં તદીયન્તુ શુન્યમેવ ભવિષ્યતિ। તસ્ય દૂષ્યે નિવાસાર્થં કોપિ સ્થાસ્યતિ નૈવ હિ। અન્ય એવ જનસ્તસ્ય પદં
સંપ્રાપ્સ્યતિ ધ્રુવં। ઇત્થં ગીતપુસ્તકે લિખિતમાસ્તે।
XXI અતો યોહનો મજ્જનમ્ આરભ્યાસ્માકં સમીપાત્ પ્રભો ર્યીશોઃ સ્વર્ગારોહણદિનં યાવત્ સોસ્માકં મધ્યે યાવન્તિ દિનાનિ
યાપિતવાન્
XXII તાવન્તિ દિનાનિ યે માનવા અસ્માભિઃ સાર્દ્ધં તિષ્ઠન્તિ તેષામ્ એકેન જનેનાસ્માભિઃ સાર્દ્ધં યીશોરુત્થાને સાક્ષિણા ભવિતવ્યં।
XXIII અતો યસ્ય રૂઢિ ર્યુષ્ટો યં બર્શબ્બેત્યુક્ત્વાહૂયન્તિ સ યૂષફ્ મતથિશ્ચ દ્વાવેતૌ પૃથક્ કૃત્વા ત ઈશ્વરસ્ય સન્નિધૌ પ્રાર્થ્ય
કથિતવન્તઃ,
XXIV હે સર્વ્વાન્તર્ય્યામિન્ પરમેશ્વર, યિહૂદાઃ સેવનપ્રેરિતત્વપદચ્યુતઃ
XXV સન્ નિજસ્થાનમ્ અગચ્છત્, તત્પદં લબ્ધુમ્ એનયો ર્જનયો ર્મધ્યે ભવતા કોઽભિરુચિતસ્તદસ્માન્ દર્શ્યતાં।
XXVI તતો ગુટિકાપાટે કૃતે મતથિર્નિરચીયત તસ્માત્ સોન્યેષામ્ એકાદશાનાં પ્રરિતાનાં મધ્યે ગણિતોભવત્।

# II

I અપરઞ્ચ નિસ્તારોત્સવાત્ પરં પઞ્ચાશત્તમે દિને સમુપસ્થિતે સતિ તે સર્વ્વે એકાચિત્તીભૂય સ્થાન એકસ્મિન્ મિલિતા આસન્।
II એતસ્મિન્નેવ સમયેઽકસ્માદ્ આકાશાત્ પ્રચણ્ડાત્યુગ્રવાયોઃ શબ્દવદ્ એકઃ શબ્દ આગત્ય યસ્મિન્ ગૃહે ત ઉપાવિશન્ તદ્ ગૃહં
સમસ્તં વ્યાપ્નોત્।
III તતઃ પરં વહ્નિશિખાસ્વરૂપા જિહ્વાઃ પ્રત્યક્ષીભૂય વિભક્તાઃ સત્યઃ પ્રતિજનોર્દ્ધ્વે સ્થગિતા અભૂવન્।
IV તસ્માત્ સર્વ્વે પવિત્રેણાત્મના પરિપૂર્ણાઃ સન્ત આત્મા યથા વાચિતવાન્ તદનુસારેણાન્યદેશીયાનાં ભાષા ઉક્તવન્તઃ।
V તસ્મિન્ સમયે પૃથિવીસ્થસર્વ્વદેશેભ્યો યિહૂદીયમતાવલમ્બિનો ભક્તલોકા યિરૂશાલમિ પ્રાવસન્;
VI તસ્યાઃ કથાયાઃ કિંવદન્ત્યા જાતત્વાત્ સર્વ્વે લોકા મિલિત્વા નિજનિજભાષયા શિષ્યાણાં કથાકથનં શ્રુત્વા સમુદ્વિગ્ના અભવન્।
VII સર્વ્વએવ વિસ્મયાપન્ના આશ્ચર્ય્યાન્વિતાશ્ચ સન્તઃ પરસ્પરં ઉક્તવન્તઃ પશ્યત યે કથાં કથયન્તિ તે સર્વ્વે ગાલીલીયલોકાઃ કિં
ન ભવન્તિ?
VIII તર્હિ વયં પ્રત્યેકશઃ સ્વસ્વજન્મદેશીયભાષાભિઃ કથા એતેષાં શૃણુમઃ કિમિદં?
IX પાર્થી-માદી-અરામ્નહરયિમ્દેશનિવાસિમનો યિહૂદા-કપ્પદકિયા-પન્ત-આશિયા-

X ફ્રુગિયા-પમ્ફુલિયા-મિસરનિવાસિનઃ કુરીણીનિકટવર્ત્તિલૂબીયપ્રદેશનિવાસિનો રોમનગરાદ્ આગતા યિહૂદીયલોકા યિહૂદીયમતગ્રાહિણઃ ક્રીતીયા અરાબીયાદયો લોકાશ્ચ યે વયમ્

XI અસ્માકં નિજનિજભાષાભિરેતેષામ્ ઈશ્વરીયમહાકર્મ્મવ્યાખ્યાનં શૃણુમઃ।

XII ઇત્થં તે સર્વ્વએવ વિસ્મયાપન્નાઃ સન્દિગ્ધચિત્તાઃ સન્તઃ પરસ્પરમૂચુઃ, અસ્ય કો ભાવઃ?

XIII અપરે કેચિત્ પરિહસ્ય કથિતવન્ત એતે નવીનદ્રાક્ષારસેન મત્તા અભવન્।

XIV તદા પિતર એકાદશભિ ર્જનૈઃ સાકં તિષ્ઠન્ તાલ્લોકાન્ ઉચ્ચૈઃકારમ્ અવદત્, હે યિહૂદીયા હે યિરૂશાલમ્નિવાસિનઃ સર્વ્વે, અવધાનં કૃત્વા મદીયવાક્યં બુધ્યધ્વં।

XV ઇદાનીમ્ એકયામાદ્ અધિકા વેલા નાસ્તિ તસ્માદ્ યૂયં યદ્ અનુમાથ માનવા ઇમે મદ્યપાનેન મત્તાસ્તન્ન।

XVI કિન્તુ યોયેલ્ભવિષ્યદ્વક્ત્રૈતદ્વાક્યમુક્તં યથા,

XVII ઈશ્વરઃ કથયામાસ યુગાન્તસમયે ત્વહમ્। વર્ષિષ્યામિ સ્વમાત્માનં સર્વ્વપ્રાણ્યુપરિ ધ્રુવમ્। ભાવિવાક્યં વદિષ્યન્તિ કન્યાઃ પુત્રાશ્ચ વસ્તુતઃ। પ્રત્યાદેશઞ્ચ પ્રાપ્સ્યન્તિ યુષ્માકં યુવમાનવાઃ। તથા પ્રાચીનલોકાસ્તુ સ્વપ્નાન્ દ્રક્ષ્યન્તિ નિશ્ચિતં।

XVIII વર્ષિષ્યામિ તદાત્માનં દાસદાસીજનોપિરિ। તેનૈવ ભાવિવાક્યં તે વદિષ્યન્તિ હિ સર્વ્વશઃ।

XIX ઊર્દ્ધ્વસ્થે ગગણે ચૈવ નીચસ્થે પૃથિવીતલે। શોણિતાનિ બૃહદ્ભાનૂન્ ઘનધૂમાદિકાનિ ચ। ચિહ્નાનિ દર્શયિષ્યામિ મહાશ્ચર્ય્યક્રિયાસ્તથા।

XX મહાભયાનકસ્યૈવ તદ્દિનસ્ય પરેશિતુઃ। પુરાગમાદ્ રવિઃ કૃષ્ણો રક્તશ્ચન્દ્રો ભવિષ્યતઃ।

XXI કિન્તુ યઃ પરમેશસ્ય નામ્નિ સમ્પ્રાર્થયિષ્યતે। સએવ મનુજો નૂનં પરિત્રાતો ભવિષ્યતિ॥

XXII અતો હે ઇસ્રાયેલ્વંશીયલોકાઃ સર્વ્વે કથાયામેતસ્યામ્ મનો નિધદ્ધ્વં નાસરતીયો યીશુરીશ્વરસ્ય મનોનીતઃ પુમાન્ એતદ્ ઈશ્વરસ્તત્કૃતૈરાશ્ચર્ય્યાદ્ભુતકર્મ્મભિ ર્લક્ષણૈશ્ચ યુષ્માકં સાક્ષાદેવ પ્રતિપાદિતવાન્ ઇતિ યૂયં જાનીથ।

XXIII તસ્મિન્ યીશૌ ઈશ્વરસ્ય પૂર્વ્વનિશ્ચિતમન્ત્રણાનિરૂપણાનુસારેણ મૃત્યૌ સમર્પિતે સતિ યૂયં તં ધૃત્વા દુષ્ટલોકાનાં હસ્તૈઃ ક્રુશે વિધિત્વાહત।

XXIV કિન્ત્વીશ્વરસ્તં નિધનસ્ય બન્ધનાન્મોચયિત્વા ઉદસ્થાપયત્ યતઃ સ મૃત્યુના બદ્ધસ્તિષ્ઠતીતિ ન સમ્ભવતિ।

XXV એતસ્તિન્ દાયૂદપિ કથિતવાન્ યથા, સર્વ્વદા મમ સાક્ષાત્તં સ્થાપય પરમેશ્વરં। સ્થિતે મદ્દક્ષિણે તસ્મિન્ સ્ખલિષ્યામિ ત્વહં નહિ।

XXVI આનન્દિષ્યતિ તદ્ધેતો ર્મામકીનં મનસ્તુ વૈ। આહ્લાદિષ્યતિ જિહ્વાપિ મદીયા તુ તથૈવ ચ। પ્રત્યાશયા શરીરન્તુ મદીયં વૈશયિષ્યતે।

XXVII પરલોકે યતો હેતોસ્ત્વં માં નૈવ હિ ત્યક્ષ્યસિ। સ્વકીયં પુણ્યવન્તં ત્વં ક્ષયિતું નૈવ દાસ્યસિ। એવં જીવનમાર્ગં ત્વં મામેવ દર્શયિષ્યસિ।

XXVIII સ્વસમ્મુખે ય આનન્દો દક્ષિણે સ્વસ્ય યત્ સુખં। અનન્તં તેન માં પૂર્ણં કરિષ્યસિ ન સંશયઃ॥

XXIX હે ભ્રાતરોઽસ્માકં તસ્ય પૂર્વ્વપુરુષસ્ય દાયૂદઃ કથાં સ્પષ્ટં કથયિતું મામ્ અનુમન્યધ્વં, સ પ્રાણાન્ ત્યક્ત્વા શ્મશાને સ્થાપિતોભવદ્ અદ્યાપિ તત્ શ્મશાનમ્ અસ્માકં સન્નિધૌ વિદ્યતે।

XXX ફલતો લૌકિકભાવેન દાયૂદો વંશે ખ્રીષ્ટં જન્મ ગ્રાહયિત્વા તસ્યૈવ સિંહાસને સમુવેષ્ટું તમુત્થાપયિષ્યતિ પરમેશ્વરઃ શપથં કુત્વા દાયૂદઃ સમીપ ઇમમ્ અઙ્ગીકારં કૃતવાન્,

XXXI ઇતિ જ્ઞાત્વા દાયૂદ્ ભવિષ્યદ્વાદી સન્ ભવિષ્યત્કાલીયજ્ઞાનેન ખ્રીષ્ટોત્થાને કથામિમાં કથયામાસ યથા તસ્યાત્મા પરલોકે ન ત્યક્ષ્યતે તસ્ય શરીરઞ્ચ ન ક્ષેષ્યતિ;

XXXII અતઃ પરમેશ્વર એનં યીશું શ્મશાનાદ્ ઉદસ્થાપયત્ તત્ર વયં સર્વ્વે સાક્ષિણ આસ્મહે।

XXXIII સ ઈશ્વરસ્ય દક્ષિણકરેણોન્નતિં પ્રાપ્ય પવિત્ર આત્મિન પિતા યમઙ્ગીકારં કૃતવાન્ તસ્ય ફલં પ્રાપ્ય યત્ પશ્યથ શૃણુથ ચ તદવર્ષત્।

XXXIV યતો દાયૂદ્ સ્વર્ગં નારુરોહ કિન્તુ સ્વયમ્ ઇમાં કથામ્ અકથયદ્ યથા, મમ પ્રભુમિદં વાક્યમવદત્ પરમેશ્વરઃ।

XXXV તવ શત્રૂનહં યાવત્ પાદપીઠં કરોમિ ન। તાવત્ કાલં મદીયે ત્વં દક્ષવાર્શ્વ ઉપાવિશ।

XXXVI અતો યં યીશું યૂયં ક્રુશેઽહત પરમેશ્વરસ્તં પ્રભુત્વાભિષિક્તત્વપદે ન્યયુંક્તેતિ ઇસ્રાયેલીયા લોકા નિશ્ચિતં જાનન્તુ।

XXXVII એતાદૃશીં કથાં શ્રુત્વા તેષાં હૃદયાનાં વિદીર્ણત્વાત્ તે પિતરાય તદન્યપ્રેરિતેભ્યશ્ચ કથિતવન્તઃ, હે ભ્રાતૃગણ વયં કિં કરિષ્યામઃ?

XXXVIII તતઃ પિતરઃ પ્રત્યવદદ્ યૂયં સર્વ્વે સ્વં સ્વં મનઃ પરિવર્ત્તયધ્વં તથા પાપમોચનાર્થં યીશુખ્રીષ્ટસ્ય નામ્ના મજ્જિતાશ્ચ ભવત, તસ્માદ્ દાનરૂપં પરિત્રમ્ આત્માનં લપ્સ્યથ।

XXXIX યતો યુષ્માકં યુષ્મત્સન્તાનાનાઞ્ચ દૂરસ્થસર્વ્વલોકાનાઞ્ચ નિમિત્તમ્ અર્થાદ્ અસ્માકં પ્રભુઃ પરમેશ્વરો યાવતો લાકાન્ આહ્વાસ્યતિ તેષાં સર્વ્વેષાં નિમિત્તમ્ અયમઙ્ગીકાર આસ્તે।

XL એતદન્યાભિ ર્બહુકથાભિઃ પ્રમાણં દત્વાકથયત્ એતેભ્યો વિપથગામિભ્યો વર્ત્તમાનલોકેભ્યઃ સ્વાન્ રક્ષત।

XLI તતઃ પરં યે સાનન્દાસ્તાં કથામ્ અગૃહ્લન્ તે મજ્જિતા અભવન્। તસ્મિન્ દિવસે પ્રાયેણ ત્રીણિ સહસ્રાણિ લોકાસ્તેષાં સપક્ષાઃ સન્તઃ

XLII પ્રેરિતાનામ્ ઉપદેશે સઙ્ગતૌ પૂપભઞ્જને પ્રાર્થનાસુ ચ મનઃસંયોગં કૃત્વાતિષ્ઠન્।

XLIII પ્રેરિતૈ ર્નાનાપ્રકારલક્ષણેષુ મહાશ્ચર્ય્યકર્મ્મસુ ચ દર્શિતેષુ સર્વ્વલોકાનાં ભયમુપસ્થિતં।

XLIV વિશ્વાસકારિણઃ સર્વ્વ ચ સહ તિષ્ઠનતઃ। સ્વેષાં સર્વ્વાઃ સમ્પત્તીઃ સાધારણ્યેન સ્થાપયિત્વાભુઞ્જત।

XLV ફલતો ગૃહાણિ દ્રવ્યાણિ ચ સર્વ્વાણિ વિક્રીય સર્વ્વેષાં સ્વસ્વપ્રયોજનાનુસારેણ વિભજ્ય સર્વ્વેભ્યોઽદદન્।

XLVI સર્વ્વ એકચિત્તીભૂય દિને દિને મન્દિરે સન્તિષ્ઠમાના ગૃહે ગૃહે ચ પૂપાનભઞ્જન્ત ઈશ્વરસ્ય ધન્યવાદં કુર્વ્વન્તો લોકૈઃ સમાદૃતાઃ પરમાનન્દેન સરલાન્તઃકરણેન ભોજનં પાનઞ્ચકુર્વ્વન્।

XLVII પરમેશ્વરો દિને દિને પરિત્રાણભાજનૈ ર્મણ્ડલીમ્ અવર્દ્ધયત્|

# III

I તૃતીયયામવેલાયાં સત્યાં પ્રાર્થનાયાઃ સમયે પિતરયોહનૌ સમ્ભૂય મન્દિરં ગચ્છતઃ|
II તસ્મિન્નેવ સમયે મન્દિરપ્રવેશકાનાં સમીપે ભિક્ષારણાર્થં યં જન્મખઞ્જમાનુષં લોકા મન્દિરસ્ય સુન્દરનામ્નિ દ્વારે પ્રતિદિનમ્
અસ્થાપયન્ તં વહન્તસ્તદ્દ્વારં આનયન્|
III તદા પિતરયોહનૌ મન્તિરં પ્રવેષ્ટુમ્ ઉદ્યતૌ વિલોક્ય સ ખઞ્જસ્તૌ કિઞ્ચિદ્ ભિક્ષિતવાન્|
IV તસ્માદ્ યોહના સહિતઃ પિતરસ્તમ્ અનન્યદૃષ્ટ્યા નિરીક્ષ્ય પ્રોક્તવાન્ આવાં પ્રતિ દૃષ્ટિં કુરુ|
V તતઃ સ કિઞ્ચિત્ પ્રાપ્ત્યાશયા તૌ પ્રતિ દૃષ્ટિં કૃતવાન્|
VI તદા પિતરો ગદિતવાન્ મમ નિકટે સ્વર્ણરૂપ્યાદિ કિમપિ નાસ્તિ કિન્તુ યદાસ્તે તદ્ દદામિ નાસરતીયસ્ય યીશુખ્રીષ્ટસ્ય નામ્ના
ત્વમુત્થાય ગમનાગમને કુરુ|
VII તતઃ પરં સ તસ્ય દક્ષિણકરં ધૃત્વા તમ્ ઉદતોલયત્; તેન તત્ક્ષણાત્ તસ્ય જનસ્ય પાદગુલ્ફયોઃ સબલત્વાત્ સ ઉલ્લમ્ફ્ય
પ્રોત્થાય ગમનાગમને ઽકરોત્|
VIII તતો ગમનાગમને કુર્વ્વન્ ઉલ્લમ્ફન્ ઈશ્વરં ધન્યં વદન્ તાભ્યાં સાર્દ્ધં મન્દિરં પ્રાવિશત્|
IX તતઃ સર્વ્વે લોકાસ્તં ગમનાગમને કુર્વ્વન્તમ્ ઈશ્વરં ધન્યં વદન્તઞ્ચ વિલોક્ય
X મન્દિરસ્ય સુન્દરે દ્વારે ય ઉપવિશ્ય ભિક્ષિતવાન્ સએવાયમ્ ઇતિ જ્ઞાત્વા તં પ્રતિ તયા ઘટનયા ચમત્કૃતા વિસ્મયાપન્નાશ્ચાભવન્|
XI યઃ ખઞ્જઃ સ્વસ્થોભવત્ તેન પિતરયોહનોઃ કરયોર્ધૃતયોઃ સતોઃ સર્વ્વે લોકા સન્નિધિમ્ આગચ્છન્|
XII તદ્ દૃષ્ટ્વા પિતરસ્તેભ્યોઽકથયત્, હે ઇસ્રાયેલીયલોકા યૂયં કુતો ઽનેનાશ્ચર્ય્યં મન્યધ્વે? આવાં નિજશક્ત્યા યદ્વા નિજપુણ્યેન
ખઞ્જમનુષ્યમેનં ગમિતવન્તાવિતિ ચિન્તયિત્વા આવાં પ્રતિ કુતોઽનન્યદૃષ્ટિં કુરુથ?
XIII યં યીશું યૂયં પરકરેષુ સમાર્પયત તતો યં પીલાતો મોચયિતુમ્ એૈચ્છત્ તથાપિ યૂયં તસ્ય સાક્ષાન્ નાઙ્ગીકૃતવન્ત ઇબ્રાહીમ
ઇસ્હાકો યાકૂબશ્ચેશ્વરોઽર્થાદ્ અસ્માકં પૂર્વ્વપુરુષાણામ્ ઈશ્વરઃ સ્વપુત્રસ્ય તસ્ય યીશો ર્મહિમાનં પ્રાકાશયત્|
XIV કિન્તુ યૂયં તં પવિત્રં ધાર્મ્મિકં પુમાંસં નાઙ્ગીકૃત્ય હત્યાકારિણમેકં સ્વેભ્યો દાતુમ્ અયાચધ્વં|
XV પશ્ચાત્ તં જીવનસ્યાધિપતિમ્ અહત કિન્ત્વીશ્વરઃ શ્મશાનાત્ તમ્ ઉદસ્થાપયત તત્ર વયં સાક્ષિણ આસ્મહે|
XVI ઇમં યં માનુષં યૂયં પશ્યથ પરિચિનુથ ચ સ તસ્ય નામ્નિ વિશ્વાસકરણાત્ ચલનશક્તિં લબ્ધવાન્ તસ્મિન્ તસ્ય યો વિશ્વાસઃ
સ તં યુષ્માકં સર્વ્વેષાં સાક્ષાત્ સમ્પૂર્ણરૂપેણ સ્વસ્થમ્ અકાર્ષીત્|
XVII હે ભ્રાતરો યૂયં યુષ્માકમ્ અધિપતયશ્ચ અજ્ઞાત્વા કર્મ્માણ્યેતાનિ કૃતવન્ત ઇદાનીં મમૈષ બોધો જાયતે|
XVIII કિન્ત્વીશ્વરઃ ખ્રીષ્ટસ્ય દુઃખભોગે ભવિષ્યદ્વાદિનાં મુખેભ્યો યાં યાં કથાં પૂર્વ્વમકથયત્ તાઃ કથા ઇત્થં સિદ્ધા અકરોત્|
XIX અતઃ સ્વેષાં પાપમોચનાર્થં ખેદં કૃત્વા મનાંસિ પરિવર્ત્તયધ્વં, તસ્માદ્ ઈશ્વરાત્ સાન્ત્વનાપ્રાપ્તેઃ સમય ઉપસ્થાસ્યતિ;
XX પુનશ્ચ પૂર્વ્વકાલમ્ આરભ્ય પ્રચારિતો યો યીશુખ્રીષ્ટસ્તમ્ ઈશ્વરો યુષ્માન્ પ્રતિ પ્રેષયિષ્યતિ|
XXI કિન્તુ જગતઃ સૃષ્ટિમારભ્ય ઈશ્વરો નિજપવિત્રભવિષ્યદ્વાદિગણોન યથા કથિતવાન્ તદનુસારેણ સર્વ્વેષાં કાર્ય્યાણાં
સિદ્ધિપર્ય્યન્તં તેન સ્વર્ગે વાસઃ કર્ત્તવ્યઃ|
XXII યુષ્માકં પ્રભુઃ પરમેશ્વરો યુષ્માકં ભ્રાતૃગણમધ્યાત્ મત્સદૃશં ભવિષ્યદ્વક્તારમ્ ઉત્પાદયિષ્યતિ, તતઃ સ યત્ કિઞ્ચિત્
કથયિષ્યતિ તત્ર યૂયં મનાંસિ નિધદ્ધ્વં|
XXIII કિન્તુ યઃ કશ્ચિત્ પ્રાણી તસ્ય ભવિષ્યદ્વાદિનઃ કથાં ન ગ્રહીષ્યતિ સ નિજલોકાનાં મધ્યાદ્ ઉચ્છેત્સ્યતે," ઇમાં કથામ્ અસ્માકં
પૂર્વ્વપુરુષેભ્યઃ કેવલો મૂસાઃ કથયામાસ ઇતિ નહિ,
XXIV શિમૂયેલ્ભવિષ્યદ્વાદિનમ્ આરભ્ય યાવન્તો ભવિષ્યદ્વાક્યમ્ અકથયન્ તે સર્વ્વએવ સમયસ્યૈતસ્ય કથામ્ અકથયન્|
XXV યૂયમપિ તેષાં ભવિષ્યદ્વાદિનાં સન્તાનાઃ, "તવ વંશોદ્ભવપુંસા સર્વ્વદેશીયા લોકા આશિષં પ્રાપ્તા ભવિષ્યન્તિ", ઇબ્રાહીમે
કથામેતાં કથયિત્વા ઈશ્વરોસ્માકં પૂર્વ્વપુરુષૈઃ સાર્દ્ધં યં નિયમં સ્થિરીકૃતવાન્ તસ્ય નિયમસ્યાધિકારિણોપિ યૂયં ભવથ|
XXVI અત ઈશ્વરો નિજપુત્રં યીશુમ્ ઉત્થાપ્ય યુષ્માકં સર્વ્વેષાં સ્વસ્વપાપાત્ પરાવર્ત્ય યુષ્મભ્યમ્ આશિષં દાતું પ્રથમતસ્તં યુષ્માકં
નિકટં પ્રેષિતવાન્|

# IV

I યસ્મિન્ સમયે પિતરયોહનૌ લોકાન્ ઉપદિશતસ્તસ્મિન્ સમયે યાજકા મન્દિરસ્ય સેનાપતયઃ સિદૂકીગણશ્ચ
II તયોર્ ઉપદેશકરણે ખ્રીષ્ટસ્યોત્થાનમ્ ઉપલક્ષ્ય સર્વ્વેષાં મૃતાનામ્ ઉત્થાનપ્રસ્તાવે ચ વ્યગ્રાઃ સન્તસ્તાવુપાગમન્|
III તૌ ધૃત્વા દિનાવસાનકારણાત્ પરદિનપર્ય્યન્તં રુદ્ધ્વા સ્થાપિતવન્તઃ|
IV તથાપિ યે લોકાસ્તયોરુપદેશમ્ અશૃણ્વન્ તેષાં પ્રાયેણ પઞ્ચસહસ્રાણિ જના વ્યશ્વસન્|
V પરેઽહનિ અધિપતયઃ પ્રાચીના અધ્યાપકાશ્ચ હાનનનામા મહાયાજકઃ
VI કિયફા યોહન્ સિકન્દર ઇત્યાદયો મહાયાજકસ્ય જ્ઞાતયઃ સર્વ્વે યિરૂશાલમ્નગરે મિલિતાઃ|
VII અનન્તરં પ્રેરિતૌ મધ્યે સ્થાપયિત્વાપૃચ્છન્ યુવાં કયા શક્ત્યા વા કેન નામ્ના કર્મ્માણ્યેતાનિ કુરુથઃ?
VIII તદા પિતરઃ પવિત્રેણાત્મના પરિપૂર્ણઃ સન્ પ્રત્યવાદીત્, હે લોકાનામ્ અધિપતિગણ હે ઇસ્રાયેલીયપ્રાચીનાઃ,
IX એતસ્ય દુર્બ્બલમાનુષસ્ય હિતં યત્ કર્મ્માક્રિયત, અર્થાત્, સ યેન પ્રકારેણ સ્વસ્થોભવત્ તચ્ચેદ્ અદ્યાવાં પૃચ્છથ,
X તર્હિ સર્વ્વ ઇસ્રાયેેલીયલોકા યૂયં જાનીત નાસરતીયો યો યીશુખ્રીષ્ટઃ ક્રુશે યુષ્માભિરવિધ્યત યશ્ચેશ્વરેણ શ્મશાનાદ્
ઉત્થાપિતઃ, તસ્ય નામ્ના જનોયં સ્વસ્થઃ સન્ યુષ્માકં સમ્મુખે પ્રોત્તિષ્ઠતિ|
XI નિચેતૃભિ ર્યુષ્માભિરયં યઃ પ્રસ્તરોઽવજ્ઞાતોઽભવત્ સ પ્રધાનકોણસ્ય પ્રસ્તરોઽભવત્|

XII તદ્ભિન્નાદપરાત્ કસ્માદપિ પરિત્રાણં ભવિતું ન શક્નોતિ, યેન ત્રાણં પ્રાપ્યેત ભૂમણ્ડલસ્યલોકાનાં મધ્યે તાદૃશં કિમપિ નામ નાસ્તિ।

XIII તદા પિતરયોહનોરેતાદૃશીમ્ અક્ષેભતાં દૃષ્ટ્વા તાવવિદ્વાંસૌ નીચલોકાવિતિ બુદ્ધ્વા આશ્ચર્ય્યમ્ અમન્યન્ત તૌ ચ યીશોઃ સઙ્ગિનૌ જાતાવિતિ જ્ઞાતુમ્ અશક્નુવન્।

XIV કિન્તુ તાભ્યાં સાર્દ્ધં તં સ્વસ્થમાનુષં તિષ્ઠન્તં દૃષ્ટ્વા તે કામપ્યપરામ્ આપત્તિં કર્ત્તું નાશક્નુન્।

XV તદા તે સભાતઃ સ્થાનાન્તરં ગન્તું તાન્ આજ્ઞાપ્ય સ્વયં પરસ્પરમ્ ઇતિ મન્ત્રણામકુર્વ્વન્

XVI તૌ માનવૌ પ્રતિ કિં કર્ત્તવ્યં? તાવેકં પ્રસિદ્ધમ્ આશ્ચર્ય્યં કર્મ્મ કૃતવન્તૌ તદ્ યિરૂશાલમ્નિવાસિનાં સર્વ્વેષાં લોકાનાં સમીપે પ્રાકાશત તચ્ચ વયમપહ્નોતું ન શક્નુમઃ।

XVII કિન્તુ લોકાનાં મધ્યમ્ એતદ્ યથા ન વ્યાપ્નોતિ તદર્થં તૌ ભયં પ્રદર્શ્ય તેન નામ્ના કમપિ મનુષ્યં નોપદિશતમ્ ઇતિ દૃઢં નિષેધામઃ।

XVIII તતસ્તે પ્રેરિતાવાહૂય એતદાજ્ઞાપયન્ ઇતઃ પરં યીશો ર્નામ્ના કદાપિ કામપિ કથાં મા કથયતં કિમપિ નોપદિશઞ્ચ।

XIX તતઃ પિતરયોહનૌ પ્રત્યવદતામ્ ઈશ્વરસ્યાજ્ઞાગ્રહણં વા યુષ્માકમ્ આજ્ઞાગ્રહણમ્ એતયો ર્મધ્યે ઈશ્વરસ્ય ગોચરે કિં વિહિતં? યૂયં તસ્ય વિવેચનાં કુરુત।

XX વયં યદ્ અપશ્યામ યદશૃણુમ ચ તન્ન પ્રચારયિષ્યામ એતત્ કદાપિ ભવિતું ન શક્નોતિ।

XXI યદઘટત તદ્ દૃષ્ટા સર્વ્વે લોકા ઈશ્વરસ્ય ગુણાન્ અન્વવદન્ તસ્માત્ લોકભયાત્ તૌ દણ્ડયિતું કમપ્યુપાયં ન પ્રાપ્ય તે પુનરપિ તર્જયિત્વા તાવત્યજન્।

XXII યસ્ય માનુષસ્યૈતત્ સ્વાસ્થ્યકરણમ્ આશ્ચર્ય્યં કર્મ્માક્રિયત તસ્ય વયશ્ચત્વારિંશદ્વત્સરા વ્યતીતાઃ।

XXIII તતઃ પરં તૌ વિસૃષ્ટૌ સન્તૌ સ્વસઙ્ગિનાં સન્નિધિં ગત્વા પ્રધાનયાજકૈઃ પ્રાચીનલોકૈશ્ચ પ્રોક્તાઃ સર્વ્વાઃ કથા જ્ઞાપિતવન્તૌ।

XXIV તચ્છ્રુત્વા સર્વ્વ એકચિત્તીભૂય ઈશ્વરમુદ્દિશ્ય પ્રોચ્ચૈરેતત્ પ્રાર્થયન્ત, હે પ્રભો ગગણપૃથિવીપયોધીનાં તેષુ ચ યદ્યદ્ આસ્તે તેષાં સ્રષ્ટેશ્વરસ્ત્વં।

XXV ત્વં નિજસેવકેન દાયૂદા વાક્યમિદમ્ ઉવચિથ, મનુષ્યા અન્યદેશીયાઃ કુર્વ્વન્તિ કલહં કુતઃ। લોકાઃ સર્વ્વે કિમર્થં વા ચિન્તાં કુર્વ્વન્તિ નિષ્ફલાં।

XXVI પરમેશસ્ય તેનૈવાભિષિક્તસ્ય જનસ્ય ચ। વિરુદ્ધમભિતિષ્ઠન્તિ પૃથિવ્યાઃ પતયઃ કુતઃ॥

XXVII ફલતસ્તવ હસ્તેન મન્ત્રણયા ચ પૂર્વ્વ યદ્યત્ સ્થિરીકૃતં તદ્ યથા સિદ્ધં ભવતિ તદર્થં ત્વં યમ્ અથિષિક્તવાન્ સ એવ પવિત્રો યીશુસ્તસ્ય પ્રાતિકૂલ્યેન હેરોદ્ પન્તીયપીલાતો

XXVIII ઽન્યદેશીયલોકા ઇસ્રાયેલ્લોકાશ્ચ સર્વ્વ એતે સભાયામ્ અતિષ્ઠન્।

XXIX હે પરમેશ્વર અધુના તેષાં તર્જનં ગર્જનઞ્ચ શૃણુ;

XXX તથા સ્વાસ્થ્યકરણકર્મ્મણા તવ બાહુબલપ્રકાશપૂર્વ્વકં તવ સેવકાન્ નિર્ભયેન તવ વાક્યં પ્રચારયિતું તવ પવિત્રપુત્રસ્ય યીશો ર્નામ્ના આશ્ચર્ય્યાણ્યસમ્ભવાનિ ચ કર્મ્માણિ કર્ત્તુઞ્ચાજ્ઞાપય।

XXXI ઇત્થં પ્રાર્થનયા યત્ર સ્થાને તે સભાયામ્ આસન્ તત્ સ્થાનં પ્રાકમ્પત; તતઃ સર્વ્વે પવિત્રેણાત્મના પરિપૂર્ણાઃ સન્ત ઈશ્વરસ્ય કથામ્ અક્ષોભેણ પ્રાચારયન્।

XXXII અપરઞ્ચ પ્રત્યયકારિલોકસમૂહા એકમનસ એકચિત્તીભૂય સ્થિતાઃ। તેષાં કેપિ નિજસમ્પત્તિં સ્વીયાં નાજાનન્ કિન્તુ તેષાં સર્વ્વાઃ સમ્પત્ત્યઃ સાધારણ્યેન સ્થિતાઃ।

XXXIII અન્યચ્ચ પ્રેરિતા મહાશક્તિપ્રકાશપૂર્વ્વકં પ્રભો ર્યીશોરુત્થાને સાક્ષ્યમ્ અદદુઃ, તેષુ સર્વ્વેષુ મહાનુગ્રહોઽભવચ્ચ।

XXXIV તેષાં મધ્યે કસ્યાપિ દ્રવ્યન્યૂનતા નાભવદ્ યતસ્તેષાં ગૃહભૂમ્યાદ્યા યાઃ સમ્પત્તય આસન્ તા વિક્રીય

XXXV તન્મૂલ્યમાનીય પ્રેરિતાનાં ચરણેષુ તૈઃ સ્થાપિતં; તતઃ પ્રત્યેકશઃ પ્રયોજનાનુસારેણ દત્તમભવત્।

XXXVI વિશેષતઃ કુપ્રોપદ્વીપીયો યોસિનામકો લેવિવંશજાત એકો જનો ભૂમ્યધિકારી, યં પ્રેરિતા બર્ણબ્બા અર્થાત્ સાન્ત્વનાદાયક ઇત્યુક્ત્વા સમાહૂયન્,

XXXVII સ જનો નિજભૂમિં વિક્રીય તન્મૂલ્યમાનીય પ્રેરિતાનાં ચરણેષુ સ્થાપિતવાન્।

# V

I તદા અનાનિયનામક એકો જનો યસ્ય ભાર્ય્યાયા નામ સફીરા સ સ્વાધિકારં વિક્રીય

II સ્વભાર્ય્યાં જ્ઞાપયિત્વા તન્મૂલ્યસ્યૈકાંશં સઙ્ગોપ્ય સ્થાપયિત્વા તદન્યાંશમાત્રમાનીય પ્રેરિતાનાં ચરણેષુ સમર્પિતવાન્।

III તસ્માત્ પિતરોકથયત્ હે અનાનિય ભૂમે ર્મૂલ્યં કિઞ્ચિત્ સઙ્ગોપ્ય સ્થાપયિતું પવિત્રસ્યાત્મનઃ સન્નિધૌ મૃષાવાક્યં કથયિતુઞ્ચ શૈતાન્ કુતસ્તવાન્તઃકરણે પ્રવૃત્તિમજનયત્?

IV સા ભૂમિ ર્યદા તવ હસ્તગતા તદા કિં તવ સ્વીયા નાસીત્? તર્હિ સ્વાન્તઃકરણે કુત એતાદૃશી કુકલ્પના ત્વયા કૃતા? ત્વં કેવલમનુષ્યસ્ય નિકટે મૃષાવાક્યં નાવાદીઃ કિન્ત્વીશ્વરસ્ય નિકટેઽપિ।

V એતાં કથાં શ્રુત્વૈવ સોઽનાનિયો ભૂમૌ પતન્ પ્રાણાન્ અત્યજત્, તદ્વૃત્તાન્તં યાવન્તો લોકા અશૃણ્વન્ તેષાં સર્વ્વેષાં મહાભયમ્ અજાયત્।

VI તદા યુવલોકાસ્તં વસ્ત્રેણાચ્છાદ્ય બહિ ર્નીત્વા શ્મશાનેઽસ્થાપયન્।

VII તતઃ પ્રહરૈકાનન્તરં કિં વૃત્તં તન્નાવગત્ય તસ્ય ભાર્ય્યાપિ તત્ર સમુપસ્થિતા।

VIII તતઃ પિતરસ્તામ્ અપૃચ્છત્, યુવાભ્યામ્ એતાવન્મુદ્રાભ્યો ભૂમિ ર્વિક્રીતા ન વા? એતત્વં વદ; તદા સા પ્રત્યવાદીત્ સત્યમ્ એતાવદ્ભ્યો મુદ્રાભ્ય એવ।

IX તતઃ પિતરોકથયત્ યુવાં કથં પરમેશ્વરસ્યાત્માનં પરીક્ષિતુમ્ એકમન્ત્રણાવભવતાં? પશ્ય યે તવ પતિં શ્મશાને સ્થાપિતવન્તસ્તે દ્વારસ્ય સમીપે સમુપતિષ્ઠન્તિ ત્વામપિ બહિર્નેષ્યન્તિ।

X તતઃ સાપિ તસ્ય ચરણસન્નિધૌ પતિત્વા પ્રાણાન્ અત્યાક્ષીત્| પશ્ચાત્ તે યુવાનોઽભ્યન્તરમ્ આગત્ય તામપિ મૃતાં દૃષ્ટ્વા બહિ ર્નીત્વા તસ્યાઃ પત્યુઃ પાર્શ્વે શ્મશાને સ્થાપિતવન્તઃ|
XI તસ્માત્ મણ્ડલ્યાઃ સર્વ્વે લોકા અન્યલોકાશ્ચ તાં વાર્ત્તાં શ્રુત્વા સાધ્વસં ગતાઃ|
XII તતઃ પરં પ્રેરિતાનાં હસ્તૈ ર્લોકાનાં મધ્યે બહ્વાશ્ચર્ય્યાણ્યદ્ભુતાનિ કર્મ્માણ્યક્રિયન્ત; તદા શિષ્યાઃ સર્વ્વ એકચિત્તીભૂય સુલેમાનો ઽલિન્દે સમ્ભૂયાસન્|
XIII તેષાં સઙ્ઘાન્તર્ગો ભવિતું કોપિ પ્રગલ્ભતાં નાગમત્ કિન્તુ લોકાસ્તાન્ સમાદ્રિયન્ત|
XIV સ્ત્રિયઃ પુરુષાશ્ચ બહવો લોકા વિશ્વાસ્ય પ્રભું શરણમાપન્નાઃ|
XV પિતરસ્ય ગમનાગમનાભ્યાં કેનાપિ પ્રકારેણ તસ્ય છાયા કસ્મિંશ્ચિજ્જને લગિષ્યતીત્યાશયા લોકા રોગિણઃ શિવિકયા ખટ્વયા ચાનીય પથિ પથિ સ્થાપિતવન્તઃ|
XVI ચતુર્દિક્સ્થનગરેભ્યો બહવો લોકાઃ સમ્ભૂય રોગિણોઽપવિત્રભુતગ્રસ્તાંશ્ચ યિરૂશાલમમ્ આનયન્ તતઃ સર્વ્વે સ્વસ્થા અક્રિયન્ત|
XVII અનન્તરં મહાયાજકઃ સિદૂકિનાં મતગ્રાહિણસ્તેષાં સહચરાશ્ચ
XVIII મહાક્રોધાન્વિતાઃ સન્તઃ પ્રેરિતાન્ ધૃત્વા નીચલોકાનાં કારાયાં બદ્ધ્વા સ્થાપિતવન્તઃ|
XIX કિન્તુ રાત્રૌ પરમેશ્વરસ્ય દૂતઃ કારાયા દ્વારં મોચયિત્વા તાન્ બહિરાનીયાકથયત્,
XX યૂયં ગત્વા મન્દિરે દણ્ડાયમાનાઃ સન્તો લોકાન્ પ્રતીમાં જીવનદાયિકાં સર્વ્વાં કથાં પ્રચારયત|
XXI ઇતિ શ્રુત્વા તે પ્રત્યૂષે મન્દિર ઉપસ્થાય ઉપદિષ્ટવન્તઃ| તદા સહચરગણેન સહિતો મહાયાજક આગત્ય મન્ત્રિગણમ્ ઇસ્રાયેલ્વંશસ્ય સર્વ્વાન્ રાજસભાસદઃ સભાસ્થાન્ કૃત્વા કારાયાસ્તાન્ આપયિતું પદાતિગણં પ્રેરિતવાન્|
XXII તતસ્તે ગત્વા કારાયાં તાન્ અપ્રાપ્ય પ્રત્યાગત્ય ઇતિ વાર્ત્તામ્ અવાદિષુઃ,
XXIII વયં તત્ર ગત્વા નિર્વ્વિઘ્નં કારાયા દ્વારં રુદ્ધં રક્ષકાંશ્ચ દ્વારસ્ય બહિર્દણ્ડાયમાનાન્ અદર્શામ એવ કિન્તુ દ્વારં મોચયિત્વા તન્મધ્યે કમપિ દ્રષ્ટું ન પ્રાપ્તાઃ|
XXIV એતાં કથાં શ્રુત્વા મહાયાજકો મન્દિરસ્ય સેનાપતિઃ પ્રધાનયાજકાશ્ચ, ઇત પરં કિમપરં ભવિષ્યતીતિ ચિન્તયિત્વા સન્દિગ્ધચિત્તા અભવન્|
XXV એતસ્મિન્નેવ સમયે કશ્ચિત્ જન આગત્ય વાર્ત્તામેતામ્ અવદત્ પશ્યત યૂયં યાન્ માનવાન્ કારાયામ્ અસ્થાપયત તે મન્દિરે તિષ્ઠન્તો લોકાન્ ઉપદિશન્તિ|
XXVI તદા મન્દિરસ્ય સેનાપતિઃ પદાતયશ્ચ તત્ર ગત્વા ચેલ્લોકાઃ પાષાણાન્ નિક્ષિપ્યાસ્માન્ મારયન્તીતિ ભિયા વિનત્યાચારં તાન્ આનયન્|
XXVII તે મહાસભાયા મધ્યે તાન્ અસ્થાપયન્ તતઃ પરં મહાયાજકસ્તાન્ અપૃચ્છત્,
XXVIII અનેન નામ્ના સમુપદેષ્ટું વયં કિં દૃઢં ન ન્યષેધામ? તથાપિ પશ્યત યૂયં સ્વેષાં તેનોપદેશેને યિરૂશાલમં પરિપૂર્ણં કૃત્વા તસ્ય જનસ્ય રક્તપાતજનિતાપરાધમ્ અસ્માન્ પ્રત્યાનેતું ચેષ્ટધ્વે|
XXIX તતઃ પિતરોન્યપ્રેરિતાશ્ચ પ્રત્યવદન્ માનુષસ્યાજ્ઞાગ્રહણાદ્ ઈશ્વરસ્યાજ્ઞાગ્રહણમ્ અસ્માકમુચિતમ્|
XXX યં યીશું યૂયં ક્રુશે વેધિત્વાહત તમ્ અસ્માકં પૈતૃક ઈશ્વર ઉત્થાપ્ય
XXXI ઇસ્રાયેલ્વંશાનાં મનઃપરિવર્ત્તનં પાપક્ષમાઞ્ચ કર્ત્તું રાજાનં પરિત્રાતારઞ્ચ કૃત્વા સ્વદક્ષિણપાર્શ્વે તસ્યાન્નતિમ્ અકરોત્|
XXXII એતસ્મિન્ વયમપિ સાક્ષિણ આસ્મહે, તત્ કેવલં નહિ, ઈશ્વર આજ્ઞાગ્રાહિભ્યો યં પવિત્રમ્ આત્મનં દત્તવાન્ સોપિ સાક્ષ્યસ્તિ|
XXXIII એતદ્વાક્યે શ્રુતે તેષાં હૃદયાનિ વિદ્ધાન્યભવન્ તતસ્તે તાન્ હન્તું મન્ત્રિતવન્તઃ|
XXXIV એતસ્મિન્નેવ સમયે તત્સભાસ્થાનાં સર્વ્વલોકાનાં મધ્યે સુખ્યાતો ગમિલીયેલ્નામક એકો જનો વ્યવસ્થાપકઃ ફિરૂશિલોક ઉત્થાય પ્રેરિતાન્ ક્ષણાર્થં સ્થાનાન્તરં ગન્તુમ્ આદિશ્ય કથિતવાન્,
XXXV હે ઇસ્રાયેલ્વંશીયાઃ સર્વ્વે યૂયમ્ એતાન્ માનુષાન્ પ્રતિ યત્ કર્ત્તુમ્ ઉદ્યતાસ્તસ્મિન્ સાવધાના ભવત|
XXXVI ઇતઃ પૂર્વ્વં થૂદાનામૈકો જન ઉપસ્થાય સ્વં કમપિ મહાપુરુષમ્ અવદત્, તતઃ પ્રાયેણ ચતુઃશતલોકાસ્તસ્ય મતગ્રાહિણોભવન્ પશ્ચાત્ સ હતોભવત્ તસ્યાજ્ઞાગ્રાહિણો યાવન્તો લોકાસ્તે સર્વ્વે વિકીર્ણાઃ સન્તો ઽકૃતકાર્ય્યા અભવન્|
XXXVII તસ્માજ્જનાત્ પરં નામલેખનસમયે ગાલીલીયયિહૂદાનામૈકો જન ઉપસ્થાય બહૂલ્લોકાન્ સ્વમતં ગ્રાહીતવાન્ તતઃ સોપિ વ્યનશ્યત્ તસ્યાજ્ઞાગ્રાહિણો યાવન્તો લોકા આસન્ તે સર્વ્વે વિકીર્ણા અભવન્|
XXXVIII અધુના વદામિ, યૂયમ્ એતાન્ મનુષ્યાન્ પ્રતિ કિમપિ ન કૃત્વા ક્ષાન્તા ભવત, યત એષ સઙ્કલ્પ એતત્ કર્મ્મ ચ યદિ મનુષ્યાદભવત્ તર્હિ વિફલં ભવિષ્યતિ|
XXXIX યદીશ્વરાદભવત્ તર્હિ યૂયં તસ્યાન્યથા કર્ત્તું ન શક્ષ્યથ, વરમ્ ઈશ્વરરોધકા ભવિષ્યથ|
XL તદા તસ્ય મન્ત્રણાં સ્વીકૃત્ય તે પ્રેરિતાન્ આહૂય પ્રહૃત્ય યીશો ર્નામ્ના કામપિ કથાં કથયિતું નિષિધ્ય વ્યસર્જન્|
XLI કિન્તુ તસ્ય નામાર્થં વયં લજ્જાભોગસ્ય યોગ્યત્વેન ગણિતા ઇત્યત્ર તે સાનન્દાઃ સન્તઃ સભાસ્થાનાં સાક્ષાદ્ અગચ્છન્|
XLII તતઃ પરં પ્રતિદિનં મન્દિરે ગૃહે ગૃહે ચાવિશ્રામમ્ ઉપદિશ્ય યીશુખ્રીષ્ટસ્ય સુસંવાદં પ્રચારિતવન્તઃ|

# VI

I તસ્મિન્ સમયે શિષ્યાણાં બાહુલ્યાત્ પ્રાત્યહિકદાનસ્ય વિશ્રાણનૈ ર્ભિન્નદેશીયાનાં વિધવાસ્ત્રીગણ ઉપેક્ષિતે સતિ ઇબ્રીયલોકૈઃ સહાન્યદેશીયાનાં વિવાદ ઉપાતિષ્ઠત્|
II તદા દ્વાદશપ્રેરિતાઃ સર્વ્વાન્ શિષ્યાન્ સંગૃહ્યાકથયન્ ઈશ્વરસ્ય કથાપ્રચારં પરિત્યજ્ય ભોજનગવેષણમ્ અસ્માકમ્ ઉચિતં નહિ|
III અતો હે ભ્રાતૃગણ વયમ્ એતત્કર્મ્મણો ભારં યેભ્યો દાતું શક્નુમ એતાદૃશાન્ સુખ્યાત્યાપન્નાન્ પવિત્રેણાત્મના જ્ઞાનેન ચ પૂર્ણાન્ સપ્રજનાન્ યૂયં સ્વેષાં મધ્યે મનોનીતાન્ કુરુત,

IV કિન્તુ વયં પ્રાર્થનાયાં કથાપ્રચારકર્મ્મણિ ચ નિત્યપ્રવૃત્તાઃ સ્થાસ્યામઃ।

V એતસ્યાં કથાયાં સર્વ્વે લોકાઃ સન્તુષ્ટાઃ સન્તઃ સ્વેષાં મધ્યાત્ સ્તિફાનઃ ફિલિપઃ પ્રખરો નિકાનોર્ તીમન્ પર્મ્મિણા યિહૂદિમતગ્રાહી-આન્તિયખિયાનગરીયો નિકલા એતાન્ પરમભક્તાન્ પવિત્રેણાત્મના પરિપૂર્ણાન્ સપ્ત જનાન્

VI પ્રેરિતાનાં સમક્ષમ્ આનયન્, તતસ્તે પ્રાર્થનાં કૃત્વા તેષાં શિરઃસુ હસ્તાન્ આર્પયન્।

VII અપરઞ્ચ ઈશ્વરસ્ય કથા દેશં વ્યાપ્નોત્ વિશેષતો યિરૂશાલમિ નગરે શિષ્યાણાં સંખ્યા પ્રભૂતરૂપેણાવર્દ્ધત યાજકાનાં મધ્યેપિ બહવઃ ખ્રીષ્ટમતગ્રાહિણોઽભવન્।

VIII સ્તિફાનો ્ વિશ્વાસેન પરાક્રમેણ ચ પરિપૂર્ણઃ સન્ લોકાનાં મધ્યે બહુવિધમ્ અદ્ભુતમ્ આશ્ચર્ય્યં કર્મ્માકરોત્।

IX તેન લિબર્ત્તિનીયનામ્ના વિખ્યાતસઙ્ઘસ્ય કતિપયજનાઃ કુરીણીયસિકન્દરીય-કિલિકીયાશીયાદેશીયાઃ કિયન્તો જનાશ્ચોત્થાય સ્તિફાનેન સાર્દ્ધં વ્યવદન્ત।

X કિન્તુ સ્તિફાનો જ્ઞાનેન પવિત્રેણાત્મના ચ ઈદૃશીં કથાં કથિતવાન્ યસ્યાસ્તે આપત્તિં કર્ત્તું નાશક્નુવન્।

XI પશ્ચાત્ તૈ ર્લોભિતાઃ કતિપયજનાઃ કથામેનામ્ અકથયન્, વયં તસ્ય મુખતો મૂસા ઈશ્વરસ્ય ચ નિન્દાવાક્યમ્ અશ્રૌષ્મ।

XII તે લોકાનાં લોકપ્રાચીનાનામ્ અધ્યાપકાનાઞ્ચ પ્રવૃત્તિં જનયિત્વા સ્તિફાનસ્ય સન્નિધિમ્ આગત્ય તં ધૃત્વા મહાસભામધ્યમ્ આનયન્।

XIII તદનન્તરં કતિપયજનેષુ મિથ્યાસાક્ષિષુ સમાનીતેષુ તેઽકથયન્ એષ જન એતત્પુણ્યસ્થાનવ્યવસ્થયો ર્નિન્દાતઃ કદાપિ ન નિવર્ત્તતે।

XIV ફલતો નાસરતીયયીશુઃ સ્થાનમેતદ્ ઉચ્છિન્નં કરિષ્યતિ મૂસાસમર્પિતમ્ અસ્માકં વ્યવહરણમ્ અન્યરૂપં કરિષ્યતિ તસ્યૈતાદૃશીં કથાં વયમ્ અશૃણુમ।

XV તદા મહાસભાસ્થાઃ સર્વ્વે તં પ્રતિ સ્થિરાં દૃષ્ટિં કૃત્વા સ્વર્ગદૂતમુખસદૃશં તસ્ય મુખમ્ અપશ્યન્।

# VII

I તતઃ પરં મહાયાજકઃ પૃષ્ટવાન્, એષા કથાં કિં સત્યા?

II તતઃ સ પ્રત્યવદત્, હે પિતરો હે ભ્રાતરઃ સર્વ્વે લાકા મનાંસિ નિધદ્ધ્વં। અસ્માકં પૂર્વ્વપુરુષ ઇબ્રાહીમ્ હારણનગરે વાસકરણાત્ પૂર્વ્વં યદા અરામ્-નહરયિમદેશે આસીત્ તદા તેજોમય ઈશ્વરો દર્શનં દત્વા

III તમવદત્ ત્વં સ્વદેશજ્ઞાતિમિત્રાણિ પરિત્યજ્ય યં દેશમહં દર્શયિષ્યામિ તં દેશં વ્રજ।

IV અતઃ સ કસ્દીયદેશં વિહાય હારણનગરે ન્યવસત્, તદનન્તરં તસ્ય પિતરિ મૃતે યત્ર દેશે યૂયં નિવસથ સ એનં દેશમાગચ્છત્।

V કિન્ત્વીશ્વરસ્તસ્મૈ કમપ્યધિકારમ્ અર્થાદ્ એકપદપરિમિતાં ભૂમિમપિ નાદદાત્; તદા તસ્ય કોપિ સન્તાનો નાસીત્ તથાપિ સન્તાનૈઃ સાર્દ્ધમ્ એતસ્ય દેશસ્યાધિકારી ત્વં ભવિષ્યસીતિ તમ્પ્રત્યઙ્ગીકૃતવાન્।

VI ઈશ્વર ઇત્થમ્ અપરમપિ કથિતવાન્ તવ સન્તાનાઃ પરદેશે નિવત્સ્યન્તિ તતસ્તદ્દેશીયલોકાશ્ચતુઃશતવત્સરાન્ યાવત્ તાન્ દાસત્વે સ્થાપયિત્વા તાન્ પ્રતિ કુવ્યવહારં કરિષ્યન્તિ।

VII અપરમ્ ઈશ્વર એનાં કથામપિ કથિતવાન્, યે લોકાસ્તાન્ દાસત્વે સ્થાપયિષ્યન્તિ તાલ્લોકાન્ અહં દણ્ડયિષ્યામિ, તતઃ પરં તે બહિર્ગતાઃ સન્તો મામ્ અત્ર સ્થાને સેવિષ્યન્તે।

VIII પશ્ચાત્ સ તસ્મૈ ત્વક્છેદસ્ય નિયમં દત્તવાન્, અત ઇસ્હાકનામ્નિ ઇબ્રાહીમ એકપુત્રે જાતે, અષ્ટમદિને તસ્ય ત્વક્છેદમ્ અકરોત્। તસ્ય ઇસ્હાકઃ પુત્રો યાકૂબ્, તતસ્તસ્ય યાકૂબોઽસ્માકં દ્વાદશ પૂર્વ્વપુરુષા અજાયન્ત।

IX તે પૂર્વ્વપુરુષા ઈર્ષ્યયા પરિપૂર્ણા મિસરદેશં પ્રેષયિતું યૂષફં વ્યક્રીણન્।

X કિન્ત્વીશ્વરસ્તસ્ય સહાયો ભૂત્વા સર્વ્વસ્યા દુર્ગતે રક્ષિત્વા તસ્મૈ બુદ્ધિં દત્ત્વા મિસરદેશસ્ય રાજ્ઞઃ ફિરૌણઃ પ્રિયપાત્રં કૃતવાન્ તતો રાજા મિસરદેશસ્ય સ્વીયસર્વ્વપરિવારસ્ય ચ શાસનપદં તસ્મૈ દત્તવાન્।

XI તસ્મિન્ સમયે મિસર-કિનાનદેશયો ર્દુર્ભિક્ષહેતોરતિક્લિષ્ટત્વાત્ નઃ પૂર્વ્વપુરુષા ભક્ષ્યદ્રવ્યં નાલભન્ત।

XII કિન્તુ મિસરદેશે શસ્યાનિ સન્તિ, યાકૂબ્ ઇમાં વાર્ત્તાં શ્રુત્વા પ્રથમમ્ અસ્માકં પૂર્વ્વપુરુષાન્ મિસરં પ્રેષિતવાન્।

XIII તતો દ્વિતીયવારગમને યૂષફ્ સ્વભ્રાતૃભિઃ પરિચિતોઽભવત્; યૂષફો ભ્રાતરઃ ફિરૌણ્ રાજેન પરિચિતા અભવન્।

XIV અનન્તરં યૂષફ્ ભ્રાતૃગણં પ્રેષ્ય નિજપિતરં યાકૂબં નિજાન્ પઞ્ચાધિકસપ્તતિસંખ્યકાન્ જ્ઞાતિજનાંશ્ચ સમાહૂતવાન્।

XV તસ્માદ્ યાકૂબ્ મિસરદેશં ગત્વા સ્વયમ્ અસ્માકં પૂર્વ્વપુરુષાશ્ચ તસ્મિન્ સ્થાનેઽમ્રિયન્ત।

XVI તતસ્તે શિખિમં નીતા યત્ શ્મશાનમ્ ઇબ્રાહીમ્ મુદ્રાદત્વા શિખિમઃ પિતુ ર્હમોરઃ પુત્રેભ્યઃ ક્રીતવાન્ તત્શ્મશાને સ્થાપયાઞ્ચક્રિરે।

XVII તતઃ પરમ્ ઈશ્વર ઇબ્રાહીમઃ સન્નિધૌ શપથં કૃત્વા યાં પ્રતિજ્ઞાં કૃતવાન્ તસ્યાઃ પ્રતિજ્ઞાયાઃ ફલનસમયે નિકટે સતિ ઇસ્રાયેલ્લોકા સિમરદેશે વર્દ્ધમાના બહુસંખ્યા અભવન્।

XVIII શેષે યૂષફં યો ન પરિચિનોતિ તાદૃશ એકો નરપતિરુપસ્થાય

XIX અસ્માકં જ્ઞાતિભિઃ સાર્દ્ધં ધૂર્ત્તતાં વિધાય પૂર્વ્વપુરુષાન્ પ્રતિ કુવ્યવહરણપૂર્વ્વકં તેષાં વંશનાશનાય તેષાં નવજાતાન્ શિશૂન્ બહિ ર્નિરક્ષેપયત્।

XX એતસ્મિન્ સમયે મૂસા જજ્ઞે, સ તુ પરમસુન્દરોઽભવત્ તથા પિતૃગૃહે માસત્રયપર્ય્યન્તં પાલિતોઽભવત્।

XXI કિન્તુ તસ્મિન્ બહિર્નિક્ષિપ્તે સતિ ફિરૌણરાજસ્ય કન્યા તમ્ ઉત્તોલ્ય નીત્વા દત્તકપુત્રં કૃત્વા પાલિતવતી।

XXII તસ્માત્ સ મૂસા મિસરદેશીયાયાઃ સર્વ્વવિદ્યાયાઃ પારદૃષ્વા સન્ વાક્યે ક્રિયાયાઞ્ચ શક્તિમાન્ અભવત્।

XXIII સ સમ્પૂર્ણચત્વારિંશદ્વત્સરવયસ્કો ભૂત્વા ઇસ્રાયેલીયવંશનિજભ્રાતૃન્ સાક્ષાત્ કર્તું મતિં ચક્રે।

XXIV તેષાં જનમેકં હિંસિતં દૃષ્ટ્વા તસ્ય સપક્ષઃ સન્ હિંસિતજનમ્ ઉપકૃત્ય મિસરીયજનં જઘાન।

XXV તસ્ય હસ્તેનેશ્વરસ્તાન્ ઉદ્ધરિષ્યતિ તસ્ય ભ્રાતૃગણ ઇતિ જ્ઞાસ્યતિ સ ઇત્યનુમાનં ચકાર, કિન્તુ તે ન બુબુધિરે।

XXVI તત્પરે ઽહનિ તેષામ્ ઉભયો ર્જનયો ર્વાક્કલહ ઉપસ્થિતે સતિ મૂસાઃ સમીપં ગત્વા તયો ર્મેલનં કર્ત્તું મતિં કૃત્વા કથયામાસ,
હે મહાશયૌ યુવાં ભ્રાતરૌ પરસ્પરમ્ અન્યાયં કુતઃ કુરુથઃ?
XXVII તતઃ સમીપવાસિનં પ્રતિ યો જનોઽન્યાયં ચકાર સ તં દૂરીકૃત્ય કથયામાસ, અસ્માકમુપરિ શાસ્તૃત્વવિચારયિતૃત્વપદયોઃ
કસ્ત્વાં નિયુક્તવાન્?
XXVIII હ્યો યથા મિસરીયં હતવાન્ તથા કિં મામપિ હનિષ્યસિ?
XXIX તદા મૂસા એતાદૃશીં કથાં શ્રુત્વા પલાયનં ચક્રે, તતો મિદિયનદેશં ગત્વા પ્રવાસી સન્ તસ્થૌ, તતસ્તત્ર દ્વૌ પુત્રૌ જજ્ઞાતે।
XXX અનન્તરં ચત્વારિંશદ્વત્સરેષુ ગતેષુ સીનયપર્વ્વતસ્ય પ્રાન્તરે પ્રજ્વલિતસ્તમ્બસ્ય વહ્નિશિખાયાં પરમેશ્વરદૂતસ્તસ્મૈ દર્શનં
દદૌ।
XXXI મૂસાસ્તસ્મિન્ દર્શને વિસ્મયં મત્વા વિશેષં જ્ઞાતું નિકટં ગચ્છતિ,
XXXII એતસ્મિન્ સમયે, અહં તવ પૂર્વ્વપુરુષાણામ્ ઈશ્વરોઽર્થાદ્ ઇબ્રાહીમ ઈશ્વર ઇસ્હાક ઈશ્વરો યાકૂબ ઈશ્વરશ્ચ, મૂસામુદ્દિશ્ય
પરમેશ્વરસ્યૈતાદૃશી વિહાયસીયા વાણી બભૂવ, તતઃ સ કમ્પાન્વિતઃ સન્ પુન ર્નિરીક્ષિતું પ્રગલ્ભો ન બભૂવ।
XXXIII પરમેશ્વરસ્તં જગાદ, તવ પાદયોઃ પાદુકે મોચય યત્ર તિષ્ઠસિ સા પવિત્રભૂમિઃ।
XXXIV અહં મિસરદેશસ્થાનાં નિજલોકાનાં દુર્દ્દશાં નિતાન્તમ્ અપશ્યં, તેષાં કાતર્ય્યોક્તિઞ્ચ શ્રુતવાન્ તસ્માત્ તાન્ ઉદ્ધર્ત્તુમ્
અવરુહ્યાગમમ્; ઇદાનીમ્ આગચ્છ મિસરદેશં ત્વાં પ્રેષયામિ।
XXXV કસ્ત્વાં શાસ્તૃત્વવિચારયિતૃત્વપદયો ર્નિયુક્તવાન્, ઇતિ વાક્યમુક્ત્વા તૈ ર્યો મૂસા અવજ્ઞાતસ્તમેવ ઈશ્વરઃ સ્તમ્બમધ્યે
દર્શનદાત્રા તેન દૂતેન શાસ્તારં મુક્તિદાતારઞ્ચ કૃત્વા પ્રેષયામાસ।
XXXVI સ ચ મિસરદેશે સૂફ્સાગરે સમુદ્રે ચ પશ્ચાત્ ચત્વારિંશદ્વત્સરાન્ યાવત્ મહાપ્રાન્તરે નાનાપ્રકારાણ્યદ્ભુતાનિ કર્મ્માણિ
લક્ષણાનિ ચ દર્શયિત્વા તાન્ બહિઃ કૃત્વા સમાનિનાય।
XXXVII પ્રભુઃ પરમેશ્વરો યુષ્માકં ભ્રાતૃગણસ્ય મધ્યે માદૃશમ્ એકં ભવિષ્યદ્વક્તારમ્ ઉત્પાદયિષ્યતિ તસ્ય કથાયાં યૂયં મનો
નિધાસ્યથ, યો જન ઇસ્રાયેલઃ સન્તાનેભ્ય એનાં કથાં કથયામાસ સ એષ મૂસાઃ।
XXXVIII મહાપ્રાન્તરસ્થમણ્ડલીમધ્યેઽપિ સ એવ સીનયપર્વ્વતોપરિ તેન સાર્દ્ધં સંલાપિનો દૂતસ્ય ચાસ્મત્પિતૃગણસ્ય મધ્યસ્થઃ
સન્ અસ્મભ્યં દાતવ્યનિ જીવનદાયકાનિ વાક્યાનિ લેભે।
XXXIX અસ્માકં પૂર્વ્વપુરુષાસ્તમ્ અમાન્યં કત્વા સ્વેભ્યો દૂરીકૃત્ય મિસરદેશં પરાવૃત્ય ગન્તું મનોભિરભિલષ્ય હારોણં જગદુઃ,
XL અસ્માકમ્ અગ્રેઽગ્રે ગન્તુ◌ુમ્ અસ્મદર્થં દેવગણં નિર્મ્માહિ યતો યો મૂસા અસ્માન્ મિસરદેશાદ્ બહિઃ કૃત્વાનીતવાન્ તસ્ય કિં
જાતં તદસ્માભિ ર્ન જ્ઞાયતે।
XLI તસ્મિન્ સમયે તે ગોવત્સાકૃતિં પ્રતિમાં નિર્મ્માય તામુદ્દિશ્ય નૈવેદ્યમુત્મૃજ્ય સ્વહસ્તકૃતવસ્તુના આનન્દિતવન્તઃ।
XLII તસ્માદ્ ઈશ્વરસ્તેષાં પ્રતિ વિમુખઃ સન્ આકાશસ્થં જ્યોતિર્ગણં પૂજયિતું તેભ્યોઽનુમતિં દદૌ, યાદૃશં ભવિષ્યદ્વાદિનાં ગ્રન્થેષુ
લિખિતમાસ્તે, યથા, ઇસ્રાયેલીયવંશા રે ચત્વારિંશત્સમાન્ પુરા। મહતિ પ્રાન્તરે સંસ્થા યૂયન્તુ યાનિ ચ। બલિહોમાદિકર્મ્માણિ
કૃતવન્તસ્તુ તાનિ કિં। માં સમુદ્દિશ્ય યુષ્માભિઃ પ્રકૃતાનીતિ નૈવ ચ।
XLIII કિન્તુ વો મોલકાખ્યસ્ય દેવસ્ય દૂષ્યમેવ ચ। યુષ્માકં રિમ્ફનાખ્યાયા દેવતાયાશ્ચ તારકા। એતયોરુભયો ર્મૂર્તી યુષ્માભિઃ
પરિપૂજિતે। અતો યુષ્માંસ્તુ બાબેલઃ પારં નેષ્યામિ નિશ્ચિતં।
XLIV અપરઞ્ચ યન્નિદર્શનમ્ અપશ્યસ્તદનુસારેણ દૂષ્યં નિર્મ્માહિ યસ્મિન્ ઈશ્વરો મૂસામ્ એતદ્વાક્યં બભાષે તત્ તસ્ય નિરૂપિતં
સાક્ષ્યસ્વરૂપં દૂષ્યમ્ અસ્માકં પૂર્વ્વપુરુષૈઃ સહ પ્રાન્તરે તસ્થૌ।
XLV પશ્ચાત્ યિહોશૂયેન સહિતૈસ્તેષાં વંશજાતૈરસ્મત્પૂર્વ્વપુરુષૈઃ સ્વેષાં સમ્મુખાદ્ ઈશ્વરેણ દૂરીકૃતાનામ્ અન્યદેશીયાનાં
દેશાધિકૃતિકાલે સમાનીતં તદ્ દૂષ્યં દાયૂદોધિકારં યાવત્ તત્ર સ્થાન આસીત્।
XLVI સ દાયૂદ્ પરમેશ્વરસ્યાનુગ્રહં પ્રાપ્ય યાકૂબ્ ઈશ્વરાર્થમ્ એકં દૂષ્યં નિર્મ્માતું વવાઞ્છ;
XLVII કિન્તુ સુલેમાન્ તદર્થં મન્દિરમ્ એકં નિર્મ્મિતવાન્।
XLVIII તથાપિ યઃ સર્વ્વોપરિસ્થઃ સ કસ્મિંશ્ચિદ્ હસ્તકૃતે મન્દિરે નિવસતીતિ નહિ, ભવિષ્યદ્વાદી કથામેતાં કથયતિ, યથા,
XLIX પરેશો વદતિ સ્વર્ગો રાજસિંહાસનં મમ। મદીયં પાદપીઠઞ્ચ પૃથિવી ભવતિ ધ્રુવં। તર્હિ યૂયં કૃતે મે કિં પ્રનિર્મ્માસ્યથ મન્દિરં।
વિશ્રામાય મદીયં વા સ્થાનં કિં વિદ્યતે ત્વિહ।
L સર્વ્વાણ્યેતાનિ વસ્તૂનિ કિં મે હસ્તકૃતાનિ ન।।
LI હે અનાજ્ઞાગ્રાહકા અન્તઃકરણે શ્રવણે ચાપવિત્રલોકાઃ યૂયમ્ અનવરતં પવિત્રસ્યાત્મનઃ પ્રાતિકૂલ્યમ્ આચરથ, યુષ્માકં
પૂર્વ્વપુરુષા યાદૃશા યૂયમપિ તાદૃશાઃ।
LII યુષ્માકં પૂર્વ્વપુરુષાઃ કં ભવિષ્યદ્વાદિનં નાતાડયન્? યે તસ્ય ધાર્મ્મિકસ્ય જનસ્યાગમનકથાં કથિતવન્તસ્તાન્ અઘ્નન્ યૂયમ્
અધૂના વિશ્વાસઘાતિનો ભૂત્વા તં ધાર્મ્મિકં જનમ્ અહત।
LIII યૂયં સ્વર્ગીયદૂતગણેન વ્યવસ્થાં પ્રાપ્યાપિ તાં નાચરથ।
LIV ઇમાં કથાં શ્રુત્વા તે મનઃસુ બિદ્ધાઃ સન્તસ્તં પ્રતિ દન્તઘર્ષણમ્ અકુર્વ્વન્।
LV કિન્તુ સ્તિફાનઃ પવિત્રેણાત્મના પૂર્ણો ભૂત્વા ગગણં પ્રતિ સ્થિરદૃષ્ટિં કૃત્વા ઈશ્વરસ્ય દક્ષિણે દણ્ડાયમાનં યીશુઞ્ચ વિલોક્ય
કથિતવાન્;
LVI પશ્ય,મેઘદ્વારં મુક્તમ્ ઈશ્વરસ્ય દક્ષિણે સ્થિતં માનવસુતઞ્ચ પશ્યામિ।
LVII તદા તે પ્રોચ્ચૈઃ શબ્દં કૃત્વા કર્ણેષ્વઙ્ગુલી ર્નિધાય એકચિત્તીભૂય તમ્ આક્રમન્।
LVIII પશ્ચાત્ તં નગરાદ્ બહિઃ કૃત્વા પ્રસ્તરૈરાઘ્નન્ સાક્ષિણો લાકાઃ શૌલનામ્નો યૂનશ્ચરણસન્નિધૌ નિજવસ્ત્રાણિ સ્થાપિતવન્તઃ।
LIX અનન્તરં હે પ્રભો યીશે મદીયમાત્માનં ગૃહાણ સ્તિફાનસ્યેતિ પ્રાર્થનવાક્યવદનસમયે તે તં પ્રસ્તરૈરાઘ્નન્।
LX તસ્માત્ સ જાનુની પાતયિત્વા પ્રોચ્ચૈઃ શબ્દં કૃત્વા, હે પ્રભે પાપમેતદ્ એતેષુ મા સ્થાપય, ઇત્યુક્ત્વા મહાનિદ્રાં પ્રાપ્નોત્।

# VIII

I તસ્ય હત્યાકરણં શૌલોપિ સમમન્યત। તસ્મિન્ સમયે યિરૂશાલમ્નગરસ્થાં મણ્ડલીં પ્રતિ મહાતાડનાયાં જાતાયાં પ્રેરિતલોકાન્ હિત્વા સર્વ્વેઽપરે યિહૂદાશોમિરોણદેશયો ર્નાનાસ્થાને વિકીર્ણાઃ સન્તો ગતાઃ।

II અન્યચ્ચ ભક્તલોકાસ્તં સ્તિફાનં શ્મશાને સ્થાપયિત્વા બહુ વ્યલપન્।

III કિન્તુ શૌલો ગૃહે ગૃહે ભ્રમિત્વા સ્ત્રિયઃ પુરુષાંશ્ચ ધૃત્વા કારાયાં બદ્ધ્વા મણ્ડલ્યા મહોત્પાતં કૃતવાન્।

IV અન્યચ્ચ યે વિકીર્ણા અભવન્ તે સર્વ્વત્ર ભ્રમિત્વા સુસંવાદં પ્રાચારયન્।

V તદા ફિલિપઃ શોમિરોણ્નગરં ગત્વા ખ્રીષ્ટાખ્યાનં પ્રાચારયત્;

VI તતોઽશુચિ-ભૃતગ્રસ્તલોકેભ્યો ભૂતાશ્ચીત્કૃત્યાગચ્છન્ તથા બહવઃ પક્ષાઘાતિનઃ ખઞ્જા લોકાશ્ચ સ્વસ્થા અભવન્।

VII તસ્માત્ લાકા ઈદૃશં તસ્યાશ્ચર્ય્યં કર્મ્મ વિલોક્ય નિશમ્ય ચ સર્વ્વ એકચિત્તીભૂય તેનોક્તાખ્યાને મનાંસિ ન્યદધુઃ।

VIII તસ્મિન્નગરે મહાનન્દશ્ચાભવત્।

IX તતઃ પૂર્વ્વં તસ્મિન્નગરે શિમોન્નામા કશ્ચિજ્જનો બહ્વી ર્માયાક્રિયાઃ કૃત્વા સ્વં કઞ્ચન મહાપુરુષં પ્રોચ્ય શોમિરોણીયાનાં મોહં જનયામાસ।

X તસ્માત્ સ માનુષ ઈશ્વરસ્ય મહાશક્તિસ્વરૂપ ઇત્યુક્ત્વા બાલવૃદ્ધવનિતાઃ સર્વ્વે લાકાસ્તસ્મિન્ મનાંસિ ન્યદધુઃ।

XI સ બહુકાલાન્ માયાવિક્રિયયા સર્વ્વાન્ અતીવ મોહયાઞ્ચકાર, તસ્માત્ તે તં મેનિરે।

XII કિન્ત્વીશ્વરસ્ય રાજ્યસ્ય યીશુખ્રીષ્ટસ્ય નામ્નશ્ચાખ્યાનપ્રચારિણઃ ફિલિપસ્ય કથાયાં વિશ્વસ્ય તેષાં સ્ત્રીપુરુષોભયલોકા મજ્જિતા અભવન્।

XIII શેષે સ શિમોનપિ સ્વયં પ્રત્યૈત્ તતો મજ્જિતઃ સન્ ફિલિપેન કૃતામ્ આશ્ચર્ય્યક્રિયાં લક્ષણઞ્ચ વિલોક્યાસમ્ભવં મન્યમાનસ્તેન સહ સ્થિતવાન્।

XIV ઇત્થં શોમિરોણ્દેશીયલોકા ઈશ્વરસ્ય કથામ્ અગૃહ્લન્ ઇતિ વાર્ત્તાં યિરૂશાલમ્નગરસ્થપ્રેરિતાઃ પ્રાપ્ય પિતરં યોહનઞ્ચ તેષાં નિકટે પ્રેષિતવન્તઃ।

XV તતસ્તૌ તત્ સ્થાનમ્ ઉપસ્થાય લોકા યથા પવિત્રમ્ આત્માનં પ્રાપ્નુવન્તિ તદર્થં પ્રાર્થયેતાં।

XVI યતસ્તે પુરા કેવલપ્રભુયીશો ર્નામ્ના મજ્જિતમાત્રા અભવન્, ન તુ તેષાં મધ્યે કમપિ પ્રતિ પવિત્રસ્યાત્મન આવિર્ભાવો જાતઃ।

XVII કિન્તુ પ્રેરિતાભ્યાં તેષાં ગાત્રેષુ કરેષ્વર્પિતેષુ સત્સુ તે પવિત્રમ્ આત્માનમ્ પ્રાપ્નુવન્।

XVIII ઇત્થં લોકાનાં ગાત્રેષુ પ્રેરિતયોઃ કરાર્પણેન તાન્ પવિત્રમ્ આત્માનં પ્રાપ્તાન્ દૃષ્ટ્વા સ શિમોન્ તયોઃ સમીપે મુદ્રા આનીય કથિતવાન્;

XIX અહં યસ્ય ગાત્રે હસ્તમ્ અર્પયિષ્યામિ તસ્યાપિ યથેત્થં પવિત્રાત્મપ્રાપ્તિ ર્ભવતિ તાદૃશીં શક્તિં મહ્યં દત્તં।

XX કિન્તુ પિતરસ્તં પ્રત્યવદત્ તવ મુદ્રાસ્ત્વયા વિનશ્યન્તુ યત ઈશ્વરસ્ય દાનં મુદ્રાભિઃ ક્રીયતે ત્વમિત્થં બુદ્ધવાન્;

XXI ઈશ્વરાય તાવન્તઃકરણં સરલં નહિ, તસ્માદ્ અત્ર તવાંશોઽધિકારશ્ચ કોપિ નાસ્તિ।

XXII અત એતત્પાપહેતોઃ ખેદાન્વિતઃ સન્ કેનાપિ પ્રકારેણ તવ મનસ એતસ્યાઃ કુકલ્પનાયાઃ ક્ષમા ભવતિ, એતદર્થમ્ ઈશ્વરે પ્રાર્થનાં કુરુ;

XXIII યતસ્ત્વં તિક્તપિત્તે પાપસ્ય બન્ધને ચ યદસિ તન્મયા બુદ્ધમ્।

XXIV તદા શિમોન્ અકથયત્ તર્હિ યુવાભ્યામુદિતા કથા મયિ યથા ન ફલતિ તદર્થં યુવાં મન્નિમિત્તં પ્રભૌ પ્રાર્થનાં કુરુતં।

XXV અનેન પ્રકારેણ તૌ સાક્ષ્યં દત્ત્વા પ્રભોઃ કથાં પ્રચારયન્તૌ શોમિરોણીયાનામ્ અનેકગ્રામેષુ સુસંવાદઞ્ચ પ્રચારયન્તૌ યિરૂશાલમ્નગરં પરાવૃત્ય ગતૌ।

XXVI તતઃ પરમ્ ઈશ્વરસ્ય દૂતઃ ફિલિપમ્ ઇત્યાદિશત્, ત્વમુત્થાય દક્ષિણસ્યાં દિશિ યો માર્ગો પ્રાન્તરસ્ય મધ્યેન યિરૂશાલમો ઽસાનગરં યાતિ તં માર્ગં ગચ્છ।

XXVII તતઃ સ ઉત્થાય ગતવાન્; તદા કન્દાકીનામ્નઃ કૂશ્લોકાનાં રાજ્ઞ્યાઃ સર્વ્વસમ્પત્તેરધીશઃ કૂશદેશીય એકઃ ષણ્ડો ભજનાર્થં યિરૂશાલમ્નગરમ્ આગત્ય

XXVIII પુનરપિ રથમારુહ્ય યિશયિયનામ્નો ભવિષ્યદ્વાદિનો ગ્રન્થં પઠન્ પ્રત્યાગચ્છતિ।

XXIX એતસ્મિન્ સમયે આત્મા ફિલિપમ્ અવદત્, ત્વમ્ રથસ્ય સમીપં ગત્વા તેન સાર્દ્ધં મિલ।

XXX તસ્માત્ સ ધાવન્ તસ્ય સન્નિધાવુપસ્થાય તેન પઠ્યમાનં યિશયિયથવિષ્યદ્વાદિનો વાક્યં શ્રુત્વા પૃષ્ટવાન્ યત્ પઠસિ તત્ કિં બુધ્યસે?

XXXI તતઃ સ કથિતવાન્ કેનચિન્ન બોધિતોહં કથં બુધ્યેય? તતઃ સ ફિલિપં રથમારોઢું સ્વેન સાર્દ્ધમ્ ઉપવેષ્ટુઞ્ચ ન્યવેદયત્।

XXXII સ શાસ્ત્રસ્યેતદ્વાક્યં પઠિતવાન્ યથા, સમાનીયત ઘાતાય સ યથા મેષશાવકઃ। લોમચ્છેદકસાક્ષાચ્ચ મેષશ્ચ નીરવો યથા। આબધ્ય વદનં સ્વીયં તથા સ સમતિષ્ઠત।

XXXIII અન્યાયેન વિચારેણ સ ઉચ્છિન્નો ઽભવત્ તદા। તત્કાલીનમનુષ્યાન્ કો જનો વર્ણયિતું ક્ષમઃ। યતો જીવન્નૃણાં દેશાત્ સ ઉચ્છિન્નો ઽભવત્ ધ્રુવં।

XXXIV અનન્તરં સ ફિલિપમ્ અવદત્ નિવેદયામિ, ભવિષ્યદ્વાદી યામિમાં કથાં કથયામાસ સ કિં સ્વસ્મિન્ વા કસ્મિંશ્ચિદ્ અન્યસ્મિન્?

XXXV તતઃ ફિલિપસ્તત્પ્રકરણમ્ આરભ્ય યીશોરુપાખ્યાનં તસ્યાગ્રે પ્રાસ્તૌત્।

XXXVI ઇત્થં માર્ગેણ ગચ્છન્તૌ જલાશયસ્ય સમીપ ઉપસ્થિતૌ; તદા ક્લીબોઽવાદીત્ પશ્યાત્ર સ્થાને જલમાસ્તે મમ મજ્જને કા બાધા?

XXXVII તતઃ ફિલિપ ઉત્તરં વ્યાહરત્ સ્વાન્તઃકરણેન સાકં યદિ પ્રત્યેષિ તર્હિ બાધા નાસ્તિ। તતઃ સ કથિતવાન્ યીશુખ્રીષ્ટ ઈશ્વરસ્ય પુત્ર ઇત્યહં પ્રત્યેમિ।

XXXVIII તદા રથં સ્થગિતં કર્ત્તુમ્ આદિષ્ટે ફિલિપક્લીબૌ દ્વૌ જલમ્ અવારુહતાં; તદા ફિલિપસ્તમ્ મજ્જયામાસ।

XXXIX તત્પશ્ચાત્ જલમધ્યાદ્ ઉત્થિતયોઃ સતોઃ પરમેશ્વરસ્યાત્મા ફિલિપં હૃત્વા નીતવાન્, તસ્માત્ ક્લીબઃ પુનસ્તં ન દૃષ્ટવાન્
તથાપિ હૃષ્ટચિત્તઃ સન્ સ્વમાર્ગેણ ગતવાન્|
XL ફિલિપશ્ચાસ્દોદ્ગરમ્ ઉપસ્થાય તસ્માત્ કૈસરિયાનગર ઉપસ્થિતિકાલપર્ય્યનતં સર્વ્વસ્મિન્નગરે સુસંવાદં પ્રચારયન્ ગતવાન્|

# IX

I તત્કાલપર્ય્યનતં શૌલઃ પ્રભોઃ શિષ્યાણાં પ્રાતિકૂલ્યેન તાડનાબધયોઃ કથાં નિઃસારયન્ મહાયાજકસ્ય સન્નિધિં ગત્વા
II સ્ત્રિયં પુરુષઞ્ચ તન્મતગ્રાહિણં યં કઞ્ચિત્ પશ્યતિ તાન્ ધૃત્વા બદ્ધ્વા યિરૂશાલમમ્ આનયતીત્યાશયેન દમ્મેષક્નગરીયં
ધર્મ્મસમાજાન્ પ્રતિ પત્રં યાચિતવાન્|
III ગચ્છન્ તુ દમ્મેષક્નગરનિકટ ઉપસ્થિતવાન્; તતોઽકસ્માદ્ આકાશાત્ તસ્ય ચતુર્દિક્ષુ તેજસઃ પ્રકાશનાત્ સ ભૂમાવપતત્|
IV પશ્ચાત્ હે શૌલ હે શૌલ કુતો માં તાડયસિ? સ્વં પ્રતિ પ્રોક્તમ્ એતં શબ્દં શ્રુત્વા
V સ પૃષ્ટવાન્, હે પ્રભો ભવાન્ કઃ? તદા પ્રભુરકથયત્ યં યીશું ત્વં તાડયસિ સ એવાહં; કણ્ટકસ્ય મુખે પદાઘાતકરણં તવ કષ્ટમ્|
VI તદા કમ્પમાનો વિસ્મયાપન્નશ્ચ સોવદત્ હે પ્રભો મયા કિં કર્ત્તવ્યં? ભવત ઇચ્છા કા? તતઃ પ્રભુરાજ્ઞાપયદ્ ઉત્થાય નગરં ગચ્છ
તત્ર ત્વયા યત્ કર્ત્તવ્યં તદ્ વદિષ્યતે|
VII તસ્ય સઙ્ગિનો લોકા અપિ તં શબ્દં શ્રુતવન્તઃ કિન્તુ કમપિ ન દૃષ્ટ્વા સ્તબ્ધાઃ સન્તઃ સ્થિતવન્તઃ|
VIII અનન્તરં શૌલો ભૂમિત ઉત્થાય ચક્ષુષી ઉન્મીલ્ય કમપિ ન દૃષ્ટવાન્| તદા લોકાસ્તસ્ય હસ્તૌ ધૃત્વા દમ્મેષક્નગરમ્ આનયન્|
IX તતઃ સ દિનત્રયં યાવદ્ અન્ધો ભૂત્વા ન ભુક્તવાન્ પીતવાંશ્ચ|
X તદનન્તરં પ્રભુસ્તદ્દમ્મેષક્નગરવાસિન એકસ્મૈ શિષ્યાય દર્શનં દત્વા આહૂતવાન્ હે અનનિય| તતઃ સ પ્રત્યવાદીત્, હે પ્રભો
પશ્ય શૃણોમિ|
XI તદા પ્રભુસ્તમાજ્ઞાપયત્ ત્વમુત્થાય સરલનામાનં માર્ગં ગત્વા યિહૂદાનિવેશને તાર્ષનગરીયં શૌલનામાનં જનં ગવેષયન્ પૃચ્છ;
XII પશ્ય સ પ્રાર્થયતે, તથા અનનિયનામક એકો જનસ્તસ્ય સમીપમ્ આગત્ય તસ્ય ગાત્રે હસ્તાર્પણં કૃત્વા દૃષ્ટિં દદાતીત્થં સ્વપ્ને
દૃષ્ટવાન્|
XIII તસ્માદ્ અનનિયઃ પ્રત્યવદત્ હે પ્રભો યિરૂશાલમિ પવિત્રલોકાન્ પ્રતિ સોઽનેકહિંસાં કૃતવાન્;
XIV અત્ર સ્થાને ચ યે લોકાસ્તવ નામ્નિ પ્રાર્થયન્તિ તાનપિ બદ્ધું સ પ્રધાનયાજકેભ્યઃ શક્તિં પ્રાપ્તવાન્, ઇમાં કથામ્ અહમ્
અનેકેષાં મુખેભ્યઃ શ્રુતવાન્|
XV કિન્તુ પ્રભુરકથયત્, યાહિ ભિન્નદેશીયલોકાનાં ભૂપતીનામ્ ઇસ્રાયેલ્લોકાનાઞ્ચ નિકટે મમ નામ પ્રચારયિતું સ જનો મમ
મનોનીતપાત્રમાસ્તે|
XVI મમ નામનિમિત્તઞ્ચ તેન કિયાન્ મહાન્ ક્લેશો ભોક્તવ્ય એતત્ તં દર્શયિષ્યામિ|
XVII તતો ઽનનિયો ગત્વા ગૃહં પ્રવિશ્ય તસ્ય ગાત્રે હસ્તાર્પ્રણં કૃત્વા કથિતવાન્, હે ભ્રાતઃ શૌલ ત્વં યથા દૃષ્ટિં પ્રાપ્નોષિ
પવિત્રેણાત્મના પરિપૂર્ણો ભવસિ ચ, તદર્થં તવાગમનકાલે યઃ પ્રભુયીશુસ્તુભ્યં દર્શનમ્ અદદાત્ સ માં પ્રેષિતવાન્|
XVIII ઇત્યુક્તમાત્રે તસ્ય ચક્ષુર્ભ્યામ્ મીનશલ્કવદ્ વસ્તુનિ નિર્ગતે તત્ક્ષણાત્ સ પ્રસન્નચક્ષુ ર્ભૂત્વા પ્રોત્થાય મજ્જિતોઽભવત્
ભુક્ત્વા પીત્વા સબલોભવચ્ચ|
XIX તતઃ પરં શૌલઃ શિષ્યૈઃ સહ કતિપયદિવસાન્ તસ્મિન્ દમ્મેષકનગરે સ્થિત્વાઽવિલમ્બં
XX સર્વ્વભજનભવનાનિ ગત્વા યીશુરીશ્વરસ્ય પુત્ર ઇમાં કથાં પ્રાચારયત્|
XXI તસ્માત્ સર્વ્વે શ્રોતારશ્ચમત્કૃત્ય કથિતવન્તો યો યિરૂશાલમ્નગર એતન્નામ્ના પ્રાર્થયિતૃલોકાન્ વિનાશિતવાન્ એવમ્
એતાદૃશલોકાન્ બદ્ધ્વા પ્રધાનયાજકનિકટં નયતીત્યાશયા એતત્સ્થાનમપ્યાગચ્છત્ સએવ કિમયં ન ભવતિ?
XXII કિન્તુ શૌલઃ ક્રમશ ઉત્સાહવાન્ ભૂત્વા યીશુરીશ્વરેણાભિષિક્તો જન એતસ્મિન્ પ્રમાણં દત્વા દમ્મેષક્-
નિવાસિયિહૂદીયલોકાન્ નિરુત્તરાન્ અકરોત્|
XXIII ઇત્થં બહુતિથે કાલે ગતે યિહૂદીયલોકાસ્તં હન્તું મન્ત્રયામાસુઃ
XXIV કિન્તુ શૌલસ્તેષામેતસ્યા મન્ત્રણાયા વાર્ત્તાં પ્રાપ્તવાન્| તે તં હન્તું તુ દિવાનિશં ગુપ્તાઃ સન્તો નગરસ્ય દ્વારેઽતિષ્ઠન્;
XXV તસ્માત્ શિષ્યાસ્તં નીત્વા રાત્રૌ પિટકે નિધાય પ્રાચીરેણાવારોહયન્|
XXVI તતઃ પરં શૌલો યિરૂશાલમં ગત્વા શિષ્યગણેન સાર્દ્ધં સ્થાતુમ્ ઐહત્, કિન્તુ સર્વ્વે તસ્માદબિભયુઃ સ શિષ્ય ઇતિ ચ ન
પ્રત્યયન્|
XXVII એતસ્માદ્ બર્ણબ્બાસ્તં ગૃહીત્વા પ્રેરિતાનાં સમીપમાનીય માર્ગમધ્યે પ્રભુઃ કથં તસ્મૈ દર્શનં દત્તવાન્ યાઃ કથાશ્ચ કથિતવાન્
સ ચ યથાક્ષોભઃ સન્ દમ્મેષક્નગરે યીશો ર્નામ પ્રાચારયત્ એતાન્ સર્વ્વવૃત્તાન્તાન્ તાન્ જ્ઞાપિતવાન્|
XXVIII તતઃ શૌલસ્તૈઃ સહ યિરૂશાલમિ કાલં યાપયન્ નિર્ભયં પ્રભો ર્યીશો ર્નામ પ્રાચારયત્|
XXIX તસ્માદ્ અન્યદેશીયલોકૈઃ સાર્દ્ધં વિવાદસ્યોપસ્થિતત્વાત્ તે તં હન્તુમ્ અચેષ્ટન્ત|
XXX કિન્તુ ભ્રાતૃગણસ્તજ્જ્ઞાત્વા તં કૈસરિયાનગરં નીત્વા તાર્ષનગરં પ્રેષિતવાન્|
XXXI ઇત્થં સતિ યિહૂદિયાગાલીલ્શોમિરોણદેશીયાઃ સર્વ્વા મણ્ડલ્યો વિશ્રામં પ્રાપ્તાસ્તતસ્તાસાં નિષ્ઠાભવત્ પ્રભો ર્ભિયા
પવિત્રસ્યાત્મનઃ સાન્ત્વનયા ચ કાલં ક્ષેપયિત્વા બહુસંખ્યા અભવન્|
XXXII તતઃ પરં પિતરઃ સ્થાને સ્થાને ભ્રમિત્વા શેષે લોદ્નગરનિવાસિપવિત્રલોકાનાં સમીપે સ્થિતવાન્|
XXXIII તદા તત્ર પક્ષાઘાતવ્યાધિનાષ્ટૌ વત્સરાન્ શય્યાગતમ્ ઐનેયનામાનં મનુષ્યં સાક્ષત્ પ્રાપ્ય તમવદત્,
XXXIV હે ઐનેય યીશુખ્રીષ્ટસ્ત્વાં સ્વસ્થમ્ અકાર્ષીત્, ત્વમુત્થાય સ્વશય્યાં નિક્ષિપ, ઇત્યુક્તમાત્રે સ ઉદતિષ્ઠત્|
XXXV એતાદૃશં દૃષ્ટ્વા લોદ્શારોણનિવાસિનો લોકાઃ પ્રભું પ્રતિ પરાવર્ત્તન્ત|
XXXVI અપરઞ્ચ ભિક્ષાદાનાદિષુ નાનક્રિયાસુ નિત્યં પ્રવૃત્તા યા યાફોનગરનિવાસિની ટાબિથાનામા શિષ્યા યાં દર્ક્કાં અર્થાદ્
હરિણીમયુક્ત્વા આહ્વયન્ સા નારી

XXXVII તસ્મિન્ સમયે રુગ્ના સતી પ્રાણાન્ અત્યજત્, તતો લોકાસ્તાં પ્રક્ષાલ્યોપરિસ્થપ્રકોષ્ઠે શાયયિત્વાસ્થાપયન્।
XXXVIII લોદ્ગરં યાફોનગરસ્ય સમીપસ્થં તસ્માત્તત્ર પિતર આસ્તે, ઇતિ વાર્ત્તાં શ્રુત્વા તૂર્ણં તસ્યાગમનાર્થં તસ્મિન્ વિનયમુક્ત્વા શિષ્યગણો દ્વૌ મનુજૌ પ્રેષિતવાન્।
XXXIX તસ્માત્ પિતર ઉત્થાય તાભ્યાં સાર્દ્ધમ્ આગચ્છત્, તત્ર તસ્મિન્ ઉપસ્થિત ઉપરિસ્થપ્રકોષ્ઠં સમાનીતે ચ વિધવાઃ સ્વાભિઃ સહ સ્થિતિકાલે દર્ક્કયા કૃતાનિ યાન્યુત્તરીયાણિ પરિધેયાનિ ચ તાનિ સર્વ્વાણિ તં દર્શયિત્વા રુદત્યશ્ચતસૃષુ દિક્ષ્વતિષ્ઠન્।
XL કિન્તુ પિતરસ્તાઃ સર્વ્વા બહિઃ કૃત્વા જાનુની પાતયિત્વા પ્રાર્થિતવાન્; પશ્ચાત્ શવં પ્રતિ દૃષ્ટિં કૃત્વા કથિતવાન્, હે ટાબીથે ત્વમુત્તિષ્ઠ, ઇતિ વાક્ય ઉક્તે સા સ્ત્રી ચક્ષુષી પ્રોન્મીલ્ય પિતરમ્ અવલોક્યોત્થાયોપાવિશત્।
XLI તતઃ પિતરસ્તસ્યાઃ કરૌ ધૃત્વા ઉત્તોલ્ય પવિત્રલોકાન્ વિધવાશ્ચાહૂય તેષાં નિકટે સજીવાં તાં સમાર્પયત્।
XLII એષા કથા સમસ્તયાફોનગરં વ્યાપ્તા તસ્માદ્ અનેકે લોકાઃ પ્રભૌ વ્યશ્વસન્।
XLIII અપરઞ્ચ પિતરસ્તદ્યાફોનગરીયસ્ય કસ્યચિત્ શિમોન્નામ્નશ્ચર્મ્મકારસ્ય ગૃહે બહુદિનાનિ ન્યવસત્।

# X

I કૈસરિયાનગર ઇતાલિયાખ્યસૈન્યાન્તર્ગતઃ કર્ણીલિયનામા સેનાપતિરાસીત્
II સ સપરિવારો ભક્ત ઈશ્વરપરાયણશ્ચાસીત્; લોકેભ્યો બહૂનિ દાનાદીનિ દત્વા નિરન્તરમ્ ઈશ્વરે પ્રાર્થયાઞ્ચક્રે।
III એકદા તૃતીયપ્રહરવેલાયાં સ દૃષ્ટવાન્ ઈશ્વરસ્યૈકો દૂતઃ સપ્રકાશં તત્સમીપમ્ આગત્ય કથિતવાન્, હે કર્ણીલિય।
IV કિન્તુ સ તં દૃષ્ટ્વા ભીતોઽકથયત્, હે પ્રભો કિં? તદા તમવદત્ તવ પ્રાર્થના દાનાદિ ચ સાક્ષિસ્વરૂપં ભૂત્વેશ્વરસ્ય ગોચરમભવત્।
V ઇદાનીં યાફોનગરં પ્રતિ લોકાન્ પ્રેષ્ય સમુદ્રતીરે શિમોન્નામ્નશ્ચર્મ્મકારસ્ય ગૃહે પ્રવાસકારી પિતરનામ્ના વિખ્યાતો યઃ શિમોન્ તમ્ આહ્વાયય;
VI તસ્માત્ ત્વયા યદ્યત્ કર્ત્તવ્યં તત્તત્ સ વદિષ્યતિ।
VII ઇત્યુપદિશ્ય દૂતે પ્રસ્થિતે સતિ કર્ણીલિયઃ સ્વગૃહસ્થાનાં દાસાનાં દ્વૌ જનૌ નિત્યં સ્વસઙ્ગિનાં સૈન્યાનામ્ એકાં ભક્તસેનાઞ્ચાહૂય
VIII સકલમેતં વૃત્તાન્તં વિજ્ઞાપ્ય યાફોનગરં તાન્ પ્રાહિણોત્।
IX પરસ્મિન્ દિને તે યાત્રાં કૃત્વા યદા નગરસ્ય સમીપ ઉપાતિષ્ઠન્, તદા પિતરો દ્વિતીયપ્રહરવેલાયાં પ્રાર્થયિતું ગૃહપૃષ્ઠમ્ આરોહત્।
X એતસ્મિન્ સમયે ક્ષુધાર્ત્તઃ સન્ કિઞ્ચિદ્ ભોક્તુમ્ ઐચ્છત્ કિન્તુ તેષામ્ અન્નાસાદનસમયે સ મૂર્ચ્છિતઃ સન્નપતત્।
XI તતો મેઘદ્વારં મુક્તં ચતુર્ભિઃ કોણૈ ર્લમ્બિતં બૃહદ્વસ્ત્રમિવ કિઞ્ચન ભાજનમ્ આકાશાત્ પૃથિવીમ્ અવારોહતીતિ દૃષ્ટવાન્।
XII તન્મધ્યે નાનપ્રકારા ગ્રામ્યવન્યપશવઃ ખેચરોરોગામિપ્રભૃતયો જન્તવશ્ચાસન્।
XIII અનન્તરં હે પિતર ઉત્થાય હત્વા ભુંક્ષ્વ તમ્પ્રતીયં ગગણીયા વાણી જાતા।
XIV તદા પિતરઃ પ્રત્યવદત્, હે પ્રભો ઈદૃશં મા ભવતુ, અહમ્ એતત્ કાલં યાવત્ નિષિદ્ધમ્ અશુચિ વા દ્રવ્યં કિઞ્ચિદપિ ન ભુક્તવાન્।
XV તતઃ પુનરપિ તાદૃશી વિહયસીયા વાણી જાતા યદ્ ઈશ્વરઃ શુચિ કૃતવાન્ તત્ ત્વં નિષિદ્ધં ન જાનીહિ।
XVI ઇત્થં ત્રિઃ સતિ તત્ પાત્રં પુનરાકૃષ્ટં આકાશમ્ અગચ્છત્।
XVII તતઃ પરં યદ્ દર્શનં પ્રાપ્તવાન્ તસ્ય કો ભાવ ઇત્યત્ર પિતરો મનસા સન્દેગ્ધિ, એતસ્મિન્ સમયે કર્ણીલિયસ્ય તે પ્રેષિતા મનુષ્યા દ્વારસ્ય સન્નિધાવુપસ્થાય,
XVIII શિમોનો ગૃહમન્વિચ્છન્તઃ સમ્પૃચ્છ્યાહૂય કથિતવન્તઃ પિતરનામ્ના વિખ્યાતો યઃ શિમોન્ સ કિમત્ર પ્રવસતિ?
XIX યદા પિતરસ્તદ્દર્શનસ્ય ભાવં મનસાન્દોલયતિ તદાત્મા તમવદત્, પશ્ય ત્રયો જનાસ્ત્વાં મૃગયન્તે।
XX ત્વમ્ ઉત્થાયાવરુહ્ય નિઃસન્દેહં તૈઃ સહ ગચ્છ મયૈવ તે પ્રેષિતાઃ।
XXI તસ્માત્ પિતરોઽવરુહ્ય કર્ણીલિયપ્રેરિતલોકાનાં નિકટમાગત્ય કથિતવાન્ પશ્યત યૂયં યં મૃગયધ્વે સ જનોહં, યૂયં કિન્નિમિત્તમ્ આગતાઃ?
XXII તતસ્તે પ્રત્યવદન્ કર્ણીલિયનામા શુદ્ધસત્ત્વ ઈશ્વરપરાયણો યિહૂદીયદેશસ્થાનાં સર્વ્વેષાં સન્નિધૌ સુખ્યાત્યાપન્ન એકઃ સેનાપતિ ર્નિજગૃહં ત્વામાહૂય નેતું ત્વત્તઃ કથા શ્રોતુઞ્ચ પવિત્રદૂતેન સમાદિષ્ટઃ।
XXIII તદા પિતરસ્તાનભ્યન્તરં નીત્વા તેષામાતિથ્યં કૃતવાન્, પરેઽહનિ તૈઃ સાર્દ્ધં યાત્રામકરોત્, યાફોનિવાસિનાં ભ્રાતૃણાં કિયન્તો જનાશ્ચ તેન સહ ગતાઃ।
XXIV પરસ્મિન્ દિવસે કૈસરિયાનગરમધ્યપ્રવેશસમયે કર્ણીલિયો જ્ઞાતિબન્ધૂન્ આહૂયાનીય તાન્ અપેક્ષ્ય સ્થિતઃ।
XXV પિતરે ગૃહ ઉપસ્થિતે કર્ણીલિયસ્તં સાક્ષાત્કૃત્ય ચરણયોઃ પતિત્વા પ્રાણમત્।
XXVI પિતરસ્તમુત્થાપ્ય કથિતવાન્, ઉત્તિષ્ઠાહમપિ માનુષઃ।
XXVII તદા કર્ણીલિયેન સાકમ્ આલપન્ ગૃહં પ્રાવિશત્ તન્મધ્યે ચ બહુલોકાનાં સમાગમં દૃષ્ટ્વા તાન્ અવદત્,
XXVIII અન્યજાતીયલોકૈઃ મહાલપનં વા તેષાં ગૃહમધ્યે પ્રવેશનં યિહૂદીયાનાં નિષિદ્ધમ્ અસ્તીતિ યૂયમ્ અવગચ્છથ; કિન્તુ કમપિ માનુષમ્ અવ્યવહાર્ય્યમ્ અશુચિં વા જ્ઞાતું મમ નોચિતમ્ ઇતિ પરમેશ્વરો માં જ્ઞાપિતવાન્।
XXIX ઇતિ હેતોરાહ્વાનશ્રવણમાત્રાત્ કાઞ્ચનાપત્તિમ્ અકૃત્વા યુષ્માકં સમીપમ્ આગતોસ્મિ; પૃચ્છામિ યૂયં કિન્નિમિત્તં મામ્ આહૂયત?
XXX તદા કર્ણીલિયઃ કથિતવાન્, અદ્ય ચત્વારિ દિનાનિ જાતાનિ એતાવદ્વેલાં યાવદ્ અહમ્ અનાહાર આસન્ તતસ્તૃતીયપ્રહરે સતિ ગૃહે પ્રાર્થનસમયે તેજોમયવસ્ત્રભૃદ્ એકો જનો મમ સમક્ષં તિષ્ઠન્ એતાં કથામ્ અકથયત્,
XXXI હે કર્ણીલિય ત્વદીયા પ્રાર્થના ઈશ્વરસ્ય કર્ણગોચરીભૂતા તવ દાનાદિ ચ સાક્ષિસ્વરૂપં ભૂત્વા તસ્ય દૃષ્ટિગોચરમભવત્।
XXXII અતો યાફોનગરં પ્રતિ લોકાન્ પ્રહિત્ય તત્ર સમુદ્રતીરે શિમોન્નામ્નઃ કસ્યચિચ્ચર્મ્મકારસ્ય ગૃહે પ્રવાસકારી પિતરનામ્ના વિખ્યાતો યઃ શિમોન્ તમાહૂ઼ાયય; તતઃ સ આગત્ય ત્વામ્ ઉપદેક્ષ્યતિ।
XXXIII ઇતિ કારણાત્ તત્ક્ષણાત્ તવ નિકટે લોકાન્ પ્રેષિતવાન્, ત્વમાગતવાન્ ઇતિ ભદ્રં કૃતવાન્। ઈશ્વરો યાન્યાખ્યાનાનિ કથયિતુમ્ આદિશત્ તાનિ શ્રોતું વયં સર્વ્વે સામ્પ્રતમ્ ઈશ્વરસ્ય સાક્ષાદ્ ઉપસ્થિતાઃ સ્મઃ।

XXXIV તદા પિતર ઇમાં કથાં કથયિતુમ્ આરબ્ધવાન્, ઈશ્વરો મનુષ્યાણામ્ અપક્ષપાતી સન્
XXXV યસ્ય કસ્યચિદ્ દેશસ્ય યો લોકાસ્તસ્માદ્ભીત્વા સત્કર્મ્મ કરોતિ સ તસ્ય ગ્રાહ્યો ભવતિ, એતસ્ય નિશ્ચયમ્ ઉપલબ્ધવાનહમ્|
XXXVI સર્વ્વેષાં પ્રભુ ર્યો યીશુખ્રીષ્ટસ્તેન ઈશ્વર ઇસ્રાયેલ્વંશાનાં નિકટે સુસંવાદં પ્રેષ્ય સમ્મેલનસ્ય યં સંવાદં પ્રાચારયત્ તં સંવાદં યૂયં શ્રુતવન્તઃ|
XXXVII યતો યોહના મજ્જને પ્રચારિતે સતિ સ ગાલીલદેશમારભ્ય સમસ્તયિહૂદીયદેશં વ્યાપ્નોત્;
XXXVIII ફલત ઈશ્વરેણ પવિત્રેણાત્મના શક્ત્યા ચાભિષિક્તો નાસરતીયયીશુઃ સ્થાને સ્થાને ભ્રમન્ સુક્રિયાં કુર્વ્વન્ શૈતાના ક્લિષ્ટાન્ સર્વ્વલોકાન્ સ્વસ્થાન્ અકરોત્, યત ઈશ્વરસ્તસ્ય સહાય આસીત્;
XXXIX વયઞ્ચ યિહૂદીયદેશે યિરૂશાલમ્નગરે ચ તેન કૃતાનાં સર્વ્વેષાં કર્મ્મણાં સાક્ષિણો ભવામઃ| લોકાસ્તં ક્રુશે વિદ્ધ્વા હતવન્તઃ,
XL કિન્તુ તૃતીયદિવસે ઈશ્વરસ્તમુત્થાપ્ય સપ્રકાશમ્ અદર્શયત્|
XLI સર્વ્વલોકાનાં નિકટ ઇતિ ન હિ, કિન્તુ તસ્મિન્ શ્મશાનાદુત્થિતે સતિ તેન સાર્દ્ધં ભોજનં પાનઞ્ચ કૃતવન્ત એતાદૃશા ઈશ્વરસ્ય મનોનીતાઃ સાક્ષિણો યે વયમ્ અસ્માકં નિકટે તમદર્શયત્|
XLII જીવિતમૃતોભયલોકાનાં વિચારં કર્ત્તુમ્ ઈશ્વરો યં નિયુક્તવાન્ સ એવ સ જનઃ, ઇમાં કથાં પ્રચારયિતું તસ્મિન્ પ્રમાણં દાતુઞ્ચ સોઽસ્માન્ આજ્ઞાપયત્|
XLIII યસ્તસ્મિન્ વિશ્વસિતિ સ તસ્ય નામ્ના પાપાન્મુક્તો ભવિષ્યતિ તસ્મિન્ સર્વ્વે ભવિષ્યદ્વાદિનોપિ એતાદૃશં સાક્ષ્યં દદતિ|
XLIV પિતરસ્યૈતત્કથાકથનકાલે સર્વ્વેષાં શ્રોતૃણામુપરિ પવિત્ર આત્માવારોહત્|
XLV તતઃ પિતરેણ સાર્દ્ધમ્ આગતાસ્ત્વક્છેદિનો વિશ્વાસિનો લોકા અન્યદેશીયેભ્યઃ પવિત્ર આત્મનિ દત્તે સતિ
XLVI તે નાનાજાતીયભાષાભિઃ કથાં કથયન્ત ઈશ્વરં પ્રશંસન્તિ, ઇતિ દૃષ્ટ્વા શ્રુત્વા ચ વિસ્મયમ્ આપદ્યન્ત|
XLVII તદા પિતરઃ કથિતવાન્, વયમિવ યે પવિત્રમ્ આત્માનં પ્રાપ્તાસ્તેષાં જલમજ્જનં કિં કોપિ નિષેદ્ધું શક્નોતિ?
XLVIII તતઃ પ્રભો ર્નામ્ના મજ્જિતા ભવતેતિ તાનાજ્ઞાપયત્| અનન્તરં તે સ્વૈઃ સાર્દ્ધં કતિપયદિનાનિ સ્થાતું પ્રાર્થયન્ત|

# XI

I ઇત્થં ભિન્નદેશીયલોકા અપીશ્વરસ્ય વાક્યમ્ અગૃહ્લન્ ઇમાં વાર્ત્તાં યિહૂદીયદેશસ્થપ્રેરિતા ભ્રાતૃગણશ્ચ શ્રુતવન્તઃ|
II તતઃ પિતરે યિરૂશાલમ્નગરં ગતવતિ ત્વક્છેદિનો લોકાસ્તેન સહ વિવદમાના અવદન્,
III ત્વમ્ અત્વક્છેદિલોકાનાં ગૃહં ગત્વા તૈઃ સાર્દ્ધં ભુક્તવાન્|
IV તતઃ પિતર આદિતઃ ક્રમશસ્તત્કાર્ય્યસ્ય સર્વ્વવૃત્તાન્તમાખ્યાતુમ્ આરબ્ધવાન્|
V યાફોનગર એકદાહં પ્રાર્થયમાનો મૂર્ચ્છિતઃ સન્ દર્શનેન ચતુર્ષુ કોણેષુ લમ્બનમાનં વૃહદ્વસ્ત્રમિવ પાત્રમેકમ્ આકાશદવરુહ્ય મન્નિકટમ્ આગચ્છદ્ અપશ્યમ્|
VI પશ્ચાત્ તદ્ અનન્યદૃષ્ટ્યા દૃષ્ટ્વા વિવિચ્ય તસ્ય મધ્યે નાનાપ્રકારાન્ ગ્રામ્યવન્યપશૂન્ ઉરોગામિખેચરાંશ્ચ દૃષ્ટવાન્;
VII હે પિતર ત્વમુત્થાય ગત્વા ભુંક્ષ્વ માં સમ્બોધ્ય કથયન્તં શબ્દમેકં શ્રુતવાંશ્ચ|
VIII તતોહં પ્રત્યવદં, હે પ્રભો નેત્થં ભવતુ, યતઃ કિઞ્ચન નિષિદ્ધમ્ અશુચિ દ્રવ્યં વા મમ મુખમધ્યં કદાપિ ન પ્રાવિશત્|
IX અપરમ્ ઈશ્વરો યત્ શુચિ કૃતવાન્ તન્નિષિદ્ધં ન જાનીહિ દ્વિ ર્મામ્પ્રતીદૃશી વિહાયસીયા વાણી જાતા|
X ત્રિરિત્થં સતિ તત્ સર્વ્વં પુનરાકાશમ્ આકૃષ્ટં|
XI પશ્ચાત્ કૈસરિયાનગરાત્ ત્રયો જના મન્નિકટં પ્રેષિતા યત્ર નિવેશને સ્થિતોહં તસ્મિન્ સમયે તત્રોપાતિષ્ઠન્|
XII તદા નિઃસન્દેહં તૈઃ સાર્દ્ધં યાતુમ્ આત્મા મામાદિષ્ટવાન્; તતઃ પરં મયા સહૈતેષુ ષડ્ભ્રાતૃષુ ગતેષુ વયં તસ્ય મનુજસ્ય ગૃહં પ્રાવિશામ|
XIII સોસ્માકં નિકટે કથામેતામ્ અકથયત્ એકદા દૂત એકઃ પ્રત્યક્ષીભૂય મમ ગૃહમધ્યે તિષ્ટન્ મામિત્યાજ્ઞાપિતવાન્, યાફોનગરં પ્રતિ લોકાન્ પ્રહિત્ય પિતરનામ્ના વિખ્યાતં શિમોનમ્ આહૂયય;
XIV તતસ્તવ ત્વદીયપરિવારાણાઞ્ચ યેન પરિત્રાણં ભવિષ્યતિ તત્ સ ઉપદેક્ષ્યતિ|
XV અહં તાં કથામુત્થાપ્ય કથિતવાન્ તેન પ્રથમમ્ અસ્માકમ્ ઉપરિ યથા પવિત્ર આત્માવરૂઢવાન્ તથા તેષામપ્યુપરિ સમવરૂઢવાન્|
XVI તેન યોહન્ જલે મજ્જિતવાન્ ઇતિ સત્યં કિન્તુ યૂયં પવિત્ર આત્મનિ મજ્જિતા ભવિષ્યથ, ઇતિ યદ્વાક્યં પ્રભુરુદિતવાન્ તત્ તદા મયા સ્મૃતમ્|
XVII અતઃ પ્રભા યીશુખ્રીષ્ટે પ્રત્યયકારિણો યે વયમ્ અસ્મભ્યમ્ ઈશ્વરો યદ્ દત્તવાન્ તત્ તેભ્યો લોકેભ્યોપિ દત્તવાન્ તતઃ કોહં? કિમહમ્ ઈશ્વરં વારયિતું શક્નોમિ?
XVIII કથામેતાં શ્રુત્વા તે ક્ષાન્તા ઈશ્વરસ્ય ગુણાન્ અનુકીર્త્త્ય કથિતવન્તઃ, તર્હિ પરમાયુઃપ્રાપ્તિનિમિત્તમ્ ઈશ્વરોન્યદેશીયલોકેભ્યોપિ મનઃપરિવર્ત્તનરૂપં દાનમ્ અદાત્|
XIX સ્તિફાનં પ્રતિ ઉપદ્રવે ઘટિતે યે વિકીર્ણા અભવન્ તૈ ર્ફૈનીકીકુપ્રાન્તિયખિયાસુ ભ્રમિત્વા કેવલયિહૂદીયલોકાન્ વિના કસ્યાપ્યન્યસ્ય સમીપ ઈશ્વરસ્ય કથાં ન પ્રાચારયન્|
XX અપરં તેષાં કુપ્રીયાઃ કુરીનીયાશ્ચ કિયન્તો જના આન્તિયખિયાનગરં ગત્વા યૂનાનીયલોકાનાં સમીપેપિ પ્રભોર્યીશોઃ કથાં પ્રાચારયન્|
XXI પ્રભોઃ કરસ્તેષાં સહાય આસીત્ તસ્માદ્ અનેકે લોકા વિશ્વસ્ય પ્રભું પ્રતિ પરાવર્ત્તન્ત|
XXII ઇતિ વાર્ત્તાયાં યિરૂશાલમસ્થમણ્ડલીયલોકાનાં કર્ણગોચરીભૂતાયામ્ આન્તિયખિયાનગરં ગન્તુ તે બર્ણબ્બાં પ્રૈરયન્|
XXIII તતો બર્ણબ્બાસ્તત્ર ઉપસ્થિતઃ સન્ ઈશ્વરસ્યાનુગ્રહસ્ય ફલં દૃષ્ટ્વા સાનન્દો જાતઃ,
XXIV સ સ્વયં સાધુ ર્વિશ્વાસેન પવિત્રેણાત્મના ચ પરિપૂર્ણઃ સન્ ગનોનિષ્ટયા પ્રભાવાસ્થાં કર્ત્તું સર્વ્વાન્ ઉપદિષ્ટવાન્ તેન પ્રભોઃ શિષ્યા અનેકે બભૂવુઃ|
XXV શેષે શૌલં મૃગયિતું બર્ણબ્બાસ્તાર્ષનગરં પ્રસ્થિતવાન્| તત્ર તસ્યોદ્દેશં પ્રાપ્ય તમ્ આન્તિયખિયાનગરમ્ આનયત્;

XXVI તતસ્તૌ મણ્ડલીસ્થલોકૈઃ સભાં કૃત્વા સંવત્સરમેકં યાવદ્ બહુલોકાન્ ઉપાદિશતાં; તસ્મિન્ આન્તિયખિયાનગરે શિષ્યાઃ પ્રથમં ખ્રીષ્ટીયનામ્ના વિખ્યાતા અભવન્།

XXVII તતઃ પરં ભવિષ્યદ્વાદિગણે યિરૂશાલમ આન્તિયખિયાનગરમ્ આગતે સતિ

XXVIII આગાબનામા તેષામેક ઉત્થાય આત્મનઃ શિક્ષયા સર્વ્વદેશે દુર્ભિક્ષં ભવિષ્યતીતિ જ્ઞાપિતવાન્; તતઃ ક્લૌદિયકૈસરસ્યાધિકારે સતિ તત્ પ્રત્યક્ષમ્ અભવત્།

XXIX તસ્માત્ શિષ્યા એકૈકશઃ સ્વસ્વશક્ત્યનુસારતો યિહૂદીયદેશનિવાસિનાં ભ્રતૃણાં દિનયાપનાર્થં ધનં પ્રેષયિતું નિશ્ચિત્ય

XXX બર્ણબ્બાશૌલયો ર્દ્વારા પ્રાચીનલોકાનાં સમીપં તત્ પ્રેષિતવન્તઃ।

# XII

I તસ્મિન્ સમયે હેરોદ્રાજો મણ્ડલ્યાઃ કિયજ્જનેભ્યો દુઃખં દાતું પ્રારભત્།

II વિશેષતો યોહનઃ સોદરં યાકૂબં કરવાલાઘાતેન્ હતવાન્།

III તસ્માદ્ યિહૂદીયાઃ સન્તુષ્ટા અભવન્ ઇતિ વિજ્ઞાય સ પિતરમપિ ધર્ત્તું ગતવાન્།

IV તદા કિણ્વશૂન્યપૂપોત્સવસમય ઉપાતિષ્ટત્; અત ઉત્સવે ગતે સતિ લોકાનાં સમક્ષં તં બહિરાનેય્યામીતિ મનસિ સ્થિરીકૃત્ય સ તં ધારયિત્વા રક્ષણાર્થમ્ યેષામ્ એકૈકસંઘે ચત્વારો જનાઃ સન્તિ તેષાં ચતુર્ણાં રક્ષકસંઘાનાં સમીપે તં સમર્પ્ય કારાયાં સ્થાપિતવાન્།

V કિન્તું પિતરસ્ય કારાસ્થિતિકારણાત્ મણ્ડલ્યા લોકા અવિશ્રામમ્ ઈશ્વરસ્ય સમીપે પ્રાર્થયન્ત।

VI અનન્તરં હેરોદિ તં બહિરાનાયિતું ઉદ્યતે સતિ તસ્યાં રાત્રૌ પિતરો રક્ષકદ્વયમધ્યસ્થાને શૃઙ્ખલદ્વયેન બદ્ધ્વઃ સન્ નિદ્રિત આસીત્, દૌવારિકાશ્ચ કારાયાઃ સમ્મુખે તિષ્ઠનતો દ્વારમ્ અરક્ષિષુઃ।

VII એતસ્મિન્ સમયે પરમેશ્વરસ્ય દૂતે સમુપસ્થિતે કારા દીપ્તિમતી જાતા; તતઃ સ દૂતઃ પિતરસ્ય કુક્ષાવાવાતં કૃત્વા તં જાગરયિત્વા ભાષિતવાન્ તૂર્ણમુત્તિષ્ઠ; તતસ્તસ્ય હસ્તસ્થશૃઙ્ખલદ્વયં ગલત્ પતિતં।

VIII સ દૂતસ્તમવદત્, બદ્ધકટિઃ સન્ પાદયોઃ પાદુકે અર્પય; તેન તથા કૃતે સતિ દૂતસ્તમ્ ઉક્તવાન્ ગાત્રીયવસ્ત્રં ગાત્રે નિધાય મમ પશ્ચાદ્ એહિ।

IX તતઃ પિતરસ્તસ્ય પશ્ચાદ્ વ્રજન બહિરગચ્છત્, કિન્તુ દૂતેન કર્મ્મૈતત્ કૃતમિતિ સત્યમજ્ઞાત્વા સ્વપ્નદર્શનં જ્ઞાતવાન્།

X ઇત્થં તૌ પ્રથમાં દ્વિતીયાઞ્ચ કારાં લઙ્ઘિત્વા યેન લૌહનિર્મ્મિતદ્વારેણ નગરં ગમ્યતે તત્સમીપં પ્રાપ્નુતાં; તતસ્તસ્ય કવાટં સ્વયં મુક્તમભવત્ તતસ્તૌ તત્સ્થાનાદ્ બહિ ર્ભૂત્વા માર્ગૈકસ્ય સીમાં યાવદ્ ગતૌ; તતોઽકસ્માત્ સ દૂતઃ પિતરં ત્યક્તવાન્།

XI તદા સ ચેતનાં પ્રાપ્ય કથિતવાન્ નિજદૂતં પ્રહિત્ય પરમેશ્વરો હેરોદો હસ્તાદ્ યિહૂદીયલોકાનાં સર્વ્વાશાયાશ્ચ માં સમુદ્ધૃતવાન્ ઇત્યહં નિશ્ચયં જ્ઞાતવાન્།

XII સ વિવિચ્ય માર્કનામ્ના વિખ્યાતસ્ય યોહનો માતુ ર્મરિયમો યસ્મિન્ ગૃહે બહવઃ સમ્ભૂય પ્રાર્થયન્ત તન્નિવેશનં ગતઃ।

XIII પિતરેણ બહિર્દ્વાર આહતે સતિ રોદાનામા બાલિકા દ્રષ્ટું ગતા।

XIV તતઃ પિતરસ્ય સ્વરં શ્રુત્વા સા હર્ષયુક્તા સતી દ્વારં ન મોચયિત્વા પિતરો દ્વારે તિષ્ઠતીતિ વાર્ત્તાં વક્તુમ્ અભ્યન્તરં ધાવિત્વા ગતવતી।

XV તે પ્રાવોચન્ ત્વમુન્મત્તા જાતાસિ કિન્તુ સા મુહુર્મુહુરુક્તવતી સત્યમેવૈતત્།

XVI તદા તે કથિતવન્તસ્તર્હિ તસ્ય દૂતો ભવેત્།

XVII પિતરો દ્વારમાહતવાન્ એતસ્મિન્નન્તરે દ્વારં મોચયિત્વા પિતરં દૃષ્ટ્વા વિસ્મયં પ્રાપ્તાઃ।

XVIII તતઃ પિતરો નિઃશબ્દં સ્થાતું તાન્ પ્રતિ હસ્તેન સઙ્કેતં કૃત્વા પરમેશ્વરો યેન પ્રકારેણ તં કારાયા ઉદ્ધૃત્યાનીતવાન્ તસ્ય વૃત્તાન્તં તાનજ્ઞાપયત્, યૂયં ગત્વા યાકુબં ભ્રાતૃગણઞ્ચ વાર્ત્તામેતાં વદતેત્યુક્તા સ્થાનાન્તરં પ્રસ્થિતવાન્།

XIX પ્રભાતે સતિ પિતરઃ ક્વ ગત ઇત્યત્ર રક્ષકાણાં મધ્યે મહાન્ કલહો જાતઃ।

XX હેરોદ્ બહુ મૃગયિત્વા તસ્યોદ્દેશે ન પ્રાપ્તે સતિ રક્ષકાન્ સંપૃચ્છ્ય તેષાં પ્રાણાન્ હન્તુમ્ આદિષ્ટવાન્།

XXI પશ્ચાત્ સ યિહૂદીયપ્રદેશાત્ કૈસરિયાનગરં ગત્વા તત્રાવાતિષ્ઠત્།

XXII સોરસીદોનદેશયો ર્લોકેભ્યો હેરોદિ યુયુત્સૌ સતિ તે સર્વ્વ એકમન્ત્રણાઃ સન્તસ્તસ્ય સમીપ ઉપસ્થાય લ્વાસ્તનામાનં તસ્ય વસ્ત્રગૃહાધીશં સહાયં કૃત્વા હેરોદા સાર્દ્ધં સન્ધિં પ્રાર્થયન્ત યતસ્તસ્ય રાજ્ઞો દેશેન તેષાં દેશીયાનાં ભરણમ્ અભવત્

XXIII અતઃ કુત્રચિન્ નિરુપિતદિને હેરોદ્ રાજકીયં પરિચ્છદં પરિધાય સિંહાસને સમુપવિશ્ય તાન્ પ્રતિ કથામ્ ઉક્તવાન્།

XXIV તતો લોકા ઉચ્ચૈઃકારં પ્રત્યવદન્, એષ મનુજરવો ન હિ, ઈશ્વરીયરવઃ।

XXV તદા હેરોદ્ ઈશ્વરસ્ય સમ્માનં નાકરોત્; તસ્માદ્ધેતોઃ પરમેશ્વરસ્ય દૂતો હઠાત્ તં પ્રાહરત્ તેનૈવ સ કીટૈઃ ક્ષીણઃ સન્ પ્રાણાન્ અજહાત્། કિન્ત્વીશ્વરસ્ય કથા દેશં વ્યાપ્ય પ્રબલાભવત્། તતઃ પરં બર્ણબ્બાશૌલૌ યસ્ય કર્મ્મણો ભારં પ્રાપ્નુતાં તાભ્યાં તસ્મિન્ સમ્પાદિતે સતિ માર્કનામ્ના વિખ્યાતો યો યોહન્ તં સઙ્ગિનં કૃત્વા યિરૂશાલમ્નગરાત્ પ્રત્યાગતૌ।

# XIII

I અપરઞ્ચ બર્ણબ્બાઃ, શિમોન્ યં નિગ્રં વદન્તિ, કુરીનીયલૂકિયો હેરોદા રાજ્ઞા સહ કૃતવિદ્યાભ્યાસો મિનહેમ્, શૌલશ્ચૈતે યે કિયન્તો જના ભવિષ્યદ્વાદિન ઉપદેષ્ટારશ્ચાન્તિયખિયાનગરસ્થમણ્ડલ્યામ્ આસન્,

II તે યદોપવાસં કૃત્વેશ્વરમ્ અસેવન્ત તસ્મિન્ સમયે પવિત્ર આત્મા કથિતવાન્ અહં યસ્મિન્ કર્મ્મણિ બર્ણબ્બાશૌલૌ નિયુક્તવાન્ તત્કર્મ્મ કર્ત્તું તૌ પૃથક્ કુરુત।

III તતસ્તૈરુપવાસપ્રાર્થનયોઃ કૃતયોઃ સતોસ્તે તયો ર્ગાત્રયો ર્હસ્તાર્પણં કૃત્વા તૌ વ્યસૃજન્།

IV તતઃ પરં તૌ પવિત્રેણાત્મના પ્રેરિતૌ સન્તૌ સિલૂકિયાનગરમ્ ઉપસ્થાય સમુદ્રપથેન કુપ્રોપદ્વીપમ્ અગચ્છતાં।

V તતઃ સાલામીનગરમ્ ઉપસ્થાય તત્ર યિહૂદીયાનાં ભજનભવનાનિ ગત્વેશ્વરસ્ય કથાં પ્રાચારયતાં; યોહનપિ તત્સહચરોઽભવત્།

VI ઇત્થં તે તસ્યોપદ્વીપસ્ય સર્વ્વત્ર ભ્રમન્તઃ પાફનગરમ્ ઉપસ્થિતાઃ; તત્ર સુવિવેચકેન સર્જિયપૌલનામ્ના તદ્દેશાધિપતિના સહ ભવિષ્યદ્વાદિનો વેશધારી બર્યીશુનામા યો માયાવી યિહૂદી આસીત્ તં સાક્ષાત્ પ્રાપ્તવતઃ।
VII તદ્દેશાધિપ ઈશ્વરસ્ય કથાં શ્રોતું વાઞ્છન્ પૌલબર્ણબ્બૌ ન્યમન્ત્રયત્।
VIII કિન્ત્વિલુમા યં માયાવિનં વદન્તિ સ દેશાધિપતિં ધર્મ્મમાર્ગાદ્ બહિર્ભૂતં કર્ત્તુમ્ અયતત।
IX તસ્માત્ શોલોઽર્થાત્ પૌલઃ પવિત્રેણાત્મના પરિપૂર્ણઃ સન્ તં માયાવિનં પ્રત્યનન્યદૃષ્ટિં કૃત્વાકથયત્,
X હે નરકિન્ ધર્મ્મદ્વેષિન્ કૌટિલ્યદુષ્કર્મ્મપરિપૂર્ણ, ત્વં કિં પ્રભોઃ સત્યપથસ્ય વિપર્ય્યયકરણાત્ કદાપિ ન નિવર્ત્તિષ્યસે?
XI અધુના પરમેશ્વરસ્તવ સમુચિતં કરિષ્યતિ તેન કતિપયદિનાનિ ત્વમ્ અન્ધઃ સન્ સૂર્ય્યમપિ ન દ્રક્ષ્યસિ। તત્ક્ષણાદ્ રાત્રિવદ્ અન્ધકારસ્તસ્ય દૃષ્ટિમ્ આચ્છાદિતવાન્; તસ્માત્ તસ્ય હસ્તં ધર્ત્તું સ લોકમન્વિચ્છન્ ઇતસ્તતો ભ્રમણં કૃતવાન્।
XII એનાં ઘટનાં દૃષ્ટ્વા સ દેશાધિપતિઃ પ્રભૂપદેશાદ્ વિસ્મિત્ય વિશ્વાસં કૃતવાન્।
XIII તદનન્તરં પૌલસ્તત્સઙ્ગિનૌ ચ પાફનગરાત્ પ્રોતં ચાલયિત્વા પમ્ફુલિયાદેશસ્ય પર્ગીનગરમ્ અગચ્છન્ કિન્તુ યોહન્ તયોઃ સમીપાદ્ એત્ય યિરૂશાલમં પ્રત્યાગચ્છત્।
XIV પશ્ચાત્ તૌ પર્ગીતો યાત્રાં કૃત્વા પિસિદિયાદેશસ્ય આન્તિયખિયાનગરમ્ ઉપસ્થાય વિશ્રામવારે ભજનભવનં પ્રવિશ્ય સમુપાવિશતાં।
XV વ્યવસ્થાભવિષ્યદ્વાક્યયોઃ પઠિતયોઃ સતો ર્હે ભ્રાતરૌ લોકાન્ પ્રતિ યુવયોઃ કાચિદ્ ઉપદેશકથા યદ્યસ્તિ તર્હિ તાં વદતં તૌ પ્રતિ તસ્ય ભજનભવનસ્યાધિપતયઃ કથામ્ એતાં કથયિત્વા પ્રૈષયન્।
XVI અતઃ પૌલ ઉત્તિષ્ઠન્ હસ્તેન સઙ્કેતં કુર્વ્વન્ કથિતવાન્ હે ઇસ્રાયેલીયમનુષ્યા ઈશ્વરપરાયણાઃ સર્વ્વે લોકા યૂયમ્ અવધદ્ધં।
XVII એતેષામિસ્રાયેલ્લોકાનામ્ ઈશ્વરોઽસ્માકં પૂર્વ્વપરુષાન્ મનોનીતાન્ કત્વા ગૃહીતવાન્ તતો મિસરિ દેશે પ્રવસનકાલે તેષામુન્નતિં કૃત્વા તસ્માત્ સ્વીયબાહુબલેન તાન્ બહિઃ કૃત્વા સમાનયત્।
XVIII ચત્વારિંશદ્વત્સરાન્ યાવચ્ચ મહાપ્રાન્તરે તેષાં ભરણં કૃત્વા
XIX કિનાન્દેશાન્તર્વ્વર્ત્તીણિ સપ્તરાજ્યાનિ નાશયિત્વા ગુટિકાપાતેન તેષુ સર્વ્વદેશેષુ તેભ્યોઽધિકારં દત્તવાન્।
XX પઞ્ચાશદધિકચતુઃશતેષુ વત્સરેષુ ગતેષુ ચ શિમૂયેલ્ભવિષ્યદ્વાદિપર્ય્યન્તં તેષામુપરિ વિચારયિતૃન્ નિયુક્તવાન્।
XXI તૈશ્ચ રાજ્ઞિ પ્રાર્થિતે, ઈશ્વરો બિન્યામીનો વંશજાતસ્ય કીશઃ પુત્રં શૌલં ચત્વારિંશદ્વર્ષપર્ય્યન્તં તેષામુપરિ રાજાનં કૃતવાન્।
XXII પશ્ચાત્ તં પદચ્યુતં કૃત્વા યો મદિષ્ટક્રિયાઃ સર્વ્વાઃ કરિષ્યતિ તાદૃશં મમ મનોભિમતમ્ એકં જનં યિશયઃ પુત્રં દાયૂદં પ્રાપ્તવાન્ ઇદં પ્રમાણં યસ્મિન્ દાયૂદિ સ દત્તવાન્ તં દાયૂદં તેષામુપરિ રાજત્વં કર્ત્તુમ્ ઉત્પાદિતવાન।
XXIII તસ્ય સ્વપ્રતિશ્રુતસ્ય વાક્યસ્યાનુસારેણ ઇસ્રાયેલ્લોકાનાં નિમિત્તં તેષાં મનુષ્યાણાં વંશાદ્ ઈશ્વર એકં યીશું (ત્રાતારમ્) ઉદપાદયત્।
XXIV તસ્ય પ્રકાશનાત્ પૂર્વ્વં યોહન્ ઇસ્રાયેલ્લોકાનાં સન્નિધૌ મનઃપરાવર્ત્તનરૂપં મજ્જનં પ્રાચારયત્।
XXV યસ્ય ચ કર્મ્મણો◌ે ભારં પ્રપ્તવાન્ યોહન્ તન્ નિષ્પાદયન્ એતાં કથાં કથિતવાન્, યૂયં માં કં જનં જાનીથ? અહમ્ અભિષિક્તત્રાતા નહિ, કિન્તુ પશ્યત યસ્ય પાદયોઃ પાદુકયો ર્બન્ધને મોચયિતુમપિ યોગ્યો ન ભવામિ તાદૃશ એકો જનો મમ પશ્ચાદ્ ઉપતિષ્ઠતિ।
XXVI હે ઇબ્રાહીમો વંશજાતા ભ્રાતરો હે ઈશ્વરભીતાઃ સર્વ્વલોકા યુષ્માન્ પ્રતિ પરિત્રાણસ્ય કથૈષા પ્રેરિતા।
XXVII યિરૂશાલમ્નિવાસિનસ્તેષામ્ અધિપતયશ્ચ તસ્ય યીશોઃ પરિચયં ન પ્રાપ્ય પ્રતિવિશ્રામવારં પઠ્યમાનાનાં ભવિષ્યદ્વાદિકથાનામ્ અભિપ્રાયમ્ અબુદ્ધ્વા ચ તસ્ય વધેન તાઃ કથાઃ સફલા અકુર્વ્વન્।
XXVIII પ્રાણહનનસ્ય કમપિ હેતુમ્ અપ્રાપ્યાપિ પીલાતસ્ય નિકટે તસ્ય વધં પ્રાર્થયન્ત।
XXIX તસ્મિન્ યાઃ કથા લિખિતાઃ સન્તિ તદનુસારેણ કર્મ્મ સમ્પાદ્ય તં ક્રુશાદ્ અવતાર્ય્ય શ્મશાને શાયિતવન્તઃ।
XXX કિન્ત્વીશ્વરઃ શ્મશાનાત્ તમુદસ્થાપયત્,
XXXI પુનશ્ચ ગાલીલપ્રદેશાદ્ યિરૂશાલમનગરં તેન સાર્દ્ધં યે લોકા આગચ્છન્ સ બહુદિનાનિ તેભ્યો દર્શનં દત્તવાન્, અતસ્ત ઇદાનીં લોકાન્ પ્રતિ તસ્ય સાક્ષિણઃ સન્તિ।
XXXII અસ્માકં પૂર્વ્વપુરુષાણાં સમક્ષમ્ ઈશ્વરો યસ્મિન્ પ્રતિજ્ઞાતવાન્ યથા, ત્વં મે પુત્રોસિ ચાદ્ય ત્વાં સમુત્થાપિતવાનહમ્।
XXXIII ઇદં યદ્વચનં દ્વિતીયગીતે લિખિતમાસ્તે તદ્ યીશોરુત્થાનેન તેષાં સન્તાના યે વયમ્ અસ્માકં સન્નિધૌ તેન પ્રત્યક્ષી કૃતં, યુષ્માન્ ઇમં સુસંવાદં જ્ઞાપયામિ।
XXXIV પરમેશ્વરેણ શ્મશાનાદ્ ઉત્થાપિતં તદીયં શરીરં કદાપિ ન ક્ષેષ્યતે, એતસ્મિન્ સ સ્વયં કથિતવાન્ યથા દાયૂદં પ્રતિ પ્રતિજ્ઞાતો યો વરસ્તમહં તુભ્યં દાસ્યામિ।
XXXV એતદન્યસ્મિન્ ગીતેઽપિ કથિતવાન્। સ્વકીયં પુણ્યવન્તં ત્વં ક્ષયિતું ન ચ દાસ્યસિ।
XXXVI દાયૂદા ઈશ્વરાભિમતસેવાયૈ નિજાયુષિ વ્યયિતે સતિ સ મહાનિદ્રાં પ્રાપ્ય નિજૈઃ પૂર્વ્વપુરુષૈઃ સહ મિલિતઃ સન્ અક્ષીયત;
XXXVII કિન્તુ યમીશ્વરઃ શ્મશાનાદ્ ઉદસ્થાપયત્ સ નાક્ષીયત।
XXXVIII અતો હે ભ્રાતરઃ, અનેન જનેન પાપમોચનં ભવતીતિ યુષ્માન્ પ્રતિ પ્રચારિતમ્ આસ્તે।
XXXIX ફલતો મૂસાવ્યવસ્થયા યૂયં યેભ્યો દોષેભ્યો મુક્તા ભવિતું ન શક્ષ્યથ તેભ્યઃ સર્વ્વદોષેભ્ય એતસ્મિન્ જને વિશ્વાસિનઃ સર્વ્વે મુક્તા ભવિષ્યન્તીતિ યુષ્માભિ ર્જ્ઞાયતાં।
XL અપરઞ્ચ। અવજ્ઞાકારિણો લોકાશ્ચક્ષુરુન્મીલ્ય પશ્યત। તથૈવાસમ્ભવં જ્ઞાત્વા સ્યાત યૂયં વિલજ્જિતાઃ। યતો યુષ્માસુ તિષ્ઠત્સુ કરિષ્યે કર્મ્મ તાદૃશં। યેનૈવ તસ્ય વૃત્તાન્તે યુષ્મભ્યં કથિતેઽપિ હિ। યૂયં ન તન્તુ વૃત્તાન્તં પ્રત્યેષ્યથ કદાચન।।
XLI યેયં કથા ભવિષ્યદ્વાદિનાં ગ્રન્થેષુ લિખિતાસ્તે સાવધાના ભવત સ કથા યથા યુષ્માન્ પ્રતિ ન ઘટતે।
XLII યિહૂદીયભજનભવનાન્ નિર્ગતયોસ્તયો ર્ભિન્નદેશીયૈ ર્વક્ષ્યમાણા પ્રાર્થના કૃતા, આગામિનિ વિશ્રામવારેઽપિ કથેયમ્ અસ્માન્ પ્રતિ પ્રચારિતા ભવત્વિતિ।

XLIII સભાયા ભઙ્ગે સતિ બહવો યિહૂદીયલોકા યિહૂદીયમતગ્રાહિણો ભક્તલોકાશ્ચ બર્ણબ્બાપૌલયોઃ પશ્ચાદ્ આગચ્છન્, તેન તૌ તૈઃ સહ નાનાકથાઃ કથયિત્વેશ્વરાનુગ્રહાશ્રયે સ્થાતું તાન્ પ્રાવર્ત્તયતાં|

XLIV પરવિશ્રામવારે નગરસ્ય પ્રાયેણ સર્વ્વે લાકા ઈશ્વરીયાં કથાં શ્રોતું મિલિતાઃ,

XLV કિન્તુ યિહૂદીયલોકા જનનિવહં વિલોક્ય ઈર્ષ્યયા પરિપૂર્ણાઃ સન્તો વિપરીતકથાકથનેનેશ્વરનિન્દયા ચ પૌલેનોક્તાં કથાં ખણ્ડયિતું ચેષ્ટિતવન્તઃ|

XLVI તતઃ પૌ◌ેલબર્ણબ્બાવક્ષોભૌ કથિતવન્તૌ પ્રથમં યુષ્માકં સન્નિધાવીશ્વરીયકથાયાઃ પ્રચારણમ્ ઉચિતમાસીત્ કિન્તું તદગ્રાહ્યત્વકરણેન યૂયં સ્વાન્ અનન્તાયુષોઽયોગ્યાન્ દર્શયથ, એતત્કારણાદ્ વયમ્ અન્યદેશીયલોકાનાં સમીપં ગચ્છામઃ|

XLVII પ્રભુરસ્માન્ ઇત્થમ્ આદિષ્ટવાન્ યથા, યાવચ્ચ જગતઃ સીમાં લોકાનાં ત્રાણકારણાત્| મયાન્યદેશમધ્યે ત્વં સ્થાપિતો ભૂઃ પ્રદીપવત્||

XLVIII તદા કથામીદૃશીં શ્રુત્વા ભિન્નદેશીયા આહ્લાદિતાઃ સન્તઃ પ્રભોઃ કથાં ધન્યાં ધન્યામ્ અવદન્, યાવન્તો લોકાશ્ચ પરમાયુઃ પ્રાપ્તિનિમિત્તં નિરૂપિતા આસન્ તે◌ે વ્યશ્વસન્|

XLIX ઇત્થં પ્રભોઃ કથા સર્વ્વદેશં વ્યાપ્નોત્|

L કિન્તુ યિહૂદીયા નગરસ્ય પ્રધાનપુરુષાન્ સમ્માન્યાઃ કથિપયા ભક્તા યોષિતશ્ચ કુપ્રવૃત્તિં ગ્રાહયિત્વા પૌલબર્ણબ્બૌ તાડયિત્વા તસ્માત્ પ્રદેશાદ્ દૂરીકૃતવન્તઃ|

LI અતઃ કારણાત્ તૌ નિજપદધૂલીસ્તેષાં પ્રાતિકૂલ્યેન પાતયિત્વે◌ેકનિયં નગરં ગતૌ|

LII તતઃ શિષ્યગણ આનન્દેન પવિત્રેણાત્મના ચ પરિપૂર્ણોભવત્|

# XIV

I તૌ દ્વૌ જનૌ યુગપદ્ ઇકનિયનગરસ્થયિહૂદીયાનાં ભજનભવનં ગત્વા યથા બહવો યિહૂદીયા અન્યદે◌ેશીયલોકાશ્ચ વ્યશ્વસન્ તાદૃશીં કથાં કથિતવન્તૌ|

II કિન્તુ વિશ્વાસહીના યિહૂદીયા અન્યદેશીયલોકાન્ કુપ્રવૃત્તિં ગ્રાહયિત્વા ભ્રાતૃગણં પ્રતિ તેષાં વૈરં જનિતવન્તઃ|

III અતઃ સ્વાનુગ્રહકથાયાઃ પ્રમાણં દત્વા તયો ર્હસ્તૈ ર્બહુલક્ષણમ્ અદ્ભુતકર્મ્મ ચ પ્રાકાશયદ્ યઃ પ્રભુસ્તસ્ય કથા અક્ષોભેન પ્રચાર્ય્ય તૌ તત્ર બહુદિનાનિ સમવાતિષ્ઠેતાં|

IV કિન્તુ કિયન્તો લોકા યિહૂદીયાનાં સપક્ષાઃ કિયન્તો લોકાઃ પ્રેરિતાનાં સપક્ષા જાતાઃ, અતો નાગરિકજનનિવહમધ્યે ભિન્નવાક્યત્વમ્ અભવત્|

V અન્યદેશીયા યિહૂદીયાસ્તેષામ્ અધિપતયશ્ચ દૌરાત્મ્યં કુત્વા તૌ પ્રસ્તરૈરાહન્તુમ્ ઉદ્યતાઃ|

VI તૌ તદ્વાર્ત્તાં પ્રાપ્ય પલાયિત્વા લુકાયનિયાદેશસ્યાન્તર્વ્વર્ત્તિલુસ્ત્રાદર્બ્બો

VII તત્સમીપસ્થદેશઞ્ચ ગત્વા તત્ર સુસંવાદં પ્રચારયતાં|

VIII તત્રોભયપાદયોશ્ચલનશક્તિહીનો જન્મારભ્ય ખઞ્જઃ કદાપિ ગમનં નાકરોત્ એતાદૃશ એકો માનુષો લુસ્ત્રાનગર ઉપવિશ્ય પૌલસ્ય કથાં શ્રુતવાન્|

IX એતસ્મિન્ સમયે પૌલસ્તમ્પ્રતિ દૃષ્ટિં કૃત્વા તસ્ય સ્વાસ્થ્યે વિશ્વાસં વિદિત્વા પ્રોચ્ચૈઃ કથિતવાન્

X પદ્ભ્યામુત્તિષ્ઠન્ ઋજુ ર્ભવ| તતઃ સ ઉલ્લમ્ફં કૃત્વા ગમનાગમને કુતવાન્|

XI તદા લોકાઃ પૌલસ્ય તત્ કાર્ય્યં વિલોક્ય લુકાયનીયભાષયા પ્રોચ્ચૈઃ કથામેતાં કથિતવન્તઃ, દેવા મનુષ્યરૂપં ધૃત્વાસ્માકં સમીપમ્ અવારોહન્|

XII તે બર્ણબ્બાં યૂપિતરમ્ અવદન્ પૌલશ્ચ મુખ્યો વક્તા તસ્માત્ તં મર્કુરિયમ્ અવદન્|

XIII તસ્ય નગરસ્ય સમ્મુખે સ્થાપિતસ્ય યૂપિતરવિગ્રહસ્ય યાજકો વૃષાન્ પુષ્પમાલાશ્ચ દ્વારસમીપમ્ આનીય લોકૈઃ સર્દ્ધં તાવુદ્દિશ્ય સમુત્સૃજ્ય દાતુમ્ ઉદ્યતઃ|

XIV તદ્વાર્ત્તાં શ્રુત્વા બર્ણબ્બાપૌલૌ સ્વીયવસ્ત્રાણિ છિત્વા લોકાનાં મધ્યં વેગેન પ્રવિશ્ય પ્રોચ્ચૈઃ કથિતવન્તૌ,

XV હે મહેચ્છાઃ કુત એતાદૃશં કર્મ્મ કુરુથ? આવામપિ યુષ્માદૃશૌ સુખદુઃખભોગિનૌ મનુષ્યૌ, યુયમ્ એતાઃ સર્વ્વા વૃથાકલ્પનાઃ પરિત્યજ્ય યથા ગગણવસુન્ધરાજલનિધીનાં તન્મધ્યસ્થાનાં સર્વ્વેષાઞ્ચ સ્રષ્ટારમમરમ્ ઈશ્વરં પ્રતિ પરાવર્ત્તધ્વે તદર્થમ્ આવાં યુષ્માકં સન્નિધૌ સુસંવાદં પ્રચારયાવઃ|

XVI સ ઈશ્વરઃ પૂર્વ્વકાલે સર્વ્વદેશીયલોકાન્ સ્વસ્વમાર્ગે ચલિતુમનુમતિં દત્તવાન્,

XVII તથાપિ આકાશાત્ તોયવર્ષણેન નાનાપ્રકારશસ્યોત્પત્યા ચ યુષ્માકં હિતૈષી સન્ ભક્ષ્યૈરાનનદેન ચ યુષ્માકમ્ અન્તઃકરણાનિ તર્પયન્ તાનિ દાનાનિ નિજસાક્ષિસ્વરૂપાણિ સ્થપિતવાન્|

XVIII કિન્તુ તાદૃશાયાં કથાયાં કથિતાયામપિ તયોઃ સમીપ ઉત્સર્જનાત્ લોકનિવહં પ્રાયેણ નિવર્ત્તયિતું નાશક્નુતામ્|

XIX આન્તિયખિયા-ઇકનિયનગરાભ્યાં કતિપયયિહૂદીયલોકા આગત્ય લોકાન્ પ્રાવર્ત્તયન્ત તસ્માત્ તૈ પૌલં પ્રસ્તરૈરાઘ્નન્ તેન સ મૃત ઇતિ વિજ્ઞાય નગરસ્ય બહિસ્તમ્ આકૃષ્ય નીતવન્તઃ|

XX કિન્તુ શિષ્યગણે તસ્ય ચતુર્દિશિ તિષ્ઠતિ સતિ સ સ્વયમ્ ઉત્થાય પુનરપિ નગરમધ્યં પ્રાવિશત્ તત્પરેઽહનિ બર્ણબ્બાસહિતો દર્બ્બીનગરં ગતવાન્|

XXI તત્ર સુસંવાદં પ્રચાર્ય્ય બહુલોકાન્ શિષ્યાન્ કૃત્વા તૌ લુસ્ત્રામ્ ઇકનિયમ્ આન્તિયખિયાઞ્ચ પરાવૃત્ય ગતૌ|

XXII બહુદુઃખાનિ ભુક્ત્વાપીશ્વરરાજ્યં પ્રવેષ્ટવ્યમ્ ઇતિ કારણાદ્ ધર્મ્મમાર્ગે સ્થાતું વિનયં કૃત્વા શિષ્યગણસ્ય મનઃસ્થૈર્ય્યમ્ અકુરુતાં|

XXIII મણ્ડલીનાં પ્રાચીનવર્ગાન્ નિયુજ્ય પ્રાર્થનોપવાસૌ કૃત્વા યત્પ્રભૌ તે વ્યશ્વસન્ તસ્ય હસ્તે તાન્ સમર્પ્ય

XXIV પિસિદિયામધ્યેન પામ્ફુલિયાદેશં ગતવન્તૌ|

XXV પશ્ચાત્ પર્ગાનગરં ગત્વા સુસંવાદં પ્રચાર્ય્ય અત્તાલિયાનગરં પ્રસ્થિતવન્તૌ|
XXVI તસ્માત્ સમુદ્રપથેન ગત્વા તાભ્યાં યત્ કર્મ્મ સમ્પન્નં તત્કર્મ્મ સાધયિતું યન્નગરે દયાલોરીશ્વરસ્ય હસ્તે સમર્પિતૌ જાતૌ તદ્ આન્તિયખિયાનગરં ગતવન્તૌ|
XXVII તત્રોપસ્થાય તન્નગરસ્થમણ્ડલીં સંગૃહ્ય સ્વાભ્યામ ઈશ્વરો યદ્યત્ કર્મ્મકરોત્ તથા યેન પ્રકારેણ ભિન્નદેશીયલોકાન્ પ્રતિ વિશ્વાસરૂપદ્વારમ્ અમોચયદ્ એતાન્ સર્વ્વવૃત્તાન્તાન્ તાન્ જ્ઞાપિતવન્તૌ|
XXVIII તતસ્તૌ શિર્ષ્યૈઃ સાર્દ્ધં તત્ર બહુદિનાનિ ન્યવસતામ્|

# XV

I યિહૂદાદેશાત્ કિયન્તો જના આગત્ય ભ્રાતૃગણમિત્થં શિક્ષિતવન્તો મૂસાવ્યવસ્થયા યદિ યુષ્માકં ત્વક્છેદો ન ભવતિ તર્હિ યૂયં પરિત્રાણં પ્રાપ્તું ન શક્ષ્યથ|
II પૌલબર્ણબ્બૌ તૈઃ સહ બહૂન્ વિચારાન્ વિવાદાંશ્ચ કૃતવન્તૌ, તતો મણ્ડલીયનોકા એતસ્યાઃ કથાયાસ્તત્ત્વં જ્ઞાતું યિરૂશાલમ્નગરસ્થાન્ પ્રેરિતાન્ પ્રાચીનાંશ્ચ પ્રતિ પૌલબર્ણબ્બાપ્રભૃતીન્ કતિપયજનાન્ પ્રેષયિતું નિશ્ચયં કૃતવન્તઃ|
III તે મણ્ડલ્યા પ્રેરિતાઃ સન્તઃ ફૈણીકીશોમિરોન્દેશાભ્યાં ગત્વા ભિન્નદેશીયાનાં મનઃપરિવર્ત્તનસ્ય વાર્ત્તયા ભ્રાતૃણાં પરમાહ્લાદમ્ અજનયન્|
IV યિરૂશાલમ્યુપસ્થાય પ્રેરિતગણેન લોકપ્રાચીનગણેન સમાજેન ચ સમુપગૃહીતાઃ સન્તઃ સ્વૈરીશ્વરો યાનિ કર્મ્માણિ કૃતવાન્ તેષાં સર્વ્વવૃત્તાન્તાન્ તેષાં સમક્ષમ્ અકથયન્|
V કિન્તુ વિશ્વાસિનઃ કિયન્તઃ ફિરૂશિમતગ્રાહિણો લોકા ઉત્થાય કથામેતાં કથિતવન્તો ભિન્નદેશીયાનાં ત્વક્છેદં કર્ત્તું મૂસાવ્યવસ્થાં પાલયિતુઞ્ચ સમાદેષ્ટવ્યમ્|
VI તતઃ પ્રેરિતા લોકપ્રાચીનાશ્ચ તસ્ય વિવેચનાં કર્ત્તું સભાયાં સ્થિતવન્તઃ|
VII બહુવિચારેષુ જાતષુ પિતર ઉત્થાય કથિતવાન્, હે ભ્રાતરો યથા ભિન્નદેશીયલોકા મમ મુખાત્ સુસંવાદં શ્રુત્વા વિશ્વસન્તિ તદર્થં બહુદિનાત્ પૂર્વ્વમ્ ઈશ્વરોસ્માકં મધ્યે માં વૃત્વા નિયુક્તવાન્|
VIII અન્તર્ય્યામીશ્વરો યથાસ્મભ્યં તથા ભિન્નદેશીયેભ્યઃ પવિત્રમાત્માનં પ્રદાય વિશ્વાસેન તેષામ્ અન્તઃકરણાનિ પવિત્રાણિ કૃત્વા
IX તેષામ્ અસ્માકઞ્ચ મધ્યે કિમપિ વિશેષં ન સ્થાપયિત્વા તાનધિ સ્વયં પ્રમાણં દત્તવાન્ ઇતિ યૂયં જાનીથ|
X અતએવાસ્માકં પૂર્વ્વપુરુષા વયઞ્ચ સ્વયં યદ્યુગસ્ય ભારં સોઢું ન શક્તાઃ સમ્પ્રતિ તં શિષ્યગણસ્ય સ્કન્ધેષુ ન્યસિતું કુત ઈશ્વરસ્ય પરીક્ષાં કરિષ્યથ?
XI પ્રભો ર્યીશુખ્રીષ્ટસ્યાનુગ્રહેણ તે યથા વયમપિ તથા પરિત્રાણં પ્રાપ્તુમ્ આશાં કુર્મ્મઃ|
XII અનન્તરં બર્ણબ્બાપૌલાભ્યામ્ ઈશ્વરો ભિન્નદેશીયાનાં મધ્યે યદ્યદ્ આશ્ચર્ય્યમ્ અદ્ભુતઞ્ચ કર્મ્મ કૃતવાન્ તદ્વૃત્તાન્તં તૌ સ્વમુખાભ્યામ્ અવર્ણયતાં સભાસ્થાઃ સર્વ્વે નીરવાઃ સન્તઃ શ્રુતવન્તઃ|
XIII તયોઃ કથાયાં સમાપ્તાયાં સત્યાં યાકૂબ્ કથયિતુમ્ આરબ્ધવાન્
XIV હે ભ્રાતરો મમ કથાયામ્ મનો નિધત્ત| ઈશ્વરઃ સ્વનામાર્થં ભિન્નદેશીયલોકાનામ્ મધ્યાદ્ એકં લોકસંઘં ગ્રહીતું મતિં કૃત્વા યેન પ્રકારેણ પ્રથમં તાન્ પ્રતિ કૃપાવલેકનં કૃતવાન્ તં શિમોન્ વર્ણિતવાન્|
XV ભવિષ્યદ્વાદિભિરુક્તાનિ યાનિ વાક્યાનિ તૈઃ સાર્દ્ધમ્ એતસ્યૈક્યં ભવતિ યથા લિખિતમાસ્તે|
XVI સર્વ્વેષાં કર્મ્મણાં યસ્તુ સાધકઃ પરમેશ્વરઃ| સ એવેદં વદેદ્વાક્યં શેષાઃ સકલમાનવાઃ| ભિન્નદેશીયલોકાશ્ચ યાવન્તો મમ નામતઃ| ભવન્તિ હિ સુવિખ્યાતાસ્તે યથા પરમેશિતુઃ|
XVII તત્વં સમ્યક્ સમીહન્તે તન્નિમિત્તમહં કિલ| પરાવૃત્ય સમાગત્ય દાયૂદઃ પતિતં પુનઃ| દૂષ્યમુત્થાપયિષ્યામિ તદીયં સર્વ્વવસ્તુ ચ| પતિતં પુનરુથાપ્ય સજ્જયિષ્યામિ સર્વ્વથા||
XVIII આ પ્રથમાદ્ ઈશ્વરઃ સ્વીયાનિ સર્વ્વકર્મ્માણિ જાનાતિ|
XIX અતએવ મમ નિવેદનમિદં ભિન્નદેશીયલોકાનાં મધ્યે યે જના ઈશ્વરં પ્રતિ પરાવર્ત્તન્ત તેષામુપરિ અન્યં કમપિ ભારં ન ન્યસ્ય
XX દેવતાપ્રસાદાશુચિભક્ષ્યં વ્યભિચારકર્મ્મ કણ્ઠસમ્પીડનમારિતપ્રાણિભક્ષ્યં રક્તભક્ષ્યઞ્ચ એતાનિ પરિત્યક્તું લિખામઃ|
XXI યતઃ પૂર્વ્વકાલતો મૂસાવ્યવસ્થાપ્રચારિણો લોકા નગરે નગરે સન્તિ પ્રતિવિશ્રામવારઞ્ચ ભજનભવને તસ્યાઃ પાઠો ભવતિ|
XXII તતઃ પરં પ્રેરિતગણો લોકપ્રાચીનગણઃ સર્વ્વા મણ્ડલી ચ સ્વેષાં મધ્યે બર્શબ્બા નામ્ના વિખ્યાતો મનોનીતૌ કૃત્વા પૌલબર્ણબ્બાભ્યાં સાર્દ્ધમ્ આન્તિયખિયાનગરં પ્રતિ પ્રેષણમ્ ઉચિતં બુદ્ધ્વા તાભ્યાં પત્રં પ્રૈષયન્|
XXIII તસ્મિન્ પત્રે લિખિતમિદં, આન્તિયખિયા-સુરિયા-કિલિકિયાદેશસ્થભિન્નદેશીયભ્રાતૃગણાય પ્રેરિતગણસ્ય લોકપ્રાચીનગણસ્ય ભ્રાતૃગણસ્ય ચ નમસ્કારઃ|
XXIV વિશેષતોઽસ્માકમ્ આજ્ઞામ્ અપ્રાપ્યાપિ કિયન્તો જના અસ્માકં મધ્યાદ્ ગત્વા ત્વક્છેદો મૂસાવ્યવસ્થા ચ પાલયિતવ્યાવિતિ યુષ્માન્ શિક્ષયિત્વા યુષ્માકં મનસામસ્થૈર્ય્યં કૃત્વા યુષ્માન્ સસન્દેહાન્ અકુર્વ્વન્ એતાં કથાં વયમ્ અશૃન્મ|
XXV તત્કારણાદ્ વયમ્ એકમન્ત્રણાઃ સન્તઃ સભાયાં સ્થિત્વા પ્રભો ર્યીશુખ્રીષ્ટસ્ય નામનિમિત્તં મૃત્યુમુખગતાભ્યામસ્માકં
XXVI પ્રિયબર્ણબ્બાપૌલાભ્યાં સાર્દ્ધં મનોનીતલોકાનાં કેષાઞ્ચિદ્ યુષ્માકં સન્નિધૌ પ્રેષણમ્ ઉચિતં બુદ્ધવન્તઃ|
XXVII અતો યિહૂદાસીલૌ યુષ્માન્ પ્રતિ પ્રેષિતવન્તઃ, એતયો ર્મુખાભ્યાં સર્વ્વાં કથાં જ્ઞાસ્યથ|
XXVIII દેવતાપ્રસાદભક્ષ્યં રક્તભક્ષ્યં ગલપીડનમારિતપ્રાણિભક્ષ્યં વ્યભિચારકર્મ્મ ચેમાનિ સર્વ્વાણિ યુષ્માભિસ્ત્યાજ્યાનિ; એતત્પ્રયોજનીયાજ્ઞાવ્યતિરેકેન યુષ્માકમ્ ઉપરિ ભારમન્યં ન ન્યસિતું પવિત્રસ્યાત્મનોઽસ્માકઞ્ચ ઉચિતજ્ઞાનમ્ અભવત્|
XXIX અતએવ તેભ્યઃ સર્વ્વેભ્યઃ સ્વેષુ રક્ષિતેષુ યૂયં ભદ્રં કર્મ્મ કરિષ્યથ| યુષ્માકં મઙ્ગલં ભૂયાત્|
XXX તે ◌ વિસૃષ્ટાઃ સન્ત આન્તિયખિયાનગર ઉપસ્થાય લોકનિવહં સંગૃહ્ય પત્રમ્ અદદન્|
XXXI તતસ્તે તત્પત્રં પઠિત્વા સાન્ત્વનાં પ્રાપ્ય સાનન્દા અભવન્|

XXXII યિહૂદાસીલૌ ચ સ્વયં પ્રચારકૌ ભૂત્વા ભ્રાતૃગણં નાનોપદિશ્ય તાન્ સુસ્થિરાન્ અકુરુતામ્|
XXXIII ઇત્થં તૌ તત્ર તૈઃ સાકં કતિપયદિનાનિ યાપયિત્વા પશ્ચાત્ પ્રેરિતાનાં સમીપે પ્રત્યાગમનાર્થં તેષાં સન્નિધેઃ કલ્યાણેન
વિસૃષ્ટાવભવતાં|
XXXIV કિન્તુ સીલસ્તત્ર સ્થાતું વાઞ્છિતવાન્|
XXXV અપરં પૌલબર્ણબ્બૌ બહવઃ શિષ્યાશ્ચ લોકાન્ ઉપદિશ્ય પ્રભોઃ સુસંવાદં પ્રચારયન્ત આન્તિયખિયાયાં કાલં યાપિતવન્તઃ|
XXXVI કતિપયદિનેષુ ગતેષુ પૌલો બર્ણબ્બામ્ અવદત્ આગચ્છાવાં યેષુ નગરેષ્વીશ્વરસ્ય સુસંવાદં પ્રચારિતવન્તૌ તાનિ
સર્વ્વનગરાણિ પુનર્ગત્વા ભ્રાતરઃ કીદૃશાઃ સન્તીતિ દ્રષ્ટું તાન્ સાક્ષાત્ કુર્વ્વઃ|
XXXVII તેન માર્કનામ્ના વિખ્યાતં યોહનં સઙ્ગિનં કર્ત્તું બર્ણબ્બા મતિમકરોત્,
XXXVIII કિન્તુ સ પૂર્વ્વં તાભ્યાં સહ કાર્ય્યાર્થં ન ગત્વા પામ્ફૂલિયાદેશે તૌ ત્યક્તવાન્ તત્કારણાત્ પૌલસ્તં સઙ્ગિનં કર્ત્તુમ્ અનુચિતં
જ્ઞાતવાન્|
XXXIX ઇત્થં તયોરતિશયવિરોધસ્યોપસ્થિતત્વાત્ તૌ પરસ્પરં પૃથગભવતાં તતો બર્ણબ્બા માર્કં ગૃહીત્વા પોતેન કુપ્રોપદ્વીપં
ગતવાન્;
XL કિન્તુ પૌલઃ સીલં મનોનીતં કૃત્વા ભ્રાતૃભિરીશ્વરાનુગ્રહે સમર્પિતઃ સન્ પ્રસ્થાય
XLI સુરિયાકિલિકિયાદેશાભ્યાં મણ્ડલીઃ સ્થિરીકુર્વ્વન્ અગચ્છત્|

# XVI

I પૌલો દર્ब્બીલુસ્ત્રાનગરયોરુપસ્થિતોભવત્ તત્ર તીમથિયનામા શિષ્ય એક આસીત્; સ વિશ્વાસિન્યા યિહૂદીયાયા યોષિતો
ગર્ब્ભજાતઃ કિન્તુ તસ્ય પિતાન્યદેશીયલોકઃ|
II સ જનો લુસ્ત્રા-ઇકનિયનગરસ્થાનાં ભ્રાતૃણાં સમીપેપિ સુખ્યાતિમાન્ આસીત્|
III પૌલસ્તં સ્વસઙ્ગિનં કર્ત્તું મતિં કૃત્વા તં ગૃહીત્વા તદ્દેશનિવાસિનાં યિહૂદીયાનામ્ અનુરોધાત્ તસ્ય ત્વક્છેદં કૃતવાન્ યતસ્તસ્ય
પિતા ભિન્નદેશીયલોક ઇતિ સર્વ્વૈરજ્ઞાયત|
IV તતઃ પરં તે નગરે નગરે ભ્રમિત્વા યિરૂશાલમસ્થૈઃ પ્રેરિતૈ ર્લોકપ્રાચીનૈશ્ચ નિરૂપિતં યદ્ વ્યવસ્થાપત્રં તદનુસારેણાચરિતું
લોકેભ્યસ્તદ્ દત્તવન્તઃ|
V તેનૈવ સર્વ્વે ધર્મ્મસમાજાઃ ખ્રીષ્ટધર્મ્મે સુસ્થિરાઃ સન્તઃ પ્રતિદિનં વર્દ્ધિતા અભવન્|
VI તેષુ ફ્રુગિયાગાલાતિયાદેશમધ્યેન ગતેષુ સત્સુ પવિત્ર આત્મા તાન્ આશિયાદેશે કથાં પ્રકાશયિતું પ્રતિષિદ્ધવાન્|
VII તથા મુસિયાદેશ ઉપસ્થાય બિથુનિયાં ગન્તું તૈરુદ્યોગે કૃતે આત્મા તાન્ નાન્વમન્યત|
VIII તસ્માત્ તે મુસિયાદેશં પરિત્યજ્ય ત્રોયાનગરં ગત્વા સમુપસ્થિતાઃ|
IX રાત્રૌ પૌલઃ સ્વપ્ને દૃષ્ટવાન્ એકો માકિદનિયલોકસ્તિષ્ઠન્ વિનયં કૃત્વા તસ્મૈ કથયતિ, માકિદનિયાદેશમ્ આગત્યાસ્માન્
ઉપકુર્વ્વિતિ|
X તસ્યેત્થં સ્વપ્નદર્શનાત્ પ્રભુસ્તદ્દેશીયલોકાન્ પ્રતિ સુસંવાદં પ્રચારયિતુમ્ અસ્માન્ આહૂયતીતિ નિશ્ચિતં બુદ્ધ્વા વયં તૂર્ણં
માકિદનિયાદેશં ગન્તુમ્ ઉદ્યોગમ્ અકુર્મ્મ|
XI તતઃ પરં વયં ત્રોયાનગરાદ્ પ્રસ્થાય ઋજુમાર્ગેણ સામથ્રાકિયોપદ્વીપેન ગત્વા પરેઽહનિ નિયાપલિનગર ઉપસ્થિતાઃ|
XII તસ્માદ્ ગત્વા માકિદનિયાન્તર્વ્વર્ત્તિ રોમીયવસતિસ્થાનં યત્ ફિલિપીનામપ્રધાનનગરં તત્રોપસ્થાય કતિપયદિનાનિ તત્ર
સ્થિતવન્તઃ|
XIII વિશ્રામવારે નગરાદ્ બહિ ર્ગત્વા નદીતટે યત્ર પ્રાર્થનાચાર આસીત્ તત્રોપવિશ્ય સમાગતા નારીઃ પ્રતિ કથાં પ્રાચારયામ|
XIV તતઃ થુયાતીરાનગરીયા ધૂષરામ્બરવિક્રાયિણી લુદિયાનામિકા યા ઈશ્વરસેવિકા યોષિત્ શ્રોત્રીણાં મધ્ય આસીત્ તયા
પૌલોક્તવાક્યાનિ યદ્ ગૃહ્યન્તે તદર્થં પ્રભુસ્તસ્યા મનોદ્વારં મુક્તવાન્|
XV અતઃ સા યોષિત્ સપરિવારા મજ્જિતા સતી વિનયં કૃત્વા કથિતવતી, યુષ્માકં વિચારાદ્ યદિ પ્રભૌ વિશ્વાસિની જાતાહં તર્હિ
મમ ગૃહમ્ આગત્ય તિષ્ઠત| ઇત્થં સા યત્નેનાસ્માન્ અસ્થાપયત્|
XVI યસ્યા ગણનયા તદધિપતીનાં બહુધનોપાર્જનં જાતં તાદૃશી ગણકભૂતગ્રસ્તા કાચન દાસી પ્રાર્થનાસ્થાનગમનકાલ
આગત્યાસ્માન્ સાક્ષાત્ કૃતવતી|
XVII સાસ્માકં પૌલસ્ય ચ પશ્ચાદ્ એત્ય પ્રોચ્ચૈઃ કથામિમાં કથિતવતી, મનુષ્યા એતે સર્વ્વોપરિસ્થસ્યેશ્વરસ્ય સેવકાઃ સન્તોઽસ્માન્
પ્રતિ પરિત્રાણસ્ય માર્ગં પ્રકાશયન્તિ|
XVIII સા કન્યા બહુદિનાનિ તાદૃશમ્ અકરોત્ તસ્માત્ પૌલો દુઃખિતઃ સન્ મુખં પરાવર્ત્ય તં ભૂતમવદદ્, અહં યીશુખ્રીષ્ટસ્ય નામ્ના
ત્વામાજ્ઞાપયામિ ત્વમસ્યા બહિર્ગચ્છ; તેનૈવ તત્ક્ષણાત્ સ ભૂતસ્તસ્યા બહિર્ગતઃ|
XIX તતઃ સ્વેષાં લાભસ્ય પ્રત્યાશા વિફલા જાતેતિ વિલોક્ય તસ્યાઃ પ્રભવઃ પૌલં સીલઞ્ચ ધૃત્વાકૃષ્ય વિચારસ્થાનેઽધિપતીનાં
સમીપમ્ આનયન્|
XX તતઃ શાસકાનાં નિકટં નીત્વા રોમિલોકા વયમ્ અસ્માકં યદ્ વ્યવહરણં ગ્રહીતુમ્ આચરિતુઞ્ચ નિષિદ્ધં,
XXI ઇમે યિહૂદીયલોકાઃ સન્તોપિ તદેવ શિક્ષયિત્વા નગરેઽસ્માકમ્ અતીવ કલહં કુર્વ્વન્તિ,
XXII ઇતિ કથિતે સતિ લોકનિવહસ્તયોઃ પ્રાતિકૂલ્યેનોદતિષ્ઠત્ તથા શાસકાસ્તયો ર્વસ્ત્રાણિ છિત્વા વેત્રાઘાતં કર્ત્તુમ્ આજ્ઞાપયન્|
XXIII અપરં તે તૌ બહુ પ્રહાર્ય્ય ત્વમેતૌ કારાં નીત્વા સાવધાનં રક્ષયેતિ કારારક્ષકમ્ આદિશન્|
XXIV ઇત્થમ્ આજ્ઞાં પ્રાપ્ય સ તાવભ્યન્તરસ્થકારાં નીત્વા પાદેષુ પાદપાશીભિ ર્બદ્ધ્વા સ્થાપિતાવાન્|
XXV અથ નિશીથસમયે પૌલસીલાવીશ્વરમુદ્દિશ્ય પ્રાથનાં ગાનઞ્ચ કૃતવન્તૌ, કારાસ્થિતા લોકાશ્ચ તદશૃણ્વન્
XXVI તદાકસ્માત્ મહાન્ ભૂમિકમ્પોઽભવત્ તેન ભિત્તિમૂલેન સહ કારા કમ્પિતાભૂત્ તત્ક્ષણાત્ સર્વ્વાણિ દ્વારાણિ મુક્તાનિ
જાતાનિ સર્વ્વેષાં બન્ધનાનિ ચ મુક્તાનિ|

XXVII અતએવ કારારક્ષકો નિદ્રાતો જાગરિત્વા કારાયા દ્વારાણિ મુક્તાનિ દૃષ્ટ્વા બન્દિલોકાઃ પલાયિતા ઇત્યનુમાય કોષાત્ ખઙ્ગં બહિઃ કૃત્વાત્મઘાતં કર્ત્તુમ્ ઉદ્યતઃ।

XXVIII કિન્તુ પૌલઃ પ્રોચ્ચૈસ્તમાહૂય કથિતવાન્ પશ્ય વયં સર્વ્વેઽત્રાસ્મહે, ત્વં નિજપ્રાણહિંસાં માકાર્ષીઃ।

XXIX તદા પ્રદીપમ્ આનેતુમ્ ઉક્ત્વા સ કમ્પમાનઃ સન્ ઉલ્લમ્પ્યાભ્યન્તરમ્ આગત્ય પૌલસીલયોઃ પાદેષુ પતિતવાન્।

XXX પશ્ચાત્ સ તૌ બહિરાનીય પૃષ્ટવાન્ હે મહેચ્છૌ પરિત્રાણં પ્રાપ્તું મયા કિં કર્ત્તવ્યં?

XXXI પશ્ચાત્ તૌ સ્વગૃહમાનીય તયોઃ સમ્મુખે ખાદ્યદ્રવ્યાણિ સ્થાપિતવાન્ તથા સ સ્વયં તદીયાઃ સર્વ્વે પરિવારાશ્ચેશ્વરે વિશ્વસન્તઃ સાનન્દિતા અભવન્।

XXXII તસ્મૈ તસ્ય ગૃહસ્થિતસર્વ્વલોકેભ્યશ્ચ પ્રભોઃ કથાં કથિતવન્તૌ।

XXXIII તથા રાત્રેસ્તસ્મિન્નેવ દણ્ડે સ તૌ ગૃહીત્વા તયોઃ પ્રહારાણાં ક્ષતાનિ પ્રક્ષાલિતવાન્ તતઃ સ સ્વયં તસ્ય સર્વ્વે પરિજનાશ્ચ મજ્જિતા અભવન્।

XXXIV પશ્ચાત્ તૌ સ્વગૃહમાનીય તયોઃ સમ્મુખે ખાદ્યદ્રવ્યાણિ સ્થાપિતવાન્ તથા સ સ્વયં તદીયાઃ સર્વ્વે પરિવારાશ્ચેશ્વરે વિશ્વસન્તઃ સાનન્દિતા અભવન્।

XXXV દિન ઉપસ્થિતે તૌ લોકૌ મોચયેતિ કથાં કથયિતું શાસકાઃ પદાતિગણં પ્રેષિતવન્તઃ।

XXXVI તતઃ કારારક્ષકઃ પૌલાય તાં વાર્ત્તાં કથિતવાન્ યુવાં ત્યાજયિતું શાસકા લોકાન પ્રેષિતવન્ત ઇદાનીં યુવાં બહિ ર્ભૂત્વા કુશલેન પ્રતિષ્ઠેતાં।

XXXVII કિન્તુ પૌલસ્તાન્ અવદત્ રોમિલોકયોરાવયોઃ કમપિ દોષમ્ ન નિશ્ચિત્ય સર્વ્વેષાં સમક્ષમ્ આવાં કશયા તાડયિત્વા કારાયાં બદ્ધવન્ત ઇદાનીં કિમાવાં ગુપ્તં વિસ્રક્ષ્યન્તિ? તન્ન ભવિષ્યતિ, સ્વયમાગત્યાવાં બહિઃ કૃત્વા નયન્તુ।

XXXVIII તદા પદાતિભિઃ શાસકેભ્ય એતદ્વાર્ત્તાયાં કથિતાયાં તૌ રોમિલોકાવિતિ કથાં શ્રુત્વા તે ભીતાઃ

XXXIX સન્તસ્તયોઃ સન્નિધિમાગત્ય વિનયમ્ અકુર્વ્વન્ અપરં બહિઃ કૃત્વા નગરાત્ પ્રસ્થાતું પ્રાર્થિતવન્તઃ।

XL તતસ્તૌ કારાયા નિર્ગત્ય લુદિયાયા ગૃહં ગતવન્તૌ તત્ર ભ્રાતૃગણં સાક્ષાત્કૃત્ય તાન્ સાન્ત્વયિત્વા તસ્માત્ સ્થાનાત્ પ્રસ્થિતૌ।

# XVII

I પૌલસીલૌ આમ્ફિપલ્યાપલ્લોનિયાનગરાભ્યાં ગત્વા યત્ર યિહૂદીયાનાં ભજનભવનમેકમ્ આસ્તે તત્ર થિષલનીકીનગર ઉપસ્થિતૌ।

II તદા પૌલઃ સ્વાચારાનુસારેણ તેષાં સમીપં ગત્વા વિશ્રામવારત્રયે તૈઃ સાર્દ્ધં ધર્મ્મપુસ્તકીયકથાયા વિચારં કૃતવાન્।

III ફલતઃ ખ્રીષ્ટેન દુઃખભોગઃ કર્ત્તવ્યઃ શ્મશાનદુત્થાનઞ્ચ કર્ત્તવ્યં યુષ્માકં સન્નિધૌ યસ્ય યીશોઃ પ્રસ્તાવં કરોમિ સ ઈશ્વરેણાભિષિક્તઃ સ એતાઃ કથાઃ પ્રકાશ્ય પ્રમાણં દત્વા સ્થિરીકૃતવાન્।

IV તસ્માત્ તેષાં કતિપયજના અન્યદેશીયા બહવો ભક્તલોકા બહ્યઃ પ્રધાનનાર્ય્યશ્ચ વિશ્વસ્ય પૌલસીલયોઃ પશ્ચાદ્ગામિનો જાતાઃ।

V કિન્તુ વિશ્વાસહીના યિહૂદીયલોકા ઈર્ષ્યયા પરિપૂર્ણાઃ સન્તો હટટ્સ્ય કતિનયલમ્પટલોકાન્ સઙ્ગિનઃ કૃત્વા જનતયા નગરમધ્યે મહાકલહં કૃત્વા યાસોનો ગૃહમ્ આક્રમ્ય પ્રેરિતાન્ ધૃત્વા લોકનિવહસ્ય સમીપમ્ આનેતું ચેષ્ટિતવન્તઃ।

VI તેષામુદ્દેશમ્ અપ્રાપ્ય ચ યાસોનં કતિપયાન્ ભ્રાતૃંશ્ચ ધૃત્વા નગરાધિપતીનાં નિકટમાનીય પ્રોચ્ચૈઃ કથિતવન્તો યે મનુષ્યા જગદુદ્વાટિતવન્તસ્તે ઽત્રાપ્યુપસ્થિતાઃ સન્તિ,

VII એષ યાસોન્ આતિથ્યં કૃત્વા તાન્ ગૃહીતવાન્। યીશુનામક એકો રાજસ્તીતિ કથયન્તસ્તે કૈસરસ્યાજ્ઞાવિરુદ્ધં કર્મ્મ કુર્વ્વતિ।

VIII તેષાં કથામિમાં શ્રુત્વા લોકનિવહો નગરાધિપતયશ્ચ સમુદ્વિગ્ના અભવન્।

IX તદા યાસોનસ્તદન્યેષાઞ્ચ ધનદણ્ડં ગૃહીત્વા તાન્ પરિત્યક્તવન્તઃ।

X તતઃ પરં ભ્રાતૃગણો રજન્યાં પૌલસીલૌ શીઘ્રં બિરયાનગરં પ્રેષિતવાન્ તૌ તત્રોપસ્થાય યિહૂદીયાનાં ભજનભવનં ગતવન્તૌ।

XI તત્રસ્થા લોકાઃ થિષલનીકીસ્થલોકેભ્યો મહાત્માન આસન્ યત ઇત્થં ભવતિ ન વેતિ જ્ઞાતું દિને દિને ધર્મ્મગ્રન્થસ્યાલોચનાં કૃત્વા સ્વૈરં કથામ્ અગૃહ્લન્।

XII તસ્માદ્ અનેકે યિહૂદીયા અન્યદેશીયાનાં માન્યા સ્ત્રિયઃ પુરુષાશ્ચાનેકે વ્યશ્વસન્।

XIII કિન્તુ બિરયાનગરે પૌલેનેશ્વરીયા કથા પ્રચાર્ય્યત ઇતિ થિષલનીકીસ્થા યિહૂદીયા જ્ઞાત્વા તત્સ્થાનમપ્યાગત્ય લોકાનાં કુપ્રવૃત્તિમ્ અજનયન્।

XIV અતએવ તસ્માત્ સ્થાનાત્ સમુદ્રેણ યાન્તીતિ દર્શયિત્વા ભ્રાતરઃ ક્ષિપ્રં પૌલં પ્રાહિણ્વન્ કિન્તુ સીલતીમથિયૌ તત્ર સ્થિતવન્તૌ।

XV તતઃ પરં પૌલસ્ય માર્ગદર્શકાસ્તમ્ આથીનીનગર ઉપસ્થાપયન્ પશ્ચાદ્ યુવાં તૂર્ણમ્ એતત્ સ્થાનં આગમિષ્યથઃ સીલતીમથિયૌ પ્રતીમામ્ આજ્ઞાં પ્રાપ્ય તે પ્રત્યાગતાઃ।

XVI પૌલ આથીનીનગરે તાવપેક્ષ્ય તિષ્ઠન્ તન્નગરં પ્રતિમાભિઃ પરિપૂર્ણં દૃષ્ટ્વા સન્તપ્તહૃદયો ઽભવત્।

XVII તતઃ સ ભજનભવને યાન્ યિહૂદીયાન્ ભક્તલોકાંશ્ચ હટ્ટે ચ યાન્ અપશ્યત્ તૈઃ સહ પ્રતિદિનં વિચારિતવાન્।

XVIII કિન્ત્વિપિકૂરીયમતગ્રહિણઃ સ્તોયિકીયમતગ્રાહિણશ્ચ કિયન્તો જનાસ્તેન સાર્દ્ધં વ્યવદન્ત। તત્ર કેચિદ્ અકથયન્ એષ વાચાલઃ કિં વક્તુમ્ ઇચ્છતિ? અપરે કેચિદ્ એષ જનઃ કેષાઞ્ચિદ્ વિદેશીયદેવાનાં પ્રચારક ઇત્યનુમીયતે યતઃ સ યીશુમ્ ઉત્થિતિઞ્ચ પ્રચારયત્।

XIX તે તમ્ અરેયપાગનામ વિચારસ્થાનમ્ આનીય પ્રાવોચન્ ઇદં યન્નવીનં મતં ત્વં પ્રાચીકશ ઇદં કીદૃશં એતદ્ અસ્માન્ શ્રાવય;

XX યામિમામ્ અસમ્ભવકથામ્ અસ્માકં કર્ણગોચરીકૃતવાન્ અસ્યા ભાવાર્થઃ ક ઇતિ વયં જ્ઞાતુમ્ ઇચ્છામઃ।

XXI તદાથીનીનિવાસિનસ્તન્નગરપ્રવાસિનશ્ચ કેવલં કસ્યાશ્ચન નવીનકથાયાઃ શ્રવણેન પ્રચારણેન ચ કાલમ્ અયાપયન્।

XXII પૌલોઽરેયપાગસ્ય મધ્યે તિષ્ઠન્ એતાં કથાં પ્રચારિતવાન્, હે આથીનીયલોકા યૂયં સર્વ્વથા દેવપૂજાયામ્ આસક્તા ઇત્યહ પ્રત્યક્ષં પશ્યામિ।

XXIII યતઃ પર્ય્યટનકાલે યુષ્માકં પૂજનીયાનિ પશ્યન્ 'અવિજ્ઞાતેશ્વરાય' એતલ્લિપિયુક્તાં યજ્ઞવેદીમેકાં દૃષ્ટવાન્; અતો ન વિદિત્વા યં પૂજયધ્વે તસ્યૈવ તત્વં યુષ્માન્ પ્રતિ પ્રચારયામિ।

XXIV જગતો જગત્સ્થાનાં સર્વ્વવસ્તૂનાઞ્ચ સ્રષ્ટા ય ઈશ્વરઃ સ સ્વર્ગપૃથિવ્યોરેકાધિપતિઃ સન્ કરનિર્મ્મિતમન્દિરેષુ ન નિવસતિ;

XXV સ એવ સર્વ્વેભ્યો જીવનં પ્રાણાન્ સર્વ્વસામગ્રીશ્ચ પ્રદદાતિ; અતએવ સ કસ્યાશ્ચિત્ સામગ્ર્યા અભાવહેતો ર્મનુષ્યાણાં હસ્તૈઃ સેવિતો ભવતીતિ ન।

XXVI સ ભૂમણ્ડલે નિવાસાર્થમ્ એકસ્માત્ શોણિતાત્ સર્વ્વાન્ મનુષ્યાન્ સૃષ્ટ્વા તેષાં પૂર્વ્વનિરૂપિતસમયં વસતિસીમાઞ્ચ નિરચિનોત્;

XXVII તસ્માત્ લોકૈઃ કેનાપિ પ્રકારેણ મૃગયિત્વા પરમેશ્વરસ્ય તત્વં પ્રાપ્તું તસ્ય ગવેષણં કરણીયમ્।

XXVIII કિન્તુ સોઽસ્માકં કસ્માચ્ચિદપિ દૂરે તિષ્ઠતીતિ નહિ, વયં તેન નિશ્વસનપ્રશ્વસનગમનાગમનપ્રાણધારણાનિ કુર્મ્મઃ, પુ ુનશ્ચ યુષ્માકમેવ કતિપયાઃ કવયઃ કથયન્તિ 'તસ્ય વંશા વયં સ્મો હિ' ઇતિ।

XXIX અતએવ યદિ વયમ્ ઈશ્વરસ્ય વંશા ભવામસ્તર્હિ મનુષ્યૈ ર્વિદ્યયા કૌશલેન ચ તક્ષિતં સ્વર્ણં રૂપ્યં દૃષદ્ વૈતેષામીશ્વરત્વમ્ અસ્માભિ ર્ન જ્ઞાતવ્યં।

XXX તેષાં પૂર્વ્વીયલોકાનામ્ અજ્ઞાનતાં પ્રતીશ્વરો યદ્યપિ નાવાધત્ત તથાપીદાનીં સર્વ્વત્ર સર્વ્વાન્ મનઃ પરિવર્ત્તયિતુમ્ આજ્ઞાપયતિ,

XXXI યતઃ સ્વનિયુક્તેન પુરુષેણ યદા સ પૃથિવીસ્થાનાં સર્વ્વલોકાનાં વિચારં કરિષ્યતિ તદ્દિનં ન્યરૂપયત્; તસ્ય શ્મશાનોત્થાપનેન તસ્મિન્ સર્વ્વેભ્યઃ પ્રમાણં પ્રાદાત્।

XXXII તદા શ્મશાનાદ્ ઉત્થાનસ્ય કથાં શ્રુત્વા કેચિદ્ ઉપાહમન્, કેચિદવદન્ એનાં કથાં પુનરપિ ત્વત્તઃ શ્રોષ્યામઃ।

XXXIII તતઃ પૌલસ્તેષાં સમીપાત્ પ્રસ્થિ ાતવાન્।

XXXIV તથાપિ કેચિલ્લોકાસ્તેન સાર્દ્ધં મિલિત્વા વ્યશ્વસન્ તેષાં મધ્યે ડરેયપાગીયદિયનુસિયો દામારીનામા કાચિન્નારી કિયન્તો નરાશ્ચાસન્।

# XVIII

I તદ્ઘટનાતઃ પરં પૌલ આથીનીનગરાદ્ યાત્રાં કૃત્વા કરિન્થનગરમ્ આગચ્છત્।

II તસ્મિન્ સમયે ક્લૌદિયઃ સર્વ્વાન્ યિહૂદીયાન્ રોમાનગરં વિહાય ગન્તુમ્ આજ્ઞાપયત્, તસ્માત્ પ્રિસ્કિલ્લાનામ્ના જાયયા સાર્દ્ધમ્ ઇતાલિયાદેશાત્ કિઞ્ચિત્પૂર્વ્વમ્ આગમત્ યઃ પન્તદેશે જાત આક્કિલનામા યિહૂદીયલોકઃ પૌલસ્તં સાક્ષાત્ પ્રાપ્ય તયોઃ સમીપમિતવાન્।

III તૌ દૂષ્યનિર્મ્માણજીવિનૌ, તસ્માત્ પરસ્પરમ્ એકવૃત્તિકત્વાત્ સ તાભ્યાં સહ ઉષિત્વા તત્ કર્મ્માકરોત્।

IV પૌલઃ પ્રતિવિશ્રામવારં ભજનભવનં ગત્વા વિચારં કૃત્વા યિહૂદીયાન્ અન્યદેશીયાંશ્ચ પ્રવૃત્તિં ગ્રાહિતવાન્।

V સીલતીમથિયયો ર્માકિદનિયાદેશાત્ સમેતયોઃ સતોઃ પૌલ ઉત્તપ્તમના ભૂત્વા યીશુરીશ્વરેણાભિષિક્તો ભવતીતિ પ્રમાણં યિહૂદીયાનાં સમીપે પ્રાદાત્।

VI કિન્તુ તે ઽતીવ વિરોધં વિધાય પાષણ્ડીયકથાં કથિતવન્તસ્તતઃ પૌલો વસ્ત્રં ધુન્વન્ એતાં કથાં કથિતવાન્, યુષ્માકં શોણિતપાતાપરાધો યુષ્માન્ પ્રત્યેવ ભવતુ, તેનાહં નિરપરાધો ઽદ્યારભ્ય ભિન્નદેશીયાનાં સમીપં યામિ।

VII સ તસ્માત્ પ્રસ્થાય ભજનભવનસમીપસ્થસ્ય યુસ્તનામ્ન ઈશ્વરભક્તસ્ય ભિન્નદેશીયસ્ય નિવેશનં પ્રાવિશત્।

VIII તતઃ ક્રીષ્પનામા ભજનભવનાધિપતિઃ સપરિવારઃ પ્રભૌ વ્યશ્વસીત્, કરિન્થનગરીયા બહવો લોકાશ્ચ સમાકર્ણ્ય વિશ્વસ્ય મજ્જિતા અભવન્।

IX ક્ષણદાયાં પ્રભુઃ પૌલં દર્શનં દત્વા ભાષિતવાન્, મા ભૈષીઃ, મા નિરસીઃ કથાં પ્રચારય।

X અહં ત્વયા સાર્દ્ધમ્ આસ હિંસાર્થં કોપિ ત્વાં સ્પ્રષ્ટું ન શક્ષ્યતિ નગરેઽસ્મિન્ મદીયા લોકા બહવ આસતે।

XI તસ્માત્ પૌલસ્તન્નગરે પ્રાયેણ સાર્દ્ધવત્સરપર્ય્યન્તં સંસ્થાયેશ્વરસ્ય કથામ્ ઉપાદિશત્।

XII ગાલ્લિયનામા કશ્ચિદ્ આખાયાદેશસ્ય પ્રાડ્વિવાકઃ સમભવત્, તતો યિહૂદીયા એકવાક્યાઃ સન્તઃ પૌલમ્ આક્રમ્ય વિચારસ્થાનં નીત્વા

XIII માનુષ એષ વ્યવસ્થાય વિરુદ્ધમ્ ઈશ્વરભજનં કર્ત્તું લોકાન્ કુપ્રવૃત્તિં ગ્રાહયતીતિ નિવેદિતવન્તઃ।

XIV તતઃ પૌલે પ્રત્યુત્તરં દાતુમ્ ઉદ્યતે સતિ ગાલ્લિયા યિહૂદીયાન્ વ્યાહરત્, યદિ કસ્યચિદ્ અન્યાયસ્ય વાતિશયદુષ્ટતાચરણસ્ય વિચારોઽભવિષ્યત્ તર્હિ યુષ્માકં કથા મયા સહનીયાભવિષ્યત્।

XV કિન્તુ યદિ કેવલં કથાયા વા નામ્નો વા યુષ્માકં વ્યવસ્થાયા વિવાદો ભવતિ તર્હિ તસ્ય વિચારમહં ન કરિષ્યામિ, યૂયં તસ્ય મીમાંસાં કુરુત।

XVI તતઃ સ તાન્ વિચારસ્થાનાદ્ દૂરીકૃતવાન્।

XVII તદા ભિન્નદેશીયાઃ સોસ્થિનિનામાનં ભજનભવનસ્ય પ્રધાનાધિપતિં ધૃત્વા વિચારસ્થાનસ્ય સમ્મુખે પ્રાહરન્ તથાપિ ગાલ્લિયા તેષુ સર્વ્વકર્મ્મસુ ન મનો ન્યદધાત્।

XVIII પૌલસ્તત્ર પુનર્બહુદિનાનિ ન્યવસત્, તતો ભ્રાતૃગણાદ્ વિસર્જનં પ્રાપ્ય કિઞ્ચનવ્રતનિમિત્તં કિંક્રિયાનગરે શિરો મુણ્ડયિત્વા પ્રિસ્કિલ્લાક્કિલાભ્યાં સહિતો જલપથેન સુરિયાદેશં ગતવાન્।

XIX તત ઇફિષનગર ઉપસ્થાય તત્ર તૌ વિસૃજ્ય સ્વયં ભજનભ્વનં પ્રવિશ્ય યિહૂદીયૈઃ સહ વિચારિતવાન્।

XX તે સ્વૈઃ સાર્દ્ધં પુનઃ કતિપયદિનાનિ સ્થાતું તં વ્યનયન્, સ તદનુરરીકૃત્ય કથામેતાં કથિતવાન્,

XXI યિરૂશાલમિ આગામ્યુત્સવપાલનાર્થં મયા ગમનીયં; પશ્ચાદ્ ઈશ્વરેચ્છાયાં જાતાયાં યુષ્માકં સમીપં પ્રત્યાગમિષ્યામિ। તતઃ પરં સ તૈ ર્વિસૃષ્ટઃ સન્ જલપથેન ઇફિષનગરાત્ પ્રસ્થિતવાન્।

XXII તતઃ કૈસરિયામ્ ઉપસ્થિતઃ સન્ નગરં ગત્વા સમાજં નમસ્કૃત્ય તસ્માદ્ આન્તિયખિયાનગરં પ્રસ્થિતવાન્।

XXIII તત્ર કિયત્કાલં યાપયિત્વા તસ્માત્ પ્રસ્થાય સર્વ્વેષાં શિષ્યાણાં મનાંસિ સુસ્થિરાણિ કૃત્વા ક્રમશો ગલાતિયાફ્રુગિયાદેશયો
ર્ભ્રમિત્વા ગતવાન્|
XXIV તસ્મિન્નેવ સમયે સિકન્દરિયાનગરે જાત આપલ્લોનામા શાસ્ત્રવિત્ સુવક્તા યિહૂદીય એકો જન ઇફિષનગરમ્ આગતવાન્|
XXV સ શિક્ષિતપ્રભુમાર્ગો મનસોદ્યોગી ચ સન્ યોહનો મજ્જનમાત્રં જ્ઞાત્વા યથાર્થતયા પ્રભોઃ કથાં કથયન્ સમુપાદિશત્|
XXVI એષ જનો નિર્ભયત્વેન ભજનભવને કથયિતુમ્ આરબ્ધવાન્, તતઃ પ્રિસ્કિલ્લાક્કિલૌ તસ્યોપદેશકથાં નિશમ્ય તં સ્વયોઃ
સમીપમ્ આનીય શુદ્ધરૂપેણેશ્વરસ્ય કથામ્ અબોધયતામ્|
XXVII પશ્ચાત્ સ આખાયાદેશં ગન્તું મતિં કૃતવાન્, તદા તત્રત્યઃ શિષ્યગણો યથા તં ગૃહ્લાતિ તદર્થં ભ્રાતૃગણેન સમાશ્વસ્ય પત્રે
લિખિતે સતિ, આપલ્લાસ્તત્રોપસ્થિતઃ સન્ અનુગ્રહેણ પ્રત્યયિનાં બહૂપકારાન્ અકરોત્,
XXVIII ફલતો યીશુરભિષિક્તસ્ત્રાતેતિ શાસ્ત્રપ્રમાણં દત્વા પ્રકાશરૂપેણ પ્રતિપન્નં કૃત્વા યિહૂદીયાન્ નિરુત્તરાન્ કૃતવાન્|

# XIX

I કરિન્થનગર આપલ્લસઃ સ્થિતિકાલે પૌલ ઉત્તરપ્રદેશૈરાગચ્છન્ ઇફિષનગરમ્ ઉપસ્થિતવાન્| તત્ર કતિપયશિષ્યાન્ સાક્ષત્ પ્રાપ્ય
તાન્ અપૃચ્છત્,
II યૂયં વિશ્વસ્ય પવિત્રમાત્માનં પ્રાપ્તા ન વા? તતસ્તે પ્રત્યવદન્ પવિત્ર આત્મા દીયતે ઇત્યસ્માભિઃ શ્રુતમપિ નહિ|
III તદા સાઽવદત્ તર્હિ યૂયં કેન મજ્જિતા અભવત? તેઽકથયન્ યોહનો મજ્જનેન|
IV તદા પૌલ ઉક્તવાન્ ઇતઃ પરં ય ઉપસ્થાસ્યતિ તસ્મિન્ અર્થત યીશુખ્રીષ્ટે વિશ્વસિતવ્યમિત્યુક્ત્વા યોહન્ મનઃપરિવર્ત્તનસૂચકેન
મજ્જનેન જલે લોકાન્ અમજ્જયત્|
V તાદૃશીં કથાં શ્રુત્વા તે પ્રભો ર્યીશુખ્રીષ્ટસ્ય નામ્ના મજ્જિતા અભવન્|
VI તતઃ પૌલેન તેષાં ગાત્રેષુ કરેઽર્પિતે તેષામુપરિ પવિત્ર આત્માવરૂઢવાન્, તસ્માત્ તે નાનાદેશીયા ભાષા ભવિષ્યત્કથાશ્ચ
કથિતવન્તઃ|
VII તે પ્રાયેણ દ્વાદશજના આસન્|
VIII પૌલો ભજનભવનં ગત્વા પ્રાયેણ માસત્રયમ્ ઈશ્વરસ્ય રાજ્યસ્ય વિચારં કૃત્વા લોકાન્ પ્રવર્ત્ય સાહસેન કથામકથયત્|
IX કિન્તુ કઠિનાન્તઃકરણત્વાત્ કિયન્તો જના ન વિશ્વસ્ય સર્વ્વેષાં સમક્ષમ્ એતત્પથસ્ય નિન્દાં કર્ત્તું પ્રવૃત્તાઃ, અતઃ પૌલસ્તેષાં
સમીપાત્ પ્રસ્થાય શિષ્યગણં પૃથક્કૃત્વા પ્રત્યહં તુરાન્નનામ્નઃ કસ્યચિત્ જનસ્ય પાઠશાલાયાં વિચારં કૃતવાન્|
X ઇત્થં વત્સરદ્વયં ગતં તસ્માદ્ આશિયાદેશનિવાસિનઃ સર્વ્વે યિહૂદીયા અન્યદેશીયલોકાશ્ચ પ્રભો ર્યીશોઃ કથામ્ અશ્રૌષન્|
XI પૌલેન ચ ઈશ્વર એતાદૃશાન્યદ્ભુતાનિ કર્મ્માણિ કૃતવાન્
XII યત્ પરિધેયે ગાત્રમાર્જનવસ્ત્રે વા તસ્ય દેહાત્ પીડિતલોકાનામ્ સમીપમ્ આનીતે તે નિરામયા જાતા અપવિત્રા ભૂતાશ્ચ તેભ્યો
બહિર્ગતવન્તઃ|
XIII તદા દેશાટનકારિણઃ કિયન્તો યિહૂદીયા ભૂતાપસારિણો ભૂતગ્રસ્તનોકાનાં સન્નિધૌ પ્રભે ર્યીશો ર્નામ જપ્ત્વા વાક્યમિદમ્
અવદન્, યસ્ય કથાં પૌલઃ પ્રચારયતિ તસ્ય યીશો ર્નામ્ના યુષ્માન્ આજ્ઞાપયામઃ|
XIV સ્કિવનામ્નો યિહૂદીયાનાં પ્રધાનયાજકસ્ય સપ્તભિઃ પુત્તૈસ્તથા કૃતે સતિ
XV કશ્ચિદ્ અપવિત્રો ભૂતઃ પ્રત્યુદિતવાન્, યીશું જાનામિ પૌલઞ્ચ પરિચિનોમિ કિન્તુ કે યૂયં?
XVI ઇત્યુક્ત્વા સોપવિત્રભૂતગ્રસ્તો મનુષ્યો લમ્ફં કૃત્વા તેષામુપરિ પતિત્વા બલેન તાન્ જિતવાન્, તસ્માત્તે નગ્નાઃ ક્ષતાઙ્ગાશ્ચ
સન્તસ્તસ્માદ્ ગેહાત્ પલાયન્ત|
XVII સા વાગ્ ઇફિષનગરનિવાસિનસં સર્વ્વેષાં યિહૂદીયાનાં ભિન્નદેશીયાનાં લોકાનાઞ્ચ શ્રવોગોચરીભૂતા; તતઃ સર્વ્વે ભયં ગતાઃ
પ્રભો ર્યીશો ર્નામ્નો યશો ઽવર્દ્ધત|
XVIII યેષામનેકેષાં લોકાનાં પ્રતીતિરજાયત ત આગત્ય સ્વૈઃ કૃતાઃ ક્રિયાઃ પ્રકાશરૂપેણાઙ્ગીકૃતવન્તઃ|
XIX બહવો માયાકર્મ્મકારિણઃ સ્વસ્વગ્રન્થાન્ આનીય રાશીકૃત્ય સર્વ્વેષાં સમક્ષમ્ અદાહયન્, તતો ગણનાં કૃત્વાબુધ્યન્ત
પઞ્ચાયુતરૂપ્યમુદ્રામૂલ્યપુસ્તકાનિ દગ્ધાનિ|
XX ઇત્થં પ્રભોઃ કથા સર્વ્વદેશં વ્યાપ્ય પ્રબલા જાતા|
XXI સર્વ્વેષ્વેતેષુ કર્મ્મસુ સમ્પન્નેષુ સત્સુ પૌલો માકિદનિયાખાયાદેશાભ્યાં યિરૂશાલમં ગન્તું મતિં કૃત્વા કથિતવાન્ તત્સ્થાનં યાત્રાયાં
કૃતાયાં સત્યાં મયા રોમાનગરં દ્રષ્ટવ્યં|
XXII સ્વાનુગતલોકાનાં તીમથિયેરાસ્તૌ દ્વૌ જનૌ માકિદનિયાદેશં પ્રતિ પ્રહિત્ય સ્વયમ્ આશિયાદેશે કતિપયદિનાનિ સ્થિતવાન્|
XXIII કિન્તુ તસ્મિન્ સમયે મતેઽસ્મિન્ કલહો જાતઃ|
XXIV તત્કારણમિદં, અર્ત્તિમીદેવ્યા રૂપ્યમન્દિરનિર્મ્માણેન સર્વ્વેષાં શિલ્પિનાં યથેષ્ટલાભમ્ અજનયત્ યો દીમીત્રિયનામા
નાડીન્ધમઃ
XXV સ તાન્ તત્કર્મ્મજીવિનઃ સર્વ્વલોકાંશ્ચ સમાહૂય ભાષિતવાન્ હે મહેચ્છા એતેન મન્દિરનિર્મ્માણેનાસ્માકં જીવિકા ભવતિ,
એતદ્ યૂયં વિત્થ;
XXVI કિન્તુ હસ્તનિર્મ્મિતેશ્વરા ઈશ્વરા નહિ પૌલનામ્ના કેનચિજ્જનેન કથામિમાં વ્યાહૃત્ય કેવલેફિષનગરે નહિ પ્રાયેણ સર્વ્વસ્મિન્
આશિયાદેશે પ્રવૃત્તિં ગ્રાહયિત્વા બહુલોકાનાં શેમુષી પરાવર્ત્તિતા, એતદ્ યુષ્માભિ ર્દૃશ્યતે શ્રૂયતે ચ|
XXVII તેનાસ્માકં વાણિજ્યસ્ય સર્વ્વથા હાનેઃ સમ્ભવનં કેવલમિતિ નહિ, આશિયાદેશસ્થૈ ર્વા સર્વ્વજગત્સ્થૈ ર્લોકૈઃ પૂજ્યા યાર્ત્તિમી
મહાદેવી તસ્યા મન્દિરસ્યાવજ્ઞાનસ્ય તસ્યા ઐશ્વર્ય્યસ્ય નાશસ્ય ચ સમ્ભાવના વિદ્યતે◌|
XXVIII એતાદૃશીં કથાં શ્રુત્વા તે મહાક્રોધાન્વિતાઃ સન્ત ઉચ્ચૈઃકારં કથિતવન્ત ઇફિષીયાનામ્ અર્ત્તિમી દેવી મહતી ભવતિ|
XXIX તતઃ સર્વ્વનગરં કલહેન પરિપૂર્ણમભવત્, તતઃ પરં તે માકિદનીયગાયારિસ્તાર્ખનામાનૌ પૌલસ્ય દ્વૌ સહચરૌ ધૃત્વૈકચિત્તા
રઙ્ગભૂમિં જવેન ધાવિતવન્તઃ|

XXX તતઃ પૌલો લોકાનાં સન્નિધિં યાતુમ્ ઉદ્યતવાન્ કિન્તુ શિષ્યગણસ્તં વારિતવાન્।
XXXI પૌલસ્યત્મીયા આશિયાદેશસ્થાઃ કતિપયાઃ પ્રધાનલોકાસ્તસ્ય સમીપં નરમેકં પ્રેષ્ય ત્વં રઙ્ગભૂમિં માગા ઇતિ ન્યવેદયન્।
XXXII તતો નાનાલોકાનાં નાનાકથાકથનાત્ સભા વ્યાકુલા જાતા કિં કારણાદ્ એતાવતી જનતાભવત્ એતદ્ અધિકૈ ર્લોકૈ ર્નાજ્ઞાયિ।
XXXIII તતઃ પરં જનતામધ્યાદ્ યિહૂદીયૈર્બહિષ્કૃતઃ સિકન્દરો હસ્તેન સઙ્કેતં કૃત્વા લોકેભ્ય ઉત્તરં દાતુમુદ્યતવાન્,
XXXIV કિન્તુ સ યિહૂદીયલોક ઇતિ નિશ્ચિતે સતિ ઇફિષીયાનામ્ અર્ત્તિમી દેવી મહતીતિ વાક્યં પ્રાયેણ પઞ્ચ દણ્ડાન્ યાવદ્ એકસ્વરેણ લોકનિવહૈઃ પ્રોક્તં।
XXXV તતો નગરાધિપતિસ્તાન્ સ્થિરાન્ કૃત્વા કથિતવાન્ હે ઇફિષાયાઃ સર્વ્વે લોકા આકર્ણયત, અર્તિમીમહાદેવ્યા મહાદેવાત્ પતિતાયાસ્તત્પ્રતિમાયાશ્ચ પૂજનમ ઇફિષનગરસ્થાઃ સર્વ્વે લોકાઃ કુર્વ્વન્તિ, એતત્ કે ન જાનન્તિ?
XXXVI તસ્માદ્ એતત્પ્રતિકૂલં કેપિ કથયિતું ન શક્નુવન્તિ, ઇતિ જ્ઞાત્વા યુષ્માભિઃ સુસ્થિરત્વેન સ્થાતવ્યમ્ અવિવિચ્ય કિમપિ કર્મ્મ ન કર્ત્તવ્યઞ્ચ।
XXXVII યાન્ એતાન્ મનુષ્યાન્ યૂયમત્ર સમાનયત તે મન્દિરદ્રવ્યાપહારકા યુષ્માકં દેવ્યા નિન્દકાશ્ચ ન ભવન્તિ।
XXXVIII યદિ કઞ્ચન પ્રતિ દીમીત્રિયસ્ય તસ્ય સહાયાનાઞ્ચ કાચિદ્ આપત્તિ ર્વિદ્યતે તર્હિ પ્રતિનિધિલોકા વિચારસ્થાનઞ્ચ સન્તિ, તે તત્ સ્થાનં ગત્વા ઉત્તરપ્રત્યુત્તરે કુર્વ્વન્તુ।
XXXIX કિન્તુ યુષ્માકં કાચિદપરા કથા યદિ તિષ્ઠતિ તર્હિ નિયમિતાયાં સભાયાં તસ્યા નિષ્પત્તિ ર્ભવિષ્યતિ।
XL કિન્ત્વેતસ્ય વિરોધસ્યોત્તરં યેન દાતું શક્નુમ્ એતાદૃશસ્ય કસ્યચિત્ કારણસ્યાભાવાદ્ અદ્યતનઘટનાહેતો રાજદ્રોહિણામિવાસ્માકમ્ અભિયોગો ભવિષ્યતીતિ શઙ્કા વિદ્યતે।
XLI ઇતિ કથયિત્વા સ સભાસ્થલોકાન્ વિસૃષ્ટવાન્।

# XX

I ઇત્થં કલહે નિવૃત્તે સતિ પૌલઃ શિષ્યગણમ્ આહૂય વિસર્જનં પ્રાપ્ય માકિદનિયાદેશં પ્રસ્થિતવાન્।
II તેન સ્થાનેન ગચ્છન્ તદ્દેશીયાન્ શિષ્યાન્ બહૂપદિશ્ય યૂનાનીયદેશમ્ ઉપસ્થિતવાન્।
III તત્ર માસત્રયં સ્થિત્વા તસ્માત્ સુરિયાદેશં યાતુમ્ ઉદ્યતઃ, કિન્તુ યિહૂદીયાસ્તં હન્તું ગુપ્તા અતિષ્ઠન્ તસ્માત્ સ પુનરપિ માકિદનિયામાર્ગેણ પ્રત્યાગન્તું મતિં કૃતવાન્।
IV બિરયાનગરીયસોપાત્રઃ થિષલનીકીયારિસ્તાર્ખસિકુન્દૌ દર્બ્બોનગરીયગાયતીમથિયૌ આશિયાદેશીયતુખિકત્રફિમૌ ચ તેન સાર્દ્ધં આશિયાદેશં યાવદ્ ગતવન્તઃ।
V એતે સર્વ્વે ઽગ્રસરાઃ સન્તો ઽસ્માન્ અપેક્ષ્ય ત્રોયાનગરે સ્થિતવન્તઃ।
VI કિણ્વશૂન્યપૂપોત્સવદિને ચ ગતે સતિ વયં ફિલિપીનગરાત્ તોયપથેન ગત્વા પઞ્ચભિ ર્દિનૈસ્ત્રોયાનગરમ્ ઉપસ્થાય તત્ર સપ્તદિનાન્યવાતિષ્ઠામ।
VII સપ્તાહસ્ય પ્રથમદિને પૂપાન્ ભંક્તુ શિષ્યેષુ મિલિતેષુ પૌલઃ પરદિને તસ્માત્ પ્રસ્થાતુમ્ ઉદ્યતઃ સન્ તદહ્નિ પ્રાયેણ ક્ષપાયા યામદ્વયં યાવત્ શિષ્યેભ્યો ધર્મ્મકથામ્ અકથયત્।
VIII ઉપરિસ્થે યસ્મિન્ પ્રકોષ્ઠે સભાં કૃત્વાસન્ તત્ર બહવઃ પ્રદીપાઃ પ્રાજ્વલન્।
IX ઉતુખનામા કશ્ચન યુવા ચ વાતાયન ઉપવિશન્ ઘોરતરનિદ્રાગ્રસ્તો ઽભૂત્ તદા પૌલેન બહુક્ષણં કથાયાં પ્રચારિતાયાં નિદ્રામગ્નઃ સ તસ્માદ્ ઉપરિસ્થતૃતીયપ્રકોષ્ઠાદ્ અપતત્, તતો લોકાસ્તં મૃતકલ્પં ધૃત્વોદતોલયન્।
X તતઃ પૌલોઽવરુહ્ય તસ્ય ગાત્રે પતિત્વા તં ક્રોડે નિધાય કથિતવાન્, યૂયં વ્યાકુલા મા ભૂત નાયં પ્રાણૈ ર્વિયુક્તઃ।
XI પશ્ચાત્ સ પુનશ્ચોપરિ ગત્વા પૂપાન્ ભંક્ત્વા પ્રભાતં યાવત્ કથોપકથને કૃત્વા પ્રસ્થિતવાન્।
XII તે ચ તં જીવન્તં યુવાનં ગૃહીત્વા ગત્વા પરમાપ્યાયિતા જાતાઃ।
XIII અનન્તરં વયં પોતેનાગ્રસરા ભૂત્વાસ્મનગરમ્ ઉત્તીર્ય્ય પૌલં ગ્રહીતું મતિમ્ અકુર્મ્મ યતઃ સ તત્ર પદ્ભ્યાં વ્રજિતું મતિં કૃત્વેતિ નિરૂપિતવાન્।
XIV તસ્માત્ તત્રાસ્માભિઃ સાર્દ્ધં તસ્મિન્ મિલિતે સતિ વયં તં નીત્વા મિતુલીન્યુપદ્વીપં પ્રાપ્તવન્તઃ।
XV તસ્માત્ પોતં મોચયિત્વા પરેઽહનિ ખીયોપદ્વીપસ્ય સમ્મુખં લબ્ધવન્તસ્તસ્માદ્ એકેનાહ્ના સામોપદ્વીપં ગત્વા પોતં લાગયિત્વા ત્રોગુલ્લિયે સ્થિત્વા પરસ્મિન્ દિવસે મિલીતનગરમ્ ઉપાતિષ્ઠામ।
XVI યતઃ પૌલ આશિયાદેશે કાલં યાપયિતુમ્ નાભિલષન્ ઇફિષનગરં ત્યક્ત્વા યાતું મન્ત્રણાં સ્થિરીકૃતવાન્; યસ્માદ્ યદિ સાધ્યં ભવતિ તર્હિ નિસ્તારોત્સવસ્ય પઞ્ચાશત્તમદિને સ યિરૂશાલમ્યુપસ્થાતું મતિં કૃતવાન્।
XVII પૌલો મિલીતાદ્ ઇફિષં પ્રતિ લોકં પ્રહિત્ય સમાજસ્ય પ્રાચીનાન્ આહૂયાનીતવાન્।
XVIII તેષુ તસ્ય સમીપમ્ ઉપસ્થિતેષુ સ તેભ્ય ઇમાં કથાં કથિતવાન્, અહમ્ આશિયાદેશે પ્રથમાગમનમ્ આરભ્યાદ્ય યાવદ્ યુષ્માકં સન્નિધૌ સ્થિત્વા સર્વ્વસમયે યથાચરિતવાન્ તદ્ યૂયં જાનીથ;
XIX ફલતઃ સર્વ્વથા નમ્રમનાઃ સન્ બહુશ્રુપાતેન યિહુદીયાનામ્ કુમન્ત્રણાજાતનાનાપરીક્ષાભિઃ પ્રભોઃ સેવામકરવં।
XX કામપિ હિતકથાં ન ગોપાયિતવાન્ તાં પ્રચાર્ય્ય સપ્રકાશં ગૃહે ગૃહે સમુપદિશ્યેશ્વરં પ્રતિ મનઃ પરાવર્ત્તનીયં પ્રભૌ યીશુખ્રીષ્ટે વિશ્વસનીયં
XXI યિહૂદીયાનામ્ અન્યદેશીયલોકાનાઞ્ચ સમીપ એતાદૃશં સાક્ષ્યં દદામિ।
XXII પશ્યત સામ્પ્રતમ્ આત્મનાકૃષ્ટઃ સન્ યિરૂશાલમ્નગરે યાત્રાં કરોમિ, તત્ર મામ્પ્રતિ યદ્યદ્ ઘટિષ્યતે તાન્યહં ન જાનામિ;
XXIII કિન્તુ મયા બન્ધનં ક્લેશશ્ચ ભોક્તવ્ય ઇતિ પવિત્ર આત્મા નગરે નગરે પ્રમાણં દદાતિ।
XXIV તથાપિ તં ક્લેશમહં તૃણાય ન મન્યે; ઈશ્વરસ્યાનુગ્રહવિષયકસ્ય સુસંવાદસ્ય પ્રમાણં દાતું, પ્રભો ર્યીશોઃ સકાશાદ યસ્યાઃ સેવાયાઃ ભારં પ્રાપ્નવં તાં સેવાં સાધયિતું સાનન્દં સ્વમાર્ગં સમાપયિતુઞ્ચ નિજપ્રાણાનપિ પ્રિયાન્ ન મન્યે।

XXV અધુના પશ્યત યેષાં સમીપેઽહમ્ ઈશ્વરીયરાજ્યસ્ય સુસંવાદં પ્રચાર્ય્ય ભ્રમણં કૃતવાન્ એતાદૃશા યૂયં મમ વદનં પુન ર્દ્રષ્ટું ન પ્રાપ્સ્યથ એતદપ્યહં જાનામિ।

XXVI યુષ્મભ્યમ્ અહમ્ ઈશ્વરસ્ય સર્વ્વાન્ આદેશાન્ પ્રકાશયિતું ન ન્યવર્ત્તે।

XXVII અહં સર્વ્વેષાં લોકાનાં રક્તપાતદોષાદ્ યન્નિર્દોષ આસે તસ્યાદ્ય યુષ્માન્ સાક્ષિણઃ કરોમિ।

XXVIII યૂયં સ્વેષુ તથા યસ્ય વ્રજસ્યાધ્યક્ષન્ આત્મા યુષ્માન્ વિધાય ન્યયુઙ્ક્ત તત્સર્વ્વસ્મિન્ સાવધાના ભવત, ય સમાજઞ્ચ પ્રભુ ર્નિજરક્તમૂલ્યેન ક્રીતવાન તમ્ અવત,

XXIX યતો મયા ગમને કૃતએવ દુર્જયા વૃકા યુષ્માકં મધ્યં પ્રવિશ્ય વ્રજં પ્રતિ નિર્દયતામ્ આચરિષ્યન્તિ,

XXX યુષ્માકમેવ મધ્યાદપિ લોકા ઉત્થાય શિષ્યગણમ્ અપહન્તું વિપરીતમ્ ઉપદેક્ષ્યન્તીત્યહં જાનામિ।

XXXI ઇતિ હેતો ર્યૂયં સચૈતન્યાઃ સન્તસ્તિષ્ટત, અહઞ્ચ સાશ્રુપાતઃ સન્ વત્સરત્રયં યાવદ્ દિવાનિશં પ્રતિજનં બોધયિતું ન ન્યવર્ત્તે તદપિ સ્મરત।

XXXII ઇદાનીં હે ભ્રાતરો યુષ્માકં નિષ્ઠાં જનયિતું પવિત્રીકૃતલોકાનાં મધ્યેઽધિકારઞ્ચ દાતું સમર્થો ય ઈશ્વરસ્તસ્યાનુગ્રહસ્ય યો વાદશ્ચ તયોરુભયો ર્યુષ્માન્ સમાર્પયમ્।

XXXIII કસ્યાપિ સ્વર્ણં રૂપ્યં વસ્ત્રં વા પ્રતિ મયા લોભો ન કૃતઃ।

XXXIV કિન્તુ મમ મત્સહચરલોકાનાઞ્ચાવશ્યકવ્યયાય મદીયમિદં કરદ્વયમ્ અશ્રામ્યદ્ એતદ્ યૂયં જાનીથ।

XXXV અનેન પ્રકારેણ ગ્રહણદ્ દાનં ભદ્રમિતિ યદ્વાક્યં પ્રભુ ર્યીશુઃ કથિતવાન્ તત્ સ્મર્ત્તું દરિદ્રલોકાનામુપકારાર્થં શ્રમં કર્ત્તુઞ્ચ યુષ્માકમ્ ઉચિતમ્ એતત્સર્વ્વં યુષ્માનહમ્ ઉપદિષ્ટવાન્।

XXXVI એતાં કથાં કથયિત્વા સ જાનુની પાતયિત્વા સર્વૈઃ સહ પ્રાર્થયત।

XXXVII તેન તે ક્રન્દ્રન્તઃ

XXXVIII પુન ર્મમ મુખં ન દ્રક્ષ્યથ વિશેષત એષા યા કથા તેનાકથિ તત્કારણાત્ શોકં વિલાપઞ્ચ કૃત્વા કણ્ઠં ધૃત્વા ચુમ્બિતવન્તઃ। પશ્ચાત્ તે તં પોતં નીતવન્તઃ।

# XXI

I તૈ ર્વિસૃષ્ટાઃ સન્તો વયં પોતં બાહયિત્વા ઋજુમાર્ગેણ કોષમ્ ઉપદ્વીપમ્ આગત્ય પરેઽહનિ રોદિયોપદ્વીપમ્ આગચ્છામ તતસ્તસ્માત્ પાતારાયામ્ ઉપાતિષ્ઠામ।

II તત્ર ફૈનીકિયાદેશગામિનમ્ પોતમેકં પ્રાપ્ય તમારુહ્ય ગતવન્તઃ।

III કુપ્રોપદ્વીપં દૃષ્ટ્વા તં સવ્યદિશિ સ્થાપયિત્વા સુરિયાદેશં ગત્વા પોતસ્થદ્રવ્યાણ્યવરોહયિતું સોરનગરે લાગિતવન્તઃ।

IV તત્ર શિષ્યગણસ્ય સાક્ષાત્કરણાય વયં તત્ર સપ્તદિનાનિ સ્થિતવન્તઃ પશ્ચાત્તે પવિત્રેણાત્મના પૌલં વ્યાહરન્ ત્વં યિરૂશાલમ્નગરં મા ગમઃ।

V તતસ્તેષુ સપ્તસુ દિનેષુ યાપિતેષુ સત્સુ વયં તસ્માત્ સ્થાનાત્ નિજવર્ત્મના ગતવન્તઃ, તસ્માત્ તે સબાલવૃદ્ધવનિતા અસ્માભિઃ સહ નગરસ્ય પરિસરપર્ય્યન્તમ્ આગતાઃ પશ્ચાદ્વયં જલધિતટે જાનુપાતં પ્રાર્થયામહિ।

VI તતઃ પરસ્પરં વિસૃષ્ટાઃ સન્તો વયં પોતં ગતાસ્તે તુ સ્વસ્વગૃહં પ્રત્યાગતવન્તઃ।

VII વયં સોરનગરાત્ નાવા પ્રસ્થાય તલિમાયિનગરમ્ ઉપાતિષ્ઠામ તત્રાસ્માકં સમુદ્રીયમાર્ગસ્યાન્તોઽભવત્ તત્ર ભ્રાતૃગણં નમસ્કૃત્ય દિનમેકં તૈઃ સાર્દ્ધમ્ ઉષતવન્તઃ।

VIII પરે ઽહનિ પૌલસ્તસ્ય સઙ્ગિનો વયઞ્ચ પ્રતિષ્ઠમાનાઃ કૈસરિયાનગરમ્ આગત્ય સુસંવાદપ્રચારકાનાં સપ્તજનાનાં ફિલિપનામ્ન એકસ્ય ગૃહં પ્રવિશ્યાવતિષ્ઠામ।

IX તસ્ય ચતસ્રો દુહિતરોઽનૂઢા ભવિષ્યદ્વાદિન્ય આસન્।

X તત્રાસ્માસુ બહુદિનાનિ પ્રોષિતેષુ યિહૂદીયદેશાદ્ આગત્યાગાબનામા ભવિષ્યદ્વાદી સમુપસ્થિતવાન્।

XI સોસ્માકં સમીપમેત્ય પૌલસ્ય કટિબન્ધનં ગૃહીત્વા નિજહસ્તાપાદાન્ બદ્ધ્વા ભાષિતવાન્ યસ્યેદં કટિબન્ધનં તં યિહૂદીયલોકા યિરૂશાલમનગર ઇત્થં બદ્ધ્વા ભિન્નદેશીયાનાં કરેષુ સમર્પયિષ્યન્તીતિ વાક્યં પવિત્ર આત્મા કથયતિ।

XII એતાદૃશીં કથાં શ્રુત્વા વયં તન્નગરવાસિનો ભ્રાતરશ્ચ યિરૂશાલમં ન યાતું પૌલં વ્યનયામહિ;

XIII કિન્તુ સ પ્રત્યાવાદીત્, યૂયં કિં કુરુથ? કિં ક્રન્દનેન મમાન્તઃકરણં વિદીર્ણં કરિષ્યથ? પ્રભો ર્યીશો ર્નામ્નો નિમિત્તં યિરૂશાલમિ બદ્ધો ભવિતું કેવલ તન્ન પ્રાણાન્ દાતુમપિ સસજ્જોસ્મિ।

XIV તેનાસ્માકં કથાયામ્ અગૃહીતાયામ્ ઈશ્વરસ્ય યથેચ્છા તથૈવ ભવત્વિત્યુક્ત્વા વયં નિરસ્યામ।

XV પરેઽહનિ પાથેયદ્રવ્યાણિ ગૃહીત્વા યિરૂશાલમં પ્રતિ યાત્રામ્ અકુર્મ્મ।

XVI તતઃ કૈસરિયાનગરનિવાસિનઃ કતિપયાઃ શિષ્યા અસ્માભિઃ સાર્દ્ધમ્ ઇત્વા કુપ્રીયેન મ્નાસન્નામ્ના યેન પ્રાચીનશિષ્યેન સાર્દ્ધમ્ અસ્માભિ ર્વસ્તવ્યં તસ્ય સમીપમ્ અસ્માન્ નીતવન્તઃ।

XVII અસ્માસુ યિરૂશાલમ્યુપસ્થિતેષુ તત્રસ્થભ્રાતૃગણોઽસ્માન્ આહ્લાદેન ગૃહીતવાન્।

XVIII પરસ્મિન્ દિવસે પૌલેઽસ્માભિઃ સહ યાકૂબો ગૃહં પ્રવિષ્ટે લોકપ્રાચીનાઃ સર્વ્વે તત્ર પરિષદિ સંસ્થિતાઃ।

XIX અનન્તરં સ તાન્ નત્વા સ્વીયપ્રચારણેન ભિન્નદેશીયાન્ પ્રતીશ્વરો યાનિ કર્મ્માણિ સાધિતવાન્ તદીયાં કથામ્ અનુક્રમાત્ કથિતવાન્।

XX ઇતિ શ્રુત્વા તે પ્રભું ધન્યં પ્રોચ્ય વાક્યમિદમ્ અભાષન્ત, હે ભ્રાત ર્યિહૂદીયાનાં મધ્યે બહુસહસ્રાણિ લોકા વિશ્વાસિન આસતે કિન્તુ તે સર્વ્વે વ્યવસ્થામતાચારિણ એતત્ પ્રત્યક્ષં પશ્યસિ।

XXI શિશૂનાં ત્વક્છેદનાદ્યાચરણં પ્રતિષિધ્ય ત્વં ભિન્નદેશનિવાસિનો યિહૂદીયલોકાન્ મૂસાવાક્યમ્ અશ્રદ્ધાતુમ્ ઉપદિશસીતિ તૈઃ શ્રુતમસ્તિ।

XXII ત્વમત્રાગતોસીતિ વાર્ત્તાં સમાકર્ણ્ય જનનિવહો મિલિત્વાવશ્યમેવાગમિષ્યતિ; અતએવ કિં કરણીયમ્? અત્ર વયં મન્ત્રયિત્વા સમુપાયં ત્વાં વદામસ્તં ત્વમાચર।
XXIII વ્રતં કર્ત્તું કૃતસઙ્કલ્પા યેઽસ્માંક ચત્વારો માનવાઃ સન્તિ
XXIV તાન્ ગૃહીત્વા તૈઃ સહિતઃ સ્વં શુચિં કુરુ તથા તેષાં શિરોમુણ્ડને યો વ્યયો ભવતિ તં ત્વં દેહિ। તથા કૃતે ત્વદીયાચારે યા જનશ્રુતિ ર્જાયતે સાલીકા કિન્તુ ત્વં વિધિં પાલયન્ વ્યવસ્થાનુસારેણેવાચરસીતિ તે ભોત્સન્તે।
XXV ભિન્નદેશીયાનાં વિશ્વાસિલોકાનાં નિકટે વયં પત્રં લિખિત્વેત્થં સ્થિરીકૃતવન્તઃ, દેવપ્રસાદભોજનં રક્તં ગલપીડનમારિતપ્રાણિભોજનં વ્યભિચારશ્ચૈતેભ્યઃ સ્વરક્ષણવ્યતિરેકેણ તેષામન્યવિધિપાલનં કરણીયં ન।
XXVI તતઃ પૌલસ્તાન્ માનુષાનાદાય પરસ્મિન્ દિવસે તૈઃ સહ શુચિ ર્ભૂત્વા મન્દિરં ગત્વા શૌચકર્મ્મણો દિનેષુ સમ્પૂર્ણેષુ તેષામ્ એકૈકાર્થં નૈવેદ્યાદ્યુત્સર્ગો ભવિષ્યતીતિ જ્ઞાપિતવાન્।
XXVII તેષુ સપ્તસુ દિનેષુ સમાપ્તકલ્પેષુ આશિયાદેશનિવાસિનો યિહૂદીયાસ્તં મધ્યેમન્દિરં વિલોક્ય જનનિવહસ્ય મનઃસુ કુપ્રવૃત્તિં જનયિત્વા તં ધૃત્વા
XXVIII પ્રોચ્ચૈઃ પ્રાવોચન્, હે ઇસ્રાયેલ્લોકાઃ સર્વ્વે સાહાય્યં કુરુત। યો મનુજ એતેષાં લોકાનાં મૂસાવ્યવસ્થાયા એતસ્ય સ્થાનસ્યાપિ વિપરીતં સર્વ્વત્ર સર્વ્વાન્ શિક્ષયતિ સ એષઃ; વિશેષતઃ સ ભિન્નદેશીયલોકાન્ મન્દિરમ્ આનીય પવિત્રસ્થાનમેતદ્ અપવિત્રમકરોત્।
XXIX પૂર્વ્વં તે મધ્યેનગરમ્ ઇફિષનગરીયં ત્રફિમં પૌલેન સહિતં દૃષ્ટવન્ત એતસ્માત્ પૌલસ્તં મન્દિરમધ્યમ્ આનયદ્ ઇત્યન્વમિમત।
XXX અતએવ સર્વ્વસ્મિન્ નગરે કલહોત્પન્નત્વાત્ ધાવન્તો લોકા આગત્ય પૌલં ધૃત્વા મન્દિરસ્ય બહિરાકૃષ્યાનયન્ તત્ક્ષણાદ્ દ્વારાણિ સર્વ્વાણિ ચ રુદ્ધાનિ।
XXXI તેષુ તં હન્તુમુદ્યતે ◌ેષુ યિરૂશાલમ્નગરે મહાનુપદ્રવો જાત ઇતિ વાર્ત્તાયાં સહસ્રસેનાપતેઃ કર્ણગોચરીભૂતાયાં સત્યાં સ તત્ક્ષણાત્ સૈન્યાનિ સેનાપતિગણઞ્ચ ગૃહીત્વા જવેનાગતવાન્।
XXXII તતો લોકાઃ સેનાગણેન સહ સહસ્રસેનાપતિમ્ આગચ્છન્તં દૃષ્ટ્વા પૌલતાડનાતો ન્યવર્ત્તન્ત।
XXXIII સ સહસ્રસેનાપતિઃ સન્નિધાવાગમ્ય પૌલં ધૃત્વા શૃઙ્ખલદ્વયેન બદ્ધમ્ આદિશ્ય તાન્ પૃષ્ટવાન્ એષ કઃ? કિં કર્મ્મ ચાયં કૃતવાન્?
XXXIV તતો જનસમૂહસ્ય કશ્ચિદ્ એકપ્રકારં કશ્ચિદ્ અન્યપ્રકારં વાક્યમ્ અરૌત્ સ તત્ર સત્યં જ્ઞાતુમ્ કલહકારણાદ્ અશક્તઃ સન્ તં દુર્ગં નેતુમ્ આજ્ઞાપયત્।
XXXV તેષુ સોપાનસ્યોપરિ પ્રાપ્તેષુ લોકાનાં સાહસકારણાત્ સેનાગણઃ પૌલમુત્તોલ્ય નીતવાન્।
XXXVI તતઃ સર્વ્વે લોકાઃ પશ્ચાદ્ગામિનઃ સન્ત એનં દુરીકુરુતેતિ વાક્યમ્ ઉચ્ચૈરવદન્।
XXXVII પૌલસ્ય દુર્ગાનયનસમયે સ તસ્મૈ સહસ્રસેનાપતયે કથિતવાન્, ભવતઃ પુરસ્તાત્ કથાં કથયિતું કિમ્ અનુમન્યતે? સ તમપૃચ્છત્ ત્વં કિં યૂનાનીયાં ભાષાં જાનાસિ?
XXXVIII યો મિસરીયો જનઃ પૂર્વ્વં વિરોધં કૃત્વા ચત્વારિ સહસ્રાણિ ઘાતકાન્ સઙ્ગિનઃ કૃત્વા વિપિનં ગતવાન્ ત્વં કિં સએવ ન ભવસિ?
XXXIX તદા પૌલોઽકથયત્ અહં કિલિકિયાદેશસ્ય તાર્ષનગરીયો યિહૂદીયો, નાહં સામાન્યનગરીયો માનવઃ; અતએવ વિનયેઽહં લાકાનાં સમક્ષં કથાં કથયિતું મામનુજાનીષ્વ।
XL તેનાનુજ્ઞાતઃ પૌલઃ સોપાનોપરિ તિષ્ઠન્ હસ્તેનેઙ્ગિતં કૃતવાન્, તસ્માત્ સર્વ્વે સુસ્થિરા અભવન્। તદા પૌલ ઇબ્રીયભાષયા કથયિતુમ્ આરભત,

# XXII

I હે પિતૃગણા હે ભ્રાતૃગણાઃ, ઇદાનીં મમ નિવેદને સમવધત્ત।
II તદા સ ઇબ્રીયભાષયા કથાં કથયતીતિ શ્રુત્વા સર્વ્વે લોકા અતીવ નિઃશબ્દા સન્તોઽતિષ્ઠન્।
III પશ્ચાત્ સોઽકથયદ્ અહં યિહૂદીય ઇતિ નિશ્ચયઃ કિલિકિયાદેશસ્ય તાર્ષનગરં મમ જન્મભૂમિઃ,એતન્નગરીયસ્ય ગમિલીયેલનામ્નોઽધ્યાપકસ્ય શિષ્યો ભૂત્વા પૂર્વ્વપુરુષાણાં વિધિવ્યવસ્થાનુસારેણ સમ્પૂર્ણરૂપેણ શિક્ષિતોઽભવમ્ ઇદાનીન્તના યૂયં યાદૃશા ભવથ તાદૃશોઽહમપીશ્વરસેવાયામ્ ઉદ્યોગી જાતઃ।
IV મતમેતદ્ દ્વિષ્ટ્વા તદ્ગ્રાહિનારીપુરુષાન્ કારાયાં બદ્ધ્વા તેષાં પ્રાણનાશપર્ય્યન્તાં વિપક્ષતામ્ અકરવમ્।
V મહાયાજકઃ સભાસદઃ પ્રાચીનલોકાશ્ચ મમૈતસ્યાઃ કથાયાઃ પ્રમાણં દાતું શક્નુવન્તિ, યસ્માત્ તેષાં સમીપાદ્ દમ્મેષકનગરનિવાસિભ્રાતૃગણાર્થમ્ આજ્ઞાપત્રાણિ ગૃહીત્વા યે તત્ર સ્થિતાસ્તાન્ દણ્ડયિતું યિરૂશાલમમ્ આનયનાર્થં દમ્મેષકનગરં ગતોસ્મિ।
VI કિન્તુ ગચ્છન્ તન્નગરસ્ય સમીપં પ્રાપ્તવાન્ તદા દ્વિતીયપ્રહરવેલાયાં સત્યામ્ અકસ્માદ્ ગગણાન્નિર્ગત્ય મહતી દીપ્તિ ર્મમ ચતુર્દિશિ પ્રકાશિતવતી।
VII તતો મયિ ભૂમૌ ◌ૅ પતિતે સતિ, હે શૌલ હે શૌલ કુતો માં તાડયસિ? મામ્પ્રતિ ભાષિત એતાદૃશ એકો રવોપિ મયા શ્રુતઃ।
VIII તદાહં પ્રત્યવદં, હે પ્રભે કો ભવાન્? તતઃ સોઽવાદીત્ યં ત્વં તાડયસિ સ નાસરતીયો યીશુરહં।
IX મમ સઙ્ગિનો લોકાસ્તાં દીપ્તિં દૃષ્ટ્વા ભિયં પ્રાપ્તાઃ, કિન્તુ મામ્પ્રત્યુદિતં તદ્વાક્યં તે ◌ૅ નાબુધ્યન્ત।
X તતઃ પરં પૃષ્ટવાનહં, હે પ્રભો મયા કિં કર્ત્તવ્યં? તતઃ પ્રભુરકથયત્, ઉત્થાય દમ્મેષકનગરં યાહિ ત્વયા યદ્યત્ કર્ત્તવ્યં નિરૂપિતમાસ્તે તત્ તત્ર ત્વં જ્ઞાપયિષ્યસે।
XI અનન્તરં તસ્યાઃ ખરતરદીપ્તેઃ કારણાત્ કિમપિ ન દૃષ્ટ્વા સઙ્ગિગણેન ધૃતહસ્તઃ સન્ દમ્મેષકનગરં વ્રજિતવાન્।
XII તન્નગરનિવાસિનાં સર્વ્વેષાં યિહૂદીયાનાં માન્યો વ્યવસ્થાનુસારેણ ભક્તશ્ચ હનાનીયનામા માનવ એકો
XIII મમ સન્નિધિમ્ એત્ય તિષ્ઠન્ અકથયત્, હે ભ્રાતઃ શૌલ સુદૃષ્ટિ ર્ભવ તસ્મિન્ દણ્ડેઽહં સમ્યક્ તં દૃષ્ટવાન્।

XIV તતઃ સ મહ્યં કથિતવાન્ યથા ત્વમ્ ઈશ્વરસ્યાભિપ્રાયં વેત્સિ તસ્ય શુદ્ધસત્ત્વજનસ્ય દર્શનં પ્રાપ્ય તસ્ય શ્રીમુખસ્ય વાક્યં શૃણોષિ તન્નિમિત્તમ્ અસ્માકં પૂર્વ્વપુરુષાણામ્ ઈશ્વરસ્ત્વાં મનોનીતં કૃતવાનં।

XV યતો યદ્યદ્ અદ્રાક્ષીરશ્રૌષીશ્ચ સર્વ્વેષાં માનવાનાં સમીપે ત્વં તેષાં સાક્ષી ભવિષ્યસિ।

XVI અતએવ કુતો વિલમ્બસે? પ્રભો ર્નામ્ના પ્રાર્થ્ય નિજપાપપ્રક્ષાલનાર્થં મજ્જનાય સમુત્તિષ્ઠ।

XVII તતઃ પરં યિરૂશાલમ્નગરં પ્રત્યાગત્ય મન્દિરેઽહમ્ એકદા પ્રાર્થયે, તસ્મિન્ સમયેઽહમ્ અભિભૂતઃ સન્ પ્રભૂં સાક્ષાત્ પશ્યન્,

XVIII ત્વં ત્વરયા યિરૂશાલમઃ પ્રતિષ્ઠસ્વ યતો લોકામયિ તવ સાક્ષ્યં ન ગ્રહીષ્યન્તિ, મામ્પ્રત્યુદિતં તસ્યેદં વાક્યમ્ અશ્રૌષમ્।

XIX તતોહં પ્રત્યવાદિષમ્ હે પ્રભો પ્રતિભજનભવનં ત્વયિ વિશ્વાસિનો લોકાન્ બદ્ધ્વા પ્રહૃતવાન્,

XX તથા તવ સાક્ષિણઃ સ્તિફાનસ્ય રક્તપાતનસમયે તસ્ય વિનાશં સમ્મન્ય સન્નિધૌ તિષ્ઠન્ હન્તૃલોકાનાં વાસાંસિ રક્ષિતવાન્, એતત્ તે વિદુઃ।

XXI તતઃ સોઽકથયત્ પ્રતિષ્ઠસ્વ ત્વાં દૂરસ્થભિન્નદેશીયાનાં સમીપં પ્રેષયિષ્યે।

XXII તદા લોકા એતાવત્પર્ય્યન્તાં તદીયાં કથાં શ્રુત્વા પ્રોચ્ચૈરકથયન્, એનં ભૂમણ્ડલાદ્ દૂરીકુરુત, એતાદૃશજનસ્ય જીવનં નોચિતમ્।

XXIII ઇત્યુચ્ચૈઃ કથયિત્વા વસનાનિ પરિત્યજ્ય ગગણં પ્રતિ ધૂલીરક્ષિપન્

XXIV તતઃ સહસ્રસેનાપતિઃ પૌલં દુર્ગાભ્યન્તર નેતું સમાદિશત્। એતસ્ય પ્રતિકૂલાઃ સન્તો લોકાઃ કિન્નિમિત્તમ્ એતાવદુચ્ચૈઃસ્વરમ્ અકુર્વ્વન્, એતદ્ વેત્તું તં કશયા પ્રહૃત્ય તસ્ય પરીક્ષાં કર્ત્તુમાદિશત્।

XXV પદાતયશ્ચર્મ્મનિર્મ્મિતરજ્જુભિસ્તસ્ય બન્ધનં કર્ત્તુમુદ્યતાસ્તાસ્તદાનીં પૌલઃ સમ્મુખસ્થિતં શતસેનાપતિમ્ ઉક્તવાન્ દણ્ડાજ્ઞાયામ્ અપ્રાપ્તાયાં કિં રોમિલોકં પ્રહર્ત્તું યુષ્માકમ્ અધિકારોસ્તિ?

XXVI એનાં કથાં શ્રુત્વા સ સહસ્રસેનાપતેઃ સન્નિધિં ગત્વા તાં વાર્ત્તામવદત્ સ રોમિલોક એતસ્માત્ સાવધાનઃ સન્ કર્મ્મ કુરુ।

XXVII તસ્માત્ સહસ્રસેનાપતિ ર્ગત્વા તમપ્રાક્ષીત્ ત્વં કિં રોમિલોકઃ? ઇતિ માં બ્રૂહિ। સોઽકથયત્ સત્યમ્।

XXVIII તતઃ સહસ્રસેનાપતિઃ કથિતવાન્ બહુદ્રવિણં દત્ત્વાહં તત્ પૌરસખ્યં પ્રાપ્તવાન્; કિન્તુ પૌલઃ કથિતવાન્ અહં જનુના તત્ પ્રાપ્તોઽસ્મિ।

XXIX ઇત્થં સતિ યે પ્રહારેણ તં પરીક્ષિતું સમુદ્યતા આસન્ તે તસ્ય સમીપાત્ પ્રાતિષ્ઠન્ત; સહસ્રસેનાપતિસ્તં રોમિલોકં વિજ્ઞાય સ્વયં યત્ તસ્ય બન્ધનમ્ અકાર્ષીત્ તત્કારણાદ્ અબિભેત્।

XXX યિહૂદીયલોકાઃ પૌલં કુતોઽપવદન્તે તસ્ય વૃત્તાન્તં જ્ઞાતું વાઞ્છન્ સહસ્રસેનાપતિઃ પરેઽહનિ પૌલં બન્ધનાત્ મોચયિત્વા પ્રધાનયાજકાન્ મહાસભાયાઃ સર્વ્વલોકાશ્ચ સમુપસ્થાતુમ્ આદિશ્ય તેષાં સન્નિધૌ પૌલમ્ અવરોહ્ય સ્થાપિતવાન્।

# XXIII

I સભાસદ્લોકાન્ પ્રતિ પૌલોઽનન્યદૃષ્ટ્યા પશ્યન્ અકથયત્, હે ભ્રાતૃગણા અદ્ય યાવત્ સરલેન સર્વ્વાન્તઃકરણેનેશ્વરસ્ય સાક્ષાદ્ આચરામિ।

II અનેન હનાનીયનામા મહાયાજકસ્તં કપોલે ચપેટેનાહન્તું સમીપસ્થલોકાન્ આદિષ્ટવાન્।

III તદા પૌલસ્તમવદત્, હે બહિષ્પરિષ્કૃત, ઈશ્વરસ્ત્વાં પ્રહર્ત્તુમ્ ઉદ્યતોસ્તિ, યતો વ્યવસ્થાનુસારેણ વિચારયિતુમ્ ઉપવિશ્ય વ્યવસ્થાં લઙ્ઘિત્વા માં પ્રહર્ત્તુમ્ આજ્ઞાપયસિ।

IV તતો નિકટસ્થા લોકા અકથયન્, ત્વં કિમ્ ઈશ્વરસ્ય મહાયાજકં નિન્દસિ?

V તતઃ પૌલઃ પ્રતિભાષિતવાન્ હે ભ્રાતૃગણ મહાયાજક એષ ઇતિ ન બુદ્ધં મયા તદન્યચ્ચ સ્વલોકાનામ્ અધિપતિં પ્રતિ દુર્વ્વાક્યં મા કથય, એતાદૃશી લિપિરસ્તિ।

VI અનન્તરં પૌલસ્તેષામ્ અર્દ્ધં સિદૂકિલોકા અર્દ્ધં ફિરૂશિલોકા ઇતિ દૃષ્ટ્વા પ્રોચ્ચૈઃ સભાસ્થલોકાન્ અવદત્ હે ભ્રાતૃગણ અહં ફિરૂશિમતાવલમ્બી ફિરૂશિનઃ સત્નાનશ્ચ, મૃતલોકાનામ્ ઉત્થાને પ્રત્યાશાકરણાદ્ અહમપવાદિતોસ્મિ।

VII ઇતિ કથાયાં કથિતાયાં ફિરૂશિસિદૂકિનોઃ પરસ્પરં ભિન્નવાક્યત્વાત્ સભાયા મધ્યે દ્વૌ સંઘૌ જાતૌ।

VIII યતઃ સિદૂકિલોકા ઉત્થાનં સ્વર્ગીયદૂતા આત્માનશ્ચ સર્વ્વેષામ્ એતેષાં કમપિ ન મન્યન્તે, કિન્તુ ફિરૂશિનઃ સર્વ્વમ્ અઙ્ગીકુર્વ્વન્તિ।

IX તતઃ પરસ્પરમ્ અતિશયકોલાહલે સમુપસ્થિતે ફિરૂશિનાં પક્ષીયાઃ સભાસ્થા અધ્યાપકાઃ પ્રતિપક્ષા ઉત્તિષ્ઠન્તો ઽકથયન્, એતસ્ય માનવસ્ય કમપિ દોષં ન પશ્યામઃ; યદિ કશ્ચિદ્ આત્મા વા કશ્ચિદ્ દૂત એનં પ્રત્યાદિશત્ તર્હિ વયમ્ ઈશ્વરસ્ય પ્રાતિકૂલ્યેન ન યોત્સ્યામઃ।

X તસ્માદ્ અતીવ ભિન્નવાક્યત્વે સતિ તે પૌલં ખણ્ડં ખણ્ડં કરિષ્યન્તીત્યાશઙ્કયા સહસ્રસેનાપતિઃ સેનાગણં તત્સ્થાનં યાતું સભાતો બલાત્ પૌલં ધૃત્વા દુર્ગં નેતઞ્ચાજ્ઞાપયત્।

XI રાત્રૌ પ્રભુસ્તસ્ય સમીપે તિષ્ઠન્ કથિતવાન્ હે પૌલ નિર્ભયો ભવ યથા યિરૂશાલમ્નગરે મયિ સાક્ષ્યં દત્તવાન્ તથા રોમાનગરેપિ ત્વયા દાતવ્યમ્।

XII દિને સમુપસ્થિતે સતિ કિયન્તો યિહૂદીયલોકા એકમન્ત્રણાઃ સન્તઃ પૌલં ન હત્વા ભોજનપાને કરિષ્યામ ઇતિ શપથેન સ્વાન્ અબધ્નન્।

XIII ચત્વારિંશજ્જનેભ્યોઽધિકા લોકા ઇતિ પણમ્ અકુર્વ્વન્।

XIV તે મહાયાજકાનાં પ્રાચીનલોકાનાઞ્ચ સમીપં ગત્વા કથયન્, વયં પૌલં ન હત્વા કિમપિ ન ભોક્ષ્યામહે દૃઢેનાનેન શપથેન બદ્ધ્વા અભવામ।

XV અતએવ સામ્પ્રતં સભાસદ્લોકૈઃ સહ વયં તસ્મિન્ કઞ્ચિદ્ વિશેષવિચારં કરિષ્યામસ્તદર્થં ભવાન્ શ્વો ઽસ્માકં સમીપં તમ્ આનયત્વિતિ સહસ્રસેનાપતયે નિવેદનં કુરુત તેન યુષ્માકં સમીપં ઉપસ્થિતેઃ પૂર્વ્વં વયં તં હન્તુ સજ્જિષ્યામ।

XVI તદા પૌલસ્ય ભાગિનેયસ્તેષામિતિ મન્ત્રણાં વિજ્ઞાય દુર્ગં ગત્વા તાં વાર્ત્તાં પૌલમ્ ઉક્તવાન્।

XVII તસ્માત્ પૌલ એકં શતસેનાપતિમ્ આહૂય વાક્યમિદમ્ ભાષિતવાન્ સહસ્રસેનાપતેઃ સમીપેઽસ્ય યુવમનુષ્યસ્ય કિઞ્ચિન્નિવેદનમ્ આસ્તે, તસ્માત્ તત્સવિધમ્ એનં નય।

XVIII તતઃ સ તમાદાય સહસ્રસેનાપતેઃ સમીપમ્ ઉપસ્થાય કથિતવાન્, ભવતઃ સમીપેઽસ્ય કિમપિ નિવેદનમાસ્તે તસ્માત્ બન્દિઃ પૌલો મામાહૂય ભવતઃ સમીપમ્ એનમ્ આનેતું પ્રાર્થિતવાન્।

XIX તદા સહસ્રસેનાપતિસ્તસ્ય હસ્તં ધૃત્વા નિર્જનસ્થાનં નીત્વા પૃષ્ઠવાન્ તવ કિં નિવેદનં? તત્ કથય।

XX તતઃ સોકથયત્, યિહૂદીયલાકાઃ પૌલે કમપિ વિશેષવિચારં છલં કૃત્વા તં સભાં નેતું ભવતઃ સમીપે નિવેદયિતું અમન્ત્રયન્।

XXI કિન્તુ મવતા તન્ન સ્વીકર્ત્તવ્યં યતસ્તેષાં મધ્યેવર્ત્તિનશ્ચત્વારિંશજ્જનેભ્યો ઽધિકલોકા એકમન્ત્રણા ભૂત્વા પૌલં ન હત્વા ભોજનં પાનઞ્ચ ન કરિષ્યામ ઇતિ શપથેન બદ્ધાઃ સન્તો ઘાતકા ઇવ સજ્જિતા ઇદાનીં કેવલં ભવતો ઽનુમતિમ્ અપેક્ષન્તે।

XXII યામિમાં કથાં ત્વં નિવેદિતવાન્ તાં કસ્મૈચિદપિ મા કથયેત્યુક્ત્વા સહસ્રસેનાપતિસ્તં યુવાનં વિસૃષ્ટવાન્।

XXIII અનન્તરં સહસ્રસેનાપતિ ર્દ્વૌ શતસેનાપતી આહૂયેદમ્ આદિશત્, યુવાં રાત્રૌ પ્રહરૈકાવશિષ્ટાયાં સત્યાં કૈસરિયાનગરં યાતું પદાતિસૈન્યાનાં દ્વે શતે ઘોટકારોહિસૈન્યાનાં સપ્તતિં શક્તિધારિસૈન્યાનાં દ્વે શતે ચ જનાન્ સજ્જિતાન્ કુરુતં।

XXIV પૌલમ્ આરોહયિતું ફીલિક્ષાધિપતેઃ સમીપં નિર્વ્વિઘ્નં નેતુઞ્ચ વાહનાનિ સમુપસ્થાપયતં।

XXV અપરં સ પત્રં લિખિત્વા દત્તવાન્ તલ્લિખિતમેતત્,

XXVI મહામહિમશ્રીયુક્તફીલિક્ષાધિપતયે ક્લૌદિયલુષિયસ્ય નમસ્કારઃ।

XXVII યિહૂદીયલોકાઃ પૂર્વ્વમ્ એનં માનવં ધૃત્વા સ્વહસ્તૈ ર્હન્તુમ્ ઉદ્યતા એતસ્મિન્નન્તરે સસૈન્યોહં તત્રોપસ્થાય એષ જનો રોમીય ઇતિ વિજ્ઞાય તં રક્ષિતવાન્।

XXVIII કિન્નિમિત્તં તે તમપવદન્તે તજ્જ્ઞાતું તેષા સભાં તમાનાયિતવાન્।

XXIX તતસ્તેષાં વ્યવસ્થાયા વિરુદ્ધયા કયાચન કથયા સોઽપવાદિતોઽભવત્, કિન્તુ સ શૃઙ્ખલબન્ધનાર્હો વા પ્રાણનાશાર્હો ભવતીદૃશઃ કોપ્યપરાધો મયાસ્ય ન દૃષ્ટઃ।

XXX તથાપિ મનુષ્યસ્યાસ્ય વધાર્થં યિહૂદીયા ઘાતકાઇવ સજ્જિતા એતાં વાર્ત્તાં શ્રુત્વા તત્ક્ષણાત્ તવ સમીપમેનં પ્રેષિતવાન્ અસ્યાપવાદકાંશ્ચ તવ સમીપં ગત્વાપવદિતુમ્ આજ્ઞાપયમ્। ભવતઃ કુશલં ભૂયાત્।

XXXI સૈન્યગણ આજ્ઞાનુસારેણ પૌલં ગૃહીત્વા તસ્યાં રજન્યામ્ આન્તિપાત્રિનગરમ્ આનયત્।

XXXII પરેઽહનિ તેન સહ યાતું ઘોટકારૂઢસૈન્યગણં સ્થાપયિત્વા પરાવૃત્ય દુર્ગં ગતવાન્।

XXXIII તતઃ પરે ઘોટકારોહિસૈન્યગણઃ કૈસરિયાનગરમ્ ઉપસ્થાય તત્પત્રમ્ અધિપતેઃ કરે સમર્પ્ય તસ્ય સમીપે પૌલમ્ ઉપસ્થાપિતવાન્।

XXXIV તદાધિપતિસ્તત્પત્રં પઠિત્વા પૃષ્ઠવાન્ એષ કિમ્પ્રદેશીયો જનઃ? સ કિલિકિયાપ્રદેશીય એકો જન ઇતિ જ્ઞાત્વા કથિતવાન્,

XXXV તવાપવાદકગણ આગતે તવ કથાં શ્રોષ્યામિ। હેરોદ્રાજગૃહે તં સ્થાપયિતુમ્ આદિષ્ટવાન્।

# XXIV

I પઞ્ચભ્યો દિનેભ્યઃ પરં હનાનીયનામા મહાયાજકોઽધિપતેઃ સમક્ષં પૌલસ્ય પ્રાતિકૂલ્યેન નિવેદયિતું તર્તુલ્લનામાનં કઞ્ચન વક્તારં પ્રાચીનજનાંશ્ચ સઙ્ગિનઃ કૃત્વા કૈસરિયાનગરમ્ આગચ્છત્।

II તતઃ પૌલે સમાનીતે સતિ તર્તુલ્લસ્તસ્યાપવાદકથાં કથયિતુમ્ આરભત હે મહામહિમફીલિક્ષ ભવતો વયમ્ અતિનિર્વ્વિઘ્નં કાલં યાપયામો ભવતઃ પરિણામદર્શિતયા એતદ્દેશીયાનાં બહૂનિ મઙ્ગલાનિ ઘટિતાનિ,

III ઇતિ હેતો ર્વયમતિકૃતજ્ઞાઃ સન્તઃ સર્વ્વત્ર સર્વ્વદા ભવતો ગુણાન્ ગાયમઃ।

IV કિન્તુ બહુભિઃ કથાભિ ર્ભવન્તં યેન ન વિરઞ્જયામિ તસ્માદ્ વિનયે ભવાન્ બનુકમ્પ્ય મદલ્પકથાં શૃણોતુ।

V એષ મહામારીસ્વરૂપો નાસરતીયમતગ્રાહિસંઘાતસ્ય મુખ્યો ભૂત્વા સર્વ્વદેશેષુ સર્વ્વેષાં યિહૂદીયાનાં રાજદ્રોહાચરણપ્રવૃત્તિં જનયતીત્યસ્માભિ ર્નિશ્ચિતં।

VI સ મન્દિરમપિ અશુચિ કર્ત્તું ચેષ્ટિતવાન્; ઇતિ કારણાદ્ વયમ્ એનં ધૃત્વા સ્વવ્યવસ્થાનુસારેણ વિચારયિતું પ્રાવર્ત્તામહિ;

VII કિન્તુ લુષિયઃ સહસ્રસેનાપતિરાગત્ય બલાદ્ અસ્માકં કરેભ્ય એનં ગૃહીત્વા

VIII એતસ્યાપવાદકાન્ ભવતઃ સમીપમ્ આગન્તુમ્ આજ્ઞાપયત્। વયં યસ્મિન્ તમપવાદામો ભવતા પદપવાદકથાયાં વિચારિતાયાં સત્યાં સર્વ્વં વૃત્તાન્તં વેદિતું શક્ષ્યતે।

IX તતો યિહૂદીયા અપિ સ્વીકૃત્ય કથિતવન્ત એષા કથા પ્રમાણમ્।

X અધિપતૌ કથાં કથયિતું પૌલં પ્રતીઙ્ગિતં કૃતવતિ સ કથિતવાન્ ભવાન્ બહૂન્ વત્સરાન્ યાવદ્ એતદ્દેશસ્ય શાસનં કરોતીતિ વિજ્ઞાય પ્રત્યુત્તરં દાતુમ્ અક્ષોભોઽભવમ્।

XI અદ્ય કેવલં દ્વાદશ દિનાનિ યાતાનિ, અહમ્ આરાધનાં કર્ત્તું યિરૂશાલમનગરં ગતવાન્ એષા કથા ભવતા જ્ઞાતું શક્યતે;

XII કિન્ત્વિભે માં મધ્યેમન્દિરં કેનાપિ સહ વિતણ્ડાં કુર્વ્વન્તં કુત્રાપિ ભજનભવને નગરે વા લોકાન્ કુપ્રવૃત્તિં જનયન્તું ન દૃષ્ટવન્તઃ।

XIII ઇદાનીં યસ્મિન્ યસ્મિન્ મામ્ અપવદન્તે તસ્ય કિમપિ પ્રમાણં દાતું ન શક્નુવન્તિ।

XIV કિન્તુ ભવિષ્યદ્વાક્યગ્રન્થે વ્યવસ્થાગ્રન્થે ચ યા યા કથા લિખિતાસ્તે તાસુ સર્વ્વાસુ વિશ્વસ્ય યન્મતમ્ ઇમે વિધર્મ્મં જાનન્તિ તન્મતાનુસારેણાહં નિજપિતૃપુરુષાણામ્ ઈશ્વરમ્ આરાધયામીત્યહં ભવતઃ સમક્ષમ્ અઙ્ગીકરોમિ।

XV ધાર્મ્મિકાણામ્ અધાર્મ્મિકાણાઞ્ચ પ્રમીતલોકાનામેવોત્થાનં ભવિષ્યતીતિ કથામિમે સ્વીકુર્વ્વન્તિ તથાહમપિ તસ્મિન્ ઈશ્વરે પ્રત્યાશાં કરોમિ;

XVI ઈશ્વરસ્ય માનવાનાઞ્ચ સમીપે યથા નિર્દોષો ભવામિ તદર્થં સતતં યત્નવાન્ અસ્મિ।

XVII બહુષુ વત્સરેષુ ગતેષુ સ્વદેશીયલોકાનાં નિમિત્તં દાનીયદ્રવ્યાણિ નૈવેદ્યાનિ ચ સમાદાય પુનરાગમનં કૃતવાન્।

XVIII તતોહં શુચિ ર્ભૂત્વા લોકાનાં સમાગમં કલહં વા ન કારિતવાન્ તથાપ્યાશિયાદેશીયાઃ કિયન્તો યિહુદીયલોકા મધ્યેમન્દિરં માં ધૃતવન્તઃ।

XIX મમોપરિ યદિ કાચિદપવાદકથાસ્તિ તર્હિ ભવતઃ સમીપમ્ ઉપસ્થાય તેષામેવ સાક્ષ્યદાનમ્ ઉચિતમ્།

XX નોચેત્ પૂર્વ્વે મહાસભાસ્થાનાં લોકાનાં સન્નિધૌ મમ દણ્ડાયમાનત્વસમયે, અહમદ્ય મૃતાનામુત્થાને યુષ્માભિ ર્વિચારિતોસ્મિ,

XXI તેષાં મધ્યે તિષ્ઠન્નહં યામિમાં કથામુચ્ચૈઃ સ્વરેણ કથિતવાન્ તદન્યો મમ કોપિ દોષોઽલભ્યત ન વેતિ વરમ્ એતે સમુપસ્થિતલોકા વદન્તુ།

XXII તદા ફીલિક્ષ એતાં કથાં શ્રુત્વા તન્મતસ્ય વિશેષવૃત્તાન્તં વિજ્ઞાતું વિચારં સ્થગિતં કૃત્વા કથિતવાન્ લુષિયે સહસ્રસેનાપતૌ સમાયાતે સતિ યુષ્માકં વિચારમ્ અહં નિષ્પાદયિષ્યામિ།

XXIII અનન્તરં બન્ધનં વિના પૌલં રક્ષિતું તસ્ય સેવનાય સાક્ષાત્કરણાય વા તદીયાત્મીયબન્ધુજનાન્ ન વારયિતુઞ્ચ શમસેનાપતિમ્ આદિષ્ટવાન્།

XXIV અલ્પદિનાત્ પરં ફીલિક્ષોઽધિપતિ ર્દ્રુષિલ્લાનામ્ના યિહૂદીયયા સ્વભાર્ય્યયા સહાગત્ય પૌલમાહૂય તસ્ય મુખાત્ ખ્રીષ્ટધર્મ્મસ્ય વૃત્તાન્તમ્ અશ્રૌષીત્།

XXV પૌલેન ન્યાયસ્ય પરિમિતભોગસ્ય ચરમવિચારસ્ય ચ કથાયાં કથિતાયાં સત્યાં ફીલિક્ષઃ કમ્પમાનઃ સન્ વ્યાહરદ્ ઇદાનીં યાહિ, અહમ્ અવકાશં પ્રાપ્ય ત્વામ્ આહૂસ્યામિ།

XXVI મુક્તિપ્રાપ્ત્યર્થં પૌલેન મહ્યં મુદ્રાદાસ્યન્તે ઇતિ પત્યાશાં કૃત્વા સ પુનઃ પુનસ્તમાહૂય તેન સાકં કથોપકથનં કૃતવાન્།

XXVII કિન્તુ વત્સરદ્વયાત્ પરં પર્કિયફીષ્ટ ફાલિક્ષસ્ય પદં પ્રાપ્તે સતિ ફીલિક્ષો યિહૂદીયાન્ સન્તુષ્ટાન્ ચિકીર્ષન્ પૌલં બદ્ધં સંસ્થાપ્ય ગતવાન્།

# XXV

I અનન્તરં ફીષ્ટો નિજરાજ્યમ્ આગત્ય દિનત્રયાત્ પરં કૈસરિયાતો યિરૂશાલમ્નગરમ્ આગમત્།

II તદા મહાયાજકો યિહૂદીયાનાં પ્રધાનલોકાશ્ચ તસ્ય સમક્ષં પૌલમ્ અપાવદન્ત।

III ભવાન્ તં યિરૂશાલમમ્ આનેતુમ્ આજ્ઞાપયત્વિતિ વિનીય તે તસ્માદ્ અનુગ્રહં વાઞ્છિતવન્તઃ।

IV યતઃ પથિમધ્યે ગોપનેન પૌલં હન્તું તૈ ર્ઘાતકા નિયુક્તાઃ। ફીષ્ટ ઉત્તરં દત્તવાન્ પૌલઃ કૈસરિયાયાં સ્થાસ્યતિ પુનરલ્પદિનાત્ પરમ્ અહં તત્ર યાસ્યામિ।

V તતસ્તસ્ય માનુષસ્ય યદિ કશ્ચિદ્ અપરાધસ્તિષ્ઠતિ તર્હિ યુષ્માકં યે શક્નુવન્તિ તે મયા સહ તત્ર ગત્વા તમપવદન્તુ સ એતાં કથાં કથિતવાન્།

VI દશદિવસેભ્યોઽધિકં વિલમ્બ્ય ફીષ્ટસ્તસ્માત્ કૈસરિયાનગરં ગત્વા પરસ્મિન્ દિવસે વિચારાસન ઉપદિશ્ય પૌલમ્ આનેતુમ્ આજ્ઞાપયત્།

VII પૌલે સમુપસ્થિતે સતિ યિરૂશાલમ્નગરાદ્ આગતા યિહૂદીયલોકાસ્તં ચતુર્દિશિ સંવેષ્ટ્ય તસ્ય વિરુદ્ધં બહૂન્ મહાદોષાન્ ઉત્થાપિતવન્તઃ કિન્તુ તેષાં કિમપિ પ્રમાણં દાતું ન શક્નુવન્તઃ।

VIII તતઃ પૌલઃ સ્વસ્મિન્ ઉત્તરમિદમ્ ઉદિતવાન્, યિહૂદીયાનાં વ્યવસ્થાયા મન્દિરસ્ય કૈસરસ્ય વા પ્રતિકૂલં કિમપિ કર્મ્મ નાહં કૃતવાન્।

IX કિન્તુ ફીષ્ટો યિહૂદીયાન્ સન્તુષ્ટાન્ કર્ત્તુમ્ અભિલષન્ પૌલમ્ અભાષત ત્વં કિં યિરૂશાલમં ગત્વાસ્મિન્ અભિયોગે મમ સાક્ષાદ્ વિચારિતો ભવિષ્યસિ?

X તતઃ પૌલ ઉત્તરં પ્રોક્તવાન્, યત્ર મમ વિચારો ભવિતું યોગ્યઃ કૈસરસ્ય તત્ર વિચારાસન એવ સમુપસ્થિતોસ્મિ; અહં યિહૂદીયાનાં કામપિ હાનિં નાકાર્ષમ્ ઇતિ ભવાન્ યથાર્થતો વિજાનાતિ।

XI કઞ્ચિદપરાધં કિઞ્ચન વધાર્હં કર્મ્મ વા યદ્યહમ્ અકરિષ્યં તર્હિ પ્રાણહનનદણ્ડમપિ ભોક્તુમ્ ઉદ્યતોઽભવિષ્યં, કિન્તુ તે મમ સમપવાદં કુર્વ્વન્તિ સ યદિ કલ્પિતમાત્રો ભવતિ તર્હિ તેષાં કરેષુ માં સમર્પયિતું કસ્યાપ્યધિકારો નાસ્તિ, કૈસરસ્ય નિકટે મમ વિચારો ભવતુ།

XII તદા ફીષ્ટો મન્ત્રિભિઃ સાર્દ્ધં સંમન્ત્ર્ય પૌલાય કથિતવાન્, કૈસરસ્ય નિકટે કિં તવ વિચારો ભવિષ્યતિ? કૈસરસ્ય સમીપં ગમિષ્યસિ।

XIII કિયદ્દિનેભ્યઃ પરમ્ આગ્રિપ્પરાજા બર્ણીકી ચ ફીષ્ટં સાક્ષાત્ કર્ત્તું કૈસરિયાનગરમ્ આગતવન્તૌ।

XIV તદા તૌ બહુદિનાનિ તત્ર સ્થિતૌ તતઃ ફીષ્ટસ્તં રાજાનં પૌલસ્ય કથાં વિજ્ઞાપ્ય કથયિતુમ્ આરભત પૌલનામાનમ્ એકં બન્દિ ફીલિક્ષો બદ્ધં સંસ્થાપ્ય ગતવાન્།

XV યિરૂશાલમિ મમ સ્થિતિકાલે મહાયાજકો યિહૂદીયાનાં પ્રાચીનલોકાશ્ચ તમ્ અપોદ્ય તમ્પ્રતિ દણ્ડાજ્ઞાં પ્રાર્થયન્ત।

XVI તતોહમ્ ઇત્યુત્તરમ્ અવદં યાવદ્ અપોદિતો જનઃ સ્વાપવાદકાન્ સાક્ષાત્ કૃત્વા સ્વસ્મિન્ યોઽપરાધ આરોપિતસ્તસ્ય પ્રત્યુત્તરં દાતું સુયોગં ન પ્રાપ્નોતિ, તાવત્કાલં કસ્યાપિ માનુષસ્ય પ્રાણનાશાજ્ઞાપનં રોમિલોકાનાં રીતિ ર્નહિ।

XVII તતસ્તેષ્વત્રાગતેષુ પરસ્મિન્ દિવસેઽહમ્ અવિલમ્બં વિચારાસન ઉપવિશ્ય તં માનુષમ્ આનેતુમ્ આજ્ઞાપયમ્།

XVIII તદનન્તરં તસ્યાપવાદકા ઉપસ્થાય યાદૃશમ્ અહં ચિન્તિતવાન્ તાદૃશં કઞ્ચન મહાપવાદં નોત્થાપ્ય

XIX સ્વેષાં મતે તથા પૌલો યં સજીવં વદતિ તસ્મિન્ યીશુનામનિ મૃતજને ચ તસ્ય વિરુદ્ધં કથિતવન્તઃ।

XX તતોહં તાદૃગ્વિચારે સંશયાનઃ સન્ કથિતવાન્ ત્વં યિરૂશાલમં ગત્વા કિં તત્ર વિચારિતો ભવિતુમ્ ઇચ્છસિ?

XXI તદા પૌલો મહારાજસ્ય નિકટે વિચારિતો ભવિતું પ્રાર્થયત, તસ્માદ્ યાવત્કાલં તં કૈસરસ્ય સમીપં પ્રેષયિતું ન શક્નોમિ તાવત્કાલં તમત્ર સ્થાપયિતુમ્ આદિષ્ટવાન્།

XXII તત આગ્રિપ્પઃ ફીષ્ટમ્ ઉક્તવાન્, અહમપિ તસ્ય માનુષસ્ય કથાં શ્રોતુમ્ અભિલષામિ। તદા ફીષ્ટો વ્યાહરત્ શ્વસ્તદીયાં કથાં ત્વં શ્રોષ્યસિ।

XXIII પરસ્મિન્ દિવસે આગ્રિપ્પો બર્ણીકી ચ મહાસમાગમં કૃત્વા પ્રધાનવાહિનીપતિભિ ર્નગરસ્થપ્રધાનલોકૈશ્ચ સહ મિલિત્વા રાજગૃહમાગત્ય સમુપસ્થિતૌ તદા ફીષ્ટસ્યાજ્ઞયા પૌલ આનીતોઽભવત્།

XXIV તદા ફીષ્ટઃ કથિતવાન્ હે રાજન્ આગ્રિપ્પ હે ઉપસ્થિતાઃ સર્વ્વે લોકા યિરૂશાલમ્નગરે યિહૂદીયલોકસમૂહો યસ્મિન્ માનુષે મમ સમીપે નિવેદનં કૃત્વા પ્રોચ્ચૈઃ કથામિમાં કથિતવાન્ પુનરલ્પકાલમપિ તસ્ય જીવનં નોચિતં તમેતં માનુષં પશ્યત।

XXV કિન્ત્વેષ જનઃ પ્રાણનાશર્હં કિમપિ કર્મ્મ ન કૃતવાન્ ઇત્યજાનાં તથાપિ સ મહારાજસ્ય સન્નિધૌ વિચારિતો ભવિતું પ્રાર્થયત તસ્માત્ તસ્ય સમીપં તં પ્રેષયિતું મતિમકરવમ્।

XXVI કિન્તુ શ્રીયુક્તસ્ય સમીપમ્ એતસ્મિન્ કિં લેખનીયમ્ ઇત્યસ્ય કસ્યચિન્ નિર્ણયસ્ય ન જાતત્વાદ્ એતસ્ય વિચારે સતિ યથાહં લેખિતું કિઞ્ચન નિશ્ચિતં પ્રાપ્નોમિ તદર્થં યુષ્માકં સમક્ષં વિશેષતો હે આગ્રિપ્પરાજ ભવતઃ સમક્ષમ્ એતમ્ આનયે।

XXVII યતો બન્દિપ્રેષણસમયે તસ્યાભિયોગસ્ય કિઞ્ચિદલેખનમ્ અહમ્ અયુક્તં જાનામિ।

# XXVI

I તત આગ્રિપ્પઃ પૌલમ્ અવાદીત્, નિજાં કથાં કથયિતું તુભ્યમ્ અનુમતિ દીયતે। તસ્માત્ પૌલઃ કરં પ્રસાર્ય્ય સ્વસ્મિન્ ઉત્તરમ્ અવાદીત્।

II હે આગ્રિપ્પરાજ યત્કારણાદહં યિહૂદીયૈરપવાદિતો ઽભવં તસ્ય વૃત્તાન્તમ્ અદ્ય ભવતઃ સાક્ષાન્ નિવેદયિતુમનુમતોહમ્ ઇદં સ્વીયં પરમં ભાગ્યં મન્યે;

III યતો યિહૂદીયલોકાનાં મધ્યે યા યા રીતિઃ સૂક્ષ્મવિચારાશ્ચ સન્તિ તેષુ ભવાન્ વિજ્ઞતમઃ; અતએવ પ્રાર્થયે ધૈર્ય્યમવલમ્બ્ય મમ નિવેદનં શૃણોતુ।

IV અહં યિરૂશાલમ્નગરે સ્વદેશીયલોકાનાં મધ્યે તિષ્ઠન્ આ યૌવનકાલાદ્ યદ્રૂપમ્ આચરિતવાન્ તદ્ યિહૂદીયલોકાઃ સર્વ્વે વિદન્તિ।

V અસ્માકં સર્વ્વેભ્યઃ શુદ્ધતમં યત્ ફિરૂશીયમતં તદવલમ્બી ભૂત્વાહં કાલં યાપિતવાન્ યે જના આ બાલ્યકાલાન્ માં જાનાન્તિ તે એતાદૃશં સાક્ષ્યં યદિ દદાતિ તર્હિ દાતું શક્નુવન્તિ।

VI કિન્તુ હે આગ્રિપ્પરાજ ઈશ્વરોઽસ્માકં પૂર્વ્વપુરુષાણાં નિકટે યદ્ અઙ્ગીકૃતવાન્ તસ્ય પ્રત્યાશાહેતોરહમ્ ઇદાનીં વિચારસ્થાને દણ્ડાયમાનોસ્મિ।

VII તસ્યાઙ્ગીકારસ્ય ફલં પ્રાપ્તુમ્ અસ્માકં દ્વાદશવંશા દિવાનિશં મહાયત્નાદ્ ઈશ્વરસેવનં કૃત્વા યાં પ્રત્યાશાં કુર્વ્વન્તિ તસ્યાઃ પ્રત્યાશાયા હેતોરહં યિહૂદીયૈરપવાદિતોઽભવમ્।

VIII ઈશ્વરો મૃતાન્ ઉત્થાપયિષ્યતીતિ વાક્યં યુષ્માકં નિકટેઽસમ્ભવં કુતો ભવેત્?

IX નાસરતીયયીશો ર્નામ્નો વિરુદ્ધં નાનાપ્રકારપ્રતિકૂલાચરણમ્ ઉચિતમ્ ઇત્યહં મનસિ યથાર્થં વિજ્ઞાય

X યિરૂશાલમનગરે તદકરવં ફલતઃ પ્રધાનયાજકસ્ય નિકટાત્ ક્ષમતાં પ્રાપ્ય બહૂન્ પવિત્રલોકાન્ કારાયાં બદ્ધવાન્ વિશેષતસ્તેષાં હનનસમયે તેષાં વિરુદ્ધાં નિજાં સમ્મતિં પ્રકાશિતવાન્।

XI વારં વારં ભજનભવનેષુ તેભ્યો દણ્ડં પ્રદત્તવાન્ બલાત્ તં ધર્મ્મં નિન્દયિતવાંશ્ચ પુનશ્ચ તાન્ પ્રતિ મહાક્રોધાદ્ ઉન્મત્તઃ સન્ વિદેશીયનગરાણિ યાવત્ તાન્ તાડિતવાન્।

XII ઇત્થં પ્રધાનયાજકસ્ય સમીપાત્ શક્તિમ્ આજ્ઞાપત્રઞ્ચ લબ્ધ્વા દમ્મેષક્નગરં ગતવાન્।

XIII તદાહં હે રાજન્ માર્ગમધ્યે મધ્યાહ્નકાલે મમ મદીયસઙ્ગિનાં લોકાનાઞ્ચ ચતસૃષુ દિક્ષુ ગગણાત્ પ્રકાશમાનાં ભાસ્કરતોપિ તેજસ્વતીં દીપ્તિં દૃષ્ટવાન્।

XIV તસ્માદ્ અસ્માસુ સર્વ્વેષુ ભૂમૌ પતિતેષુ સત્સુ હે શૌલ હૈ શૌલ કુતો માં તાડયસિ? કણ્ટકાનાં મુખે પાદાહનનં તવ દુઃસાધ્યમ્ ઇબ્રીયભાષયા ગદિત એતાદૃશ એકઃ શબ્દો મયા શ્રુતઃ।

XV તદાહં પૃષ્ટવાન્ હે પ્રભો કો ભવાન્? તતઃ સ કથિતવાન્ યં યીશું ત્વં તાડયસિ સોહં,

XVI કિન્તુ સમુત્તિષ્ઠ ત્વં યદ્ દૃષ્ટવાન્ ઇતઃ પુનઞ્ચ યદ્યત્ ત્વાં દર્શયિષ્યામિ તેષાં સર્વ્વેષાં કાર્ય્યાણાં ત્વાં સાક્ષિણં મમ સેવકઞ્ચ કર્ત્તુમ્ દર્શનમ્ અદામ્।

XVII વિશેષતો યિહૂદીયલોકેભ્યો ભિન્નજાતીયેભ્યશ્ચ ત્વાં મનોનીતં કૃત્વા તેષાં યથા પાપમોચનં ભવતિ

XVIII યથા તે મયિ વિશ્વસ્ય પવિત્રીકૃતાનાં મધ્યે ભાગં પ્રાપ્નુવન્તિ તદભિપ્રાયેણ તેષાં જ્ઞાનચક્ષૂંષિ પ્રસન્નાનિ કર્ત્તું તથાન્ધકારાદ્ દીપ્તિં પ્રતિ શૈતાનાધિકારાચ્ચ ઈશ્વરં પ્રતિ મતીઃ પરાવર્ત્તયિતું તેષાં સમીપં ત્વાં પ્રેષ્યામિ।

XIX હે આગ્રિપ્પરાજ એતાદૃશં સ્વર્ગીયપ્રત્યાદેશં અગ્રાહ્યમ્ અકૃત્વાહં

XX પ્રથમતો દમ્મેષક્નગરે તતો યિરૂશાલમિ સર્વ્વસ્મિન્ યિહૂદીયદેશે અન્યેષુ દેશેષુ ચ યે ◌ન લોકા મતિં પરાવર્ત્ત્ય ઈશ્વરં પ્રતિ પરાવર્ત્તયન્તે, મનઃપરાવર્ત્તનયોગ્યાનિ કર્મ્માણિ ચ કુર્વ્વન્તિ તાદૃશમ્ ઉપદેશં પ્રચારિતવાન્।

XXI એતત્કારણાદ્ યિહૂદીયા મધ્યેમન્દિરં માં ધૃત્વા હન્તુમ્ ઉદ્યતાઃ।

XXII તથાપિ ખ્રીષ્ટો દુઃખં ભુક્ત્વા સર્વ્વેષાં પૂર્વ્વં શ્મશાનાદ્ ઉત્થાય નિજદેશીયાનાં ભિન્નદેશીયાનાઞ્ચ સમીપે દીપ્તિં પ્રકાશયિષ્યતિ

XXIII ભવિષ્યદ્વાદિગણો મૂસાશ્ચ ભાવિકાર્ય્યસ્ય યદિદં પ્રમાણમ્ અદદુરેતદ્ વિનાન્યાં કથાં ન કથયિત્વા ઈશ્વરાદ્ અનુગ્રહં લબ્ધ્વા મહતાં ક્ષુદ્રાણાઞ્ચ સર્વ્વેષાં સમીપે પ્રમાણં દત્ત્વાદ્ય યાવત્ તિષ્ઠામિ।

XXIV તસ્યમાં કથાં નિશમ્ય ફીષ્ટ ઉચ્ચૈઃ સ્વરેણ કથિતવાન્ હે પૌલ ત્વમ્ ઉન્મત્તોસિ બહુવિદ્યાભ્યાસેન ત્વં હતજ્ઞાનો જાતઃ।

XXV સ ઉક્તવાન્ હે મહામહિમ ફીષ્ટ નાહમ્ ઉન્મત્તઃ કિન્તુ સત્યં વિવેચનીયઞ્ચ વાક્યં પ્રસ્તૌમિ।

XXVI યસ્ય સાક્ષાદ્ અક્ષોભઃ સન્ કથાં કથયામિ સ રાજા તદ્વૃત્તાન્તં જાનાતિ તસ્ય સમીપે કિમપિ ગુપ્તં નેતિ મયા નિશ્ચિતં બુધ્યતે યતસ્તદ્ વિજને ન કૃતં।

XXVII હે આગ્રિપ્પરાજ ભવાન્ કિં ભવિષ્યદ્વાદિગણોક્તાનિ વાક્યાનિ પ્રત્યેતિ? ભવાન્ પ્રત્યેતિ તદહં જાનામિ।

XXVIII તત આગ્રિપ્પઃ પૌલમ્ અભિહિતવાન્ ત્વં પ્રવૃત્તિં જનયિત્વા પ્રાયેણ મામપિ ખ્રીષ્ટીયં કરોષિ।

XXIX તતઃ સોઽવાદીત્ ભવાન્ યે યે લોકાશ્ચ મમ કથામ્ અદ્ય શૃણ્વન્તિ પ્રાયેણ ઇતિ નહિ કિન્ત્વેતત્ શૃઙ્ખલબન્ધનં વિના સર્વ્વથા તે સર્વ્વે માદૃશા ભવન્ત્વિતીશ્વરસ્ય સમીપે પ્રાર્થયેઽહમ્।

XXX એતસ્યાં કથાયાં કથિતાયાં સ રાજા સોઽધિપતિ ર્બર્ણીકી સભાસ્થા લોકાશ્ચ તસ્માદ્ ઉત્થાય
XXXI ગોપને પરસ્પરં વિવિચ્ય કથિતવન્ત એષ જનો બન્ધનાર્હં પ્રાણહનનાર્હં વા કિમપિ કર્મ્મ નાકરોત્|
XXXII તત આગ્રિપ્પઃ ફીષ્টম্ অবদত্, যদ্যেষ માનુષઃ કૈસરસ્ય નિકટે વિચારિતો ભવિતું ન પ્રાર્થયિષ્યત્ તર્હિ મુક્તો ભવિતુમ્
અશક્ષ્યત્|

# XXVII

I જલપથેનાસ્માકમ્ ઇતોલિયાદેશં પ્રતિ યાત્રાયાં નિશ્ચિતાયાં સત્યાં તે યૂલિયનામ્નો મહારાજસ્ય સંઘાતાન્તર્ગતસ્ય સેનાપતેઃ
સમીપે પૌલં તદન્યાન્ કતિનયજનાંશ્ચ સમાર્પયન્|
II વયમ્ આદ્રામુત્તીયં પોતમેકમ્ આરુહ્ય આશિયાદેશસ્ય તટસમીપેન યાતું મતિં કૃત્વા લઙ્ગરમ્ ઉત્થાપ્ય પોતમ્ અમોચયામ;
માકિદનિયાદેશસ્થથિષલનીકીનિવાસ્યારિસ્તાર્ખનામા કશ્ચિદ્ જનોઽસ્માભિઃ સાર્દ્ધમ્ આસીત્|
III પરસ્મિન્ દિવસે ઽસ્માભિઃ સીદોન્નગરે પોતે લાગિતે તત્ર યૂલિયઃ સેનાપતિઃ પૌલં પ્રતિ સૌજન્યં પ્રદર્શ્ય સાન્ત્વનાર્થં
બન્ધુબાન્ધવાન્ ઉપયાતુમ્ અનુજજ્ઞૌ|
IV તસ્માત્ પોતે મોચિતે સતિ સમ્મુખવાયોઃ સમ્ભવાદ્ વયં કુપ્રોપદ્વીપસ્ય તીરસમીપેન ગતવન્તઃ|
V કિલિકિયાયાઃ પામ્ફૂલિયાયાશ્ચ સમુદ્રસ્ય પારં ગત્વા લૂકિયાદેશાન્તર્ગતં મુરાનગરમ્ ઉપાતિષ્ઠામ|
VI તત્સ્થાનાદ્ ઇતાલિયાદેશં ગચ્છતિ યઃ સિકન્દરિયાનગરસ્ય પોતસ્તં તત્ર પ્રાપ્ય શતસેનાપતિસ્તં પોતમ્ અસ્માન્ આરોહયત્|
VII તતઃ પરં બહૂનિ દિનાનિ શનૈઃ શનૈ ર્ગત્વા ક્નીદપાર્શ્વોપસ્થિતાઃ પૂર્વ્વં પ્રતિકૂલેન પવનેન વયં સલ્મોન્યાઃ સમ્મુખમ્ ઉપસ્થાય
ક્રીત્યુપદ્વીપસ્ય તીરસમીપેન ગતવન્તઃ|
VIII કષ્ટેન તમુત્તીર્ય્ય લાસેયાનગરસ્યાધઃ સુન્દરનામકં ખાતમ્ ઉપાતિષ્ઠામ|
IX ઇત્થં બહુતિથઃ કાલો યાપિત ઉપવાસદિનઞ્ચાતીતં, તત્કારણાત્ નૌવર્ત્મનિ ભયઙ્કરે સતિ પૌલો વિનયેન કથિતવાન્,
X હે મહેચ્છા અહં નિશ્ચયં જાનામિ યાત્રાયામસ્યામ્ અસ્માકં ક્લેશા બહૂનામપચયાશ્ચ ભવિષ્યન્તિ, તે કેવલં પોતસામગ્ર્યોરિતિ
નહિ, કિન્ત્વસ્માકં પ્રાણાનામપિ|
XI તદા શતસેનાપતિઃ પૌલોક્તવાક્યતોપિ કર્ણધારસ્ય પોતવણિજશ્ચ વાક્યં બહુમંસ્ત|
XII તત્ ખાતં શીતકાલે વાસાર્હસ્થાનં ન તસ્માદ્ અવાચીપ્રતીચોર્દિશોઃ ક્રીત્યાઃ ફૈનીકિયખાતં યાતું યદિ શક્નુવન્તસ્તર્હિ તત્ર
શીતકાલં યાપયિતું પ્રાયેણ સર્વ્વે મન્ત્રયામાસુઃ|
XIII તતઃ પરં દક્ષિણવાયુ ર્મન્દં વહતીતિ વિલોક્ય નિજાભિપ્રાયસ્ય સિદ્ધેઃ સુયોગો ભવતીતિ બુદ્ધ્વા પોતં મોચયિત્વા
ક્રીત્યુપદ્વીપસ્ય તીરસમીપેન ચલિતવન્તઃ|
XIV કિન્ત્વલ્પક્ષણાત્ પરમેવ ઉરક્લુદોન્નામા પ્રતિકૂલઃ પ્રચણ્ડો વાયુ ર્વહન્ પોતેઽલગીત્
XV તસ્યાભિમુખં ગન્તુમ્ પોતસ્યાશક્તત્વાદ્ વયં વાયુના સ્વયં નીતાઃ|
XVI અનન્તરં ક્લૌદીનામ્ન ઉપદ્વીપસ્ય કૂલસમીપેન પોતં ગમયિત્વા બહુના કષ્ટેન ક્ષુદ્રનાવમ્ અરક્ષામ|
XVII તે તામારુહ્ય રજ્જ્વા પોતસ્યાધોભાગમ્ અબધ્નન્ તદનન્તરં ચેત્ પોતો સૈકતે લગતીતિ ભયાદ્ વાતવસનાન્યમોચયન્
તતઃ પોતો વાયુના ચાલિતઃ|
XVIII કિન્તુ ક્રમશો વાયોઃ પ્રબલત્વાત્ પોતો દોલાયમાનોઽભવત્ પરસ્મિન્ દિવસે પોતસ્થાનિ કતિપયાનિ દ્રવ્યાણિ તોયે
નિક્ષિપ્તાનિ|
XIX તૃતીયદિવસે વયં સ્વહસ્તૈઃ પોતસજ્જનદ્રવ્યાણિ નિક્ષિપ્તવન્તઃ|
XX તતો બહુદિનાનિ યાવત્ સૂર્ય્યનક્ષત્રાદીનિ સમાચ્છન્નાનિ તતો ઽતીવ વાત્યાગમાદ્ અસ્માકં પ્રાણરક્ષાયાઃ કાપિ પ્રત્યાશા
નાતિષ્ઠત્|
XXI બહુદિનેષુ લોકૈરનાહારેણ યાપિતેષુ સર્વ્વેષાં સાક્ષત્ પૌલસ્તિષ્ઠન્ અકથયત્, હે મહેચ્છાઃ ક્રીત્યુપદ્વીપાત્ પોતં ન મોચયિતુમ્
અહં પૂર્વ્વં યદ્ અવદં તદ્ગ્રહણં યુષ્માકમ્ ઉચિતમ્ આસીત્ તથા કૃતે યુષ્માકમ્ એષા વિપદ્ એષોઽપચયશ્ચ નાઘટિષ્યેતામ્|
XXII કિન્તુ સામ્પ્રતં યુષ્માન્ વિનીય બ્રવીમ્યહં, યૂયં ન ક્ષુભ્યત યુષ્માકમ્ એકસ્યાપિ પ્રાણિનો હાનિ ર્ન ભવિષ્યતિ, કેવલસ્ય
પોતસ્ય હાનિ ર્ભવિષ્યતિ|
XXIII યતો યસ્યેશ્વરસ્ય લોકોઽહં યઞ્ચાહં પરિચરામિ તદીય એકો દૂતો હ્યો રાત્રૌ મમાન્તિકે તિષ્ઠન્ કથિતવાન્,
XXIV હે પૌલ મા ભૈષીઃ કૈસરસ્ય સમ્મુખે ત્વયોપસ્થાતવ્યં; તવૈતાન્ સઙ્ગિનો લોકાન્ ઈશ્વરસ્તુભ્યં દત્તવાન્|
XXV અતએવ હે મહેચ્છા યૂયં સ્થિરમનસો ભવત મહ્યં યા કથાકથિ સાવશ્યં ઘટિષ્યતે મમૈતાદૃશી વિશ્વાસ ઈશ્વરે વિદ્યતે,
XXVI કિન્તુ કસ્યચિદ્ ઉપદ્વીપસ્યોપરિ પતિતવ્યમ્ અસ્માભિઃ|
XXVII તતઃ પરમ્ આદ્રિયાસમુદ્રે પોતસ્તથૈવ દોલાયમાનઃ સન્ ઇતસ્તતો ગચ્છન્ ચતુર્દશદિવસસ્ય રાત્રે ર્દ્વિતીયપ્રહરસમયે
કસ્યચિત્ સ્થલસ્ય સમીપમુપતિષ્ઠતીતિ પોતીયલોકા અન્વમન્યન્ત|
XXVIII તતસ્તે જલં પરિમાય તત્ર વિંશતિ ર્વ્યામા જલાનીતિ જ્ઞાતવન્તઃ| કિઞ્ચિદ્દૂરં ગત્વા પુનરપિ જલં પરિમિતવન્તઃ| તત્ર પઞ્ચદશ
વ્યામા જલાનિ દૃષ્ટ્વા
XXIX ચેત્ પાષાણે લગતીતિ ભયાત્ પોતસ્ય પશ્ચાદ્ભાગતશ્ચતુરો લઙ્ગરાન્ નિક્ષિપ્ય દિવાકરમ્ અપેક્ષ્ય સર્વ્વે સ્થિતવન્તઃ|
XXX કિન્તુ પોતીયલોકાઃ પોતાગ્રભાગે લઙ્ગરનિક્ષેપં છલં કૃત્વા જલધૌ ક્ષુદ્રનાવમ્ અવરોહ્ય પલાયિતુમ્ અચેષ્ટન્ત|
XXXI તતઃ પૌલઃ સેનાપતયે સૈન્યગણાય ચ કથિતવાન્, એતે યદિ પોતમધ્યે ન તિષ્ઠન્તિ તર્હિ યુષ્માકં રક્ષણં ન શક્યં|
XXXII તદા સેનાગણો રજ્જૂન્ છિત્વા નાવં જલે પતિતુમ્ અદદાત્|
XXXIII પ્રભાતસમયે પૌલઃ સર્વ્વાન્ જનાન્ ભોજનાર્થં પ્રાર્થ્ય વ્યાહરત્, અદ્ય ચતુર્દશદિનાનિ યાવદ્ યૂયમ્ અપેક્ષમાના અનાહારાઃ
કાલમ્ અયાપયત કિમપિ નાભુંગ્ધ|
XXXIV અતો વિનયેઽહં ભક્ષ્યં ભુજ્યતાં તતો યુષ્માકં મઙ્ગલં ભવિષ્યતિ, યુષ્માકં કસ્યચિજ્જનસ્ય શિરસઃ કેશૈકોપિ ન નંક્ષ્યતિ|

XXXV ઇતિ વ્યાહૃત્ય પૌલં પૂપં ગૃહીત્વેશ્વરં ધન્યં ભાષમાણસ્તં ભંક્ત્વા ભોક્તુમ્ આરબ્ધવાન્|
XXXVI અનન્તરં સર્વ્વે ચ સુસ્થિરાઃ સન્તઃ ખાદ્યાનિ પર્ય્યગૃહ્લન્|
XXXVII અસ્માકં પોતે ષટ્સપ્તત્યધિકશતદ્વયલોકા આસન્|
XXXVIII સર્વ્વેષુ લોકેષુ યથેષ્ટં ભુક્તવત્સુ પોતસ્થન્ ગોધૂમાન્ જલધૌ નિક્ષિપ્ય તૈઃ પોતસ્ય ભારો લઘૂકૃતઃ|
XXXIX દિને જાતેઽપિ સ કો દેશ ઇતિ તદા ન પર્ય્યચીયત; કિન્તુ તત્ર સમતટમ્ એકં ખાતં દૃષ્ટ્વા યદિ શક્નુમસ્તર્હિ વયં
તસ્યાભ્યન્તરં પોતં ગમયામ ઇતિ મતિં કૃત્વા તે લઙ્ગરાન્ છિત્ત્વા જલધૌ ત્યક્તવન્તઃ|
XL તથા કર્ણબન્ધનં મોચયિત્વા પ્રધાનં વાતવસનમ્ ઉત્તોલ્ય તીરસમીપં ગતવન્તઃ|
XLI કિન્તુ દ્વયોઃ સમુદ્રયોઃ સઙ્ગમસ્થાને સૈકતોપરિ પોતે નિક્ષિપ્તે ઽગ્રભાગે બાધિતે પશ્ચાદ્ભાગે પ્રબલતરઙ્ગોઽલગત્ તેન પોતો ભગ્નઃ|
XLII તસ્માદ્ બન્દયશ્ચેદ્ બાહુભિસ્તરન્તઃ પલાયન્તે ઇત્યાશઙ્કયા સેનાગણસ્તાન્ હન્તુમ્ અમન્ત્રયત્;
XLIII કિન્તુ શતસેનાપતિઃ પૌલં રક્ષિતું પ્રયત્નં કૃત્વા તાન્ તચ્ચેષ્ટાયા નિવર્ત્ય ઇત્યાદિષ્ટવાન્, યે બાહુતરણં જાનન્તિ તેઽગ્રે
પ્રોલ્લમ્ફ્ય સમુદ્રે પતિત્વા બાહુભિસ્તીર્ત્વા કૂલં યાન્તુ|
XLIV અપરમ્ અવશિષ્ટા જનાઃ કાષ્ઠં પોતીયં દ્રવ્યં વા યેન યત્ પ્રાપ્યતે તદવલમ્બ્ય યાન્તુ; ઇત્થં સર્વ્વે ભૂમિં પ્રાપ્ય પ્રાણૈ ર્જીવિતાઃ|

# XXVIII

I ઇત્થં સર્વ્વેષુ રક્ષાં પ્રાપ્તેષુ તત્રત્યોપદ્વીપસ્ય નામ મિલીતેતિ તે જ્ઞાતવન્તઃ|
II અસભ્યલોકા યથેષ્ટમ્ અનુકમ્પાં કૃત્વા વર્ત્તમાનવૃષ્ટેઃ શીતાચ્ચ વહ્નિં પ્રજ્જ્વાલ્યાસ્માકમ્ આતિથ્યમ્ અકુર્વ્વન્|
III કિન્તુ પૌલ ઇન્ધનાનિ સંગૃહ્ય યદા તસ્મિન્ અગ્નૌ નિરક્ષિપત્, તદા વહ્નેઃ પ્રતાપાત્ એકઃ કૃષ્ણસર્પો નિર્ગત્ય તસ્ય હસ્તે દ્રષ્ટવાન્|
IV તેઽસભ્યલોકાસ્તસ્ય હસ્તે સર્પમ્ અવલમ્બમાનં દૃષ્ટ્વા પરસ્પરમ્ ઉક્તવન્ત એષ જનોઽવશ્યં નરહા ભવિષ્યતિ, યતો યદ્યપિ
જલધે રક્ષાં પ્રાપ્તવાન્ તથાપિ પ્રતિફલદાયક એનં જીવિતું ન દદાતિ|
V કિન્તુ સ હસ્તં વિધુન્વન્ તં સર્પમ્ અગ્નિમધ્યે નિક્ષિપ્ય કામપિ પીડાં નાપ્તવાન્|
VI તતો વિષજ્વાલયા એતસ્ય શરીરં સ્ફીતં ભવિષ્યતિ યદ્વા હઠાદયં પ્રાણાન્ ત્યક્ષ્યતીતિ નિશ્ચિત્ય લોકા બહુક્ષણાનિ યાવત્
તદ્ દ્રષ્ટું સ્થિતવન્તઃ કિન્તુ તસ્ય કસ્યાશ્ચિદ્ વિપદોઽઘટનાત્ તે તદ્વિપરીતં વિજ્ઞાય ભાષિતવન્ત એષ કશ્ચિદ્ દેવો ભવેત્|
VII પુબ્લિયનામા જન એકસ્તસ્યોપદ્વીપસ્યાધિપતિરાસીત્ તત્ર તસ્ય ભૂમ્યાદિ ચ સ્થિતં| સ જનોઽસ્માન્ નિજગૃહં નીત્વા સૌજન્યં
પ્રકાશ્ય દિનત્રયં યાવદ્ અસ્માકં આતિથ્યમ્ અકરોત્|
VIII તદા તસ્ય પુબ્લિયસ્ય પિતા જ્વરાતિસારેણ પીડ્યમાનઃ સન્ શય્યાયામ્ આસીત્; તતઃ પૌલસ્તસ્ય સમીપં ગત્વા પ્રાર્થનાં
કૃત્વા તસ્ય ગાત્રે હસ્તં સમર્પ્ય તં સ્વસ્થં કૃતવાન્|
IX ઇત્થં ભૂતે તદ્વીપનિવાસિન ઇતરેપિ રોગિલોકા આગત્ય નિરામયા અભવન્|
X તસ્માત્તેઽસ્માકમ્ અતીવ સત્કારં કૃતવન્તઃ, વિશેષતઃ પ્રસ્થાનસમયે પ્રયોજનીયાનિ નાનદ્રવ્યાણિ દત્તવન્તઃ|
XI ઇત્થં તત્ર ત્રિષુ માસેષુ ગતેષુ યસ્ય ચિહ્નં દિયસ્કૂરી તાદૃશ એકઃ સિકન્દરીયનગરસ્ય પોતઃ શીતકાલં યાપયન્ તસ્મિન્ ઉપદ્વીપે
ઽતિષ્ઠત્ તમેવ પોતં વયમ્ આરુહ્ય યાત્રામ્ અકુર્મ્મ|
XII તતઃ પ્રથમતઃ સુરાકૂસનગરમ્ ઉપસ્થાય તત્ર ત્રીણિ દિનાનિ સ્થિતવન્તઃ|
XIII તસ્માદ્ આવૃત્ય રીગિયનગરમ્ ઉપસ્થિતાઃ દિનૈકસ્માત્ પરં દક્ષિણવયૌ સાનુકૂલ્યે સતિ પરસ્મિન્ દિવસે પતિયલીનગરમ્
ઉપાતિષ્ઠામ|
XIV તતોઽસ્માસુ તત્રત્યં ભ્રાતૃગણં પ્રાપ્તેષુ તે સ્વૈઃ સાર્દ્ધમ્ અસ્માન્ સપ્ત દિનાનિ સ્થાપયિતુમ્ અયતન્ત, ઇત્થં વયં રોમાનગરમ્
પ્રત્યગચ્છામ|
XV તસ્માત્ તત્રત્યાઃ ભ્રાતરોઽસ્માકમ્ આગમનવાર્ત્તાં શ્રુત્વા આપ્પિયફરં ત્રિષ્ટાવર્ણીઞ્ચ યાવદ્ અગ્રેસરાઃ સન્તોસ્માન્ સાક્ષાત્
કર્ત્તુમ્ આગમન્; તેષાં દર્શનાત્ પૌલ ઈશ્વરં ધન્યં વદન્ આશ્વાસમ્ આપ્તવાન્|
XVI અસ્માસુ રોમાનગરં ગતેષુ શતસેનાપતિઃ સર્વ્વાન્ બન્દીન્ પ્રધાનસેનાપતેઃ સમીપે સમાર્પયત્ કિન્તુ પૌલાય સ્વરક્ષકપદાતિના
સહ પૃથગ્ વસ્તુમ્ અનુમતિં દત્તવાન્|
XVII દિનત્રયાત્ પરં પૌલસ્તદ્દેશસ્થાન્ પ્રધાનયિહૂદિન આહૂતવાન્ તતસ્તેષુ સમુપસ્થિતેષુ સ કથિતવાન્, હે ભ્રાતૃગણ
નિજલોકાનાં પૂર્વ્વપુરુષાણાં વા રીતે ર્વિપરીતં કિઞ્ચન કર્મ્માહં નાકરવં તથાપિ યિરૂશાલમનિવાસિનો લોકા માં બન્દિં કૃત્વા
રોમિલોકાનાં હસ્તેષુ સમર્પિતવન્તઃ|
XVIII રોમિલોકા વિચાર્ય્ય મમ પ્રાણહનનાર્હં કિમપિ કારણં ન પ્રાપ્ય માં મોચયિતુમ્ ઐચ્છન્;
XIX કિન્તુ યિહૂદિલોકાનામ્ આપત્ત્યા મયા કૈસરરાજસ્ય સમીપે વિચારસ્ય પ્રાર્થના કર્ત્તવ્યા જાતા નોચેત્ નિજદેશીયલોકાન્ પ્રતિ
મમ કોપ્યભિયોગો નાસ્તિ|
XX એતત્કારણાદ્ અહં યુષ્માન્ દ્રષ્ટું સંલપિતુઞ્ચાહૂયમ્ ઇસ્રાયેલ્વંશીયાનાં પ્રત્યાશાહેતોહમ્ એતેન શુઙ્ખલેન બદ્ધોઽભવમ્|
XXI તદા તે તમ્ અવાદિષુઃ, યિહૂદીયદેશાદ્ વયં ત્વામધિ કિમપિ પત્રં ન પ્રાપ્તા યે ભ્રાતરઃ સમાયાતાસ્તેષાં કોપિ તવ કામપિ વાર્ત્તાં
નાવદત્ અભદ્રમપિ નાકથયચ્ચ|
XXII તવ મતં કિમિતિ વયં ત્વત્તઃ શ્રોતુમિચ્છામઃ| યદ્ ઇદં નવીનં મતમુત્થિતં તત્ સર્વ્વત્ર સર્વ્વેષાં નિકટે નિન્દિતં જાતમ ઇતિ વયં
જાનીમઃ|
XXIII તૈસ્તદર્થમ્ એકસ્મિન્ દિને નિરૂપિતે તસ્મિન્ દિને બહવ એકત્ર મિલિત્વા પૌલસ્ય વાસગૃહમ્ આગચ્છન્ તસ્માત્ પૌલ આ
પ્રાતઃકાલાત્ સન્ધ્યાકાલં યાવન્ મૂસાવ્યવસ્થાગ્રન્થાદ્ ભવિષ્યદ્વાદિનાં ગ્રન્થેભ્યશ્ચ યીશોઃ કથામ્ ઉત્થાપ્ય ઈશ્વરસ્ય રાજ્યે પ્રમાણં
દત્વા તેષાં પ્રવૃત્તિં જનયિતું ચેષ્ટિતવાન્|
XXIV કેચિત્તુ તસ્ય કથાં પ્રત્યાયન્ કેચિત્તુ ન પ્રત્યાયન્;

XXV એતત્કારણાત્ તેષાં પરસ્પરમ્ અનૈક્યાત્ સર્વ્વે ચલિતવન્તઃ; તથાપિ પૌલ એતાં કથામેકાં કથિતવાન્ પવિત્ર આત્મા યિશયિયસ્ય ભવિષ્યદ્વક્તુ ર્વદનાદ્ અસ્માકં પિતૃપુરુષેભ્ય એતાં કથાં ભદ્રં કથયામાસ, યથા,

XXVI "ઉપગત્ય જનાનેતાન્ ત્વં ભાષસ્વ વચસ્ત્વિદં। કર્ણૈઃ શ્રોષ્યથ યૂયં હિ કિન્તુ યૂયં ન ભોત્સ્યથ। નેત્રૈ ર્દ્રક્ષ્યથ યૂયઞ્ચ જ્ઞાતું યૂયં ન શક્ષ્યથ।

XXVII તે માનુષા યથા નેત્રૈઃ પરિપશ્યન્તિ નૈવ હિ। કર્ણૈઃ ર્યથા ન શૃણ્વન્તિ બુધ્યન્તે ન ચ માનસૈઃ। વ્યાવર્ત્તયત્સુ ચિત્તાનિ કાલે કુત્રાપિ તેષુ વૈ। મત્તસ્તે મનુજાઃ સ્વસ્થા યથા નૈવ ભવન્તિ ચ। તથા તેષાં મનુષ્યાણાં સન્તિ સ્થૂલા હિ બુદ્ધયઃ। બધિરીભૂતકર્ણાશ્ચ જાતાશ્ચ મુદ્રિતા દૃશઃ॥

XXVIII અત ઈશ્વરાદ્ યત્ પરિત્રાણં તસ્ય વાર્ત્તા ભિન્નદેશીયાનાં સમીપં પ્રેષિતા તએવ તાં ગ્રહીષ્યન્તીતિ યૂયં જાનીત।

XXIX એતાદૃશ્યાં કથાયાં કથિતાયાં સત્યાં યિહૂદિનઃ પરસ્પરં બહુવિચારં કુર્વ્વન્તો ગતવન્તઃ।

XXX ઇત્થં પૌલઃ સમ્પૂર્ણં વત્સરદ્વયં યાવદ્ ભાટકીયે વાસગૃહે વસન્ યે લોકાસ્તસ્ય સન્નિધિમ્ આગચ્છન્તિ તાન્ સર્વ્વાનેવ પરિગૃહ્લન્,

XXXI નિર્વિઘ્નમ્ અતિશયનિઃક્ષોભમ્ ઈશ્વરીયરાજત્વસ્ય કથાં પ્રચારયન્ પ્રભૌ યીશૌ ખ્રીષ્ટે કથાઃ સમુપાદિશત્। ઇતિ॥

# રોમિણઃ પત્રં

I ઈશ્વરો નિજપુત્રમધિ યં સુસંવાદં ભવિષ્યદ્વાદિભિ ર્ધર્મ્મગ્રન્થે પ્રતિશ્રુતવાન્ તં સુસંવાદં પ્રચારયિતું પૃથક્કૃત આહૂતઃ પ્રેરિતશ્ચ
પ્રભો ર્યીશુખ્રીષ્ટસ્ય સેવકો યઃ પૌલઃ
II સ રોમાનગરસ્થાન્ ઈશ્વરપ્રિયાન્ આહૂતાંશ્ચ પવિત્રલોકાન્ પ્રતિ પત્રં લિખતિ।
III અસ્માકં સ પ્રભુ ર્યીશુઃ ખ્રીષ્ટઃ શારીરિકસમ્બન્ધેન દાયૂદો વંશોદ્ભવઃ
IV પવિત્રસ્યાત્મનઃ સમ્બન્ધેન ચેશ્વરસ્ય પ્રભાવવાન્ પુત્ર ઇતિ શ્મશાનાત્ તસ્યોત્થાનેન પ્રતિપન્નં।
V અપરં યેષાં મધ્યે યીશુના ખ્રીષ્ટેન યૂયમપ્યાહૂતાસ્તે ઽન્યદેશીયલોકાસ્તસ્ય નામ્નિ વિશ્વસ્ય નિદેશગ્રાહિણો યથા ભવન્તિ
VI તદભિપ્રાયેણ વયં તસ્માદ્ અનુગ્રહં પ્રેરિતત્વપદઞ્ચ પ્રાપ્તાઃ।
VII તાતેનાસ્માકમ્ ઈશ્વરેણ પ્રભુણા યીશુખ્રીષ્ટેન ચ યુષ્મભ્યમ્ અનુગ્રહઃ શાન્તિશ્ચ પ્રદીયેતાં।
VIII પ્રથમતઃ સર્વ્વસ્મિન્ જગતિ યુષ્માકં વિશ્વાસસ્ય પ્રકાશિતત્વાદ્ અહં યુષ્માકં સર્વ્વેષાં નિમિત્તં યીશુખ્રીષ્ટસ્ય નામ ગૃહ્લન્
ઈશ્વરસ્ય ધન્યવાદં કરોમિ।
IX અપરમ્ ઈશ્વરસ્ય પ્રસાદાદ્ બહુકાલાત્ પરં સામ્પ્રતં યુષ્માકં સમીપં યાતું કથમપિ યત્ સુયોગં પ્રાપ્નોમિ, એતદર્થં નિરન્તરં
નામાન્યુચ્ચારયન્ નિજાસુ સર્વ્વપ્રાર્થનાસુ સર્વ્વદા નિવેદયામિ,
X એતસ્મિન્ યમહં તત્પુત્રીયસુસંવાદપ્રચારણેન મનસા પરિચરામિ સ ઈશ્વરો મમ સાક્ષી વિદ્યતે।
XI યતો યુષ્માકં મમ ચ વિશ્વાસેન વયમ્ ઉભયે યથા શાન્તિયુક્તા ભવામ ઇતિ કારણાદ્
XII યુષ્માકં સ્થૈર્ય્યકરણાર્થં યુષ્મભ્યં કિઞ્ચિત્પરમાર્થદાનદાનાય યુષ્માન્ સાક્ષાત્ કર્ત્તું મદીયા વાઞ્છા।
XIII હે ભ્રાતૃગણ ભિન્નદેશીયલોકાનાં મધ્યે યદ્વત્ તદ્વદ્ યુષ્માકં મધ્યેપિ યથા ફલં ભુઞ્જે તદભિપ્રાયેણ મુહુર્મુહુ ર્યુષ્માકં સમીપં
ગન્તુમ્ ઉદ્યતોઽહં કિન્તુ યાવદ્ અદ્ય તસ્મિન્ ગમને મમ વિઘ્નો જાત ઇતિ યૂયં યદ્ અજ્ઞાતાસ્તિષ્ઠથ તદહમ્ ઉચિતં ન બુધ્યે।
XIV અહં સભ્યાસભ્યાનાં વિદ્વદવિદ્વતાઞ્ચ સર્વ્વેષામ્ ઋણી વિદ્યે।
XV અતએવ રોમાનિવાસિનાં યુષ્માકં સમીપેઽપિ યથાશક્તિ સુસંવાદં પ્રચારયિતુમ્ અહમ્ ઉદ્યતોસ્મિ।
XVI યતઃ ખ્રીષ્ટસ્ય સુસંવાદો મમ લજ્જાસ્પદં નહિ સ ઈશ્વરસ્ય શક્તિસ્વરૂપઃ સન્ આ યિહૂદીયેભ્યો ઽન્યજાતીયાન્ યાવત્
સર્વ્વજાતીયાનાં મધ્યે યઃ કશ્ચિદ્ તત્ર વિશ્વસિતિ તસ્યૈવ ત્રાણં જનયતિ।
XVII યતઃ પ્રત્યયસ્ય સમપરિમાણમ્ ઈશ્વરદત્તં પુણ્યં તત્સુસંવાદે પ્રકાશતે। તદધિ ધર્મ્મપુસ્તકેપિ લિખિતમિદં "પુણ્યવાન્ જનો
વિશ્વાસેન જીવિષ્યતિ"।
XVIII અતએવ યે માનવાઃ પાપકર્મ્મણા સત્યતાં રુન્ધન્તિ તેષાં સર્વ્વસ્ય દુરાચરણસ્યાધર્મ્મસ્ય ચ વિરુદ્ધં સ્વર્ગાદ્ ઈશ્વરસ્ય કોપઃ
પ્રકાશતે।
XIX યત ઈશ્વરમધિ યદ્યદ્ જ્ઞેયં તદ્ ઈશ્વરઃ સ્વયં તાન્ પ્રતિ પ્રકાશિતવાન્ તસ્માત્ તેષામ્ અગોચરં નહિ।
XX ફલતસ્તસ્યાનન્તશક્તીશ્વરત્વાદીન્યદૃશ્યાન્યપિ સૃષ્ટિકાલમ્ આરભ્ય કર્મ્મસુ પ્રકાશમાનાનિ દૃશ્યન્તે તસ્માત્ તેષાં
દોષપ્રક્ષાલનસ્ય પન્થા નાસ્તિ।
XXI અપરમ્ ઈશ્વરં જ્ઞાત્વાપિ તે તમ્ ઈશ્વરજ્ઞાનેન નાદ્રિયન્ત કૃતજ્ઞા વા ન જાતાઃ; તસ્માત્ તેષાં સર્વ્વે તર્કા વિફલીભૂતાઃ, અપરઞ્ચ
તેષાં વિવેકશૂન્યાનિ મનાંસિ તિમિરે મગ્નાનિ।
XXII તે સ્વાન્ જ્ઞાનિનો જ્ઞાત્વા જ્ઞાનહીના અભવન્
XXIII અનશ્વરસ્યેશ્વરસ્ય ગૌરવં વિહાય નશ્વરમનુષ્યપશુપક્ષ્યુરોગામિપ્રભૃતેરાકૃતિવિશિષ્ટપ્રતિમાસ્તૈરાશ્રિતાઃ।
XXIV ઇત્થં ત ઈશ્વરસ્ય સત્યતાં વિહાય મૃષામતમ્ આશ્રિતવન્તઃ સચ્ચિદાનન્દં સૃષ્ટિકર્ત્તારં ત્યક્ત્વા સૃષ્ટવસ્તુનઃ પૂજાં સેવાઞ્ચ
કૃતવન્તઃ;
XXV ઇતિ હેતોરીશ્વરસ્તાન્ કુક્રિયાયાં સમર્પ્ય નિજનિજકુચિન્તાભિલાષાભ્યાં સ્વં સ્વં શરીરં પરસ્પરમ્ અપમાનિતં કર્ત્તુમ્ અદદાત્।
XXVI ઈશ્વરેણ તેષુ ક્વભિલાષે સમર્પિતેષુ તેષાં યોષિતઃ સ્વાભાવિકાચરણમ્ અપહાય વિપરીતકૃત્યે પ્રાવર્ત્તન્ત;
XXVII તથા પુરુષા અપિ સ્વાભાવિકયોષિત્સઙ્ગમં વિહાય પરસ્પરં કામકૃશાનુના દગ્ધાઃ સન્તઃ પુમાંસઃ પુંભિઃ સાકં કુકૃત્યે
સમાસજ્ય નિજનિજભ્રાન્તેઃ સમુચિતં ફલમ્ અલભન્ત।
XXVIII તે સ્વેષાં મનઃસ્વીશ્વરાય સ્થાનં દાતુમ્ અનિચ્છુકાસ્તતો હેતોરીશ્વરસ્તાન્ પ્રતિ દુષ્ટમનસ્કત્વમ્ અવિહિતક્રિયત્વઞ્ચ
દત્તવાન્।
XXIX અતએવ તે સર્વ્વે ઽન્યાયો વ્યભિચારો દુષ્ટત્વં લોભો જિઘાંસા ઈર્ષ્યા વધો વિવાદશ્ચાતુરી કુમતિરિત્યાદિભિ ર્દુષ્કર્મ્મભિઃ
પરિપૂર્ણાઃ સન્તઃ
XXX કર્ણેજપા અપવાદિન ઈશ્વરદ્વેષકા હિંસકા અહઙ્કારિણ આત્મશ્લાઘિનઃ કુકર્મ્મોત્પાદકાઃ પિત્રોરાજ્ઞાલઙ્ઘકા
XXXI અવિચારકા નિયમલઙ્ઘિનઃ સ્નેહરહિતા અતિદ્વેષિણો નિર્દયાશ્ચ જાતાઃ।
XXXII યે જના એતાદૃશં કર્મ્મ કુર્વ્વન્તિ તએવ મૃતિયોગ્યા ઈશ્વરસ્ય વિચારમીદૃશં જ્ઞાત્વાપિ ત એતાદૃશં કર્મ્મ સ્વયં કુર્વ્વન્તિ
કેવલમિતિ નહિ કિન્તુ તાદૃશકર્મ્મકારિષુ લોકેષ્વપિ પ્રીયન્તે।

## II

I હે પરદૂષક મનુષ્ય યઃ કશ્ચન ત્વં ભવસિ તવોત્તરદાનાય પન્થા નાસ્તિ યતો યસ્માત્ કર્મ્મણઃ પરસ્ત્વયા દૂષ્યતે તસ્માત્ ત્વમપિ
દૂષ્યસે, યતસ્તં દૂષયન્નપિ ત્વં તદ્વદ્ આચરસિ।
II કિન્ત્વેતાદૃગાચારિભ્યો યં દણ્ડમ્ ઈશ્વરો નિશ્ચિનોતિ સ યથાર્થ ઇતિ વયં જાનીમઃ।

III અતએવ હે માનુષ ત્વં યાદૃગાચારિણો દૂષયસિ સ્વયં યદિ તાદૃગાચરસિ તર્હિ ત્વમ્ ઈશ્વરદણ્ડાત્ પલાયિતું શક્ષ્યસીતિ કિં બુધ્યસે?
IV અપરં તવ મનસઃ પરિવર્ત્તનં કર્ત્તુમ્ ઇશ્વરસ્યાનુગ્રહો ભવતિ તન્ન બુદ્ધ્વા ત્વં કિં તદીયાનુગ્રહક્ષમાચિરસહિષ્ણુત્વનિધિં તુચ્છીકરોષિ?
V તથા સ્વાન્તઃકરણસ્ય કઠોરત્વાત્ ખેદરાહિત્યાચ્ચેશ્વરસ્ય ન્યાય્યવિચારપ્રકાશનસ્ય ક્રોધસ્ય ચ દિનં યાવત્ કિં સ્વાર્થં કોપં સઞ્ચિનોષિ?
VI કિન્તુ સ એકૈકમનુજાય તત્કર્મ્માનુસારેણ પ્રતિફલં દાસ્યતિ;
VII વસ્તુતસ્તુ યે જના ધૈર્ય્યં ધૃત્વા સત્કર્મ્મ કુર્વ્વન્તો મહિમા સત્કારોઽમરત્વઞ્ચૈતાનિ મૃગયન્તે તેભ્યોઽનન્તાયુ ર્દાસ્યતિ।
VIII અપરં યે જનાઃ સત્યધર્મ્મમ્ અગૃહીત્વા વિપરીતધર્મ્મમ્ ગૃહ્લન્તિ તાદૃશા વિરોધિજનાઃ કોપં ક્રોધઞ્ચ ભોક્ષ્યન્તે।
IX આ યિહૂદિનોઽન્યદેશિનઃ પર્ય્યન્તં યાવન્તઃ કુકર્મ્મકારિણઃ પ્રાણિનઃ સન્તિ તે સર્વ્વે દુઃખં યાતનાઞ્ચ ગમિષ્યન્તિ;
X કિન્તુ આ યિહૂદિનો ભિન્નદેશિપર્ય્યન્તા યાવન્તઃ સત્કર્મ્મકારિણો લોકાઃ સન્તિ તાન્ પ્રતિ મહિમા સત્કારઃ શાન્તિશ્ચ ભવિષ્યન્તિ।
XI ઈશ્વરસ્ય વિચારે પક્ષપાતો નાસ્તિ।
XII અલબ્ધવ્યવસ્થાશાસ્ત્રૈ ર્યૈઃ પાપાનિ કૃતાનિ વ્યવસ્થાશાસ્ત્રાલબ્ધત્વાનુરૂપસ્તેષાં વિનાશો ભવિષ્યતિ; કિન્તુ લબ્ધવ્યવસ્થાશાસ્ત્રા યે પાપાન્યકુર્વ્વન્ વ્યવસ્થાનુસારાદેવ તેષાં વિચારો ભવિષ્યતિ।
XIII વ્યવસ્થાશ્રોતાર ઈશ્વરસ્ય સમીપે નિષ્પાપા ભવિષ્યન્તીતિ નહિ કિન્તુ વ્યવસ્થાચારિણ એવ સપુણ્યા ભવિષ્યન્તિ।
XIV યતો ઽલબ્ધવ્યવસ્થાશાસ્ત્રા ભિન્નદેશીયલોકા યદિ સ્વભાવતો વ્યવસ્થાનુરૂપાન્ આચારાન્ કુર્વ્વન્તિ તર્હ્યલબ્ધશાસ્ત્રાઃ સન્તોઽપિ તે સ્વેષાં વ્યવસ્થાશાસ્ત્રમિવ સ્વયમેવ ભવન્તિ।
XV તેષાં મનસિ સાક્ષિસ્વરૂપે સતિ તેષાં વિતર્કેષુ ચ કદા તાન્ દોષિણઃ કદા વા નિર્દોષાન્ કૃતવત્સુ તે સ્વાન્તર્લિખિતસ્ય વ્યવસ્થાશાસ્ત્રસ્ય પ્રમાણં સ્વયમેવ દદતિ।
XVI યસ્મિન્ દિને મયા પ્રકાશિતસ્ય સુસંવાદસ્યાનુસારાદ્ ઈશ્વરો યીશુખ્રીષ્ટેન માનુષાણામ્ અન્તઃકરણાનાં ગૂઢાભિપ્રાયાન્ ધૃત્વા વિચારયિષ્યતિ તસ્મિન્ વિચારદિને તત્ પ્રકાશિષ્યતે।
XVII પશ્ય ત્વં સ્વયં યિહૂદીતિ વિખ્યાતો વ્યવસ્થોપરિ વિશ્વાસં કરોષિ,
XVIII ઈશ્વરમુદ્દિશ્ય સ્વં શ્લાઘસે, તથા વ્યવસ્થયા શિક્ષિતો ભૂત્વા તસ્યાભિમતં જાનાસિ, સર્વ્વાસાં કથાનાં સારં વિવિંક્ષે,
XIX અપરં જ્ઞાનસ્ય સત્યતાયાશ્ચાકરસ્વરૂપં શાસ્ત્રં મમ સમીપે વિદ્યત અતો ઽન્ધલોકાનાં માર્ગદર્શયિતા
XX તિમિરસ્થિતલોકાનાં મધ્યે દીપ્તિસ્વરૂપોઽજ્ઞાનલોકેભ્યો જ્ઞાનદાતા શિશૂનાં શિક્ષયિતાહમેવેતિ મન્યસે।
XXI પરાન્ શિક્ષયન્ સ્વયં સ્વં કિં ન શિક્ષયસિ? વસ્તુતશ્ચૌર્ય્યનિષેધવ્યવસ્થાં પ્રચારયન્ ત્વં કિં સ્વયમેવ ચોરયસિ?
XXII તથા પરદારગમનં પ્રતિષેધન્ સ્વયં કિં પરદારાન્ ગચ્છસિ? તથા ત્વં સ્વયં પ્રતિમાદ્વેષી સન્ કિં મન્દિરસ્ય દ્રવ્યાણિ હરસિ?
XXIII યસ્ત્વં વ્યવસ્થાં શ્લાઘસે સ ત્વં કિં વ્યવસ્થામ્ અવમત્ય નેશ્વરં સમ્મન્યસે?
XXIV શાસ્ત્રે યથા લિખતિ "ભિન્નદેશિનાં સમીપે યુષ્માકં દોષાદ્ ઈશ્વરસ્ય નામ્નો નિન્દા ભવતિ। "
XXV યદિ વ્યવસ્થાં પાલયસિ તર્હિ તવ ત્વક્છેદક્રિયા સફલા ભવતિ; યતિ વ્યવસ્થાં લઙ્ઘસે તર્હિ તવ ત્વક્છેદોઽત્વક્છેદો ભવિષ્યતિ।
XXVI યતો વ્યવસ્થાશાસ્ત્રાદિષ્ટધર્મ્મકર્મ્માચારી પુમાન્ અત્વક્છેદી સન્નપિ કિં ત્વક્છેદિનાં મધ્યે ન ગણયિષ્યતે?
XXVII કિન્તુ લબ્ધશાસ્ત્રશ્છિન્નત્વક્ ચ ત્વં યદિ વ્યવસ્થાલઙ્ઘનં કરોષિ તર્હિ વ્યવસ્થાપાલકાઃ સ્વાભાવિકાચ્છિન્નત્વચો લોકાસ્ત્વાં કિં ન દૂષયિષ્યન્તિ?
XXVIII તસ્માદ્ યો બાહ્યે યિહૂદી સ યિહૂદી નહિ તથાઙ્ગસ્ય યસ્ત્વક્છેદઃ સ ત્વક્છેદો નહિ;
XXIX કિન્તુ યો જન આન્તરિકો યિહૂદી સ એવ યિહૂદી અપરઞ્ચ કેવલલિખિતયા વ્યવસ્થયા ન કિન્તુ માનસિકો યસ્ત્વક્છેદો યસ્ય ચ પ્રશંસા મનુષ્યેભ્યો ન ભૂત્વા ઈશ્વરાદ્ ભવતિ સ એવ ત્વક્છેદઃ।

# III

I અપરઞ્ચ યિહૂદિનઃ કિં શ્રેષ્ઠત્વં? તથા ત્વક્છેદસ્ય વા કિં ફલં?
II સર્વ્વથા બહૂનિ ફલાનિ સન્તિ, વિશેષત ઈશ્વરસ્ય શાસ્ત્રં તેભ્યોઽદીયત।
III કૈશ્ચિદ્ અવિશ્વસને કૃતે તેષામ્ અવિશ્વસનાત્ કિમ્ ઈશ્વરસ્ય વિશ્વાસ્યતાયા હાનિરુત્પત્સ્યતે?
IV કેનાપિ પ્રકારેણ નહિ। યદ્યપિ સર્વ્વે મનુષ્યા મિથ્યાવાદિનસ્તથાપીશ્વરઃ સત્યવાદી। શાસ્ત્રે યથા લિખિતમાસ્તે, અતસ્ત્વન્તુ સ્વવાક્યેન નિર્દોષો હિ ભવિષ્યસિ। વિચારે ચૈવ નિષ્પાપો ભવિષ્યસિ ન સંશયઃ।
V અસ્માકમ્ અન્યાયેન યદીશ્વરસ્ય ન્યાયઃ પ્રકાશતે તર્હિ કિં વદિષ્યામઃ? અહં માનુષાણાં કથામિવ કથાં કથયામિ, ઈશ્વરઃ સમુચિતં દણ્ડં દત્ત્વા કિમ્ અન્યાયી ભવિષ્યતિ?
VI ઇત્થં ન ભવતુ, તથા સતીશ્વરઃ કથં જગતો વિચારયિતા ભવિષ્યતિ?
VII મમ મિથ્યાવાક્યવદનાદ્ યદીશ્વરસ્ય સત્યત્વેન તસ્ય મહિમા વર્દ્ધતે તર્હિ કસ્માદહં વિચારેઽપરાધિત્વેન ગણ્યો ભવામિ?
VIII મઙ્ગલાર્થં પાપમપિ કરણીયમિતિ વાક્યં ત્વયા કુતો નોચ્યતે? કિન્તુ યૈરુચ્યતે તે નિતાન્તં દણ્ડસ્ય પાત્રાણિ ભવન્તિ; તથાપિ તદ્વાક્યમ્ અસ્માભિરપ્યુચ્યત ઇત્યસ્માકં ગ્લાનિં કુર્વ્વન્તઃ કિયન્તો લોકા વદન્તિ।
IX અન્યલોકેભ્યો વયં કિં શ્રેષ્ઠાઃ? કદાચન નહિ યતો યિહૂદિનો ઽન્યદેશિનશ્ચ સર્વ્વએવ પાપસ્યાયત્તા ઇત્યસ્ય પ્રમાણં વયં પૂર્વ્વમ્ અદદામ।
X લિપિ ર્યથાસ્તે, નૈકોપિ ધાર્મ્મિકો જનઃ।
XI તથા જ્ઞાનીશ્વરજ્ઞાની માનવઃ કોપિ નાસ્તિ હિ।
XII વિમાર્ગગામિનઃ સર્વ્વે સર્વ્વે દુષ્કર્મ્મકારિણઃ। એકો જનોપિ નો તેષાં સાધુકર્મ્મ કરોતિ ચ।

XIII તથા તેષાન્તુ વૈ કણ્ઠા અનાવૃતશ્મશાનવત્| સ્તુતિવાદં પ્રકુર્વ્વન્તિ જિહ્વાભિસ્તે તુ કેવલં| તેષામોષ્ઠસ્ય નિમ્ને તુ વિષં તિષ્ઠતિ સર્પ્પવત્|

XIV મુખં તેષાં હિ શાપેન કપટેન ચ પૂર્ય્યતે|

XV રક્તપાતાય તેષાં તુ પદાનિ ક્ષિપ્રગાનિ ચ|

XVI પથિ તેષાં મનુષ્યાણાં નાશઃ ક્લેશશ્ચ કેવલઃ|

XVII તે જના નહિ જાનન્તિ પન્થાનં સુખદાયિનં|

XVIII પરમેશાદ્ ભયં યત્તત્ તચ્ચક્ષુષોરગોચરં|

XIX વ્યવસ્થાયાં યદ્યલ્લિખતિ તદ્ વ્યવસ્થાધીનાન્ લોકાન્ ઉદ્દિશ્ય લિખતીતિ વયં જાનીમઃ| તતો મનુષ્યમાત્રો નિરુત્તરઃ સન્ ઈશ્વરસ્ય સાક્ષાદ્ અપરાધી ભવતિ|

XX અતએવ વ્યવસ્થાનુરૂપૈઃ કર્મ્મભિઃ કશ્ચિદપિ પ્રાણીશ્વરસ્ય સાક્ષાત્ સપુણ્યીકૃતો ભવિતું ન શક્ષ્યતિ યતો વ્યવસ્થયા પાપજ્ઞાનમાત્રં જાયતે|

XXI કિન્તુ વ્યવસ્થાયાઃ પૃથગ્ ઈશ્વરેણ દેયં યત્ પુણ્યં તદ્ વ્યવસ્થાયા ભવિષ્યદ્વાદિગણસ્ય ચ વચનૈઃ પ્રમાણીકૃતં સદ્ ઇદાનીં પ્રકાશતે|

XXII યીશુખ્રીષ્ટે વિશ્વાસકરણાદ્ ઈશ્વરેણ દત્તં તત્ પુણ્યં સકલેષુ પ્રકાશિતં સત્ સર્વ્વાન્ વિશ્વાસિનઃ પ્રતિ વર્ત્તતે|

XXIII તેષાં કોપિ પ્રભેદો નાસ્તિ, યતઃ સર્વ્વએવ પાપિન ઈશ્વરીયતેજોહીનાશ્ચ જાતાઃ|

XXIV ત ઈશ્વરસ્યાનુગ્રહાદ્ મૂલ્યં વિના ખ્રીષ્ટકૃતેન પરિત્રાણેન સપુણ્યીકૃતા ભવન્તિ|

XXV યસ્માત્ સ્વશોણિતેન વિશ્વાસાત્ પાપનાશકો બલી ભવિતું સ એવ પૂર્વ્વમ્ ઈશ્વરેણ નિશ્ચિતઃ, ઇત્થમ્ ઈશ્વરીયસહિષ્ણુત્વાત્ પુરાકૃતપાપાનાં માર્જ્જનકરણે સ્વીયયાથાર્થ્યં તેન પ્રકાશ્યતે,

XXVI વર્ત્તમાનકાલીયમપિ સ્વયાથાર્થ્યં તેન પ્રકાશ્યતે, અપરં યીશૌ વિશ્વાસિનં સપુણ્યીકુર્વ્વન્નપિ સ યાથાર્થિકસ્તિષ્ઠતિ|

XXVII તર્હિ કુત્રાત્મશ્લાઘા? સા દૂરીકૃતા; કયા વ્યવસ્થયા? કિં ક્રિયારૂપવ્યવસ્થયા? ઇત્થં નહિ કિન્તુ તત્ કેવલવિશ્વાસરૂપયા વ્યવસ્થયૈવ ભવતિ|

XXVIII અતએવ વ્યવસ્થાનુરૂપાઃ ક્રિયા વિના કેવલેન વિશ્વાસેન માનવઃ સપુણ્યીકૃતો ભવિતું શક્નોતીત્યસ્ય રાદ્ધાન્તં દર્શયામઃ|

XXIX સ કિં કેવલયિહૂદિનામ્ ઈશ્વરો ભવતિ? ભિન્નદેશિનામ્ ઈશ્વરો ન ભવતિ? ભિન્નદેશિનામપિ ભવતિ;

XXX યસ્માદ્ એક ઈશ્વરો વિશ્વાસાત્ ત્વક્છેદિનો વિશ્વાસેનાત્વક્છેદિનશ્ચ સપુણ્યીકરિષ્યતિ|

XXXI તર્હિ વિશ્વાસેન વયં કિં વ્યવસ્થાં લુમ્પામ? ઇત્થં ન ભવતુ વયં વ્યવસ્થાં સંસ્થાપયામ એવ|

# IV

I અસ્માકં પૂર્વ્વપુરુષ ઇબ્રાહીમ્ કાયિકક્રિયયા કિં લબ્ધવાન્ એતદધિ કિં વદિષ્યામઃ?

II સ યદિ નિજક્રિયાભ્યઃ સપુણ્યો ભવેત્ તર્હિ તસ્યાત્મશ્લાઘાં કર્ત્તું પન્થા ભવેદિતિ સત્યં, કિન્ત્વીશ્વરસ્ય સમીપે નહિ|

III શાસ્ત્રે કિં લિખતિ? ઇબ્રાહીમ્ ઈશ્વરે વિશ્વસનાત્ સ વિશ્વાસસ્તસ્મૈ પુણ્યાર્થં ગણિતો બભૂવ|

IV કર્મ્મકારિણો યદ્ વેતનં તદ્ અનુગ્રહસ્ય ફલં નહિ કિન્તુ તેનોપાર્જિતં મન્તવ્યમ્|

V કિન્તુ યઃ પાપિનં સપુણ્યીકરોતિ તસ્મિન્ વિશ્વાસિનઃ કર્મ્મહીનસ્ય જનસ્ય યો વિશ્વાસઃ સ પુણ્યાર્થં ગણ્યો ભવતિ|

VI અપરં યં ક્રિયાહીનમ્ ઈશ્વરઃ સપુણ્યીકરોતિ તસ્ય ધન્યવાદં દાયૂદ્ વર્ણયામાસ, યથા,

VII સ ધન્યોઽઘાનિ મૃષ્ટાનિ યસ્યાગાંસ્યાવૃતાનિ ચ|

VIII સ ચ ધન્યઃ પરેશેન પાપં યસ્ય ન ગણ્યતે|

IX એષ ધન્યવાદસ્ત્વક્છેદિનમ્ અત્વક્છેદિનં વા કં પ્રતિ ભવતિ? ઇબ્રાહીમો વિશ્વાસઃ પુણ્યાર્થં ગણિત ઇતિ વયં વદામઃ|

X સ વિશ્વાસસ્તસ્ય ત્વક્છેદિત્વાવસ્થાયાં કિમ્ અત્વક્છેદિત્વાવસ્થાયાં કસ્મિન્ સમયે પુણ્યમિવ ગણિતઃ? ત્વક્છેદિત્વાવસ્થાયાં નહિ કિન્ત્વત્વક્છેદિત્વાવસ્થાયાં|

XI અપરઞ્ચ સ યત્ સર્વ્વેષામ્ અત્વક્છેદિનાં વિશ્વાસિનામ્ આદિપુરુષો ભવેત્, તે ચ પુણ્યવત્ત્વેન ગણ્યેરન્;

XII યે ચ લોકાઃ કેવલં છિન્નત્વચો ન સન્તો ઽસ્મત્પૂર્વ્વપુરુષ ઇબ્રાહીમ્ અછિન્નત્વક્ સન્ યેન વિશ્વાસમાર્ગેણ ગતવાન્ તેનૈવ તસ્ય પાદચિહ્નેન ગચ્છન્તિ તેષાં ત્વક્છેદિનામપ્યાદિપુરુષો ભવેત્ તદર્થમ્ અત્વક્છેદિનો માનવસ્ય વિશ્વાસાત્ પુણ્યમ્ ઉત્પદ્યત ઇતિ પ્રમાણસ્વરૂપં ત્વક્છેદચિહ્નં સ પ્રાપ્નોત્|

XIII ઇબ્રાહીમ્ જગતોઽધિકારી ભવિષ્યતિ યૈષા પ્રતિજ્ઞા તં તસ્ય વંશઞ્ચ પ્રતિ પૂર્વ્વમ્ અક્રિયત સા વ્યવસ્થામૂલિકા નહિ કિન્તુ વિશ્વાસજન્યપુણ્યમૂલિકા|

XIV યતો વ્યવસ્થાવલમ્બિનો યદ્યધિકારિણો ભવન્તિ તર્હિ વિશ્વાસો વિફલો જાયતે સા પ્રતિજ્ઞાપિ લુપ્તૈવ|

XV અધિકન્તુ વ્યવસ્થા કોપં જનયતિ યતો ઽવિદ્યમાનાયાં વ્યવસ્થાયામ્ આજ્ઞાલઙ્ઘનં ન સમ્ભવતિ|

XVI અતએવ સા પ્રતિજ્ઞા યદ્ અનુગ્રહસ્ય ફલં ભવેત્ તદર્થં વિશ્વાસમૂલિકા યતસ્તથાત્વે તદ્વંશસમુદાયં પ્રતિ અર્થતો યે વ્યવસ્થયા તદ્વંશસમ્ભવાઃ કેવલં તાન્ પ્રતિ નહિ કિન્તુ ય ઇબ્રાહીમીયવિશ્વાસેન તત્સમ્ભવાસ્તાનપિ પ્રતિ સા પ્રતિજ્ઞા સ્થાસ્નુર્ભવતિ|

XVII યો નિર્જીવાન્ સજીવાન્ અવિદ્યમાનાનિ વસ્તૂનિ ચ વિદ્યમાનાનિ કરોતિ ઇબ્રાહીમો વિશ્વાસભૂમેસ્તસ્યેશ્વરસ્ય સાક્ષાત્ સોઽસ્માકં સર્વ્વેષામ્ આદિપુરુષ આસ્તે, યથા લિખિતં વિદ્યતે, અહં ત્વાં બહુજાતીનામ્ આદિપુરુષં કૃત્વા નિયુક્તવાન્|

XVIII ત્વદીયસ્તાદૃશો વંશો જનિષ્યતે યદિદં વાક્યં પ્રતિશ્રુતં તદનુસારાદ્ ઇબ્રાહીમ્ બહુદેશીયલોકાનામ્ આદિપુરુષો યદ્ ભવતિ તદર્થં સોઽનપેક્ષિતવ્યમપ્યપેક્ષમાણો વિશ્વાસં કૃતવાન્|

XIX અપરઞ્ચ ક્ષીણવિશ્વાસો ન ભૂત્વા શતવત્સરવયસ્કત્વાત્ સ્વશરીરસ્ય જરાં સારાનામ્નઃ સ્વભાર્ય્યાયા રજોનિવૃત્તિઞ્ચ તૃણાય ન મેને|

XX અપરમ્ અવિશ્વાસાદ્ ઈશ્વરસ્ય પ્રતિજ્ઞાવચને કમપિ સંશયં ન ચકાર;

XXI કિન્ત્વીશ્વરેણ યત્ પ્રતિશ્રુતં તત્ સાધયિતું શક્યત ઇતિ નિશ્ચિતં વિજ્ઞાય દૃઢવિશ્વાસઃ સન્ ઈશ્વરસ્ય મહિમાનં પ્રકાશયાઞ્ચકાર।
XXII ઇતિ હેતોસ્તસ્ય સ વિશ્વાસસ્તદીયપુણ્યમિવ ગણયાઞ્ચક્રે।
XXIII પુણ્યમિવાગણ્યત તત્ કેવલસ્ય તસ્ય નિમિત્તં લિખિતં નહિ, અસ્માકં નિમિત્તમપિ,
XXIV યતોઽસ્માકં પાપનાશાર્થં સમર્પિતોઽસ્માકં પુણ્યપ્રાપ્ત્યર્થઞ્ચોત્થાપિતોઽભવત્ યોઽસ્માકં પ્રભુ ર્યીશુસ્તસ્યોત્થાપયિતરીશ્વરે
XXV યદિ વયં વિશ્વસામસ્તર્હ્યસ્માકમપિ સએવ વિશ્વાસઃ પુણ્યમિવ ગણયિષ્યતે।

# V

I વિશ્વાસેન સપુણ્યીકૃતા વયમ્ ઈશ્વરેણ સાર્દ્ધં પ્રભુણાસ્માકં યીશુખ્રીષ્ટેન મેલનં પ્રાપ્તાઃ।
II અપરં વયં યસ્મિન્ અનુગ્રહાશ્રયે તિષ્ઠામસ્તન્મધ્યં વિશ્વાસમાર્ગેણ તેનૈવાનીતા વયમ્ ઈશ્વરીયવિભવપ્રાપ્તિપ્રત્યાશયા
સમાનન્દામઃ।
III તત્ કેવલં નહિ કિન્તુ ક્લેશભોગેઽપ્યાનન્દામો યતઃ ક્લેશા◌ાદ્ ધૈર્ય્યં જાયત ઇતિ વયં જાનીમઃ,
IV ધૈર્ય્યાચ્ચ પરીક્ષિતત્વં જાયતે, પરીક્ષિતત્વાત્ પ્રત્યાશા જાયતે,
V પ્રત્યાશાતો વ્રીડિતત્વં ન જાયતે, યસ્માદ્ અસ્મભ્યં દત્તેન પવિત્રેણાત્મનાસ્માકમ્ અન્તઃકરણાનીશ્વરસ્ય પ્રેમવારિણા સિક્તાનિ।
VI અસ્માસુ નિરુપાયેષુ સત્સુ ખ્રીષ્ટ ઉપયુક્તે સમયે પાપિનાં નિમિત્તં સ્વીયાન્ પ્રણાન્ અત્યજત્।
VII હિતકારિણો જનસ્ય કૃતે કોપિ પ્રણાન્ ત્યક્તું સાહસં કર્ત્તું શક્નોતિ, કિન્તુ ધાર્મ્મિકસ્ય કૃતે પ્રાયેણ કોપિ પ્રાણાન્ ન ત્યજતિ।
VIII કિન્ત્વસ્માસુ પાપિષુ સત્સ્વપિ નિમિત્તમસ્માકં ખ્રીષ્ટઃ સ્વપ્રાણાન્ ત્યક્તવાન્, તત ઈશ્વરોસ્માન્ પ્રતિ નિજં પરમપ્રેમાણં
દર્શિતવાન્।
IX અતએવ તસ્ય રક્તપાતેન સપુણ્યીકૃતા વયં નિતાન્તં તેન કોપાદ્ ઉદ્ધારિષ્યામહે।
X ફલતો વયં યદા રિપવ આસ્મ તદેશ્વરસ્ય પુત્રસ્ય મરણેન તેન સાર્દ્ધં યદ્યસ્માકં મેલનં જાતં તર્હિ મેલનપ્રાપ્તાઃ સન્તોઽવશ્યં તસ્ય
જીવનેન રક્ષાં લપ્સ્યામહે।
XI તત્ કેવલં નહિ કિન્તુ યેન મેલનમ્ અલભામહિ તેનાસ્માકં પ્રભુણા યીશુખ્રીષ્ટેન સામ્પ્રતમ્ ઈશ્વરે સમાનન્દામશ્ચ।
XII તથા સતિ, એકેન માનુષેણ પાપં પાપેન ચ મરણં જગતીં પ્રાવિશત્ અપરં સર્વ્વેષાં પાપિત્વાત્ સર્વ્વે માનુષા મૃતે ર્નિઘ્ના
અભવત્।
XIII યતો વ્યવસ્થાદાનસમયં યાવત્ જગતિ પાપમ્ આસીત્ કિન્તુ યત્ર વ્યવસ્થા ન વિદ્યતે તત્ર પાપસ્યાપિ ગણના ન વિદ્યતે।
XIV તથાપ્યાદમા યાદૃશં પાપં કૃતં તાદૃશં પાપં યૈ ર્નાકારિ આદમમ્ આરભ્ય મૂસાં યાવત્ તેષામપ્યુપરિ મૃત્યૂ રાજત્વમ્ અકરોત્ સ
આદમ્ ભાવ્યાદમો નિદર્શનમેવાસ્તે।
XV કિન્તુ પાપકર્મ્મણો યાદૃશો ભાવસ્તાદૃગ્ દાનકર્મ્મણો ભાવો ન ભવતિ યત એકસ્ય જનસ્યાપરાધેન યદિ બહૂનાં મરણમ્
અઘટત તથાપીશ્વરાનુગ્રહસ્તદનુગ્રહમૂલકં દાનઞ્ચૈકેન જનેનાર્થાદ્ યીશુના ખ્રીષ્ટેન બહુષુ બાહુલ્યાતિબાહુલ્યેન ફલતિ।
XVI અપરમ્ એકસ્ય જનસ્ય પાપકર્મ્મ યાદૃક્ ફલયુક્તં દાનકર્મ્મ તાદૃક્ ન ભવતિ યતો વિચારકર્મ્મૈકં પાપમ્ આરભ્ય દણ્ડજનકં
બભૂવ, કિન્તુ દાનકર્મ્મ બહુપાપાન્યારભ્ય પુણ્યજનકં બભૂવ।
XVII યત એકસ્ય જનસ્ય પાપકર્મ્મતસ્તેનૈકેન યદિ મરણસ્ય રાજત્વં જાતં તર્હિ યે જના અનુગ્રહસ્ય બાહુલ્યં પુણ્યદાનઞ્ચ
પ્રાપ્નુવન્તિ ત એકેન જનેન, અર્થાત્ યીશુખ્રીષ્ટેન, જીવને રાજત્વમ્ અવશ્યં કરિષ્યન્તિ।
XVIII એકોઽપરાધો યદ્વત્ સર્વ્વમાનવાનાં દણ્ડગામી માર્ગો ઽભવત્ તદ્વદ્ એકં પુણ્યદાનં સર્વ્વમાનવાનાં જીવનયુક્તપુણ્યગામી
માર્ગ એવ।
XIX અપરમ્ એકસ્ય જનસ્યાજ્ઞાલઙ્ઘનાદ્ યથા બહવો ઽપરાધિનો જાતાસ્તદ્વદ્ એકસ્યાજ્ઞાચરણાદ્ બહવઃ સપુણ્યીકૃતા ભવન્તિ।
XX અધિકન્તુ વ્યવસ્થાગમનાદ્ અપરાધસ્ય બાહુલ્યં જાતં કિન્તુ યત્ર પાપસ્ય બાહુલ્યં તત્રૈવ તસ્માદ્ અનુગ્રહસ્ય બાહુલ્યમ્
અભવત્।
XXI તેન મૃત્યુના યદ્વત્ પાપસ્ય રાજત્વમ્ અભવત્ તદ્વદ્ અસ્માકં પ્રભુયીશુખ્રીષ્ટદ્વારાનન્તજીવનદાયિપુણ્યેનાનુગ્રહસ્ય રાજત્વં
ભવતિ।

# VI

I પ્રભૂતરૂપેણ યદ્ અનુગ્રહઃ પ્રકાશતે તદર્થં પાપે તિષ્ઠામ ઇતિ વાક્યં કિં વયં વદિષ્યામઃ? તન્ન ભવતુ।
II પાપં પ્રતિ મૃતા વયં પુનસ્તસ્મિન્ કથમ્ જીવિષ્યામઃ?
III વયં યાવન્તો લોકા યીશુખ્રીષ્ટે મજ્જિતા અભવામ તાવન્ત એવ તસ્ય મરણે મજ્જિતા ઇતિ કિં યૂયં ન જાનીથ?
IV તતો યથા પિતુઃ પરાક્રમેણ શ્મશાનાત્ ખ્રીષ્ટ ઉત્થાપિતસ્તથા વયમપિ યત્ નૂતનજીવિન ઇવાચરામસ્તદર્થં મજ્જનેન તેન સાર્દ્ધં
મૃત્યુરૂપે શ્મશાને સંસ્થાપિતાઃ।
V અપરં વયં યદિ તેન સંયુક્તાઃ સન્તઃ સ ઇવ મરણભાગિનો જાતાસ્તર્હિ સ ઇવોત્થાનભાગિનોઽપિ ભવિષ્યામઃ।
VI વયં યત્ પાપસ્ય દાસાઃ પુન ર્ન ભવામસ્તદર્થમ્ અસ્માકં પાપરૂપશરીરસ્ય વિનાશાર્થમ્ અસ્માકં પુરાતનપુરુષસ્તેન સાકં
ક્રુશેઽહન્યતેતિ વયં જાનીમઃ।
VII યો હતઃ સ પાપાત્ મુક્ત એવ।
VIII અતએવ યદિ વયં ખ્રીષ્ટેન સાર્દ્ધમ્ અહન્યામહિ તર્હિ પુનરપિ તેન સહિતા જીવિષ્યામ ઇત્યત્રાસ્માકં વિશ્વાસો વિદ્યતે।
IX યતઃ શ્મશાનાદ્ ઉત્થાપિતઃ ખ્રીષ્ટો પુન ર્ન મ્રિયત ઇતિ વયં જાનીમઃ। તસ્મિન્ કોપ્યધિકારો મૃત્યો ર્નાસ્તિ।
X અપરઞ્ચ સ યદ્ અમ્રિયત તેનૈકદા પાપમ્ ઉદ્દિશ્યામ્રિયત, યચ્ચ જીવતિ તેનેશ્વરમ્ ઉદ્દિશ્ય જીવતિ;
XI તદ્વદ્ યૂયમપિ સ્વાન્ પાપમ્ ઉદ્દિશ્ય મૃતાન્ અસ્માકં પ્રભુણા યીશુખ્રીષ્ટેનેશ્વરમ્ ઉદ્દિશ્ય જીવન્તો જાનીત।
XII અપરઞ્ચ કુત્સિતાભિલાષા◌ાન્ પૂરયિતું યુષ્માકં મર્ત્યદેહેષુ પાપમ્ આધિપત્યં ન કરોતુ।

XIII અપરં સ્વં સ્વમ્ અઙ્ગમ્ અધર્મ્મસ્યાસ્ત્રં કૃત્વા પાપસેવાયાં ન સમર્પયત, કિન્તુ શ્મશાનાદ્ ઉત્થિતાનિવ સ્વાન્ ઈશ્વરે સમર્પયત સ્વાન્યઙ્ગાનિ ચ ધર્મ્માસ્ત્રસ્વરૂપાણીશ્વરમ્ ઉદ્દિશ્ય સમર્પયત।
XIV યુષ્માકમ્ ઉપરિ પાપસ્યાધિપત્યં પુન ર્ન ભવિષ્યતિ, યસ્માદ્ યૂયં વ્યવસ્થાયા અનાયત્તા અનુગ્રહસ્ય ચાયત્તા અભવત।
XV કિન્તુ વયં વ્યવસ્થાયા અનાયત્તા અનુગ્રહસ્ય ચાયત્તા અભવામ, ઇતિ કારણાત્ કિં પાપં કરિષ્યામઃ? તન્ન ભવતુ।
XVI યતો મૃતિજનકં પાપં પુણ્યજનકં નિદેશાચરણઞ્ચૈતયોર્દ્વયો ર્યસ્મિન્ આજ્ઞાપાલનાર્થં ભૃત્યાનિવ સ્વાન્ સમર્પયથ, તસ્યૈવ ભૃત્યા ભવથ, એતત્ કિં યૂયં ન જાનીથ?
XVII અપરઞ્ચ પૂર્વ્વં યૂયં પાપસ્ય ભૃત્યા આસ્તેતિ સત્યં કિન્તુ યસ્યાં શિક્ષારૂપાયાં મૂષાયાં નિક્ષિપ્તા અભવત તસ્યા આકૃતિં મનોભિ ર્લબ્ધવન્ત ઇતિ કારણાદ્ ઈશ્વરસ્ય ધન્યવાદો ભવતુ।
XVIII ઇત્થં યૂયં પાપસેવાતો મુક્તાઃ સન્તો ધર્મ્મસ્ય ભૃત્યા જાતાઃ।
XIX યુષ્માકં શારીરિક્યા દુર્બ્બલતાયા હેતો ર્માનવવદ્ અહમ્ એતદ્ બ્રવીમિ; પુનઃ પુનરધર્મ્મકરણાર્થં યદ્વત્ પૂર્વ્વં પાપામેધ્યયો ર્ભૃત્યત્વે નિજાઙ્ગાનિ સમાર્પયત તદ્વદ્ ઇદાનીં સાધુકર્મ્મકરણાર્થં ધર્મ્મસ્ય ભૃત્યત્વે નિજાઙ્ગાનિ સમર્પયત।
XX યદા યૂયં પાપસ્ય ભૃત્યા આસ્ત તદા ધર્મ્મસ્ય નાયત્તા આસ્ત।
XXI તર્હિ યાનિ કર્મ્માણિ યૂયમ્ ઇદાનીં લજ્જાજનકાનિ બુધ્યધ્વે પૂર્વ્વં તૈ ર્યુષ્માકં કો લાભ આસીત્? તેષાં કર્મ્મણાં ફલં મરણમેવ।
XXII કિન્તુ સામ્પ્રતં યૂયં પાપસેવાતો મુક્તાઃ સન્ત ઈશ્વરસ્ય ભૃત્યાઽભવત તસ્માદ્ યુષ્માકં પવિત્રત્વરૂપં લભ્યમ્ અનન્તજીવનરૂપઞ્ચ ફલમ્ આસ્તે।
XXIII યતઃ પાપસ્ય વેતનં મરણં કિન્ત્વસ્માકં પ્રભુણા યીશુખ્રીષ્ટેનાનન્તજીવનમ્ ઈશ્વરદત્તં પારિતોષિકમ્ આસ્તે।

# VII

I હે ભ્રાતૃગણ વ્યવસ્થાવિદઃ પ્રતિ મમેદં નિવેદનં। વિધિઃ કેવલં યાવજ્જીવં માનવોપર્ય્યધિપતિત્વં કરોતીતિ યૂયં કિં ન જાનીથ?
II યાવત્કાલં પતિ ર્જીવતિ તાવત્કાલમ્ ઊઢા ભાર્ય્યા વ્યવસ્થયા તસ્મિન્ બદ્ધા તિષ્ઠતિ કિન્તુ યદિ પતિ ર્મ્રિયતે તર્હિ સા નારી પત્યુ ર્વ્યવસ્થાતો મુચ્યતે।
III એતત્કારણાત્ પત્યુર્જીવનકાલે નારી યદ્યન્યં પુરુષં વિવહતિ તર્હિ સા વ્યભિચારિણી ભવતિ કિન્તુ યદિ સ પતિ ર્મ્રિયતે તર્હિ સા તસ્યા વ્યવસ્થાયા મુક્તા સતી પુરુષાન્તરેણ વ્યૂઢાપિ વ્યભિચારિણી ન ભવતિ।
IV હે મમ ભ્રાતૃગણ, ઈશ્વરનિમિત્તં યદસ્માકં ફલં જાયતે તદર્થં શ્મશાનાદ્ ઉત્થાપિતેન પુરુષેણ સહ યુષ્માકં વિવાહો યદ્ ભવેત્ તદર્થં ખ્રીષ્ટસ્ય શરીરેણ યૂયં વ્યવસ્થાં પ્રતિ મૃતવન્તઃ।
V યતોઽસ્માકં શારીરિકાચરણસમયે મરણનિમિત્તં ફલમ્ ઉત્પાદયિતું વ્યવસ્થયા દૂષિતઃ પાપાભિલાષોઽસ્માકમ્ અઙ્ગેષુ જીવન્ આસીત્।
VI કિન્તુ તદા યસ્યા વ્યવસ્થાયા વશે આસ્મહિ સામ્પ્રતં તાં પ્રતિ મૃતત્વાદ્ વયં તસ્યા અધીનત્વાત્ મુક્તા ઇતિ હેતોરીશ્વરોઽસ્માભિઃ પુરાતનલિખિતાનુસારાત્ ન સેવિતવ્યઃ કિન્તુ નવીનસ્વભાવેનૈવ સેવિતવ્યઃ
VII તર્હિ વયં કિં બ્રૂમઃ? વ્યવસ્થા કિં પાપજનિકા ભવતિ? નેત્થં ભવતુ। વ્યવસ્થામ્ અવિદ્યમાનાયાં પાપં કિમ્ ઇત્યહં નાવેદં; કિઞ્ચ લોભં મા કાર્ષીરિતિ ચેદ્ વ્યવસ્થાગ્રન્થે લિખિતં નાભવિષ્યત્ તર્હિ લોભઃ કિમ્ભૂતસ્તદહં નાજ્ઞાસ્યં।
VIII કિન્તુ વ્યવસ્થયા પાપં છિદ્રં પ્રાપ્યાસ્માકમ્ અન્તઃ સર્વ્વવિધં કુત્સિતાભિલાષમ્ અજનયત્; યતો વ્યવસ્થાયામ્ અવિદ્યમાનાયાં પાપં મૃતં।
IX અપરં પૂર્વ્વં વ્યવસ્થાયામ્ અવિદ્યમાનાયામ્ અહમ્ અજીવં તતઃ પરમ્ આજ્ઞાયામ્ ઉપસ્થિતાયામ્ પાપમ્ અજીવત્ તદાહમ્ અમ્રિયે।
X ઇત્થં સતિ જીવનનિમિત્તા યાજ્ઞા સા મમ મૃત્યુજનિકાભવત્।
XI યતઃ પાપં છિદ્રં પ્રાપ્ય વ્યવસ્થિતાદેશેન માં વઞ્ચયિત્વા તેન મામ્ અહન્।
XII અતએવ વ્યવસ્થા પવિત્રા, આદેશશ્ચ પવિત્રો ન્યાય્યો હિતકારી ચ ભવતિ।
XIII તર્હિ યત્ સ્વયં હિતકૃત્ તત્ કિં મમ મૃત્યુજનકમ્ અભવત્? નેત્થં ભવતુ; કિન્તુ પાપં યત્ પાતકમિવ પ્રકાશતે તથા નિદેશેન પાપં યદતીવ પાતકમિવ પ્રકાશતે તદર્થં હિતોપાયેન મમ મરણમ્ અજનયત્।
XIV વ્યવસ્થાત્મબોધિકેતિ વયં જાનીમઃ કિન્ત્વહં શારીરતાચારી પાપસ્ય ક્રીતકિઙ્કરો વિદ્યે।
XV યતો યત્ કર્મ્મ કરોમિ તત્ મમ મનોઽભિમતં નહિ; અપરં યન્ મમ મનોઽભિમતં તન્ન કરોમિ કિન્તુ યદ્ ઋતીયે તત્ કરોમિ।
XVI તથાત્વે યન્ મમાનભિમતં તદ્ યદિ કરોમિ તર્હિ વ્યવસ્થા સૂત્તમેતિ સ્વીકરોમિ।
XVII અતએવ સમ્પ્રતિ તત્ કર્મ્મ મયા ક્રિયત ઇતિ નહિ કિન્તુ મમ શરીરસ્થેન પાપેનૈવ ક્રિયતે।
XVIII યતો મયિ, અર્થતો મમ શરીરે, કિમપ્યુત્તમં ન વસતિ, એતદ્ અહં જાનામિ; મમેચ્છુકતાયાં તિષ્ઠન્ત્યામપ્યહમ્ ઉત્તમકર્મ્મસાધને સમર્થો ન ભવામિ।
XIX યતો યામુત્તમાં ક્રિયાં કર્ત્તુમહં વાઞ્છામિ તાં ન કરોમિ કિન્તુ યત્ કુત્સિતં કર્મ્મ કર્ત્તુમ્ અનિચ્છુકોઽસ્મિ તદેવ કરોમિ।
XX અતએવ યદ્યત્ કર્મ્મ કર્ત્તું મમેચ્છા ન ભવતિ તદ્ યદિ કરોમિ તર્હિ તત્ મયા ન ક્રિયતે, મમાન્તર્વર્ત્તિના પાપેનૈવ ક્રિયતે।
XXI ભદ્રં કર્ત્તુમ્ ઇચ્છુકં માં યો ઽભદ્રં કર્ત્તું પ્રવર્ત્તયતિ તાદૃશં સ્વભાવમેકં મયિ પશ્યામિ।
XXII અહમ્ આન્તરિકપુરુષેણેશ્વરવ્યવસ્થાયાં સન્તુષ્ટ આસે;
XXIII કિન્તુ તદ્વિપરીતં યુધ્યન્તં તદન્યમેકં સ્વભાવં મદીયાઙ્ગસ્થિતં પ્રપશ્યામિ, સ મદીયાઙ્ગસ્થિતપાપસ્વભાવસ્યાયત્તં માં કર્ત્તું ચેષ્ટતે।
XXIV હા હા યોઽહં દુર્ભાગ્યો મનુજસ્તં મામ્ એતસ્માન્ મૃતાચ્છરીરાત્ કો નિસ્તારયિષ્યતિ?
XXV અસ્માકં પ્રભુણા યીશુખ્રીષ્ટેન નિસ્તારયિતારમ્ ઈશ્વરં ધન્યં વદામિ। અતએવ શરીરેણ પાપવ્યવસ્થાયા મનસા તુ ઈશ્વરવ્યવસ્થાયાઃ સેવનં કરોમિ।

# VIII

I યે જનાઃ ખ્રીષ્ટં યીશુમ્ આશ્રિત્ય શારીરિકં નાચરન્ત આત્મિકમાચરન્તિ તેઽધુના દણ્ડાર્હા ન ભવન્તિ।
II જીવનદાયકસ્યાત્મનો વ્યવસ્થા ખ્રીષ્ટયીશુના પાપમરણયો ર્વ્યવસ્થાતો મામમોચયત્।
III યસ્માચ્છારીરસ્ય દુર્બ્બલત્વાદ્ વ્યવસ્થયા યત્ કર્મ્માસાધ્યમ્ ઈશ્વરો નિજપુત્રં પાપિશરીરરૂપં પાપનાશકબલિરૂપઞ્ચ પ્રેષ્ય તસ્ય
શરીરે પાપસ્ય દણ્ડં કુર્વ્વન્ તત્કર્મ્મ સાધિતવાન્।
IV તતઃ શારીરિકં નાચરિત્વાસ્માભિરાત્મિકમ્ આચરદ્ભિર્વ્યવસ્થાગ્રન્થે નિર્દ્દિષ્ટાનિ પુણ્યકર્મ્માણિ સર્વ્વાણિ સાધ્યન્તે।
V યે શારીરિકાચારિણસ્તે શારીરિકાન્ વિષયાન્ ભાવયન્તિ યે ચાત્મિકાચારિણસ્તે આત્મનો વિષયાન્ ભાવયન્તિ।
VI શારીરિકભાવસ્ય ફલં મૃત્યુઃ કિઞ્ચાત્મિકભાવસ્ય ફલે જીવનં શાન્તિશ્ચ।
VII યતઃ શારીરિકભાવ ઈશ્વરસ્ય વિરુદ્ધઃ શત્રુતાભાવ એવ સ ઈશ્વરસ્ય વ્યવસ્થાયા અધીનો ન ભવતિ ભવિતુઞ્ચ ન શક્નોતિ।
VIII એતસ્માત્ શારીરિકાચારિષુ તોષ્ટુમ્ ઈશ્વરેણ ન શક્યં।
IX કિન્ત્વીશ્વરસ્યાત્મા યદિ યુષ્માકં મધ્યે વસતિ તર્હિ યૂયં શારીરિકાચારિણો ન સન્ત આત્મિકાચારિણો ભવથઃ। યસ્મિન્ તુ
ખ્રીષ્ટસ્યાત્મા ન વિદ્યતે સ તત્સમ્ભવો નહિ।
X યદિ ખ્રીષ્ટો યુષ્માન્ અધિતિષ્ઠતિ તર્હિ પાપમ્ ઉદ્દિશ્ય શરીરં મૃતં કિન્તુ પુણ્યમુદ્દિશ્યાત્મા જીવતિ।
XI મૃતગણાદ્ યીશુ ર્યેનોત્થાપિતસ્તસ્યાત્મા યદિ યુષ્મન્મધ્યે વસતિ તર્હિ મૃતગણાત્ ખ્રીષ્ટસ્ય સ ઉત્થાપયિતા યુષ્મન્મધ્યવાસિના
સ્વકીયાત્મના યુષ્માકં મૃતદેહાનપિ પુન ર્જીવયિષ્યતિ।
XII હે ભ્રાતૃગણ શરીરસ્ય વયમધમર્ણા ન ભવામોઽતઃ શારીરિકાચારોઽસ્માભિ ર્ન કર્ત્તવ્યઃ।
XIII યદિ યૂયં શરીરિકાચારિણો ભવેત તર્હિ યુષ્માભિ ર્મર્त્તવ્યમેવ કિન્ત્વાત્મના યદિ શરીરકર્મ્માણિ ઘાતયેત તર્હિ જીવિષ્યથ।
XIV યતો યાવન્તો લોકા ઈશ્વરસ્યાત્મનાકૃષ્યન્તે તે સર્વ્વ ઈશ્વરસ્ય સન્તાના ભવન્તિ।
XV યૂયં પુનરપિ ભયજનકં દાસ્યભાવં ન પ્રાપ્તાઃ કિન્તુ યેન ભાવેનેશ્વરં પિતઃ પિતરિતિ પ્રોચ્ય સમ્બોધયથ તાદૃશં
દત્તકપુત્રત્વભાવમ્ પ્રાપ્નુત।
XVI અપરઞ્ચ વયમ્ ઈશ્વરસ્ય સન્તાના એતસ્મિન્ પવિત્ર આત્મા સ્વયમ્ અસ્માકમ્ આત્માભિઃ સાર્દ્ધં પ્રમાણં દદાતિ।
XVII અતએવ વયં યદિ સન્તાનાસ્તર્હ્યધિકારિણઃ, અર્થાદ્ ઈશ્વરસ્ય સ્વત્ત્વાધિકારિણઃ ખ્રીષ્ટેન સહાધિકારિણશ્ચ ભવામઃ; અપરં
તેન સાર્દ્ધં યદિ દુઃખભાગિનો ભવામસ્તર્હિ તસ્ય વિભવસ્યાપિ ભાગિનો ભવિષ્યામઃ।
XVIII કિન્ત્વસ્માસુ યો ભાવીવિભવઃ પ્રકાશિષ્યતે તસ્ય સમીપે વર્ત્તમાનકાલીનં દુઃખમહં તૃણાય મન્યે।
XIX યતઃ પ્રાણિગણ ઈશ્વરસ્ય સન્તાનાનાં વિભવપ્રાપ્તિમ્ આકાઙ્ક્ષન્ નિતાન્તમ્ અપેક્ષતે।
XX અપરઞ્ચ પ્રાણિગણઃ સ્વૈરમ્ અલીકતાયા વશીકૃતો નાભવત્
XXI કિન્તુ પ્રાણિગણોઽપિ નશ્વરતાધીનત્વાત્ મુક્તઃ સન્ ઈશ્વરસ્ય સન્તાનાનાં પરમમુક્તિં પ્રાપ્સ્યતીત્યભિપ્રાયેણ વશીકર્ત્રા
વશીચક્રે।
XXII અપરઞ્ચ પ્રસૂયમાનાવદ્ વ્યથિતઃ સન્ ઇદાનીં યાવત્ કૃત્સ્નઃ પ્રાણિગણ આર્त્તસ્વરં કરોતીતિ વયં જાનીમઃ।
XXIII કેવલઃ સ ઇતિ નહિ કિન્તુ પ્રથમજાતફલસ્વરૂપમ્ આત્માનં પ્રાપ્તા વયમપિ દત્તકપુત્રત્વપદપ્રાપ્તિમ્ અર્થાત્ શરીરસ્ય મુક્તિં
પ્રતીક્ષમાણાસ્તદ્વદ્ અન્તરાર્त્તરાવં કુર્મ્મઃ।
XXIV વયં પ્રત્યાશયા ત્રાણમ્ અલભામહિ કિન્તુ પ્રત્યક્ષવસ્તુનો યા પ્રત્યાશા સા પ્રત્યાશા નહિ, યતો મનુષ્યો યત્ સમીક્ષતે તસ્ય
પ્રત્યાશાં કુતઃ કરિષ્યતિ?
XXV યદ્ અપ્રત્યક્ષં તસ્ય પ્રત્યાશાં યદિ વયં કુર્વ્વીમહિ તર્હિ ધૈર્ય્યમ્ અવલમ્બ્ય પ્રતીક્ષામહે।
XXVI તત આત્માપિ સ્વયમ્ અસ્માકં દુર્બ્બલતાયાઃ સહાયત્વં કરોતિ; યતઃ કિં પ્રાર્થિતવ્યં તદ્ બોદ્ધું વયં ન શક્નુમઃ,
કિન્ત્વસ્પષ્ટૈરાર્त્તરાવૈરાત્મા સ્વયમ્ અસ્મન્નિમિત્તં નિવેદયતિ।
XXVII અપરમ્ ઈશ્વરાભિમતરૂપેણ પવિત્રલોકાનાં કૃતે નિવેદયતિ ય આત્મા તસ્યાભિપ્રાયોઽન્તર્ય્યામિના જ્ઞાયતે।
XXVIII અપરમ્ ઈશ્વરીયનિરૂપણાનુસારેણાહૂતાઃ સન્તો યે તસ્મિન્ પ્રીયન્તે સર્વ્વાણિ મિલિત્વા તેષાં મઙ્ગલં સાધયન્તિ, એતદ્ વયં
જાનીમઃ।
XXIX યત ઈશ્વરો બહુભ્રાતૃણાં મધ્યે સ્વપુત્રં જ્યેષ્ઠં કર્त્તુમ્ ઇચ્છન્ યાન્ પૂર્વ્વં લક્ષ્યીકૃતવાન્ તાન્ તસ્ય પ્રતિમૂર્ત્યાઃ સાદૃશ્યપ્રાપ્ત્યર્થં
ન્યયુંક્ત।
XXX અપરઞ્ચ તેન યે નિયુક્તાસ્ત આહૂતા અપિ યે ચ તેનાહૂતાસ્તે સપુણ્યીકૃતાઃ, યે ચ તેન સપુણ્યીકૃતાસ્તે વિભવયુક્તાઃ।
XXXI ઇત્યત્ર વયં કિં બ્રૂમઃ? ઈશ્વરો યદ્યસ્માકં સપક્ષો ભવતિ તર્હિ કો વિપક્ષોઽસ્માકં?
XXXII આત્મપુત્રં ન રક્ષિત્વા યોઽસ્માકં સર્વ્વેષાં કૃતે તં પ્રદત્તવાન્ સ કિં તેન સહાસ્મભ્યમ્ અન્યાનિ સર્વ્વાણિ ન દાસ્યતિ?
XXXIII ઈશ્વરસ્યાભિરુચિતેષુ કેન દોષ આરોપયિષ્યતે? ય ઈશ્વરસ્તાન્ પુણ્યવત ઇવ ગણયતિ કિં તેન?
XXXIV અપરં તેભ્યો દણ્ડદાનાજ્ઞા વા કેન કરિષ્યતે? યોઽસ્મન્નિમિત્તં પ્રાણાન્ ત્યક્તવાન્ કેવલં તન્ન કિન્તુ મૃતગણમધ્યાદ્
ઉત્થિતવાન્, અપિ ચેશ્વરસ્ય દક્ષિણે પાર્શ્વે તિષ્ઠન્ અદ્યાપ્યસ્માકં નિમિત્તં પ્રાર્થત એવમ્ભૂતો યઃ ખ્રીષ્ટઃ કિં તેન?
XXXV અસ્માભિઃ સહ ખ્રીષ્ટસ્ય પ્રેમવિચ્છેદં જનયિતું કઃ શક્નોતિ? ક્લેશો વ્યસનં વા તાડના વા દુર્ભિક્ષં વા વસ્ત્રહીનત્વં વા
પ્રાણસંશયો વા ખઙ્ગો વા કિમેતાનિ શક્નુવન્તિ?
XXXVI કિન્તુ લિખિતમ્ આસ્તે, યથા, વયં તવ નિમિત્તં સ્મો મૃત્યુવક્ત્રેઽખિલં દિનં। બલિર્દેયો યથા મેષો વયં ગણ્યામહે તથા।
XXXVII અપરં યોઽસ્માસુ પ્રીયતે તેનૈતાસુ વિપત્સુ વયં સમ્યગ્ વિજયામહે।
XXXVIII યતોઽસ્માકં પ્રભુના યીશુખ્રીષ્ટેનેશ્વરસ્ય યત્ પ્રેમ તસ્માદ્ અસ્માકં વિચ્છેદં જનયિતું મૃત્યુ ર્જીવનં વા દિવ્યદૂતા વા
બલવન્તો મુખ્યદૂતા વા વર્त્તમાનો વા ભવિષ્યન્ કાલો વા ઉચ્ચપદં વા નીચપદં વાપરં કિમપિ સૃષ્ટવસ્તુ
XXXIX વૈતેષાં કેનાપિ ન શક્યમિત્યસ્મિન્ દૃઢવિશ્વાસો મમાસ્તે।

# IX

I અહં કાઞ્ચિદ્ કલ્પિતાં કથાં ન કથયામિ, ખ્રીષ્ટસ્ય સાક્ષાત્ સત્યમેવ બ્રવીમિ પવિત્રસ્યાત્મનઃ સાક્ષાન્ મદીયં મન એતત્ સાક્ષ્યં દદાતિ།

II મમાન્તરતિશયદુઃખં નિરન્તરં ખેદશ્ચ

III તસ્માદ્ અહં સ્વજાતીયભ્રાતૃણાં નિમિત્તાત્ સ્વયં ખ્રીષ્ટાચ્છાપાક્રાન્તો ભવિતુમ્ ઐચ્છમ્།

IV યતસ્ત ઇસ્રાયેલસ્ય વંશા અપિ ચ દત્તકપુત્રત્વં તેજો નિયમો વ્યવસ્થાદાનં મન્દિરે ભજનં પ્રતિજ્ઞાઃ પિતૃપુરુષગણશ્ચૈતેષુ સર્વ્વેષુ તેષામ્ અધિકારોઽસ્તિ།

V તત્ કેવલં નહિ કિન્તુ સર્વ્વાધ્યક્ષઃ સર્વ્વદા સચ્ચિદાનન્દ ઈશ્વરો યઃ ખ્રીષ્ટઃ સોઽપિ શારીરિકસમ્બન્ધેન તેષાં વંશસમ્ભવઃ།

VI ઈશ્વરસ્ય વાક્યં વિફલં જાતમ્ ઇતિ નહિ યત્કારણાદ્ ઇસ્રાયેલો વંશે યે જાતાસ્તે સર્વ્વે વસ્તુત ઇસ્રાયેલીયા ન ભવન્તિ།

VII અપરમ્ ઇબ્રાહીમો વંશે જાતા અપિ સર્વ્વે તસ્યૈવ સન્તાના ન ભવન્તિ કિન્તુ ઇસ્હાકો નામ્ના તવ વંશો વિખ્યાતો ભવિષ્યતિ།

VIII અર્થાત્ શારીરિકસંસર્ગાત્ જાતાઃ સન્તાના યાવન્તસ્તાવન્ત એવેશ્વરસ્ય સન્તાના ન ભવન્તિ કિન્તુ પ્રતિશ્રવણાદ્ યે જાયન્તે તએવેશ્વરવંશો ગણ્યતે།

IX યતસ્તત્પ્રતિશ્રુતે ર્વાક્યમેતત્, એતાદૃશે સમયે ઽહં પુનરાગમિષ્યામિ તત્પૂર્વ્વં સારાયાઃ પુત્ર એકો જનિષ્યતે།

X અપરમપિ વદામિ સ્વમનોઽભિલાષત ઈશ્વરેણ યન્નિરૂપિતં તત્ કર્મ્મતો નહિ કિન્ત્વાહ્વયિતુ ર્જાતમેતદ્ યથા સિદ્ધ્યતિ

XI તદર્થં રિબ્કાનામિકયા યોષિતા જનૈકસ્માદ્ અર્થાદ્ અસ્માકમ્ ઇસ્હાકઃ પૂર્વ્વપુરુષાદ્ ગર્ભે ધૃતે તસ્યાઃ સન્તાનયોઃ પ્રસવાત્ પૂર્વ્વં કિઞ્ચ તયોઃ શુભાશુભકર્મ્મણઃ કરણાત્ પૂર્વ્વં

XII તાં પ્રતીદં વાક્યમ્ ઉક્તં, જ્યેષ્ઠઃ કનિષ્ઠં સેવિષ્યતે,

XIII યથા લિખિતમ્ આસ્તે, તથાપ્યેષાવિ ન પ્રીત્વા યાકૂબિ પ્રીતવાન્ અહં།

XIV તર્હિ વયં કિં બ્રૂમઃ? ઈશ્વરઃ કિમ્ અન્યાયકારી? તથા ન ભવતુ།

XV યતઃ સ સ્વયં મૂસામ્ અવદત્; અહં યસ્મિન્ અનુગ્રહં ચિકીર્ષામિ તમેવાનુગૃહ્લામિ, યઞ્ચ દયિતુમ્ ઇચ્છામિ તમેવ દયે།

XVI અતએવેચ્છતા યતમાનેન વા માનવેન તન્ન સાધ્યતે દયાકારિણેશ્વરેણૈવ સાધ્યતે།

XVII ફિરૌણિ શાસ્ત્રે લિખતિ, અહં ત્વદ્વારા મત્પરાક્રમં દર્શયિતું સર્વ્વપૃથિવ્યાં નિજનામ પ્રકાશયિતુઞ્ચ ત્વાં સ્થાપિતવાન્།

XVIII અતઃ સ યમ્ અનુગ્રહીતુમ્ ઇચ્છતિ તમેવાનુગૃહ્લાતિ, યઞ્ચ નિગ્રહીતુમ્ ઇચ્છતિ તં નિગૃહ્લાતિ།

XIX યદિ વદસિ તર્હિ સ દોષં કુતો ગૃહ્લાતિ? તદીયેચ્છાયાઃ પ્રતિબન્ધકત્વં કર્ત્તં કસ્ય સામર્થ્યં વિદ્યતે?

XX હે ઈશ્વરસ્ય પ્રતિપક્ષ મર્ત્ય ત્વં કઃ? એતાદૃશં માં કુતઃ સૃષ્ટવાન્? ઇતિ કથાં સૃષ્ટવસ્તુ સ્રષ્ટ્રે કિં કથયિષ્યતિ?

XXI એકસ્માન્ મૃત્પિણ્ડાદ્ ઉત્કૃષ્ટાપકૃષ્ટૌ દ્વિવિધૌ કલશૌ કર્ત્તું કિં કુલાલસ્ય સામર્થ્યં નાસ્તિ?

XXII ઈશ્વરઃ કોપં પ્રકાશયિતું નિજશક્તિં જ્ઞાપયિતુઞ્ચેચ્છન્ યદિ વિનાશસ્ય યોગ્યાનિ ક્રોધભાજનાનિ પ્રતિ બહુકાલં દીર્ઘસહિષ્ણુતામ્ આશ્રયતિ;

XXIII અપરઞ્ચ વિભવપ્રાપ્ત્યર્થં પૂર્વ્વં નિયુક્તાન્યનુગ્રહપાત્રાણિ પ્રતિ નિજવિભવસ્ય બાહુલ્યં પ્રકાશયિતું કેવલયિહૂદિનાં નહિ ભિન્નદેશિનામપિ મધ્યાદ્

XXIV અસ્માનિવ તાન્યાહ્વયતિ તત્ર તવ કિં?

XXV હોશેયગ્રન્થે યથા લિખિતમ્ આસ્તે, યો લોકો મમ નાસીત્ તં વદિષ્યામિ મદીયકં། યા જાતિ ર્મેઽપ્રિયા ચાસીત્ તાં વદિષ્યામ્યહં પ્રિયાં།

XXVI યૂયં મદીયલોકા ન યત્રેતિ વાક્યમૌચ્યત། અમરેશસ્ય સન્તાના ઇતિ ખ્યાસ્યન્તિ તત્ર તે།

XXVII ઇસ્રાયેલીયલોકેષુ યિશાયિયોઽપિ વાચમેતાં પ્રાચારયત્, ઇસ્રાયેલીયવંશાનાં યા સંખ્યા સા તુ નિશ્ચિતં། સમુદ્રસિકતાસંખ્યાસમાના યદિ જાયતે། તથાપિ કેવલં લોકૈરલ્પૈસ્ત્રાણં વ્રજિષ્યતે།

XXVIII યતો ન્યાયેન સ્વં કર્મ્મ પરેશઃ સાધયિષ્યતિ། દેશે સએવ સંક્ષેપાન્નિજં કર્મ્મ કરિષ્યતિ།

XXIX યિશાયિયોઽપરમપિ કથયામાસ, સૈન્યાધ્યક્ષપરેશેન ચેત્ કિઞ્ચિન્નોદશિષ્યત། તદા વયં સિદોમેવાભવિષ્યામ વિનિશ્ચિતં། યદ્વા વયમ્ અમોરાયા અગમિષ્યામ તુલ્યતાં།

XXX તર્હિ વયં કિં વક્ષ્યામઃ? ઇતરદેશીયા લોકા અપિ પુણ્યાર્થમ્ અયતમાના વિશ્વાસેન પુણ્યમ્ અલભન્ત;

XXXI કિન્ત્વિસ્રાયેલ્લોકા વ્યવસ્થાપાલનેન પુણ્યાર્થં યતમાનાસ્તન્ નાલભન્ત།

XXXII તસ્ય કિં કારણં? તે વિશ્વાસેન નહિ કિન્તુ વ્યવસ્થાયાઃ ક્રિયયા ચેષ્ટિત્વા તસ્મિન્ સ્ખલનજનકે પાષાણે પાદસ્ખલનં પ્રાપ્તાઃ།

XXXIII લિખિતં યાદૃશમ્ આસ્તે, પશ્ય પાદસ્ખલાર્થં હિ સીયોનિ પ્રસ્તરન્તથા། બાધાકારઞ્ચ પાષાણં પરિસ્થાપિતવાનહમ્། વિશ્વસિષ્યતિ યસ્તત્ર સ જનો ન ત્રપિષ્યતે།

# X

I હે ભ્રાતર ઇસ્રાયેલીયલોકા યત્ પરિત્રાણં પ્રાપ્નુવન્તિ તદહં મનસાભિલષન્ ઈશ્વરસ્ય સમીપે પ્રાર્થયે།

II યત ઈશ્વરે તેષાં ચેષ્ટા વિદ્યત ઇત્યત્રાહં સાક્ષ્યસ્મિ; કિન્તુ તેષાં સા ચેષ્ટા સજ્ઞાના નહિ,

III યતસ્ત ઈશ્વરદત્તં પુણ્યમ્ અવિજ્ઞાય સ્વકૃતપુણ્યં સ્થાપયિતુમ્ ચેષ્ટમાના ઈશ્વરદત્તસ્ય પુણ્યસ્ય નિઘ્નત્વં ન સ્વીકુર્વ્વન્તિ།

IV ખ્રીષ્ટ એકૈકવિશ્વાસિજનાય પુણ્યં દાતું વ્યવસ્થાયાઃ ફલસ્વરૂપો ભવતિ།

V વ્યવસ્થાપાલનેન યત્ પુણ્યં તત્ મૂસા વર્ણયામાસ, યથા, યો જનસ્તાં પાલયિષ્યતિ સ તદ્વારા જીવિષ્યતિ།

VI કિન્તુ પ્રત્યયેન યત્ પુણ્યં તદ્ એતાદૃશં વાક્યં વદતિ, કઃ સ્વર્ગમ્ આરુહ્ય ખ્રીષ્ટમ્ અવરોહયિષ્યતિ?

VII કો વા પ્રેતલોકમ્ અવરુહ્ય ખ્રીષ્ટં મૃતગણમધ્યાદ્ આનેષ્યતીતિ વાક્ મનસિ ત્વયા ન ગદિતવ્યા།

VIII તર્હિ કિં બ્રવીતિ? તદ્ વાક્યં તવ સમીપસ્થમ્ અર્થાત્ તવ વદને મનસિ ચાસ્તે, તચ્ચ વાક્યમ્ અસ્માભિઃ પ્રચાર્યમાણં વિશ્વાસસ્ય વાક્યમેવ།

IX વસ્તુતઃ પ્રભું યીશું યદિ વદનેન સ્વીકરોષિ, તથેશ્વરસ્તં શ્મશાનાદ્ ઉદસ્થાપયદ્ ઇતિ યદ્યન્તઃકરણેન વિશ્વસિષિ તર્હિ પરિત્રાણં લપ્સ્યસે।
X યસ્માત્ પુણ્યપ્રાપ્ત્યર્થમ્ અન્તઃકરણેન વિશ્વસિતવ્યં પરિત્રાણાર્થઞ્ચ વદનેન સ્વીકર્ત્તવ્યં।
XI શાસ્ત્રે યાદૃશં લિખતિ વિશ્વસિષ્યતિ યસ્તત્ર સ જનો ન ત્રપિષ્યતે।
XII ઇત્યત્ર યિહૂદિનિ તદન્યલોકે ચ કોપિ વિશેષો નાસ્તિ યસ્માદ્ યઃ સર્વ્વેષામ્ અદ્વિતીયઃ પ્રભુઃ સ નિજયાચકાન સર્વ્વાન્ પ્રતિ વદાન્યો ભવતિ।
XIII યતઃ, યઃ કશ્ચિત્ પરમેશસ્ય નામ્ના હિ પ્રાર્થયિષ્યતે। સ એવ મનુજો નૂનં પરિત્રાતો ભવિષ્યતિ।
XIV યં યે જના ન પ્રત્યાયન્ તે તમુદ્દિશ્ય કથં પ્રાર્થયિષ્યન્તે? યે વા યસ્યાખ્યાનં કદાપિ ન શ્રુતવન્તસ્તે તં કથં પ્રત્યેષ્યન્તિ? અપરં યદિ પ્રચારયિતારો ન તિષ્ઠન્તિ તદા કથં તે શ્રોષ્યન્તિ?
XV યદિ વા પ્રેરિતા ન ભવન્તિ તદા કથં પ્રચારયિષ્યન્તિ? યાદૃશં લિખિતમ્ આસ્તે, યથા, માઙ્ગલિકં સુસંવાદં દદત્યાનીય યે નરાઃ। પ્રચારયન્તિ શાન્તેશ્ચ સુસંવાદં જનાસ્તુ યે। તેષાં ચરણપદ્માનિ કીદૃક્ શોભાન્વિતાનિ હિ।
XVI કિન્તુ તે સર્વ્વે તં સુસંવાદં ન ગૃહીતવન્તઃ। યિશાયિયો યથા લિખિતવાન્। અસ્મત્પ્રચારિતે વાક્યે વિશ્વાસમકરોદ્ધિ કઃ।
XVII અતએવ શ્રવણાદ્ વિશ્વાસ ઐશ્વરવાક્યપ્રચારાત્ શ્રવણઞ્ચ ભવતિ।
XVIII તર્હ્યહં બ્રવીમિ તૈઃ કિં નાશ્રાવિ? અવશ્યમ્ અશ્રાવિ, યસ્માત્ તેષાં શબ્દો મહીં વ્યાપ્નોદ્ વાક્યઞ્ચ નિખિલં જગત્।
XIX અપરમપિ વદામિ, ઇસ્રાયેલીયલોકાઃ કિમ્ એતાં કથાં ન બુધ્યન્તે? પ્રથમતો મૂસા ઇદં વાક્યં પ્રોવાચ, અહમુત્તાપયિષ્યે તાન્ અગણ્યમાનવૈરપિ। ક્લેક્ષ્યામિ જાતિમ્ એતાઞ્ચ પ્રોન્મત્તભિન્નજાતિભિઃ।
XX અપરઞ્ચ યિશાયિયોઽતિશયાક્ષોભેણ કથયામાસ, યથા, અધિ માં યૈસ્તુ નાચેષ્ટિ સમ્પ્રાપ્તસ્તૈ ર્જનૈરહં। અધિ માં યૈ ર્ન સમ્પૃષ્ટં વિજ્ઞાતસ્તૈ ર્જનૈરહં॥
XXI કિન્ત્વિસ્રાયેલીયલોકાન્ અધિ કથયાઞ્ચકાર, યૈરાજ્ઞાલઙ્ઘિભિ ર્લોકૈ ર્વિરુદ્ધં વાક્યમુચ્યતે। તાન્ પ્રત્યેવ દિનં કૃત્સ્નં હસ્તૌ વિસ્તારયામ્યહં॥

# XI

I ઈશ્વરેણ સ્વીકીયલોકા અપસારિતા અહં કિમ્ ઈદૃશં વાક્યં બ્રવીમિ? તન્ન ભવતુ યતોઽહમપિ બિન્યામીનગોત્રીય ઇબ્રાહીમવંશીય ઇસ્રાયેલીયલોકોઽસ્મિ।
II ઈશ્વરેણ પૂર્વ્વં યે પ્રદૃષ્ટાસ્તે સ્વકીયલોકા અપસારિતા ઇતિ નહિ। અપરમ્ એલિયોપાખ્યાને શાસ્ત્રે યલ્લિખિતમ્ આસ્તે તદ્ યૂયં કિં ન જાનીથ?
III હે પરમેશ્વર લોકાસ્ત્વદીયાઃ સર્વ્વા યજ્ઞવેદીરભઞ્જન્ તથા તવ ભવિષ્યદ્વાદિનઃ સર્વ્વાન્ અઘ્નન્ કેવલ એકોઽહમ્ અવશિષ્ટ આસે તે મમાપિ પ્રાણાન્ નાશયિતું ચેષ્ટન્તે, એતાં કથામ્ ઇસ્રાયેલીયલોકાનાં વિરુદ્ધમ્ એલિય ઈશ્વરાય નિવેદયામાસ।
IV તતસ્તં પ્રતીશ્વરસ્યોત્તરં કિં જાતં? બાલ્નામ્નો દેવસ્ય સાક્ષાત્ યૈ ર્જાનૂનિ ન પાતિતાનિ તાદૃશાઃ સપ્ત સહસ્રાણિ લોકા અવશેષિતા મયા।
V તદ્વદ્ એતસ્મિન્ વર્ત્તમાનકાલેઽપિ અનુગ્રહેણાભિરુચિતાસ્તેષામ્ અવશિષ્ટાઃ કતિપયા લોકાઃ સન્તિ।
VI અતએવ તદ્ યદ્યનુગ્રહેણ ભવતિ તર્હિ ક્રિયયા ન ભવતિ નો ચેદ્ અનુગ્રહોઽનનુગ્રહ એવ, યદિ વા ક્રિયયા ભવતિ તર્હ્યનુગ્રહેણ ન ભવતિ નો ચેત્ ક્રિયા ક્રિયૈવ ન ભવતિ।
VII તર્હિ કિં? ઇસ્રાયેલીયલોકા યદ્ અમૃગયન્ત તન્ન પ્રાપુઃ। કિન્ત્વભિરુચિતલોકાસ્તત્ પ્રાપુસ્તદન્યે સર્વ્વ અન્ધીભૂતાઃ।
VIII યથા લિખિતમ્ આસ્તે, ઘોરનિદ્રાલુતાભાવં દૃષ્ટિહીને ચ લોચને। કર્ણૌ શ્રુતિવિહીનૌ ચ પ્રદદૌ તેભ્ય ઈશ્વરઃ॥
IX એતેસ્મિન્ દાયૂદપિ લિખિતવાન્ યથા, અતો ભુક્ત્યાસનં તેષામ્ ઉન્માથવદ્ ભવિષ્યતિ। વા વંશયન્ત્રવદ્ બાધા દણ્ડવદ્ વા ભવિષ્યતિ॥
X ભવિષ્યન્તિ તથાન્ધાસ્તે નેત્રૈઃ પશ્યન્તિ નો યથા। વેપથુઃ કટિદેશસ્ય તેષાં નિત્યં ભવિષ્યતિ॥
XI પતનાર્થં તે સ્ખલિતવન્ત ઇતિ વાચં કિમહં વદામિ? તન્ન ભવતુ કિન્તુ તાન્ ઉદ્યોગિનઃ કર્ત્તું તેષાં પતનાદ્ ઇતરદેશીયલોકૈઃ પરિત્રાણં પ્રાપ્તં।
XII તેષાં પતનં યદિ જગતો લોકાનાં લાભજનકમ્ અભવત્ તેષાં હ્રાસોઽપિ યદિ ભિન્નદેશિનાં લાભજનકોઽભવત્ તર્હિ તેષાં વૃદ્ધિઃ કતિ લાભજનિકા ભવિષ્યતિ?
XIII અતો હે અન્યદેશિનો યુષ્માન્ સમ્બોધ્ય કથયામિ નિજાનાં જ્ઞાતિબન્ધૂનાં મનઃસૂદ્યોગં જનયન્ તેષાં મધ્યે કિયતાં લોકાનાં યથા પરિત્રાણં સાધયામિ
XIV તન્નિમિત્તમ્ અન્યદેશિનાં નિકટે પ્રેરિતઃ સન્ અહં સ્વપદસ્ય મહિમાનં પ્રકાશયામિ।
XV તેષાં નિગ્રહેણ યદીશ્વરેણ સહ જગતો જનાનાં મેલનં જાતં તર્હિ તેષામ્ અનુગૃહીતત્વં મૃતદેહે યથા જીવનલાભસ્તદ્વત્ કિં ન ભવિષ્યતિ?
XVI અપરં પ્રથમજાતં ફલં યદિ પવિત્રં ભવતિ તર્હિ સર્વ્વમેવ ફલં પવિત્રં ભવિષ્યતિ; તથા મૂલં યદિ પવિત્રં ભવતિ તર્હિ શાખા અપિ તથૈવ ભવિષ્યન્તિ।
XVII કિયતીનાં શાખાનાં છેદને કૃતે ત્વં વન્યજિતવૃક્ષસ્ય શાખા ભૂત્વા યદિ તચ્છાખાનાં સ્થાને રોપિતા સતિ જિતવૃક્ષીયમૂલસ્ય રસં ભુંક્ષે,
XVIII તર્હિ તાસાં ભિન્નશાખાનાં વિરુદ્ધં માં ગર્વ્વીઃ; યદિ ગર્વ્વસિ તર્હિ ત્વં મૂલં યન્ન ધારયસિ કિન્તુ મૂલં ત્વાં ધારયતીતિ સંસ્મર।
XIX અપરઞ્ચ યદિ વદસિ માં રોપયિતું તાઃ શાખા વિભન્ના અભવન્;
XX ભદ્રમ્, અપ્રત્યયકારણાત્ તે વિભિન્ના જાતાસ્તથા વિશ્વાસકારણાત્ ત્વં રોપિતો જાતસ્તસ્માદ્ અહઙ્કારમ્ અકૃત્વા સસાધ્વસો ભવ।
XXI યત ઈશ્વરો યદિ સ્વાભાવિકીઃ શાખા ન રક્ષતિ તર્હિ સાવધાનો ભવ ચેત્ ત્વામપિ ન સ્થાપયતિ।

XXII ઇત્યત્રેશ્વરસ્ય યાદૃશી કૃપા તાદૃશં ભયાનકત્વમપિ ત્વયા દૃશ્યતાં; યે પતિતાસ્તાન્ પ્રતિ તસ્ય ભયાનકત્વં દૃશ્યતાં, ત્વઞ્ચ યદિ તત્કૃપાશ્રિતસ્તિષ્ઠસિ તર્હિ ત્વાં પ્રતિ કૃપા દ્રક્ષ્યતે; નો ચેત્ ત્વમપિ તદ્વત્ છિન્નો ભવિષ્યસિ।

XXIII અપરઞ્ચ તે યદ્યપ્રત્યયે ન તિષ્ઠન્તિ તર્હિ પુનરપિ રોપયિષ્યન્તે યસ્માત્ તાન્ પુનરપિ રોપયિતુમ્ ઇશ્વરસ્ય શક્તિરાસ્તે।

XXIV વન્યજિતવૃક્ષસ્ય શાખા સન્ ત્વં યદિ તતશ્છિન્નો રીતિવ્યત્યયેનોત્તમજિતવૃક્ષે રોેપિતોઽભવસ્તર્હિ તસ્ય વૃક્ષસ્ય સ્વીયા યાઃ શાખાસ્તાઃ કિં પુનઃ સ્વવૃક્ષે સંલગિતું ન શક્નુવન્તિ?

XXV હે ભ્રાતરો યુષ્માકમ્ આત્માભિમાનો યન્ન જાયતે તદર્થં મમેદૃશી વાઞ્છા ભવતિ યૂયં એતન્નિગૂઢતત્ત્વમ્ અજાનન્તો યન્ન તિષ્ઠથ; વસ્તુતો યાવત્કાલં સમ્પૂર્ણરૂપેણ ભિન્નદેશિનાં સંગ્રહો ન ભવિષ્યતિ તાવત્કાલમ્ અંશત્વેન ઇસ્રાયેલીયલોકાનામ્ અન્ધતા સ્થાસ્યતિ;

XXVI પશ્ચાત્ તે સર્વ્વે પરિત્રાસ્યન્તે; એતાદૃશં લિખિતમપ્યાસ્તે, આગમિષ્યતિ સીયોનાદ્ એકો યસ્ત્રાણદાયકઃ। અધર્મ્મં યાકુબો વંશાત્ સ તુ દૂરીકરિષ્યતિ।

XXVII તથા દૂરીકરિષ્યામિ તેષાં પાપાન્યહં યદા। તદા તૈરેવ સાર્દ્ધં મે નિયમોઽયં ભવિષ્યતિ।

XXVIII સુસંવાદાત્ તે યુષ્માકં વિપક્ષા અભવન્ કિન્ત્વભિરુચિતત્વાત્ તે પિતૃલોકાનાં કૃતે પ્રિયપાત્રાણિ ભવન્તિ।

XXIX યત ઈશ્વરસ્ય દાનાદ્ આહ્વાનાઞ્ચ પશ્ચાત્તાપો ન ભવતિ।

XXX અતએવ પૂર્વ્વમ્ ઈશ્વરેઽવિશ્વાસિનઃ સન્તોઽપિ યૂયં યદ્વત્ સમ્પ્રતિ તેષામ્ અવિશ્વાસકારણાદ્ ઈશ્વરસ્ય કૃપાપાત્રાણિ જાતાસ્તદ્વદ્

XXXI ઇદાનીં તેઽવિશ્વાસિનઃ સન્તિ કિન્તુ યુષ્માભિ ર્લબ્ધકૃપાકારણાત્ તૈરપિ કૃપા લપ્સ્યતે।

XXXII ઈશ્વરઃ સર્વ્વાન્ પ્રતિ કૃપાં પ્રકાશયિતું સર્વ્વાન્ અવિશ્વાસિત્વેન ગણયતિ।

XXXIII અહો ઈશ્વરસ્ય જ્ઞાનબુદ્ધિરૂપયો ર્ધનયોઃ કીદૃક્ પ્રાચુર્ય્યં। તસ્ય રાજશાસનસ્ય તત્ત્વં કીદૃગ્ અપ્રાપ્યં। તસ્ય માર્ગાશ્ચ કીદૃગ્ અનુપલક્ષ્યાઃ।

XXXIV પરમેશ્વરસ્ય સઙ્કલ્પં કો જ્ઞાતવાન્? તસ્ય મન્ત્રી વા કોઽભવત્?

XXXV કો વા તસ્યોપકારી ભૃત્વા તત્કૃતે તેન પ્રત્યુપકર્ત્તવ્યઃ?

XXXVI યતો વસ્તુમાત્રમેવ તસ્માત્ તેન તસ્મૈ ચાભવત્ તદીયો મહિમા સર્વ્વદા પ્રકાશિતો ભવતુ। ઇતિ।

# XII

I હે ભ્રાતર ઈશ્વરસ્ય કૃપયાહં યુષ્માન્ વિનયે યૂયં સ્વં સ્વં શરીરં સજીવં પવિત્રં ગ્રાહ્યં બલિમ્ ઈશ્વરમુદ્દિશ્ય સમુત્સૃજત, એષા સેવા યુષ્માકં યોગ્યા।

II અપરં યૂયં સાંસારિકા ઇવ માચરત, કિન્તુ સ્વં સ્વં સ્વભાવં પરાવર્ત્ય નૂતનાચારિણો ભવત, તત ઈશ્વરસ્ય નિદેશઃ કીદૃગ્ ઉત્તમો ગ્રહણીયઃ સમ્પૂર્ણશ્ચેતિ યુષ્માભિરનુભાવિષ્યતે।

III કશ્ચિદપિ જનો યોગ્યત્વાદધિકં સ્વં ન મન્યતાં કિન્તુ ઈશ્વરો યસ્મૈ પ્રત્યયસ્ય યત્પરિમાણમ્ અદદાત્ સ તદનુસારતો યોગ્યરૂપં સ્વં મનુતામ્, ઈશ્વરાદ્ અનુગ્રહં પ્રાપ્તઃ સન્ યુષ્માકમ્ એકૈકં જનમ્ ઇત્યાજ્ઞાપયામિ।

IV યતો યદ્વદસ્માકમ્ એકસ્મિન્ શરીરે બહૂન્યઙ્ગાનિ સન્તિ કિન્તુ સર્વ્વેષામઙ્ગાનાં કાર્ય્યં સમાનં નહિ;

V તદ્વદસ્માકં બહુત્વેઽપિ સર્વ્વે વયં ખ્રીષ્ટે એકશરીરાઃ પરસ્પરમ્ અઙ્ગપ્રત્યઙ્ગત્વેન ભવામઃ।

VI અસ્માદ્ ઈશ્વરાનુગ્રહેણ વિશેષં વિશેષં દાનમ્ અસ્માસુ પ્રાપ્તેષુ સત્સુ કોપિ યદિ ભવિષ્યદ્વાક્યં વદતિ તર્હિ પ્રત્યયસ્ય પરિમાણાનુસારતઃ સ તદ્ વદતુ;

VII યદ્વા યદિ કશ્ચિત્ સેવનકારી ભવતિ તર્હિ સ તત્સેવનં કરોતુ; અથવા યદિ કશ્ચિદ્ અધ્યાપયિતા ભવતિ તર્હિ સોઽધ્યાપયતુ;

VIII તથા ય ઉપદેષ્ટા ભવતિ સ ઉપદિશતુ યશ્ચ દાતા સ સરલતયા દદાતુ યસ્ત્વધિપતિઃ સ યત્નેનાધિપતિત્વં કરોતુ યશ્ચ દયાલુઃ સ હૃષ્ટમનસા દયતામ્।

IX અપરઞ્ચ યુષ્માકં પ્રેમ કાપટ્યવર્જિતં ભવતુ યદ્ અભદ્રં તદ્ ઋતીયધ્વં યચ્ચ ભદ્રં તસ્મિન્ અનુરજ્યધ્વમ્।

X અપરં ભ્રાતૃત્વપ્રેમ્ના પરસ્પરં પ્રીયધ્વં સમાદરાદ્ એકોઽપરજનં શ્રેષ્ઠં જાનીધ્વમ્।

XI તથા કાર્ય્યે નિરાલસ્યા મનસિ ચ સોદ્યોગાઃ સન્તઃ પ્રભું સેવધ્વમ્।

XII અપરં પ્રત્યાશાયામ્ આનન્દિતા દુઃખસમયે ચ ધૈર્ય્યયુક્તા ભવત; પ્રાર્થનાયાં સતતં પ્રવર્ત્તધ્વં।

XIII પવિત્રાણાં દીનતાં દૂરીકુરુધ્વમ્ અતિથિસેવાયામ્ અનુરજ્યધ્વમ્।

XIV યે જના યુષ્માન્ તાડયન્તિ તાન્ આશિષં વદત શાપમ્ અદત્ત્વા દદ્ધ્વમાશિષમ્।

XV યે જના આનન્દન્તિ તૈઃ સાર્દ્ધમ્ આનન્દત યે ચ રુદન્તિ તૈઃ સહ રુદિત।

XVI અપરઞ્ચ યુષ્માકં મનસાં પરસ્પરમ્ એકોભાવો ભવતુ; અપરમ્ ઉચ્ચપદમ્ અનાકાઙ્ક્ષ્ય નીચલોકૈઃ સહાપિ માર્દવમ્ આચરત; સ્વાન્ જ્ઞાનિનો ન મન્યધ્વં।

XVII પરસ્માદ્ અપકારં પ્રાપ્યાપિ પરં નાપકુરુત। સર્વ્વેષાં દૃષ્ટિતો યત્ કર્મ્મોત્તમં તદેવ કુરુત।

XVIII યદિ ભવિતું શક્યતે તર્હિ યથાશક્તિ સર્વ્વલોકૈઃ સહ નિર્વ્વિરોધેન કાલં યાપયત।

XIX હે પ્રિયબન્ધવઃ, કસ્મૈચિદ્ અપકારસ્ય સમુચિતં દણ્ડં સ્વયં ન દદ્ધ્વં, કિન્ત્વીશ્વરીયક્રોધાય સ્થાનં દત્ત યતો લિખિતમાસ્તે પરમેશ્વરઃ કથયતિ, દાનં ફલસ્ય મત્કર્મ્મ સૂચિતં પ્રદદામ્યહં।

XX ઇતિકારણાદ્ રિપુ ર્યદિ ક્ષુધાર્ત્તસ્તે તર્હિ તં ત્વં પ્રભોજય। તથા યદિ તૃષાર્ત્તઃ સ્યાત્ તર્હિ તં પરિપાયય। તેન ત્વં મસ્તકે તસ્ય જ્વલદગ્નિં નિધાસ્યસિ।

XXI કુક્રિયયા પરાજિતા ન સન્ત ઉત્તમક્રિયયા કુક્રિયાં પરાજયત।

# XIII

I યુષ્માકમ્ એકૈકજનઃ શાસનપદસ્ય નિઘ્નો ભવતુ યતો યાનિ શાસનપદાનિ સન્તિ તાનિ સર્વ્વાણીશ્વરેણ સ્થાપિતાનિ; ઈશ્વરં
વિના પદસ્થાપનં ન ભવતિ।
II ઇતિ હેતોઃ શાસનપદસ્ય યત્ પ્રાતિકૂલ્યં તદ્ ઈશ્વરીયનિરૂપણસ્ય પ્રાતિકૂલ્યમેવ; અપરં યે પ્રાતિકૂલ્યમ્ આચરન્તિ તે સ્વેષાં
સમુચિતં દણ્ડં સ્વયમેવ ઘટયન્તે।
III શાસ્તા સદાચારિણાં ભયપ્રદો નહિ દુરાચારિણામેવ ભયપ્રદો ભવતિ; ત્વં કિં તસ્માન્ નિર્ભયો ભવિતુમ્ ઇચ્છસિ? તર્હિ
સત્કર્મ્માચર, તસ્માદ્ યશો લપ્સ્યસે,
IV યતસ્તવ સદાચરણાય સ ઈશ્વરસ્ય ભૃત્યોઽસ્તિ। કિન્તુ યદિ કુકર્મ્માચરસિ તર્હિ ત્વં શઙ્કસ્વ યતઃ સ નિરર્થકં ખઙ્ગં ન ધારયતિ;
કુકર્મ્માચારિણં સમુચિતં દણ્ડયિતુમ્ સ ઈશ્વરસ્ય દણ્ડદભૃત્ય એવ।
V અતએવ કેવલદણ્ડભયાન્નહિ કિન્તુ સદસદ્બોધાદપિ તસ્ય વશ્યેન ભવિતવ્યં।
VI એતસ્માદ્ યુષ્માકં રાજકરદાનમપ્યુચિતં યસ્માદ્ યે કરં ગૃહ્લન્તિ ત ઈશ્વરસ્ય કિઙ્કરા ભૂત્વા સતતમ્ એતસ્મિન્ કર્મ્મણિ
નિવિષ્ટાસ્તિષ્ઠન્તિ।
VII અસ્માત્ કરગ્રાહિણે કરં દત્ત, તથા શુલ્કગ્રાહિણે શુલ્કં દત્ત, અપરં યસ્માદ્ ભેતવ્યં તસ્માદ્ બિભીત, યશ્ચ સમાદરણીયસ્તં
સમાદ્રિયધ્વમ્; ઇત્થં યસ્ય યત્ પ્રાપ્યં તત્ તસ્મૈ દત્ત।
VIII યુષ્માકં પરસ્પરં પ્રેમ વિના ઽન્યત્ કિમપિ દેયમ્ ઋણં ન ભવતુ, યતો યઃ પરસ્મિન્ પ્રેમ કરોતિ તેન વ્યવસ્થા સિધ્યતિ।
IX વસ્તુતઃ પરદારાન્ મા ગચ્છ, નરહત્યાં મા કાર્ષીઃ, ચૈર્ય્યં મા કાર્ષીઃ, મિથ્યાસાક્ષ્યં મા દેહિ, લોભં મા કાર્ષીઃ, એતાઃ સર્વ્વા આજ્ઞા
એતાભ્યો ભિન્ના યા કાચિદ્ આજ્ઞાસ્તિ સાપિ સ્વસમીપવાસિનિ સ્વવત્ પ્રેમ કુર્વ્વિત્યનેન વચનેન વેદિતા।
X યતઃ પ્રેમ સમીપવાસિનોઽશુભં ન જનયતિ તસ્માત્ પ્રેમ્ના સર્વ્વા વ્યવસ્થા પાલ્યતે।
XI પ્રત્યયીભવનકાલેઽસ્માકં પરિત્રાણસ્ય સામીપ્યાદ્ ઇદાનીં તસ્ય સામીપ્યમ્ અવ્યવહિતં; અતઃ સમયં વિવિચ્યાસ્માભિઃ
સામ્પ્રતમ્ અવશ્યમેવ નિદ્રાતો જાગર્ત્તવ્યં।
XII બહુતરા યામિની ગતા પ્રભાતં સન્નિધિં પ્રાપ્તં તસ્માત્ તામસીયાઃ ક્રિયાઃ પરિત્યજ્યાસ્માભિ ર્વાસરીયા સજ્જા પરિધાતવ્યા।
XIII અતો હેતો ર્વયં દિવા વિહિતં સદાચરણમ્ આચરિષ્યામઃ। રઙ્ગરસો મત્તત્વં લમ્પટત્વં કામુકત્વં વિવાદ ઈર્ષ્યા ચૈતાનિ
પરિત્યક્ષ્યામઃ।
XIV યૂયં પ્રભુયીશુખ્રીષ્ટરૂપં પરિચ્છદં પરિધદ્ધ્વં સુખાભિલાષપૂરણાય શારીરિકાચરણં માચરત।

# XIV

I યો જનોઽદૃઢવિશ્વાસસ્તં યુષ્માકં સઙ્ગિનં કુરુત કિન્તુ સન્દેહવિચારાર્થં નહિ।
II યતો નિષિદ્ધં કિમપિ ખાદ્યદ્રવ્યં નાસ્તિ, કસ્યચિજ્જનસ્ય પ્રત્યય એતાદૃશો વિદ્યતે કિન્ત્વદૃઢવિશ્વાસઃ કશ્ચિદપરો જનઃ કેવલં
શાકં ભુઙ્क્તે।
III તર્હિ યો જનઃ સાધારણં દ્રવ્યં ભુઙ્ક્તે સ વિશેષદ્રવ્યભોક્તારં નાવજાનીયાત્ તથા વિશેષદ્રવ્યભોક્તાપિ સાધારણદ્રવ્યભોક્તારં
દોષિણં ન કુર્ય્યાત્, યસ્માદ્ ઈશ્વરસ્તમ્ અગૃહ્લાત્।
IV હે પરદાસસ્ય દૂષયિતસ્ત્વં કઃ? નિજપ્રભોઃ સમીપે તેન પદસ્થેન પદચ્યુતેન વા ભવિતવ્યં સ ચ પદસ્થ એવ ભવિષ્યતિ યત
ઈશ્વરસ્તં પદસ્થં કર્ત્તું શક્નોતિ।
V અપરઞ્ચ કશ્ચિજ્જનો દિનાદ્ દિનં વિશેષં મન્યતે કશ્ચિત્તુ સર્વ્વાણિ દિનાનિ સમાનાનિ મન્યતે, એકૈકો જનઃ સ્વીયમનસિ
વિવિચ્ય નિશ્ચિનોતુ।
VI યો જનઃ કિઞ્ચન દિનં વિશેષં મન્યતે સ પ્રભુભક્ત્યા તન્ મન્યતે, યશ્ચ જનઃ કિમપિ દિનં વિશેષં ન મન્યતે સોઽપિ પ્રભુભક્ત્યા
તન્ન મન્યતે; અપરઞ્ચ યઃ સર્વ્વાણિ ભક્ષ્યદ્રવ્યાણિ ભુઙ્ક્તે સ પ્રભુભક્તયા તાનિ ભુઙ્ક્તે યતઃ સ ઈશ્વરં ધન્યં વક્તિ, યશ્ચ ન ભુઙ્ક્તે
સોઽપિ પ્રભુભક્ત્યૈવ ન ભુઞ્જાન ઈશ્વરં ધન્યં બ્રૂતે।
VII અપરમ્ અસ્માકં કશ્ચિત્ નિજનિમિત્તં પ્રાણાન્ ધારયતિ નિજનિમિત્તં મ્રિયતે વા તન્ન;
VIII કિન્તુ યદિ વયં પ્રાણાન્ ધારયામસ્તર્હિ પ્રભુનિમિત્તં ધારયામઃ, યદિ ચ પ્રાણાન્ ત્યજામસ્તર્હ્યપિ પ્રભુનિમિત્તં ત્યજામઃ,
અતએવ જીવને મરણે વા વયં પ્રભોરેવાસ્મહે।
IX યતો જીવન્તો મૃતાશ્ચેત્યુભયેષાં લોકાનાં પ્રભુત્વપ્રાપ્ત્યર્થં ખ્રીષ્ટો મૃત ઉત્થિતઃ પુનર્જીવિતશ્ચ।
X કિન્તુ ત્વં નિજં ભ્રાતરં કુતો દૂષયસિ? તથા ત્વં નિજં ભ્રાતરં કુતસ્તુચ્છં જાનાસિ? ખ્રીષ્ટસ્ય વિચારસિંહાસનસ્ય સમ્મુખે
સર્વ્વૈરસ્માભિરુપસ્થાતવ્યં;
XI યાદૃશં લિખિતમ્ આસ્તે, પરેશઃ શપથં કુર્વ્વન્ વાક્યમેતત્ પુરાવદત્। સર્વ્વો જનઃ સમીપે મે જાનુપાતં કરિષ્યતિ। જિહ્વૈકૈકા
તથેશસ્ય નિઘ્નત્વં સ્વીકરિષ્યતિ।
XII અતએવ ઈશ્વરસમીપેઽસ્માકમ્ એકૈકજનેન નિજા કથા કથયિતવ્યા।
XIII ઇત્થં સતિ વયમ્ અદ્યારભ્ય પરસ્પરં ન દૂષયન્તઃ સ્વભ્રાતુ ર્વિઘ્નો વ્યાઘાતો વા યન્ન જાયેત તાદૃશીમીહાં કુર્મ્મહે।
XIV કિમપિ વસ્તુ સ્વભાવતો નાશુચિ ભવતીત્યહં જાને તથા પ્રભુના યીશુખ્રીષ્ટેનાપિ નિશ્ચિતં જાને, કિન્તુ યો જનો યદ્ દ્રવ્યમ્
અપવિત્રં જાનીતે તસ્ય કૃતે તદ્ અપવિત્રમ્ આસ્તે।
XV અતએવ તવ ભક્ષ્યદ્રવ્યેણ તવ ભ્રાતા શોકાન્વિતો ભવતિ તર્હિ ત્વં ભ્રાતરં પ્રતિ પ્રેમ્ના નાચરસિ। ખ્રીષ્ટો યસ્ય કૃતે સ્વપ્રાણાન્
વ્યયિતવાન્ ત્વં નિજેન ભક્ષ્યદ્રવ્યેણ તં ન નાશય।
XVI અપરં યુષ્માકમ્ ઉત્તમં કર્મ્મ નિન્દિતં ન ભવતુ।
XVII ભક્ષ્યં પેયઞ્ચેશ્વરરાજ્યસ્ય સારો નહિ, કિન્તુ પુણ્યં શાન્તિશ્ચ પવિત્રેણાત્મના જાત આનન્દશ્ચ।
XVIII એતૈ ર્યો જનઃ ખ્રીષ્ટં સેવતે, સ એવેશ્વરસ્ય તુષ્ટિકરો મનુષ્યૈશ્ચ સુખ્યાતઃ।

XIX અતએવ યેનાસ્માકં સર્વ્વેષાં પરસ્પરમ્ ઐક્યં નિષ્ઠા ચ જાયતે તદેવાસ્માભિ ર્યતિતવ્યં।

XX ભક્ષ્યાર્થમ્ ઈશ્વરસ્ય કર્મ્મણો હાનિં મા જનયત; સર્વ્વં વસ્તુ પવિત્રમિતિ સત્યં તથાપિ યો જનો યદ્ ભુક્ત્વા વિઘ્નં લભતે તદર્થં તદ્ ભદ્રં નહિ।

XXI તવ માંસભક્ષણસુરાપાનાદિભિઃ ક્રિયાભિ ર્યદિ તવ ભ્રાતુઃ પાદસ્ખલનં વિઘ્નો વા ચાઞ્ચલ્યં વા જાયતે તર્હિ તદ્ભોજનપાનયોસ્ત્યાગો ભદ્રઃ।

XXII યદિ તવ પ્રત્યયસ્તિષ્ઠતિ તર્હીશ્વરસ્ય ગોચરે સ્વાન્તરે તં ગોપય; યો જનઃ સ્વમતેન સ્વં દોષિણં ન કરોતિ સ એવ ધન્યઃ।

XXIII કિન્તુ યઃ કશ્ચિત્ સંશય્ય ભુઙ્ક્તેઽર્થાત્ ન પ્રતીત્ય ભુઙ્ક્તે, સ એવાવશ્યં દણ્ડાર્હો ભવિષ્યતિ, યતો યત્ પ્રત્યયજં નહિ તદેવ પાપમયં ભવતિ।

# XV

I બલવદ્ભિરસ્માભિ ર્દુર્બ્બલાનાં દૌર્બ્બલ્યં સોઢવ્યં ન ચ સ્વેષામ્ ઇષ્ટાચાર આચરિતવ્યઃ।

II અસ્માકમ્ એકૈકો જનઃ સ્વસમીપવાસિનો હિતાર્થં નિષ્ઠાર્થઞ્ચ તસ્યૈવેષ્ટાચારમ્ આચરતુ।

III યતઃ ખ્રીષ્ટોઽપિ નિજેષ્ટાચારં નાચરિતવાન્, યથા લિખિતમ્ આસ્તે, ત્વન્નિન્દકગણસ્યૈવ નિન્દાભિ ર્નિન્દિતોઽસ્મ્યહં।

IV અપરઞ્ચ વયં યત્ સહિષ્ણુતાસાન્ત્વનયો ર્જનકેન શાસ્ત્રેણ પ્રત્યાશાં લભેમહિ તન્નિમિત્તં પૂર્વ્વકાલે લિખિતાનિ સર્વ્વવચનાન્યસ્માકમ્ ઉપદેશાર્થમેવ લિલિખિરે।

V સહિષ્ણુતાસાન્ત્વનયોરાકરો ય ઈશ્વરઃ સ એવં કરોતુ યત્ પ્રભુ ર્યીશુખ્રીષ્ટ ઇવ યુષ્માકમ્ એકજનોઽન્યજનેન સાર્દ્ધં મનસ ઐક્યમ્ આચરેત્;

VI યૂયઞ્ચ સર્વ્વ એકચિત્તા ભૂત્વા મુખૈકેનેવાસ્મત્પ્રભુયીશુખ્રીષ્ટસ્ય પિતુરીશ્વરસ્ય ગુણાન્ કીર્ત્તયેત।

VII અપરમ્ ઈશ્વરસ્ય મહિમ્નઃ પ્રકાશાર્થં ખ્રીષ્ટો યથા યુષ્માન્ પ્રત્યગૃહ્લાત્ તથા યુષ્માકમપ્યેકો જનોઽન્યજનં પ્રતિગૃહ્લાતુ।

VIII યથા લિખિતમ્ આસ્તે, અતોઽહં સમ્મુખે તિષ્ઠન્ ભિન્નદેશનિવાસિનાં। સ્તુવંસ્ત્વાં પરિગાસ્યામિ તવ નામ્નિ પરેશ્વર॥

IX તસ્ય દયાલુત્વાચ્ચ ભિન્નજાતીયા યદ્ ઈશ્વરસ્ય ગુણાન્ કીર્ત્તયેયુસ્તદર્થં યીશુઃ ખ્રીષ્ટસ્ત્વક્છેદનિયમસ્ય નિઘ્નોઽભવદ્ ઇત્યહં વદામિ। યથા લિખિતમ્ આસ્તે, અતોઽહં સમ્મુખે તિષ્ઠન્ ભિન્નદેશનિવાસિનાં। સ્તુવંસ્ત્વાં પરિગાસ્યામિ તવ નામ્નિ પરેશ્વર॥

X અપરમપિ લિખિતમ્ આસ્તે, હે અન્યજાતયો યૂયં સમં નન્દત તજ્જનૈઃ।

XI પુનશ્ચ લિખિતમ્ આસ્તે, હે સર્વ્વદેશિનો યૂયં ધન્યં બ્રૂત પરેશ્વરં। હે તદીયનરા યૂયં કુરુધ્વં તત્પ્રશંસનં॥

XII અપર યીશાયિયોઽપિ લિલેખ, યીશયસ્ય તુ યત્ મૂલં તત્ પ્રકાશિષ્યતે તદા। સર્વ્વજાતીયનૃણાઞ્ચ શાસકઃ સમુદેષ્યતિ। તત્રાન્યદેશિલોકૈશ્ચ પ્રત્યાશા પ્રકરિષ્યતે॥

XIII અતએવ યૂયં પવિત્રસ્યાત્મનઃ પ્રભાવાદ્ યત્ સમ્પૂર્ણાં પ્રત્યાશાં લપ્સ્યધ્વે તદર્થં તત્પ્રત્યાશાજનક ઈશ્વરઃ પ્રત્યયેન યુષ્માન્ શાન્ત્યાનન્દાભ્યાં સમ્પૂર્ણાન્ કરોતુ।

XIV હે ભ્રાતરો યૂયં સદ્ભાવયુક્તાઃ સર્વ્વપ્રકારેણ જ્ઞાનેન ચ સમ્પૂર્ણાઃ પરસ્પરોપદેશે ચ તત્પરા ઇત્યહં નિશ્ચિતં જાનામિ,

XV તથાપ્યહં યત્ પ્રગલ્ભતરો ભવન્ યુષ્માન્ પ્રબોધયામિ તસ્યૈકં કારણમિદં।

XVI ભિન્નજાતીયાઃ પવિત્રેણાત્મના પાવિતનૈવેદ્યરૂપા ભૂત્વા યદ્ ગ્રાહ્યા ભવેયુસ્તન્નિમિત્તમહમ્ ઈશ્વરસ્ય સુસંવાદં પ્રચારયિતું ભિન્નજાતીયાનાં મધ્યે યીશુખ્રીષ્ટસ્ય સેવકત્વં દાનં ઈશ્વરાત્ લબ્ધવાનસ્મિ।

XVII ઈશ્વરં પ્રતિ યીશુખ્રીષ્ટેન મમ શ્લાઘાકરણસ્ય કારણમ્ આસ્તે।

XVIII ભિન્નદેશિન આજ્ઞાગ્રાહિણઃ કર્ત્તું ખ્રીષ્ટો વાક્યેન ક્રિયયા ચ, આશ્ચર્ય્યલક્ષણૈશ્ચિત્રક્રિયાભિઃ પવિત્રસ્યાત્મનઃ પ્રભાવેન ચ યાનિ કર્મ્માણિ મયા સાધિતવાન્,

XIX કેવલં તાન્યેવ વિનાન્યસ્ય કસ્યચિત્ કર્મ્મણો વર્ણનાં કર્ત્તું પ્રગલ્ભો ન ભવામિ। તસ્માત્ આ યિરૂશાલમ ઇલ્લૂરિકં યાવત્ સર્વ્વત્ર ખ્રીષ્ટસ્ય સુસંવાદં પ્રાચારયં।

XX અન્યેન નિચિતાયાં ભિત્તાવહં યન્ન નિચિનોમિ તન્નિમિત્તં યત્ર યત્ર સ્થાને ખ્રીષ્ટસ્ય નામ કદાપિ કેનાપિ ન જ્ઞાપિતં તત્ર તત્ર સુસંવાદં પ્રચારયિતુમ્ અહં યતે।

XXI યાદૃશં લિખિતમ્ આસ્તે, યૈ ર્વાર્ત્તા તસ્ય ન પ્રાપ્તા દર્શનં તૈસ્તુ લપ્સ્યતે। યૈશ્ચ નૈવ શ્રુતં કિઞ્ચિત્ બોદ્ધું શક્ષ્યન્તિ તે જનાઃ॥

XXII તસ્માદ્ યુષ્મત્સમીપગમનાદ્ અહં મુહુર્મુહુ ર્નિવારિતોઽભવં।

XXIII કિન્ત્વિદાનીમ્ અત્ર પ્રદેશેષુ મયા ન ગતં સ્થાનં કિમપિ નાવશિષ્યતે યુષ્મત્સમીપં ગન્તું બહુવત્સરાનારભ્ય મામકીનાકાઙ્ક્ષા ચ વિદ્યત ઇતિ હેતોઃ

XXIV સ્પાનિયાદેશગમનકાલેઽહં યુષ્મન્મધ્યેન ગચ્છન્ યુષ્માન્ આલોકિષ્યે, તતઃ પરં યુષ્મત્સમ્ભાષણેન તૃપ્તિં પરિલભ્ય તદ્દેશગમનાર્થં યુષ્માભિ ર્વિસર્જયિષ્યે, ઈદૃશી મદીયા પ્રત્યાશા વિદ્યતે।

XXV કિન્તુ સામ્પ્રતં પવિત્રલોકાનાં સેવનાય યિરૂશાલમ્નગરં વ્રજામિ।

XXVI યતો યિરૂશાલમસ્થપવિત્રલોકાનાં મધ્યે યે દરિદ્રા અર્થવિશ્રાણનેન તાનુપકર્ત્તું માકિદનિયાદેશીયા આખાયાદેશીયાશ્ચ લોકા ઐચ્છન્।

XXVII એષા તેષાં સદિચ્છા યતસ્તે તેષામ્ ઋણિનઃ સન્તિ યતો હેતો ર્ભિન્નજાતીયા યેષાં પરમાર્થસ્યાંશિનો જાતા ઐહિકવિષયે તેષામુપકારસ્તૈઃ કર્ત્તવ્યઃ।

XXVIII અતો મયા તત્ કર્મ્મ સાધયિત્વા તસ્મિન્ ફલે તેભ્યઃ સમર્પિતે યુષ્મન્મધ્યેન સ્પાનિયાદેશો ગમિષ્યતે।

XXIX યુષ્મત્સમીપે મમાગમનસમયે ખ્રીષ્ટસ્ય સુસંવાદસ્ય પૂર્ણવરેણ સમ્બલિતઃ સન્ અહમ્ આગમિષ્યામિ ઇતિ મયા જ્ઞાયતે।

XXX હે ભ્રાતૃગણ પ્રભો ર્યીશુખ્રીષ્ટસ્ય નામ્ના પવિત્રસ્યાત્માનઃ પ્રેમ્ના ચ વિનયેઽહં

XXXI યિહૂદાદેશસ્થાનામ્ અવિશ્વાસિલોકાનાં કરેભ્યો યદહં રક્ષાં લભેય મદીયૈતેન સેવનકર્મ્મણા ચ યદ્ યિરૂશાલમસ્થાઃ પવિત્રલોકાસ્તુષ્યેયુઃ,

XXXII તદર્થં યૂયં મત્કૃત ઈશ્વરાય પ્રાર્થયમાણા યતધ્વં તેનાહમ્ ઈશ્વરેચ્છયા સાનન્દં યુષ્મત્સમીપં ગત્વા યુષ્માભિઃ સહિતઃ પ્રાણાન્
આપ્યાયિતું પારયિષ્યામિ।
XXXIII શાન્તિદાયક ઈશ્વરો યુષ્માકં સર્વ્વેષાં સઙ્ગી ભૂયાત્। ઇતિ।

# XVI

I કિંક્રીયાનગરીયધર્મ્મસમાજસ્ય પરિચારિકા યા ફૈબીનામિકાસ્માકં ધર્મ્મભગિની તસ્યાઃ કૃતેઽહં યુષ્માન્ નિવેદયામિ,
II યૂયં તાં પ્રભુમાશ્રિતાં વિજ્ઞાય તસ્યા આતિથ્યં પવિત્રલોકાર્હં કુરુધ્વં, યુષ્મત્તસ્તસ્યા ય ઉપકારો ભવિતું શક્નોતિ તં કુરુધ્વં,
યસ્માત્ તયા બહૂનાં મમ ચોપકારઃ કૃતઃ।
III અપરઞ્ચ ખ્રીષ્ટસ્ય યીશોઃ કર્મ્મણિ મમ સહકારિણૌ મમ પ્રાણરક્ષાર્થઞ્ચ સ્વપ્રાણાન્ પણીકૃતવન્તૌ યૌ પ્રિષ્કિલ્લાક્કિલૌ તૌ મમ
નમસ્કારં જ્ઞાપયધ્વં।
IV તાભ્યામ્ ઉપકારાપ્તિઃ કેવલં મયા સ્વીકર્ત્તવ્યેતિ નહિ ભિન્નદેશીયૈઃ સર્વ્વધર્મ્મસમાજૈરપિ।
V અપરઞ્ચ તયો ર્ગૃહે સ્થિતાન્ ધર્મ્મસમાજલોકાન્ મમ નમસ્કારં જ્ઞાપયધ્વં। તદ્વત્ આશિયાદેશે ખ્રીષ્ટસ્ય પક્ષે
પ્રથમજાતફલસ્વરૂપો ય ઇપેનિતનામા મમ પ્રિયબન્ધુસ્તમપિ મમ નમસ્કારં જ્ઞાપયધ્વં।
VI અપરં બહુશ્રમેણાસ્માન્ અસેવત યા મરિયમ્ તામપિ નમસ્કારં જ્ઞાપયધ્વં।
VII અપરઞ્ચ પ્રેરિતેષુ ખ્યાતકીર્ત્તી મદગ્રે ખ્રીષ્ટાશ્રિતૌ મમ સ્વજાતીયૌ સહબન્દિનૌ ચ યાવાન્દ્રનીકયૂનિયૌ તૌ મમ નમસ્કારં
જ્ઞાપયધ્વં।
VIII તથા પ્રભૌ મત્પ્રિયતમમ્ આમ્પ્લિયમપિ મમ નમસ્કારં જ્ઞાપયધ્વં।
IX અપરં ખ્રીષ્ટસેવાયાં મમ સહકારિણમ્ ઊર્બ્બાણં મમ પ્રિયતમં સ્તાખુઞ્ચ મમ નમસ્કારં જ્ઞાપયધ્વં।
X અપરં ખ્રીષ્ટેન પરીક્ષિતમ્ આપિલ્લિં મમ નમસ્કારં વદત, આરિષ્ટબૂલસ્ય પરિજનાંશ્ચ મમ નમસ્કારં જ્ઞાપયધ્વં।
XI અપરં મમ જ્ઞાતિં હેરોદિયોનં મમ નમસ્કારં વદત, તથા નાર્કિસસ્ય પરિવારાણાં મધ્યે યે પ્રભુમાશ્રિતાસ્તાન્ મમ નમસ્કારં વદત।
XII અપરં પ્રભોઃ સેવાયાં પરિશ્રમકારિણ્યૌ ત્રુફેનાત્રુફોષે મમ નમસ્કારં વદત, તથા પ્રભોઃ સેવાયામ્ અત્યન્તં પરિશ્રમકારિણી યા
પ્રિયા પર્ષિસ્તાં નમસ્કારં જ્ઞાપયધ્વં।
XIII અપરં પ્રભોરભિરુચિતં રૂફં મમ ધર્મ્મમાતા યા તસ્ય માતા તામપિ નમસ્કારં વદત।
XIV અપરમ્ અસુંકૃતં ફ્લિગોનં હર્મ્મં પાત્રબં હર્મ્મિમ્ એતેષાં સઙ્ગિભ્રાતૃગણઞ્ચ નમસ્કારં જ્ઞાપયધ્વં।
XV અપરં ફિલલગો યૂલિયા નીરિયસ્તસ્ય ભગિન્યલુમ્પા ચૈતાન્ એતૈઃ સાર્દ્ધં યાવન્તઃ પવિત્રલોકા આસતે તાનપિ નમસ્કારં
જ્ઞાપયધ્વં।
XVI યૂયં પરસ્પરં પવિત્રચુમ્બનેન નમસ્કુરુધ્વં। ખ્રીષ્ટસ્ય ધર્મ્મસમાજગણો યુષ્માન્ નમસ્કુરુતે।
XVII હે ભ્રાતરો યુષ્માન્ વિનયેઽહં યુષ્માભિ ર્યા શિક્ષા લબ્ધા તામ્ અતિક્રમ્ય યે વિચ્છેદાન્ વિઘ્નાંશ્ચ કુર્વ્વન્તિ તાન્ નિશ્ચિનુત
તેષાં સઙ્ગં વર્જયત ચ।
XVIII યતસ્તાદૃશા લોકા અસ્માકં પ્રભો ર્યીશુખ્રીષ્ટસ્ય દાસા ઇતિ નહિ કિન્તુ સ્વોદરસ્યૈવ દાસાઃ; અપરં પ્રણયવચનૈ ર્મધુરવાક્યૈશ્ચ
સરલલોકાનાં મનાંસિ મોહયન્તિ।
XIX યુષ્માકમ્ આજ્ઞાગ્રાહિત્વં સર્વ્વત્ર સર્વ્વૈ ર્જ્ઞાતં તતોઽહં યુષ્માસુ સાનન્દોઽભવં તથાપિ યૂયં યત્ સત્જ્ઞાનેન જ્ઞાનિનઃ કુજ્ઞાને
ચાતત્પરા ભવેતેતિ મમાભિલાષઃ।
XX અધિકન્તુ શાન્તિદાયક ઈશ્વરઃ શૈતાનમ્ અવિલમ્બં યુષ્માકં પદાનામ્ અધો મર્દ્દિષ્યતિ। અસ્માકં પ્રભુ ર્યીશુખ્રીષ્ટો યુષ્માસુ
પ્રસાદં ક્રિયાત્। ઇતિ।
XXI મમ સહકારી તીમથિયો મમ જ્ઞાતયો લૂકિયો યાસોન્ સોસિપાત્રશ્ચેમે યુષ્માન્ નમસ્કુર્વ્વન્તે।
XXII અપરમ્ એતત્પત્રલેખકસ્તર્ત્તિયનામાહમપિ પ્રભો ર્નામ્ના યુષ્માન્ નમસ્કરોમિ।
XXIII તથા કૃત્સ્નધર્મ્મસમાજસ્ય મમ ચાતિથ્યકારી ગાયો યુષ્માન્ નમસ્કરોતિ। અપરમ્ એતન્નગરસ્ય ધનરક્ષક ઇરાસ્તઃ
ક્કાર્ત્તનામકશ્ચૈકો ભ્રાતા તાવપિ યુષ્માન્ નમસ્કુરુતઃ।
XXIV અસ્માકં પ્રભુ ર્યીશુખ્રીષ્ટા યુષ્માસુ સર્વ્વેષુ પ્રસાદં ક્રિયાત્। ઇતિ।
XXV પૂર્વ્વકાલિકયુગેષુ પ્રચ્છન્ના યા મન્ત્રણાધુના પ્રકાશિતા ભૂત્વા ભવિષ્યદ્વાદિલિખિતગ્રન્થગણસ્ય પ્રમાણાદ્ વિશ્વાસેન
ગ્રહણાર્થં સદાતનસ્યેશ્વરસ્યાજ્ઞયા સર્વ્વદેશીયલોકાન્ જ્ઞાપ્યતે,
XXVI તસ્યા મન્ત્રણાયા જ્ઞાનં લબ્ધ્વા મયા યઃ સુસંવાદો યીશુખ્રીષ્ટમધિ પ્રચાર્ય્યતે, તદનુસારાદ્ યુષ્માન્ ધર્મ્મે સુસ્થિરાન્ કર્ત્તું
સમર્થો યોઽદ્વિતીયઃ
XXVII સર્વ્વજ્ઞ ઈશ્વરસ્તસ્ય ધન્યવાદો યીશુખ્રીષ્ટેન સન્તતં ભૂયાત્। ઇતિ।

# ૧ કરિન્થિનઃ પત્રં

I યાવન્તઃ પવિત્રા લોકાઃ સ્વેષામ્ અસ્માકઞ્ચ વસતિસ્થાનેષ્વસ્માકં પ્રભો ર્યીશોઃ ખ્રીષ્ટસ્ય નામ્ના પ્રાર્થયન્તે તૈઃ સહાહૂતાનાં ખ્રીષ્ટેન યીશુના પવિત્રીકૃતાનાં લોકાનાં ય ઈશ્વરીયધર્મ્મસમાજઃ કરિન્થનગરે વિદ્યતે
II તં પ્રતીશ્વરસ્યેચ્છયાહૂતો યીશુખ્રીષ્ટસ્ય પ્રેરિતઃ પૌલઃ સોસ્થિનિનામા ભ્રાતા ચ પત્રં લિખતિ।
III અસ્માકં પિત્રેશ્વરેણ પ્રભુના યીશુખ્રીષ્ટેન ચ પ્રસાદઃ શાન્તિશ્ચ યુષ્મભ્યં દીયતાં।
IV ઈશ્વરો યીશુખ્રીષ્ટેન યુષ્માન્ પ્રતિ પ્રસાદં પ્રકાશિતવાન્, તસ્માદહં યુષ્મન્નિમિત્તં સર્વ્વદા મદીયેશ્વરં ધન્યં વદામિ।
V ખ્રીષ્ટસમ્બન્ધીયં સાક્ષ્યં યુષ્માકં મધ્યે યેન પ્રકારેણ સપ્રમાણમ્ અભવત્
VI તેન યૂયં ખ્રીષ્ટાત્ સર્વ્વવિધવક્તૃતાજ્ઞાનાદીનિ સર્વ્વધનાનિ લબ્ધવન્તઃ।
VII તતોઽસ્મત્પ્રભો ર્યીશુખ્રીષ્ટસ્ય પુનરાગમનં પ્રતીક્ષમાણાનાં યુષ્માકં કસ્યાપિ વરસ્યાભાવો ન ભવતિ।
VIII અપરમ્ અસ્માકં પ્રભો ર્યીશુખ્રીષ્ટસ્ય દિવસે યૂયં યન્નિર્દ્દોષા ભવેત તદર્થં સએવ યાવદન્તં યુષ્માન્ સુસ્થિરાન્ કરિષ્યતિ।
IX ય ઈશ્વરઃ સ્વપુત્રસ્યાસ્મત્પ્રભો ર્યીશુખ્રીષ્ટસ્યાંશિનઃ કર્ત્તું યુષ્માન્ આહૂતવાન્ સ વિશ્વસનીયઃ।
X હે ભ્રાતરઃ, અસ્માકં પ્રભુયીશુખ્રીષ્ટસ્ય નામ્ના યુષ્માન્ વિનયેઽહં સર્વ્વૈ ર્યુષ્માભિરેકરૂપાણિ વાક્યાનિ કથ્યન્તાં યુષ્મન્મધ્યે ભિન્નસઙ્ઘાતા ન ભવન્તુ મનોવિચારયોરૈક્યેન યુષ્માકં સિદ્ધત્વં ભવતુ।
XI હે મમ ભ્રાતરો યુષ્મન્મધ્યે વિવાદા જાતા ઇતિ વાર્ત્તામહં ક્લોય્યાઃ પરિજનૈ ર્જ્ઞાપિતઃ।
XII મમાભિપ્રેતમિદં યુષ્માકં કશ્ચિત્ કશ્ચિદ્ વદતિ પૌલસ્ય શિષ્યોઽહમ્ આપલ્લોઃ શિષ્યોઽહં કૈફાઃ શિષ્યોઽહં ખ્રીષ્ટસ્ય શિષ્યોઽહમિતિ ચ।
XIII ખ્રીષ્ટસ્ય કિં વિભેદઃ કૃતઃ? પૌલઃ કિં યુષ્મત્કૃતે ક્રુશે હતઃ? પૌલસ્ય નામ્ના વા યૂયં કિં મજ્જિતાઃ?
XIV ક્રિષ્પગાયૌ વિના યુષ્માકં મધ્યેઽન્યઃ કોઽપિ મયા ન મજ્જિત ઇતિ હેતોરહમ્ ઈશ્વરં ધન્યં વદામિ।
XV એતેન મમ નામ્ના માનવા મયા મજ્જિતા ઇતિ વક્તું કેનાપિ ન શક્યતે।
XVI અપરં સ્તિફાનસ્ય પરિજના મયા મજ્જિતાસ્તદન્યઃ કશ્ચિદ્ યન્મયા મજ્જિતસ્તદહં ન વેદ્મિ।
XVII ખ્રીષ્ટેનાહં મજ્જનાર્થં ન પ્રેરિતઃ કિન્તુ સુસંવાદસ્ય પ્રચારાર્થમેવ; સોઽપિ વાક્પટુતયા મયા ન પ્રચારિતવ્યઃ, યતસ્તથા પ્રચારિતે ખ્રીષ્ટસ્ય ક્રુશે મૃત્યુઃ ફલહીનો ભવિષ્યતિ।
XVIII યતો હેતો ર્યે વિનશ્યન્તિ તે તાં ક્રુશસ્ય વાર્ત્તાં પ્રલાપમિવ મન્યન્તે કિઞ્ચ પરિત્રાણં લભમાનેષ્વસ્માસુ સા ઈશ્વરીયશક્તિસ્વરૂપા।
XIX તસ્માદિત્થં લિખિતમાસ્તે, જ્ઞાનવતાન્તુ યત્ જ્ઞાનં તન્મયા નાશયિષ્યતે। વિલોપયિષ્યતે તદ્વદ્ બુદ્ધિ ર્બદ્ધિમતાં મયા।
XX જ્ઞાની કુત્ર? શાસ્ત્રી વા કુત્ર? ઇહલોકસ્ય વિચારતત્પરો વા કુત્ર? ઇહલોકસ્ય જ્ઞાનં કિમીશ્વરેણ મોહીકૃતં નહિ?
XXI ઈશ્વરસ્ય જ્ઞાનાદ્ ઇહલોકસ્ય માનવાઃ સ્વજ્ઞાનેનેશ્વરસ્ય તત્ત્વબોધં ન પ્રાપ્તવન્તસ્તસ્માદ્ ઈશ્વરઃ પ્રચારરૂપિણા પ્રલાપેન વિશ્વાસિનઃ પરિત્રાતું રોચિતવાન્।
XXII યિહૂદીયલોકા લક્ષણાનિ દિદૃક્ષન્તિ ભિન્નદેશીયલોકાસ્તુ વિદ્યાં મૃગયન્તે,
XXIII વયઞ્ચ ક્રુશે હતં ખ્રીષ્ટં પ્રચારયામઃ। તસ્ય પ્રચારો યિહૂદીયૈ ર્વિઘ્ન ઇવ ભિન્નદેશીયૈશ્ચ પ્રલાપ ઇવ મન્યતે,
XXIV કિન્તુ યિહૂદીયાનાં ભિન્નદેશીયાનાઞ્ચ મધ્યે યે આહૂતાસ્તેષુ સ ખ્રીષ્ટ ઈશ્વરીયશક્તિરિવેશ્વરીયજ્ઞાનમિવ ચ પ્રકાશતે।
XXV યત ઈશ્વરે યઃ પ્રલાપ આરોપ્યતે સ માનવાતિરિક્તં જ્ઞાનમેવ યચ્ચ દૌર્બ્બલ્યમ્ ઈશ્વર આરોપ્યતે તત્ માનવાતિરિક્તં બલમેવ।
XXVI હે ભ્રાતરઃ, આહૂતયુષ્મદ્ગણો યષ્માભિરાલોક્યતાં તન્મધ્યે સાંસારિકજ્ઞાનેન જ્ઞાનવન્તઃ પરાક્રમિણો વા કુલીના વા બહવો ન વિદ્યન્તે।
XXVII યત ઈશ્વરો જ્ઞાનવતસ્ત્રપયિતું મૂર્ખલોકાન્ રોચિતવાન્ બલાનિ ચ ત્રપયિતુમ્ ઈશ્વરો દુર્બ્બલાન્ રોચિતવાન્।
XXVIII તથા વર્ત્તમાનલોકાન્ સંસ્થિતિભ્રષ્ટાન્ કર્ત્તુમ્ ઈશ્વરો જગતોઽપકૃષ્ટાન્ હેયાન્ અવર્ત્તમાનાંશ્ચાભિરોચિતવાન્।
XXIX તત ઈશ્વરસ્ય સાક્ષાત્ કેનાપ્યાત્મશ્લાઘા ન કર્ત્તવ્યા।
XXX યૂયઞ્ચ તસ્માત્ ખ્રીષ્ટે યીશૌ સંસ્થિતિં પ્રાપ્તવન્તઃ સ ઈશ્વરાદ્ યુષ્માકં જ્ઞાનં પુણ્યં પવિત્રત્વં મુક્તિશ્ચ જાતા।
XXXI અતએવ યદ્વદ્ લિખિતમાસ્તે તદ્વત્, યઃ કશ્ચિત્ શ્લાઘમાનઃ સ્યાત્ શ્લાઘતાં પ્રભુના સ હિ।

## II

I હે ભ્રાતરો યુષ્મત્સમીપે મમાગમનકાલેઽહં વક્તૃતાયા વિદ્યાયા વા નૈપુણ્યેનેશ્વરસ્ય સાક્ષ્યં પ્રચારિતવાન્ તન્નહિ;
II યતો યીશુખ્રીષ્ટં તસ્ય ક્રુશે હતત્વઞ્ચ વિના નાન્યત્ કિમપિ યુષ્મન્મધ્યે જ્ઞાપયિતું વિહિતં બુદ્ધવાન્।
III અપરઞ્ચાતીવ દૌર્બ્બલ્યભીતિકમ્પયુક્તો યુષ્માભિઃ સાર્દ્ધમાસં।
IV અપરં યુષ્માકં વિશ્વાસો યત્ માનુષિકજ્ઞાનસ્ય ફલં ન ભવેત્ કિન્ત્વીશ્વરીયશક્તેઃ ફલં ભવેત્,
V તદર્થં મમ વક્તૃતા મદીયપ્રચારશ્ચ માનુષિકજ્ઞાનસ્ય મધુરવાક્યસમ્બલિતૌ નાસ્તાં કિન્ત્વાત્મનઃ શક્તેશ્ચ પ્રમાણયુક્તાવાસ્તાં।
VI વયં જ્ઞાનં ભાષામહે તચ્ચ સિદ્ધલોકૈ ર્જ્ઞાનમિવ મન્યતે, તદિહલોકસ્ય જ્ઞાનં નહિ, ઇહલોકસ્ય નશ્વરાણામ્ અધિપતીનાં વા જ્ઞાનં નહિ;
VII કિન્તુ કાલાવસ્થાયાઃ પૂર્વ્વસ્માદ્ યત્ જ્ઞાનમ્ અસ્માકં વિભવાર્થમ્ ઈશ્વરેણ નિશ્ચિત્ય પ્રચ્છન્નં તન્નિગૂઢમ્ ઈશ્વરીયજ્ઞાનં પ્રભાષામહે।
VIII ઇહલોકસ્યાધિપતીનાં કેનાપિ તત્ જ્ઞાનં ન લબ્ધં, લબ્ધે સતિ તે પ્રભાવવિશિષ્ટં પ્રભું ક્રુશે નાહનિષ્યન્।

IX તદ્વલ્લિખિતમાસ્તે, નેત્રેણ ક્કાપિ નો દૃષ્ટં કર્ણેનાપિ ચ ન શ્રુતં। મનોમધ્યે તુ કસ્યાપિ ન પ્રવિષ્ટં કદાપિ યત્। ઈશ્વરે પ્રીયમાણાનાં
કૃતે તત્ તેન સઞ્ચિતં।
X અપરમીશ્વરઃ સ્વાત્મના તદસ્માકં સાક્ષાત્ પ્રાકાશયત્; યત આત્મા સર્વ્વમેવાનુસન્ધત્તે તેન ચેશ્વરસ્ય મર્મ્મતત્ત્વમપિ બુધ્યતે।
XI મનુજસ્યાન્તઃસ્થમાત્માનં વિના કેન મનુજેન તસ્ય મનુજસ્ય તત્ત્વં બુધ્યતે? તદ્વદીશ્વરસ્યાત્માનં વિના કેનાપીશ્વરસ્ય તત્ત્વં ન
બુધ્યતે।
XII વયઞ્ચેહલોકસ્યાત્માનં લબ્ધવન્તસ્તન્નહિ કિન્ત્વીશ્વરસ્યૈવાત્માનં લબ્ધવન્તઃ, તતો હેતોરીશ્વરેણ સ્વપ્રસાદાદ્ અસ્મભ્યં યદ્
યદ્ દત્તં તત્સર્વ્વમ્ અસ્માભિ ર્જ્ઞાતું શક્યતે।
XIII તચ્ચાસ્માભિ ર્માનુષિકજ્ઞાનસ્ય વાક્યાનિ શિક્ષિત્વા કથ્યત ઇતિ નહિ કિન્ત્વાત્મતો વાક્યાનિ શિક્ષિત્વાત્મિકૈ ર્વાક્યૈરાત્મિકં
ભાવં પ્રકાશયદ્ભિઃ કથ્યતે।
XIV પ્રાણી મનુષ્ય ઈશ્વરીયાત્મનઃ શિક્ષાં ન ગૃહ્લાતિ યત આત્મિકવિચારેણ સા વિચાર્ય્યેતિ હેતોઃ સ તાં પ્રલાપમિવ મન્યતે બોદ્ધુઞ્ચ
ન શક્નોતિ।
XV આત્મિકો માનવઃ સર્વ્વાણિ વિચારયતિ કિન્તુ સ્વયં કેનાપિ ન વિચાર્ય્યતે।
XVI યત ઈશ્વરસ્ય મનો જ્ઞાત્વા તમુપદેષ્ટું કઃ શક્નોતિ? કિન્તુ ખ્રીષ્ટસ્ય મનોઽસ્માભિ ર્લબ્ધં।

# III

I હે ભ્રાતરઃ, અહમાત્મિકૈરિવ યુષ્માભિઃ સમં સમ્ભાષિતું નાશક્નવં કિન્તુ શારીરિકાચારિભિઃ ખ્રીષ્ટધર્મ્મે શિશુતુલ્યૈશ્ચ જનૈરિવ
યુષ્માભિઃ સહ સમભાષે।
II યુષ્માન્ કઠિનભક્ષ્યં ન ભોજયન્ દુગ્ધમ્ અપાયયં યતો યૂયં ભક્ષ્યં ગ્રહીતું તદા નાશક્નુત ઇદાનીમપિ ન શક્નુથ, યતો
હેતોરધુનાપિ શારીરિકાચારિણ આધ્વે।
III યુષ્મન્મધ્યે માત્સર્ય્યવિવાદભેદા ભવન્તિ તતઃ કિં શારીરિકાચારિણો નાધ્વે માનુષિકમાર્ગેણ ચ ન ચરથ?
IV પૌલસ્યાહમિત્યાપલ્લોરહમિતિ વા યદ્વાક્યં યુષ્માકં કૈશ્ચિત્ કૈશ્ચિત્ કથ્યતે તસ્માદ્ યૂયં શારીરિકાચારિણ ન ભવથ?
V પૌલઃ કઃ? આપલ્લો ર્વા કઃ? તૌ પરિચારકમાત્રૌ તયોરેકૈકસ્મૈ ચ પ્રભુ ર્યાદૃક્ ફલમદદાત્ તદ્વત્ તયોર્દ્વારા યૂયં વિશ્વાસિનો
જાતાઃ।
VI અહં રોપિતવાન્ આપલ્લોશ્ચ નિષિક્તવાન્ ઈશ્વરશ્ચાવર્દ્ધયત્।
VII અતો રોપયિતૃસેક્તારાવસારૌ વર્દ્ધયિતેશ્વર એવ સારઃ।
VIII રોપયિતૃસેક્તારૌ ચ સમૌ તયોરેકૈકશ્ચ સ્વશ્રમયોગ્યં સ્વવેતનં લપ્સ્યતે।
IX આવામીશ્વરેણ સહ કર્મ્મકારિણૌ, ઈશ્વરસ્ય યત્ ક્ષેત્રમ્ ઈશ્વરસ્ય યા નિર્મ્મિતિઃ સા યૂયમેવ।
X ઈશ્વરસ્ય પ્રસાદાત્ મયા યત્ પદં લબ્ધં તસ્માત્ જ્ઞાનિના ગૃહકારિણેવ મયા ભિત્તિમૂલં સ્થાપિતં તદુપરિ ચાન્યેન નિચીયતે।
કિન્તુ યેન યન્નિચીયતે તત્ તેન વિવિચ્યતાં।
XI યતો યીશુખ્રીષ્ટરૂપં યદ્ ભિત્તિમૂલં સ્થાપિતં તદન્યત્ કિમપિ ભિત્તિમૂલં સ્થાપયિતું કેનાપિ ન શક્યતે।
XII એતદ્ભિત્તિમૂલસ્યોપરિ યદિ કેચિત્ સ્વર્ણરૂપ્યમણિકાષ્ઠતૃણનલાન્ નિચિન્વન્તિ,
XIII તર્હ્યેકૈકસ્ય કર્મ્મ પ્રકાશિષ્યતે યતઃ સ દિવસસ્તત્ પ્રકાશયિષ્યતિ। યતો હતોસ્તેન દિવસેન વહ્નિમયેનોદેતવ્યં તત એકૈકસ્ય
કર્મ્મ કીદૃશમેતસ્ય પરીક્ષા બહ્નિના ભવિષ્યતિ।
XIV યસ્ય નિચયનરૂપં કર્મ્મ સ્થાસ્નુ ભવિષ્યતિ સ વેતનં લપ્સ્યતે।
XV યસ્ય ચ કર્મ્મ ધક્ષ્યતે તસ્ય ક્ષતિ ર્ભવિષ્યતિ કિન્તુ વહ્ને ર્નિર્ગતજન ઇવ સ સ્વયં પરિત્રાણં પ્રાપ્સ્યતિ।
XVI યૂયમ્ ઈશ્વરસ્ય મન્દિરં યુષ્મન્મધ્યે ચેશ્વરસ્યાત્મા નિવસતીતિ કિં ન જાનીથ?
XVII ઈશ્વરસ્ય મન્દિરં યેન વિનાશ્યતે સોઽપીશ્વરેણ વિનાશયિષ્યતે યત ઈશ્વરસ્ય મન્દિરં પવિત્રમેવ યૂયં તુ તન્મન્દિરમ્ આધ્વે।
XVIII કોપિ સ્વં ન વઞ્ચયતાં। યુષ્માકં કશ્ચન ચેદિહલોકસ્ય જ્ઞાનેન જ્ઞાનવાનહમિતિ બુધ્યતે તર્હિ સ યત્ જ્ઞાની ભવેત્ તદર્થં મૂઢો
ભવતુ।
XIX યસ્માદિહલોકસ્ય જ્ઞાનમ્ ઈશ્વરસ્ય સાક્ષાત્ મૂઢત્વમેવ। એતસ્મિન્ લિખિતમપ્યાસ્તે, તીક્ષ્ણા યા જ્ઞાનિનાં બુદ્ધિસ્તયા તાન્
ધરતીશ્વરઃ।
XX પુનશ્ચ। જ્ઞાનિનાં કલ્પના વેત્તિ પરમેશો નિરર્થકાઃ।
XXI અતએવ કોઽપિ મનુજૈરાત્માનં ન શ્લાઘતાં યતઃ સર્વ્વાણિ યુષ્માકમેવ,
XXII પૌલ વા આપલ્લો ર્વા કૈફા વા જગદ્ વા જીવનં વા મરણં વા વર્ત્તમાનં વા ભવિષ્યદ્વા સર્વ્વાણ્યેવ યુષ્માકં,
XXIII યૂયઞ્ચ ખ્રીષ્ટસ્ય, ખ્રીષ્ટશ્ચેશ્વરસ્ય।

# IV

I લોકા અસ્માન્ ખ્રીષ્ટસ્ય પરિચારકાન્ ઈશ્વરસ્ય નિગૂઠવાક્યધનસ્યાધ્યક્ષાંશ્ચ મન્યન્તાં।
II કિઞ્ચ ધનાધ્યક્ષેણ વિશ્વસનીયેન ભવિતવ્યમેતદેવ લોકૈ ર્યાચ્યતે।
III અતો વિચારયદ્ભિ ર્યુષ્માભિરન્યૈઃ કૈશ્ચિન્ મનુજૈ ર્વા મમ પરીક્ષણં મયાતીવ લઘુ મન્યતે ઽહમપ્યાત્માનં ન વિચારયામિ।
IV મયા કિમપ્યપરાદ્ધમિત્યહં ન વેદ્મિ કિન્ત્વેતેન મમ નિરપરાધત્વં ન નિશ્ચીયતે પ્રભુરેવ મમ વિચારયિતાસ્તિ।
V અત ઉપયુક્તસમયાત્ પૂર્વ્વમ્ અર્થતઃ પ્રભોરાગમનાત્ પૂર્વ્વં યુષ્માભિ ર્વિચારો ન ક્રિયતાં। પ્રભુરાગત્ય તિમિરેણ પ્રચ્છન્નાનિ
સર્વ્વાણિ દીપયિષ્યતિ મનસાં મન્ત્રણાશ્ચ પ્રકાશયિષ્યતિ તસ્મિન્ સમય ઈશ્વરાદ્ એકૈકસ્ય પ્રશંસા ભવિષ્યતિ।
VI હે ભ્રાતરઃ સર્વ્વાણ્યેતાનિ મયાત્માનમ્ આપલ્લવઞ્ચોદ્દિશ્ય કથિતાનિ તસ્યૈતત્ કારણં યુયં યથા શાસ્ત્રીયવિધિમતિક્રમ્ય માનવમ્
અતીવ નાદરિષ્યધ્બ ઈત્થઞ્ચૈકેન વૈપરીત્યાદ્ અપરેણ ન શ્લાઘિષ્યધ્બ એતાદૃશીં શિક્ષામાવયોર્દૃષ્ટાન્તાત્ લપ્સ્યધ્વે।
VII અપરાત્ કસ્ત્વાં વિશેષયતિ? તુભ્યં યન્ન દત્ત તાદૃશં કિં ધારયસિ? અદત્તેનેવ દત્તેન વસ્તુના કુતઃ શ્લાઘસે?

VIII ઇદાનીમેવ યૂયં કિં તૃપ્તા લબ્ધધના વા? અસ્માસ્વવિદ્યમાનેષુ યૂયં કિં રાજત્વપદં પ્રાપ્તાઃ? યુષ્માકં રાજત્વં મયાભિલષિતં યતસ્તેન યુષ્માભિઃ સહ વયમપિ રાજ્યાંશિનો ભવિષ્યામઃ।

IX પ્રેરિતા વયં શેષા હન્તવ્યાશ્ચેવેશ્વરેણ નિદર્શિતાઃ। યતો વયં સર્વ્વલોકાનામ્ અર્થતઃ સ્વર્ગીયદૂતાનાં માનવાનાઞ્ચ કૌતુકાસ્પદાનિ જાતાઃ।

X ખ્રીષ્ટસ્ય કૃતે વયં મૂઢાઃ કિન્તુ યૂયં ખ્રીષ્ટેન જ્ઞાનિનઃ, વયં દુર્બ્બલા યૂયઞ્ચ સબલાઃ, યૂયં સમ્માનિતા વયઞ્ચાપમાનિતાઃ।

XI વયમદ્યાપિ ક્ષુધાર્ત્તાસ્તૃષ્ણાર્ત્તા વસ્ત્રહીનાસ્તાડિતા આશ્રમરહિતાશ્ચ સન્તઃ

XII કર્મ્મણિ સ્વકરાન્ વ્યાપારયન્તશ્ચ દુઃખૈઃ કાલં યાપયામઃ। ગર્હિતૈરસ્માભિરાશીઃ કથ્યતે દૂરીકૃતૈઃ સહ્યતે નિન્દિતૈઃ પ્રસાદ્યતે।

XIII વયમદ્યાપિ જગતઃ સમ્માર્જનીયોગ્યા અવકરા ઇવ સર્વ્વૈ ર્મન્યામહે।

XIV યુષ્માન્ ત્રપયિતુમહમેતાનિ લિખામીતિ નહિ કિન્તુ પ્રિયાત્મજાનિવ યુષ્માન્ પ્રબોધયામિ।

XV યતઃ ખ્રીષ્ટધર્મ્મે યદ્યપિ યુષ્માકં દશસહસ્રાણિ વિનેતારો ભવન્તિ તથાપિ બહવો જનકા ન ભવન્તિ યતોઽહમેવ સુસંવાદેન યીશુખ્રીષ્ટે યુષ્માન્ અજનયં।

XVI અતો યુષ્માન્ વિનયેઽહં યૂયં મદનુગામિનો ભવત।

XVII ઇત્યર્થં સર્વ્વેષુ ધર્મ્મસમાજેષુ સર્વ્વત્ર ખ્રીષ્ટધર્મ્મયોગ્યા યે વિધયો મયોપદિશ્યન્તે તાન્ યો યુષ્માન્ સ્મારયિષ્યત્યેવમ્ભૂતં પ્રભોઃ કૃતે પ્રિયં વિશ્વાસિનઞ્ચ મદીયતનયં તીમથિયં યુષ્માકં સમીપં પ્રેષિતવાનહં।

XVIII અપરમહં યુષ્માકં સમીપં ન ગમિષ્યામીતિ બુદ્ધ્વા યુષ્માકં કિયન્તો લોકા ગર્વ્વન્તિ।

XIX કિન્તુ યદિ પ્રભેરિચ્છા ભવતિ તર્હ્યહમવિલમ્બં યુષ્મત્સમીપમુપસ્થાય તેષાં દર્પધ્માતાનાં લોકાનાં વાચં જ્ઞાસ્યામીતિ નહિ સામર્થ્યમેવ જ્ઞાસ્યામિ।

XX યસ્માદીશ્વરસ્ય રાજત્વં વાગ્યુક્તં નહિ કિન્તુ સામર્થ્યયુક્તં।

XXI યુષ્માકં કા વાઞ્છા? યુષ્મત્સમીપે મયા કિં દણ્ડપાણિના ગન્તવ્યમુત પ્રેમનમ્રતાત્મયુક્તેન વા?

# V

I અપરં યુષ્માકં મધ્યે વ્યભિચારો વિદ્યતે સ ચ વ્યભિચારસ્તાદૃશો યદ્ દેવપૂજકાનાં મધ્યેઽપિ તત્તુલ્યો ન વિદ્યતે ફલતો યુષ્માકમેકો જનો વિમાતૃગમનં કૃરુત ઇતિ વાર્ત્તા સર્વ્વત્ર વ્યાપ્તા।

II તથાચ યૂયં દર્પધ્માતા આધ્બે, તત્ કર્મ્મ યેન કૃતં સ યથા યુષ્મન્મધ્યાદ્ દૂરીક્રિયતે તથા શોકો યુષ્માભિ ર્ન ક્રિયતે કિમ્ એતત્?

III અવિદ્યમાને મદીયશરીરે મમાત્મા યુષ્મન્મધ્યે વિદ્યતે અતોઽહં વિદ્યમાન ઇવ તત્કર્મ્મકારિણો વિચારં નિશ્ચિતવાન્,

IV અસ્મત્પ્રભો ર્યીશુખ્રીષ્ટસ્ય નામ્ના યુષ્માકં મદીયાત્મનશ્ચ મિલને જાતે ઽસ્મત્પ્રભો ર્યીશુખ્રીષ્ટસ્ય શક્તેઃ સાહાય્યેન

V સ નરઃ શરીરનાશાર્થમસ્માભિઃ શયતાનો હસ્તે સમર્પયિતવ્યસ્તતોઽસ્માકં પ્રભો ર્યીશો ર્દિવસે તસ્યાત્મા રક્ષાં ગન્તું શક્ષ્યતિ।

VI યુષ્માકં દર્પો ન ભદ્રાય યૂયં કિમેતન્ન જાનીથ, યથા, વિકારઃ કૃત્સ્નશક્તૂનાં સ્વલ્પકિણ્વેન જાયતે।

VII યૂયં યત્ નવીનશક્તુસ્વરૂપા ભવેત તદર્થં પુરાતનં કિણ્વમ્ અવમાર્જ્જત યતો યુષ્માભિઃ કિણ્વશૂન્યૈ ર્ભવિતવ્યં। અપરમ્ અસ્માકં નિસ્તારોત્સવીયમેષશાવકો યઃ ખ્રીષ્ટઃ સોઽસ્મદર્થં બલીકૃતો ઽભવત્।

VIII અતઃ પુરાતનકિણ્વેનાર્થતો દુષ્ટતાજિઘાંસારૂપેણ કિણ્વેન તન્નહિ કિન્તુ સારલ્યસત્યત્વરૂપયા કિણ્વશૂન્યતયાસ્માભિરુત્સવઃ કર્ત્તવ્યઃ।

IX વ્યાભિચારિણાં સંસર્ગો યુષ્માભિ ર્વિહાતવ્ય ઇતિ મયા પત્રે લિખિતં।

X કિન્ત્વૈહિકલોકાનાં મધ્યે યે વ્યભિચારિણો લોભિન ઉપદ્રાવિણો દેવપૂજકા વા તેષાં સંસર્ગઃ સર્વ્વથા વિહાતવ્ય ઇતિ નહિ, વિહાતવ્યે સતિ યુષ્માભિ ર્જગતો નિર્ગન્તવ્યમેવ।

XI કિન્તુ ભ્રાતૃત્વેન વિખ્યાતઃ કશ્ચિજ્જનો યદિ વ્યભિચારી લોભી દેવપૂજકો નિન્દકો મદ્યપ ઉપદ્રાવી વા ભવેત્ તર્હિ તાદૃશેન માનવેન સહ ભોજનપાનેઽપિ યુષ્માભિ ર્ન કર્ત્તવ્યે ઇત્યધુના મયા લિખિતં।

XII સમાજબહિઃસ્થિતાનાં લોકાનાં વિચારકરણે મમ કોઽધિકારઃ? કિન્તુ તદન્તર્ગતાનાં વિચારણં યુષ્માભિઃ કિં ન કર્ત્તવ્યં ભવેત્?

XIII બહિઃસ્થાનાં તુ વિચાર ઈશ્વરેણ કારિષ્યતે। અતો યુષ્માભિઃ સ પાતકી સ્વમધ્યાદ્ બહિષ્ક્રિયતાં।

# VI

I યુષ્માકમેકસ્ય જનસ્યાપરેણ સહ વિવાદે જાતે સ પવિત્રલોકૈ ર્વિચારમકારયન્ કિમ્ અધાર્મ્મિકલોકૈ ર્વિચારયિતું પ્રોત્સહતે?

II જગતોઽપિ વિચારણં પવિત્રલોકૈઃ કારિષ્યત એતદ્ યૂયં કિં ન જાનીથ? અતો જગદ્ યદિ યુષ્માભિ ર્વિચારયિતવ્યં તર્હિ ક્ષુદ્રતમવિચારેષુ યૂયં કિમસમર્થાઃ?

III દૂતા અપ્યસ્માભિ ર્વિચારયિષ્યન્ત ઇતિ કિં ન જાનીથ? અત ઐહિકવિષયાઃ કિમ્ અસ્માભિ ર્ન વિચારયિતવ્યા ભવેયુઃ?

IV ઐહિકવિષયસ્ય વિચારે યુષ્માભિઃ કર્ત્તવ્યે યે લોકાઃ સમિતૌ ક્ષુદ્રતમાસ્ત એવ નિયુજ્યન્તાં।

V અહં યુષ્માન્ ત્રપયિતુમિચ્છન્ વદામિ યૃષ્મન્મધ્યે કિમેકોઽપિ મનુષ્યસ્તાદૃગ્ બુદ્ધિમાન્નહિ યો ભ્રાતૃવિવાદવિચારણે સમર્થઃ સ્યાત્?

VI કિઞ્ચૈકો ભ્રાતા ભ્રાત્રાન્યેન કિમવિશ્વાસિનાં વિચારકાણાં સાક્ષાદ્ વિવદતે? યષ્મન્મધ્યે વિવાદા વિદ્યન્ત એતદપિ યુષ્માકં દોષઃ।

VII યૂયં કુતોઽન્યાયસહનં ક્ષતિસહનં વા શ્રેયો ન મન્યધ્વે?

VIII કિન્તુ યૂયમપિ ભ્રાતૃનેવ પ્રત્યન્યાયં ક્ષતિઞ્ચ કુરુથ કિમેતત્?

IX ઈશ્વરસ્ય રાજ્યેઽન્યાયકારિણાં લોકાનામધિકારો નાસ્ત્યેતદ્ યૂયં કિં ન જાનીથ? મા વઞ્ચ્યધ્વં, યે વ્યભિચારિણો દેવાર્ચ્ચિનઃ પારદારિકાઃ સ્ત્રીવદાચારિણઃ પુંમૈથુનકારિણસ્તસ્કરા

X લોભિનો મદ્યપા નિન્દકા ઉપદ્રાવિણો વા ત ઈશ્વરસ્ય રાજ્યભાગિનો ન ભવિષ્યન્તિ।

XI યૂયઞ્ચૈવંવિધા લોકા આસ્ત કિન્તુ પ્રભો ર્યીશો ર્નામ્નાસ્મદીશ્વરસ્યાત્મના ચ યૂયં પ્રક્ષાલિતાઃ પાવિતાઃ સપુણ્યીકૃતાશ્ચ।

XII મદર્થં સર્વ્વં દ્રવ્યમ્ અપ્રતિષિદ્ધં કિન્તુ ન સર્વ્વં હિતજનકં મદર્થં સર્વ્વમપ્રતિષિદ્ધં તથાપ્યહં કસ્યાપિ દ્રવ્યસ્ય વશીકૃતો ન
ભવિષ્યામિ।
XIII ઉદરાય ભક્ષ્યાણિ ભક્ષ્યેભ્યશ્ચોદરં, કિન્તુ ભક્ષ્યોદરે ઈશ્વરેણ નાશયિષ્યેતે; અપરં દેહો ન વ્યભિચારાય કિન્તુ પ્રભવે પ્રભુશ્ચ
દેહાય।
XIV યશ્ચેશ્વરઃ પ્રભુમુત્થાપિતવાન્ સ સ્વશક્ત્યાસ્માનપ્યુત્થાપયિષ્યતિ।
XV યુષ્માકં યાનિ શરીરાણિ તાનિ ખ્રીષ્ટસ્યાઙ્ગાનીતિ કિં યૂયં ન જાનીથ? અતઃ ખ્રીષ્ટસ્ય યાન્યઙ્ગાનિ તાનિ મયાપહૃત્ય વેશ્યાયા
અઙ્ગાનિ કિં કારિષ્યન્તે? તન્ન ભવતુ।
XVI યઃ કશ્ચિદ્ વેશ્યાયામ્ આસજ્યતે સ તયા સહૈકદેહો ભવતિ કિં યૂયમેતન્ન જાનીથ? યતો લિખિતમાસ્તે, યથા, તૌ દ્વૌ
જનાવેકાઙ્ગૌ ભવિષ્યતઃ।
XVII માનવા યાન્યન્યાનિ કલુષાણિ કુર્વ્વતે તાનિ વપુ ર્ન સમાવિશન્તિ કિન્તુ વ્યભિચારિણા સ્વવિગ્રહસ્ય વિરુદ્ધં કલ્મષં ક્રિયતે।
XVIII માનવા યાન્યન્યાનિ કલુષાણિ કુર્વ્વતે તાનિ વપુ ર્ન સમાવિશન્તિ કિન્તુ વ્યભિચારિણા સ્વવિગ્રહસ્ય વિરુદ્ધં કલ્મષં ક્રિયતે।
XIX યુષ્માકં યાનિ વપૂંસિ તાનિ યુષ્મદન્તઃસ્થિતસ્યેશ્વરાલ્લબ્ધસ્ય પવિત્રસ્યાત્મનો મન્દિરાણિ યૂયઞ્ચ સ્વેષાં સ્વામિનો નાધ્વે
કિમેતદ્ યુષ્માભિ ર્ન જ્ઞાયતે?
XX યૂયં મૂલ્યેન ક્રીતા અતો વપુર્મનોભ્યામ્ ઈશ્વરો યુષ્માભિઃ પૂજ્યતાં યત ઈશ્વર એવ તયોઃ સ્વામી।

# VII

I અપરઞ્ચ યુષ્માભિ ર્માં પ્રતિ યત્ પત્રમલેખિ તસ્યોત્તરમેતત્, યોષિતોઽસ્પર્શનં મનુજસ્ય વરં;
II કિન્તુ વ્યભિચારભયાદ્ એકૈકસ્ય પુંસઃ સ્વકીયભાર્ય્યા ભવતુ તદ્વદ્ એકૈકસ્યા યોષિતો ઽપિ સ્વકીયભર્ત્તા ભવતુ।
III ભાર્ય્યાયૈ ભર્ત્રા યદ્યદ્ વિતરણીયં તદ્ વિતીર્ય્યતાં તદ્વદ્ ભર્ત્રેઽપિ ભાર્ય્યયા વિતરણીયં વિતીર્ય્યતાં।
IV ભાર્ય્યાયાઃ સ્વદેહે સ્વત્વં નાસ્તિ ભર્ત્તુરેવ, તદ્વદ્ ભર્ત્તુરપિ સ્વદેહે સ્વત્વં નાસ્તિ ભાર્ય્યાયા એવ।
V ઉપોષણપ્રાર્થનયોઃ સેવનાર્થમ્ એકમન્ત્રણાનાં યુષ્માકં કિયત્કાલં યાવદ્ યા પૃથક્સ્થિતિ ર્ભવતિ તદન્યો વિચ્છેદો યુષ્મન્મધ્યે ન
ભવતુ, તતઃ પરમ્ ઇન્દ્રિયાણામ્ અધૈર્ય્યાત્ શયતાન્ યદ્ યુષ્માન્ પરીક્ષાં ન નયેત્ તદર્થં પુનરેકત્ર મિલત।
VI એતદ્ આદેશતો નહિ કિન્ત્વનુજ્ઞાત એવ મયા કથ્યતે,
VII યતો મમાવસ્થેવ સર્વ્વમાનવાનામવસ્થા ભવત્વિતિ મમ વાઞ્છા કિન્ત્વીશ્વરાદ્ એકેનૈકો વરોઽન્યેન ચાન્યો વર ઇત્થમેકૈકેન
સ્વકીયવરો લબ્ધઃ।
VIII અપરમ્ અકૃતવિવાહાન્ વિધવાશ્ચ પ્રતિ મમૈતન્નિવેદનં મમેવ તેષામવસ્થિતિ ર્ભદ્રા;
IX કિઞ્ચ યદિ તૈરિન્દ્રિયાણિ નિયન્તું ન શક્યન્તે તર્હિ વિવાહઃ ક્રિયતાં યતઃ કામદહનાદ્ વ્યૂઢત્વં ભદ્રં।
X યે ચ કૃતવિવાહાસ્તે મયા નહિ પ્રભુનૈવૈતદ્ આજ્ઞાપ્યન્તે।
XI ભાર્ય્યા ભર્તૃતઃ પૃથક્ ન ભવતુ। યદિ વા પૃથગ્ભૂતા સ્યાત્ તર્હિ નિર્વિવાહા તિષ્ઠતુ સ્વીયપતિના વા સન્દધાતુ ભર્ત્તાપિ ભાર્ય્યાં
ન ત્યજતુ।
XII ઇતરાન્ જનાન્ પ્રતિ પ્રભુ ર્ન બ્રવીતિ કિન્ત્વહં બ્રવીમિ; કસ્યચિદ્ ભ્રાતુર્યોષિદ્ અવિશ્વાસિની સત્યપિ યદિ તેન સહવાસે
તુષ્યતિ તર્હિ સા તેન ન ત્યજ્યતાં।
XIII તદ્વત્ કસ્યાશ્ચિદ્ યોષિતઃ પતિરવિશ્વાસી સન્નપિ યદિ તયા સહવાસે તુષ્યતિ તર્હિ સ તયા ન ત્યજ્યતાં।
XIV યતોઽવિશ્વાસી ભર્ત્તા ભાર્ય્યયા પવિત્રીભૂતઃ, તદ્વદવિશ્વાસિની ભાર્ય્યા ભર્ત્રા પવિત્રીભૂતા; નોચેદ્
યુષ્માકમપત્યાન્યશુચીન્યભવિષ્યન્ કિન્ત્વધુના તાનિ પવિત્રાણિ સન્તિ।
XV અવિશ્વાસી જનો યદિ વા પૃથગ્ ભવતિ તર્હિ પૃથગ્ ભવતુ; એતેન ભ્રાતા ભગિની વા ન નિબધ્યતે તથાપિ વયમીશ્વરેણ
શાન્તયે સમાહૂતાઃ।
XVI હે નારિ તવ ભર્ત્તુઃ પરિત્રાણં ત્વત્તો ભવિષ્યતિ ન વેતિ ત્વયા કિં જ્ઞાયતે? હે નર તવ જાયાયાઃ પરિત્રાણં ત્વત્તો ભવિષ્યતિ
ન વેતિ ત્વયા કિં જ્ઞાયતે?
XVII એકૈકો જનઃ પરમેશ્વરાલ્લબ્ધં યદ્ ભજતે યસ્યાઞ્ચાવસ્થાયામ્ ઈશ્વરેણાહ્વાયિ તદનુસારેણૈવાચરતુ તદહં સર્વ્વસમાજસ્થાન્
આદિશામિ।
XVIII છિન્નત્વગ્ ભૂત્વા ય આહૂતઃ સ પ્રકૃષ્ટત્વક્ ન ભવતુ, તદ્વદ્ અછિન્નત્વગ્ ભૂત્વા ય આહૂતઃ સ છિન્નત્વક્ ન ભવતુ।
XIX ત્વક્છેદઃ સારો નહિ તદ્વદત્વક્છેદોઽપિ સારો નહિ કિન્ત્વીશ્વરસ્યાજ્ઞાનાં પાલનમેવ।
XX યો જનો યસ્યામવસ્થાયામાહ્વાયિ સ તસ્યામેવાવતિષ્ઠતાં।
XXI દાસઃ સન્ ત્વં કિમાહૂતોઽસિ? તન્મા ચિન્તય, તથાચ યદિ સ્વતન્ત્રો ભવિતું શક્નુયાસ્તર્હિ તદેવ વૃણુ।
XXII યતઃ પ્રભુનાહૂતો યો દાસઃ સ પ્રભો ર્મોચિતજનઃ। તદ્વદ્ તેનાહૂતઃ સ્વતન્ત્રો જનોઽપિ ખ્રીષ્ટસ્ય દાસ એવ।
XXIII યૂયં મૂલ્યેન ક્રીતા અતો હેતો ર્માનવાનાં દાસા મા ભવત।
XXIV હે ભ્રાતરો યસ્યામવસ્થાયાં યસ્યાહ્વાનમભવત્ તયા સ ઈશ્વરસ્ય સાક્ષાત્ તિષ્ઠતુ।
XXV અપરમ્ અકૃતવિવાહાન્ જનાન્ પ્રતિ પ્રભોઃ કોઽપ્યાદેશો મયા ન લબ્ધઃ કિન્તુ પ્રભોરનુકમ્પયા વિશ્વાસ્યો ભૂતોઽહં યદ્ ભદ્રં
મન્યે તદ્ વદામિ।
XXVI વર્ત્તમાનાત્ ક્લેશસમયાત્ મનુષ્યસ્યાનૂઢત્વં ભદ્રમિતિ મયા બુધ્યતે।
XXVII ત્વં કિં યોષિતિ નિબદ્ધોઽસિ તર્હિ મોચનં પ્રાપ્તું મા યતસ્વ। કિં વા યોષિતો મુક્તોઽસિ? તર્હિ જાયાં મા ગવેષય।
XXVIII વિવાહં કુર્વ્વતા ત્વયા કિમપિ નાપારાધ્યતે તદ્વદ્ વ્યૂહ્યમાનયા યુવત્યાપિ કિમપિ નાપરાધ્યતે તથાચ તાદૃશૌ દ્વૌ જનૌ
શારીરિકં ક્લેશં લપ્સ્યેતે કિન્તુ યુષ્માન્ પ્રતિ મમ કરુણા વિદ્યતે।
XXIX હે ભ્રાતરોઽહમિદં બ્રવીમિ, ઇતઃ પરં સમયોઽતીવ સંક્ષિપ્તઃ,

XXX અતઃ કૃતદારૈરકૃતદારૈરિવ રુદદ્ભિશ્ચારુદદ્ભિરિવ સાનન્દૈશ્ચ નિરાનન્દૈરિવ ક્રેતૃભિશ્ચાભાગિભિરિવાચરિતવ્યં
XXXI યે ચ સંસારે ચરન્તિ તૈ ર્નાતિચરિતવ્યં યત ઇહલ◌ેકસ્ય કૌતુકો વિચલતિ।
XXXII કિન્તુ યૂયં યન્નિશ્ચિન્તા ભવેતેતિ મમ વાઞ્છા। અકૃતવિવાહો જનો યથા પ્રભું પરિતોષયેત્ તથા પ્રભું ચિન્તયતિ,
XXXIII કિન્તુ કૃતવિવાહો જનો યથા ભાર્य્યાં પરિતોષયેત્ તથા સંસારં ચિન્તયતિ।
XXXIV તદ્વદ્ ઊઢયોષિતો ઽનૂઢા વિશિષ્યતે। યાનૂઢા સા યથા કાયમનસોઃ પવિત્રા ભવેત્ તથા પ્રભું ચિન્તયતિ યા ચોઢા સા યથા ભર્ત્તારં પરિતોષયેત્ તથા સંસારં ચિન્તયતિ।
XXXV અહં યદ્ યુષ્માન્ મૃગબન્ધિન્યા પરિક્ષિપેયં તદર્થં નહિ કિન્તુ યૂયં યદનિન્દિતા ભૂત્વા પ્રભોઃ સેવનેઽબાધમ્ આસક્તા ભવેત તદર્થમેતાનિ સર્વ્વાણિ યુષ્માકં હિતાય મયા કથ્યન્તે।
XXXVI કસ્યચિત્ કન્યાયાં યૌવનપ્રાપ્તાયાં યદિ સ તસ્યા અનૂઢત્વં નિન્દનીયં વિવાહશ્ચ સાધયિતવ્ય ઇતિ મન્યતે તર્હિ યથાભિલાષં કરોતુ, એતેન કિમપિ નાપરાત્સ્યતિ વિવાહઃ ક્રિયતાં।
XXXVII કિન્તુ દુઃખેનાક્લિષ્ટઃ કશ્ચિત્ પિતા યદિ સ્થિરમનોગતઃ સ્વમનોઽભિલાષસાધને સમર્થશ્ચ સ્યાત્ મમ કન્યા મયા રક્ષિતવ્યેતિ મનસિ નિશ્ચિનોતિ ચ તર્હિ સ ભદ્રં કર્મ્મ કરોતિ।
XXXVIII અતો યો વિવાહં કરોતિ સ ભદ્રં કર્મ્મ કરોતિ યશ્ચ વિવાહં ન કરોતિ સ ભદ્રતરં કર્મ્મ કરોતિ।
XXXIX યાવત્કાલં પતિ ર્જીવતિ તાવદ્ ભાર્ય્યા વ્યવસ્થયા નિબદ્ધા તિષ્ઠતિ કિન્તુ પત્યૌ મહાનિદ્રાં ગતે સા મુક્તીભૂય યમભિલષતિ તેન સહ તસ્યા વિવાહો ભવિતું શક્નોતિ, કિન્ત્વેતત્ કેવલં પ્રભુભક્તાનાં મધ્યે।
XL તથાચ સા યદિ નિષ્પતિકા તિષ્ઠતિ તર્હિ તસ્યાઃ ક્ષેમં ભવિષ્યતીતિ મમ ભાવઃ। અપરમ્ ઈશ્વરસ્યાત્મા મમાપ્યન્ત ર્વિદ્યત ઇતિ મયા બુધ્યતે।

# VIII

I દેવપ્રસાદે સર્વ્વેષામ્ અસ્માકં જ્ઞાનમાસ્તે તદ્વયં વિદ્મઃ। તથાપિ જ્ઞાનં ગર્વ્વં જનયતિ કિન્તુ પ્રેમતો નિષ્ઠા જાયતે।
II અતઃ કશ્ચન યદિ મન્યતે મમ જ્ઞાનમાસ્ત ઇતિ તર્હિ તેન યાદૃશં જ્ઞાનં ચેષ્ટિતવ્યં તાદૃશં કિમપિ જ્ઞાનમદ્યાપિ ન લબ્ધં।
III કિન્તુ ય ઈશ્વરે પ્રીયતે સ ઈશ્વરેણાપિ જ્ઞાયતે।
IV દેવતાબલિપ્રસાદભક્ષણે વયમિદં વિદ્મો યત્ જગન્મધ્યે કોઽપિ દેવો ન વિદ્યતે, એકશ્ચેશ્વરો દ્વિતીયો નાસ્તીતિ।
V સ્વર્ગે પૃથિવ્યાં વા યદ્યપિ કેષુચિદ્ ઈશ્વર ઇતિ નામારોપ્યતે તાદૃશાશ્ચ બહવ ઈશ્વરા બહવશ્ચ પ્રભવો વિદ્યન્તે
VI તથાપ્યસ્માકમદ્વિતીય ઈશ્વરઃ સ પિતા યસ્માત્ સર્વ્વેષાં યદર્થઞ્ચાસ્માકં સૃષ્ટિ ર્જાતા, અસ્માકઞ્ચાદ્વિતીયઃ પ્રભુઃ સ યીશુઃ ખ્રીષ્ટો યેન સર્વ્વવસ્તૂનાં યેનાસ્માકમપિ સૃષ્ટિઃ કૃતા।
VII અધિકન્તુ જ્ઞાનં સર્વ્વેષાં નાસ્તિ યતઃ કેચિદદ્યાપિ દેવતાં સમ્મન્ય દેવપ્રસાદમિવ તદ્ ભક્ષ્યં ભુઞ્જતે તેન દુર્બ્બલતયા તેષાં સ્વાન્તાનિ મલીમસાનિ ભવન્તિ।
VIII કિન્તુ ભક્ષ્યદ્રવ્યાદ્ વયમ્ ઈશ્વરેણ ગ્રાહ્યા ભવામસ્તન્નહિ યતો ભુઙ્ક્ત્વા વયમુત્કૃષ્ટા ન ભવામસ્તદ્વદભુઙ્ક્ત્વાપ્યપકૃષ્ટા ન ભવામઃ।
IX અતો યુષ્માકં યા ક્ષમતા સા દુર્બ્બલાનામ્ ઉન્માથસ્વરૂપા યન્ન ભવેત્ તદર્થં સાવધાના ભવત।
X યતો જ્ઞાનવિશિષ્ટસ્ત્વં યદિ દેવાલયે ઉપવિષ્ટઃ કેનાપિ દૃશ્યસે તર્હિ તસ્ય દુર્બ્બલસ્ય મનસિ કિં પ્રસાદભક્ષણ ઉત્સાહો ન જનિષ્યતે?
XI તથા સતિ યસ્ય કૃતે ખ્રીષ્ટો મમાર તવ સ દુર્બ્બલો ભ્રાતા તવ જ્ઞાનાત્ કિં ન વિનંક્ષ્યતિ?
XII ઇત્યનેન પ્રકારેણ ભ્રાતૃણાં વિરુદ્ધમ્ અપરાધ્યદ્ભિસ્તેષાં દુર્બ્બલાનિ મનાંસિ વ્યાઘાતયદ્ભિશ્ચ યુષ્માભિઃ ખ્રીષ્ટસ્ય વૈપરીત્યેનાપરાધ્યતે।
XIII અતો હેતોઃ પિશિતાશનં યદિ મમ ભ્રાતુ ર્વિઘ્નસ્વરૂપં ભવેત્ તર્હ્યહં યત્ સ્વભ્રાતુ ર્વિઘ્નજનકો ન ભવેયં તદર્થં યાવજ્જીવનં પિશિતં ન ભોક્ષ્યે।

# IX

I અહં કિમ્ એકઃ પ્રેરિતો નાસ્મિ? કિમહં સ્વતન્ત્રો નાસ્મિ? અસ્માકં પ્રભુ ર્યીશુઃ ખ્રીષ્ટઃ કિં મયા નાદર્શિ? યૂયમપિ કિં પ્રભુના મદીયશ્રમફલસ્વરૂપા ન ભવથ?
II અન્યલોકાનાં કૃતે યદ્યપ્યહં પ્રેરિતો ન ભવેયં તથાચ યુષ્મત્કૃતે પ્રેરિતોઽસ્મિ યતઃ પ્રભુના મમ પ્રેરિતત્વપદસ્ય મુદ્રાસ્વરૂપા યૂયમેવાધ્વે।
III યે લોકા મયિ દોષમારોપયન્તિ તાન્ પ્રતિ મમ પ્રત્યુત્તરમેતત્।
IV ભોજનપાનયોઃ કિમસ્માકં ક્ષમતા નાસ્તિ?
V અન્યે પ્રેરિતાઃ પ્રભો ર્ભ્રાતરૌ કૈફાશ્ચ યત્ કુર્વ્વન્તિ તદ્વત્ કાઞ્ચિત્ ધર્મ્મભગિનીં વ્યૂહ્ય તયા સાર્દ્ધં પર્ય્યટિતું વયં કિં ન શક્નુમઃ?
VI સાંસારિકશ્રમસ્ય પરિત્યાગાત્ કિં કેવલમહં બર્ણબ્બાશ્ચ નિવારિતૌ?
VII નિજધનવ્યયેન કઃ સંગ્રામં કરોતિ? કો વા દ્રાક્ષાક્ષેત્રં કૃત્વા તત્ફલાનિ ન ભુઙ્ક્તે? કો વા પશુવ્રજં પાલયન્ તત્પયો ન પિવતિ?
VIII કિમહં કેવલાં માનુષિકાં વાચં વદામિ? વ્યવસ્થાયાં કિમેતાદૃશં વચનં ન વિદ્યતે?
IX મૂસાવ્યવસ્થાગ્રન્થે લિખિતમાસ્તે, ત્વં શસ્યમર્દ્દકવૃષસ્યાસ્યં ન ભંત્સ્યસીતિ। ઈશ્વરેણ બલીવર્દ્દાનામેવ ચિન્તા કિં ક્રિયતે?
X કિં વા સર્વ્વથાસ્માકં કૃતે તદ્વચનં તેનોક્તં? અસ્માકમેવ કૃતે તલ્લિખિતં। યઃ ક્ષેત્રં કર્ષતિ તેન પ્રત્યાશાયુક્તેન કર્ષ્ટવ્યં, યશ્ચ શસ્યાનિ મર્દ્દયતિ તેન લાભપ્રત્યાશાયુક્તેન મર્દ્દિતવ્યં।
XI યુષ્મત્કૃતેઽસ્માભિઃ પારત્રિકાણિ બીજાનિ રોપિતાનિ, અતો યુષ્માકમૈહિકફલાનાં વયમ્ અંશિનો ભવિષ્યામઃ કિમેતત્ મહત્ કર્મ્મ?

XII યુષ્માસુ યોઽધિકારસ્તસ્ય ભાગિનો યદ્યન્યે ભવેયુસ્તર્હ્યસ્માભિસ્તતોઽધિકં કિં તસ્ય ભાગિભિ ર્ન ભવિતવ્યં? અધિકન્તુ વયં
તેનાધિકારેણ ન વ્યવહૃતવન્તઃ કિન્તુ ખ્રીષ્ટીયસુસંવાદસ્ય કોઽપિ વ્યાઘાતોઽસ્માભિર્યન્ન જાયેત તદર્થં સર્વ્વં સહામહે।
XIII અપરં યે પવિત્રવસ્તૂનાં પરિચર્ય્યાં કુર્વ્વન્તિ તે પવિત્રવસ્તુતો ભક્ષ્યાણિ લભન્તે, યે ચ વેદ્યાઃ પરિચર્ય્યાં કુર્વ્વન્તિ તે
વેદિસ્થવસ્તૂનામ્ અંશિનો ભવન્ત્યેતદ્ યૂયં કિં ન વિદ?
XIV તદ્વદ્ યે સુસંવાદં ઘોષયન્તિ તૈઃ સુસંવાદેન જીવિતવ્યમિતિ પ્રભુનાદિષ્ટં।
XV અહમેતેષાં સર્વ્વેષાં કિમપિ નાશ્રિતવાન્ માં પ્રતિ તદનુસારાત્ આચરિતવ્યમિત્યાશયેનાપિ પત્રમિદં મયા ન લિખ્યતે યતઃ
કેનાપિ જનેન મમ યશસો મુધાકરણાત્ મમ મરણં વરં।
XVI સુસંવાદઘેષણાત્ મમ યશો ન જાયતે યતસ્તદ્ઘોષણં મમાવશ્યકં યદ્યહં સુસંવાદં ન ઘોષયેયં તર્હિ માં ધિક્।
XVII ઇચ્છુકેન તત્ કુર્વ્વતા મયા ફલં લપ્સ્યતે કિન્ત્વનિચ્છુકેઽપિ મયિ તત્કર્મ્મણો ભારોઽર્પિતોઽસ્તિ।
XVIII એતેન મયા લભ્યં ફલં કિં? સુસંવાદેન મમ યોઽધિકાર આસ્તે તં યદભદ્રભાવેન નાચરેયં તદર્થં સુસંવાદઘોષણસમયે તસ્ય
ખ્રીષ્ટીયસુસંવાદસ્ય નિર્વ્યયીકરણમેવ મમ ફલં।
XIX સર્વ્વેષામ્ અનાયત્તોઽહં યદ્ ભૂરિશો લોકાન્ પ્રતિપદ્યે તદર્થં સર્વ્વેષાં દાસત્વમઙ્ગીકૃતવાન્।
XX યિહૂદીયાન્ યત્ પ્રતિપદ્યે તદર્થં યિહૂદીયાનાં કૃતે યિહૂદીયઇવાભવં। યે ચ વ્યવસ્થાયત્તાસ્તાન્ યત્ પ્રતિપદ્યે તદર્થં
વ્યવસ્થાનાયત્તો યોઽહં સોઽહં વ્યવસ્થાયત્તાનાં કૃતે વ્યવસ્થાયત્તઇવાભવં।
XXI યે ચાલબ્ધવ્યવસ્થાસ્તાન્ યત્ પ્રતિપદ્યે તદર્થમ્ ઈશ્વરસ્ય સાક્ષાદ્ અલબ્ધવ્યવસ્થો ન ભૂત્વા ખ્રીષ્ટેન લબ્ધવ્યવસ્થો યોઽહં
સોઽહમ્ અલબ્ધવ્યવસ્થાનાં કૃતેઽલબ્ધવ્યવસ્થ ઇવાભવં।
XXII દુર્બ્બલાન્ યત્ પ્રતિપદ્યે તદર્થમહં દુર્બ્બલાનાં કૃતે દુર્બ્બલઇવાભવં। ઇત્થં કેનાપિ પ્રકારેણ કતિપયા લોકા યન્મયા પરિત્રાણં
પ્રાપ્નુયુસ્તદર્થં યો યાદૃશ આસીત્ તસ્ય કૃતે ઽહં તાદૃશઇવાભવં।
XXIII ઇદૃશ આચારઃ સુસંવાદાર્થં મયા ક્રિયતે યતોઽહં તસ્ય ફલાનાં સહભાગી ભવિતુમિચ્છામિ।
XXIV પણ્યલાભાર્થં યે ધાવન્તિ ધાવતાં તેષાં સર્વ્વેષાં કેવલ એકઃ પણ્યં લભતે યુષ્માભિઃ કિમેતન્ન જ્ઞાયતે? અતો યૂયં યથા પણ્યં
લપ્સ્યધ્વે તથૈવ ધાવત।
XXV મલ્લા અપિ સર્વ્વભોગે પરિમિતભોગિનો ભવન્તિ તે તુ મ્લાનાં સ્રજં લિપ્સન્તે કિન્તુ વયમ્ અમ્લાનાં લિપ્સામહે।
XXVI તસ્માદ્ અહમપિ ધાવામિ કિન્તુ લક્ષ્યમનુદ્દિશ્ય ધાવામિ તન્નહિ। અહં મલ્લઇવ યુધ્યામિ ચ કિન્તુ છાયામાઘાતયન્નિવ
યુધ્યામિ તન્નહિ।
XXVII ઇતરાન્ પ્રતિ સુસંવાદં ઘોષયિત્વાહં યત્ સ્વયમગ્રાહ્યો ન ભવામિ તદર્થં દેહમ્ આહન્મિ વશીકુર્વ્વે ચ।

# X

I હે ભ્રાતરઃ, અસ્મત્પિતૃપુરુષાનધિ યૂયં યદજ્ઞાતા ન તિષ્ઠતેતિ મમ વાઞ્છા, તે સર્વ્વે મેઘાધઃસ્થિતા બભૂવુઃ સર્વ્વે સમુદ્રમધ્યેન
વવ્રજુઃ,
II સર્વ્વે મૂસામુદ્દિશ્ય મેઘસમુદ્રયો ર્મજ્જિતા બભૂવુઃ
III સર્વ્વ એકમ્ આત્મિકં ભક્ષ્યં બુભુજિર એકમ્ આત્મિકં પેયં પપુશ્ચ
IV યતસ્તેઽનુચરત આત્મિકાદ્ અચલાત્ લબ્ધં તોયં પપુઃ સોઽચલઃ ખ્રીષ્ટએવ।
V તથા સત્યપિ તેષાં મધ્યેઽધિકેષુ લોકેષ્વીશ્વરો ન સન્તુતોષેતિ હેતોસ્તે પ્રન્તરે નિપાતિતાઃ।
VI એતસ્મિન્ તે ઽસ્માકં નિદર્શનસ્વરૂપા બભૂવુઃ; અતસ્તે યથા કુત્સિતાભિલાષિણો બભૂવુરસ્માભિસ્તથા કુત્સિતાભિલાષિભિ
ર્ન ભવિતવ્યં।
VII લિખિતમાસ્તે, લોકા ભોક્તું પાતુઞ્ચોપવિવિશુસ્તતઃ ક્રીડિતુમુત્થિતા ઇતયનેન પ્રકારેણ તેષાં કૈશ્ચિદ્ યદ્વદ્ દેવપૂજા કૃતા
યુષ્માભિસ્તદ્વત્ ન ક્રિયતાં।
VIII અપરં તેષાં કૈશ્ચિદ્ યદ્વદ્ વ્યભિચારઃ કૃતસ્તેન ચૈકસ્મિન્ દિને ત્રયોવિંશતિસહસ્રાણિ લોકા નિપાતિતાસ્તદ્વદ્ અસ્માભિ
ર્વ્યભિચારો ન કર્ત્તવ્યઃ।
IX તેષાં કેચિદ્ યદ્વત્ ખ્રીષ્ટં પરીક્ષિતવન્તસ્તસ્માદ્ ભુજઙ્ગૈ ર્નષ્ટાશ્ચ તદ્વદ્ અસ્માભિઃ ખ્રીષ્ટો ન પરીક્ષિતવ્યઃ।
X તેષાં કેચિદ્ યથા વાક્કલહં કૃતવન્તસ્તત્કારણાત્ હન્ત્રા વિનાશિતાશ્ચ યુષ્માભિસ્તદ્વદ્ વાક્કલહો ન ક્રિયતાં।
XI તાન્ પ્રતિ યાન્યેતાનિ જઘટિરે તાન્યસ્માકં નિદર્શનાનિ જગતઃ શેષયુગે વર્ત્તમાનાનામ્ અસ્માકં શિક્ષાર્થં લિખિતાનિ ચ બભૂવુઃ।
XII અતએવ યઃ કશ્ચિદ્ સુસ્થિરંમન્યઃ સ યન્ન પતેત્ તત્ર સાવધાનો ભવતુ।
XIII માનુષિકપરીક્ષાતિરિક્તા કાપિ પરીક્ષા યુષ્માન્ નાક્રામત્, ઈશ્વરશ્ચ વિશ્વાસ્યઃ સોઽતિશક્ત્યાં પરીક્ષાયાં પતનાત્ યુષ્માન્
રક્ષિષ્યતિ, પરીક્ષા ચ યદ્ યુષ્માભિઃ સોઢું શક્યતે તદર્થં તયા સહ નિસ્તારસ્ય પન્થાનં નિરૂપયિષ્યતિ।
XIV હે પ્રિયભ્રાતરઃ, દેવપૂજાતો દૂરમ્ અપસરત।
XV અહં યુષ્માન્ વિજ્ઞાન્ મત્વા પ્રભાષે મયા યત્ કથ્યતે તદ્ યુષ્માભિ ર્વિવિચ્યતાં।
XVI યદ્ ધન્યવાદપાત્રમ્ અસ્માભિ ર્ધન્યં ગદ્યતે તત્ કિં ખ્રીષ્ટસ્ય શોણિતસ્ય સહભાગિત્વં નહિ? યશ્ચ પૂપોઽસ્માભિ ર્ભજ્યતે સ
કિં ખ્રીષ્ટસ્ય વપુષઃ સહભાગિત્વં નહિ?
XVII વયં બહવઃ સન્તોઽપ્યેકપૂપસ્વરૂપા એકવપુઃસ્વરૂપાશ્ચ ભવામઃ, યતો વયં સર્વ્વ એકપૂપસ્ય સહભાગિનઃ।
XVIII યૂયં શારીરિકમ્ ઇસ્રાયેલીયવંશં નિરીક્ષધ્વં। યે બલીનાં માંસાનિ ભુઞ્જતે તે કિં યજ્ઞવેદ્યાઃ સહભાગિનો ન ભવન્તિ?
XIX ઇત્યનેન મયા કિં કથ્યતે? દેવતા વાસ્તવિકી દેવતાયૈ બલિદાનં વા વાસ્તવિકં કિં ભવેત્?
XX તન્નહિ કિન્તુ ભિન્નજાતિભિ ર્યે બલયો દીયન્તે ત ઈશ્વરાય તન્નહિ ભૂતેભ્યએવ દીયન્તે તસ્માદ્ યૂયં યદ્ ભૂતાનાં સહભાગિનો
ભવથેત્યહં નાભિલષામિ।

XXI પ્રભોઃ કંસેન ભૂતાનામપિ કંસેન પાનં યુષ્માભિરસાધ્યં; યૂયં પ્રભો ર્ભોજ્યસ્ય ભૂતાનામપિ ભોજ્યસ્ય સહભાગિનો ભવિતું
ન શક્નુથ।
XXII વયં કિં પ્રભું સ્પર્દ્ધિષ્યામહે? વયં કિં તસ્માદ્ બલવન્તઃ?
XXIII માં પ્રતિ સર્વ્વં કર્મ્માપ્રતિષિદ્ધં કિન્તુ ન સર્વ્વં હિતજનકં સર્વ્વમ્ અપ્રતિષિદ્ધં કિન્તુ ન સર્વ્વં નિષ્ઠાજનકં।
XXIV આત્મહિતઃ કેનાપિ ન ચેષ્ટિતવ્યઃ કિન્તુ સર્વ્વૈઃ પરહિતશ્ચેષ્ટિતવ્યઃ।
XXV આપણે યત્ ક્રય્યં તદ્ યુષ્માભિઃ સંવેદસ્યાર્થં કિમપિ ન પૃષ્ટ્વા ભુજ્યતાં
XXVI યતઃ પૃથિવી તન્મધ્યસ્થઞ્ચ સર્વ્વં પરમેશ્વરસ્યા
XXVII અપરમ્ અવિશ્વાસિલોકાનાં કેનચિત્ નિમન્ત્રિતા યૂયં યદિ તત્ર જિગમિષથ તર્હિ તેન યદ્ યદ્ ઉપસ્થાપ્યતે તદ્ યુષ્માભિઃ
સંવેદસ્યાર્થં કિમપિ ન પૃષ્ટ્વા ભુજ્યતાં।
XXVIII કિન્તુ તત્ર યદિ કશ્ચિદ્ યુષ્માન્ વદેત્ ભક્ષ્યમેતદ્ દેવતાયાઃ પ્રસાદ ઇતિ તર્હિ તસ્ય જ્ઞાપયિતુરનુરોધાત્ સંવેદસ્યાર્થઞ્ચ તદ્
યુષ્માભિ ર્ન ભોક્તવ્યં। પૃથિવી તન્મધ્યસ્થઞ્ચ સર્વ્વં પરમેશ્વરસ્ય,
XXIX સત્યમેતત્, કિન્તુ મયા યઃ સંવેદો નિર્દ્દિશ્યતે સ તવ નહિ પરસ્યૈવ।
XXX અનુગ્રહપાત્રેણ મયા ધન્યવાદં કૃત્વા યદ્ ભુજ્યતે તત્કારણાદ્ અહં કુતો નિન્દિષ્યે?
XXXI તસ્માદ્ ભોજનં પાનમ્ અન્યદ્વા કર્મ્મ કુર્વ્વદ્ભિ ર્યુષ્માભિઃ સર્વ્વમેવેશ્વરસ્ય મહિમ્નઃ પ્રકાશાર્થં ક્રિયતાં।
XXXII યિહૂદીયાનાં ભિન્નજાતીયાનામ્ ઈશ્વરસ્ય સમાજસ્ય વા વિઘ્નજનકૈ ર્યુષ્માભિ ર્ન ભવિતવ્યં।
XXXIII અહમપ્યાત્મહિતમ્ અચેષ્ટમાનો બહૂનાં પરિત્રાણાર્થં તેષાં હિતં ચેષ્ટમાનઃ સર્વ્વવિષયે સર્વ્વેષાં તુષ્ટિકરો ભવામીત્યનેનાહં
યદ્વત્ ખ્રીષ્ટસ્યાનુગામી તદ્વદ્ યૂયં મમાનુગામિનો ભવત।

# XI

I હે ભ્રાતરઃ, યૂયં સર્વ્વસ્મિન્ કાર્ય્યે માં સ્મરથ મયા ચ યાદૃગુપદિષ્ટાસ્તાદૃગાચરથૈતત્કારણાત્ મયા પ્રશંસનીયા આધ્બે।
II તથાપિ મમૈષા વાઞ્છા યદ્ યૂયમિદમ્ અવગતા ભવથ,
III એકૈકસ્ય પુરુષસ્યોત્તમાઙ્ગસ્વરૂપઃ ખ્રીષ્ટઃ, યોષિતશ્ચોત્તમાઙ્ગસ્વરૂપઃ પુમાન્, ખ્રીષ્ટસ્ય ચોત્તમાઙ્ગસ્વરૂપ ઈશ્વરઃ।
IV અપરમ્ આચ્છાદિતોત્તમાઙ્ગેન યેન પુંસા પ્રાર્થના ક્રિયત ઈશ્વરીયવાણી કથ્યતે વા તેન સ્વીયોત્તમાઙ્ગમ્ અવજ્ઞાયતે।
V અનાચ્છાદિતોત્તમાઙ્ગયા યયા યોષિતા ચ પ્રાર્થના ક્રિયત ઈશ્વરીયવાણી કથ્યતે વા તયાપિ સ્વીયોત્તમાઙ્ગમ્ અવજ્ઞાયતે યતઃ સા
મુણ્ડિતશિરઃસદૃશા।
VI અનાચ્છાદિતમસ્તકા યા યોષિત્ તસ્યાઃ શિરઃ મુણ્ડનીયમેવ કિન્તુ યોષિતઃ કેશચ્છેદનં શિરોમુણ્ડનં વા યદિ લજ્જાજનકં ભવેત્
તર્હિ તયા સ્વશિર આચ્છાદ્યતાં।
VII પુમાન્ ઈશ્વરસ્ય પ્રતિમૂર્ત્તિઃ પ્રતિતેજઃસ્વરૂપશ્ચ તસ્માત્ તેન શિરો નાચ્છાદનીયં કિન્તુ સીમન્તિની પુંસઃ પ્રતિબિમ્બસ્વરૂપા।
VIII યતો યોષાતઃ પુમાન્ નોદપાદિ કિન્તુ પુંસો યોષિદ્ ઉદપાદિ।
IX અધિકન્તુ યોષિતઃ કૃતે પુંસઃ સૃષ્ટિ ર્ન બભૂવ કિન્તુ પુંસઃ કૃતે યોષિતઃ સૃષ્ટિ ર્બભૂવ।
X ઇતિ હેતો ર્દૂતાનામ્ આદરાદ્ યોષિતા શિરસ્યધીનતાસૂચકમ્ આવરણં ધર્त્તવ્યં।
XI તથાપિ પ્રભો ર્વિધિના પુમાંસં વિના યોષિન્ન જાયતે યોષિતઞ્ચ વિના પુમાન્ ન જાયતે।
XII યતો યથા પુંસો યોષિદ્ ઉદપાદિ તથા યોષિતઃ પુમાન્ જાયતે, સર્વ્વવસ્તૂનિ ચેશ્વરાદ્ ઉત્પદ્યન્તે।
XIII યુષ્માભિરેવૈતદ્ વિવિચ્યતાં, અનાવૃતયા યોષિતા પ્રાર્થનં કિં સુદૃશ્યં ભવેત્?
XIV પુરુષસ્ય દીર્ઘકેશત્વં તસ્ય લજ્જાજનકં, કિન્તુ યોષિતો દીર્ઘકેશત્વં તસ્યા ગૌરવજનકં
XV યત આચ્છાદનાય તસ્યૈ કેશા દત્તા ઇતિ કિં યુષ્માભિઃ સ્વભાવતો ન શિક્ષ્યતે?
XVI અત્ર યદિ કશ્ચિદ્ વિવદિતુમ્ ઇચ્છેત્ તર્હ્યસ્માકમ્ ઈશ્વરીયસમિતીનાઞ્ચ તાદૃશી રીતિ ર્ન વિદ્યતે।
XVII યુષ્માભિ ર્ન ભદ્રાય કિન્તુ કુત્સિતાય સમાગમ્યતે તસ્માદ્ એતાનિ ભાષમાણેન મયા યૂયં ન પ્રશંસનીયાઃ।
XVIII પ્રથમતઃ સમિતૌ સમાગતાનાં યુષ્માકં મધ્યે ભેદાઃ સન્તીતિ વાર્त्તા મયા શ્રૂયતે તન્મધ્યે કિઞ્ચિત્ સત્યં મન્યતે ચ।
XIX યતો હેતો ર્યુષ્મન્મધ્યે યે પરીક્ષિતાસ્તે યત્ પ્રકાશ્યન્તે તદર્થં ભેદૈ ર્ભવિતવ્યમેવ।
XX એકત્ર સમાગતૈ ર્યુષ્માભિઃ પ્રભાવં ભે◌ાજ્યં ભુજ્યત ઇતિ નહિ;
XXI યતો ભોજનકાલે યુષ્માકમેકૈકેન સ્વકીયં ભક્ષ્યં તૂર્ણં ગ્રસ્યતે તસ્માદ્ એકો જનો બુભુક્ષિતસ્તિષ્ઠતિ, અન્યશ્ચ પરિતૃપ્તો
ભવતિ।
XXII ભોજનપાનાર્થં યુષ્માકં કિં વેશ્માનિ ન સન્તિ? યુષ્માભિ ર્વા કિમ્ ઈશ્વરસ્ય સમિતિં તુચ્છીકૃત્ય દીના લોકા અવજ્ઞાયન્તે?
ઇત્યનેન મયા કિં વક્તવ્યં? યૂયં કિં મયા પ્રશંસનીયાઃ? એતસ્મિન્ યૂયં ન પ્રશંસનીયાઃ।
XXIII પ્રભુતો ય ઉપદેશો મયા લબ્ધો યુષ્માસુ સમર્પિતશ્ચ સ એષઃ।
XXIV પરકરસમર્પણક્ષપાયાં પ્રભુ ર્યીશુઃ પૂપમાદાયેશ્વરં ધન્યં વ્યાહૃત્ય તં ભઙ્ક્ત્વા ભાષિતવાન્ યુષ્માભિરેતદ્ ગૃહ્યતાં ભુજ્યતાઞ્ચ
તદ્ યુષ્મત્કૃતે ભગ્નં મમ શરીરં; મમ સ્મરણાર્થં યુષ્માભિરેતત્ ક્રિયતાં।
XXV પુનશ્ચ ભેજનાત્ પરં તથૈવ કંસમ્ આદાય તેનોક્તં કંસોઽયં મમ શોણિતેન સ્થાપિતો નૂતનનિયમઃ; યતિવારં યુષ્માભિરેતત્
પીયતે તતિવારં મમ સ્મરણાર્થં પીયતાં।
XXVI યતિવારં યુષ્માભિરેષ પૂપો ભુજ્યતે ભાજનેનાનેન પીયતે ચ તતિવારં પ્રભોરાગમનં યાવત્ તસ્ય મૃત્યુઃ પ્રકાશ્યતે।
XXVII અપરઞ્ચ યઃ કશ્ચિદ્ અયોગ્યત્વેન પ્રભોરિમં પૂપમ્ અશ્નાતિ તસ્યાનેન ભાજનેન પિવતિ ચ સ પ્રભોઃ કાયરુધિરયો ર્દણ્ડદાયી
ભવિષ્યતિ।
XXVIII તસ્માત્ માનવેનાગ્ર આત્માન પરીક્ષ્ય પશ્ચાદ્ એષ પૂપો ભુજ્યતાં કંસેનાનેન ચ પીયતાં।
XXIX યેન ચાનર્હત્વેન ભુજ્યતે પીયતે ચ પ્રભોઃ કાયમ્ અવિમૃશતા તેન દણ્ડપ્રાપ્તયે ભુજ્યતે પીયતે ચ।

XXX એતત્કારણાદ્ યુષ્માકં ભૂરિશો લોકા દુર્બ્બલા રોગિણશ્ચ સન્તિ બહવશ્ચ મહાનિદ્રાં ગતાઃ।
XXXI અસ્માભિ ર્યદ્યાત્મવિચારોઽકારિષ્યત તર્હિ દણ્ડો નાલપ્સ્યત;
XXXII કિન્તુ યદાસ્માકં વિચારો ભવતિ તદા વયં જગતો જનૈઃ સમં યદ્ દણ્ડં ન લભામહે તદર્થં પ્રભુના શાસ્તિં ભુંજ્મહે।
XXXIII હે મમ ભ્રાતરઃ, ભોજનાર્થં મિલિતાનાં યુષ્માકમ્ એકેનેતરોઽનુગૃહ્યતાં।
XXXIV યશ્ચ બુભુક્ષિતઃ સ સ્વગૃહે ભુઙ્ક્તાં। દણ્ડપ્રાપ્તયે યુષ્માભિ ર્ન સમાગમ્યતાં। એતદ્ભિન્નં યદ્ આદેષ્ટવ્યં તદ્
યુષ્મત્સમીપાગમનકાલે મયાદેક્ષ્યતે।

# XII

I હે ભ્રાતરઃ, યૂયં યદ્ આત્મિકાન્ દાયાન્ અનવગતાસ્તિષ્ઠથ તદહં નાભિલષામિ।
II પૂર્વ્વં ભિન્નજાતીયા યૂયં યદ્વદ્ વિનીતાસ્તદ્વદ્ અવાક્પ્રતિમાનામ્ અનુગામિન આધ્બમ્ ઇતિ જાનીથ।
III ઇતિ હેતોરહં યુષ્મભ્યં નિવેદયામિ, ઈશ્વરસ્યાત્મના ભાષમાણઃ કોઽપિ યીશું શપ્ત ઇતિ ન વ્યાહરતિ, પુનશ્ચ પવિત્રેણાત્મના
વિનીતં વિનાન્યઃ કોઽપિ યીશું પ્રભુરિતિ વ્યાહર્ત્તું ન શક્નોતિ।
IV દાયા બહુવિધાઃ કિન્ત્વેક આત્મા
V પરિચર્ય્યાશ્ચ બહુવિધાઃ કિન્ત્વેકઃ પ્રભુઃ।
VI સાધનાનિ બહુવિધાનિ કિન્તુ સર્વ્વેષુ સર્વ્વસાધક ઈશ્વર એકઃ।
VII એકૈકસ્મૈ તસ્યાત્મનો દર્શનં પરહિતાર્થં દીયતે।
VIII એકસ્મૈ તેનાત્મના જ્ઞાનવાક્યં દીયતે, અન્યસ્મૈ તેનૈવાત્મનાદિષ્ટં વિદ્યાવાક્યમ્,
IX અન્યસ્મૈ તેનૈવાત્મના વિશ્વાસઃ, અન્યસ્મૈ તેનૈવાત્મના સ્વાસ્થ્યદાનશક્તિઃ,
X અન્યસ્મૈ દુઃસાધ્યસાધનશક્તિરન્યસ્મૈ ચેશ્વરીયાદેશઃ, અન્યસ્મૈ ચાતિમાનુષિકસ્યાદેશસ્ય વિચારસામર્થ્યમ્, અન્યસ્મૈ
પરભાષાભાષણશક્તિરન્યસ્મૈ ચ ભાષાર્થભાષણસામર્થ્યં દીયતે।
XI એકેનાદ્વિતીયેનાત્મના યથાભિલાષમ્ એકૈકસ્મૈ જનાયૈકૈકં દાનં વિતરતા તાનિ સર્વ્વાણિ સાધ્યન્તે।
XII દેહ એકઃ સન્નપિ યદ્વદ્ બહ્વઙ્ગયુક્તો ભવતિ, તસ્યૈકસ્ય વપુષો ઽઙ્ગાનાં બહુત્વેન યદ્વદ્ એકં વપુ ર્ભવતિ, તદ્વત્ ખ્રીષ્ટઃ।
XIII યતો હેતો ર્યિહૂદિભિન્નજાતીયદાસસ્વતન્ત્રા વયં સર્વ્વે મજ્જનેનૈકેનાત્મનૈકદેહીકૃતાઃ સર્વ્વે ચૈકાત્મભુક્તા અભવામ।
XIV એકેનાઙ્ગેન વપુ ર્ન ભવતિ કિન્તુ બહુભિઃ।
XV તત્ર ચરણં યદિ વદેત્ નાહં હસ્તસ્તસ્માત્ શરીરસ્ય ભાગો નાસ્મીતિ તર્હ્યનેન શરીરાત્ તસ્ય વિયોગો ન ભવતિ।
XVI શ્રોત્રં વા યદિ વદેત્ નાહં નયનં તસ્માત્ શરીરસ્યાંશો નાસ્મીતિ તર્હ્યનેન શરીરાત્ તસ્ય વિયોગો ન ભવતિ।
XVII કૃત્સ્નં શરીરં યદિ દર્શનેન્દ્રિયં ભવેત્ તર્હિ શ્રવણેન્દ્રિયં કુત્ર સ્થાસ્યતિ? તત્ કૃત્સ્નં યદિ વા શ્રવણેન્દ્રિયં ભવેત્ તર્હિ ઘ્રાણેન્દ્રિયં
કુત્ર સ્થાસ્યતિ?
XVIII કિન્ત્વિદાનીમ્ ઈશ્વરેણ યથાભિલષિતં તથૈવાઙ્ગપ્રત્યઙ્ગાનામ્ એકૈકં શરીરે સ્થાપિતં।
XIX તત્ કૃત્સ્નં યદ્યેકાઙ્ગરૂપિ ભવેત્ તર્હિ શરીરે કુત્ર સ્થાસ્યતિ?
XX તસ્માદ્ અઙ્ગાનિ બહૂનિ સન્તિ શરીરં ત્વેકમેવ।
XXI અતએવ ત્વયા મમ પ્રયોજનં નાસ્તીતિ વાચં પાણિં વદિતું નયનં ન શક્નોતિ, તથા યુવાભ્યાં મમ પ્રયોજનં નાસ્તીતિ મૂર્દ્ધા
ચરણૌ વદિતું ન શક્નોતિઃ;
XXII વસ્તુતસ્તુ વિગ્રહસ્ય યાન્યઙ્ગાન્યસ્માભિ ર્દુર્બ્બલાનિ બુધ્યન્તે તાન્યેવ સપ્રયોજનાનિ સન્તિ।
XXIII યાનિ ચ શરીરમધ્યેઽવમન્યાનિ બુધ્યતે તાન્યસ્માભિરધિકં શોભ્યન્તે। યાનિ ચ કુદૃશ્યાનિ તાનિ સુદૃશ્યતરાણિ ક્રિયન્તે
XXIV કિન્તુ યાનિ સ્વયં સુદૃશ્યાનિ તેષાં શોભનમ્ નિષ્પ્રયોજનં।
XXV શરીરમધ્યે યદ્ ભેદો ન ભવેત્ કિન્તુ સર્વ્વાણ્યઙ્ગાનિ યદ્ ઐક્યભાવેન સર્વ્વેષાં હિતં ચિન્તયન્તિ તદર્થમ્ ઈશ્વરેણાપ્રધાનમ્
આદરણીયં કૃત્વા શરીરં વિરચિતં।
XXVI તસ્માદ્ એકસ્યાઙ્ગસ્ય પીડાયાં જાતાયાં સર્વ્વાણ્યઙ્ગાનિ તેન સહ પીડ્યન્તે, એકસ્ય સમાદરે જાતે ચ સર્વ્વાણિ તેન સહ
સંહૃષ્યન્તિ।
XXVII યૂયઞ્ચ ખ્રીષ્ટસ્ય શરીરં, યુષ્માકમ્ એકૈકશ્ચ તસ્યૈકૈકમ્ અઙ્ગં।
XXVIII કેચિત્ કેચિત્ સમિતાવીશ્વરેણ પ્રથમતઃ પ્રેરિતા દ્વિતીયત ઈશ્વરીયાદેશવક્તારસ્તૃતીયત ઉપદેષ્ટારો નિયુક્તાઃ, તતઃ
પરં કેભ્યોઽપિ ચિત્રકાર્ય્યસાધનસામર્થ્યમ્ અનામયકરણશક્તિરુપકૃતૌ લોકશાસને વા નૈપુણ્યં નાનાભાષાભાષણસામર્થ્યં વા તેન
વ્યતારિ।
XXIX સર્વ્વે કિં પ્રેરિતાઃ? સર્વ્વે કિમ્ ઈશ્વરીયાદેશવક્તારઃ? સર્વ્વે કિમ્ ઉપદેષ્ટારઃ? સર્વ્વે કિં ચિત્રકાર્ય્યસાધકાઃ?
XXX સર્વ્વે કિમ્ અનામયકરણશક્તિયુક્તાઃ? સર્વ્વે કિં પરભાષાવાદિનઃ? સર્વ્વે વા કિં પરભાષાર્થપ્રકાશકાઃ?
XXXI યૂયં શ્રેષ્ઠદાયાન્ લબ્ધું યતધ્વં। અનેન યૂયં મયા સર્વ્વોત્તમમાર્ગં દર્શયિતવ્યાઃ।

# XIII

I મર્ત્યસ્વર્ગીયાણાં ભાષા ભાષમાણોઽહં યદિ પ્રેમહીનો ભવેયં તર્હિ વાદકતાલસ્વરૂપો નિનાદકારિભેરીસ્વરૂપશ્ચ ભવામિ।
II અપરઞ્ચ યદ્યહમ્ ઈશ્વરીયાદેશાઢ્યઃ સ્યાં સર્વ્વાણિ ગુપ્તવાક્યાનિ સર્વ્વવિદ્યાશ્ચ જાનીયાં પૂર્ણવિશ્વાસઃ સન્ શૈલાન્
સ્થાનાન્તરીકર્ત્તું શક્નુયાઞ્ચ કિન્તુ યદિ પ્રેમહીનો ભવેયં તર્હ્યગણનીય એવ ભવામિ।
III અપરં યદ્યહમ્ અન્નદાનેન સર્વ્વસ્વં ત્યજેયં દાહનાય સ્વશરીરં સમર્પયેયઞ્ચ કિન્તુ યદિ પ્રેમહીનો ભવેયં તર્હિ તત્સર્વ્વં મદર્થં
નિષ્ફલં ભવતિ।
IV પ્રેમ ચિરસહિષ્ણુ હિતૈષિ ચ, પ્રેમ નિર્દ્વેષમ્ અશઠં નિર્ગર્વ્વઞ્ચ।
V અપરં તત્ કુત્સિતં નાચરતિ, આત્મચેષ્ટાં ન કુરુતે સહસા ન ક્રુધ્યતિ પરાનિષ્ટં ન ચિન્તયતિ,

VI અધર્મ્મે ન તુષ્યતિ સત્ય એવ સન્તુષ્યતિ।
VII તત્ સર્વ્વં તિતિક્ષતે સર્વ્વત્ર વિશ્વસિતિ સર્વ્વત્ર ભદ્રં પ્રતીક્ષતે સર્વ્વં સહતે ચ।
VIII પ્રેમ્નો લોપઃ કદાપિ ન ભવિષ્યતિ, ઈશ્વરીયાદેશકથનં લોપ્સ્યતે પરભાષાભાષણં નિવર્ત્તિષ્યતે જ્ઞાનમપિ લોપં યાસ્યતિ।
IX યતોઽસ્માકં જ્ઞાનં ખણ્ડમાત્રમ્ ઈશ્વરીયાદેશકથનમપિ ખણ્ડમાત્રં।
X કિન્ત્વસ્માસુ સિદ્ધતાં ગતેષુ તાનિ ખણ્ડમાત્રાણિ લોપં યાસ્યન્તે।
XI બાલ્યકાલેઽહં બાલ ઇવાભાષે બાલ ઇવાચિન્તયઞ્ચ કિન્તુ યૌવને જાતે તત્સર્વ્વં બાલ્યાચરણં પરિત્યક્તવાન્।
XII ઇદાનીમ્ અભ્રમધ્યેનાસ્પષ્ટં દર્શનમ્ અસ્માભિ ર્લભ્યતે કિન્તુ તદા સાક્ષાત્ દર્શનં લપ્સ્યતે। અધુના મમ જ્ઞાનમ્ અલ્પિષ્ઠં કિન્તુ
તદાહં યથાવગમ્યસ્તથૈવાવગતો ભવિષ્યામિ।
XIII ઇદાનીં પ્રત્યયઃ પ્રત્યાશા પ્રેમ ચ ત્રીણ્યેતાનિ તિષ્ઠન્તિ તેષાં મધ્યે ચ પ્રેમ શ્રેષ્ઠં।

# XIV

I યૂયં પ્રેમાચરણે પ્રયતધ્વમ્ આત્મિકાન્ દાયાનપિ વિશેષત ઈશ્વરીયાદેશકથનસામર્થ્યં પ્રાપ્તું ચેષ્ટધ્વં।
II યો જનઃ પરભાષાં ભાષતે સ માનુષાન્ ન સમ્ભાષતે કિન્ત્વીશ્વરમેવ યતઃ કેનાપિ કિમપિ ન બુધ્યતે સ ચાત્મના નિગૂઢવાક્યાનિ
કથયતિ;
III કિન્તુ યો જન ઈશ્વરીયાદેશં કથયતિ સ પરેષાં નિષ્ઠાયૈ હિતોપદેશાય સાન્ત્વનાયૈ ચ ભાષતે।
IV પરભાષાવાદ્યાત્મન એવ નિષ્ઠાં જનયતિ કિન્ત્વીશ્વરીયાદેશવાદી સમિતે ર્નિષ્ઠાં જનયતિ।
V યુષ્માકં સર્વ્વેષાં પરભાષાભાષણમ્ ઇચ્છામ્યહં કિન્ત્વીશ્વરીયાદેશકથનમ્ અધિકમપીચ્છામિ। યતઃ સમિતે ર્નિષ્ઠાયૈ યેન
સ્વવાક્યાનામ્ અર્થો ન ક્રિયતે તસ્માત્ પરભાષાવાદિત ઈશ્વરીયાદેશવાદી શ્રેયાન્।
VI હે ભ્રાતરઃ, ઇદાનીં મયા યદિ યુષ્મત્સમીપં ગમ્યતે તર્હીશ્વરીયદર્શનસ્ય જ્ઞાનસ્ય વેશ્વરીયાદેશસ્ય વા શિક્ષાયા વા વાક્યાનિ ન
ભાષિત્વા પરભાષાં ભાષમાણેન મયા યૂયં કિમુપકારિષ્યધ્વે?
VII અપરં વંશીવલ્લક્યાદિષુ નિષ્પ્રાણિષુ વાદ્યયન્ત્રેષુ વાદિતેષુ યદિ ક્કણા ન વિશિષ્યન્તે તર્હિ કિં વાદ્યં કિં વા ગાનં ભવતિ તત્
કેન બોદ્ધું શક્યતે?
VIII અપરં રણતૂર્ય્યા નિસ્વણો યદ્યવ્યક્તો ભવેત્ તર્હિ યુદ્ધાય કઃ સજ્જિષ્યતે?
IX તદ્વત્ જિહ્વાભિ ર્યદિ સુગમ્યા વાક્ યુષ્માભિ ર્ન ગદ્યેત તર્હિ યદ્ ગદ્યતે તત્ કેન ભોત્સ્યતે? વસ્તુતો યૂયં દિગાલાપિન ઇવ
ભવિષ્યથ।
X જગતિ કતિપ્રકારા ઉક્તયો વિદ્યન્તે? તાસામેકાપિ નિરર્થિકા નહિ;
XI કિન્તૂક્તેરર્થો યદિ મયા ન બુધ્યતે તર્હ્યહં વક્ત્રા મ્લેચ્છ ઇવ મંસ્યે વક્તાપિ મયા મ્લેચ્છ ઇવ મંસ્યતે।
XII તસ્માદ્ આત્મિકદાયલિપ્સવો યૂયં સમિતે ર્નિષ્ઠાર્થં પ્રાપ્તબહુવરા ભવિતું યતધ્વં,
XIII અતએવ પરભાષાવાદી યદ્ અર્થકરોઽપિ ભવેત્ તત્ પ્રાર્થયતાં।
XIV યદ્યહં પરભાષયા પ્રર્થનાં કુર્ય્યાં તર્હિ મદીય આત્મા પ્રાર્થયતે, કિન્તુ મમ બુદ્ધિ ર્નિષ્ફલા તિષ્ઠતિ।
XV ઇત્યનેન કિં કરણીયં? અહમ્ આત્મના પ્રાર્થયિષ્યે બુદ્ધ્યાપિ પ્રાર્થયિષ્યે; અપરં આત્મના ગાસ્યામિ બુદ્ધ્યાપિ ગાસ્યામિ।
XVI ત્વં યદાત્મના ધન્યવાદં કરોષિ તદા યદ્ વદસિ તદ્ યદિ શિષ્યેનેવોપસ્થિતેન જનેન ન બુદ્ધ્યતે તર્હિ તવ ધન્યવાદસ્યાન્તે
તથાસ્ત્વિતિ તેન વક્તં કથં શક્યતે?
XVII ત્વં સમ્યગ્ ઈશ્વરં ધન્યં વદસીતિ સત્યં તથાપિ તત્ર પરસ્ય નિષ્ઠા ન ભવતિ।
XVIII યુષ્માકં સર્વ્વેભ્યોઽહં પરભાષાભાષણે સમર્થોઽસ્મીતિ કારણાદ્ ઈશ્વરં ધન્યં વદામિ;
XIX તથાપિ સમિતૌ પરોપદેશાર્થં મયા કથિતાનિ પઞ્ચ વાક્યાનિ વરં ન ચ લક્ષં પરભાષીયાનિ વાક્યાનિ।
XX હે ભ્રાતરઃ,યૂયં બુદ્ધ્યા બાલકાઇવ મા ભૂત પરન્તુ દુષ્ટતયા શિશવઇવ ભૂત્વા બુદ્ધ્યા સિદ્ધા ભવત।
XXI શાસ્ત્ર ઇદં લિખિતમાસ્તે, યથા, ઇત્યવોચત્ પરેશોઽહમ્ આભાષિષ્ય ઇમાન્ જનાન્। ભાષાભિઃ પરકીયાભિ ર્વક્ત્રૈશ્ચ
પરદેશિભિઃ। તથા મયા કૃતેઽપીમે ન ગ્રહીષ્યન્તિ મદ્વચઃ॥
XXII અતએવ તત્ પરભાષાભાષણં અવિશ્વાસિનઃ પ્રતિ ચિહ્નરૂપં ભવતિ ન ચ વિશ્વાસિનઃ પ્રતિ; કિન્ત્વીશ્વરીયાદેશકથનં
નાવિશ્વાસિનઃ પ્રતિ તદ્ વિશ્વાસિનઃ પ્રત્યેવ।
XXIII સમિતિભુક્તેષુ સર્વ્વેષુ એકસ્મિન્ સ્થાને મિલિત્વા પરભાષાં ભાષમાણેષુ યદિ જ્ઞાનાકાઙ્ક્ષિણોઽવિશ્વાસિનો વા
તત્રાગચ્છેયુસ્તર્હિ યુષ્માન્ ઉન્મત્તાન્ કિં ન વદિષ્યન્તિ?
XXIV કિન્તુ સર્વ્વેષ્વીશ્વરીયાદેશં પ્રકાશયત્સુ યદ્યવિશ્વાસી જ્ઞાનાકાઙ્ક્ષી વા કશ્ચિત્ તત્રાગચ્છતિ તર્હિ સર્વ્વૈરેવ તસ્ય પાપજ્ઞાનં
પરીક્ષા ચ જાયતે,
XXV તતસ્તસ્યાન્તઃકરણસ્ય ગુપ્તકલ્પનાસુ વ્યક્તીભૂતાસુ સોઽધોમુખઃ પતન્ ઈશ્વરમારાધ્ય યુષ્મન્મધ્ય ઈશ્વરો વિદ્યતે ઇતિ
સત્યં કથામેતાં કથયિષ્યતિ।
XXVI હે ભ્રાતરઃ, સમ્મિલિતાનાં યુષ્માકમ્ એકેન ગીતમ્ અન્યેનોપદેશોઽન્યેન પરભાષાન્યેન ઐશ્વરિકદર્શનમ્ અન્યેનાર્થબોધકં
વાક્યં લભ્યતે કિમેતત્? સર્વ્વમેવ પરનિષ્ઠાર્થં યુષ્માભિઃ ક્રિયતાં।
XXVII યદિ કશ્ચિદ્ ભાષાન્તરં વિવક્ષતિ તર્હ્યેકસ્મિન્ દિને દ્વિજનેન ત્રિજનેન વા પરભાાષા કથ્યતાં તદધિકૈર્ન કથ્યતાં તૈરપિ
પર્ય્યાયાનુસારાત્ કથ્યતાં, એકેન ચ તદર્થો બોધ્યતાં।
XXVIII કિન્ત્વર્થાભિધાયકઃ કોઽપિ યદિ ન વિદ્યતે તર્હિ સ સમિતૌ વાચંયમઃ સ્થિત્વેશ્વરાયાત્મને ચ કથાં કથયતુ।
XXIX અપરં દ્વૌ ત્રયો વેશ્વરીયાદેશવક્તારઃ સ્વં સ્વમાદેશં કથયન્તુ તદન્યે ચ તં વિચારયન્તુ।
XXX કિન્તુ તત્રાપરેણ કેનચિત્ જનેનેશ્વરીયાદેશે લબ્ધે પ્રથમેન કથનાત્ નિવર્ત્તિતવ્યં।
XXXI સર્વ્વે યત્ શિક્ષાં સાન્ત્વનાઞ્ચ લભન્તે તદર્થં યૂયં સર્વ્વે પર્ય્યાયેણેશ્વરીયાદેશં કથયિતું શક્નુથ।
XXXII ઈશ્વરીયાદેશવક્તૃણાં મનાંસિ તેષામ્ અધીનાનિ ભવન્તિ।

XXXIII યત ઈશ્વરઃ કુશાસનજનકો નહિ સુશાસનજનક એવેતિ પવિત્રલોકાનાં સર્વ્વસમિતિષુ પ્રકાશતે।
XXXIV અપરઞ્ચ યુષ્માકં વનિતાઃ સમિતિષુ તૂષ્ણીમ્ભૂતાસ્તિષ્ઠન્તુ યતઃ શાસ્ત્રલિખિતેન વિધિના તાઃ કથાપ્રચારણાત્ નિવારિતાસ્તાભિ ર્નિઘ્રાભિ ર્ભવિતવ્યં।
XXXV અતસ્તા યદિ કિમપિ જિજ્ઞાસન્તે તર્હિ ગેહેષુ પતીન્ પૃચ્છન્તુ યતઃ સમિતિમધ્યે યોષિતાં કથાકથનં નિન્દનીયં।
XXXVI ઐશ્વરં વચઃ કિં યુષ્મત્તો નિરગમત? કેવલં યુષ્માન્ વા તત્ કિમ્ ઉપાગતં?
XXXVII યઃ કશ્ચિદ્ આત્માનમ્ ઈશ્વરીયાદેશવક્તારમ્ આત્મનાવિષ્ટં વા મન્યતે સ યુષ્માન્ પ્રતિ મયા યદ્ યત્ લિખ્યતે તત્પ્રભુનાજ્ઞાપિતમ્ ઈત્યુરરી કરોતુ।
XXXVIII કિન્તુ યઃ કશ્ચિત્ અજ્ઞો ભવતિ સોઽજ્ઞ એવ તિષ્ઠતુ।
XXXIX અતએવ હે ભ્રાતરઃ, યૂયમ્ ઈશ્વરીયાદેશકથનસામર્થ્યં લબ્ધું યતધ્વં પરભાષાભાષણમપિ યુષ્માભિ ર્ન નિવાર્ય્યતાં।
XL સર્વ્વકર્મ્માણિ ચ વિધ્યનુસારતઃ સુપરિપાટ્યા ક્રિયન્તાં।

# XV

I હે ભ્રાતરઃ, યઃ સુસંવાદો મયા યુષ્મત્સમીપે નિવેદિતો યૂયઞ્ચ યં ગૃહીતવન્ત આશ્રિતવન્તશ્ચ તં પુન ર્યુષ્માન્ વિજ્ઞાપયામિ।
II યુષ્માકં વિશ્વાસો યદિ વિતથો ન ભવેત્ તર્હિ સુસંવાદયુક્તાનિ મમ વાક્યાનિ સ્મરતાં યુષ્માકં તેન સુસંવાદેન પરિત્રાણં જાયતે।
III યતોઽહં યદ્ યત્ જ્ઞાપિતસ્તદનુસારાત્ યુષ્માસુ મુખ્યાં યાં શિક્ષાં સમાર્પયં સેયં, શાસ્ત્રાનુસારાત્ ખ્રીષ્ટોઽસ્માકં પાપમોચનાર્થં પ્રાણાન્ ત્યક્તવાન્,
IV શ્મશાને સ્થાપિતશ્ચ તૃતીયદિને શાસ્ત્રાનુસારાત્ પુનરુત્થાપિતઃ।
V સ ચાગ્રે કૈફૈ તતઃ પરં દ્વાદશશિષ્યેભ્યો દર્શનં દત્તવાન્।
VI તતઃ પરં પઞ્ચશતાધિકસંખ્યકેભ્યો ભ્રાતૃભ્યો યુગપદ્ દર્શનં દત્તવાન્ તેષાં કેચિત્ મહાનિદ્રાં ગતા બહુતરાશ્ચાદ્યાપિ વર્ત્તન્તે।
VII તદનન્તરં યાકૂબાય તત્પશ્ચાત્ સર્વ્વેભ્યઃ પ્રેરિતેભ્યો દર્શનં દત્તવાન્।
VIII સર્વ્વશેષેઽકાલજાતતુલ્યો યોઽહં, સોઽહમપિ તસ્ય દર્શનં પ્રાપ્તવાન્।
IX ઈશ્વરસ્ય સમિતિં પ્રતિ દૌરાત્મ્યાચરણાદ્ અહં પ્રેરિતનામ ધર્ત્તુમ્ અયોગ્યસ્તસ્માત્ પ્રેરિતાનાં મધ્યે ક્ષુદ્રતમશ્ચાસ્મિ।
X યાદૃશોઽસ્મિ તાદૃશ ઈશ્વરસ્યાનુગ્રહેણૈવાસ્મિ; અપરં માં પ્રતિ તસ્યાનુગ્રહો નિષ્ફલો નાભવત્, અન્યેભ્યઃ સર્વ્વેભ્યો મયાધિકઃ શ્રમઃ કૃતઃ, કિન્તુ સ મયા કૃતસ્તન્નહિ મત્સહકારિણેશ્વરસ્યાનુગ્રહેણૈવ।
XI અતએવ મયા ભવેત્ તૈ ર્વા ભવેત્ અસ્માભિસ્તાદૃશી વાર્ત્તા ઘોષ્યતે સૈવ ચ યુષ્માભિ ર્વિશ્વાસેન ગૃહીતા।
XII મૃત્યુદશાતઃ ખ્રીષ્ટ ઉત્થાપિત ઇતિ વાર્ત્તા યદિ તમધિ ઘોષ્યતે તર્હિ મૃતલોકાનામ્ ઉત્થિતિ ર્નાસ્તીતિ વાગ્ યુષ્માકં મધ્યે કૈશ્ચિત્ કુતઃ કથ્યતે?
XIII મૃતાનામ્ ઉત્થિતિ ર્યદિ ન ભવેત્ તર્હિ ખ્રીષ્ટોઽપિ નોત્થાપિતઃ
XIV ખ્રીષ્ટશ્ચ યદ્યનુત્થાપિતઃ સ્યાત્ તર્હ્યસ્માકં ઘોષણં વિતથં યુષ્માકં વિશ્વાસોઽપિ વિતથઃ।
XV વયઞ્ચેશ્વરસ્ય મૃષાસાક્ષિણો ભવામઃ, યતઃ ખ્રીષ્ટ સ્તેનોત્થાપિતઃ ઇતિ સાક્ષ્યમ્ અસ્માભિરીશ્વરમધિ દત્તં કિન્તુ મૃતાનામુત્થિતિ ર્યદિ ન ભવેત્ તર્હિ સ તેન નોત્થાપિતઃ।
XVI યતો મૃતાનામુત્થિતિ ર્યતિ ન ભવેત્ તર્હિ ખ્રીષ્ટોઽપ્યુત્થાપિતત્વં ન ગતઃ।
XVII ખ્રીષ્ટસ્ય યદ્યનુત્થાપિતઃ સ્યાત્ તર્હિ યુષ્માકં વિશ્વાસો વિતથઃ, યૂયમ્ અદ્યાપિ સ્વપાપેષુ મગ્નાસ્તિષ્ઠથ।
XVIII અપરં ખ્રીષ્ટાશ્રિતા યે માનવા મહાનિદ્રાં ગતાસ્તેઽપિ નાશં ગતાઃ।
XIX ખ્રીષ્ટો યદિ કેવલમિહલોકે ઽસ્માકં પ્રત્યાશાભૂમિઃ સ્યાત્ તર્હિ સર્વ્વમર્ત્યેભ્યો વયમેવ દુર્ભાગ્યાઃ।
XX ઇદાનીં ખ્રીષ્ટો મૃત્યુદશાત ઉત્થાપિતો મહાનિદ્રાગતાનાં મધ્યે પ્રથમફલસ્વરૂપો જાતશ્ચ।
XXI યતો યદ્વત્ માનુષદ્વારા મૃત્યુઃ પ્રાદુર્ભૂતસ્તદ્વત્ માનુષદ્વારા મૃતાનાં પુનરુત્થિતિરપિ પ્રદુર્ભૂતા।
XXII આદમા યથા સર્વ્વે મરણાધીના જાતાસ્તથા ખ્રીષ્ટેન સર્વ્વે જીવયિષ્યન્તે।
XXIII કિન્ત્વેકૈકેન જનેન નિજે નિજે પર્ય્યાય ઉત્થાતવ્યં પ્રથમતઃ પ્રથમજાતફલસ્વરૂપેન ખ્રીષ્ટેન, દ્વિતીયતસ્તસ્યાગમનસમયે ખ્રીષ્ટસ્ય લોકૈઃ।
XXIV તતઃ પરમ્ અન્તો ભવિષ્યતિ તદાનીં સ સર્વ્વં શાસનમ્ અધિપતિત્વં પરાક્રમઞ્ચ લુપ્ત્વા સ્વપિતરીશ્વરે રાજત્વં સમર્પયિષ્યતિ।
XXV યતઃ ખ્રીષ્ટસ્ય રિપવઃ સર્વ્વે યાવત્ તેન સ્વપાદયોરધો ન નિપાતયિષ્યન્તે તાવત્ તેનૈવ રાજત્વં કર્ત્તવ્યં।
XXVI તેન વિજેતવ્યો યઃ શેષરિપુઃ સ મૃત્યુરેવ।
XXVII લિખિતમાસ્તે સર્વ્વાણિ તસ્ય પાદયો ર્વશીકૃતાનિ। કિન્તુ સર્વ્વાણ્યેવ તસ્ય વશીકૃતાનીત્યુક્તે સતિ સર્વ્વાણિ યેન તસ્ય વશીકૃતાનિ સ સ્વયં તસ્ય વશીભૂતો ન જાત ઇતિ વ્યક્તં।
XXVIII સર્વ્વેષુ તસ્ય વશીભૂતેષુ સર્વ્વાણિ યેન પુત્રસ્ય વશીકૃતાનિ સ્વયં પુત્રોઽપિ તસ્ય વશીભૂતો ભવિષ્યતિ તત ઈશ્વરઃ સર્વ્વેષુ સર્વ્વ એવ ભવિષ્યતિ।
XXIX અપરં પરેતલોકાનાં વિનિમયેન યે મજ્જ્યન્તે તૈઃ કિં લપ્સ્યતે? યેષાં પરેતલોકાનામ્ ઉત્થિતિઃ કેનાપિ પ્રકારેણ ન ભવિષ્યતિ તેષાં વિનિમયેન કુતો મજ્જનમપિ તૈરઙ્ગીક્રિયતે?
XXX વયમપિ કુતઃ પ્રતિદણ્ડં પ્રાણભીતિમ્ અઙ્ગીકુર્મ્મહે?
XXXI અસ્મત્પ્રભુના યીશુખ્રીષ્ટેન યુષ્મત્તો મમ યા શ્લાઘાસ્તે તસ્યાઃ શપથં કૃત્વા કથયામિ દિને દિનેઽહં મૃત્યું ગચ્છામિ।
XXXII ઇફિષનગરે વન્યપશુભિઃ સાર્દ્ધં યદિ લૌકિકભાવાત્ મયા યુદ્ધં કૃતં તર્હિ તેન મમ કો લાભઃ? મૃતાનામ્ ઉત્થિતિ ર્યદિ ન ભવેત્ તર્હિ, કુર્મ્મો ભોજનપાનેઽદ્ય શ્વસ્તુ મૃત્યુ ર્ભવિષ્યતિ।
XXXIII ઇત્યનેન ધર્મ્માત્ મા ભ્રંશધ્વં। કુસંસર્ગેણ લોકાનાં સદાચારો વિનશ્યતિ।

XXXIV યૂયં યથોચિતં સચૈતન્યાસ્તિષ્ઠત, પાપં મા કુરુધ્વં, યતો યુષ્માકં મધ્ય ઈશ્વરીયજ્ઞાનહીનાઃ કેઽપિ વિદ્યન્તે યુષ્માકં ત્રપાયૈ મયેદં ગદ્યતે།
XXXV અપરં મૃતલોકાઃ કથમ્ ઉત્થાસ્યન્તિ? કીદૃશં વા શરીરં લબ્ધ્વા પુનરેષ્યન્તીતિ વાક્યં કશ્ચિત્ પ્રક્ષ્યતિ།
XXXVI હે અજ્ઞ ત્વયા યદ્ બીજમ્ ઉપ્યતે તદ્ યદિ ન મ્રિયેત તર્હિ ન જીવયિષ્યતે།
XXXVII યયા મૂર્ત્યા નિર્ગન્તવ્યં સા ત્વયા નોપ્યતે કિન્તુ શુષ્કં બીજમેવ; તચ્ચ ગોધૂમાદીનાં કિમપિ બીજં ભવિતું શક્નોતિ།
XXXVIII ઈશ્વરેણેવ યથાભિલાષં તસ્મૈ મૂર્ત્તિર્દીયતે, એકૈકસ્મૈ બીજાય સ્વા સ્વા મૂર્ત્તિરેવ દીયતે།
XXXIX સર્વ્વાણિ પલલાનિ નૈકવિધાનિ સન્તિ, મનુષ્યપશુપક્ષિમત્સ્યાદીનાં ભિન્નરૂપાણિ પલલાનિ સન્તિ།
XL અપરં સ્વર્ગીયા મૂર્ત્તયઃ પાર્થિવા મૂર્ત્તયશ્ચ વિદ્યન્તે કિન્તુ સ્વર્ગીયાનામ્ એકરૂપં તેજઃ પાર્થિવાનાઞ્ચ તદન્યરૂપં તેજોઽસ્તિ།
XLI સૂર્ય્યસ્ય તેજ એકવિધં ચન્દ્રસ્ય તેજસ્તદન્યવિધં તારાણાઞ્ચ તેજોઽન્યવિધં, તારાણાં મધ્યેઽપિ તેજસસ્તારતમ્યં વિદ્યતે།
XLII તત્ર લિખિતમાસ્તે યથા, 'આદિપુરુષ આદમ્ જીવત્પ્રાણી બભૂવ,' કિન્ત્વન્તિમ આદમ્ (ખ્રીષ્ટો) જીવનદાયક આત્મા બભૂવ།
XLIII યદ્ ઉપ્યતે તત્ તુચ્છં યચ્ચોત્થાસ્યતિ તદ્ ગૌરવાન્વિતં; યદ્ ઉપ્યતે તન્નિર્બ્બલં યચ્ચોત્થાસ્યતિ તત્ શક્તિયુક્તં།
XLIV યત્ શરીરમ્ ઉપ્યતે તત્ પ્રાણાનાં સદ્મ, યચ્ચ શરીરમ્ ઉત્થાસ્યતિ તદ્ આત્મનઃ સદ્મ। પ્રાણસદ્મસ્વરૂપં શરીરં વિદ્યતે, આત્મસદ્મસ્વરૂપમપિ શરીરં વિદ્યતે།
XLV તત્ર લિખિતમાસ્તે યથા, આદિપુરુષ આદમ્ જીવત્પ્રાણી બભૂવ, કિન્ત્વન્તિમ આદમ્ (ખ્રીષ્ટો) જીવનદાયક આત્મા બભૂવ།
XLVI આત્મસદ્મ ન પ્રથમં કિન્તુ પ્રાણસદ્મૈવ તત્પશ્ચાદ્ આત્મસદ્મ།
XLVII આદ્યઃ પુરુષે મૃદ ઉત્પન્નત્વાત્ મૃણ્મયો દ્વિતીયશ્ચ પુરુષઃ સ્વર્ગાદ્ આગતઃ પ્રભુઃ।
XLVIII મૃણ્મયો યાદૃશ આસીત્ મૃણ્મયાઃ સર્વ્વે તાદૃશા ભવન્તિ સ્વર્ગીયશ્ચ યાદૃશોઽસ્તિ સ્વર્ગીયાઃ સર્વ્વે તાદૃશા ભવન્તિ།
XLIX મૃણ્મયસ્ય રૂપં યદ્વદ્ અસ્માભિ ર્ધારિતં તદ્વત્ સ્વર્ગીયસ્ય રૂપમપિ ધારયિષ્યતે།
L હે ભ્રાતરઃ, યુષ્માન્ પ્રતિ વ્યાહરામિ, ઈશ્વરસ્ય રાજ્યે રક્તમાંસયોરધિકારો ભવિતું ન શક્નોતિ, અક્ષયત્વે ચ ક્ષયસ્યાધિકારો ન ભવિષ્યતિ།
LI પશ્યતાહં યુષ્મભ્યં નિગૂઢાં કથાં નિવેદયામિ।
LII સર્વ્વૈરસ્માભિ ર્મહાનિદ્રા ન ગમિષ્યતે કિન્ત્વન્તિમદિને તૂર્ય્યાં વાદિતાયામ્ એકસ્મિન્ વિપલે નિમિષૈકમધ્યે સર્વ્વૈ રૂપાન્તરં ગમિષ્યતે, યતસ્તૂરી વાદિષ્યતે, મૃતલોકાશ્ચાક્ષયીભૂતા ઉત્થાસ્યન્તિ વયઞ્ચ રૂપાન્તરં ગમિષ્યામઃ।
LIII યતઃ ક્ષયણીયેનૈતેન શરીરેણાક્ષયત્વં પરિહિતવ્યં, મરણાધીનેનૈતેન દેહેન ચામરત્વં પરિહિતવ્યં।
LIV એતસ્મિન્ ક્ષયણીયે શરીરે ઽક્ષયત્વં ગતે, એતસ્મન્ મરણાધીને દેહે ચામરત્વં ગતે શાસ્ત્રે લિખિતં વચનમિદં સેત્સ્યતિ, યથા, જયેન ગ્રસ્યતે મૃત્યુઃ।
LV મૃત્યો તે કણ્ટકં કુત્ર પરલોક જયઃ ક્ક તે།।
LVI મૃત્યોઃ કણ્ટકં પાપમેવ પાપસ્ય ચ બલં વ્યવસ્થા।
LVII ઈશ્વરશ્ચ ધન્યો ભવતુ યતઃ સોઽસ્માકં પ્રભુના યીશુખ્રીષ્ટેનાસ્માન્ જયયુક્તાન્ વિધાપયતિ।
LVIII અતો હે મમ પ્રિયભ્રાતરઃ; યૂયં સુસ્થિરા નિશ્ચલાશ્ચ ભવત પ્રભોઃ સેવાયાં યુષ્માકં પરિશ્રમો નિષ્ફલો ન ભવિષ્યતીતિ જ્ઞાત્વા પ્રભોઃ કાર્ય્યે સદા તત્પરા ભવત།

# XVI

I પવિત્રલોકાનાં કૃતે યોઽર્થસંગ્રહસ્તમધિ ગાલાતીયદેશસ્ય સમાજા મયા યદ્ આદિષ્ટાસ્તદ્ યુષ્માભિરપિ ક્રિયતાં।
II મમાગમનકાલે યદ્ અર્થસંગ્રહો ન ભવેત્ તન્નિમિત્તં યુષ્માકમેકૈકેન સ્વસમ્પદાનુસારાત્ સઞ્ચયં કૃત્વા સપ્તાહસ્ય પ્રથમદિવસે સ્વસમીપે કિઞ્ચિત્ નિક્ષિપ્યતાં।
III તતો મમાગમનસમયે યૂયં યાનેવ વિશ્વાસ્યા ઇતિ વેદિષ્યથ તેભ્યોઽહં પત્રાણિ દત્ત્વા યુષ્માકં તદ્દાનસ્ય યિરૂશાલમં નયનાર્થં તાન્ પ્રેષયિષ્યામિ।
IV કિન્તુ યદિ તત્ર મમાપિ ગમનમ્ ઉચિતં ભવેત્ તર્હિ તે મયા સહ યાસ્યન્તિ।
V સામ્પ્રતં માકિદનિયાદેશમહં પર્ય્યટામિ તં પર્ય્યટ્ય યુષ્મત્સમીપમ્ આગમિષ્યામિ।
VI અનન્તરં કિં જાનામિ યુષ્મત્સન્નિધિમ્ અવસ્થાસ્યે શીતકાલમપિ યાપયિષ્યામિ ચ પશ્ચાત્ મમ યત્ સ્થાનં ગન્તવ્યં તત્રૈવ યુષ્માભિરહં પ્રેરયિતવ્યઃ।
VII યતોઽહં યાત્રાકાલે ક્ષણમાત્રં યુષ્માન્ દ્રષ્ટું નેચ્છામિ કિન્તુ પ્રભુ ર્યદ્યનુજાનીયાત્ તર્હિ કિઞ્ચિદ્ દીર્ઘકાલં યુષ્મત્સમીપે પ્રવસ્તુમ્ ઇચ્છામિ।
VIII તથાપિ નિસ્તારોત્સવાત્ પરં પઞ્ચાશત્તમદિનં યાવદ્ ઇફિષપુર્ય્યાં સ્થાસ્યામિ।
IX યસ્માદ્ અત્ર કાર્ય્યસાધનાર્થં મમાન્તિકે બૃહદ્ દ્વારં મુક્તં બહવો વિપક્ષા અપિ વિદ્યન્તે।
X તિમથિ ર્યદિ યુષ્માકં સમીપમ્ આગચ્છેત્ તર્હિ યેન નિર્ભયં યુષ્મન્મધ્યે વર્ત્તેત તત્ર યુષ્માભિ ર્મનો નિધીયતાં યસ્માદ્ અહં યાદૃક્ સોઽપિ તાદૃક્ પ્રભોઃ કર્મ્મણે યતતે।
XI કોઽપિ તં પ્રત્યનાદરં ન કરોતુ કિન્તુ સ મમાન્તિકં યદ્ આગન્તું શક્નુયાત્ તદર્થં યુષ્માભિઃ સકુશલં પ્રેષ્યતાં। ભ્રાતૃભિઃ સાર્દ્ધમહં તં પ્રતીક્ષે།
XII આપલ્લું ભ્રાતરમધ્યહં નિવેદયામિ ભ્રાતૃભિઃ સાકં સોઽપિ યદ્ યુષ્માકં સમીપં વ્રજેત્ તદર્થં મયા સ પુનઃ પુનર્યાચિતઃ કિન્ત્વિદાનીં ગમનં સર્વ્વથા તસ્મૈ નારોચત, ઇતઃપરં સુસમયં પ્રાપ્ય સ ગમિષ્યતિ।
XIII યૂયં જાગૃત વિશ્વાસે સુસ્થિરા ભવત પૌરુષં પ્રકાશયત બલવન્તો ભવત।
XIV યુષ્માભિઃ સર્વ્વાણિ કર્મ્માણિ પ્રેમ્ના નિષ્પાદ્યન્તાં།

XV હે ભ્રાતરઃ, અહં યુષ્માન્ ઇદમ્ અભિયાચે સ્તિફાનસ્ય પરિજના આખાયાદેશસ્ય પ્રથમજાતફલસ્વરૂપાઃ, પવિત્રલોકાનાં
પરિચર્ય્યાયૈ ચ ત આત્મનો ન્યવેદયન્ ઇતિ યુષ્માભિ ર્જ્ઞાયતે।
XVI અતો યૂયમપિ તાદૃશલોકાનામ્ અસ્મત્સહાયાનાં શ્રમકારિણાઞ્ચ સર્વ્વેષાં વશ્યા ભવત।
XVII સ્તિફાનઃ ફર્ત્તૂનાત આખાયિકશ્ચ યદ્ અત્રાગમન્ તેનાહમ્ આનન્દામિ યતો યુષ્માભિર્યત્ ન્યૂનિતં તત્ તૈઃ સમ્પૂરિતં।
XVIII તૈ ર્યુષ્માકં મમ ચ મનાંસ્યાપ્યાયિતાનિ। તસ્માત્ તાદૃશા લોકા યુષ્માભિઃ સમ્મન્તવ્યાઃ।
XIX યુષ્મભ્યમ્ આશિયાદેશસ્થસમાજાનાં નમસ્કૃતિમ્ આક્કિલપ્રિસ્કિલ્લયોસ્તન્મણ્ડપસ્થસમિતેશ્ચ બહુનમસ્કૃતિં પ્રજાનીત।
XX સર્વ્વે ભ્રાતરો યુષ્માન્ નમસ્કુર્વ્વન્તે। યૂયં પવિત્રચુમ્બનેન મિથો નમત।
XXI પૌલોઽહં સ્વકરલિખિતં નમસ્કૃતિં યુષ્માન્ વેદયે।
XXII યદિ કશ્ચિદ્ યીશુખ્રીષ્ટે ન પ્રીયતે તર્હિ સ શાપગ્રસ્તો ભવેત્ પ્રભુરાયાતિ।
XXIII અસ્માકં પ્રભો ર્યીશુખ્રીષ્ટસ્યાનુગ્રહો યુષ્માન્ પ્રતિ ભૂયાત્।
XXIV ખ્રીષ્ટં યીશુમ્ આશ્રિતાન્ યુષ્માન્ પ્રતિ મમ પ્રેમ તિષ્ઠતુ। ઇતિ॥

# ૨ કરિન્થિનઃ પત્રં

I ઈશ્વરસ્યેચ્છયા યીશુખ્રીષ્ટસ્ય પ્રેરિતઃ પૌલસ્તિમથિર્ભ્રાતા ચ દ્વાવેતૌ કરિન્થનગરસ્થાયૈ ઈશ્વરીયસમિતય આખાયાદેશસ્થેભ્યઃ સર્વ્વેભ્યઃ પવિત્રલોકેભ્યશ્ચ પત્રં લિખતઃ।
II અસ્માકં તાતસ્યેશ્વરસ્ય પ્રભોર્યીશુખ્રીષ્ટસ્ય ચાનુગ્રહઃ શાન્તિશ્ચ યુષ્માસુ વર્ત્તતાં।
III કૃપાલુઃ પિતા સર્વ્વસાન્ત્વનાકારીશ્વરશ્ચ યોઽસ્મત્પ્રભોર્યીશુખ્રીષ્ટસ્ય તાત ઈશ્વરઃ સ ધન્યો ભવતુ।
IV યતો વયમ્ ઈશ્વરાત્ સાન્ત્વનાં પ્રાપ્ય તયા સાન્ત્વનયા યત્ સર્વ્વવિધક્લિષ્ટાન્ લોકાન્ સાન્ત્વયિતું શક્નુયામ તદર્થં સોઽસ્માકં સર્વ્વક્લેશસમયેઽસ્માન્ સાન્ત્વયતિ।
V યતઃ ખ્રીષ્ટસ્ય ક્લેશા યદ્વદ્ બાહુલ્યેનાસ્માસુ વર્ત્તન્તે તદ્વદ્ વયં ખ્રીષ્ટેન બહુસાન્ત્વનાઢ્યા અપિ ભવામઃ।
VI વયં યદિ ક્લિશ્યામહે તર્હિ યુષ્માકં સાન્ત્વનાપરિત્રાણયોઃ કૃતે ક્લિશ્યામહે યતોઽસ્માભિ ર્યાદૃશાનિ દુઃખાનિ સહ્યન્તે યુષ્માકં તાદૃશદુઃખાનાં સહનેન તૌ સાધયિષ્યેતે ઇત્યસ્મિન્ યુષ્માનધિ મમ દૃઢા પ્રત્યાશા ભવતિ।
VII યદિ વા વયં સાન્ત્વનાં લભામહે તર્હિ યુષ્માકં સાન્ત્વનાપરિત્રાણયોઃ કૃતે તામપિ લભામહે। યતો યૂયં યાદૃગ્ દુઃખાનાં ભાગિનોઽભવત તાદૃક્ સાન્ત્વનાયા અપિ ભાગિનો ભવિષ્યથેતિ વયં જાનીમઃ।
VIII હે ભ્રાતરઃ, આશિયાદેશે યઃ ક્લેશોઽસ્માન્ આક્રામ્યત્ તં યૂયં યદ્ અનવગતાસ્તિષ્ઠત તન્મયા ભદ્રં ન મન્યતે। તેનાતિશક્તિક્લેશેન વયમતીવ પીડિતાસ્તસ્માત્ જીવનરક્ષણે નિરુપાયા જાતાશ્ચ,
IX અતો વયં સ્વેષુ ન વિશ્વસ્ય મૃતલોકાનામ્ ઉત્થાપયિતરીશ્વરે યદ્ વિશ્વાસં કુર્મ્મસ્તદર્થમ્ અસ્માભિઃ પ્રાણદણ્ડો ભોક્તવ્ય ઇતિ સ્વમનસિ નિશ્ચિતં।
X એતાદૃશભયઙ્કરાત્ મૃત્યો ર્યો ઽસ્માન્ અત્રાયતેદાનીમપિ ત્રાયતે સ ઇતઃ પરમપ્યસ્માન્ ત્રાસ્યતે ઽસ્માકમ્ એતાદૃશી પ્રત્યાશા વિદ્યતે।
XI એતદર્થમસ્મત્કૃતે પ્રાર્થનયા વયં યુષ્માભિરુપકર્ત્તવ્યાસ્તથા કૃતે બહુભિ ર્યાચિતો યોઽનુગ્રહોઽસ્માસુ વર્ત્તિષ્યતે તત્કૃતે બહુભિરીશ્વરસ્ય ધન્યવાદોઽપિ કારિષ્યતે।
XII અપરઞ્ચ સંસારમધ્યે વિશેષતો યુષ્મન્મધ્યે વયં સાંસારિક્યા ધિયા નહિ કિન્ત્વીશ્વરસ્યાનુગ્રહેણાકુટિલતામ્ ઈશ્વરીયસારલ્યઞ્ચાચરિતવન્તોઽત્રાસ્માકં મનો યત્ પ્રમાણં દદાતિ તેન વયં શ્લાઘામહે।
XIII યુષ્માભિ ર્યદ્ યત્ પઠ્યતે ગૃહ્યતે ચ તદન્યત્ કિમપિ યુષ્મભ્યમ્ અસ્માભિ ર્ન લિખ્યતે તચ્ચાન્તં યાવદ્ યુષ્માભિ ર્ગ્રહીષ્યત ઇત્યસ્માકમ્ આશા।
XIV યૂયમિતઃ પૂર્વ્વમપ્યસ્માન્ અંશતો ગૃહીતવન્તઃ, યતઃ પ્રભો ર્યીશુખ્રીષ્ટસ્ય દિને યદ્વદ્ યુષ્માસ્વસ્માકં શ્લાઘા તદ્વદ્ અસ્માસુ યુષ્માકમપિ શ્લાઘા ભવિષ્યતિ।
XV અપરં યૂયં યદ્ દ્વિતીયં વરં લભધ્વે તદર્થમિતઃ પૂર્વ્વં તયા પ્રત્યાશયા યુષ્મત્સમીપં ગમિષ્યામિ
XVI યુષ્મદ્દેશેન માકિદનિયાદેશં વ્રજિત્વા પુનસ્તસ્માત્ માકિદનિયાદેશાત્ યુષ્મત્સમીપમ્ એત્ય યુષ્માભિ ર્યિહૂદાદેશં પ્રેષયિષ્યે ચેતિ મમ વાઞ્છાસીત્।
XVII એતાદૃશી મન્ત્રણા મયા કિં ચાઞ્ચલ્યેન કૃતા? યદ્ યદ્ અહં મન્ત્રયે તત્ કિં વિષયિલોકઇવ મન્ત્રયાણ આદૌ સ્વીકૃત્ય પશ્ચાદ્ અસ્વીકુર્વ્વે?
XVIII યુષ્માન્ પ્રતિ મયા કથિતાનિ વાક્યાન્યગ્રે સ્વીકૃતાનિ શેષેઽસ્વીકૃતાનિ નાભવન્ એતેનેશ્વરસ્ય વિશ્વસ્તતા પ્રકાશતે।
XIX મયા સિલ્વાનેન તિમથિના ચેશ્વરસ્ય પુત્રો યો યીશુખ્રીષ્ટો યુષ્મન્મધ્યે ઘોષિતઃ સ તેન સ્વીકૃતઃ પુનરસ્વીકૃતશ્ચ તન્નહિ કિન્તુ સ તસ્ય સ્વીકારસ્વરૂપએવ।
XX ઈશ્વરસ્ય મહિમા યદ્ અસ્માભિઃ પ્રકાશેત તદર્થમ્ ઈશ્વરેણ યદ્ યત્ પ્રતિજ્ઞાતં તત્સર્વ્વં ખ્રીષ્ટેન સ્વીકૃતં સત્યીભૂતઞ્ચ।
XXI યુષ્માન્ અસ્માંશ્ચાભિષિચ્ય યઃ ખ્રીષ્ટે સ્થાસ્નૂન્ કરોતિ સ ઈશ્વર એવ।
XXII સ ચાસ્માન્ મુદ્રાઙ્કિતાન્ અકાર્ષીત્ સત્યાઙ્કારસ્ય પણખરૂપમ્ આત્માનં અસ્માકમ્ અન્તઃકરણેષુ નિરક્ષિપચ્ચ।
XXIII અપરં યુષ્માસુ કરુણાં કુર્વ્વન્ અહમ્ એતાવત્કાલં યાવત્ કરિન્થનગરં ન ગતવાન્ ઇતિ સત્યમેતસ્મિન્ ઈશ્વરં સાક્ષિણં કૃત્વા મયા સ્વપ્રાણાનાં શપથઃ ક્રિયતે।
XXIV વયં યુષ્માકં વિશ્વાસસ્ય નિયન્તારો ન ભવામઃ કિન્તુ યુષ્માકમ્ આનન્દસ્ય સહાયા ભવામઃ, યસ્માદ્ વિશ્વાસે યુષ્માકં સ્થિતિ ર્ભવતિ।

## II

I અપરઞ્ચાહં પુનઃ શોકાય યુષ્મત્સન્નિધિં ન ગમિષ્યામીતિ મનસિ નિરચૈષં।
II યસ્માદ્ અહં યદિ યુષ્માન્ શોકયુક્તાન્ કરોમિ તર્હિ મયા યઃ શોકયુક્તીકૃતસ્તં વિના કેનાપરેણાહં હર્ષયિષ્યે?
III મમ યો હર્ષઃ સ યુષ્માકં સર્વ્વેષાં હર્ષ એવેતિ નિશ્ચિતં મયાબોધિ; અતએવ યૈરહં હર્ષયિતવ્યસ્તૈ ર્મદુપસ્થિતિસમયે યન્મમ શોકો ન જાયેત તદર્થમેવ યુષ્મભ્યમ્ એતાદૃશં પત્રં મયા લિખિતં।
IV વસ્તુતસ્તુ બહુક્લેશસ્ય મનઃપીડાયાશ્ચ સમયેઽહં બહ્વશ્રુપાતેન પત્રમેકં લિખિતવાન્ યુષ્માકં શોકાર્થં તન્નહિ કિન્તુ યુષ્માસુ મદીયપ્રેમબાહુલ્યસ્ય જ્ઞાપનાર્થં।
V યેનાહં શોકયુક્તીકૃતસ્તેન કેવલમહં શોકયુક્તીકૃતસ્તન્નહિ કિન્ત્વંશતો યૂયં સર્વ્વેઽપિ યતોઽહમત્ર કસ્મિંશ્ચિદ્ દોષમારોપયિતું નેચ્છામિ।
VI બહૂનાં યત્ તર્જ્જનં તેન જનેનાલમ્ભિ તત્ તદર્થં પ્રચુરં।
VII અતઃ સ દુઃખસાગરે યન્ન નિમજ્જતિ તદર્થં યુષ્માભિઃ સ ક્ષન્તવ્યઃ સાન્ત્વયિતવ્યશ્ચ।

VIII ઇતિ હેતોઃ પ્રર્થયેઽહં યુષ્માભિસ્તસ્મિન્ દયા ક્રિયતાં।
IX યૂયં સર્વ્વકર્મ્મણિ મમાદેશં ગૃહ્લીથ ન વેતિ પરીક્ષિતુમ્ અહં યુષ્માન્ પ્રતિ લિખિતવાન્।
X યસ્ય યો દોષો યુષ્માભિઃ ક્ષમ્યતે તસ્ય સ દોષો મયાપિ ક્ષમ્યતે યશ્ચ દોષો મયા ક્ષમ્યતે સ યુષ્માકં કૃતે ખ્રીષ્ટસ્ય સાક્ષાત્ ક્ષમ્યતે।
XI શયતાનઃ કલ્પનાસ્માભિરજ્ઞાતા નહિ, અતો વયં યત્ તેન ન વઞ્ચ્યામહે તદર્થમ્ અસ્માભિઃ સાવધાનૈ ર્ભવિતવ્યં।
XII અપરઞ્ચ ખ્રીષ્ટસ્ય સુસંવાદઘોષણાર્થં મયિ ત્રોયાનગરમાગતે પ્રભોઃ કર્મ્મણે ચ મદર્થં દ્વારે મુક્તે
XIII સત્યપિ સ્વભ્રાતુસ્તીતસ્યાવિદ્યમાનત્વાત્ મદીયાત્મનઃ કાપિ શાન્તિ ર્ન બભૂવ, તસ્માદ્ અહં તાન્ વિસર્જ્જનં યાચિત્વા
માકિદનિયાદેશં ગન્તું પ્રસ્થાનમ્ અકરવં।
XIV ય ઈશ્વરઃ સર્વ્વદા ખ્રીષ્ટેનાસ્માન્ જયિનઃ કરોતિ સર્વ્વત્ર ચાસ્માભિસ્તદીયજ્ઞાનસ્ય ગન્ધં પ્રકાશયતિ સ ધન્યઃ।
XV યસ્માદ્ યે ત્રાણં લપ્સ્યન્તે યે ચ વિનાશં ગમિષ્યન્તિ તાન્ પ્રતિ વયમ્ ઈશ્વરેણ ખ્રીષ્ટસ્ય સૌગન્ધ્યં ભવામઃ।
XVI વયમ્ એકેષાં મૃત્યવે મૃત્યુગન્ધા અપરેષાઞ્ચ જીવનાય જીવનગન્ધા ભવામઃ, કિન્ત્વેતાદૃશકર્મ્મસાધને કઃ સમર્થોઽસ્તિ?
XVII અન્યે બહવો લોકા યદ્વદ્ ઈશ્વરસ્ય વાક્યં મૃષાશિક્ષયા મિશ્રયન્તિ વયં તદ્વત્ તન્ન મિશ્રયન્તઃ સરલભાવેનેશ્વરસ્ય સાક્ષાદ્
ઈશ્વરસ્યાદેશાત્ ખ્રીષ્ટેન કથાં ભાષામહે।

# III

I વયં કિમ્ આત્મપ્રશંસનં પુનરારભામહે? યુષ્માન્ પ્રતિ યુષ્મત્તો વા પરેષાં કેષાઞ્ચિદ્ ઇવાસ્માકમપિ કિં પ્રશંસાપત્રેષુ પ્રયોજનમ્
આસ્તે?
II યૂયમેવાસ્માકં પ્રશંસાપત્રં તચ્ચાસ્માકમ્ અન્તઃકરણેષુ લિખિતં સર્વ્વમાનવૈશ્ચ જ્ઞેયં પઠનીયઞ્ચ।
III યતો ઽસ્માભિઃ સેવિતં ખ્રીષ્ટસ્ય પત્રં યૂયપેવ, તચ્ચ ન મસ્યા કિન્ત્વમરસ્યેશ્વરસ્યાત્મના લિખિતં પાષાણપત્રેષુ તન્નહિ કિન્તુ
ક્રવ્યમયેષુ હૃત્પત્રેષુ લિખિતમિતિ સુસ્પષ્ટં।
IV ખ્રીષ્ટેનેશ્વરં પ્રત્યસ્માકમ્ ઈદૃશો દૃઢવિશ્વાસો વિદ્યતે;
V વયં નિજગુણેન કિમપિ કલ્પયિતું સમર્થા ઇતિ નહિ કિન્ત્વીશ્વરાદસ્માકં સામર્થ્યં જાયતે।
VI તેન વયં નૂતનનિયમસ્યાર્થતો ઽક્ષરસંસ્થાનસ્ય તન્નહિ કિન્ત્વાત્મન એવ સેવનસામર્થ્યં પ્રાપ્તાઃ। અક્ષરસંસ્થાનં મૃત્યુજનકં
કિન્ત્વાત્મા જીવનદાયકઃ।
VII અક્ષરૈ ર્વિલિખિતપાષાણરૂપિણી યા મૃત્યોઃ સેવા સા યદીદૃક્ તેજસ્વિની જાતા યત્તસ્યાચિરસ્થાયિનસ્તેજસઃ કારણાત્ મૂસસો
મુખમ્ ઇસ્રાયેલીયલોકૈઃ સંદ્રષ્ટું નાશક્યત,
VIII તર્હ્યાત્મનઃ સેવા કિં તતોઽપિ બહુતેજસ્વિની ન ભવેત્?
IX દણ્ડજનિકા સેવા યદિ તેજોયુક્તા ભવેત્ તર્હિ પુણ્યજનિકા સેવા તતોઽધિકં બહુતેજોયુક્તા ભવિષ્યતિ।
X ઉભયોસ્તુલનાયાં કૃતાયામ્ એકસ્યાસ્તેજો દ્વિતીયાયાઃ પ્રખરતરેણ તેજસા હીનતેજો ભવતિ।
XI યસ્માદ્ યત્ લોપનીયં તદ્ યદિ તેજોયુક્તં ભવેત્ તર્હિ યત્ ચિરસ્થાયિ તદ્ બહુતરતેજોયુક્તમેવ ભવિષ્યતિ।
XII ઈદૃશીં પ્રત્યાશાં લબ્ધ્વા વયં મહતીં પ્રગલ્ભતાં પ્રકાશયામઃ।
XIII ઇસ્રાયેલીયલોકા યત્ તસ્ય લોપનીયસ્ય તેજસઃ શેષં ન વિલોકયેયુસ્તદર્થં મૂસા યાદૃગ્ આવરણેન સ્વમુખમ્ આચ્છાદયત્
વયં તાદૃક્ ન કુર્મ્મઃ।
XIV તેષાં મનાંસિ કઠિનીભૂતાનિ યતસ્તેષાં પઠનસમયે સ પુરાતનો નિયમસ્તેનાવરણેનાદ્યાપિ પ્રચ્છન્નસ્તિષ્ઠતિ।
XV તચ્ચ ન દૂરીભવતિ યતઃ ખ્રીષ્ટેનૈવ તત્ લુપ્યતે। મૂસસઃ શાસ્ત્રસ્ય પાઠસમયેઽદ્યાપિ તેષાં મનાંસિ તેનાવરણેન પ્રચ્છાદ્યન્તે।
XVI કિન્તુ પ્રભું પ્રતિ મનસિ પરાવૃત્તે તદ્ આવરણં દૂરીકારિષ્યતે।
XVII યઃ પ્રભુઃ સ એવ સ આત્મા યત્ર ચ પ્રભોરાત્મા તત્રૈવ મુક્તિઃ।
XVIII વયઞ્ચ સર્વ્વેઽનાચ્છાદિતેનાસ્યેન પ્રભોસ્તેજસઃ પ્રતિબિમ્બં ગૃહ્લન્ત આત્મસ્વરૂપેણ પ્રભુના રૂપાન્તરીકૃતા
વર્દ્ધમાનતેજોયુક્તાં તામેવ પ્રતિમૂર્ત્તિં પ્રાપ્નુમઃ।

# IV

I અપરઞ્ચ વયં કરુણાભાજો ભૂત્વા યદ્ એતત્ પરિચારકપદમ્ અલભામહિ નાત્ર ક્લામ્યામઃ,
II કિન્તુ ત્રપાયુક્તાનિ પ્રચ્છન્નકર્મ્માણિ વિહાય કુટિલતાચરણમકુર્વ્વન્ત ઈશ્વરીયવાક્યં મિથ્યાવાક્યૈરમિશ્રયન્તઃ સત્યધર્મ્મસ્ય
પ્રકાશનેનેશ્વરસ્ય સાક્ષાત્ સર્વ્વમાનવાનાં સંવેદગોચરે સ્વાન્ પ્રશંસનીયાન્ દર્શયામઃ।
III અસ્માભિ ર્ઘોષિતઃ સુસંવાદો યદિ પ્રચ્છન્નઃ; સ્યાત્ તર્હિ યે વિનંક્ષ્યન્તિ તેષામેવ દૃષ્ટિતઃ સ પ્રચ્છન્નઃ;
IV યત ઈશ્વરસ્ય પ્રતિમૂર્ત્તિ ર્યઃ ખ્રીષ્ટસ્તસ્ય તેજસઃ સુસંવાદસ્ય પ્રભા યત્ તાન્ ન દીપયેત્ તદર્થમ્ ઇહ લોકસ્ય દેવોઽવિશ્વાસિનાં
જ્ઞાનનયનમ્ અન્ધીકૃતવાન્ એતસ્યોદાહરણં તે ભવન્તિ।
V વયં સ્વાન્ ઘોષયામ ઇતિ નહિ કિન્તુ ખ્રીષ્ટં યીશું પ્રભુમેવાસ્માંશ્ચ યીશોઃ કૃતે યુષ્માકં પરિચારકાન્ ઘોષયામઃ।
VI ય ઈશ્વરો મધ્યેતિમિરં પ્રભાં દીપનાયાદિશત્ સ યીશુખ્રીષ્ટસ્યાસ્ય ઈશ્વરીયતેજસો જ્ઞાનપ્રભાયા ઉદયાર્થમ્ અસ્માકમ્
અન્તઃકરણેષુ દીપિતવાન્।
VII અપરં તદ્ ધનમ્ અસ્માભિ ર્મૃણ્મયેષુ ભાજનેષુ ધાર્ય્યતે યતઃ સાદ્ભુતા શક્તિ ર્નાસ્માકં કિન્ત્વીશ્વરસ્યૈવેતિ જ્ઞાતવ્યં।
VIII વયં પદે પદે પીડ્યામહે કિન્તુ નાવસીદામઃ, વયં વ્યાકુલાઃ સન્તોઽપિ નિરુપાયા ન ભવામઃ;
IX વયં પ્રદ્રાવ્યમાના અપિ ન ક્લામ્યામઃ, નિપાતિતા અપિ ન વિનશ્યામઃ।
X અસ્માકં શરીરે ખ્રીષ્ટસ્ય જીવનં યત્ પ્રકાશેત તદર્થં તસ્મિન્ શરીરે યીશો ર્મરણમપિ ધારયામઃ।
XI યીશો ર્જીવનં યદ્ અસ્માકં મર્ત્ત્યદેહે પ્રકાશેત તદર્થં જીવન્તો વયં યીશોઃ કૃતે નિત્યં મૃત્યૌ સમર્પ્યામહે।
XII ઇત્થં વયં મૃત્યાક્રાન્તા યૂયઞ્ચ જીવનાક્રાન્તાઃ।

XIII વિશ્વાસકારણાદેવ સમભાષિ મયા વચઃ। ઇતિ યથા શાસ્ત્રે લિખિતં તથૈવાસ્માભિરપિ વિશ્વાસજનકમ્ આત્માનં પ્રાપ્ય
વિશ્વાસઃ ક્રિયતે તસ્માચ્ચ વચાંસિ ભાષ્યન્તે।
XIV પ્રભુ ર્યીશુ ર્યેનોત્થાપિતઃ સ યીશુનાસ્માનપ્યુત્થાપયિષ્યતિ યુષ્માભિઃ સાર્દ્ધં સ્વસમીપ ઉપસ્થાપયિષ્યતિ ચ, વયમ્ એતત્
જાનીમઃ।
XV અતએવ યુષ્માકં હિતાય સર્વ્વમેવ ભવતિ તસ્માદ્ બહૂનાં પ્રચુરાનુગ્રહપ્રાપ્તે ર્બહુલોકાનાં ધન્યવાદેનેશ્વરસ્ય મહિમા સમ્યક્
પ્રકાશિષ્યતે।
XVI તતો હેતો ર્વયં ન ક્લામ્યામઃ કિન્તુ બાહ્યપુરુષો યદ્યપિ ક્ષીયતે તથાપ્યાન્તરિકઃ પુરુષો દિને દિને નૂતનાયતે।
XVII ક્ષણમાત્રસ્થાયિ યદેતત્ લઘિષ્ઠં દુઃખં તદ્ અતિબાહુલ્યેનાસ્માકમ્ અનન્તકાલસ્થાયિ ગરિષ્ઠસુખં સાધયતિ,
XVIII યતો વયં પ્રત્યક્ષાન્ વિષયાન્ અનુદ્દિશ્યાપ્રત્યક્ષાન્ ઉદ્દિશામઃ। યતો હેતોઃ પ્રત્યક્ષવિષયાઃ ક્ષણમાત્રસ્થાયિનઃ કિન્ત્વપ્રત્યક્ષા
અનન્તકાલસ્થાયિનઃ।

# V

I અપરમ્ અસ્માકમ્ એતસ્મિન્ પાર્થિવે દૂષ્યરૂપે વેશ્મનિ જીર્ણે સતીશ્વરેણ નિર્મ્મિતમ્ અકરકૃતમ્ અસ્માકમ્ અનન્તકાલસ્થાયિ
વેશ્મૈકં સ્વર્ગે વિદ્યત ઇતિ વયં જાનીમઃ।
II યતો હેતોરેતસ્મિન્ વેશ્મનિ તિષ્ઠન્તો વયં તં સ્વર્ગીયં વાસં પરિધાતુમ્ આકાઙ્ક્ષ્યમાણા નિઃશ્વસામઃ।
III તથાપીદાનીમપિ વયં તેન ન નગ્નાઃ કિન્તુ પરિહિતવસના મન્યામહે।
IV એતસ્મિન્ દૂષ્યે તિષ્ઠનતો વયં ક્લિશ્યમાના નિઃશ્વસામઃ, યતો વયં વાસં ત્યક્તુમ્ ઇચ્છામસ્તન્નહિ કિન્તુ તં દ્વિતીયં વાસં
પરિધાતુમ્ ઇચ્છામઃ, યતસ્તથા કૃતે જીવનેન મર્ત્યં ગ્રસિષ્યતે।
V એતદર્થં વયં યેન સૃષ્ટાઃ સ ઈશ્વર એવ સ ચાસ્મભ્યં સત્યઙ્કારસ્ય પણસ્વરૂપમ્ આત્માનં દત્તવાન્।
VI અતએવ વયં સર્વ્વદોત્સુકા ભવામઃ કિઞ્ચ શરીરે યાવદ્ અસ્માભિ ર્ન્યુષ્યતે તાવત્ પ્રભુતો દૂરે પ્રોષ્યત ઇતિ જાનીમઃ,
VII યતો વયં દૃષ્ટિમાર્ગે ન ચરામઃ કિન્તુ વિશ્વાસમાર્ગે।
VIII અપરઞ્ચ શરીરાદ્ દૂરે પ્રવસ્તું પ્રભોઃ સન્નિધૌ નિવસ્તુઞ્ચાકાઙ્ક્ષ્યમાણા ઉત્સુકા ભવામઃ।
IX તસ્માદેવ કારણાદ્ વયં તસ્ય સન્નિધૌ નિવસન્તસ્તસ્માદ્ દૂરે પ્રવસન્તો વા તસ્મૈ રોચિતું યતામહે।
X યસ્માત્ શરીરાવસ્થાયામ્ એકૈકેન કૃતાનાં કર્મ્મણાં શુભાશુભફલપ્રાપ્તયે સર્વ્વૈસ્માભિઃ ખ્રીષ્ટસ્ય વિચારાસનસમ્મુખ
ઉપસ્થાતવ્યં।
XI અતએવ પ્રભો ર્ભયાનકત્વં વિજ્ઞાય વયં મનુજાન્ અનુનયામઃ કિઞ્ચેશ્વરસ્ય ગોચરે સપ્રકાશા ભવામઃ, યુષ્માકં સંવેદગોચરેઽપિ
સપ્રકાશા ભવામ ઇત્યાશંસામહે।
XII અનેન વયં યુષ્માકં સન્નિધૌ પુનઃ સ્વાન્ પ્રશંસામ ઇતિ નહિ કિન્તુ યે મનો વિના મુખૈઃ શ્લાઘન્તે તેભ્યઃ પ્રત્યુત્તરદાનાય યૂયં
યથાસ્માભિઃ શ્લાઘિતું શક્નુથ તાદૃશમ્ ઉપાયં યુષ્મભ્યં વિતરામઃ।
XIII યદિ વયં હતજ્ઞાના ભવામસ્તર્હિ તદ્ ઈશ્વરાર્થકં યદિ ચ સજ્ઞાના ભવામસ્તર્હિ તદ્ યુષ્મદર્થકં।
XIV વયં ખ્રીષ્ટસ્ય પ્રેમ્ના સમાકૃષ્યામહે યતઃ સર્વ્વેષાં વિનિમયેન યદ્યેકો જનોઽમ્રિયત તર્હિ તે સર્વ્વે મૃતા ઇત્યાસ્માભિ ર્બુધ્યતે।
XV અપરઞ્ચ યે જીવન્તિ તે યત્ સ્વાર્થં ન જીવન્તિ કિન્તુ તેષાં કૃતે યો જનો મૃતઃ પુનરુત્થાપિતશ્ચ તમુદ્દિશ્ય યત્ જીવન્તિ તદર્થમેવ
સ સર્વ્વેષાં કૃતે મૃતવાન્।
XVI અતો હેતોરિતઃ પરં કોઽપ્યસ્માભિ ર્જાતિતો ન પ્રતિજ્ઞાતવ્યઃ। યદ્યપિ પૂર્વ્વં ખ્રીષ્ટો જાતિતોઽસ્માભિઃ પ્રતિજ્ઞાતસ્તથાપીદાનીં
જાતિતઃ પુન ર્ન પ્રતિજ્ઞાયતે।
XVII કેનચિત્ ખ્રીષ્ટ આશ્રિતે નૂતના સૃષ્ટિ ર્ભવતિ પુરાતનાનિ લુપ્યન્તે પશ્ય નિખિલાનિ નવીનાનિ ભવન્તિ।
XVIII સર્વ્વઞ્ચૈતદ્ ઈશ્વરસ્ય કર્મ્મ યતો યીશુખ્રીષ્ટેન સ એવાસ્માન્ સ્વેન સાર્દ્ધં સંહિતવાન્ સન્ધાનસમ્બન્ધીયાં પરિચર્ય્યામ્
અસ્માસુ સમર્પિતવાંશ્ચ।
XIX યતઃ ઈશ્વરઃ ખ્રીષ્ટમ્ અધિષ્ઠાય જગતો જનાનામ્ આગાંસિ તેષામ્ ઋણમિવ ન ગણયન્ સ્વેન સાર્દ્ધં તાન્ સંહિતવાન્
સન્ધિવાર્ત્તામ્ અસ્માસુ સમર્પિતવાંશ્ચ।
XX અતો વયં ખ્રીષ્ટસ્ય વિનિમયેન દૌત્યં કર્મ્મ સમ્પાદયામહે, ઈશ્વરશ્ચાસ્માભિ ર્યુષ્માન્ યાયાચ્યતે તતઃ ખ્રીષ્ટસ્ય વિનિમયેન વયં
યુષ્માન્ પ્રાર્થયામહે યૂયમીશ્વરેણ સન્ધત્ત।
XXI યતો વયં તેન યદ્ ઈશ્વરીયપુણ્યં ભવામસ્તદર્થં પાપેન સહ યસ્ય જ્ઞાતેયં નાસીત્ સ એવ તેનાસ્માકં વિનિમયેન પાપઃ કૃતઃ।

# VI

I તસ્ય સહાયા વયં યુષ્માન્ પ્રાર્થયામહે, ઈશ્વરસ્યાનુગ્રહો યુષ્માભિ ર્વૃથા ન ગૃહ્યતાં।
II તેનોક્તમેતત્, સંશ્રોષ્યામિ શુભે કાલે ત્વદીયાં પ્રાર્થનામ્ અહં। ઉપકારં કરિષ્યામિ પરિત્રાણદિને તવ। પશ્યતાયં શુભકાલઃ
પશ્યતેદં ત્રાણદિનં।
III અસ્માકં પરિચર્ય્યા યન્નિષ્કલઙ્કા ભવેત્ તદર્થં વયં કુત્રાપિ વિઘ્નં ન જનયામઃ,
IV કિન્તુ પ્રચુરસહિષ્ણુતા ક્લેશો દૈન્યં વિપત્ તાડના કારાબન્ધનં નિવાસહીનત્વં પરિશ્રમો જાગરણમ્ ઉપવસનં
V નિર્મ્મલત્વં જ્ઞાનં મૃદુશીલતા હિતૈષિતા
VI પવિત્ર આત્મા નિષ્કપટં પ્રેમ સત્યાલાપ ઈશ્વરીયશક્તિ
VII ર્દક્ષિણવામાભ્યાં કરાભ્યાં ધર્મ્માસ્ત્રધારણં
VIII માનાપમાનયોરખ્યાતિસુખ્યાત્યો ર્ભાગિત્વમ્ એતૈઃ સર્વ્વૈરીશ્વરસ્ય પ્રશંસ્યાન્ પરિચારકાન્ સ્વાન્ પ્રકાશયામઃ।
IX ભ્રમકસમા વયં સત્યવાદિનો ભવામઃ, અપરિચિતસમા વયં સુપરિચિતા ભવામઃ, મૃતકલ્પા વયં જીવામઃ, દણ્ડ્યમાના વયં ન
હન્યામહે,

X શોકયુક્તાશ્ચ વયં સદાનન્દામઃ, દરિદ્રા વયં બહૂન્ ધનિનઃ કુર્મ્મઃ, અકિઞ્ચનાશ્ચ વયં સર્વ્વં ધારયામઃ।
XI હે કરિન્થિનઃ, યુષ્માકં પ્રતિ મમાસ્યં મુક્તં મમાન્તઃકરણાઞ્ચ વિકસિતં।
XII યૂયં મમાન્તરે ન સઙ્કોચિતાઃ કિઞ્ચ યૂયમેવ સઙ્કોચિતચિત્તાઃ।
XIII કિન્તુ મહ્યં ન્યાય્યફલદાનાર્થં યુષ્માભિરપિ વિકસિતૈ ર્ભવિતવ્યમ્ ઇત્યહં નિજબાલકાનિવ યુષ્માન્ વદામિ।
XIV અપરમ્ અપ્રત્યયિભિઃ સાર્દ્ધં યૂયમ્ એકયુગે બદ્ધા મા ભૂત, યસ્માદ્ ધર્મ્માધર્મ્મયોઃ કઃ સમ્બન્ધોઽસ્તિ? તિમિરેણ સર્દ્ધં
પ્રભાયા વા કા તુલનાસ્તિ?
XV બિલીયાલદેવેન સાકં ખ્રીષ્ટસ્ય વા કા સન્ધિઃ? અવિશ્વાસિના સાર્દ્ધં વા વિશ્વાસિલોકસ્યાંશઃ કઃ?
XVI ઈશ્વરસ્ય મન્દિરેણ સહ વા દેવપ્રતિમાનાં કા તુલના? અમરસ્યેશ્વરસ્ય મન્દિરં યૂયમેવ। ઈશ્વરેણ તદુક્તં યથા, તેષાં મધ્યેઽહં
સ્વાવાસં નિધાસ્યામિ તેષાં મધ્યે ચ યાતાયાતં કુર્વ્વન્ તેષામ્ ઈશ્વરો ભવિષ્યામિ તે ચ મલ્લોકા ભવિષ્યન્તિ।
XVII અતો હેતોઃ પરમેશ્વરઃ કથયતિ યૂયં તેષાં મધ્યાદ્ બહિર્ભૂય પૃથગ્ ભવત, કિમપ્યમેધ્યં ન સ્પૃશત; તેનાહં યુષ્માન્ ગ્રહીષ્યામિ,
XVIII યુષ્માકં પિતા ભવિષ્યામિ ચ, યૂયઞ્ચ મમ કન્યાપુત્રા ભવિષ્યથેતિ સર્વ્વશક્તિમતા પરમેશ્વરેણોક્તં।

# VII

I અતએવ હે પ્રિયતમાઃ, એતાદૃશીઃ પ્રતિજ્ઞાઃ પ્રાપ્તૈરસ્માભિઃ શરીરાત્મનોઃ સર્વ્વમાલિન્યમ્ અપમૃજ્યેશ્વરસ્ય ભક્ત્યા પવિત્રાચારઃ
સાધ્યતાં।
II યૂયમ્ અસ્માન્ ગૃહ્લીત। અસ્માભિઃ કસ્યાપ્યન્યાયો ન કૃતઃ કોઽપિ ન વઞ્ચિતઃ।
III યુષ્માન્ દોષિણઃ કર્ત્તમહં વાક્યમેતદ્ વદામીતિ નહિ યુષ્માભિઃ સહ જીવનાય મરણાય વા વયં યુષ્માન્ સ્વાન્તઃકરણૈ ર્ધારયામ
ઇતિ પૂર્વ્વં મયોક્તં।
IV યુષ્માન્ પ્રતિ મમ મહેત્સાહો જાયતે યુષ્માન્ અધ્યહં બહુ શ્લાઘે ચ તેન સર્વ્વક્લેશસમયેઽહં સાન્ત્વનયા પૂર્ણો હર્ષેણ
પ્રફુલ્લિતશ્ચ ભવામિ।
V અસ્માસુ માકિદનિયાદેશમ્ આગતેષ્વસ્માકં શરીરસ્ય કાચિદપિ શાન્તિ ર્નાભવત્ કિન્તુ સર્વ્વતો બહિ ર્વિરોધેનાન્તશ્ચ ભીત્યા
વયમ્ અપીડ્યામહિ।
VI કિન્તુ નમ્રાણાં સાન્ત્વયિતા ય ઈશ્વરઃ સ તીતસ્યાગમનેનાસ્માન્ અસાન્ત્વયત્।
VII કેવલં તસ્યાગમનેન તન્નહિ કિન્તુ યુષ્મત્તો જાતયા તસ્ય સાન્ત્વનયાપિ, યતોઽસ્માસુ યુષ્માકં હાર્દ્દવિલાપાસક્તત્વેષ્વસ્માકં
સમીપે વર્ણિતેષુ મમ મહાનન્દો જાતઃ।
VIII અહં પત્રેણ યુષ્માન્ શોકયુક્તાન્ કૃતવાન્ ઇત્યસ્માદ્ અન્વતપ્યે કિન્ત્વધુના નાનુતપ્યે। તેન પત્રેણ યૂયં ક્ષણમાત્રં
શોકયુક્તીભૂતા ઇતિ મયા દૃશ્યતે।
IX ઇત્યસ્મિન્ યુષ્માકં શોકેનાહં હૃષ્યામિ તન્નહિ કિન્તુ મનઃપરિવર્ત્તનાય યુષ્માકં શોકોઽભવદ્ ઇત્યનેન હૃષ્યામિ યતોઽસ્મત્તો
યુષ્માકં કાપિ હાનિ ર્યન્ન ભવેત્ તદર્થં યુષ્માકમ્ ઈશ્વરીયઃ શોકો જાતઃ।
X સ ઈશ્વરીયઃ શોકઃ પરિત્રાણજનકં નિરનુતાપં મનઃપરિવર્ત્તનં સાધયતિ કિન્તુ સાંસારિકઃ શોકો મૃત્યું સાધયતિ।
XI પશ્યત તેનેશ્વરીયેણ શોકેન યુષ્માકં કિં ન સાધિતં? યત્નો દોષપ્રક્ષાલનમ્ અસન્તુષ્ટત્વં હાર્દ્દમ્ આસક્તત્વં ફલદાનઞ્ચૈતાનિ
સર્વ્વાણિ। તસ્મિન્ કર્મ્મણિ યૂયં નિર્મ્મલા ઇતિ પ્રમાણં સર્વ્વેણ પ્રકારેણ યુષ્માભિ ર્દત્તં।
XII યેનાપરાદ્ધં તસ્ય કૃતે કિંવા યસ્યાપરાદ્ધં તસ્ય કૃતે મયા પત્રમ્ અલેખિ તન્નહિ કિન્તુ યુષ્માનધ્યસ્માકં યત્નો યદ્ ઈશ્વરસ્ય
સાક્ષાદ્ યુષ્મત્સમીપે પ્રકાશેત તદર્થમેવ।
XIII ઉક્તકારણાદ્ વયં સાન્ત્વનાં પ્રાપ્તાઃ; તાઞ્ચ સાન્ત્વનાં વિનાવરો મહાહ્લાદસ્તીતસ્યાહ્લાદાદસ્માભિ ર્લબ્ધઃ, યતસ્તસ્યાત્મા
સર્વ્વૈ ર્યુષ્માભિસ્તૃપ્તઃ।
XIV પૂર્વ્વં તસ્ય સમીપેઽહં યુષ્માભિર્યદ્ અશ્લાઘે તેન નાલજ્જે કિન્તુ વયં યદ્વદ્ યુષ્માન્ પ્રતિ સત્યભાવેન સકલમ્ અભાષામહિ
તદ્વત્ તીતસ્ય સમીપેઽસ્માકં શ્લાઘનમપિ સત્યં જાતં।
XV યૂયં કીદૃક્ તસ્યાજ્ઞા અપાલયત ભયકમ્પાભ્યાં તં ગૃહીતવન્તશ્ચૈતસ્ય સ્મરણાદ્ યુષ્માસુ તસ્ય સ્નેહો બાહુલ્યેન વર્ત્તતે।
XVI યુષ્માસ્વહં સર્વ્વમાશંસે, ઇત્યસ્મિન્ મમાહ્લાદો જાયતે।

# VIII

I હે ભ્રાતરઃ, માકિદનિયાદેશસ્થાસુ સમિતિષુ પ્રકાશિતો ય ઈશ્વરસ્યાનુગ્રહસ્તમહં યુષ્માન્ જ્ઞાપયામિ।
II વસ્તુતો બહુક્લેશપરીક્ષાસમયે તેષાં મહાનન્દોઽતીવદીનતા ચ વદાન્યતાયાઃ પ્રચુરફલમ્ અફલયતાં।
III તે સ્વેચ્છયા યથાશક્તિ કિઞ્ચાતિશક્તિ દાન ઉદ્યુક્તા અભવન્ ઇતિ મયા પ્રમાણીક્રિયતે।
IV વયઞ્ચ યત્ પવિત્રલોકેભ્યસ્તેષાં દાનમ્ ઉપકારાર્થકમ્ અંશનઞ્ચ ગૃહ્લામસ્તદ્ બહુનુનયેનાસ્માન્ પ્રાર્થિતવન્તઃ।
V વયં યાદૃક્ પ્રત્યૈક્ષામહિ તાદૃગ્ અકૃત્વા તેઽગ્રે પ્રભવે તતઃ પરમ્ ઈશ્વરસ્યેચ્છયાસ્મભ્યમપિ સ્વાન્ ન્યવેદયન્।
VI અતો હેતોસ્ત્વં યથારબ્ધવાન્ તથૈવ કરિન્થિનાં મધ્યેઽપિ તદ્ દાનગ્રહણં સાધયેતિ યુષ્માન્ અધિ વયં તીતં પ્રાર્થયામહિ।
VII અતો વિશ્વાસો વાક્પટુતા જ્ઞાનં સર્વ્વોત્સાહો ઽસ્માસુ પ્રેમ ચૈતૈ ર્ગુણૈ ર્યૂયં યથાપરાન્ અતિશેધ્વે તથૈવૈતેન ગુણેનાપ્યતિશેધ્વં।
VIII એતદ્ અહમ્ આજ્ઞયા કથયામીતિ નહિ કિન્ત્વન્યેષામ્ ઉત્સાહકારણાદ્ યુષ્માકમપિ પ્રેમ્નઃ સારલ્યં પરીક્ષિતુમિચ્છતા મયૈતત્
કથ્યતે।
IX યૂયઞ્ચાસ્મત્પ્રભો ર્યીશુખ્રીષ્ટસ્યાનુગ્રહં જાનીથ યતસ્તસ્ય નિર્ધનત્વેન યૂયં યદ્ ધનિનો ભવથ તદર્થં સ ધની સન્નપિ યુષ્મત્કૃતે
નિર્ધનોઽભવત્।
X એતસ્મિન્ અહં યુષ્માન્ સ્વવિચારં જ્ઞાપયામિ। ગતં સંવત્સરમ્ આરભ્ય યૂયં કેવલં કર્મ્મ કર્ત્તં તન્નહિ કિન્ત્વિચ્છુકતાં
પ્રકાશયિતુમપ્યુપાક્રાભ્યધ્વં તતો હેતો ર્યુષ્મત્કૃતે મમ મન્ત્રણા ભદ્રા।

XI અતો ઽધુના તત્કર્મ્મસાધનં યુષ્માભિઃ ક્રિયતાં તેન યદ્વદ્ ઇચ્છુકતાયામ્ ઉત્સાહસ્તદ્વદ્ એકૈકસ્ય સમ્પદનુસારેણ કર્મ્મસાધનમ્
અપિ જનિષ્યતે।
XII યસ્મિન્ ઇચ્છુકતા વિદ્યતે તેન યન્ન ધાર્ય્યતે તસ્માત્ સોઽનુગૃહ્યત ઇતિ નહિ કિન્તુ યદ્ ધાર્ય્યતે તસ્માદેવ।
XIII યત ઇતરેષાં વિરામેણ યુષ્માકઞ્ચ ક્લેશેન ભવિતવ્યં તન્નહિ કિન્તુ સમતયૈવ।
XIV વર્ત્તમાનસમયે યુષ્માકં ધનાધિક્યેન તેષાં ધનન્યૂનતા પૂરયિતવ્યા તસ્માત્ તેષામપ્યાધિક્યેન યુષ્માકં ન્યૂનતા પૂરયિષ્યતે તેન
સમતા જનિષ્યતે।
XV તદેવ શાસ્ત્રેઽપિ લિખિતમ્ આસ્તે યથા, યેનાધિકં સંગૃહીતં તસ્યાધિકં નાભવત્ યેન ચાલ્પં સંગૃહીતં તસ્યાલ્પં નાભવત્।
XVI યુષ્માકં હિતાય તીતસ્ય મનસિ ય ઈશ્વર ઇમમ્ ઉદ્યોગં જનિતવાન્ સ ધન્યો ભવતુ।
XVII તીતોઽસ્માકં પ્રાર્થનાં ગૃહીતવાન્ કિઞ્ચ સ્વયમ્ ઉદ્યુક્તઃ સન્ સ્વેચ્છયા યુષ્મત્સમીપં ગતવાન્।
XVIII તેન સહ યોઽપર એકો ભ્રાતાસ્માભિઃ પ્રેષિતઃ સુસંવાદાત્ તસ્ય સુખ્યાત્યા સર્વ્વાઃ સમિતયો વ્યાપ્તાઃ।
XIX પ્રભો ર્ગૌરવાય યુષ્માકમ્ ઇચ્છુકતાયૈ ચ સ સમિતિભિરેતસ્યૈ દાનસેવાયૈ અસ્માકં સઙ્ગિત્વે ન્યયોજ્યત।
XX યતો યા મહોપાયનસેવાસ્માભિ ર્વિધીયતે તામધિ વયં યત્ કેનાપિ ન નિન્દ્યામહે તદર્થં યતામહે।
XXI યતઃ કેવલં પ્રભોઃ સાક્ષાત્ તન્નહિ કિન્તુ માનવાનામપિ સાક્ષાત્ સદાચારં કર્ત્તુમ્ આલોચામહે।
XXII તાભ્યાં સહાપર એકો યો ભ્રાતાસ્માભિઃ પ્રેષિતઃ સોઽસ્માભિ ર્બહુવિષયેષુ બહવારાન્ પરીક્ષિત ઉદ્યોગીવ પ્રકાશિતશ્ચ
કિન્ત્વધુના યુષ્માસુ દૃઢવિશ્વાસાત્ તસ્યોત્સાહો બહુ વવૃધે।
XXIII યદિ કશ્ચિત્ તીતસ્ય તત્ત્વં જિજ્ઞાસતે તર્હિ સ મમ સહભાગી યુષ્મન્મધ્યે સહકારી ચ, અપરયો ર્ભ્રાત્રોસ્તત્ત્વં વા યદિ
જિજ્ઞાસતે તર્હિ તૌ સમિતીનાં દૂતૌ ખ્રીષ્ટસ્ય પ્રતિબિમ્બૌ ચેતિ તેન જ્ઞાયતાં।
XXIV અતો હેતોઃ સમિતીનાં સમક્ષં યુષ્મત્પ્રેમ્નોઽસ્માકં શ્લાઘાયાશ્ચ પ્રામાણ્યં તાન્ પ્રતિ યુષ્માભિઃ પ્રકાશયિતવ્યં।

# IX

I પવિત્રલોકાનામ્ ઉપકારાર્થકસેવામધિ યુષ્માન્ પ્રતિ મમ લિખનં નિષ્પ્રયોજનં।
II યત આખાયાદેશસ્થા લોકા ગતવર્ષમ્ આરભ્ય તત્કાર્ય્ય ઉદ્યતાઃ સન્તીતિ વાક્યેનાહં માકિદનીયલોકાનાં સમીપે યુષ્માકં યામ્
ઇચ્છુકતામધિ શ્લાઘે તામ્ અવગતોઽસ્મિ યુષ્માકં તસ્માદ્ ઉત્સાહાચ્ચાપરેષાં બહૂનામ્ ઉદ્યોગો જાતઃ।
III કિઞ્ચૈતસ્મિન્ યુષ્માન્ અધ્યસ્માકં શ્લાઘા યદ્ અતથ્યા ન ભવેત્ યૂયઞ્ચ મમ વાક્યાનુસારાદ્ યદ્ ઉદ્યતાસ્તિષ્ઠેત તદર્થમેવ તે
ભ્રાતરો મયા પ્રેષિતાઃ।
IV યસ્માત્ મયા સાર્દ્ધં કૈશ્ચિત્ માકિદનીયભ્રાતૃભિરાગત્ય યૂયમનુદ્યતા ઇતિ યદિ દૃશ્યતે તર્હિ તસ્માદ્ દૃઢવિશ્વાસાદ્ યુષ્માકં
લજ્જા જનિષ્યત ઇત્યસ્માભિ ર્ન વક્તવ્યં કિન્ત્વસ્માકમેવ લજ્જા જનિષ્યતે।
V અતઃ પ્રાક્ પ્રતિજ્ઞાતં યુષ્માકં દાનં યત્ સઞ્ચિતં ભવેત્ તચ્ચ યદ્ ગ્રાહકતાયાઃ ફલમ્ અભૂત્વા દાનશીલતાયા એવ ફલં ભવેત્
તદર્થં મમાગ્રે ગમનાય તત્સઞ્ચયનાય ચ તાન્ ભ્રાતૃન્ આદેષ્ટુમહં પ્રયોજનમ્ અમન્યે।
VI અપરમપિ વ્યાહરામિ કેનચિત્ ક્ષુદ્રભાવેન બીજેષૂપ્તેષુ સ્વલ્પાનિ શસ્યાનિ કર્ત્તિષ્યન્તે, કિઞ્ચ કેનચિદ્ બહુદભવેન બીજેષૂપ્તેષુ
બહૂનિ શસ્યાનિ કર્ત્તિષ્યન્તે।
VII એકૈકેન સ્વમનસિ યથા નિશ્ચીયતે તથૈવ દીયતાં કેનાપિ કાતરેણ ભીતેન વા ન દીયતાં યત ઈશ્વરો હૃષ્ટમાનસે દાતરિ પ્રીયતે।
VIII અપરમ્ ઈશ્વરો યુષ્માન્ પ્રતિ સર્વ્વવિધં બહુપ્રદં પ્રસાદં પ્રકાશયિતુમ્ અર્હતિ તેન યૂયં સર્વ્વવિષયે યથેષ્ટં પ્રાપ્ય સર્વ્વેણ
સત્કર્મ્મણા બહુફલવન્તો ભવિષ્યથ।
IX એતસ્મિન્ લિખિતમાસ્તે, યથા, વ્યયતે સ જનો રાયં દુર્ગતેભ્યો દદાતિ ચ। નિત્યસ્થાયી ચ તદ્ધર્મ્મઃ
X બીજં ભેજનીયમ્ અન્નઞ્ચ વપ્ત્રે યેન વિશ્રાણ્યતે સ યુષ્મભ્યમ્ અપિ બીજં વિશ્રાણ્ય બહુલીકરિષ્યતિ યુષ્માકં ધર્મ્મફલાનિ
વર્દ્ધયિષ્યતિ ચ।
XI તેન સર્વ્વવિષયે સધનીભૂતૈ ર્યુષ્માભિઃ સર્વ્વવિષયે દાનશીલતાયાં પ્રકાશિતાયામ્ અસ્માભિરીશ્વરસ્ય ધન્યવાદઃ સાધયિષ્યતે।
XII એતયોપકારસેવયા પવિત્રલોકાનામ્ અર્થાભાવસ્ય પ્રતીકારો જાયત ઇતિ કેવલં નહિ કિન્ત્વીશ્વરસ્ય ધન્યવાદોઽપિ
બાહુલ્યેનોત્પાદ્યતે।
XIII યત એતસ્માદ્ ઉપકારકરણાદ્ યુષ્માકં પરીક્ષિતત્વં બુદ્ધ્વા બહુભિઃ ખ્રીષ્ટસુસંવાદાઙ્ગીકરણે યુષ્માકમ્ આજ્ઞાગ્રાહિત્વાત્
તદ્ભાગિત્વે ચ તાન્ અપરાંશ્ચ પ્રતિ યુષ્માકં દાતૃત્વાદ્ ઈશ્વરસ્ય ધન્યવાદઃ કારિષ્યતે,
XIV યુષ્મદર્થં પ્રાર્થનાં કૃત્વા ચ યુષ્માસ્વીશ્વરસ્ય ગરિષ્ઠાનુગ્રહાદ્ યુષ્માસુ તૈઃ પ્રેમ કારિષ્યતે।
XV અપરમ્ ઈશ્વરસ્યાનિર્વ્વચનીયદાનાત્ સ ધન્યો ભૂયાત્।

# X

I યુષ્મત્પ્રત્યક્ષે નમ્રઃ કિન્તુ પરોક્ષે પ્રગલ્ભઃ પૌલોઽહં ખ્રીષ્ટસ્ય ક્ષાન્ત્યા વિનીત્યા ચ યુષ્માન્ પ્રાર્થયે।
II મમ પ્રાર્થનીયમિદં વયં યૈઃ શારીરિકાચારિણો મન્યામહે તાન્ પ્રતિ યાં પ્રગલ્ભતાં પ્રકાશયિતું નિશ્ચિનોમિ સા પ્રગલ્ભતા સમાગતેન
મયાચરિતવ્યા ન ભવતુ।
III યતઃ શરીરે ચરન્તોઽપિ વયં શારીરિકં યુદ્ધં ન કુર્મ્મઃ।
IV અસ્માકં યુદ્ધાસ્ત્રાણિ ચ ન શારીરિકાનિ કિન્ત્વીશ્વરેણ દુર્ગભઞ્જનાય પ્રબલાનિ ભવન્તિ,
V તૈશ્ચ વયં વિતર્કાન્ ઈશ્વરીયતત્ત્વજ્ઞાનસ્ય પ્રતિબન્ધિકાં સર્વ્વાં ચિત્તસમુન્નતિઞ્ચ નિપાતયામઃ સર્વ્વસઙ્કલ્પઞ્ચ બન્દિનં કૃત્વા
ખ્રીષ્ટસ્યાજ્ઞાગ્રાહિણં કુર્મ્મઃ,
VI યુષ્માકમ્ આજ્ઞાગ્રાહિત્વે સિદ્ધે સતિ સર્વ્વસ્યાજ્ઞાલઙ્ઘનસ્ય પ્રતીકારં કર્ત્તુમ્ ઉદ્યતા આસ્મહે ચ।

VII યદ્ દૃષ્ટિગોચરં તદ્ યુષ્માભિ ર્દૃશ્યતાં| અહં ખ્રીષ્ટસ્ય લોક ઇતિ સ્વમનસિ યેન વિજ્ઞાયતે સ યથા ખ્રીષ્ટસ્ય ભવતિ વયમ્ અપિ તથા ખ્રીષ્ટસ્ય ભવામ ઇતિ પુનર્વિવિચ્ય તેન બુધ્યતાં|

VIII યુષ્માકં નિપાતાય તન્નહિ કિન્તુ નિષ્ઠાયૈ પ્રભુના દત્તં યદસ્માકં સામર્થ્યં તેન યદ્યપિ કિઞ્ચિદ્ અધિકં શ્લાઘે તથાપિ તસ્માન્ન ત્રપિષ્યે|

IX અહં પત્રૈ ર્યુષ્માન્ ત્રાસયામિ યુષ્માભિરેતન્ન મન્યતાં|

X તસ્ય પત્રાણિ ગુરુતરાણિ પ્રબલાનિ ચ ભવન્તિ કિન્તુ તસ્ય શારીરસાક્ષાત્કારો દુર્બ્બલ આલાપશ્ચ તુચ્છનીય ઇતિ કૈશ્ચિદ્ ઉચ્યતે|

XI કિન્તુ પરોક્ષે પત્રૈ ર્ભાષમાણા વયં યાદૃશાઃ પ્રકાશામહે પ્રત્યક્ષે કર્મ્મ કુર્વ્વન્તોઽપિ તાદૃશા એવ પ્રકાશિષ્યામહે તત્ તાદૃશેન વાચાલેન જ્ઞાયતાં|

XII સ્વપ્રશંસકાનાં કેષાઞ્ચિન્મધ્યે સ્વાન્ ગણયિતું તૈઃ સ્વાન્ ઉપમાતું વા વયં પ્રગલ્ભા ન ભવામઃ, યતસ્તે સ્વપરિમાણેન સ્વાન્ પરિમિમતે સ્વૈશ્ચ સ્વાન્ ઉપમિભતે તસ્માત્ નિર્બ્બોધા ભવન્તિ ચ|

XIII વયમ્ અપરિમિતેન ન શ્લાઘિષ્યામહે કિન્ત્વીશ્વરેણ સ્વરજ્જ્વા યુષ્મદ્દેશગામિ યત્ પરિમાણમ્ અસ્મદર્થં નિરૂપિતં તેનૈવ શ્લાઘિષ્યામહે|

XIV યુષ્માકં દેશોઽસ્માભિરગન્તવ્યસ્તસ્માદ્ વયં સ્વસીમામ્ ઉલ્લઙ્ઘામહે તન્નહિ યતઃ ખ્રીષ્ટસ્ય સુસંવાદેનાપરેષાં પ્રાગ્ વયમેવ યુષ્માન્ પ્રાપ્તવન્તઃ|

XV વયં સ્વસીમામ્ ઉલ્લઙ્ઘ્ય પરક્ષેત્રેણ શ્લાઘામહે તન્નહિ, કિઞ્ચ યુષ્માકં વિશ્વાસે વૃદ્ધિં ગતે યુષ્મદ્દેશેઽસ્માકં સીમા યુષ્માભિર્દીર્ઘં વિસ્તારયિષ્યતે,

XVI તેન વયં યુષ્માકં પશ્ચિમદિક્સ્થેષુ સ્થાનેષુ સુસંવાદં ઘોષયિષ્યામઃ, ઇત્થં પરસીમાયાં પરેણ યત્ પરિષ્કૃતં તેન ન શ્લાઘિષ્યામહે|

XVII યઃ કશ્ચિત્ શ્લાઘમાનઃ સ્યાત્ શ્લાઘતાં પ્રભુના સ હિ|

XVIII સ્વેન યઃ પ્રશંસ્યતે સ પરીક્ષિતો નહિ કિન્તુ પ્રભુના યઃ પ્રશંસ્યતે સ એવ પરીક્ષિતઃ|

# XI

I યૂયં મમાજ્ઞાનતાં ક્ષણં યાવત્ સોઢુમ્ અર્હથ, અતઃ સા યુષ્માભિઃ સહ્યતાં|

II ઈશ્વરે મમાસક્તત્વાદ્ અહં યુષ્માનધિ તપે યસ્માત્ સતીં કન્યામિવ યુષ્માન્ એકસ્મિન્ વરેઽર્થતઃ ખ્રીષ્ટે સમર્પયિતુમ્ અહં વાગ્દાનમ્ અકાર્ષં|

III કિન્તુ સર્પેણ સ્વખલતયા યદ્વદ્ હવા વઞ્ચયાઞ્ચકે તદ્વત્ ખ્રીષ્ટં પ્રતિ સતીત્વાદ્ યુષ્માકં ભ્રંશઃ સમ્ભવિષ્યતીતિ બિભેમિ|

IV અસ્માભિરનાખ્યાપિતોઽપરઃ કશ્ચિદ્ યીશુ ર્યદિ કેનચિદ્ આગન્તુકેનાખ્યાપ્યતે યુષ્માભિઃ પ્રાગલબ્ધ આત્મા વા યદિ લભ્યતે પ્રાગગૃહીતઃ સુસંવાદો વા યદિ ગૃહ્યતે તર્હિ મન્યે યૂયં સમ્યક્ સહિષ્યધ્વે|

V કિન્તુ મુખ્યેભ્યઃ પ્રેરિતેભ્યોઽહં કેનચિત્ પ્રકારેણ ન્યૂનો નાસ્મીતિ બુધ્યે|

VI મમ વાક્પટુતાયા ન્યૂનત્વે સત્યપિ જ્ઞાનસ્ય ન્યૂનત્વં નાસ્તિ કિન્તુ સર્વ્વવિષયે વયં યુષ્મદ્ગોચરે પ્રકાશામહે|

VII યુષ્માકમ્ ઉન્નત્યૈ મયા નમ્રતાં સ્વીકૃત્યેશ્વરસ્ય સુસંવાદો વિના વેતનં યુષ્માકં મધ્યે યદ્ અઘોષ્યત તેન મયા કિં પાપમ્ અકારિ?

VIII યુષ્માકં સેવનાયાહમ્ અન્યસમિતિભ્યો ભૃતિ ગૃહ્લન્ ધનમપહૃતવાન્,

IX યદા ચ યુષ્મન્મધ્યેઽવર્ત્તે તદા મમાર્થાભાવે જાતે યુષ્માકં કોઽપિ મયા ન પીડિતઃ; યતો મમ સોઽર્થાભાવો માકિદનિયાદેશાદ્ આગતૈ ર્ભ્રાતૃભિ ર્ન્યવાર્ય્યત, ઇત્થમહં ક્કાપિ વિષયે યથા યુષ્માસુ ભારો ન ભવામિ તથા મયાત્મરક્ષા કૃતા કર્ત્તવ્યા ચ|

X ખ્રીષ્ટસ્ય સત્યતા યદિ મયિ તિષ્ઠતિ તર્હિ મમૈષા શ્લાઘા નિખિલાખાયાદેશે કેનાપિ ન રોત્સ્યતે|

XI એતસ્ય કારણં કિં? યુષ્માસુ મમ પ્રેમ નાસ્ત્યેતત્ કિં તત્કારણં? તદ્ ઈશ્વરો વેત્તિ|

XII યે છિદ્રમન્વિષ્યન્તિ તે યત્ કિમપિ છિદ્રં ન લભન્તે તદર્થમેવ તત્ કર્મ્મ મયા ક્રિયતે કારિષ્યતે ચ તસ્માત્ તે યેન શ્લાઘન્તે તેનાસ્માકં સમાના ભવિષ્યન્તિ|

XIII તાદૃશા ભાક્તપ્રેરિતાઃ પ્રવઞ્ચકાઃ કારવો ભૂત્વા ખ્રીષ્ટસ્ય પ્રેરિતાનાં વેશં ધારયન્તિ|

XIV તચ્ચાશ્ચર્ય્યં નહિ; યતઃ સ્વયં શયતાનપિ તેજસ્વિદૂતસ્ય વેશં ધારયતિ,

XV તતસ્તસ્ય પરિચારકા અપિ ધર્મ્મપરિચારકાણાં વેશં ધારયન્તીત્યદ્ભુતં નહિ; કિન્તુ તેષાં કર્મ્માણિ યાદૃશાનિ ફલાન્યપિ તાદૃશાનિ ભવિષ્યન્તિ|

XVI અહં પુન ર્વદામિ કોઽપિ માં નિર્બ્બોધં ન મન્યતાં કિઞ્ચ યદ્યપિ નિર્બ્બોધો ભવેયં તથાપિ યૂયં નિર્બ્બોધમિવ મામનુગૃહ્ય ક્ષણૈકં યાવત્ મમાત્મશ્લાઘામ્ અનુજાનીત|

XVII એતસ્યાઃ શ્લાઘાયા નિમિત્તં મયા યત્ કથિતવ્યં તત્ પ્રભુનાદિષ્ટેનેવ કથ્યતે તન્નહિ કિન્તુ નિર્બ્બોધેનેવ|

XVIII અપરે બહવઃ શારીરિકશ્લાઘાં કુર્વ્વતે તસ્માદ્ અહમપિ શ્લાઘિષ્યે|

XIX બુદ્ધિમન્તો યૂયં સુખેન નિર્બ્બોધાનામ્ આચારં સહધ્વે|

XX કોઽપિ યદિ યુષ્માન્ દાસાન્ કરોતિ યદિ વા યુષ્માકં સર્વ્વસ્વં ગ્રસતિ યદિ વા યુષ્માન્ હરતિ યદિ વાત્માભિમાની ભવતિ યદિ વા યુષ્માકં કપોલમ્ આહન્તિ તર્હિ તદપિ યૂયં સહધ્વે|

XXI દૌર્બ્બલ્યાદ્ યુષ્માભિરવમાનિતા ઇવ વયં ભાષામહે, કિન્ત્વપરસ્ય કસ્યચિદ્ યેન પ્રગલ્ભતા જાયતે તેન મમાપિ પ્રગલ્ભતા જાયત ઇતિ નિર્બ્બોધેનેવ મયા વક્તવ્યં|

XXII તે કિમ્ ઇબ્રિલોકાઃ? અહમપીબ્રી| તે કિમ્ ઇસ્રાયેલીયાઃ? અહમપીસ્રાયેલીયઃ| તે કિમ્ ઇબ્રાહીમો વંશાઃ? અહમપીબ્રાહીમો વંશઃ|

XXIII તે કિં ખ્રીષ્ટસ્ય પરિચારકાઃ? અહં તેભ્યોઽપિ તસ્ય મહાપરિચારકઃ; કિન્તુ નિર્બ્બોધ ઇવ ભાષે, તેભ્યોઽપ્યહં બહુપરિશ્રમે બહુપ્રહારે બહુવારં કારાયાં બહુવારં પ્રાણનાશસંશયે ચ પતિતવાન્|

XXIV યિહૂદીયૈરહં પઞ્ચકૃત્વ ઊનચત્વારિંશત્પ્રહારૈરાહતસ્ત્રિર્વેત્રાઘાતમ્ એકકૃત્વઃ પ્રસ્તરાઘાતઞ્ચ પ્રપ્તવાન્।
XXV વારત્રયં પોતભઞ્જનેન ક્લિષ્ટોઽહમ્ અગાધસલિલે દિનમેકં રાત્રિમેકાઞ્ચ યાપિતવાન્।
XXVI બહુવારં યાત્રાભિ ર્નદીનાં સઙ્કટૈ ર્દસ્યૂનાં સઙ્કટૈઃ સ્વજાતીયાનાં સઙ્કટૈ ર્ભિન્નજાતીયાનાં સઙ્કટૈ ર્નગરસ્ય સઙ્કટૈ ર્મરુભૂમેઃ સઙ્કટૈ સાગરસ્ય સઙ્કટૈ ર્ભાક્તભ્રાતૃણાં સઙ્કટૈશ્ચ
XXVII પરિશ્રમક્લેશાભ્યાં વારં વારં જાગરણેન ક્ષુધાતૃષ્ણાભ્યાં બહુવારં નિરાહારેણ શીતનગ્નતાભ્યાઞ્ચાહં કાલં યાપિતવાન્।
XXVIII તાદૃશં નૈમિત્તિકં દુઃખં વિનાહં પ્રતિદિનમ્ આકુલો ભવામિ સર્વ્વાસાં સમિતીનાં ચિન્તા ચ મયિ વર્ત્તતે।
XXIX યેનાહં ન દુર્બ્બલીભવામિ તાદૃશં દૌર્બ્બલ્યં કઃ પાપ્નોતિ?
XXX યદિ મયા શ્લાઘિતવ્યં તર્હિ સ્વદુર્બ્બલતામધિ શ્લાઘિષ્યે।
XXXI મયા મૃષાવાક્યં ન કથ્યત ઇતિ નિત્યં પ્રશંસનીયોઽસ્માકં પ્રભો ર્યીશુખ્રીષ્ટસ્ય તાત ઈશ્વરો જાનાતિ।
XXXII દમ્મેષકનગરેઽરિતારાજસ્ય કાર્ય્યાધ્યક્ષો માં ધર્ત્તુમ્ ઇચ્છન્ યદા સૈન્યૈસ્તદ્ દમ્મેષકનગરમ્ અરક્ષયત્
XXXIII તદાહં લોકૈઃ પિટકમધ્યે પ્રાચીરગવાક્ષેણાવરોહિતસ્તસ્ય કરાત્ ત્રાણં પ્રાપં।

# XII

I આત્મશ્લાઘા મમાનુપયુક્તા કિન્ત્વહં પ્રભો ર્દર્શનાદેશાનામ્ આખ્યાનં કથયિતું પ્રવર્ત્તે।
II ઇતશ્ચતુર્દશવત્સરેભ્યઃ પૂર્વ્વં મયા પરિચિત એકો જનસ્તૃતીયં સ્વર્ગમનીયત, સ સશરીરેણ નિઃશરીરેણ વા તત્ સ્થાનમનીયત તદહં ન જાનામિ કિન્ત્વીશ્વરો જાનાતિ।
III સ માનવઃ સ્વર્ગં નીતઃ સન્ અકથ્યાનિ મર્ત્ત્યવાગતીતાનિ ચ વાક્યાનિ શ્રુતવાન્।
IV કિન્તુ તદાનીં સ સશરીરો નિઃશરીરો વાસીત્ તન્મયા ન જ્ઞાયતે તદ્ ઈશ્વરેણૈવ જ્ઞાયતે।
V તમધ્યહં શ્લાઘિષ્યે મામધિ નાન્યેન કેનચિદ્ વિષયેણ શ્લાઘિષ્યે કેવલં સ્વદૌર્બ્બલ્યેન શ્લાઘિષ્યે।
VI યદ્યહમ્ આત્મશ્લાઘાં કર્ત્તુમ્ ઇચ્છેયં તથાપિ નિર્બ્બોધ ઇવ ન ભવિષ્યામિ યતઃ સત્યમેવ કથયિષ્યામિ, કિન્તુ લોકા માં યાદૃશં પશ્યન્તિ મમ વાક્યં શ્રુત્વા વા યાદૃશં માં મન્યતે તસ્માત્ શ્રેષ્ઠં માં યન્ન ગણયન્તિ તદર્થમહં તતો વિરંસ્યામિ।
VII અપરમ્ ઉત્કૃષ્ટદર્શનપ્રાપ્તિતો યદહમ્ આત્માભિમાની ન ભવામિ તદર્થં શરીરવેધકમ્ એકં શૂલં મહ્યમ્ અદાયિ તત્ મદીયાત્માભિમાનનિવારણાર્થં મમ તાડયિતા શયતાનો દૂતઃ।
VIII મત્તસ્તસ્ય પ્રસ્થાનં યાચિતુમહં ત્રિસ્તમધિ પ્રભુમુદ્દિશ્ય પ્રાર્થનાં કૃતવાન્।
IX તતઃ સ મામુક્તવાન્ મમાનુગ્રહસ્તવ સર્વ્વસાધકઃ, યતો દૌર્બ્બલ્યાત્ મમ શક્તિઃ પૂર્ણતાં ગચ્છતીતિ। અતઃ ખ્રીષ્ટસ્ય શક્તિ ર્યન્મામ્ આશ્રયતિ તદર્થં સ્વદૌર્બ્બલ્યેન મમ શ્લાઘનં સુખદં।
X તસ્માત્ ખ્રીષ્ટહેતો ર્દૌર્બ્બલ્યનિન્દાદરિદ્રતાવિપક્ષતાકષ્ટાદિષુ સન્તુષ્યામ્યહં। યદાહં દુર્બ્બલોઽસ્મિ તદૈવ સબલો ભવામિ।
XI એતેનાત્મશ્લાઘનેનાહં નિર્બ્બોધ ઇવાભવં કિન્તુ યૂયં તસ્ય કારણં યતો મમ પ્રશંસા યુષ્માભિરેવ કર્ત્તવ્યાસીત્। યદ્યપ્યમ્ અગણ્યો ભવેયં તથાપિ મુખ્યતમેભ્યઃ પ્રેરિતેભ્યઃ કેનાપિ પ્રકારેણ નાહં ન્યૂનોઽસ્મિ।
XII સર્વ્વથાદ્ભુતક્રિયાશક્તિલક્ષણૈઃ પ્રેરિતસ્ય ચિહ્નાનિ યુષ્માકં મધ્યે સધૈર્ય્યં મયા પ્રકાશિતાનિ।
XIII મમ પાલનાર્થં યૂયં મયા ભારાક્રાન્તા નાભવતૈતદ્ એકં ન્યૂનત્વં વિનાપરાભ્યઃ સમિતિભ્યો યુષ્માકં કિં ન્યૂનત્વં જાતં? અનેન મમ દોષં ક્ષમધ્વં।
XIV પશ્યત તૃતીયવારં યુ ષ્મત્સમીપં ગન્તુમુદ્યતોઽસ્મિ તત્રાપ્યહં યુષ્માન્ ભારાક્રાન્તાન્ ન કરિષ્યામિ। યુષ્માકં સમ્પત્તિમહં ન મૃગયે કિન્તુ યુષ્માનેવ, યતઃ પિત્રોઃ કૃતે સન્તાનાનાં ધનસઞ્ચયોઽનુપયુક્તઃ કિન્તુ સન્તાનાનાં કૃતે પિત્રો ર્ધનસઞ્ચય ઉપયુક્તઃ।
XV અપરઞ્ચ યુષ્માસુ બહુ પ્રીયમાણોઽપ્યહં યદિ યુષ્મત્તોઽલ્પં પ્રમ લભે તથાપિ યુષ્માકં પ્રાણરક્ષાર્થં સાનન્દં બહુ વ્યયં સર્વ્વવ્યયઞ્ચ કરિષ્યામિ।
XVI યૂયં મયા કિઞ્ચિદપિ ન ભારાક્રાન્તા ઇતિ સત્યં, કિન્ત્વહં ધૂર્ત્તઃ સન્ છલેન યુષ્માન્ વઞ્ચિતવાન્ એતત્ કિં કેનચિદ્ વક્તવ્યં?
XVII યુષ્મત્સમીપં મયા યે લોકાઃ પ્રહિતાસ્તેષામેકેન કિં મમ કોઽપ્યર્થલાભો જાતઃ?
XVIII અહં તીતં વિનીય તેન સાર્દ્ધં ભ્રાતરમેકં પ્રેષિતવાન્ યુષ્મત્તસ્તીતેન કિમ્ અર્થો લબ્ધઃ? એકસ્મિન્ ભાવ એકસ્ય પદચિહ્નેષુ ચાવાં કિં ન ચરિતવન્તૌ?
XIX યુષ્માકં સમીપે વયં પુન ર્દોષક્ષાલનકથાં કથયામ ઇતિ કિં બુધ્યધ્વે? હે પ્રિયતમાઃ, યુષ્માકં નિષ્ઠાર્થં વયમીશ્વરસ્ય સમક્ષં ખ્રીષ્ટેન સર્વ્વાણ્યેતાનિ કથયામઃ।
XX અહં યદાગમિષ્યામિ, તદા યુષ્માન્ યાદૃશાન્ દ્રષ્ટું નેચ્છામિ તાદૃશાન્ દ્રક્ષ્યામિ, યૂયમપિ માં યાદૃશં દ્રષ્ટું નેચ્છથ તાદૃશં દ્રક્ષ્યથ, યુષ્મન્મધ્યે વિવાદ ઈર્ષ્યા ક્રોધો વિપક્ષતા પરાપવાદઃ કર્ણેજપનં દર્પઃ કલહશ્ચૈતે ભવિષ્યન્તિ;
XXI તેનાહં યુષ્મત્સમીપં પુનરાગત્ય મદીયેશ્વરેણ નમયિષ્યે, પૂર્વ્વં કૃતપાપાન્ લોકાન્ સ્વીયાશુચિતાવેશ્યાગમનલમ્પટતાચરણાદ્ અનુતાપમ્ અકૃતવન્તો દૃષ્ટ્વા ચ તાનધિ મમ શોકો જનિષ્યત ઇતિ બિભેમિ।

# XIII

I એતત્તૃતીયવારમ્ અહં યુષ્મત્સમીપં ગચ્છામિ તેન સર્વ્વા કથા દ્વયોસ્ત્રયાણાં વા સાક્ષિણાં મુખેન નિશ્ચેષ્યતે।
II પૂર્વ્વં યે કૃતપાપાસ્તેભ્યોઽન્યેભ્યશ્ચ સર્વ્વેભ્યો મયા પૂર્વ્વં કથિતં, પુનરપિ વિદ્યમાનેનેવેદાનીમ્ અવિદ્યમાનેન મયા કથ્યતે, યદા પુનરાગમિષ્યામિ તદાહં ન ક્ષમિષ્યે।
III ખ્રીષ્ટો મયા કથાં કથયત્યેતસ્ય પ્રમાણં યૂયં મૃગયધ્વે, સ તુ યુષ્માન્ પ્રતિ દુર્બ્બલો નહિ કિન્તુ સબલ એવ।
IV યદ્યપિ સ દુર્બ્બલતયા ક્રુશ આરોપ્યત તથાપીશ્વરીયશક્તયા જીવતિ; વયમપિ તસ્મિન્ દુર્બ્બલા ભવામઃ, તથાપિ યુષ્માન્ પ્રતિ પ્રકાશિતયેશ્વરીયશક્ત્યા તેન સહ જીવિષ્યામઃ।

V અતો યૂયં વિશ્વાસયુક્તા આધ્વે ન વેતિ જ્ઞાતુમાત્મપરીક્ષાં કુરુધ્વં સ્વાનેવાનુસન્ધત્ત। યીશુઃ ખ્રીષ્ટો યુષ્મન્મધ્યે વિદ્યતે સ્વાનધિ
તત્ કિં ન પ્રતિજાનીથ? તસ્મિન્ અવિદ્યમાને યૂયં નિષ્પ્રમાણા ભવથ།
VI કિન્તુ વયં નિષ્પ્રમાણા ન ભવામ ઇતિ યુષ્માભિ ર્ભોત્સ્યતે તત્ર મમ પ્રત્યાશા જાયતે།
VII યૂયં કિમપિ કુત્સિતં કર્મ્મ યન્ન કુરુથ તદહમ્ ઈશ્વરમુદ્દિશ્ય પ્રાર્થયે। વયં યત્ પ્રામાણિકા ઇવ પ્રકાશામહે તદર્થં તત્ પ્રાર્થયામહ
ઇતિ નહિ, કિન્તુ યૂયં યત્ સદાચારં કુરુથ વયઞ્ચ નિષ્પ્રમાણા ઇવ ભવામસ્તદર્થં།
VIII યતઃ સત્યતાયા વિપક્ષતાં કર્ત્તું વયં ન સમર્થાઃ કિન્તુ સત્યતાયાઃ સાહાય્યં કર્ત્તુમેવ།
IX વયં યદા દુર્બ્બલા ભવામસ્તદા યુષ્માન્ સબલાન્ દૃષ્ટ્વાનન્દામો યુષ્માકં સિદ્ધત્વં પ્રાર્થયામહે ચ།
X અતો હેતોઃ પ્રભુ ર્યુષ્માકં વિનાશાય નહિ કિન્તુ નિષ્ઠાયૈ યત્ સામર્થ્યમ્ અસ્મભ્યં દત્તવાન્ તેન યદ્ ઉપસ્થિતિકાલે કાઠિન્યં
મયાચરિતવ્યં ન ભવેત્ તદર્થમ્ અનુપસ્થિતેન મયા સર્વ્વાણ્યેતાનિ લિખ્યન્તે།
XI હે ભ્રાતરઃ, શેષે વદામિ યૂયમ્ આનન્દત સિદ્ધા ભવત પરસ્પરં પ્રબોધયત, એકમનસો ભવત પ્રણયભાવમ્ આચરત།
પ્રેમશાન્ત્યોરાકર ઈશ્વરો યુષ્માકં સહાયો ભૂયાત્།
XII યૂયં પવિત્રચુમ્બનેન પરસ્પરં નમસ્કુરુધ્વં།
XIII પવિત્રલોકાઃ સર્વ્વે યુષ્માન્ નમન્તિ།
XIV પ્રભો ર્યીશુખ્રીષ્ટસ્યાનુગ્રહ ઈશ્વરસ્ય પ્રેમ પવિત્રસ્યાત્મનો ભાગિત્વઞ્ચ સર્વ્વાન્ યુષ્માન્ પ્રતિ ભૂયાત્། તથાસ્તુ།

# ગાલાતિનઃ પત્રં

I મનુષ્યેભ્યો નહિ મનુષ્યૈરપિ નહિ કિન્તુ યીશુખ્રીષ્ટેન મૃતગણમધ્યાત્ તસ્યોત્થાપયિત્રા પિત્રેશ્વરેણ ચ પ્રેરિતો યોઽહં પૌલઃ સોઽહં
II મત્સહવર્ત્તિનો ભ્રાતરશ્ચ વયં ગાલાતીયદેશસ્થાઃ સમિતીઃ પ્રતિ પત્રં લિખામઃ।
III પિત્રેશ્વરેણાસ્માંક પ્રભુના યીશુના ખ્રીષ્ટેન ચ યુષ્મભ્યમ્ અનુગ્રહઃ શાન્તિશ્ચ દીયતાં।
IV અસ્માકં તાતેશ્વરેસ્યેચ્છાનુસારેણ વર્ત્તમાનાત્ કુત્સિતસંસારાદ્ અસ્માન્ નિસ્તારયિતું યો
V યીશુરસ્માકં પાપહેતોરાત્મોત્સર્ગં કૃતવાન્ સ સર્વ્વદા ધન્યો ભૂયાત્। તથાસ્તુ।
VI ખ્રીષ્ટસ્યાનુગ્રહેણ યો યુષ્માન્ આહૂતવાન્ તસ્માન્નિવૃત્ય યૂયમ્ અતિતૂર્ણમ્ અન્યં સુસંવાદમ્ અન્વવર્ત્તત તત્રાહં વિસ્મયં મન્યે।
VII સોઽન્યસુસંવાદઃ સુસંવાદો નહિ કિન્તુ કેચિત્ માનવા યુષ્માન્ ચઞ્ચલીકુર્વ્વન્તિ ખ્રીષ્ટીયસુસંવાદસ્ય વિપર્ય્યયં કર્ત્તું ચેષ્ટન્તે ચ।
VIII યુષ્માકં સન્નિધૌ યઃ સુસંવાદોઽસ્માભિ ર્ઘોષિતસ્તસ્માદ્ અન્યઃ સુસંવાદોઽસ્માકં સ્વર્ગીયદૂતાનાં વા મધ્યે કેનચિદ્ યદિ ઘોષ્યતે
તર્હિ સ શપ્તો ભવતુ।
IX પૂર્વ્વં યદ્વદ્ અકથયામ, ઇદાનીમહં પુનસ્તદ્વત્ કથયામિ યૂયં યં સુસંવાદં ગૃહીતવન્તસ્તસ્માદ્ અન્યો યેન કેનચિદ્ યુષ્મત્સન્નિધૌ
ઘોષ્યતે સ શપ્તો ભવતુ।
X સામ્પ્રતં કમહમ્ અનુનયામિ? ઈશ્વરં કિંવા માનવાન્? અહં કિં માનુષેભ્યો રોચિતું યતે? યદ્યહમ્ ઇદાનીમપિ માનુષેભ્યો
રુરુચિષેય તર્હિ ખ્રીષ્ટસ્ય પરિચારકો ન ભવામિ।
XI હે ભ્રાતરઃ, મયા યઃ સુસંવાદો ઘોષિતઃ સ માનુષાન્ન લબ્ધસ્તદહં યુષ્માન્ જ્ઞાપયામિ।
XII અહં કસ્માચ્ચિત્ મનુષ્યાત્ તં ન ગૃહીતવાન્ ન વા શિક્ષિતવાન્ કેવલં યીશોઃ ખ્રીષ્ટસ્ય પ્રકાશનાદેવ।
XIII પુરા યિહૂદિમતાચારી યદાહમ્ આસં તદા યાદૃશમ્ આચરણમ્ અકરવમ્ ઈશ્વરસ્ય સમિતિં પ્રત્યતીવોપદ્રવં કુર્વ્વન્ યાદૃક્ તાં
વ્યનાશયં તદવશ્યં શ્રુતં યુષ્માભિઃ।
XIV અપરઞ્ચ પૂર્વ્વપુરુષપરમ્પરાગતેષુ વાક્યેષ્વન્યાપેક્ષાતીવાસક્તઃ સન્ અહં યિહૂદિધર્મ્મતે મમ સમવયસ્કાન્ બહૂન્
સ્વજાતીયાન્ અત્યશયિ।
XV કિન્તુ ય ઈશ્વરો માતૃગર્ભસ્થં માં પૃથક્ કૃત્વા સ્વીયાનુગ્રહેણાહૂતવાન્
XVI સ યદા મયિ સ્વપુત્રં પ્રકાશિતું ભિન્નદેશીયાનાં સમીપે ભયા તં ઘોષયિતુઞ્ચાભ્યલષત્ તદાહં ક્રવ્યશોણિતાભ્યાં સહ ન
મન્ત્રયિત્વા
XVII પૂર્વ્વનિયુક્તાનાં પ્રેરિતાનાં સમીપં યિરૂશાલમં ન ગત્વારવદેશં ગતવાન્ પશ્ચાત્ તત્સ્થાનાદ્ દમ્મેષકનગરં પરાવૃત્યાગતવાન્।
XVIII તતઃ પરં વર્ષત્રયે વ્યતીતેઽહં પિતરં સમ્ભાષિતું યિરૂશાલમં ગત્વા પઞ્ચદશદિનાનિ તેન સાર્દ્ધમ્ અતિષ્ઠં।
XIX કિન્તુ તં પ્રભો ર્ભ્રાતરં યાકૂબઞ્ચ વિના પ્રેરિતાનાં નાન્યં કમપ્યપશ્યં।
XX યાન્યેતાનિ વાક્યાનિ મયા લિખ્યન્તે તાન્યનૃતાનિ ન સન્તિ તદ્ ઈશ્વરો જાનાતિ।
XXI તતઃ પરમ્ અહં સુરિયાં કિલિકિયાઞ્ચ દેશૌ ગતવાન્।
XXII તદાનીં યિહૂદાદેશસ્થાનાં ખ્રીષ્ટસ્ય સમિતીનાં લોકાઃ સાક્ષાત્ મમ પરિચયમપ્રાપ્ય કેવલં જનશ્રુતિમિમાં લબ્ધવન્તઃ,
XXIII યો જનઃ પૂર્વ્વમ્ અસ્માન્ પ્રત્યુપદ્રવમકરોત્ સ તદા યં ધર્મ્મમનાશયત્ તમેવેદાનીં પ્રચારયતીતિ।
XXIV તસ્માત્ તે મામધીશ્વરં ધન્યમવદન્।

# II

I અનન્તરં ચતુર્દશસુ વત્સરેષુ ગતેષ્વહં બર્ણબ્બા સહ યિરૂશાલમનગરં પુનરગચ્છં, તદાનીં તીતમપિ સ્વસઙ્ગિનમ્ અકરવં।
II તત્કાલેઽહમ્ ઈશ્વરદર્શનાદ્ યાત્રામ્ અકરવં મયા યઃ પરિશ્રમોઽકારિ કારિષ્યતે વા સ યન્નિષ્ફલો ન ભવેત્ તદર્થં ભિન્નજાતીયાનાં
મધ્યે મયા ઘોષ્યમાણઃ સુસંવાદસ્તત્રત્યેભ્યો લોકેભ્યો વિશેષતો માન્યેભ્યો નરેભ્યો મયા ન્યવેદ્યત।
III તતો મમ સહચરસ્તીતો યદ્યપિ યૂનાનીય આસીત્ તથાપિ તસ્ય ત્વક્છેદોઽપ્યાવશ્યકો ન બભૂવ।
IV યતશ્છલેનાગતા અસ્માન્ દાસાન્ કર્ત્તુમ્ ઇચ્છવઃ કતિપયા ભાક્તભ્રાતરઃ ખ્રીષ્ટેન યીશુનાસ્મભ્યં દત્તં સ્વાતન્ત્ર્યમ્ અનુસન્ધાતું
ચારા ઇવ સમાજં પ્રાવિશન્।
V અતઃ પ્રકૃતે સુસંવાદે યુષ્માકમ્ અધિકારો યત્ તિષ્ઠેત્ તદર્થં વયં દણ્ડૈકમપિ યાવદ્ આજ્ઞાગ્રહણેન તેષાં વશ્યા નાભવામ।
VI પરન્તુ યે લોકા માન્યાસ્તે યે કેચિદ્ ભવેયુસ્તાનહં ન ગણયામિ યત ઈશ્વરઃ કસ્યાપિ માનવસ્ય પક્ષપાતં ન કરોતિ, યે ચ
માન્યાસ્તે માં કિમપિ નવીનં નાજ્ઞાપયન્।
VII કિન્તુ છિન્નત્વચાં મધ્યે સુસંવાદપ્રચારણસ્ય ભારઃ પિતરિ યથા સમર્પિતસ્તથૈવાચ્છિન્નત્વચાં મધ્યે સુસંવાદપ્રચારણસ્ય ભારો
મયિ સમર્પિત ઇતિ તૈ ર્બુબુધે।
VIII યતશ્છિન્નત્વચાં મધ્યે પ્રેરિતત્વકર્મ્મણે યસ્ય યા શક્તિઃ પિતરમાશ્રિતવતી તસ્યૈવ સા શક્તિ ર્ભિન્નજાતીયાનાં મધ્યે તસ્મૈ
કર્મ્મણે મામપ્યાશ્રિતવતી।
IX અતો મહ્યં દત્તમ્ અનુગ્રહં પ્રતિજ્ઞાય સ્તમ્ભા ઇવ ગણિતા યે યાકૂબ્ કૈફા યોહન્ ચૈતે સહાયતાસૂચકં દક્ષિણહસ્તગ્રહણં વિધાય
માં બર્ણબ્બાઞ્ચ જગદુઃ, યુવાં ભિન્નજાતીયાનાં સન્નિધિં ગચ્છતં વયં છિન્નત્વચાં સન્નિધિં ગચ્છામઃ,
X કેવલં દરિદ્રા યુવાભ્યાં સ્મરણીયા ઇતિ। અતસ્તદેવ કર્ત્તુમ્ અહં યતે સ્મ।
XI અપરમ્ આન્તિયખિયાનગરં પિતર આગતેઽહં તસ્ય દોષિત્વાત્ સમક્ષં તમ્ અભર્ત્સયં।
XII યતઃ સ પૂર્વ્વમ્ અન્યજાતીયૈઃ સાર્દ્ધમ્ આહારમકરોત્ તતઃ પરં યાકૂબઃ સમીપાત્ કતિપયજનેષ્વાગતેષુ સ છિન્નત્વઙ્મનુષ્યેભ્યો
ભયેન નિવૃત્ય પૃથગ્ અભવત્।

XIII તતોઽપરે સર્વ્વે યિહૂદિનોઽપિ તેન સાર્દ્ધં કપટાચારમ્ અકુર્વ્વન્ બર્ણબ્બા અપિ તેષાં કાપટ્યેન વિપથગામ્યભવત્|
XIV તતસ્તે પ્રકૃતસુસંવાદરૂપે સરલપથે ન ચરન્તીતિ દૃષ્ટ્વાહં સર્વ્વેષાં સાક્ષાત્ પિતરમ્ ઉક્તવાન્ ત્વં યિહૂદી સન્ યદિ યિહૂદિમતં
વિહાય ભિન્નજાતીય ઇવાચરસિ તર્હિ યિહૂદિમતાચરણાય ભિન્નજાતીયાન્ કુતઃ પ્રવર્ત્તયસિ?
XV આવાં જન્મના યિહૂદિનૌ ભવાવો ભિન્નજાતીયૌ પાપિનૌ ન ભવાવઃ
XVI કિન્તુ વ્યવસ્થાપાલનેન મનુષ્યઃ સપુણ્યો ન ભવતિ કેવલં યીશૌ ખ્રીષ્ટે યો વિશ્વાસસ્તેનૈવ સપુણ્યો ભવતીતિ બુદ્ધ્વાવામપિ
વ્યવસ્થાપાલનં વિના કેવલં ખ્રીષ્ટે વિશ્વાસેન પુણ્યપ્રાપ્તયે ખ્રીષ્ટે યીશૌ વ્યશ્વસિવ યતો વ્યવસ્થાપાલનેન કોઽપિ માનવઃ પુણ્યં પ્રાપ્તું
ન શક્નોતિ|
XVII પરન્તુ યીશુના પુણ્યપ્રાપ્તયે યતમાનાવપ્યાવાં યદિ પાપિનૌ ભવાવસ્તર્હિ કિં વક્તવ્યં? ખ્રીષ્ટઃ પાપસ્ય પરિચારક ઇતિ? તન્ન
ભવતુ|
XVIII મયા યદ્ ભગ્નં તદ્ યદિ મયા પુનર્નિર્મ્મીયતે તર્હિ મયૈવાત્મદોષઃ પ્રકાશ્યતે|
XIX અહં યદ્ ઈશ્વરાય જીવામિ તદર્થં વ્યવસ્થયા વ્યવસ્થાયૈ અમ્રિયે|
XX ખ્રીષ્ટેન સાર્દ્ધં ક્રુશે હતોઽસ્મિ તથાપિ જીવામિ કિન્ત્વહં જીવામીતિ નહિ ખ્રીષ્ટ એવ મદન્ત ર્જીવતિ| સામ્પ્રતં સશરીરેણ મયા
યજ્જીવિતં ધાર્ય્યતે તત્ મમ દયાકારિણિ મદર્થં સ્વીયપ્રાણત્યાગિનિ ચેશ્વરપુત્રે વિશ્વસતા મયા ધાર્ય્યતે|
XXI અહમીશ્વરસ્યાનુગ્રહં નાવજાનામિ યસ્માદ્ વ્યવસ્થયા યદિ પુણ્યં ભવતિ તર્હિ ખ્રીષ્ટો નિરર્થકમમ્રિયત|

# III

I હે નિર્બ્બોધા ગાલાતિલોકાઃ, યુષ્માકં મધ્યે ક્રુશે હત ઇવ યીશુઃ ખ્રીષ્ટો યુષ્માકં સમક્ષં પ્રકાશિત આસીત્ અતો યૂયં યથા સત્યં
વાક્યં ન ગૃહ્લીથ તથા કેનામુહ્યત?
II અહં યુષ્મત્તઃ કથામેકાં જિજ્ઞાસે યૂયમ્ આત્માનં કેનાલભધ્વં? વ્યવસ્થાપાલનેન કિં વા વિશ્વાસવાક્યસ્ય શ્રવણેન?
III યૂયં કિમ્ ઈદૃગ્ અબોધા યદ્ આત્મના કર્મ્મારભ્ય શરીરેણ તત્ સાધયિતું યતધ્વે?
IV તર્હિ યુષ્માકં ગુરુતરો દુઃખભોગઃ કિં નિષ્ફલો ભવિષ્યતિ? કુફલયુક્તો વા કિં ભવિષ્યતિ?
V યો યુષ્મભ્યમ્ આત્માનં દત્તવાન્ યુષ્મન્મધ્ય આશ્ચર્ય્યાણિ કર્મ્માણિ ચ સાધિતવાન્ સ કિં વ્યવસ્થાપાલનેન વિશ્વાસવાક્યસ્ય
શ્રવણેન વા તત્ કૃતવાન્?
VI લિખિતમાસ્તે, ઇબ્રાહીમ ઈશ્વરે વ્યશ્વસીત્ સ ચ વિશ્વાસસ્તસ્મૈ પુણ્યાર્થં ગણિતો બભૂવ,
VII અતો યે વિશ્વાસાશ્રિતાસ્ત એવેબ્રાહીમઃ સન્તાના ઇતિ યુષ્માભિ ર્જ્ઞાયતાં|
VIII ઈશ્વરો ભિન્નજાતીયાન્ વિશ્વાસેન સપુણ્યીકરિષ્યતીતિ પૂર્વ્વં જ્ઞાત્વા શાસ્ત્રદાતા પૂર્વ્વમ્ ઇબ્રાહીમં સુસંવાદં શ્રાવયન જગાદ,
ત્વત્તો ભિન્નજાતીયાઃ સર્વ્વ આશિષં પ્રાપ્સ્યન્તીતિ|
IX અતો યે વિશ્વાસાશ્રિતાસ્તે વિશ્વાસિનેબ્રાહીમા સાર્દ્ધમ્ આશિષં લભન્તે|
X યાવન્તો લોકા વ્યવસ્થાયાઃ કર્મ્મણ્યાશ્રયન્તિ તે સર્વ્વે શાપાધીના ભવન્તિ યતો લિખિતમાસ્તે, યથા, "યઃ કશ્ચિદ્ એતસ્ય
વ્યવસ્થાગ્રન્થસ્ય સર્વ્વવાક્યાનિ નિશ્છિદ્રં ન પાલયતિ સ શપ્ત ઇતિ| "
XI ઈશ્વરસ્ય સાક્ષાત્ કોઽપિ વ્યવસ્થયા સપુણ્યો ન ભવતિ તદ વ્યક્તં યતઃ "પુણ્યવાન્ માનવો વિશ્વાસેન જીવિષ્યતીતિ"
શાસ્ત્રીયં વચઃ|
XII વ્યવસ્થા તુ વિશ્વાસસમ્બન્ધિની ન ભવતિ કિન્ત્વેતાનિ યઃ પાલયિષ્યતિ સ એવ તૈ ર્જીવિષ્યતીતિનિયમસમ્બન્ધિની|
XIII ખ્રીષ્ટોઽસ્માન્ પરિક્રીય વ્યવસ્થાયાઃ શાપાત્ મોચિતવાન્ યતોઽસ્માકં વિનિમયેન સ સ્વયં શાપાસ્પદમભવત્ તદધિ
લિખિતમાસ્તે, યથા, "યઃ કશ્ચિત્ તરાવુલ્લમ્બ્યતે સોઽભિશપ્ત ઇતિ| "
XIV તસ્માદ્ ખ્રીષ્ટેન યીશુનેવ્રાહીમ આશી ર્ભિન્નજાતીયલોકેષુ વર્ત્તતે તેન વયં પ્રતિજ્ઞાતમ્ આત્માનં વિશ્વાસેન લબ્ધું શક્નુમઃ|
XV હે ભ્રાતૃગણ માનુષાણાં રીત્યનુસારેણાહં કથયામિ કેનચિત્ માનવેન યો નિયમો નિરચાયિ તસ્ય વિકૃતિ ર્વૃદ્ધિ ર્વા કેનાપિ ન
ક્રિયતે|
XVI પરન્ત્વિબ્રાહીમે તસ્ય સન્તાનાય ચ પ્રતિજ્ઞાઃ પ્રતિ શુશ્રુવિરે તત્ર સન્તાનશબ્દં બહુવચનાન્તમ્ અભૂત્વા તવ
સન્તાનાયેત્યેકવચનાન્તં બભૂવ સ ચ સન્તાનઃ ખ્રીષ્ટ એવ|
XVII અતએવાહં વદામિ, ઈશ્વરેણ યો નિયમઃ પુરા ખ્રીષ્ટમધિ નિરચાયિ તતઃ પરં ત્રિંશદધિકચતુઃશતવત્સરેષુ ગતેષુ સ્થાપિતા
વ્યવસ્થા તં નિયમં નિરર્થકીકૃત્ય તદીયપ્રતિજ્ઞા લોપ્તું ન શક્નોતિ|
XVIII યસ્માત્ સમ્પદધિકારો યદિ વ્યવસ્થયા ભવતિ તર્હિ પ્રતિજ્ઞયા ન ભવતિ કિન્ત્વીશ્વરઃ પ્રતિજ્ઞયા તદધિકારિત્વમ્ ઇબ્રાહીમે
ઽદદાત્|
XIX તર્હિ વ્યવસ્થા કિમ્ભૂતા? પ્રતિજ્ઞા યસ્મૈ પ્રતિશ્રુતા તસ્ય સન્તાનસ્યાગમનં યાવદ્ વ્યભિચારનિવારણાર્થં વ્યવસ્થાપિ દત્તા,
સા ચ દૂતૈરાજ્ઞાપિતા મધ્યસ્થસ્ય કરે સમર્પિતા ચ|
XX નૈકસ્ય મધ્યસ્થો વિદ્યતે કિન્ત્વીશ્વર એક એવ|
XXI તર્હિ વ્યવસ્થા કિમ્ ઈશ્વરસ્ય પ્રતિજ્ઞાનાં વિરુદ્ધા? તન્ન ભવતુ| યસ્માદ્ યદિ સા વ્યવસ્થા જીવનદાનેસમર્થાભવિષ્યત્ તર્હિ
વ્યવસ્થયૈવ પુણ્યલાભોઽભવિષ્યત્|
XXII કિન્તુ યીશુખ્રીષ્ટે યો વિશ્વાસસ્તત્સમ્બન્ધિયાઃ પ્રતિજ્ઞાયાઃ ફલં યદ્ વિશ્વાસિલોકેભ્યો દીયતે તદર્થં શાસ્ત્રદાતા સર્વ્વાન્
પાપાધીનાન્ ગણયતિ|
XXIII અતએવ વિશ્વાસસ્યાનાગતસમયે વયં વ્યવસ્થાધીનાઃ સન્તો વિશ્વાસસ્યોદયં યાવદ્ રુદ્ધા ઇવારક્ષ્યામહે|
XXIV ઇત્થં વયં યદ્ વિશ્વાસેન સપુણ્યીભવામસ્તદર્થં ખ્રીષ્ટસ્ય સમીપમ્ અસ્માન્ નેતું વ્યવસ્થાગ્રથોઽસ્માકં વિનેતા બભૂવ|
XXV કિન્ત્વધુનાગતે વિશ્વાસે વયં તસ્ય વિનેતુરનધીના અભવામ|
XXVI ખ્રીષ્ટે યીશૌ વિશ્વસનાત્ સર્વ્વે યૂયમ્ ઈશ્વરસ્ય સન્તાના જાતાઃ|

XXVII યૂયં યાવન્તો લોકાઃ ખ્રીષ્ટે મજ્જિતા અભવત સર્વ્વે ખ્રીષ્ટં પરિહિતવન્તઃ।
XXVIII અતો યુષ્મન્મધ્યે યિહૂદિયૂનાનિનો ર્દાસસ્વતન્ત્રયો ર્યોષાપુરુષયોશ્ચ કોઽપિ વિશેષો નાસ્તિ; સર્વ્વે યૂયં ખ્રીષ્ટે યીશાવેક
એવ।
XXIX કિઞ્ચ યૂયં યદિ ખ્રીષ્ટસ્ય ભવથ તર્હિ સુતરામ્ ઇબ્રાહીમઃ સન્તાનાઃ પ્રતિજ્ઞયા સમ્પદધિકારિણશ્ચાધ્વે।

# IV

I અહં વદામિ સમ્પદધિકારી યાવદ્ બાલસ્તિષ્ઠતિ તાવત્ સર્વ્વસ્વસ્યાધિપતિઃ સન્નપિ સ દાસાત્ કેનાપિ વિષયેણ ન વિશિષ્યતે
II કિન્તુ પિત્રા નિરૂપિતં સમયં યાવત્ પાલકાનાં ધનાધ્યક્ષાણાઞ્ચ નિઘ્નસ્તિષ્ઠતિ।
III તદ્વદ્ વયમપિ બાલ્યકાલે દાસા ઇવ સંસારસ્યાક્ષરમાલાયા અધીના આસ્મહે।
IV અનન્તરં સમયે સમ્પૂર્ણતાં ગતવતિ વ્યવસ્થાધીનાનાં મોચનાર્થમ્
V અસ્માકં પુત્રત્વપ્રાપ્ત્યર્થઞ્ચેશ્વરઃ સ્ત્રિયા જાતં વ્યવસ્થાયા અધિનીભૂતઞ્ચ સ્વપુત્રં પ્રેષિતવાન્।
VI યૂયં સન્તાના અભવત તત્કારણાદ્ ઈશ્વરઃ સ્વપુત્રસ્યાત્માનાં યુષ્માકમ્ અન્તઃકરણાનિ પ્રહિતવાન્ સ ચાત્મા પિતઃ
પિતરિત્યાહ્વાનં કારયતિ।
VII અત ઇદાનીં યૂયં ન દાસાઃ કિન્તુઃ સન્તાના એવ તસ્માત્ સન્તાનત્વાચ્ચ ખ્રીષ્ટેનેશ્વરીયસમ્પદધિકારિણોઽપ્યાધ્વે।
VIII અપરઞ્ચ પૂર્વ્વં યૂયમ્ ઈશ્વરં ન જ્ઞાત્વા યે સ્વભાવતોઽનીશ્વરાસ્તેષાં દાસત્વેઽતિષ્ઠત।
IX ઇદાનીમ્ ઈશ્વરં જ્ઞાત્વા યદિ વેશ્વરેણ જ્ઞાતા યૂયં કથં પુનસ્તાનિ વિફલાનિ તુચ્છાનિ ચાક્ષરાણિ પ્રતિ પરાવર્ત્તિતું શક્નુથ? યૂયં
કિં પુનસ્તેષાં દાસા ભવિતુમિચ્છથ?
X યૂયં દિવસાન્ માસાન્ તિથીન્ સંવત્સરાંશ્ચ સમ્મન્યધ્વે।
XI યુષ્મદર્થં મયા યઃ પરિશ્રમોઽકારિ સ વિફલો જાત ઇતિ યુષ્માનધ્યહં બિભેમિ।
XII હે ભ્રાતરઃ, અહં યાદૃશોઽસ્મિ યૂયમપિ તાદૃશા ભવતેતિ પ્રાર્થયે યતોઽહમપિ યુષ્મત્તુલ્યોઽભવં યુષ્માભિ ર્મમ કિમપિ નાપરાદ્ધં।
XIII પૂર્વ્વમહં કલેવરસ્ય દૌર્બ્બલ્યેન યુષ્માન્ સુસંવાદમ્ અજ્ઞાપયમિતિ યૂયં જાનીથ।
XIV તદાનીં મમ પરીક્ષકં શારીરક્લેશં દૃષ્ટ્વા યૂયં મામ્ અવજ્ઞાય ઋતીયિતવન્તસ્તન્નહિ કિન્ત્વીશ્વરસ્ય દૂતમિવ સાક્ષાત્ ખ્રીષ્ટ
યીશુમિવ વા માં ગૃહીતવન્તઃ।
XV અતસ્તદાનીં યુષ્માકં યા ધન્યતાભવત્ સા ક્ક ગતા? તદાનીં યૂયં યદિ સ્વેષાં નયનાન્યુત્પાટ્ય મહ્યં દાતુમ્ અશક્ષ્યત તર્હિ
તદપ્યકરિષ્યતેતિ પ્રમાણમ્ અહં દદામિ।
XVI સામ્પ્રતમહં સત્યવાદિત્વાત્ કિં યુષ્માકં રિપુ ર્જાતોઽસ્મિ?
XVII તે યુષ્મત્કૃતે સ્પર્દ્ધન્તે કિન્તુ સા સ્પર્દ્ધા કુત્સિતા યતો યૂયં તાનધિ યત્ સ્પર્દ્ધધ્વં તદર્થં તે યુષ્માન્ પૃથક્ કર્ત્તુમ્ ઇચ્છન્તિ।
XVIII કેવલં યુષ્મત્સમીપે મમોપસ્થિતિસમયે તન્નહિ, કિન્તુ સર્વ્વદૈવ ભદ્રમધિ સ્પર્દ્ધનં ભદ્રં।
XIX હે મમ બાલકાઃ, યુષ્મદન્ત ર્યાવત્ ખ્રીષ્ટો મૂર્તિમાન્ ન ભવતિ તાવદ્ યુષ્મત્કારણાત્ પુનઃ પ્રસવવેદનેવ મમ વેદના જાયતે।
XX અહમિદાનીં યુષ્માકં સન્નિધિં ગત્વા સ્વરાન્તરેણ યુષ્માન્ સમ્ભાષિતું કામયે યતો યુષ્માનધિ વ્યાકુલોઽસ્મિ।
XXI હે વ્યવસ્થાધીનતાકાઙ્ક્ષિણઃ યૂયં કિં વ્યવસ્થાયા વચનં ન ગૃહ્લીથ?
XXII તન્માં વદત। લિખિતમાસ્તે, ઇબ્રાહીમો દ્વૌ પુત્રાવાસાતે તયોરેકો દાસ્યાં દ્વિતીયશ્ચ પત્ન્યાં જાતઃ।
XXIII તયો ર્યો દાસ્યાં જાતઃ સ શારીરિકનિયમેન જજ્ઞે યશ્ચ પત્ન્યાં જાતઃ સ પ્રતિજ્ઞયા જજ્ઞે।
XXIV ઇદમાખ્યાનં દૃષ્ટન્તસ્વરૂપં। તે દ્વે યોષિતાવીશ્વરીયસન્ધી તયોરેકા સીનયપર્વ્વતાદ્ ઉત્પન્ના દાસજનયિત્રી ચ સા તુ હાજિરા।
XXV યસ્માદ્ હાજિરાશબ્દેનારવદેશસ્થસીનયપર્વ્વતો બોધ્યતે, સા ચ વર્ત્તમાનાયા યિરૂશાલમ્પુર્ય્યાઃ સદૃશી। યતઃ સ્વબાલૈઃ
સહિતા સા દાસત્વ આસ્તે।
XXVI કિન્તુ સ્વર્ગીયા યિરૂશાલમ્પુરી પત્ની સર્વ્વેષામ્ અસ્માકં માતા ચાસ્તે।
XXVII યાદૃશં લિખિતમ્ આસ્તે, "વન્ધ્યે સન્તાનહીને ત્વં સ્વરં જયજયં કુરુ। અપ્રસૂતે ત્વયોલ્લાસો જયાશબ્દશ્ચ ગીયતાં। યત
એવ સનાથાયા યોષિતઃ સન્તતે ર્ગણાત્। અનાથા યા ભવેન્નારી તદપત્યાનિ ભૂરિશઃ॥ "
XXVIII હે ભ્રાતૃગણ, ઇમ્હાક્ ઇવ વયં પ્રતિજ્ઞયા જાતાઃ સન્તાનાઃ।
XXIX કિન્તુ તદાનીં શારીરિકનિયમેન જાતઃ પુત્રો યદ્વદ્ આત્મિકનિયમેન જાતં પુત્રમ્ ઉપાદ્રવત્ તથાધુનાપિ।
XXX કિન્તુ શાસ્ત્રે કિં લિખિતં? "ત્વમ્ ઇમાં દાસીં તસ્યાઃ પુત્રઞ્ચાપસારય યત એષ દાસીપુત્રઃ પત્નીપુત્રેણ સમં નોત્તરાધિકારી
ભવિષ્યતીતિ। "
XXXI અતએવ હે ભ્રાતરઃ, વયં દાસ્યાઃ સન્તાના ન ભૂત્વા પાત્ન્યાઃ સન્તાના ભવામઃ।

# V

I ખ્રીષ્ટોઽસ્મભ્યં યત્ સ્વાતન્ત્ર્યં દત્તવાન્ યૂયં તત્ર સ્થિરાસ્તિષ્ઠત દાસત્વયુગેન પુન ર્ન નિબધ્યધ્વં।
II પશ્યતાહં પૌલો યુષ્માન્ વદામિ યદિ છિન્નત્વચો ભવથ તર્હિ ખ્રીષ્ટેન કિમપિ નોપકારિષ્યધ્વે।
III અપરં યઃ કશ્ચિત્ છિન્નત્વગ્ ભવતિ સ કૃત્સ્નવ્યવસ્થાયાઃ પાલનમ્ ઈશ્વરાય ધારયતીતિ પ્રમાણં દદામિ।
IV યુષ્માકં યાવન્તો લોકા વ્યવસ્થયા સપુણ્યીભવિતું ચેષ્ટન્તે તે સર્વ્વે ખ્રીષ્ટાદ્ ભ્રષ્ટા અનુગ્રહાત્ પતિતાશ્ચ।
V યતો વયમ્ આત્મના વિશ્વાસાત્ પુણ્યલાભાશાસિદ્ધં પ્રતીક્ષામહે।
VI ખ્રીષ્ટે યીશૌ ત્વક્છેદાત્વક્છેદયોઃ કિમપિ ગુણં નાસ્તિ કિન્તુ પ્રેમ્ના સફલો વિશ્વાસ એવ ગુણયુક્તઃ।
VII પૂર્વ્વં યૂયં સુન્દરમ્ અધાવત કિન્ત્વિદાનીં કેન બાધાં પ્રાપ્ય સત્યતાં ન ગૃહ્લીથ?
VIII યુષ્માકં સા મતિ ર્યુષ્મદાહ્વાનકારિણ ઈશ્વરાન્ન જાતા।
IX વિકારઃ કૃત્સ્નશક્તૂનાં સ્વલ્પકિણ્વેન જસયતે।

X યુષ્માકં મતિ ર્વિકારં ન ગમિષ્યતીત્યહં યુષ્માનધિ પ્રભુનાશંસે; કિન્તુ યો યુષ્માન્ વિચારલયતિ સ યઃ કશ્ચિદ્ ભવેત્ સમુચિતં દણ્ડં પ્રાપ્સ્યતિ।
XI પરન્તુ હે ભ્રાતરઃ, યદ્યહમ્ ઇદાનીમ્ અપિ ત્વક્છેદં પ્રચારયેયં તર્હિ કુત ઉપદ્રવં ભુઞ્જિય? તત્કૃતે ક્રુશં નિર્બ્બાધમ્ અભવિષ્યત્।
XII યે જના યુષ્માકં ચાઞ્ચલ્યં જનયન્તિ તેષાં છેદનમેવ મયાભિલષ્યતે।
XIII હે ભ્રાતરઃ, યૂયં સ્વાતન્ત્ર્યાર્થમ્ આહૂતા આધ્વે કિન્તુ તત્સ્વાતન્ત્ર્યદ્વારેણ શારીરિકભાવો યુષ્માન્ ન પ્રવિશતુ। યૂયં પ્રેમ્ના પરસ્પરં પરિચર્ય્યાં કુરુધ્વં।
XIV યસ્માત્ ત્વં સમીપવાસિનિ સ્વવત્ પ્રેમ કુર્ય્યા ઇત્યેકાજ્ઞા કૃત્સ્નાયા વ્યવસ્થાયાઃ સારસંગ્રહઃ।
XV કિન્તુ યૂયં યદિ પરસ્પરં દંદશ્યધ્વે ઽશાશ્યધ્વે ચ તર્હિ યુષ્માકમ્ એકોઽન્યેન યન્ન ગ્રસ્યતે તત્ર યુષ્માભિઃ સાવધાનૈ ર્ભવિતવ્યં।
XVI અહં બ્રવીમિ યૂયમ્ આત્મિકાચારં કુરુત શારીરિકાભિલાષં મા પૂરયત।
XVII યતઃ શારીરિકાભિલાષ આત્મનો વિપરીતઃ, આત્મિકાભિલાષશ્ચ શરીરસ્ય વિપરીતઃ, અનયોરુભયોઃ પરસ્પરં વિરોધો વિદ્યતે તેન યુષ્માભિ ર્યદ્ અભિલષ્યતે તન્ન કર્त્તવ્યં।
XVIII યૂયં યદ્યાત્મના વિનીયધ્વે તર્હિ વ્યવસ્થાયા અધીના ન ભવથ।
XIX અપરં પરદારગમનં વેશ્યાગમનમ્ અશુચિતા કામુકતા પ્રતિમાપૂજનમ્
XX ઇન્દ્રજાલં શત્રુત્વં વિવાદોઽન્તર્જ્વલનં ક્રોધઃ કલહોઽનૈક્યં
XXI પાર્થક્યમ્ ઈર્ષ્યા વધો મત્તત્વં લમ્પટત્વમિત્યાદીનિ સ્પષ્ટત્વેન શારીરિકભાવસ્ય કર્મ્માણિ સન્તિ। પૂર્વ્વં યદ્વત્ મયા કથિતં તદ્વત્ પુનરપિ કથ્યતે યે જના એતાદૃશાનિ કર્મ્માણ્યાચરન્તિ તૈરીશ્વરસ્ય રાજ્યેઽધિકારઃ કદાચ ન લપ્સ્યતે।
XXII કિઞ્ચ પ્રેમાનન્દઃ શાન્તિશ્ચિરસહિષ્ણુતા હિતૈષિતા ભદ્રત્વં વિશ્વાસ્યતા તિતિક્ષા
XXIII પરિમિતભોજિત્વમિત્યાદીન્યાત્મનઃ ફલાનિ સન્તિ તેષાં વિરુદ્ધા કાપિ વ્યવસ્થા નહિ।
XXIV યે તુ ખ્રીષ્ટસ્ય લોકાસ્તે રિપુભિરભિલાષૈશ્ચ સહિતં શારીરિકભાવં ક્રુશે નિહતવન્તઃ।
XXV યદિ વયમ્ આત્મના જીવામસ્તર્હ્યાત્મિકાચારોઽસ્માભિઃ કર્त્તવ્યઃ,
XXVI દર્પઃ પરસ્પરં નિર્ભર્ત્સનં દ્વેષશ્ચાસ્માભિ ર્ન કર્त्तવ્યાનિ।

# VI

I હે ભ્રાતરઃ, યુષ્માકં કશ્ચિદ્ યદિ કસ્મિંશ્ચિત્ પાપે પતતિ તર્હ્યાત્મિકભાવયુક્તૈ ર્યુષ્માભિસ્તિતિક્ષાભાવં વિધાય સ પુનરુત્થાપ્યતાં યૂયમપિ યથા તાદૃક્પરીક્ષાયાં ન પતથ તથા સાવધાના ભવત।
II યુષ્માકમ્ એકૈકો જનઃ પરસ્ય ભારં વહત્વનેન પ્રકારેણ ખ્રીષ્ટસ્ય વિધિં પાલયત।
III યદિ કશ્ચન ક્ષુદ્રઃ સન્ સ્વં મહાન્તં મન્યતે તર્હિ તસ્યાત્મવઞ્ચના જાયતે।
IV અત એકૈકેન જનેન સ્વકીયકર્મ્મણઃ પરીક્ષા ક્રિયતાં તેન પરં નાલોક્ય કેવલમ્ આત્માલોકનાત્ તસ્ય શ્લઘા સમ્ભવિષ્યતિ।
V યત એકૈકો ◌ જનઃ સ્વકીયં ભારં વક્ષ્યતિ।
VI યો જનો ધર્મ્મોપદેશં લભતે સ ઉપદેષ્ટારં સ્વીયસર્વ્વસમ્પત્તે ર્ભાગિનં કરોતુ।
VII યુષ્માકં ભ્રાન્તિ ર્ન ભવતુ, ઈશ્વરો નોપહસિતવ્યઃ, યેન યદ્ બીજમ્ ઉપ્યતે તેન તજ્જાતં શસ્યં કર્त્તિષ્યતે।
VIII સ્વશરીરાર્થં યેન બીજમ્ ઉપ્યતે તેન શરીરાદ્ વિનાશરૂપં શસ્યં લપ્સ્યતે કિન્ત્વાત્મનઃ કૃતે યેન બીજમ્ ઉપ્યતે તેનાત્મતોઽનન્તજીવિતરૂપં શસ્યં લપ્સ્યતે।
IX સત્કર્મ્મકરણેઽસ્માભિરશ્રાન્તૈ ર્ભવિતવ્યં યતોઽક્લાન્તૌસ્તિષ્ઠદ્ભિરસ્માભિરુપયુક્તસમયે તત્ ફલાનિ લપ્સ્યન્તે।
X અતો યાવત્ સમયસ્તિષ્ઠતિ તાવત્ સર્વ્વાન્ પ્રતિ વિશેષતો વિશ્વાસવેશ્મવાસિનઃ પ્રત્યસ્માભિ ર્હિતાચારઃ કર્त्तવ્યઃ।
XI હે ભ્રાતરઃ, અહં સ્વહસ્તેન યુષ્માન્ પ્રતિ કિયદ્વૃહત્ પત્રં લિખિતવાન્ તદ્ યુષ્માભિ ર્દૃશ્યતાં।
XII યે શારીરિકવિષયે સુદૃશ્યા ભવિતુમિચ્છન્તિ તે યત્ ખ્રીષ્ટસ્ય ક્રુશસ્ય કારણાદુપદ્રવસ્ય ભાગિનો ન ભવન્તિ કેવલં તદર્થં ત્વક્છેદે યુષ્માન્ પ્રવર્त्तયન્તિ।
XIII તે ત્વક્છેદગ્રાહિણોઽપિ વ્યવસ્થાં ન પાલયન્તિ કિન્તુ યુષ્મચ્છરીરાત્ શ્લાઘાલાભાર્થં યુષ્માકં ત્વક્છેદમ્ ઇચ્છન્તિ।
XIV કિન્તુ યેનાહં સંસારાય હતઃ સંસારોઽપિ મહ્યં હતસ્તદસ્મત્પ્રભો ર્યીશુખ્રીષ્ટસ્ય ક્રુશં વિનાન્યત્ર કુત્રાપિ મમ શ્લાઘનં કદાપિ ન ભવતુ।
XV ખ્રીષ્ટે યીશૌ ત્વક્છેદાત્વક્છેદયોઃ કિમપિ ગુણં નાસ્તિ કિન્તુ નવીના સૃષ્ટિરેવ ગુણયુક્તા।
XVI અપરં યાવન્તો લોકા એતસ્મિન્ માર્ગે ચરન્તિ તેષામ્ ઈશ્વરીયસ્ય કૃત્સ્નસ્યેસ્રાયેલશ્ચ શાન્તિ ર્દયાલાભશ્ચ ભૂયાત્।
XVII ઇતઃ પરં કોઽપિ માં ન ક્લિશ્નાતુ યસ્માદ્ અહં સ્વગાત્રે પ્રભો ર્યીશુખ્રીષ્ટસ્ય ચિહ્નાનિ ધારયે।
XVIII હે ભ્રાતરઃ અસ્માકં પ્રભો ર્યીશુખ્રીષ્ટસ્ય પ્રસાદો યુષ્માકમ્ આત્મનિ સ્થેયાત્। તથાસ્તુ।

# ઇફિષિણઃ પત્રં

I ઈશ્વરસ્યેચ્છયા યીશુખ્રીષ્ટસ્ય પ્રેરિતઃ પૌલ ઇફિષનગરસ્થાન્ પવિત્રાન્ ખ્રીષ્ટયીશૌ વિશ્વાસિનો લોકાન્ પ્રતિ પત્રં લિખતિ।
II અસ્માકં તાતસ્યેશ્વરસ્ય પ્રભો ર્યીશુખ્રીષ્ટસ્ય ચાનુગ્રહઃ શાન્તિશ્ચ યુષ્માસુ વર્ત્તતાં।
III અસ્માકં પ્રભો ર્યીશોઃ ખ્રીષ્ટસ્ય તાત ઈશ્વરો ધન્યો ભવતુ; યતઃ સ ખ્રીષ્ટેનાસ્મભ્યં સર્વ્વમ્ આધ્યાત્મિકં સ્વર્ગીયવરં દત્તવાન્।
IV વયં યત્ તસ્ય સમક્ષં પ્રેમ્ના પવિત્રા નિષ્કલઙ્કાશ્ચ ભવામસ્તદર્થં સ જગતઃ સૃષ્ટેઃ પૂર્વ્વં તેનાસ્માન્ અભિરોચિતવાન્,
નિજાભિલષિતાનુરોધાચ્ચ
V યીશુના ખ્રીષ્ટેન સ્વસ્ય નિમિત્તં પુત્રત્વપદેઽસ્માન્ સ્વકીયાનુગ્રહસ્ય મહત્ત્વસ્ય પ્રશંસાર્થં પૂર્વ્વં નિયુક્તવાન્।
VI તસ્માદ્ અનુગ્રહાત્ સ યેન પ્રિયતમેન પુત્રેણાસ્માન્ અનુગૃહીતવાન્,
VII વયં તસ્ય શોણિતેન મુક્તિમ્ અર્થતઃ પાપક્ષમાં લબ્ધવન્તઃ।
VIII તસ્ય ય ઈદૃશોઽનુગ્રહનિધિસ્તસ્માત્ સોઽસ્મભ્યં સર્વ્વવિધં જ્ઞાનં બુદ્ધિઞ્ચ બાહુલ્યરૂપેણ વિતરિતવાન્।
IX સ્વર્ગપૃથિવ્યો ર્યદ્યદ્ વિદ્યતે તત્સર્વ્વં સ ખ્રીષ્ટે સંગ્રહીષ્યતીતિ હિતૈષિણા
X તેન કૃતો યો મનોરથઃ સમ્પૂર્ણતાં ગતવત્સુ સમયેષુ સાધયિતવ્યસ્તમધિ સ સ્વકીયાભિલાષસ્ય નિગૂઢં ભાવમ્ અસ્માન્
જ્ઞાપિતવાન્।
XI પૂર્વ્વં ખ્રીષ્ટે વિશ્વાસિનો યે વયમ્ અસ્મત્તો યત્ તસ્ય મહિમ્નઃ પ્રશંસા જાયતે,
XII તદર્થં યઃ સ્વકીયેચ્છાયાઃ મન્ત્રણાતઃ સર્વ્વાણિ સાધયતિ તસ્ય મનોરથાદ્ વયં ખ્રીષ્ટેન પૂર્વ્વં નિરૂપિતાઃ સન્તોઽધિકારિણો
જાતાઃ।
XIII યૂયમપિ સત્યં વાક્યમ્ અર્થતો યુષ્મત્પરિત્રાણસ્ય સુસંવાદં નિશમ્ય તસ્મિન્નેવ ખ્રીષ્ટે વિશ્વસિતવન્તઃ પ્રતિજ્ઞાતેન
પવિત્રેણાત્મના મુદ્રયેવાઙ્કિતાશ્ચ।
XIV યતસ્તસ્ય મહિમ્નઃ પ્રકાશાય તેન ક્રીતાનાં લોકાનાં મુક્તિ ર્યાવન્ન ભવિષ્યતિ તાવત્ સ આત્માસ્માકમ્ અધિકારિત્વસ્ય
સત્યઙ્કારસ્ય પણસ્વરૂપો ભવતિ।
XV પ્રભૌ યીશૌ યુષ્માકં વિશ્વાસઃ સર્વ્વેષુ પવિત્રલોકેષુ પ્રેમ ચાસ્ત ઇતિ વાર્ત્તાં શ્રુત્વાહમપિ
XVI યુષ્માનધિ નિરન્તરમ્ ઈશ્વરં ધન્યં વદન્ પ્રાર્થનાસમયે ચ યુષ્માન્ સ્મરન્ વરમિમં યાચામિ।
XVII અસ્માકં પ્રભો ર્યીશુખ્રીષ્ટસ્ય તાતો યઃ પ્રભાવાકર ઈશ્વરઃ સ સ્વકીયતત્ત્વજ્ઞાનાય યુષ્મભ્યં જ્ઞાનજનકમ્
પ્રકાશિતવાક્યબોધકઞ્ચાત્માનં દેયાત્।
XVIII યુષ્માકં જ્ઞાનચક્ષૂંષિ ચ દીપ્તિયુક્તાનિ કૃત્વા તસ્યાહ્વાનં કીદૃશ્યા પ્રત્યાશયા સમ્બલિતં પવિત્રલોકાનાં મધ્યે તેન દત્તોઽધિકારઃ
કીદૃશઃ પ્રભાવનિધિ ર્વિશ્વાસિષુ ચાસ્માસુ પ્રકાશમાનસ્ય
XIX તદીયમહાપરાક્રમસ્ય મહત્વં કીદૃગ્ અનુપમં તત્ સર્વ્વં યુષ્માન્ જ્ઞાપયતુ।
XX યતઃ સ યસ્યાઃ શક્તેઃ પ્રબલતાં ખ્રીષ્ટે પ્રકાશયન્ મૃતગણમધ્યાત્ તમ્ ઉત્થાપિતવાન્,
XXI અધિપતિત્વપદં શાસનપદં પરાક્રમો રાજત્વઞ્ચેતિનામાનિ યાવન્તિ પદાનીહ લોકે પરલોકે ચ વિદ્યન્તે તેષાં સર્વ્વેષામ્ ઊર્દ્ધ્વે
સ્વર્ગે નિજદક્ષિણપાર્શ્વે તમ્ ઉપવેશિતવાન્,
XXII સર્વ્વાણિ તસ્ય ચરણયોરધો નિહિતવાન્ યા સમિતિસ્તસ્ય શરીરં સર્વ્વત્ર સર્વ્વેષાં પૂરયિતુઃ પૂરકઞ્ચ ભવતિ તં તસ્યા મૂર્દ્ધાનં
કૃત્વા
XXIII સર્વ્વેષામ્ ઉપર્ય્યુપરિ નિયુક્તવાંશ્ચ સૈવ શક્તિરસ્માસ્વપિ તેન પ્રકાશ્યતે।

## II

I પુરા યૂયમ્ અપરાધૈઃ પાપૈશ્ચ મૃતાઃ સન્તસ્તાન્યાચરન્ત ઇહલોકસ્ય સંસારાનુસારેણાકાશરાજ્યસ્યાધિપતિમ્
II અર્થતઃ સામ્પ્રતમ્ આજ્ઞાલઙ્ઘિવંશેષુ કર્મ્મકારિણમ્ આત્માનમ્ અન્વવ્રજત।
III તેષાં મધ્યે સર્વ્વે વયમપિ પૂર્વ્વં શરીરસ્ય મનસ્કામનાયાઞ્ચેહાં સાધયન્તઃ સ્વશરીરસ્યાભિલાષાન્ આચરામ સર્વ્વેઽન્ય ઇવ ચ
સ્વભાવતઃ ક્રોધભજનાન્યભવામ।
IV કિન્તુ કરુણાનિધિરીશ્વરો યેન મહાપ્રેમ્નાસ્માન્ દયિતવાન્
V તસ્ય સ્વપ્રેમ્નો બાહુલ્યાદ્ અપરાધૈ ર્મૃતાનપ્યસ્માન્ ખ્રીષ્ટેન સહ જીવિતવાન્ યતોઽનુગ્રહાદ્ યૂયં પરિત્રાણં પ્રાપ્તાઃ।
VI સ ચ ખ્રીષ્ટેન યીશુનાસ્માન્ તેન સાર્દ્ધમ્ ઉત્થાપિતવાન્ સ્વર્ગ ઉપવેશિતવાંશ્ચ।
VII ઇત્થં સ ખ્રીષ્ટેન યીશુનાસ્માન્ પ્રતિ સ્વહિતૈષિતયા ભાવિયુગેષુ સ્વકીયાનુગ્રહસ્યાનુપમં નિધિં પ્રકાશયિતુમ્ ઇચ્છતિ।
VIII યૂયમ્ અનુગ્રહાદ્ વિશ્વાસેન પરિત્રાણં પ્રાપ્તાઃ, તચ્ચ યુષ્મન્મૂલકં નહિ કિન્ત્વીશ્વરસ્યૈવ દાનં,
IX તત્ કર્મ્મણાં ફલમ્ અપિ નહિ, અતઃ કેનાપિ ન શ્લાઘિતવ્યં।
X યતો વયં તસ્ય કાર્ય્યં પ્રાગ્ ઈશ્વરેણ નિરૂપિતાભિઃ સત્ક્રિયાભિઃ કાલયાપનાય ખ્રીષ્ટે યીશૌ તેન મૃષ્ટાશ્ચ।
XI પુરા જન્મના ભિન્નજાતીયા હસ્તકૃતં ત્વક્છેદં પ્રાપ્તૈ ર્લોકૈશ્ચાચ્છિન્નત્વચ ઇતિનામ્ના ખ્યાતા યે યૂયં તૈ ર્યુષ્માભિરિદં સ્મર્ત્તવ્યં
XII યત્ તસ્મિન્ સમયે યૂયં ખ્રીષ્ટાદ્ ભિન્ના ઇસ્રાયેલલોકાનાં સહવાસાદ્ દૂરસ્થાઃ પ્રતિજ્ઞાસમ્બલિતનિયમાનાં બહિઃ સ્થિતાઃ સન્તો
નિરાશા નિરીશ્વરાશ્ચ જગત્યાધ્વમ્ ઇતિ।
XIII કિન્ત્વધુના ખ્રીષ્ટે યીશાવાશ્રયં પ્રાપ્ય પુરા દૂરવર્ત્તિનો યૂયં ખ્રીષ્ટસ્ય શોણિતેન નિકટવર્ત્તિનોઽભવત।
XIV યતઃ સ એવાસ્માકં સન્ધિઃ સ દ્વયમ્ એકીકૃતવાન્ શત્રુતારૂપિણીં મધ્યવર્ત્તિનીં પ્રભેદકભિત્તિં ભગ્નવાન્ દણ્ડાજ્ઞાયુક્તં
વિધિશાસ્ત્રં સ્વશરીરેણ લુપ્તવાંશ્ચ।

XV યતઃ સ સન્ધિં વિધાય તૌ દ્વૌ સ્વસ્મિન્ એકં નુતનં માનવં કર્त्तुं
XVI સ્વકીયક્રુશે શત્રુતાં નિહત્ય તેનૈવૈકસ્મિન્ શરીરે તયો ર્દ્વયોરીશ્વરેણ સન્ધિં કારયિતું નિશ્ચિતવાન્|
XVII સ ચાગત્ય દૂરવર્ત્તિનો યુષ્માન્ નિકટવર્ત્તિનો ઽસ્માંશ્ચ સન્ધે ર્મઙ્ગલવાર્ત્તાં જ્ઞાપિતવાન્|
XVIII યતસ્તસ્માદ્ ઉભયપક્ષીયા વયમ્ એકેનાત્મના પિતુઃ સમીપં ગમનાય સામર્થ્યં પ્રાપ્તવન્તઃ|
XIX અત ઇદાનીં યૂયમ્ અસમ્પર્કીયા વિદેશિનશ્ચ ન તિષ્ઠનતઃ પવિત્રલોકૈઃ સહવાસિન ઈશ્વરસ્ય વેશ્મવાસિનશ્ચાધ્વે|
XX અપરં પ્રેરિતા ભવિષ્યદ્વાદિનશ્ચ યત્ર ભિત્તિમૂલસ્વરૂપાસ્તત્ર યૂયં તસ્મિન્ મૂલે નિચીયધ્વે તત્ર ચ સ્વયં યીશુઃ ખ્રીષ્ટઃ પ્રધાનઃ કોણસ્થપ્રસ્તરઃ|
XXI તેન કૃત્સ્ના નિર્મ્મિતિઃ સંગ્રથ્યમાના પ્રભોઃ પવિત્રં મન્દિરં ભવિતું વર્દ્ધતે|
XXII યૂયમપિ તત્ર સંગ્રથ્યમાના આત્મનેશ્વરસ્ય વાસસ્થાનં ભવથ|

# III

I અતો હેતો ર્ભિન્નજાતીયાનાં યુષ્માકં નિમિત્તં યીશુખ્રીષ્ટસ્ય બન્દી યઃ સોઽહં પૌલો બ્રવીમિ|
II યુષ્મદર્થમ્ ઈશ્વરેણ મહ્યં દત્તસ્ય વરસ્ય નિયમઃ કીદૃશસ્તદ્ યુષ્માભિરશ્રાવીતિ મન્યે|
III અર્થતઃ પૂર્વ્વં મયા સંક્ષેપેણ યથા લિખિતં તથાહં પ્રકાશિતવાક્યેનેશ્વરસ્ય નિગૂઢં ભાવં જ્ઞાપિતોઽભવં|
IV અતો યુષ્માભિસ્તત્ પઠિત્વા ખ્રીષ્ટમધિ તસ્મિન્નિગૂઢે ભાવે મમ જ્ઞાનં કીદૃશં તદ્ ભોત્સ્યતે|
V પૂર્વ્વયુગેષુ માનવસન્તાનાસ્તં જ્ઞાપિતા નાસન્ કિન્ત્વધુના સ ભાવસ્તસ્ય પવિત્રાન્ પ્રેરિતાન્ ભવિષ્યદ્વાદિનશ્ચ પ્રત્યાત્મના પ્રકાશિતોઽભવત્;
VI અર્થત ઈશ્વરસ્ય શક્તેઃ પ્રકાશાત્ તસ્યાનુગ્રહેણ યો વરો મહ્યમ્ અદાયિ તેનાહં યસ્ય સુસંવાદસ્ય પરિચારકોઽભવં,
VII તદ્વારા ખ્રીષ્ટેન ભિન્નજાતીયા અન્યૈઃ સાર્દ્ધમ્ એકાધિકારા એકશરીરા એકસ્યાઃ પ્રતિજ્ઞાયા અંશિનશ્ચ ભવિષ્યન્તીતિ|
VIII સર્વ્વેષાં પવિત્રલોકાનાં ક્ષુદ્રતમાય મહ્યં વરોઽયમ્ અદાયિ યદ્ ભિન્નજાતીયાનાં મધ્યે બોધાગયસ્ય ગુણનિધેઃ ખ્રીષ્ટસ્ય મઙ્ગલવાર્ત્તાં પ્રચારયામિ,
IX કાલાવસ્થાતઃ પૂર્વ્વસ્માચ્ચ યો નિગૂઢભાવ ઈશ્વરે ગુપ્ત આસીત્ તદીયનિયમં સર્વ્વાન્ જ્ઞાપયામિ|
X યત ઈશ્વરસ્ય નાનારૂપં જ્ઞાનં યત્ સામ્પ્રતં સમિત્યા સ્વર્ગે પ્રાધાન્યપરાક્રમયુક્તાનાં દૂતાનાં નિકટે પ્રકાશ્યતે તદર્થં સ યીશુના ખ્રીષ્ટેન સર્વ્વાણિ સૃષ્ટવાન્|
XI યતો વયં યસ્મિન્ વિશ્વસ્ય દૃઢભક્ત્યા નિર્ભયતામ્ ઈશ્વરસ્ય સમાગમે સામર્થ્યઞ્ચ
XII પ્રાપ્તવન્તસ્તમસ્માકં પ્રભું યીશું ખ્રીષ્ટમધિ સ કાલાવસ્થાયાઃ પૂર્વ્વં તં મનોરથં કૃતવાન્|
XIII અતોઽહં યુષ્મન્નિમિત્તં દુઃખભોગેન ક્લાન્તિં યન્ન ગચ્છામીતિ પ્રાર્થયે યતસ્તદેવ યુષ્માકં ગૌરવં|
XIV અતો હેતોઃ સ્વર્ગપૃથિવ્યોઃ સ્થિતઃ કૃત્સ્નો વંશો યસ્ય નામ્ના વિખ્યાતસ્તમ્
XV અસ્મત્પ્રભો ર્યીશુખ્રીષ્ટસ્ય પિતરમુદ્દિશ્યાહં જાનુની પાતયિત્વા તસ્ય પ્રભાવનિધિતો વરમિમં પ્રાર્થયે|
XVI તસ્યાત્મના યુષ્માકમ્ આન્તરિકપુરુષસ્ય શક્તે ર્વૃદ્ધિઃ ક્રિયતાં|
XVII ખ્રીષ્ટસ્તુ વિશ્વાસેન યુષ્માકં હૃદયેષુ નિવસતુ| પ્રેમણિ યુષ્માકં બદ્ધમૂલત્વં સુસ્થિરત્વઞ્ચ ભવતુ|
XVIII ઇત્થં પ્રસ્થતાયા દીર્ઘતાયા ગભીરતાયા ઉચ્ચતાયાશ્ચ બોધાય સર્વ્વૈઃ પવિત્રલોકૈઃ પ્રાપ્યં સામર્થ્યં યુષ્માભિ ર્લભ્યતાં,
XIX જ્ઞાનાતિરિક્તં ખ્રીષ્ટસ્ય પ્રેમ જ્ઞાયતામ્ ઈશ્વરસ્ય સમ્પૂર્ણવૃદ્ધિપર્ય્યન્તં યુષ્માકં વૃદ્ધિ ર્ભવતુ ચ|
XX અસ્માકમ્ અન્તરે યા શક્તિઃ પ્રકાશતે તયા સર્વ્વાતિરિક્તં કર્મ્મ કુર્વ્વન્ અસ્માકં પ્રાર્થનાં કલ્પનાઞ્ચાતિક્રમિતું યઃ શક્નોતિ
XXI ખ્રીષ્ટયીશુના સમિતે ર્મધ્યે સર્વ્વેષુ યુગેષુ તસ્ય ધન્યવાદો ભવતુ| ઇતિ|

# IV

I અતો બન્દિરહં પ્રભો ર્નામ્ના યુષ્માન્ વિનયે યૂયં યેનાહ્વાનેનાહૂતાસ્તદુપયુક્તરૂપેણ
II સર્વ્વથા નમ્રતાં મૃદુતાં તિતિક્ષાં પરસ્પરં પ્રમ્ના સહિષ્ણુતાઞ્ચાચરત|
III પ્રણયબન્ધનેન ચાત્મન એૈક્યં રક્ષિતું યતધ્વં|
IV યૂયમ્ એકશરીરા એકાત્માનશ્ચ તદ્વદ્ આહ્વાનેન યૂયમ્ એકપ્રત્યાશાપ્રાપ્તયે સમાહૂતાઃ|
V યુષ્માકમ્ એકઃ પ્રભુરેકો વિશ્વાસ એકં મજ્જનં, સર્વ્વેષાં તાતઃ
VI સર્વ્વોપરિસ્થઃ સર્વ્વવ્યાપી સર્વ્વેષાં યુષ્માકં મધ્યવર્ત્તી ચૈક ઈશ્વર આસ્તે|
VII કિન્તુ ખ્રીષ્ટસ્ય દાનપરિમાણાનુસારાદ્ અસ્માકમ્ એકૈકસ્મૈ વિશેષો વરોઽદાયિ|
VIII યથા લિખિતમ્ આસ્તે, "ઊર્દ્ધ્વમ્ આરુહ્ય જેતૃન્ સ વિજિત્ય બન્દિનોઽકરોત્| તતઃ સ મનુજેભ્યોઽપિ સ્વીયાન્ વ્યશ્રાણયદ્ વરાન્|| "
IX ઊર્દ્ધ્વમ્ આરુહ્યેતિવાક્યસ્યાયમર્થઃ સ પૂર્વ્વં પૃથિવીરૂપં સર્વ્વાધઃસ્થિતં સ્થાનમ્ અવતીર્ણવાન્;
X યશ્ચાવતીર્ણવાન્ સ એવ સ્વર્ગાણામ્ ઉપર્ય્યુપર્ય્યારૂઢવાન્ યતઃ સર્વ્વાણિ તેન પૂરયિતવ્યાનિ|
XI સ એવ ચ કાંશ્ચન પ્રેરિતાન્ અપરાન્ ભવિષ્યદ્વાદિનોઽપરાન્ સુસંવાદપ્રચારકાન્ અપરાન્ પાલકાન્ ઉપદેશકાંશ્ચ નિયુક્તવાન્|
XII યાવદ્ વયં સર્વ્વે વિશ્વાસસ્યેશ્વરપુત્રવિષયકસ્ય તત્ત્વજ્ઞાનસ્ય ચૈક્યં સમ્પૂર્ણં પુરુષર્થઞ્ચાર્થતઃ ખ્રીષ્ટસ્ય સમ્પૂર્ણપરિમાણસ્ય સમં પરિમાણં ન પ્રાપ્નુમસ્તાવત્
XIII સ પરિચર્ય્યાકર્મ્મસાધનાય ખ્રીષ્ટસ્ય શરીરસ્ય નિષ્ઠાયૈ ચ પવિત્રલોકાનાં સિદ્ધતાયાસ્તાદૃશમ્ ઉપાયં નિશ્ચિતવાન્|
XIV અતએવ માનુષાણાં ચાતુરીતો ભ્રમકધૂર્ત્તતાયાશ્છલાચ્ચ જાતેન સર્વ્વેણ શિક્ષાવાયુના વયં યદ્ બાલકા ઇવ દોલાયમાના ન ભ્રામ્યામ ઇત્યસ્માભિ ર્યતિતવ્યં,
XV પ્રેમ્ના સત્યતામ્ આચરદ્ભિઃ સર્વ્વવિષયે ખ્રીષ્ટમ્ ઉદ્દિશ્ય વર્દ્ધિતવ્યઞ્ચ, યતઃ સ મૂર્દ્ધા,

XVI તસ્માચ્ચૈકૈકસ્યાઙ્ગસ્ય સ્વસ્વપરિમાણાનુસારેણ સાહાય્યકરણાદ્ ઉપકારકૈઃ સર્વ્વૈઃ સન્ધિભિઃ કૃત્સ્નસ્ય શરીરસ્ય સંયોગે
સમ્મિલને ચ જાતે પ્રેમ્ના નિષ્ઠાં લભમાનં કૃત્સ્નં શરીરં વૃદ્ધિં પ્રાપ્નોતિ।

XVII યુષ્માન્ અહં પ્રભુનેદં બ્રવીમ્યાદિશામિ ચ, અન્યે ભિન્નજાતીયા ઇવ યૂયં પૂન ર્માચરત।

XVIII યતસ્તે સ્વમનોમાયામ્ આચરન્ત્યાન્તરિકાજ્ઞાનાત્ માનસિકકાઠિન્યાચ્ચ તિમિરાવૃતબુદ્ધય ઈશ્વરીયજીવનસ્ય બગીર્ભૂતાશ્ચ
ભવન્તિ,

XIX સ્વાન્ ચૈતન્યશૂન્યાન્ કૃત્વા ચ લોભેન સર્વ્વવિધાશૌચાચરણાય લમ્પટતાયાં સ્વાન્ સમર્પિતવન્તઃ।

XX કિન્તુ યૂયં ખ્રીષ્ટં ન તાદૃશં પરિચિતવન્તઃ,

XXI યતો યૂયં તં શ્રુતવન્તો યા સત્યા શિક્ષા યીશુતો લભ્યા તદનુસારાત્ તદીયોપદેશં પ્રાપ્તવન્તશ્ચેતિ મન્યે।

XXII તસ્માત્ પૂર્વ્વકાલિકાચારકારી યઃ પુરાતનપુરુષો માયાભિલાષૈ ર્નશ્યતિ તં ત્યક્ત્વા યુષ્માભિ ર્માનસિકભાવો નૂતનીકર્ત્તવ્યઃ,

XXIII યો નવપુરુષ ઈશ્વરાનુરૂપેણ પુણ્યેન સત્યતાસહિતેન

XXIV ધાર્મ્મિકત્વેન ચ સૃષ્ટઃ સ એવ પરિધાતવ્યશ્ચ।

XXV અતો યૂયં સર્વ્વે મિથ્યાકથનં પરિત્યજ્ય સમીપવાસિભિઃ સહ સત્યાલાપં કુરુત યતો વયં પરસ્પરમ્ અઙ્ગપ્રત્યઙ્ગા ભવામઃ।

XXVI અપરં ક્રોધે જાતે પાપં મા કુરુધ્વમ્, અશાન્તે યુષ્માકં રોષેસૂર્ય્યોઽસ્તં ન ગચ્છતુ।

XXVII અપરં શયતાને સ્થાનં મા દત્ત।

XXVIII ચોરઃ પુનશ્ચૌર્ય્યં ન કરોતુ કિન્તુ દીનાય દાને સામર્થ્યં યજ્જાયતે તદર્થં સ્વકરાભ્યાં સદ્વૃત્ત્યા પરિશ્રમં કરોતુ।

XXIX અપરં યુષ્માકં વદનેભ્યઃ કોઽપિ કદાલાપો ન નિર્ગચ્છતુ, કિન્તુ યેન શ્રોતુરુપકારો જાયતે તાદૃશઃ પ્રયોજનીયનિષ્ઠાયૈ
ફલદાયક આલાપો યુષ્માકં ભવતુ।

XXX અપરઞ્ચ યૂયં મુક્તિદિનપર્ય્યન્તમ્ ઈશ્વરસ્ય યેન પવિત્રેણાત્મના મુદ્રયાઙ્કિતા અભવત તં શોકાન્વિતં મા કુરુત।

XXXI અપરં કટુવાક્યં રોષઃ કોષઃ કલહો નિન્દા સર્વ્વવિધદ્વેષશ્ચૈતાનિ યુષ્માકં મધ્યાદ્ દૂરીભવન્તુ।

XXXII યૂયં પરસ્પરં હિતૈષિણઃ કોમલાન્તઃકરણાશ્ચ ભવત। અપરમ્ ઈશ્વરઃ ખ્રીષ્ટેન યદ્વદ્ યુષ્માકં દોષાન્ ક્ષમિતવાન્ તદ્વદ્ યૂયમપિ
પરસ્પરં ક્ષમધ્વં।

# V

I અતો યૂયં પ્રિયબાલકા ઇવેશ્વરસ્યાનુકારિણો ભવત,

II ખ્રીષ્ટ ઇવ પ્રેમાચારં કુરુત ચ, યતઃ સોઽસ્માસુ પ્રેમ કૃતવાન્ અસ્માકં વિનિમયેન ચાત્મનિવેદનં કૃત્વા ગ્રાહ્યસુગન્ધાર્થકમ્ ઉપહારં
બલિઞ્ચેશ્વરાય દત્તવાન્।

III કિન્તુ વેશ્યાગમનં સર્વ્વવિધાશૌચક્રિયા લોભશ્ચૈતેષામ્ ઉચ્ચારણમપિ યુષ્માકં મધ્યે ન ભવતુ, એતદેવ પવિત્રલોકાનામ્ ઉચિતં।

IV અપરં કુત્સિતાલાપઃ પ્રલાપઃ શ્લેષોક્તિશ્ચ ન ભવતુ યત એતાન્યનુચિતાનિ કિન્ત્વીશ્વરસ્ય ધન્યવાદો ભવતુ।

V વેશ્યાગામ્યશૌચાચારી દેવપૂજક ઇવ ગણ્યો લોભી ચૈતેષાં કોષિ ખ્રીષ્ટસ્ય રાજ્યેઽર્થત ઈશ્વરસ્ય રાજ્યે કમપ્યધિકારં ન
પ્રાપ્સ્યતીતિ યુષ્માભિઃ સમ્યક્ જ્ઞાયતાં।

VI અનર્થકવાક્યેન કોઽપિ યુષ્માન્ ન વઞ્ચયતુ યતસ્તાદૃગાચારહેતોરનાજ્ઞાગ્રાહિષુ લોકેષ્વીશ્વરસ્ય કોપો વર્ત્તતે।

VII તસ્માદ્ યૂયં તૈઃ સહભાગિનો ન ભવત।

VIII પૂર્વ્વં યૂયમ્ અન્ધકારસ્વરૂપા આધ્વં કિન્ત્વિદાનીં પ્રભુના દીપ્તિસ્વરૂપા ભવથ તસ્માદ્ દીપ્તેઃ સન્તાના ઇવ સમાચરત।

IX દીપ્તે ર્યત્ ફલં તત્ સર્વ્વવિધહિતૈષિતાયાં ધર્મ્મે સત્યાલાપે ચ પ્રકાશતે।

X પ્રભવે યદ્ રોચતે તત્ પરીક્ષધ્વં।

XI યૂયં તિમિરસ્ય વિફલકર્મ્મણામ્ અંશિનો ન ભૂત્વા તેષાં દોષિત્વં પ્રકાશયત।

XII યતસ્તે લોકા રહસિ યદ્ યદ્ આચરન્તિ તદુચ્ચારણમ્ અપિ લજ્જાજનકં।

XIII યતો દીપ્ત્યા યદ્ યત્ પ્રકાશ્યતે તત્ તયા ચકાસ્યતે યચ્ચ ચકાસ્તિ તદ્ દીપ્તિસ્વરૂપં ભવતિ।

XIV એતત્કારણાદ્ ઉક્તમ્ આસ્તે, "હે નિદ્રિત પ્રબુધ્યસ્વ મૃતેભ્યશ્ચોત્થિતિં કુરુ। તત્કૃતે સૂર્ય્યવત્ ખ્રીષ્ટઃ સ્વયં ત્વાં દ્યોતયિષ્યતિ।
"

XV અતઃ સાવધાના ભવત, અજ્ઞાના ઇવ માચરત કિન્તુ જ્ઞાનિન ઇવ સતર્કમ્ આચરત।

XVI સમયં બહુમૂલ્યં ગણયધ્વં યતઃ કાલા અભદ્રાઃ।

XVII તસ્માદ્ યૂયમ્ અજ્ઞાના ન ભવત કિન્તુ પ્રભોરભિમતં કિં તદવગતા ભવત।

XVIII સર્વ્વનાશજનકેન સુરાપાનેન મત્તા મા ભવત કિન્ત્વાત્મના પૂર્ય્યધ્વં।

XIX અપરં ગીતૈ ર્ગાનૈઃ પારમાર્થિકકીર્ત્તનૈશ્ચ પરસ્પરમ્ આલપન્તો મનસા સાર્દ્ધં પ્રભુમ્ ઉદ્દિશ્ય ગાયત વાદયત ચ।

XX સર્વ્વદા સર્વ્વવિષયેઽસ્મત્પ્રભો યીશોઃ ખ્રીષ્ટસ્ય નામ્ના તાતમ્ ઈશ્વરં ધન્યં વદત।

XXI યૂયમ્ ઈશ્વરાદ્ ભીતાઃ સન્ત અન્યેઽપરેષાં વશીભૂતા ભવત।

XXII હે યોષિતઃ, યૂયં યથા પ્રભોસ્તથા સ્વસ્વસ્વામિનો વશઙ્ગતા ભવત।

XXIII યતઃ ખ્રીષ્ટો યદ્વત્ સમિતે ર્મૂર્દ્ધા શરીરસ્ય ત્રાતા ચ ભવતિ તદ્વત્ સ્વામી યોષિતો મૂર્દ્ધા।

XXIV અતઃ સમિતિ ર્યદ્વત્ ખ્રીષ્ટસ્ય વશીભૂતા તદ્વદ્ યોષિદ્ભિરપિ સ્વસ્વસ્વામિનો વશતા સ્વીકર્ત્તવ્યા।

XXV અપરઞ્ચ હે પુરુષાઃ, યૂયં ખ્રીષ્ટ ઇવ સ્વસ્વયોષિત્સુ પ્રીયધ્વં।

XXVI સ ખ્રીષ્ટોઽપિ સમિતૌ પ્રીતવાન્ તસ્યાઃ કૃતે ચ સ્વપ્રાણાન્ ત્યક્તવાન્ યતઃ સ વાક્યે જલમજ્જનેન તાં પરિષ્કૃત્ય પાવયિતુમ્

XXVII અપરં તિલકવલ્યાદિવિહીનાં પવિત્રાં નિષ્કલઙ્કાઞ્ચ તાં સમિતિં તેજસ્વિનીં કૃત્વા સ્વહસ્તે સમર્પયિતુઞ્ચાભિલષિતવાન્।

XXVIII તસ્માત્ સ્વતનુવત્ સ્વયોષિતિ પ્રેમકરણં પુરુષસ્યોચિતં, યેન સ્વયોષિતિ પ્રેમ ક્રિયતે તેનાત્મપ્રેમ ક્રિયતે।

XXIX કોઽપિ કદાપિ ન સ્વકીયાં તનુમ્ ઋતીયિતવાન્ કિન્તુ સર્વ્વે તાં વિભ્રતિ પુષ્ણન્તિ ચ। ખ્રીષ્ટોઽપિ સમિતિં પ્રતિ તદેવ કરોતિ,

XXX યતો વયં તસ્ય શરીરસ્યાઙ્ગાનિ માંસાસ્થીનિ ચ ભવામઃ।
XXXI એતદર્થં માનવઃ સ્વમાતાપિતરૌ પરિત્યજ્ય સ્વભાર્ય્યાયામ્ આસંક્ષ્યતિ તૌ દ્વૌ જનાવેકાઙ્ગૌ ભવિષ્યતઃ।
XXXII એતન્નિગૂઢવાક્યં ગુરુતરં મયા ચ ખ્રીષ્ટસમિતી અધિ તદ્ ઉચ્યતે।
XXXIII અતએવ યુષ્માકમ્ એકૈકો જન આત્મવત્ સ્વયોષિતિ પ્રીયતાં ભાર્ય્યાપિ સ્વામિનં સમાદર્త్తું યતતાં।

# VI

I હે બાલકાઃ, યૂયં પ્રભુમ્ ઉદ્દિશ્ય પિત્રોરાજ્ઞાગ્રાહિણો ભવત યતસ્તત્ ન્યાય્યં।
II ત્વં નિજપિતરં માતરઞ્ચ સમ્મન્યસ્વેતિ યો વિધિઃ સ પ્રતિજ્ઞાયુક્તઃ પ્રથમો વિધિઃ
III ફલતસ્તસ્માત્ તવ કલ્યાણં દેશે ચ દીર્ઘકાલમ્ આયુ ર્ભવિષ્યતીતિ।
IV અપરં હે પિતરઃ, યૂયં સ્વબાલકાન્ મા રોષયત કિન્તુ પ્રભો ર્વિનીત્યાદેશાભ્યાં તાન્ વિનયત।
V હે દાસાઃ, યૂયં ખ્રીષ્ટમ્ ઉદ્દિશ્ય સભયાઃ કમ્પાન્વિતાશ્ચ ભૂત્વા સરલાન્તઃકરણૈરૈહિકપ્રભૂનામ્ આજ્ઞાગ્રાહિણો ભવત।
VI દૃષ્ટિગોચરીયપરિચર્ય્યયા માનુષેભ્યો રોચિતું મા યતધ્વં કિન્તુ ખ્રીષ્ટસ્ય દાસા ઇવ નિવિષ્ટમનોભિરીશ્વરસ્યેચ્છાં સાધયત।
VII માનવાન્ અનુદ્દિશ્ય પ્રભુમેવોદ્દિશ્ય સદ્ભાવેન દાસ્યકર્મ્મ કુરુધ્વં।
VIII દાસમુક્તયો ર્યેન યત્ સત્કર્મ્મ ક્રિયતે તેન તસ્ય ફલં પ્રભુતો લપ્સ્યત ઇતિ જાનીત ચ।
IX અપરં હે પ્રભવઃ, યુષ્માભિ ર્ભર્ત્સનં વિહાય તાન્ પ્રતિ ન્યાય્યાચરણં ક્રિયતાં યશ્ચ કસ્યાપિ પક્ષપાતં ન કરોતિ યુષ્માકમપિ
તાદૃશ એકઃ પ્રભુઃ સ્વર્ગે વિદ્યત ઇતિ જ્ઞાયતાં।
X અધિકન્તુ હે ભ્રાતરઃ, યૂયં પ્રભુના તસ્ય વિક્રમયુક્તશક્ત્યા ચ બલવન્તો ભવત।
XI યૂયં યત્ શયતાનશ્છલાનિ નિવારયિતું શક્નુથ તદર્થમ્ ઈશ્વરીયસુસજ્જાં પરિધદ્ધ્વં।
XII યતઃ કેવલં રક્તમાંસાભ્યામ્ ઇતિ નહિ કિન્તુ કર્તૃત્વપરાક્રમયુક્તૈસ્તિમિરરાજ્યસ્યેહલોકસ્યાધિપતિભિઃ સ્વર્ગોદ્ભવૈ
ર્દુષ્ટાત્મભિરેવ સાર્દ્ધમ્ અસ્માભિ ર્યુદ્ધં ક્રિયતે।
XIII અતો હેતો ર્યૂયં યયા સંકુ◌ેલે દિનેઽવસ્થાતું સર્વ્વાણિ પરાજિત્ય દૃઢાઃ સ્થાતુઞ્ચ શક્ષ્યથ તામ્ ઈશ્વરીયસુસજ્જાં ગૃહ્લીત।
XIV વસ્તુતસ્તુ સત્યત્વેન શૃઙ્ખલેન કટિં બદ્ધ્વા પુણ્યેન વર્મ્મણા વક્ષ આચ્છાદ્ય
XV શાન્તેઃ સુવાર્ત્તયા જાતમ્ ઉત્સાહં પાદુકાયુગલં પદે સમર્પ્ય તિષ્ઠત।
XVI યેન ચ દુષ્ટાત્મનોઽગ્નિબાણાન્ સર્વ્વાન્ નિર્વ્વાપયિતું શક્ષ્યથ તાદૃશં સર્વ્વાચ્છાદકં ફલકં વિશ્વાસં ધારયત।
XVII શિરસ્ત્રં પરિત્રાણમ્ આત્મનઃ ખઙ્ગઞ્ચેશ્વરસ્ય વાક્યં ધારયત।
XVIII સર્વ્વસમયે સર્વ્વયાચનેન સર્વ્વપ્રાર્થનેન ચાત્મના પ્રાર્થનાં કુરુધ્વં તદર્થં દૃઢાકાઙ્ક્ષયા જાગ્રતઃ સર્વ્વેષાં પવિત્રલોકાનાં કૃતે સદા
પ્રાર્થનાં કુરુધ્વં।
XIX અહઞ્ચ યસ્ય સુસંવાદસ્ય શૃઙ્ખલબદ્ધઃ પ્રચારકદૂતોઽસ્મિ તમ્ ઉપયુક્તેનોત્સાહેન પ્રચારયિતું યથા શક્નુયાં
XX તથા નિર્ભયેન સ્વરેણોત્સાહેન ચ સુસંવાદસ્ય નિગૂઢવાક્યપ્રચારાય વક્તૃ◌ાતા યત્ મહ્યં દીયતે તદર્થં મમાપિ કૃતે પ્રાર્થનાં
કુરુધ્વં।
XXI અપરં મમ યાવસ્થાસ્તિ યચ્ચ મયા ક્રિયતે તત્ સર્વ્વં યદ્ યુષ્માભિ ર્જ્ઞાયતે તદર્થં પ્રભુના પ્રિયભ્રાતા વિશ્વાસ્યઃ પરિચારકશ્ચ
તુખિકો યુષ્માન્ તત્ જ્ઞાપયિષ્યતિ।
XXII યૂયં યદ્ અસ્માકમ્ અવસ્થાં જાનીથ યુષ્માકં મનાંસિ ચ યત્ સાન્ત્વનાં લભન્તે તદર્થમેવાહં યુષ્માકં સન્નિધિં તં પ્રેષિતવાન।
XXIII અપરમ્ ઈશ્વરઃ પ્રભુ ર્યીશુખ્રીષ્ટશ્ચ સર્વ્વેભ્યો ભ્રાતૃભ્યઃ શાન્તિં વિશ્વાસસહિતં પ્રેમ ચ દેયાત્।
XXIV યે કેચિત્ પ્રભૌ યીશુખ્રીષ્ટેઽક્ષયં પ્રેમ કુર્વ્વન્તિ તાન્ પ્રતિ પ્રસાદો ભૂયાત્। તથાસ્તુ।

# ફિલિપિનઃ પત્રં

I પૌલતીમથિનામાનૌ યીશુખ્રીષ્ટસ્ય દાસૌ ફિલિપિનગરસ્થાન્ ખ્રીષ્ટયીશોઃ સર્વ્વાન્ પવિત્રલોકાન્ સમિતેરધ્યક્ષાન્ પરિચારકાંશ્ચ પ્રતિ પત્રં લિખતઃ।

II અસ્માકં તાત ઈશ્વરઃ પ્રભુ ર્યીશુખ્રીષ્ટશ્ચ યુષ્મભ્યં પ્રસાદસ્ય શાન્તેશ્ચ ભોગં દેયાસ્તાં।

III અહં નિરન્તરં નિજસર્વ્વપ્રાર્થનાસુ યુષ્માકં સર્વ્વેષાં કૃતે સાનન્દં પ્રાર્થનાં કુર્વ્વન્

IV યતિ વારાન્ યુષ્માકં સ્મરામિ તતિ વારાન્ આ પ્રથમાદ્ અદ્ય યાવદ્

V યુષ્માકં સુસંવાદભાગિત્વકારણાદ્ ઈશ્વરં ધન્યં વદામિ।

VI યુષ્મન્મધ્યે યેનોત્તમં કર્મ્મ કર્ત્તુમ્ આરમ્ભિ તેનૈવ યીશુખ્રીષ્ટસ્ય દિનં યાવત્ તત્ સાધયિષ્યત ઇત્યસ્મિન્ દૃઢવિશ્વાસો મમાસ્તે।

VII યુષ્માન્ સર્વ્વાન્ અધિ મમ તાદૃશો ભાવો યથાર્થો યતોઽહં કારાવસ્થાયાં પ્રત્યુત્તરકરણે સુસંવાદસ્ય પ્રામાણ્યકરણે ચ યુષ્માન્ સર્વ્વાન્ મયા સાર્દ્ધમ્ એકાનુગ્રહસ્ય ભાગિનો મત્વા સ્વહૃદયે ધારયામિ।

VIII અપરમ્ અહં ખ્રીષ્ટયીશોઃ સ્નેહવત્ સ્નેહેન યુષ્માન્ કીદૃશં કાઙ્ક્ષામિ તદધીશ્વરો મમ સાક્ષી વિદ્યતે।

IX મયા યત્ પ્રાર્થ્યતે તદ્ ઇદં યુષ્માકં પ્રેમ નિત્યં વૃદ્ધિં ગત્વા

X જ્ઞાનસ્ય વિશિષ્ટાનાં પરીક્ષિકાયાશ્ચ સર્વ્વવિધબુદ્ધે ર્બાહુલ્યં ફલતુ,

XI ખ્રીષ્ટસ્ય દિનં યાવદ્ યુષ્માકં સારલ્યં નિર્વિઘ્નત્વઞ્ચ ભવતુ, ઈશ્વરસ્ય ગૌરવાય પ્રશંસાયૈ ચ યીશુના ખ્રીષ્ટેન પુણ્યફલાનાં પૂર્ણતા યુષ્મભ્યં દીયતામ્ ઇતિ।

XII હે ભ્રાતરઃ, માં પ્રતિ યદ્ યદ્ ઘટિતં તેન સુસંવાદપ્રચારસ્ય બાધા નહિ કિન્તુ વૃદ્ધિરેવ જાતા તદ્ યુષ્માન્ જ્ઞાપયિતું કામયેઽહં।

XIII અપરમ્ અહં ખ્રીષ્ટસ્ય કૃતે બદ્ધોઽસ્મીતિ રાજપુર્ય્યામ્ અન્યસ્થાનેષુ ચ સર્વ્વેષાં નિકટે સુસ્પષ્ટમ્ અભવત્,

XIV પ્રભુસમ્બન્ધીયા અનેકે ભ્રાતરશ્ચ મમ બન્ધનાદ્ આશ્વાસં પ્રાપ્ય વર્દ્ધમાનેનોત્સાહેન નિઃક્ષોભં કથાં પ્રચારયન્તિ।

XV કેચિદ્ દ્વેષાદ્ વિરોધાચ્ચાપરે કેચિચ્ચ સદ્ભાવાત્ ખ્રીષ્ટં ઘોષયન્તિ;

XVI યે વિરોધાત્ ખ્રીષ્ટં ઘોષયન્તિ તે પવિત્રભાવાત્ તન્ન કુર્વ્વન્તો મમ બન્ધનાનિ બહુતરક્લોશદાયીનિ કર્ત્તુમ્ ઇચ્છન્તિ।

XVII યે ચ પ્રેમ્ના ઘોષયન્તિ તે સુસંવાદસ્ય પ્રામાણ્યકરણેઽહં નિયુક્તોઽસ્મીતિ જ્ઞાત્વા તત્ કુર્વ્વન્તિ।

XVIII કિં બહુના? કાપટ્યાત્ સરલભાવાદ્ વા ભવેત્, યેન કેનચિત્ પ્રકારેણ ખ્રીષ્ટસ્ય ઘોષણા ભવતીત્યસ્મિન્ અહમ્ આનન્દામ્યાનન્દિષ્યામિ ચ।

XIX યુષ્માકં પ્રાર્થનયા યીશુખ્રીષ્ટસ્યાત્મનશ્ચોપકારેણ તત્ મન્નિસ્તારજનકં ભવિષ્યતીતિ જાનામિ।

XX તત્ર ચ મમાકાઙ્ક્ષા પ્રત્યાશા ચ સિદ્ધિં ગમિષ્યતિ ફલતોઽહં કેનાપિ પ્રકારેણ ન લજ્જિષ્યે કિન્તુ ગતે સર્વ્વસ્મિન્ કાલે યદ્વત્ તદ્વદ્ ઇદાનીમપિ સમ્પૂર્ણોત્સાહદ્વારા મમ શરીરેણ ખ્રીષ્ટસ્ય મહિમા જીવને મરણે વા પ્રકાશિષ્યતે।

XXI યતો મમ જીવનં ખ્રીષ્ટાય મરણઞ્ચ લાભાય।

XXII કિન્તુ યદિ શરીરે મયા જીવિતવ્યં તર્હિ તત્ કર્મ્મફલં ફલિષ્યતિ તસ્માત્ કિં વરિતવ્યં તન્મયા ન જ્ઞાયતે।

XXIII દ્વાભ્યામ્ અહં સમ્પીડ્યે, દેહવાસત્યજનાય ખ્રીષ્ટેન સહવાસાય ચ મમાભિલાષો ભવતિ યતસ્તત્ સર્વ્વોત્તમં।

XXIV કિન્તુ દેહે મમાવસ્થિત્યા યુષ્માકમ્ અધિકપ્રયોજનં।

XXV અહમ્ અવસ્થાસ્યે યુષ્માભિઃ સર્વ્વૈઃ સાર્દ્ધમ્ અવસ્થિતિં કરિષ્યે ચ તયા ચ વિશ્વાસે યુષ્માકં વૃદ્ધ્યાનન્દૌ જનિષ્યેતે તદહં નિશ્ચિતં જાનામિ।

XXVI તેન ચ મત્તોઽર્થતો યુષ્મત્સમીપે મમ પુનરુપસ્થિતત્વાત્ યૂયં ખ્રીષ્ટેન યીશુના બહુતરમ્ આહ્લાદં લપ્સ્યધ્વે।

XXVII યૂયં સાવધાના ભૂત્વા ખ્રીષ્ટસ્ય સુસંવાદસ્યોપયુક્તમ્ આચારં કુરુધ્વં યતોઽહં યુષ્માન્ ઉપાગત્ય સાક્ષાત્ કુર્વ્વન્ કિં વા દૂરે તિષ્ઠન્ યુષ્માકં યાં વાર્ત્તાં શ્રોતુમ્ ઇચ્છામિ સેયં યૂયમ્ એકાત્માનસ્તિષ્ઠથ, એકમનસા સુસંવાદસમ્બન્ધીયવિશ્વાસસ્ય પક્ષે યતધ્વે, વિપક્ષૈશ્ચ કેનાપિ પ્રકારેણ ન વ્યાકુલીક્રિયધ્વ ઇતિ।

XXVIII તત્ તેષાં વિનાશસ્ય લક્ષણં યુષ્માકઞ્ચેશ્વરદત્તં પરિત્રાણસ્ય લક્ષણં ભવિષ્યતિ।

XXIX યતો યેન યુષ્માભિઃ ખ્રીષ્ટે કેવલવિશ્વાસઃ ક્રિયતે તન્નહિ કિન્તુ તસ્ય કૃતે ક્લેશોઽપિ સહ્યતે તાદૃશો વરઃ ખ્રીષ્ટસ્યાનુરોધાદ્ યુષ્માભિઃ પ્રાપિ,

XXX તસ્માત્ મમ યાદૃશં યુદ્ધં યુષ્માભિરદર્શિ સામ્પ્રતં શ્રૂયતે ચ તાદૃશં યુદ્ધં યુષ્માકમ્ અપિ ભવતિ।

## II

I ખ્રીષ્ટાદ્ યદિ કિમપિ સાન્ત્વનં કશ્ચિત્ પ્રેમજાતો હર્ષઃ કિઞ્ચિદ્ આત્મનઃ સમભાગિત્વં કાચિદ્ અનુકમ્પા કૃપા વા જાયતે તર્હિ યૂયં મમાહ્લાદં પૂરયન્ત

II એકભાવા એકપ્રેમાણ એકમનસ એકચેષ્ટાશ્ચ ભવત।

III વિરોધાદ્ દર્પાદ્ વા કિમપિ મા કુરુત કિન્તુ નમ્રતયા સ્વેભ્યોઽપરાન્ વિશિષ્ટાન્ મન્યધ્વં।

IV કેવલમ્ આત્મહિતાય ન ચેષ્ટમાનાઃ પરહિતાયાપિ ચેષ્ટધ્વં।

V ખ્રીષ્ટસ્ય યીશો ર્યાદૃશઃ સ્વભાવો યુષ્માકમ્ અપિ તાદૃશો ભવતુ।

VI સ ઈશ્વરરૂપી સન્ સ્વકીયામ્ ઈશ્વરતુલ્યતાં શ્લાઘાસ્પદં નામન્યત,

VII કિન્તુ સ્વં શૂન્યં કૃત્વા દાસરૂપી બભૂવ નરાકૃતિં લેભે ચ।

VIII ઇત્થં નરમૂર્ત્તિમ્ આશ્રિત્ય નમ્રતાં સ્વીકૃત્ય મૃત્યોરર્થતઃ ક્રુશીયમૃત્યોરેવ ભોગાયાજ્ઞાગ્રાહી બભૂવ।

IX તત્કારણાદ્ ઈશ્વરોઽપિ તં સર્વ્વોન્નતં ચકાર યચ્ચ નામ સર્વ્વેષાં નામ્નાં શ્રેષ્ઠં તદેવ તસ્મૈ દદૌ,

X ततस्तस्मै यीशुनाम्ने स्वर्गमर्त्यपातालस्थितैः सर्व्वै र्जानुपातः कर्त्तव्यः,
XI तातस्थेश्वरस्य महिम्ने च यीशुख्रीष्टः प्रभुरिति जिह्वाभिः स्वीकर्त्तव्यं।
XII अतो हे प्रियतमाः, युष्माभि र्यद्वत् सर्व्वदा क्रियते तद्वत् केवले ममोपस्थितिकाले तन्नहि किन्त्विदानीम् अनुपस्थितेऽपि मयि बहुतरयत्नेनाज्ञां गृहीत्वा भयकम्पाभ्यां स्वस्वपरित्राणं साध्यतां।
XIII यत ईश्वर एव स्वकीयानुरोधाद् युष्मन्मध्ये मनस्कामनां कर्म्मसिद्धिञ्च विदधाति।
XIV यूयं कलहविवादर्विजतम् आचारं कुर्व्वन्तोऽनिन्दनीया अकुटिला
XV ईश्वरस्य निष्कलङ्काश्च सन्तानाइव वक्रभावानां कुटिलाचारिणाञ्च लोकानां मध्ये तिष्ठत,
XVI यतस्तेषां मध्ये यूयं जीवनवाक्यं धारयन्तो जगतो दीपका इव दीप्यध्वे। युष्माभिस्तथा कृते मम यत्नः परिश्रमो वा न निष्फलो जात इत्यहं ख्रीष्टस्य दिने श्लाघां कर्त्तुं शक्ष्यामि।
XVII युष्माकं विश्वासार्थकाय बलिदानाय सेवनाय च यद्यप्यहं निवेदितव्यो भवेयं तथापि तेनानन्दामि सर्व्वेषां युष्माकम् आनन्दस्यांशी भवामि च।
XVIII तद्वद् यूयमप्यानन्दत मदीयानन्दस्यांशिनो भवत च।
XIX युष्माकम् अवस्थाम् अवगत्याहमपि यत् सान्त्वनां प्राप्नुयां तदर्थं तीमथियं त्वरया युष्मत्समीपं प्रेषयिष्यामीति प्रभौ प्रत्याशां कुर्व्वे।
XX यः सत्यरूपेण युष्माकं हितं चिन्तयति तादृश एकभावस्तस्मादन्यः कोऽपि मम सन्निधौ नास्ति।
XXI यतोऽपरे सर्व्वे यीशोः ख्रीष्टस्य विषयान् न चिन्तयन्त आत्मविषयान् चिन्तयन्ति।
XXII किन्तु तस्य परीक्षितत्वं युष्माभि र्ज्ञायते यतः पुत्रो यादृक् पितुः सहकारी भवति तथैव सुसंवादस्य परिचर्य्यायां स मम सहकारी जातः।
XXIII अतएव मम भाविदशां ज्ञात्वा तत्क्षणात् तमेव प्रेषयितुं प्रत्याशां कुर्व्वे
XXIV स्वयम् अहमपि तूर्णं युष्मत्समीपं गमिष्यामीत्याशां प्रभुना कुर्व्वे।
XXV अपरं य इपाफ्रदीतो मम भ्राता कर्म्मयुद्धाभ्यां मम सहायश्च युष्माकं दूतो मदीयोपकाराय प्रतिनिधिश्चास्ति युष्मत्समीपे तस्य प्रेषणम् आवश्यकम् अमन्ये।
XXVI यतः स युष्मान् सर्व्वान् अकाङ्क्षत युष्माभिस्तस्य रोगस्य वार्त्ताश्रावीति बुद्ध्वा पर्य्यशोचच्च।
XXVII स पीडया मृतकल्पोऽभवदिति सत्यं किन्त्वीश्वरस्तं दयितवान् मम च दुःखात् परं पुनर्दुःखं यन्न भवेत् तदर्थं केवलं तं न दयित्वा मामपि दयितवान्।
XXVIII अतएव यूयं तं विलोक्य यत् पुनरानन्देत ममापि दुःखस्य ह्रासो यद् भवेत् तदर्थम् अहं त्वरया तम् अप्रेषयं।
XXIX अतो यूयं प्रभोः कृते सम्पूर्णेनानन्देन तं गृह्लीत तादृशान् लोकांश्चादरणीयान् मन्यध्वं।
XXX यतो मम सेवने युष्माकं त्रुटिं पूरयितुं स प्राणान् पणीकृत्य ख्रीष्टस्य कार्य्यार्थं मृतप्रायेऽभवत्।

# III

I हे भ्रातरः, शेषे वदामि यूयं प्रभावानन्दत। पुनः पुनरेकस्य वचो लेखनं मम क्लेशदं नहि युष्मदर्थञ्च भ्रमनाशकं भवति।
II यूयं कुक्कुरेभ्यः सावधाना भवत दुष्कर्म्मकारिभ्यः सावधाना भवत छिन्नमूलेभ्यो लोकेभ्यश्च सावधाना भवत।
III वयमेव छिन्नत्वचो लोका यतो वयम् आत्मनेश्वरं सेवामहे ख्रीष्टेन यीशुना श्लाघामहे शरीरेण च प्रगल्भतां न कुर्व्वामहे।
IV किन्तु शरीरे मम प्रगल्भतायाः कारणं विद्यते, कश्चिद् यदि शरीरेण प्रगल्भतां चिकीर्षति तर्हि तस्माद् अपि मम प्रगल्भताया गुरुतरं कारणं विद्यते।
V यतोऽहम् अष्टमदिवसे त्वक्छेदप्राप्त इस्रायेल्वंशीयो बिन्यामीनगोष्ठीय इब्रिकुलजात इब्रियो व्यवस्थाचरणे फिरूशी
VI धर्म्मोत्साहकारणात् समितेरुपद्रवकारी व्यवस्थातो लभ्ये पुण्ये चानिन्दनीयः।
VII किन्तु मम यद्यत् लभ्यम् आसीत् तत् सर्व्वम् अहं ख्रीष्टस्यानुरोधात् क्षतिम् अमन्ये।
VIII किञ्चाधुनाप्यहं मत्प्रभोः ख्रीष्टस्य यीशो र्ज्ञानस्योत्कृष्टतां बुद्ध्वा तत् सर्व्वं क्षतिं मन्ये।
IX यतो हेतोरहं यत् ख्रीष्टं लभेय व्यवस्थातो जातं स्वकीयपुण्यञ्च न धारयन् किन्तु ख्रीष्टे विश्वसनात् लभ्यं यत् पुण्यम् ईश्वरेण विश्वासं दृष्ट्वा दीयते तदेव धारयन् यत् ख्रीष्टे विद्येय तदर्थं तस्यानुरोधात् सर्व्वेषां क्षतिं स्वीकृत्य तानि सर्व्वाण्यवकरानिव मन्ये।
X यतो हेतोरहं ख्रीष्टं तस्य पुनरुत्थिते र्गुणं तस्य दुःखानां भागित्वञ्च ज्ञात्वा तस्य मृत्योराकृतिञ्च गृहीत्वा
XI येन केनचित् प्रकारेण मृतानां पुनरुत्थितिं प्राप्तुं यते।
XII मया तत् सर्व्वम् अधुना प्रापि सिद्धता वालम्भि तन्नहि किन्तु यदर्थम् अहं ख्रीष्टेन धारितस्तद् धारयितुं धावामि।
XIII हे भ्रातरः, मया तद् धारितम् इति न मन्यते किन्त्वेतदैकमात्रं वदामि यानि पश्चात् स्थितानि तानि विस्मृत्याहम् अग्रस्थितान्युद्दिश्य
XIV पूर्णयत्नेन लक्ष्यं प्रति धावन् ख्रीष्टयीशुनोर्द्ध्वात् माम् आह्वयत ईश्वरात् जेतृपणं प्राप्तुं चेष्टे।
XV अस्माकं मध्ये ये सिद्धास्तैः सर्व्वैस्तदेव भाव्यतां, यदि च कञ्चन विषयम् अधि युष्माकम् अपरो भावो भवति तर्हीश्वरस्तमपि युष्माकं प्रति प्रकाशयिष्यति।
XVI किन्तु वयं यद्यद् अवगता आस्मस्तत्रास्माभिरेको विधिराचरितव्य एकभावै र्भवितव्यञ्च।
XVII हे भ्रातरः, यूयं ममानुगामिनो भवत वयञ्च यादृगाचरणस्य निदर्शनस्वरूपा भवामस्तादृगाचारिणो लोकान् आलोकयध्वं।
XVIII यतोऽनेके विपथे चरन्ति ते च ख्रीष्टस्य क्रुशस्य शत्रव इति पुरा मया पुनः पुनः कथितम् अधुनापि रुदता मया कथ्यते।
XIX तेषां शेषदशा सर्व्वनाश उदरश्चेश्वरो लज्जा च श्लाघा पृथिव्याञ्च लग्नं मनः।

XX કિન્ત્વસ્માકં જનપદઃ સ્વર્ગે વિદ્યતે તસ્માચ્ચાગમિષ્યન્તં ત્રાતારં પ્રભું યીશુખ્રીષ્ટં વયં પ્રતીક્ષામહે।
XXI સ ચ યયા શક્ત્યા સર્વ્વાણ્યેવ સ્વસ્ય વશીકર્ત્તું પારયતિ તયાસ્માકમ્ અધમં શરીરં રૂપાન્તરીકૃત્ય સ્વકીયતેજોમયશરીરસ્ય
સમાકારં કરિષ્યતિ।

# IV

I હે મદીયાનન્દમુકુટસ્વરૂપાઃ પ્રિયતમા અભીષ્ટતમા ભ્રાતરઃ, હે મમ સ્નેહપાત્રાઃ, યૂયમ્ ઇત્થં પભૌ સ્થિરાસ્તિષ્ઠત।
II હે ઇવદિયે હે સુન્તુખિ યુવાં પ્રભૌ એકભાવે ભવતમ્ એતદ્ અહં પ્રાર્થયે।
III હે મમ સત્ય સહકારિન્ ત્વામપિ વિનીય વદામિ એતયોરુપકારસ્ત્વયા ક્રિયતાં યતસ્તે ક્લીમિનાદિભિઃ સહકારિભિઃ સાર્દ્ધં
સુસંવાદપ્રચારણાય મમ સાહાય્યાર્થં પરિશ્રમમ્ અકુર્વ્વતાં તેષાં સર્વ્વેષાં નામાનિ ચ જીવનપુસ્તકે લિખિતાનિ વિદ્યન્તે।
IV યૂયં પ્રભૌ સર્વ્વદાનન્દત। પુન ર્વદામિ યૂયમ્ આનન્દત।
V યુષ્માકં વિનીતત્વં સર્વ્વમાનવૈ ર્જ્ઞાયતાં, પ્રભુઃ સન્નિધૌ વિદ્યતે।
VI યૂયં કિમપિ ન ચિન્તયત કિન્તુ ધન્યવાદયુક્તાભ્યાં પ્રાર્થનાયાચ્ઞાભ્યાં સર્વ્વવિષયે સ્વપ્રાર્થનીયમ્ ઈશ્વરાય નિવેદયત।
VII તથા કૃત ઈશ્વરીયા યા શાન્તિઃ સર્વ્વાં બુદ્ધિમ્ અતિશેતે સા યુષ્માકં ચિત્તાનિ મનાંસિ ચ ખ્રીષ્ટે યીશૌ રક્ષિષ્યતિ।
VIII હે ભ્રાતરઃ, શેષે વદામિ યદ્યત્ સત્યમ્ આદરણીયં ન્યાય્યં સાધુ પ્રિયં સુખ્યાતમ્ અન્યેણ યેન કેનચિત્ પ્રકારેણ વા ગુણયુક્તં
પ્રશંસનીયં વા ભવતિ તત્રૈવ મનાંસિ નિધધ્વં।
IX યૂયં માં દૃષ્ટ્વા શ્રુત્વા ચ યદ્યત્ શિક્ષિતવન્તો ગૃહીતવન્તશ્ચ તદેવાચરત તસ્માત્ શાન્તિદાયક ઈશ્વરો યુષ્માભિઃ સાર્દ્ધં સ્થાસ્યતિ।
X મમોપકારાય યુષ્માકં યા ચિન્તા પૂર્વ્વમ્ આસીત્ કિન્તુ કર્મ્મદ્વારં ન પ્રાપ્નોત્ ઇદાનીં સા પુનરફલત્ ઇત્યસ્મિન્ પ્રભૌ મમ
પરમાહ્લાદોઽજાયત।
XI અહં યદ્ દૈન્યકારણાદ્ ઇદં વદામિ તન્નહિ યતો મમ યા કાચિદ્ અવસ્થા ભવેત્ તસ્યાં સન્તોષ્ટુમ્ અશિક્ષયં।
XII દરિદ્રતાં ભોક્તું શક્નોમિ ધનાઢ્યતામ્ અપિ ભોક્તું શક્નોમિ સર્વ્વથા સર્વ્વવિષયેષુ વિનીતોઽહં પ્રચુરતાં ક્ષુધાઞ્ચ ધનં
દૈન્યઞ્ચાવગતોઽસ્મિ।
XIII મમ શક્તિદાયકેન ખ્રીષ્ટેન સર્વ્વમેવ મયા શક્યં ભવતિ।
XIV કિન્તુ યુષ્માભિ ર્દૈન્યનિવારણાય મામ્ ઉપકૃત્ય સત્કર્મ્માકારિ।
XV હે ફિલિપીયલોકાઃ, સુસંવાદસ્યોદયકાલે યદાહં માકિદનિયાદેશાત્ પ્રતિષ્ઠે તદા કેવલાન્ યુષ્માન્ વિનાપરયા કયાપિ સમિત્યા
સહ દાનાદાનયો ર્મમ કોઽપિ સમ્બન્ધો નાસીદ્ ઇતિ યૂયમપિ જાનીથ।
XVI યતો યુષ્માભિ ર્મમ પ્રયોજનાય થિષલનીકીનગરમપિ માં પ્રતિ પુનઃ પુનર્દાનં પ્રેષિતં।
XVII અહં યદ્ દાનં મૃગયે તન્નહિ કિન્તુ યુષ્માકં લાભવર્દ્ધકં ફલં મૃગયે।
XVIII કિન્તુ મમ કસ્યાપ્યભાવો નાસ્તિ સર્વ્વં પ્રચુરમ્ આસ્તે યત ઈશ્વરસ્ય ગ્રાહ્યં તુષ્ટિજનકં સુગન્ધિનૈવેદ્યસ્વરૂપં યુષ્માકં દાનં
ઇપાફ્રદિતાદ્ ગૃહીત્વાહં પરિતૃપ્તોઽસ્મિ।
XIX મમેશ્વરોઽપિ ખ્રીષ્ટેન યીશુના સ્વકીયવિભવનિધિતઃ પ્રયોજનીયં સર્વ્વવિષયં પૂર્ણરૂપં યુષ્મભ્યં દેયાત્।
XX અસ્માકં પિતુરીશ્વરસ્ય ધન્યવાદોઽનન્તકાલં યાવદ્ ભવતુ। આમેન્।
XXI યૂયં યીશુખ્રીષ્ટસ્યૈકૈકં પવિત્રજનં નમસ્કુરુત। મમ સઙ્ગિભ્રાતરો યૂષ્માન્ નમસ્કુર્વ્વતે।
XXII સર્વ્વે પવિત્રલોકા વિશેષતઃ કૈસરસ્ય પરિજના યુષ્માન્ નમસ્કુર્વ્વતે।
XXIII અસ્માકં પ્રભો ર્યીશુખ્રીષ્ટસ્ય પ્રસાદઃ સર્વ્વાન્ યુષ્માન્ પ્રતિ ભૂયાત્। આમેન્।

# કલસિનઃ પત્રં

I ઈશ્વરસ્યેચ્છયા યીશુખ્રીષ્ટસ્ય પ્રેરિતઃ પૌલસ્તીમથિયો ભ્રાતા ચ કલસીનગરસ્થાન્ પવિત્રાન્ વિશ્વસ્તાન્ ખ્રીષ્ટાશ્રિતભ્રાતૃન્ પ્રતિ પત્રં લિખતઃ।

II અસ્માકં તાત ઈશ્વરઃ પ્રભુ ર્યીશુખ્રીષ્ટશ્ચ યુષ્માન્ પ્રતિ પ્રસાદં શાન્તિઞ્ચ ક્રિયાસ્તાં।

III ખ્રીષ્ટે યીશૌ યુષ્માકં વિશ્વાસસ્ય સર્વ્વાન્ પવિત્રલોકાન્ પ્રતિ પ્રેમ્નશ્ચ વાર્ત્તાં શ્રુત્વા

IV વયં સદા યુષ્મદર્થં પ્રાર્થનાં કુર્વ્વન્તઃ સ્વર્ગે નિહિતાયા યુષ્માકં ભાવિસમ્પદઃ કારણાત્ સ્વકીયપ્રભો ર્યીશુખ્રીષ્ટસ્ય તાતમ્ ઈશ્વરં ધન્યં વદામઃ।

V યૂયં તસ્યા ભાવિસમ્પદો વાર્ત્તાં યયા સુસંવાદરૂપિણ્યા સત્યવાણ્યા જ્ઞાપિતાઃ

VI સા યદ્વત્ કૃત્સ્નં જગદ્ અભિગચ્છતિ તદ્વદ્ યુષ્માન્ અપ્યભ્યગમત્, યૂયઞ્ચ યદ્ દિનમ્ આરભ્યેશ્વરસ્યાનુગ્રહસ્ય વાર્ત્તાં શ્રુત્વા સત્યરૂપેણ જ્ઞાતવન્તસ્તદારભ્ય યુષ્માકં મધ્યેઽપિ ફલતિ વર્દ્ધતે ચ।

VII અસ્માકં પ્રિયઃ સહદાસો યુષ્માકં કૃતે ચ ખ્રીષ્ટસ્ય વિશ્વસ્તપરિચારકો ય ઇપફ્રાસ્તદ્ વાક્યં

VIII યુષ્માન્ આદિષ્ટવાન્ સ એવાસ્માન્ આત્મના જનિતં યુષ્માકં પ્રેમ જ્ઞાપિતવાન્।

IX વયં યદ્ દિનમ્ આરભ્ય તાં વાર્ત્તાં શ્રુતવન્તસ્તદારભ્ય નિરન્તરં યુષ્માકં કૃતે પ્રાર્થનાં કુર્મ્મઃ ફલતો યૂયં યત્ પૂર્ણાભ્યામ્ આત્મિકજ્ઞાનવુદ્ધિભ્યામ્ ઈશ્વરસ્યાભિતમં સમ્પૂર્ણરૂપેણાવગચ્છેત,

X પ્રભો ર્યોગ્યં સર્વ્વથા સન્તોષજનકઞ્ચાચારં કુર્ય્યાતાર્થત ઈશ્વરજ્ઞાને વર્દ્ધમાનાઃ સર્વ્વસત્કર્મ્મરૂપં ફલં ફલેત,

XI યથા ચેશ્વરસ્ય મહિમયુક્તયા શક્ત્યા સાનન્દેન પૂર્ણાં સહિષ્ણુતાં તિતિક્ષાઞ્ચાચરિતું શક્ષ્યથ તાદૃશેન પૂર્ણબલેન યદ્ બલવન્તો ભવેત,

XII યશ્ચ પિતા તેજોવાસિનાં પવિત્રલોકાનામ્ અધિકારસ્યાંશિત્વાયાસ્માન્ યોગ્યાન્ કૃતવાન્ તં યદ્ ધન્યં વદેત વરમ્ એનં યાચામહે।

XIII યતઃ સોઽસ્માન્ તિમિરસ્ય કર્તૃત્વાદ્ ઉદ્ધૃત્ય સ્વકીયસ્ય પ્રિયપુત્રસ્ય રાજ્યે સ્થાપિતવાન્।

XIV તસ્માત્ પુત્રાદ્ વયં પરિત્રાણમ્ અર્થતઃ પાપમોચનં પ્રાપ્તવન્તઃ।

XV સ ચાદૃશ્યસ્યેશ્વરસ્ય પ્રતિમૂર્તિઃ કૃત્સ્નાયાઃ સૃષ્ટેરાદિકર્त्ता ચ।

XVI યતઃ સર્વ્વમેવ તેન સસૃજે સિંહાસનરાજત્વપરાક્રમાદીનિ સ્વર્ગમર્ત્ત્યસ્થિતાનિ દૃશ્યાદૃશ્યાનિ વસ્તૂનિ સર્વ્વાણિ તેનૈવ તસ્મૈ ચ સસૃજિરે।

XVII સ સર્વ્વેષામ્ આદિઃ સર્વ્વેષાં સ્થિતિકારકશ્ચ।

XVIII સ એવ સમિતિરૂપાયાસ્તનો ર્મૂદ્ધા કિઞ્ચ સર્વ્વવિષયે સ યદ્ અગ્રિયો ભવેત્ તદર્થં સ એવ મૃતાનાં મધ્યાત્ પ્રથમત ઉત્થિતોઽગ્રશ્ચ।

XIX યત ઈશ્વરસ્ય કૃત્સ્નં પૂર્ણત્વં તમેવાવાસયિતું

XX ક્રુશે પાતિતેન તસ્ય રક્તેન સન્ધિં વિધાય તેનૈવ સ્વર્ગમર્ત્ત્યસ્થિતાનિ સર્વ્વાણિ સ્વેન સહ સન્ધાપયિતુઞ્ચેશ્વરેણાભિલેષે।

XXI પૂર્વ્વં દૂરસ્થા દુષ્ક્રિયારતમનસ્કત્વાત્ તસ્ય રિપવશ્ચાસ્ત યે યૂયં તાન્ યુષ્માન્ અપિ સ ઇદાનીં તસ્ય માંસલશરીરે મરણેન સ્વેન સહ સન્ધાપિતવાન્।

XXII યતઃ સ સ્વસમ્મુખે પવિત્રાન્ નિષ્કલઙ્કાન્ અનિન્દનીયાંશ્ચ યુષ્માન્ સ્થાપયિતુમ્ ઇચ્છતિ।

XXIII કિન્ત્વેતદર્થં યુષ્માભિ ર્બદ્ધમૂલૈઃ સુસ્થિરૈશ્ચ ભવિતવ્યમ્, આકાશમણ્ડલસ્યાધઃસ્થિતાનાં સર્વ્વલોકાનાં મધ્યે ચ ઘુષ્યમાણો યઃ સુસંવાદો યુષ્માભિરશ્રાવિ તજ્જાતાયાં પ્રત્યાશાયાં યુષ્માભિરચલૈ ર્ભવિતવ્યં।

XXIV તસ્ય સુસંવાદસ્યૈકઃ પરિચારકો યોઽહં પૌલઃ સોઽહમ્ ઇદાનીમ્ આનન્દેન યુષ્મદર્થં દુઃખાનિ સહે ખ્રીષ્ટસ્ય ક્લેશભોગસ્ય યોંશોઽપૂર્ણસ્તમેવ તસ્ય તનોઃ સમિતેઃ કૃતે સ્વશરીરે પૂરયામિ ચ।

XXV યત ઈશ્વરસ્ય મન્ત્રણયા યુષ્મદર્થમ્ ઈશ્વરીયવાક્યસ્ય પ્રચારસ્ય ભારો મયિ સમપિતસ્તસ્માદ્ અહં તસ્યાઃ સમિતેઃ પરિચારકોઽભવં।

XXVI તત્ નિગૂઢં વાક્યં પૂર્વ્વયુગેષુ પૂર્વ્વપુરુષેભ્યઃ પ્રચ્છન્નમ્ આસીત્ કિન્ત્વિદાનીં તસ્ય પવિત્રલોકાનાં સન્નિધૌ તેન પ્રાકાશ્યત।

XXVII યતો ભિન્નજાતીયાનાં મધ્યે તત્ નિગૂઢવાક્યં કીદૃગ્ગૌરવનિધિસમ્બલિતં તત્ પવિત્રલોકાન્ જ્ઞાપયિતુમ્ ઈશ્વરોઽભ્યલષત્। યુષ્મન્મધ્યવર્ત્તી ખ્રીષ્ટ એવ સ નિધિ ર્ગૌરવાશાભૂમિશ્ચ।

XXVIII તસ્માદ્ વયં તમેવ ઘોષયન્તો યદ્ એકૈકં માનવં સિદ્ધીભૂતં ખ્રીષ્ટે સ્થાપયેમ તદર્થમેકૈકં માનવં પ્રબોધયામઃ પૂર્ણજ્ઞાનેન ચૈકૈકં માનવં ઉપદિશામઃ।

XXIX એતદર્થં તસ્ય યા શક્તિઃ પ્રબલરૂપેણ મમ મધ્યે પ્રકાશતે તયાહં યતમાનઃ શ્રાભ્યામિ।

# II

I યુષ્માકં લાયદિકેયાસ્થભ્રાતૃણાઞ્ચ કૃતે યાવન્તો ભ્રાતરશ્ચ મમ શારીરિકમુખં ન દૃષ્ટવન્તસ્તેષાં કૃતે મમ કિયાન્ યત્નો ભવતિ તદ્ યુષ્માન્ જ્ઞાપયિતુમ્ ઇચ્છામિ।

II ફલતઃ પૂર્ણબુદ્ધિરૂપધનભોગાય પ્રેમ્ના સંયુક્તાનાં તેષાં મનાંસિ યત્ પિતુરીશ્વરસ્ય ખ્રીષ્ટસ્ય ચ નિગૂઢવાક્યસ્ય જ્ઞાનાર્થં સાન્ત્વનાં પ્રાપ્નુયુરિત્યર્થમહં યતે।

III યતો વિદ્યાજ્ઞાનયોઃ સર્વ્વે નિધયઃ ખ્રીષ્ટે ગુપ્તાઃ સન્તિ।

IV કોઽપિ યુષ્માન્ વિનયવાક્યેન યન્ન વઞ્ચયેત્ તદર્થમ્ એતાનિ મયા કથ્યન્તે।

V યુષ્મત્સન્નિધૌ મમ શરીરેઽવર્ત્તમાનેઽપિ મમાત્મા વર્ત્તતે તેન યુષ્માકં સુરીતિં ખ્રીષ્ટવિશ્વાસે સ્થિરત્વઞ્ચ દૃષ્ટ્વાહમ્ આનન્દામિ।

VI અતો યૂયં પ્રભું યીશુખ્રીષ્ટં યાદૃગ્ ગૃહીતવન્તસ્તાદૃક્ તમ્ અનુચરત।
VII તસ્મિન્ બદ્ધમૂલાઃ સ્થાપિતાશ્ચ ભવત યા ચ શિક્ષા યુષ્માભિ ર્લબ્ધા તદનુસારાદ્ વિશ્વાસે સુસ્થિરાઃ સન્તસ્તેનૈવ નિત્યં
ધન્યવાદં કુરુત।
VIII સાવધાના ભવત માનુષિકશિક્ષાત ઇહલોકસ્ય વર્ણમાલાતશ્ચોત્પન્ના ખ્રીષ્ટસ્ય વિપક્ષા યા દર્શનવિદ્યા મિથ્યાપ્રતારણા ચ તયા
કોઽપિ યુષ્માકં ક્ષતિં ન જનયતુ।
IX યત ઈશ્વરસ્ય કૃત્સ્ના પૂર્ણતા મૂર્ત્તિમતી ખ્રીષ્ટે વસતિ।
X યૂયઞ્ચ તેન પૂર્ણા ભવથ યતઃ સ સર્વ્વેષાં રાજત્વકર્તૃત્વપદાનાં મૂર્દ્ધાસ્તિ,
XI તેન ચ યૂયમ્ અહસ્તકૃતત્વક્છેદેનાર્થતો યેન શારીરપાપાનાં વિગ્રસત્યજ્યતે તેન ખ્રીષ્ટસ્ય ત્વક્છેદેન છિન્નત્વચો જાતા
XII મજ્જને ચ તેન સાર્દ્ધં શ્મશાનં પ્રાપ્તાઃ પુન ર્મૃતાનાં મધ્યાત્ તસ્યોત્થાપયિતુરીશ્વરસ્ય શક્તેઃ ફલં યો વિશ્વાસસ્તદ્દ્વારા તસ્મિન્નેવ
મજ્જને તેન સાર્દ્ધમ્ ઉત્થાપિતા અભવત।
XIII સ ચ યુષ્માન્ અપરાધૈઃ શારીરિકાત્વક્છેદેન ચ મૃતાન્ દૃષ્ટ્વા તેન સાર્દ્ધં જીવિતવાન્ યુષ્માકં સર્વ્વાન્ અપરાધાન્ ક્ષમિતવાન્,
XIV યચ્ચ દણ્ડાજ્ઞારૂપં ઋણપત્રમ્ અસ્માકં વિરુદ્ધમ્ આસીત્ તત્ પ્રમાર્જ્જિતવાન્ શલાકાભિઃ ક્રુશે બદ્ધ્વા દૂરીકૃતવાંશ્ચ।
XV કિઞ્ચ તેન રાજત્વકર્તૃત્વપદાનિ નિસ્તેજાંસિ કૃત્વા પરાજિતાન્ રિપૂનિવ પ્રગલ્ભતયા સર્વ્વેષાં દૃષ્ટિગોચરે હ્રેપિતવાન્।
XVI અતો હેતોઃ ખાદ્યાખાદ્યે પેયાપેયે ઉત્સવઃ પ્રતિપદ્ વિશ્રામવારશ્ચૈતેષુ સર્વ્વેષુ યુષ્માકં ન્યાયાધિપતિરૂપં કમપિ મા ગૃહ્લીત।
XVII યત એતાનિ છાયાસ્વરૂપાણિ કિન્તુ સત્યા મૂર્ત્તિઃ ખ્રીષ્ટઃ।
XVIII અપરઞ્ચ નમ્રતા સ્વર્ગદૂતાનાં સેવા ચૈતાદૃશમ્ ઇષ્ટકર્મ્માચરન્ યઃ કશ્ચિત્ પરોક્ષવિષયાન્ પ્રવિશતિ સ્વકીયશારીરિકભાવેન
ચ મુધા ગર્વ્વિતઃ સન્
XIX સન્ધિભિઃ શિરાભિશ્ચોપકૃતં સંયુક્તઞ્ચ કૃત્સ્નં શરીરં યસ્માત્ મૂર્દ્ધત ઈશ્વરીયવૃદ્ધિં પ્રાપ્નોતિ તં મૂર્દ્ધાનં ન ધારયતિ તેન માનવેન
યુષ્મત્તઃ ફલાપહરણં નાનુજાનીત।
XX યદિ યૂયં ખ્રીષ્ટેન સાર્દ્ધં સંસારસ્ય વર્ણમાલાયૈ મૃતા અભવત તર્હિ યૈ ર્દ્રવ્યૈ ર્ભોગેન ક્ષયં ગન્તવ્યં
XXI તાનિ મા સ્પૃશ મા ભુંક્ષ્વ મા ગૃહાણેતિ માનવૈરાદિષ્ટાન્ શિક્ષિતાંશ્ચ વિધીન્
XXII આચરન્તો યૂયં કુતઃ સંસારે જીવન્ત ઇવ ભવથ?
XXIII તે વિધયઃ સ્વેચ્છાભક્ત્યા નમ્રતયા શરીરક્લેશનેન ચ જ્ઞાનવિધિવત્ પ્રકાશન્તે તથાપિ તેઽગણ્યાઃ શારીરિકભાવવર્દ્ધકાશ્ચ
સન્તિ।

# III

I યદિ યૂયં ખ્રીષ્ટેન સાર્દ્ધમ્ ઉત્થાપિતા અભવત તર્હિ યસ્મિન્ સ્થાને ખ્રીષ્ટ ઈશ્વરસ્ય દક્ષિણપાર્શ્વે ઉપવિષ્ટ આસ્તે
તસ્યોર્દ્ધ્વસ્થાનસ્ય વિષયાન્ ચેષ્ટધ્વં।
II પાર્થિવવિષયેષુ ન યતમાના ઊર્દ્ધ્વસ્થવિષયેષુ યતધ્વં।
III યતો યૂયં મૃતવન્તો યુષ્માકં જીવિતઞ્ચ ખ્રીષ્ટેન સાર્દ્ધમ્ ઈશ્વરે ગુપ્તમ્ અસ્તિ।
IV અસ્માકં જીવનસ્વરૂપઃ ખ્રીષ્ટો યદા પ્રકાશિષ્યતે તદા તેન સાર્દ્ધં યૂયમપિ વિભવેન પ્રકાશિષ્યધ્વે।
V અતો વેશ્યાગમનમ્ અશુચિક્રિયા રાગઃ કુત્સિતાભિલાષો દેવપૂજાતુલ્યો લોભશ્ચૈતાનિ ર્પાિથવપુરુષસ્યાઙ્ગાનિ યુષ્માભિ
ર્નિહન્યન્તાં।
VI યત એતેભ્યઃ કર્મ્મભ્ય આજ્ઞાલઙ્ઘિનો લોકાન્ પ્રતીશ્વરસ્ય ક્રોધો વર્ત્તતે।
VII પૂર્વ્વં યદા યૂયં તાન્યુપાજીવત તદા યૂયમપિ તાન્યેવાચરત;
VIII કિન્ત્વિદાનીં ક્રોધો રોષો જિહિંસિષા દુર્મુખતા વદનનિર્ગતકદાલપશ્ચૈતાનિ સર્વ્વાણિ દૂરીકુરુધ્વં।
IX યૂયં પરસ્પરં મૃષાકથાં ન વદત યતો યૂયં સ્વકર્મ્મસહિતં પુરાતનપુરુષં ત્યક્તવન્તઃ
X સ્વસ્રષ્ટુઃ પ્રતિમૂર્ત્યા તત્ત્વજ્ઞાનાય નૂતનીકૃતં નવીનપુરુષં પરિહિતવન્તશ્ચ।
XI તેન ચ યિહૂદિભિન્નજાતીયયોશ્છિન્નત્વગચ્છિન્નત્વચો ર્મ્લેચ્છસ્કુથીયયો ર્દાસમુક્તયોશ્ચ કોઽપિ વિશેષો નાસ્તિ કિન્તુ સર્વ્વેષુ
સર્વ્વઃ ખ્રીષ્ટ એવાસ્તે।
XII અતએવ યૂયમ્ ઈશ્વરસ્ય મનોભિલષિતાઃ પવિત્રાઃ પ્રિયાશ્ચ લોકા ઇવ સ્નેહયુક્તામ્ અનુકમ્પાં હિતૈષિતાં નમ્રતાં તિતિક્ષાં
સહિષ્ણુતાઞ્ચ પરિધદ્ધ્વં।
XIII યૂયમ્ એકૈકસ્યાચરણં સહધ્વં યેન ચ યસ્ય કિમપ્યપરાધ્યતે તસ્ય તં દોષં સ ક્ષમતાં, ખ્રીષ્ટો યુષ્માકં દોષાન્ યદ્વદ્ ક્ષમિતવાન્
યૂયમપિ તદ્વત્ કુરુધ્વં।
XIV વિશેષતઃ સિદ્ધિજનકેન પ્રેમબન્ધનેન બદ્ધા ભવત।
XV યસ્યાઃ પ્રાપ્તયે યૂયમ્ એકસ્મિન્ શરીરે સમાહૂતા અભવત સેશ્વરીયા શાન્તિ ર્યુષ્માકં મનાંસ્યધિતિષ્ઠતુ યૂયઞ્ચ કૃતજ્ઞા ભવત।
XVI ખ્રીષ્ટસ્ય વાક્યં સર્વ્વવિધજ્ઞાનાય સમ્પૂર્ણરૂપેણ યુષ્મદન્તરે નિવમતુ, યૂયઞ્ચ ગીતૈ ર્ગાનૈઃ પારમાર્થિકસઙ્કીર્ત્તનૈશ્ચ પરસ્પરમ્
આદિશત પ્રબોધયત ચ, અનુગૃહીતત્વાત્ પ્રભુમ્ ઉદ્દિશ્ય સ્વમનોભિ ર્ગાયત ચ।
XVII વાચા કર્મ્મણા વા યદ્ યત્ કુરુત તત્ સર્વ્વં પ્રભો ર્યીશો ર્નામ્ના કુરુત તેન પિતરમ્ ઈશ્વરં ધન્યં વદત ચ।
XVIII હે યોષિતઃ, યૂયં સ્વામિનાં વશ્યા ભવત યતસ્તદેવ પ્રભવે રોચતે।
XIX હે સ્વામિનઃ, યૂયં ભાર્ય્યાસુ પ્રીયધ્વં તાઃ પ્રતિ પરુષાલાપં મા કુરુધ્વં।
XX હે બાલાઃ, યૂયં સર્વ્વવિષયે પિત્રોરાજ્ઞાગ્રાહિણો ભવત યતસ્તદેવ પ્રભોઃ સન્તોષજનકં।
XXI હે પિતરઃ, યુષ્માકં સન્તાના યત્ કાતરા ન ભવેયુસ્તદર્થં તાન્ પ્રતિ મા રોષયત।
XXII હે દાસાઃ, યૂયં સર્વ્વવિષય ઐહિકપ્રભૂનામ્ આજ્ઞાગ્રાહિણો ભવત દૃષ્ટિગોચરીયસેવયા માનવેભ્યો રોચિતું મા યતધ્વં કિન્તુ
સરલાન્તઃકરણૈઃ પ્રભો ર્ભાીત્યા કાર્ય્યં કુરુધ્વં।

XXIII યચ્ચ કુરુધ્વે તત્ માનુષમનુદ્દિશ્ય પ્રભુમ્ ઉદ્દિશ્ય પ્રફુલ્લમનસા કુરુધ્વં,
XXIV યતો વયં પ્રભુતઃ સ્વર્ગાધિકારરૂપં ફલં લપ્સ્યામહ ઇતિ યૂયં જાનીથ યસ્માદ્ યૂયં પ્રભોઃ ખ્રીષ્ટસ્ય દાસા ભવથ।
XXV કિન્તુ યઃ કશ્ચિદ્ અનુચિતં કર્મ્મ કરોતિ સ તસ્યાનુચિતકર્મ્મણઃ ફલં લપ્સ્યતે તત્ર કોઽપિ પક્ષપાતો ન ભવિષ્યતિ।

# IV

I અપરઞ્ચ હે અધિપતયઃ, યૂયં દાસાન્ પ્રતિ ન્યાય્યં યથાર્થઞ્ચાચરણં કુરુધ્વં યુષ્માકમપ્યેકોઽધિપતિઃ સ્વર્ગે વિદ્યત ઇતિ જાનીત।
II યૂયં પ્રાર્થનાયાં નિત્યં પ્રવર્ત્તધ્વં ધન્યવાદં કુર્વ્વન્તસ્તત્ર પ્રબુદ્ધાસ્તિષ્ઠત ચ।
III પ્રાર્થનાકાલે મમાપિ કૃતે પ્રાર્થનાં કુરુધ્વં,
IV ફલતઃ ખ્રીષ્ટસ્ય યન્નિગૂઢવાક્યકારણાદ્ અહં બદ્ધોઽભવં તત્પ્રકાશાયેશ્વરો યત્ મદર્થં વાગ્દ્વારં કુર્ય્યાત્, અહઞ્ચ યથોચિતં તત્
પ્રકાશયિતું શક્નુયામ્ એતત્ પ્રાર્થયધ્વં।
V યૂયં સમયં બહુમૂલ્યં જ્ઞાત્વા બહિઃસ્થાન્ લોકાન્ પ્રતિ જ્ઞાનાચારં કુરુધ્વં।
VI યુષ્માકમ્ આલાપઃ સર્વ્વદાનુગ્રહસૂચકો લવણેન સુસ્વાદુશ્ચ ભવતુ યસ્મૈ યદુત્તરં દાતવ્યં તદ્ યુષ્માભિરવગમ્યતાં।
VII મમ યા દશાક્તિ તાં તુખિકનામા પ્રભૌ પ્રિયો મમ ભ્રાતા વિશ્વસનીયઃ પરિચારકઃ સહદાસશ્ચ યુષ્માન્ જ્ઞાપયિષ્યતિ।
VIII સ યદ્ યુષ્માકં દશાં જાનીયાત્ યુષ્માકં મનાંસિ સાન્ત્વયેચ્ચ તદર્થમેવાહં
IX તમ્ ઓનીષિમનામાનઞ્ચ યુષ્મદ્દેશીયં વિશ્વસ્તં પ્રિયઞ્ચ ભ્રાતરં પ્રેષિતવાન્ તૌ યુષ્માન્ અત્રત્યાં સર્વ્વવાર્ત્તાં જ્ઞાપયિષ્યતઃ।
X આરિષ્ટાર્ખનામા મમ સહબન્દી બર્ણબ્બા ભાગિનેયો માર્કો યુષ્ટનામ્ના વિખ્યાતો યીશુશ્ચૈતે છિન્નત્વચો ભ્રાતરો યુષ્માન્ નમસ્કારં
જ્ઞાપયન્તિ, તેષાં મધ્યે માર્કમધિ યૂયં પૂર્વ્વમ્ આજ્ઞાપિતાઃ સ યદિ યુષ્મત્સમીપમ્ ઉપતિષ્ઠેત્ તર્હિ યુષ્માભિ ર્ગૃહ્યતાં।
XI કેવલમેત ઈશ્વરરાજ્યે મમ સાન્ત્વનાજનકાઃ સહકારિણોઽભવન્।
XII ખ્રીષ્ટસ્ય દાસો યો યુષ્મદ્દેશીય ઇપફ્રાઃ સ યુષ્માન્ નમસ્કારં જ્ઞાપયતિ યૂયઞ્ચેશ્વરસ્ય સર્વ્વસ્મિન્ મનોઽભિલાષે યત્ સિદ્ધાઃ
પૂર્ણાશ્ચ ભવેત તદર્થં સ નિત્યં પ્રાર્થનયા યુષ્માકં કૃતે યતતે।
XIII યુષ્માકં લાયદિકેયાસ્થિતાનાં હિયરાપલિસ્થિતાનાઞ્ચ ભ્રાતૃણાં હિતાય સોઽતીવ ચેષ્ટત ઇત્યસ્મિન્ અહં તસ્ય સાક્ષી ભવામિ।
XIV લૂકનામા પ્રિયશ્ચિકિત્સકો દીમાશ્ચ યુષ્મભ્યં નમસ્કુર્વ્વાતે।
XV યૂયં લાયદિકેયાસ્થાન્ ભ્રાતૃન્ નુમ્ફાં તદ્ગૃહસ્થિતાં સમિતિઞ્ચ મમ નમસ્કારં જ્ઞાપયત।
XVI અપરં યુષ્મત્સન્નિધૌ પત્રસ્યાસ્ય પાઠે કૃતે લાયદિકેયાસ્થસમિતાવપિ તસ્ય પાઠો યથા ભવેત્ લાયદિકેયાઞ્ચ યત્ પત્રં મયા
પ્રહિતં તદ્ યથા યુષ્માભિરપિ પઠ્યેત તથા ચેષ્ટધ્વં।
XVII અપરમ્ આર્ખિપ્પં વદત પ્રભો ર્યત્ પરિચર્ય્યાપદં ત્વયાપ્રાપિ તત્સાધનાય સાવધાનો ભવ।
XVIII અહં પૌલઃ સ્વહસ્તાક્ષરેણ યુષ્માન્ નમસ્કારં જ્ઞાપયામિ યૂયં મમ બન્ધનં સ્મરત। યુષ્માન્ પ્રત્યનુગ્રહો ભૂયાત્। આમેન।

# ૧ થિષલનીકિનઃ પત્રં

I પૌલઃ સિલ્વાનસ્તીમથિયશ્ચ પિતુરીશ્વરસ્ય પ્રભો ર્યીશુખ્રીષ્ટસ્ય ચાશ્રયં પ્રાપ્તા થિષલનીકીયસમિતિં પ્રતિ પત્રં લિખન્તિ। અસ્માકં તાત ઈશ્વરઃ પ્રભુ ર્યીશુખ્રીષ્ટશ્ચ યુષ્માન્ પ્રત્યનુગ્રહં શાન્તિઞ્ચ ક્રિયાસ્તાં।
II વયં સર્વ્વેષાં યુષ્માકં કૃતે ઈશ્વરં ધન્યં વદામઃ પ્રાર્થનાસમયે યુષ્માકં નામોચ્ચારયામઃ,
III અસ્માકં તાતસ્યેશ્વરસ્ય સાક્ષાત્ પ્રભૌ યીશુખ્રીષ્ટે યુષ્માકં વિશ્વાસેન યત્ કાર્ય્યં પ્રેમ્ના યઃ પરિશ્રમઃ પ્રત્યાશયા ચ યા તિતિક્ષા જાયતે
IV તત્ સર્વ્વં નિરન્તરં સ્મરામશ્ચ। હે પિયભ્રાતરઃ, યૂયમ્ ઈશ્વરેણાભિરુચિતા લોકા ઇતિ વયં જાનીમઃ।
V યતોઽસ્માકં સુસંવાદઃ કેવલશબ્દેન યુષ્માન્ ન પ્રવિશ્ય શક્ત્યા પવિત્રેણાત્મના મહોત્સાહેન ચ યુષ્માન્ પ્રાવિશત્। વયન્તુ યુષ્માકં કૃતે યુષ્મન્મધ્યે કીદૃશા અભવામ તદ્ યુષ્માભિ ર્જ્ઞાયતે।
VI યૂયમપિ બહુક્લેશભોગેન પવિત્રેણાત્મના દત્તેનાનન્દેન ચ વાક્યં ગૃહીત્વાસ્માકં પ્રભોશ્ચાનુગામિનોઽભવત।
VII તેન માકિદનિયાખાયાદેશયો ર્યાવન્તો વિશ્વાસિનો લોકાઃ સન્તિ યૂયં તેષાં સર્વ્વેષાં નિદર્શનસ્વરૂપા જાતાઃ।
VIII યતો યુષ્મત્તઃ પ્રતિનાદિતયા પ્રભો ર્વાણ્યા માકિદનિયાખાયાદેશૌ વ્યાપ્તૌ કેવલમેતન્નહિ કિન્ત્વીશ્વરે યુષ્માકં યો વિશ્વાસસ્તસ્ય વાર્ત્તા સર્વ્વત્રાશ્રાવિ, તસ્માત્ તત્ર વાક્યકથનમ્ અસ્માકં નિષ્પ્રયોજનં।
IX યતો યુષ્મન્મધ્યે વયં કીદૃશં પ્રવેશં પ્રાપ્તા યૂયઞ્ચ કથં પ્રતિમા વિહાયેશ્વરં પ્રત્યાવર્ત્તધ્વમ્ અમરં સત્યમીશ્વરં સેવિતું
X મૃતગણમધ્યાચ્ચ તેનોત્થાપિતસ્ય પુત્રસ્યાર્થત આગામિક્રોધાદ્ અસ્માકં નિસ્તારયિતુ ર્યીશોઃ સ્વર્ગાદ્ આગમનં પ્રતીક્ષિતુમ્ આરભધ્વમ્ એતત્ સર્વ્વં તે લોકાઃ સ્વયમ્ અસ્માન્ જ્ઞાપયન્તિ।

## II

I હે ભ્રાતરઃ, યુષ્મન્મધ્યે ઽસ્માકં પ્રવેશો નિષ્ફલો ન જાત ઇતિ યૂયં સ્વયં જાનીથ।
II અપરં યુષ્માભિ ર્યથાશ્રાવિ તથા પૂર્વ્વં ફિલિપીનગરે ક્લિષ્ટા નિન્દિતાશ્ચ સન્તોઽપિ વયમ્ ઈશ્વરાદ્ ઉત્સાહં લબ્ધ્વા બહુયત્નેન યુષ્માન્ ઈશ્વરસ્ય સુસંવાદમ્ અબોધયામ।
III યતોઽસ્માકમ્ આદેશો ભ્રાન્તેરશુચિભાવાદ્ વોત્પન્નઃ પ્રવઞ્ચનાયુક્તો વા ન ભવતિ।
IV કિન્ત્વીશ્વરેણાસ્માન્ પરીક્ષ્ય વિશ્વસનીયાન્ મત્વા ચ યદ્વત્ સુસંવાદોઽસ્માસુ સમાર્પ્યત તદ્વદ્ વયં માનવેભ્યો ન રુરોચિષમાણાઃ કિન્ત્વસ્મદન્તઃકરણાનાં પરીક્ષકાયેશ્વરાય રુરોચિષમાણા ભાષામહે।
V વયં કદાપિ સ્તુતિવાદિનો નાભવામેતિ યૂયં જાનીથ કદાપિ છલવસ્ત્રેણ લોભં નાચ્છાદયામેત્યસ્મિન્ ઈશ્વરઃ સાક્ષી વિદ્યતે।
VI વયં ખ્રીષ્ટસ્ય પ્રેરિતા ઇવ ગૌરવાન્વિતા ભવિતુમ્ અશક્ષ્યામ કિન્તુ યુષ્મત્તઃ પરસ્માદ્ વા કસ્માદપિ માનવાદ્ ગૌરવં ન લિપ્સમાના યુષ્મન્મધ્યે મૃદુભાવા ભૂત્વાવર્ત્તામહિ।
VII યથા કાચિન્માતા સ્વકીયશિશૂન્ પાલયતિ તથા વયમપિ યુષ્માન્ કાઙ્ક્ષમાણા।
VIII યુષ્મભ્યં કેવલમ્ ઈશ્વરસ્ય સુસંવાદં તન્નહિ કિન્તુ સ્વકીયપ્રાણાન્ અપિ દાતું મનોભિરભ્યલષામ, યતો યૂયમ્ અસ્માકં સ્નેહપાત્રાણ્યભવત।
IX હે ભ્રાતરઃ, અસ્માકં શ્રમઃ ક્લેશશ્ચ યુષ્માભિઃ સ્મર્ય્યતે યુષ્માકં કોઽપિ યદ્ ભારગ્રસ્તો ન ભવેત્ તદર્થં વયં દિવાનિશં પરિશ્રામ્યન્તો યુષ્મન્મધ્ય ઈશ્વરસ્ય સુસંવાદમઘોષયામ।
X અપરઞ્ચ વિશ્વાસિનો યુષ્માન્ પ્રતિ વયં કીદૃક્ પવિત્રત્વયથાર્થત્વનિર્દોષત્વાચારિણોઽભવામેત્યસ્મિન્ ઈશ્વરો યૂયઞ્ચ સાક્ષિણ આધ્વે।
XI અપરઞ્ચ યદ્વત્ પિતા સ્વબાલકાન્ તદ્વદ્ વયં યુષ્માકમ્ એકૈકં જનમ્ ઉપદિષ્ટવન્તઃ સાન્ત્વિતવન્તશ્ચ,
XII ય ઈશ્વરઃ સ્વીયરાજ્યાય વિભવાય ચ યુષ્માન્ આહૂતવાન્ તદુપયુક્તાચરણાય યુષ્માન્ પ્રવર્ત્તિતવન્તશ્ચેતિ યૂયં જાનીથ।
XIII યસ્મિન્ સમયે યૂયમ્ અસ્માકં મુખાદ્ ઈશ્વરેણ પ્રતિશ્રુતં વાક્યમ્ અલભધ્વં તસ્મિન્ સમયે તત્ માનુષાણાં વાક્યં ન મત્ત્વેશ્વરસ્ય વાક્યં મત્ત્વા ગૃહીતવન્ત ઇતિ કારણાદ્ વયં નિરન્તરમ્ ઈશ્વરં ધન્યં વદામઃ, યતસ્તદ્ ઈશ્વરસ્ય વાક્યમ્ ઇતિ સત્યં વિશ્વાસિનાં યુષ્માકં મધ્યે તસ્ય ગુણઃ પ્રકાશતે ચ।
XIV હે ભ્રાતરઃ, ખ્રીષ્ટાશ્રિતવત્ય ઈશ્વરસ્ય યાઃ સમિત્યો યિહૂદાદેશે સન્તિ યૂયં તાસામ્ અનુકારિણોઽભવત, તદ્ભુક્તા લોકાશ્ચ યદ્વદ્ યિહૂદિલોકેભ્યસ્તદ્વદ્ યૂયમપિ સ્વજાતીયલોકેભ્યો દુઃખમ્ અલભધ્વં।
XV તે યિહૂદીયાઃ પ્રભું યીશું ભવિષ્યદ્વાદિનશ્ચ હતવન્તો ઽસ્માન્ દૂરીકૃતવન્તશ્ચ, ત ઈશ્વરાય ન રોચન્તે સર્વ્વેષાં માનવાનાં વિપક્ષા ભવન્તિ ચ;
XVI અપરં ભિન્નજાતીયલોકાનાં પરિત્રાણાર્થં તેષાં મધ્યે સુસંવાદઘોષણાદ્ અસ્માન્ પ્રતિષેધન્તિ ચેત્થં સ્વીયપાપાનાં પરિમાણમ્ ઉત્તરોત્તરં પૂરયન્તિ, કિન્તુ તેષામ્ અન્તકારી ક્રોધસ્તાન્ ઉપક્રમતે।
XVII હે ભ્રાતરઃ મનસા નહિ કિન્તુ વદનેન કિયત્કાલં યુષ્મત્તો ઽસ્માકં વિચ્છેદે જાતે વયં યુષ્માકં મુખાનિ દ્રષ્ટુમ્ અત્યાકાઙ્ક્ષયા બહુ યતિતવન્તઃ।
XVIII દ્વિરેકકૃત્વો વા યુષ્મત્સમીપગમનાયાસ્માકં વિશેષતઃ પૌલસ્ય મમાભિલાષોઽભવત્ કિન્તુ શયતાનો ઽસ્માન્ નિવારિતવાન્।
XIX યતોઽસ્માકં કા પ્રત્યાશા કો વાનન્દઃ કિં વા શ્લાઘ્યકિરીટં? અસ્માકં પ્રભો ર્યીશુખ્રીષ્ટસ્યાગમનકાલે તત્સમ્મુખસ્થા યૂયં કિં તન્ન ભવિષ્યથ?
XX યૂયમ્ એવાસ્માકં ગૌરવાનન્દસ્વરૂપા ભવથ।

# III

I અતોઽહં યદા સન્દેહં પુનઃ સોઢું નાશક્નુવં તદાનીમ્ આથીનીનગર એકાકી સ્થાતું નિશ્ચિત્ય

II સ્વભ્રાતરં ખ્રીષ્ટસ્ય સુસંવાદે સહકારિણઞ્ચેશ્વરસ્ય પરિચારકં તીમથિયં યુષ્મત્સમીપમ્ અપ્રેષયં।

III વર્ત્તમાનૈઃ ક્લેશૈઃ કસ્યાપિ ચાઞ્ચલ્યં યથા ન જાયતે તથા તે ત્વયા સ્થિરીક્રિયન્તાં સ્વકીયધર્મ્મમધિ સમાશ્વાસ્યન્તાઞ્ચેતિ તમ્ આદિશં।

IV વયમેતાદૃશે ક્લ◌ેશે નિયુક્તા આસ્મહ ઇતિ યૂયં સ્વયં જાનીથ, યતોઽસ્માકં દુર્ગતિ ર્ભવિષ્યતીતિ વયં યુષ્માકં સમીપે સ્થિતિકાલેઽપિ યુષ્માન્ અબોધયામ, તાદૃશમેવ ચાભવત્ તદપિ જાનીથ।

V તસ્માત્ પરીક્ષકેણ યુષ્માસુ પરીક્ષિતેષ્વસ્માકં પરિશ્રમો વિફલો ભવિષ્યતીતિ ભયં સોઢું યદાહં નાશક્નુવં તદા યુષ્માકં વિશ્વાસસ્ય તત્ત્વાવધારણાય તમ્ અપ્રેષયં।

VI કિન્ત્વધુના તીમથિયો યુષ્મત્સમીપાદ્ અસ્મત્સન્નિધિમ્ આગત્ય યુષ્માકં વિશ્વાસપ્રેમણી અધ્યસ્માન્ સુવાર્ત્તાં જ્ઞાપિતવાન્ વયઞ્ચ યથા યુષ્માન્ સ્મરામસ્તથા યૂયમપ્યસ્માન્ સર્વ્વદા પ્રણયેન સ્મરથ દ્રષ્ટુમ્ આકાઙ્ક્ષધ્વે ચેતિ કથિતવાન્।

VII હે ભ્રાતરઃ, વાર્ત્તામિમાં પ્રાપ્ય યુષ્માનધિ વિશેષતો યુષ્માકં ક્લેશદુઃખાન્યધિ યુષ્માકં વિશ્વાસાદ્ અસ્માકં સાન્ત્વનાજાયત;

VIII યતો યૂયં યદિ પ્રભાવવતિષ્ઠથ તર્હ્યનેન વયમ્ અધુના જીવામઃ।

IX વયઞ્ચાસ્મદીયેશ્વરસ્ય સાક્ષાદ્ યુષ્મત્તો જાતેન યેનાનન્દેન પ્રફુલ્લા ભવામસ્તસ્ય કૃત્સ્નસ્યાનન્દસ્ય યોગ્યરૂપેણેશ્વરં ધન્યં વદિતું કથં શક્ષ્યામઃ?

X વયં યેન યુષ્માકં વદનાનિ દ્રષ્ટું યુષ્માકં વિશ્વાસે યદ્ અસિદ્ધં વિદ્યતે તત્ સિદ્ધીકર્ત્તુઞ્ચ શક્ષ્યામસ્તાદૃશં વરં દિવાનિશં પ્રાર્થયામહે।

XI અસ્માકં તાતેનેશ્વરેણ પ્રભુના યીશુખ્રીષ્ટેન ચ યુષ્મત્સમીપગમનાયાસ્માકં પન્થા સુગમઃ ક્રિયતાં।

XII પરસ્પરં સર્વ્વાંશ્ચ પ્રતિ યુષ્માકં પ્રેમ યુષ્માન્ પ્રતિ ચાસ્માકં પ્રેમ પ્રભુના વર્દ્ધ્યતાં બહુફલં ક્રિયતાઞ્ચ।

XIII અપરમસ્માકં પ્રભુ ર્યીશુખ્રીષ્ટઃ સ્વકીયૈઃ સર્વ્વૈઃ પવિત્રલોકૈઃ સાર્દ્ધં યદાગમિષ્યતિ તદા યૂયં યથાસ્માકં તાતસ્યેશ્વરસ્ય સમ્મુખે પવિત્રતયા નિર્દોષા ભવિષ્યથ તથા યુષ્માકં મનાંસિ સ્થિરીક્રિયન્તાં।

# IV

I હે ભ્રાતરઃ, યુષ્માભિઃ કીદૃગ્ આચરિતવ્યં ઈશ્વરાય રોચિતવ્યઞ્ચ તદધ્યસ્મત્તો યા શિક્ષા લબ્ધા તદનુસારાત્ પુનરતિશયં યત્નઃ ક્રિયતામિતિ વયં પ્રભુયીશુના યુષ્માન્ વિનીયાદિશામઃ।

II યતો વયં પ્રભુયીશુના કીદૃશીરાજ્ઞા યુષ્માસુ સમર્પિતવન્તસ્તદ્ યૂયં જાનીથ।

III ઈશ્વરસ્યાયમ્ અભિલાષો યદ્ યુષ્માકં પવિત્રતા ભવેત્, યૂયં વ્યભિચારાદ્ દૂરે તિષ્ઠત।

IV યુષ્માકમ્ એકૈકો જનઃ સ્વકીયં પ્રાણાધારં પવિત્રં માન્યઞ્ચ રક્ષતુ,

V યે ચ ભિન્નજાતીયા લોકા ઈશ્વરં ન જાનન્તિ ત ઇવ તત્ કામાભિલાષસ્યાધીનં ન કરોતુ।

VI એતસ્મિન્ વિષયે કોઽપ્યત્યાચારી ભૂત્વા સ્વભ્રાતરં ન વઞ્ચયતુ યતોઽસ્માભિઃ પૂર્વ્વં યથોક્તં પ્રમાણીકૃતઞ્ચ તથૈવ પ્રભુરેતાદૃશાનાં કર્મ્મણાં સમુચિતં ફલં દાસ્યતિ।

VII યસ્માદ્ ઈશ્વરોઽસ્માન્ અશુચિતાયૈ નાહૂતવાન્ કિન્તુ પવિત્રત્વાયૈવાહૂતવાન્।

VIII અતો હેતો ર્યઃ કશ્ચિદ્ વાક્યમેતન્ન ગૃહ્લાતિ સ મનુષ્યમ્ અવજાનાતીતિ નહિ યેન સ્વકીયાત્મા યુષ્મદન્તરે સમર્પિતસ્તમ્ ઈશ્વરમ્ એવાવજાનાતિ।

IX ભ્રાતૃષુ પ્રેમકરણમધિ યુષ્માન્ પ્રતિ મમ લિખનં નિષ્પ્રયોજનં યતો યૂયં પરસ્પરં પ્રેમકરણાયેશ્વરશિક્ષિતા લોકા આધ્વે।

X કૃત્સ્ને માકિદનિયાદેશે ચ યાવન્તો ભ્રાતરઃ સન્તિ તાન્ સર્વ્વાન્ પ્રતિ યુષ્માભિસ્તત્ પ્રેમ પ્રકાશ્યતે તથાપિ હે ભ્રાતરઃ, વયં યુષ્માન્ વિનયામહે યૂયં પુન ર્બહુતરં પ્રેમ પ્રકાશયત।

XI અપરં યે બહિઃસ્થિતાસ્તેષાં દૃષ્ટિગોચરે યુષ્માકમ્ આચરણં યત્ મનોરમ્યં ભવેત્ કસ્યાપિ વસ્તુનશ્ચાભાવો યુષ્માકં યન્ન ભવેત્,

XII એતદર્થં યૂયમ્ અસ્મત્તો યાદૃશમ્ આદેશં પ્રાપ્તવન્તસ્તાદૃશં નિર્વ્વિરોધાચારં કર્ત્તું સ્વસ્વકર્મ્મણિ મનાંમિ નિધાતું નિજકરૈશ્ચ કાર્ય્યં સાધયિતું યતધ્વં।

XIII હે ભ્રાતરઃ નિરાશા અન્યે લોકા ઇવ યૂયં યન્ન શોચેધ્વં તદર્થં મહાનિદ્રાગતાન્ લોકાનધિ યુષ્માકમ્ અજ્ઞાનતા મયા નાભિલષ્યતે।

XIV યીશુ ર્મૃતવાન્ પુનરુથિતવાંશ્ચેતિ યદિ વયં વિશ્વાસમસ્તર્હિ યીશુમ્ આશ્રિતાન્ મહાનિદ્રાપ્રાપ્તાન્ લોકાનપીશ્વરોઽવશ્યં તેન સાર્દ્ધમ્ આનેષ્યતિ।

XV યતોઽહં પ્રભો ર્વાક્યેન યુષ્માન્ ઇદં જ્ઞાપયામિ; અસ્માકં મધ્યે યે જનાઃ પ્રભોરાગમનં યાવત્ જીવન્તોઽવશેક્ષ્યન્તે તે મહાનિદ્રિતાનામ્ અગ્રગામિનો ન ભવિષ્યન્તિ;

XVI યતઃ પ્રભુઃ સિંહનાદેન પ્રધાનસ્વર્ગદૂતસ્યોચ્ચૈઃ શબ્દેનેશ્વરીયતૂરીવાદ્યેન ચ સ્વયં સ્વર્ગાદ્ અવરોક્ષ્યતિ તેન ખ્રીષ્ટાશ્રિતા મૃતલોકાઃ પ્રથમમ્ ઉત્થાસ્યાન્તિ।

XVII અપરમ્ અસ્માકં મધ્યે યે જીવન્તોઽવશેક્ષ્યન્તે ત આકાશે પ્રભોઃ સાક્ષાત્કરણાર્થં તૈઃ સાર્દ્ધં મેઘવાહનેન હરિષ્યન્તે; ઇત્થઞ્ચ વયં સર્વ્વદા પ્રભુના સાર્દ્ધં સ્થાસ્યામઃ।

XVIII અતો યૂયમ્ એતાભિઃ કથાભિઃ પરસ્પરં સાન્ત્વયત।

# V

I હે ભ્રાતરઃ, કાલાન્ સમયાંશ્ચાધિ યુષ્માન્ પ્રતિ મમ લિખનં નિષ્પ્રયોજનં,

II યતો રાત્રૌ યાદૃક્ તસ્કરસ્તાદૃક્ પ્રભો ર્દિનમ્ ઉપસ્થાસ્યતીતિ યૂયં સ્વયમેવ સમ્યગ્ જાનીથ।

III શાન્તિ ર્નિર્વ્વિઘ્નત્વઞ્ચ વિદ્યત ઇતિ યદા માનવા વદિષ્યન્તિ તદા પ્રસવવેદના યદ્વદ્ ગર્ભ્ભિનીમ્ ઉપતિષ્ઠતિ તદ્વદ્ અકસ્માદ્ વિનાશસ્તાન્ ઉપસ્થાસ્યતિ તૈરુદ્ધારો ન લપ્સ્યતે।

IV કિન્તુ હે ભ્રાતરઃ, યૂયમ્ અન્ધકારેણાવૃતા ન ભવથ તસ્માત્ તદ્દિનં તસ્કર ઇવ યુષ્માન્ ન પ્રાપ્સ્યતિ।
V સર્વ્વે યૂયં દીપ્તેઃ સન્તાના દિવાયાશ્ચ સન્તાના ભવથ વયં નિશાવંશાસ્તિમિરવંશા વા ન ભવામઃ।
VI અતો ઽપરે યથા નિદ્રાગતાઃ સન્તિ તદ્વદ્ અસ્માભિ ર્ન ભવિતવ્યં કિન્તુ જાગરિતવ્યં સચેતનૈશ્ચ ભવિતવ્યં।
VII યે નિદ્રાન્તિ તે નિશાયામેવ નિદ્રાન્તિ તે ચ મત્તા ભવન્તિ તે રજન્યામેવ મત્તા ભવન્તિ।
VIII કિન્તુ વયં દિવસસ્ય વંશા ભવામઃ; અતો ઽસ્માભિ ર્વક્ષસિ પ્રત્યયપ્રેમરૂપં કવચં શિરસિ ચ પરિત્રાણાશારૂપં શિરસ્ત્રં પરિધાય
સચેતનૈ ર્ભવિતવ્યં।
IX યત ઈશ્વરોઽસ્માન્ ક્રોધે ન નિયુજ્યાસ્માકં પ્રભુના યીશુખ્રીષ્ટેન પરિત્રાણસ્યાધિકારે નિયુ◌ુક્તવાન્,
X જાગ્રતો નિદ્રાગતા વા વયં યત્ તેન પ્રભુના સહ જીવામસ્તદર્થં સોઽસ્માકં કૃતે પ્રાણાન્ ત્યક્તવાન્।
XI અતએવ યૂયં યદ્વત્ કુરુથ તદ્વત્ પરસ્પરં સાન્ત્વયત સુસ્થિરીકુરુધ્વઞ્ચ।
XII હે ભ્રાતરઃ, યુષ્માકં મધ્યે યે જનાઃ પરિશ્રમં કુર્વ્વન્તિ પ્રભો ર્નામ્ના યુષ્માન્ અધિતિષ્ઠન્ત્યુપદિશન્તિ ચ તાન્ યૂયં સમ્મન્યધ્વં।
XIII સ્વકર્મ્મહેતુના ચ પ્રેમ્ના તાન્ અતીવાદૃયધ્વમિતિ મમ પ્રાર્થના, યૂયં પરસ્પરં નિર્વ્વિરોધા ભવત।
XIV હે ભ્રાતરઃ, યુષ્માન્ વિનયામહે યૂયમ્ અવિહિતાચારિણો લોકાન્ ભર્ત્સયધ્વં, ક્ષુદ્રમનસઃ સાન્ત્વયત, દુર્બ્બલાન્ ઉપકુરુત,
સર્વ્વાન્ પ્રતિ સહિષ્ણવો ભવત ચ।
XV અપરં કમપિ પ્રત્યનિષ્ટસ્ય ફલમ્ અનિષ્ટં કેનાપિ યન્ન ક્રિયેત તદર્થં સાવધાના ભવત, કિન્તુ પરસ્પરં સર્વ્વાન્ માનવાંશ્ચ પ્રતિ
નિત્યં હિતાચારિણો ભવત।
XVI સર્વ્વદાનન્દત।
XVII નિરન્તરં પ્રાર્થનાં કુરુધ્વં।
XVIII સર્વ્વવિષયે કૃતજ્ઞતાં સ્વીકુરુધ્વં યત એતદેવ ખ્રીષ્ટયીશુના યુષ્માન્ પ્રતિ પ્રકાશિતમ્ ઈશ્વરાભિમતં।
XIX પવિત્રમ્ આત્માનં ન નિર્વ્વાપયત।
XX ઈશ્વરીયાદેશં નાવજાનીત।
XXI સર્વ્વાણિ પરીક્ષ્ય યદ્ ભદ્રં તદેવ ધારયત।
XXII યત્ કિમપિ પાપરૂપં ભવતિ તસ્માદ્ દૂરં તિષ્ઠત।
XXIII શાન્તિદાયક ઈશ્વરઃ સ્વયં યુષ્માન્ સમ્પૂર્ણત્વેન પવિત્રાન્ કરોતુ, અપરમ્ અસ્મત્પ્રભો ર્યીશુખ્રીષ્ટસ્યાગમનં યાવદ્ યુષ્માકમ્
આત્માનઃ પ્રાણાઃ શરીરાણિ ચ નિખિલાનિ નિર્દોષત્વેન રક્ષ્યન્તાં।
XXIV યો યુષ્માન્ આહ્વયતિ સ વિશ્વસનીયોઽતઃ સ તત્ સાધયિષ્યતિ।
XXV હે ભ્રાતરઃ, અસ્માકં કૃતે પ્રાર્થનાં કુરુધ્વં।
XXVI પવિત્રચુમ્બનેન સર્વ્વાન્ ભ્રાતૃન્ પ્રતિ સત્કુરુધ્વં।
XXVII પત્રમિદં સર્વ્વેષાં પવિત્રાણાં ભ્રાતૃણાં શ્રુતિગોચરે યુષ્માભિઃ પઠ્યતામિતિ પ્રભો ર્નામ્ના યુષ્માન્ શપયામિ।
XXVIII અસ્માકં પ્રભો ર્યીશુખ્રીષ્ટસ્યાનુગ્રહે યુષ્માસુ ભૂયાત્। આમેન્।

# ૨ થિષલનીકિનઃ પત્રં

I પૌલઃ સિલ્વાનસ્તીમથિયશ્ચેતિનામાનો વયમ્ અસ્મદીયતાતમ્ ઈશ્વરં પ્રભું યીશુખ્રીષ્ટઞ્ચાશ્રિતાં થિષલનીકિનાં સમિતિં પ્રતિ પત્રં લિખામઃ।
II અસ્માકં તાત ઈશ્વરઃ પ્રભુ ર્યીશુખ્રીષ્ટશ્ચ યુષ્માસ્વનુગ્રહં શાન્તિઞ્ચ ક્રિયાસ્તાં।
III હે ભ્રાતરઃ, યુષ્માકં કૃતે સર્વ્વદા યથાયોગ્યમ્ ઈશ્વરસ્ય ધન્યવાદો ઽસ્માભિઃ કર્ત્તવ્યઃ, યતો હેતો ર્યુષ્માકં વિશ્વાસ ઉત્તરોત્તરં વર્દ્ધતે પરસ્પરમ્ એકૈકસ્ય પ્રેમ ચ બહુફલં ભવતિ।
IV તસ્માદ્ યુષ્માભિ ર્યાવન્ત ઉપદ્રવક્લેશાઃ સહ્યન્તે તેષુ યદ્ ધૈર્ય્યં યશ્ચ વિશ્વાસઃ પ્રકાશ્યતે તત્કારણાદ્ વયમ્ ઈશ્વરીયસમિતિષુ યુષ્માભિઃ શ્લાઘામહે।
V તચ્ચેશ્વરસ્ય ન્યાયવિચારસ્ય પ્રમાણં ભવતિ યતો યૂયં યસ્ય કૃતે દુઃખં સહધ્વં તસ્યેશ્વરીયરાજ્યસ્ય યોગ્યા ભવથ।
VI યતઃ સ્વકીયસ્વર્ગદૂતાનાં બલૈઃ સહિતસ્ય પ્રભો ર્યીશોઃ સ્વર્ગાદ્ આગમનકાલે યુષ્માકં ક્લેશકેભ્યઃ ક્લેશેન ફલદાનં સાર્દ્ધમસ્માભિશ્ચ
VII ક્લિશ્યમાનેભ્યો યુષ્મભ્યં શાન્તિદાનમ્ ઈશ્વરેણ ન્યાય્યં ભોત્સ્યતે;
VIII તદાનીમ્ ઈશ્વરાનભિજ્ઞેભ્યો ઽસ્મત્પ્રભો ર્યીશુખ્રીષ્ટસ્ય સુસંવાદાગ્રાહકેભ્યશ્ચ લોકેભ્યો જાજ્વલ્યમાનેન વહ્નિના સમુચિતં ફલં યીશુના દાસ્યતે;
IX તે ચ પ્રભો ર્વદનાત્ પરાક્રમયુક્તવિભવાચ્ચ સદાતનવિનાશરૂપં દણ્ડં લપ્સ્યન્તે,
X કિન્તુ તસ્મિન્ દિને સ્વકીયપવિત્રલોકેષુ વિરાજિતું યુષ્માન્ અપરાંશ્ચ સર્વ્વાન્ વિશ્વાસિલોકાન્ વિસ્માપયિતુઞ્ચ સ આગમિષ્યતિ યતો ઽસ્માકં પ્રમાણે યુષ્માભિ ર્વિશ્વાસોઽકારિ।
XI અતોઽસ્માકમ્ ઈશ્વરો યુષ્માન્ તસ્યાહ્વાનસ્ય યોગ્યાન્ કરોતુ સૌજન્યસ્ય શુભફલં વિશ્વાસસ્ય ગુણઞ્ચ પરાક્રમેણ સાધયત્વિતિ પ્રાર્થનાસ્માભિઃ સર્વ્વદા યુષ્મન્નિમિત્તં ક્રિયતે,
XII યતસ્તથા સત્યસ્માકમ્ ઈશ્વરસ્ય પ્રભો ર્યીશુખ્રીષ્ટસ્ય ચાનુગ્રહાદ્ અસ્મત્પ્રભો ર્યીશુખ્રીષ્ટસ્ય નામ્નો ગૌરવં યુષ્માસુ યુષ્માકમપિ ગૌરવં તસ્મિન્ પ્રકાશિષ્યતે।

# II

I હે ભ્રાતરઃ, અસ્માકં પ્રભો ર્યીશુખ્રીષ્ટસ્યાગમનં તસ્ય સમીપે ઽસ્માકં સંસ્થિતિઞ્ચાધિ વયં યુષ્માન્ ઇદં પ્રાર્થયામહે,
II પ્રભેસ્તદ્ દિનં પ્રાયેણોપસ્થિતમ્ ઇતિ યદિ કશ્ચિદ્ આત્મના વાચા વા પત્રેણ વાસ્માકમ્ આદેશં કલ્પયન્ યુષ્માન્ ગદતિ તર્હિ યૂયં તેન ચઞ્ચલમનસ ઉદ્વિગ્નાશ્ચ ન ભવત।
III કેનાપિ પ્રકારેણ કોઽપિ યુષ્માન્ ન વઞ્ચયતુ યતસ્તસ્માદ્ દિનાત્ પૂર્વ્વં ધર્મ્મલોપેનોપસ્યાતવ્યં,
IV યશ્ચ જનો વિપક્ષતાં કુર્વ્વન્ સર્વ્વસ્માદ્ દેવાત્ પૂજનીયવસ્તુશ્ચોન્નંસ્યતે સ્વમ્ ઈશ્વરમિવ દર્શયન્ ઈશ્વરવદ્ ઈશ્વરસ્ય મન્દિર ઉપવેક્ષ્યતિ ચ તેન વિનાશપાત્રેણ પાપપુરુષેણોદેતવ્યં।
V યદાહં યુષ્માકં સન્નિધાવાસં તદાનીમ્ એતદ્ અકથયમિતિ યૂયં કિં ન સ્મરથ?
VI સામ્પ્રતં સ યેન નિવાર્ય્યતે તદ્ યૂયં જાનીથ, કિન્તુ સ્વસમયે તેનોદેતવ્યં।
VII વિધર્મ્મસ્ય નિગૂઢો ગુણ ઇદાનીમપિ ફલતિ કિન્તુ યસ્તં નિવારયતિ સોઽદ્યાપિ દૂરીકૃતો નાભવત્।
VIII તસ્મિન્ દૂરીકૃતે સ વિધર્મ્મ્યુદેષ્યતિ કિન્તુ પ્રભુ ર્યીશુઃ સ્વમુખપવનેન તં વિધ્વંસયિષ્યતિ નિજોપસ્થિતેસ્તેજસા વિનાશયિષ્યતિ ચ।
IX શયતાનસ્ય શક્તિપ્રકાશનાદ્ વિનાશ્યમાનાનાં મધ્યે સર્વ્વવિધાઃ પરાક્રમા ભ્રમિકા આશ્ચર્ય્યક્રિયા લક્ષણાન્યધર્મ્મજાતા સર્વ્વવિધપ્રતારણા ચ તસ્યોપસ્થિતેઃ ફલં ભવિષ્યતિ;
X યતો હેતોસ્તે પરિત્રાણપ્રાપ્તયે સત્યધર્મ્મસ્યાનુરાગં ન ગૃહીતવન્તસ્તસ્માત્ કારણાદ્
XI ઈશ્વરેણ તાન્ પ્રતિ ભ્રાન્તિકરમાયાયાં પ્રેષિતાયાં તે મૃષાવાક્યે વિશ્વસિષ્યન્તિ।
XII યતો યાવન્તો માનવાઃ સત્યધર્મ્મે ન વિશ્વસ્યાધર્મ્મેણ તુષ્યન્તિ તૈઃ સર્વ્વૈ ર્દણ્ડભાજનૈ ર્ભવિતવ્યં।
XIII હે પ્રભોઃ પ્રિયા ભ્રાતરઃ, યુષ્માકં કૃત ઈશ્વરસ્ય ધન્યવાદોઽસ્માભિઃ સર્વ્વદા કર્ત્તવ્યો યત ઈશ્વર આ પ્રથમાદ્ આત્મનઃ પાવનેન સત્યધર્મ્મે વિશ્વાસેન ચ પરિત્રાણાર્થં યુષ્માન્ વરીતવાન્
XIV તદર્થઞ્ચાસ્માભિ ર્ઘોષિતેન સુસંવાદેન યુષ્માન્ આહૂયાસ્માકં પ્રભો ર્યીશુખ્રીષ્ટસ્ય તેજસોઽધિકારિણઃ કરિષ્યતિ।
XV અતો હે ભ્રાતરઃ યૂયમ્ અસ્માકં વાક્યૈઃ પત્રૈશ્ચ યાં શિક્ષાં લબ્ધવન્તસ્તાં કૃત્સ્નાં શિક્ષાં ધારયન્તઃ સુસ્થિરા ભવત।
XVI અસ્માકં પ્રભુ ર્યીશુખ્રીષ્ટસ્તાત ઈશ્વરશ્ચાર્થતો યો યુષ્માસુ પ્રેમ કૃતવાન્ નિત્યાઞ્ચ સાન્ત્વનામ્ અનુગ્રહેણોત્તમપ્રત્યાશાઞ્ચ યુષ્મભ્યં દત્તવાન્
XVII સ સ્વયં યુષ્માકમ્ અન્તઃકરણાનિ સાન્ત્વયતુ સર્વ્વસ્મિન્ સદ્વાક્યે સત્કર્મ્મણિ ચ સુસ્થિરીકરોતુ ચ।

# III

I હે ભ્રાતરઃ, શેષે વદામિ, યૂયમ્ અસ્મભ્યમિદં પ્રાર્થયધ્વં યત્ પ્રભો ર્વાક્યં યુષ્માકં મધ્યે યથા તથૈવાન્યત્રાપિ પ્રચરેત્ માન્યઞ્ચ ભવેત્;
II યચ્ચ વયમ્ અવિવેચકેભ્યો દુષ્ટેભ્યશ્ચ લોકેભ્યો રક્ષાં પ્રાપ્નુયામ યતઃ સર્વ્વેષાં વિશ્વાસો ન ભવતિ।
III કિન્તુ પ્રભુ ર્વિશ્વાસ્યઃ સ એવ યુષ્માન્ સ્થિરીકરિષ્યતિ દુષ્ટસ્ય કરાદ્ ઉદ્ધરિષ્યતિ ચ।
IV યૂયમ્ અસ્માભિ ર્યદ્ આદિશ્યધ્વે તત્ કુરુથ કરિષ્યથ ચેતિ વિશ્વાસો યુષ્માનધિ પ્રભુનાસ્માકં જાયતે।

V ઈશ્વરસ્ય પ્રેમ્નિ ખ્રીષ્ટસ્ય સહિષ્ણુતાયાઞ્ચ પ્રભુઃ સ્વયં યુષ્માકમ્ અન્તઃકરણાનિ વિનયતુ།
VI હે ભ્રાતરઃ, અસ્મત્પ્રભો ર્યીશુખ્રીષ્ટસ્ય નામ્ના વયં યુષ્માન્ ઇદમ્ આદિશામઃ, અસ્મત્તો યુષ્માભિ ર્યા શિક્ષલમ્ભિ તાં વિહાય
કશ્ચિદ્ ભ્રાતા યદ્યવિહિતાચારં કરોતિ તર્હિ યૂયં તસ્માત્ પૃથગ્ ભવત།
VII યતો વયં યુષ્માભિઃ કથમ્ અનુકર્ત્તવ્યાસ્તદ્ યૂયં સ્વયં જાનીથ། યુષ્માકં મધ્યે વયમ્ અવિહિતાચારિણો નાભવામ,
VIII વિનામૂલ્યં કસ્યાપ્યન્નં નાભુંજમહિ કિન્તુ કોઽપિ યદ્ અસ્માભિ ર્ભારગ્રસ્તો ન ભવેત્ તદર્થં શ્રમેણ ક્લેશેન ચ દિવાનિશં કાર્ય્યમ્
અકુર્મ્મ།
IX અત્રાસ્માકમ્ અધિકારો નાસ્તીત્થં નહિ કિન્ત્વસ્માકમ્ અનુકરણાય યુષ્માન્ દૃષ્ટાન્તં દર્શયિતુમ્ ઇચ્છન્તસ્તદ્ અકુર્મ્મ།
X યતો યેન કાર્ય્યં ન ક્રિયતે તેનાહારોઽપિ ન ક્રિયતામિતિ વયં યુષ્મત્સમીપ ઉપસ્થિતિકાલેઽપિ યુષ્માન્ આદિશામ།
XI યુષ્મન્મધ્યે ઽવિહિતાચારિણઃ કેઽપિ જના વિદ્યન્તે તે ચ કાર્ય્યમ્ અકુર્વ્વન્ત આલસ્યમ્ આચરન્તીત્યસ્માભિઃ શ્રૂયતે།
XII તાદૃશાન્ લોકાન્ અસ્મતપ્રભો ર્યીશુખ્રીષ્ટસ્ય નામ્ના વયમ્ ઇદમ્ આદિશામ આજ્ઞાપયામશ્ચ, તે શાન્તભાવેન કાર્ય્યં કુર્વ્વન્તઃ
સ્વકીયમન્નં ભુઞ્જતાં།
XIII અપરં હે ભ્રાતરઃ, યૂયં સદાચરણે ન ક્લામ્યત།
XIV યદિ ચ કશ્ચિદેતત્પત્રે લિખિતામ્ અસ્માકમ્ આજ્ઞાં ન ગૃહ્લાતિ તર્હિ યૂયં તં માનુષં લક્ષયત તસ્ય સંસર્ગં ત્યજત ચ તેન સ
ત્રપિષ્યતે།
XV કિન્તુ તં ન શત્રું મન્યમાના ભ્રાતરમિવ ચેતયત།
XVI શાન્તિદાતા પ્રભુઃ સર્વ્વત્ર સર્વ્વથા યુષ્મભ્યં શાન્તિં દેયાત્། પ્રભુ ર્યુષ્માકં સર્વ્વેષાં સઙ્ગી ભૂયાત્།
XVII નમસ્કાર એષ પૌલસ્ય મમ કરેણ લિખિતોઽભૂત્ સર્વ્વસ્મિન્ પત્ર એતન્મમ ચિહ્નમ્ એતાદૃશૈરક્ષરૈ ર્મયા લિખ્યતે།
XVIII અસ્માકં પ્રભો ર્યીશુખ્રીષ્ટસ્યાનુ◌ૂગ્રહઃ સર્વ્વેષુ યુષ્માસુ ભૂયાત્། આમેન્།

# ૧ તીમથિયં પત્રં

I અસ્માકં ત્રાણકર્ત્તુરીશ્વરસ્યાસ્માકં પ્રત્યાશાભૂમેઃ પ્રભો ર્યીશુખ્રીષ્ટસ્ય ચાજ્ઞાનુસારતો યીશુખ્રીષ્ટસ્ય પ્રેરિતઃ પૌલઃ સ્વકીયં સત્યં ધર્મ્મપુત્રં તીમથિયં પ્રતિ પત્રં લિખતિ।
II અસ્માકં તાત ઈશ્વરોઽસ્માકં પ્રભુ ર્યીશુખ્રીષ્ટશ્ચ ત્વયિ અનુગ્રહં દયાં શાન્તિઞ્ચ કુર્ય્યાસ્તાં।
III માકિદનિયાદેશે મમ ગમનકાલે ત્વમ્ ઇફિષનગરે તિષ્ઠન્ ઇતરશિક્ષા ન ગ્રહીતવ્યા, અનન્તેષૂપાખ્યાનેષુ વંશાવલિષુ ચ યુષ્માભિ ર્મનો ન નિવેશિતવ્યમ્
IV ઇતિ કાંશ્ચિત્ લોકાન્ યદ્ ઉપદિશેરેતત્ મયાદિષ્ટોઽભવઃ, યતઃ સર્વ્વૈરેતૈ ર્વિશ્વાસયુક્તેશ્વરીયનિષ્ઠા ન જાયતે કિન્તુ વિવાદો જાયતે।
V ઉપદેશસ્ય ત્વભિપ્રેતં ફલં નિર્મ્મલાન્તઃકરણેન સત્સંવેદેન નિષ્કપટવિશ્વાસેન ચ યુક્તં પ્રેમ।
VI કેચિત્ જનાશ્ચ સર્વ્વાણ્યેતાનિ વિહાય નિરર્થકકથાનામ્ અનુગમનેન વિપથગામિનોઽભવન્,
VII યદ્ ભાષન્તે યચ્ચ નિશ્ચિન્વન્તિ તન્ન બુધ્યમાના વ્યવસ્થોપદેષ્ટારો ભવિતુમ્ ઇચ્છન્તિ।
VIII સા વ્યવસ્થા યદિ યોગ્યરૂપેણ ગૃહ્યતે તર્હ્યુત્તમા ભવતીતિ વયં જાનીમઃ।
IX અપરં સા વ્યવસ્થા ધાર્મ્મિકસ્ય વિરુદ્ધા ન ભવતિ કિન્ત્વધાર્મ્મિકો ઽવાધ્યો દુષ્ટઃ પાપિષ્ઠો ઽપવિત્રો ઽશુચિઃ પિતૃહન્તા માતૃહન્તા નરહન્તા
X વેશ્યાગામી પુંમૈથુની મનુષ્યવિક્રેતા મિથ્યાવાદી મિથ્યાશપથકારી ચ સર્વ્વેષામેતેષાં વિરુદ્ધા,
XI તથા સચ્ચિદાનન્દેશ્વરસ્ય યો વિભવયુક્તઃ સુસંવાદો મયિ સમર્પિતસ્તદનુયાયિહિતોપદેશસ્ય વિપરીતં યત્ કિઞ્ચિદ્ ભવતિ તદ્વિરુદ્ધા સા વ્યવસ્થેતિ તદ્ગ્રાહિણા જ્ઞાતવ્યં।
XII મહ્યં શક્તિદાતા યોઽસ્માકં પ્રભુઃ ખ્રીષ્ટયીશુસ્તમહં ધન્યં વદામિ।
XIII યતઃ પુરા નિન્દક ઉપદ્રાવી હિંસકશ્ચ ભૂત્વાપ્યહં તેન વિશ્વાસ્યો ઽમન્યે પરિચારકત્વે ન્યયુજ્યે ચ। તદ્ અવિશ્વાસાચરણમ્ અજ્ઞાનેન મયા કૃતમિતિ હેતોરહં તેનાનુકમ્પિતોઽભવં।
XIV અપરં ખ્રીષ્ટે યીશૌ વિશ્વાસપ્રેમભ્યાં સહિતોઽસ્મત્પ્રભોરનુગ્રહો ઽતીવ પ્રચુરોઽભત્।
XV પાપિનઃ પરિત્રાતું ખ્રીષ્ટો યીશુ ર્જગતિ સમવતીર્ણોઽભવત્, એષા કથા વિશ્વાસનીયા સર્વ્વૈ ગ્રહણીયા ચ।
XVI તેષાં પાપિનાં મધ્યેઽહં પ્રથમ આસં કિન્તુ યે માનવા અનન્તજીવનપ્રાપ્ત્યર્થં તસ્મિન્ વિશ્વસિષ્યન્તિ તેષાં દૃષ્ટાન્તે મયિ પ્રથમે યીશુના ખ્રીષ્ટેન સ્વકીયા કૃત્સ્ના ચિરસહિષ્ણુતા યત્ પ્રકાશ્યતે તદર્થમેવાહમ્ અનુકમ્પાં પ્રાપ્તવાન્।
XVII અનાદિરક્ષયોઽદૃશ્યો રાજા યોઽદ્વિતીયઃ સર્વ્વજ્ઞ ઈશ્વરસ્તસ્ય ગૌરવં મહિમા ચાનન્તકાલં યાવદ્ ભૂયાત્। આમેન્।
XVIII હે પુત્ર તીમથિય ત્વયિ યાનિ ભવિષ્યદ્વાક્યાનિ પુરા કથિતાનિ તદનુસારાદ્ અહમ્ એનમાદેશં ત્વયિ સમર્પયામિ, તસ્યાભિપ્રાયોઽયં યત્ત્વં તૈ ર્વાક્યૈરુત્તમયુદ્ધં કરોષિ
XIX વિશ્વાસં સત્સંવેદઞ્ચ ધારયસિ ચ। અનયોઃ પરિત્યાગાત્ કેષાઞ્ચિદ્ વિશ્વાસતરી ભગ્નાભવત્।
XX હુમિનાયસિકન્દરૌ તેષાં યૌ દ્વૌ જનૌ, તૌ યદ્ ધર્મનિન્દાં પુન ર્ન કર્त्तું શિક્ષેતે તદર્થં મયા શયતાનસ્ય કરે સમર્પિતૌ।

## II

I મમ પ્રથમ આદેશોઽયં, પ્રાર્થનાવિનયનિવેદનધન્યવાદાઃ કર્ત્તવ્યાઃ,
II સર્વ્વેષાં માનવાનાં કૃતે વિશેષતો વયં યત્ શાન્તત્વેન નિર્વ્વિરોધત્વેન ચેશ્વરભક્તિં વિનીતત્વઞ્ચાચરન્તઃ કાલં યાપયામસ્તદર્થં નૃપતીનામ્ ઉચ્ચપદસ્થાનાઞ્ચ કૃતે તે કર્ત્તવ્યાઃ।
III યતોઽસ્માકં તારકસ્યેશ્વરસ્ય સાક્ષાત્ તદેવોત્તમં ગ્રાહ્યઞ્ચ ભવતિ,
IV સ સર્વ્વેષાં માનવાનાં પરિત્રાણં સત્યજ્ઞાનપ્રાપ્તિઞ્ચેચ્છતિ।
V યત એકોઽદ્વિતીય ઈશ્વરો વિદ્યતે કિઞ્ચેશ્વરે માનવેષુ ચૈકો ઽદ્વિતીયો મધ્યસ્થઃ
VI સ નરાવતારઃ ખ્રીષ્ટો યીશુ ર્વિદ્યતે યઃ સર્વ્વેષાં મુક્તે ર્મૂલ્યમ્ આત્મદાનં કૃતવાન્। એતેન યેન પ્રમાણેનોપયુક્તે સમયે પ્રકાશિતવ્યં,
VII તદ્ઘોષયિતા દૂતો વિશ્વાસે સત્યધર્મ્મે ચ ભિન્નજાતીયાનામ્ ઉપદેશકશ્ચાહં ન્યયૂજ્યે, એતદહં ખ્રીષ્ટસ્ય નામ્ના યથાતથ્યં વદામિ નાનૃતં કથયામિ।
VIII અતો મમાભિમતમિદં પુરુષૈઃ ક્રોધસન્દેહૌ વિના પવિત્રકરાન્ ઉત્તોલ્ય સર્વ્વસ્મિન્ સ્થાને પ્રાર્થના ક્રિયતાં।
IX તદ્વત્ નાર્ય્યોઽપિ સલજ્જાઃ સંયતમનસશ્ચ સત્યો યોગ્યમાચ્છાદનં પરિદધતુ કિઞ્ચ કેશસંસ્કારૈઃ કણકમુક્તાભિ ર્મહાર્ઘ્યપરિચ્છદૈશ્ચાત્મભૂષણં ન કુર્વ્વત્યઃ
X સ્વીકૃતેશ્વરભક્તીનાં યોષિતાં યોગ્યૈઃ સત્યર્મ્મભિઃ સ્વભૂષણં કુર્વ્વતાં।
XI નારી સમ્પૂર્ણવિનીતત્વેન નિર્વિરોધં શિક્ષતાં।
XII નાર્ય્યાઃ શિક્ષાદાનં પુરુષાયાજ્ઞાદાનં વાહં નાનુજાનામિ તયા નિર્વ્વિરો◌ેધત્વમ્ આચરિતવ્યં।
XIII યતઃ પ્રથમમ્ આદમસ્તતઃ પરં હવાયાઃ સૃષ્ટિ ર્બભૂવ।
XIV કિઞ્ચાદમ્ ભ્રાન્તિયુક્તો નાભવત્ યોષિદેવ ભ્રાન્તિયુક્તા ભૂત્વાત્યાચારિણી બભૂવ।
XV તથાપિ નારીગણો યદિ વિશ્વાસે પ્રેમ્નિ પવિત્રતાયાં સંયતમનસિ ચ તિષ્ઠતિ તર્હ્યપત્યપ્રસવવર્ત્મના પરિત્રાણં પ્રાપ્સ્યતિ।

## III

I યદિ કશ્ચિદ્ અધ્યક્ષપદમ્ આકાઙ્ક્ષતે તર્હિ સ ઉત્તમં કર્મ્મ લિપ્સત ઇતિ સત્યં।
II અતોઽધ્યક્ષેણાનિન્દિતેનૈકસ્યા યોષિતો ભર્ત્રા પરિમિતભોગેન સંયતમનસા સભ્યેનાતિથિસેવકેન શિક્ષણે નિપુણેન

III ન મદ્યપેન ન પ્રહારકેણ કિન્તુ મૃદુભાવેન નિર્વ્વિવાદેન નિર્લોભેન

IV સ્વપરિવારાણામ્ ઉત્તમશાસકેન પૂર્ણવિનીતત્વાદ્ વશ્યાનાં સન્તાનાનાં નિયન્ત્રા ચ ભવિતવ્યં।

V યત આત્મપરિવારાન્ શાસિતું યો ન શક્નોતિ તેનેશ્વરસ્ય સમિતેસ્તત્ત્વાવધારણં કથં કારિષ્યતે?

VI અપરં સ ગર્વ્વિતો ભૂત્વા યત્ શયતાન ઇવ દણ્ડયોગ્યો ન ભવેત્ તદર્થં તેન નવશિષ્યેણ ન ભવિતવ્યં।

VII યચ્ચ નિન્દાયાં શયતાનસ્ય જાલે ચ ન પતેત્ તદર્થં તેન બહિઃસ્થલોકાનામપિ મધ્યે સુખ્યાતિયુક્તેન ભવિતવ્યં।

VIII તદ્વત્ પરિચારકૈરપિ વિનીતૈ ર્દ્વિવિધવાક્યરહિતૈ ર્બહુમદ્યપાને ઽનાસક્તૈ ર્નિર્લોભૈશ્ચ ભવિતવ્યં,

IX નિર્મ્મલસંવેદેન ચ વિશ્વાસસ્ય નિગૂઢવાક્યં ધાતિવ્યઞ્ચ।

X અગ્રે તેષાં પરીક્ષા ક્રિયતાં તતઃ પરમ્ અનિન્દિતા ભૂત્વા તે પરિચર્ય્યાં કુર્વ્વન્તુ।

XI અપરં યોષિદ્ભિરપિ વિનીતાભિરનપવાદિકાભિઃ સતર્કાભિઃ સર્વ્વત્ર વિશ્વાસ્યાભિશ્ચ ભવિતવ્યં।

XII પરિચારકા એકૈકયોષિતો ભર્ત્તારો ભવેયુઃ, નિજસન્તાનાનાં પરિજનાનાઞ્ચ સુશાસનં કુર્ય્યુશ્ચ।

XIII યતઃ સા પરિચર્ય્યા યૈ ર્ભદ્રરૂપેણ સાધ્યતે તે શ્રેષ્ઠપદં પ્રાપ્નુવન્તિ ખ્રીષ્ટે યીશૌ વિશ્વાસેન મહોત્સુકા ભવન્તિ ચ।

XIV ત્વાં પ્રત્યેતત્પત્રલેખનસમયે શીઘ્રં ત્વત્સમીપગમનસ્ય પ્રત્યાશા મમ વિદ્યતે।

XV યદિ વા વિલમ્બેય તર્હીશ્વરસ્ય ગૃહે ઽર્થતઃ સત્યધર્મ્મસ્ય સ્તમ્ભભિત્તિમૂલસ્વરૂપાયામ્ અમરેશ્વરસ્ય સમિતૌ ત્વયા કીદૃશ
આચારઃ કર્ત્તવ્યસ્તત્ જ્ઞાતું શક્ષ્યતે।

XVI અપરં યસ્ય મહત્ત્વં સર્વ્વસ્વીકૃતમ્ ઈશ્વરભક્તેસ્તત્ નિગૂઢવાક્યમિદમ્ ઈશ્વરો માનવદેહે પ્રકાશિત આત્મના સપુણ્યીકૃતો
દૂતૈઃ સન્દૃષ્ટઃ સર્વ્વજાતીયાનાં નિકટે ઘોષિતો જગતો વિશ્વાસપાત્રીભૂતસ્તેજઃપ્રાપ્તયે સ્વર્ગં નીતશ્ચેતિ।

# IV

I પવિત્ર આત્મા સ્પષ્ટમ્ ઇદં વાક્યં વદતિ ચરમકાલે કતિપયલોકા વહ્નિનાઙ્કિતત્વાત્

II કઠોરમનસાં કાપટ્યાદ્ અનૃતવાદિનાં વિવાહનિષેધકાનાં ભક્ષ્યવિશેષનિષેધકાનાઞ્ચ

III ભૂતસ્વરૂપાણાં શિક્ષાયાં ભ્રમકાત્મનાં વાક્યેષુ ચ મનાંસિ નિવેશ્ય ધર્મ્માદ્ ભ્રંશિષ્યન્તે। તાનિ તુ ભક્ષ્યાણિ વિશ્વાસિનાં
સ્વીકૃતસત્યધર્મ્માણાઞ્ચ ધન્યવાદસહિતાય ભોગાયેશ્વરેણ સસૃજિરે।

IV યત ઈશ્વરેણ યદ્યત્ સૃષ્ટં તત્ સર્વ્વમ્ ઉત્તમં યદિ ચ ધન્યવાદેન ભુજ્યતે તર્હિ તસ્ય કિમપિ નાગ્રાહ્યં ભવતિ,

V યત ઈશ્વરસ્ય વાક્યેન પ્રાર્થનયા ચ તત્ પવિત્રીભવતિ।

VI એતાનિ વાક્યાનિ યદિ ત્વં ભ્રાતૃન્ જ્ઞાપયેસ્તર્હિ યીશુખ્રીષ્ટસ્યોત્તમઃ પરિચારકો ભવિષ્યસિ યો વિશ્વાસો હિતોપદેશશ્ચ ત્વયા
ગૃહીતસ્તદીયવાક્યૈરાપ્યાયિષ્યસે ચ।

VII યાન્યુપાખ્યાનાનિ દુર્ભાવાનિ વૃદ્ધયોષિતામેવ યોગ્યાનિ ચ તાનિ ત્વયા વિસૃજ્યન્તામ્ ઈશ્વરભક્તયે યત્નઃ ક્રિયતાઞ્ચ।

VIII યતઃ શારીરિકો યત્નઃ સ્વલ્પફલદો ભવતિ કિન્ત્વીશ્વરભક્તિરૈહિકપારત્રિકજીવનયોઃ પ્રતિજ્ઞાયુક્તા સતી સર્વ્વત્ર ફલદા
ભવતિ।

IX વાક્યમેતદ્ વિશ્વસનીયં સર્વ્વૈ ર્ગ્રહણીયઞ્ચ વયઞ્ચ તદર્થમેવ શ્રામ્યામો નિન્દાં ભુંજ્મહે ચ।

X યતો હેતોઃ સર્વ્વમાનવાનાં વિશેષતો વિશ્વાસિનાં ત્રાતા યોઽમર ઈશ્વરસ્તસ્મિન્ વયં વિશ્વસામઃ।

XI ત્વમ્ એતાનિ વાક્યાનિ પ્રચારય સમુપદિશ ચ।

XII અલ્પવયષ્કત્વાત્ કેનાપ્યવજ્ઞેયો ન ભવ કિન્ત્વાલાપેનાચરણેન પ્રેમ્ના સદાત્મત્વેન વિશ્વાસેન શુચિત્વેન ચ વિશ્વાસિનામ્
આદર્શો ભવ।

XIII યાવન્નાહમ્ આગમિષ્યામિ તાવત્ ત્વ પાઠે ચેતયને ઉપદેશે ચ મનો નિધત્સ્વ।

XIV પ્રાચીનગણહસ્તાર્પણસહિતેન ભવિષ્યદ્વાક્યેન યદ્દાનં તુભ્યં વિશ્રાણિતં તવાન્તઃસ્થે તસ્મિન્ દાને શિથિલમના મા ભવ।

XV એતેષુ મનો નિવેશય, એતેષુ વર્ત્તસ્વ, ઇત્થઞ્ચ સર્વ્વવિષયે તવ ગુણવૃદ્ધિઃ પ્રકાશતાં।

XVI સ્વસ્મિન્ ઉપદેશે ચ સાવધાનો ભૂત્વાવતિષ્ઠસ્વ તત્ કૃત્વા ત્વયાત્મપરિત્રાણં શ્રોતૃણાઞ્ચ પરિત્રાણં સાધયિષ્યતે।

# V

I ત્વં પ્રાચીનં ન ભર્ત્સય કિન્તુ તં પિતરમિવ યૂનશ્ચ ભ્રાતૃનિવ

II વૃદ્ધાઃ સ્ત્રિયશ્ચ માતૃનિવ યુવતીશ્ચ પૂર્ણશુચિત્વેન ભગિનીરિવ વિનયસ્વ।

III અપરં સત્યવિધવાઃ સમ્મન્યસ્વ।

IV કસ્યાશ્ચિદ્ વિધવાયા યદિ પુત્રાઃ પૌત્રા વા વિદ્યન્તે તર્હિ તે પ્રથમતઃ સ્વીયપરિજનાન્ સેવિતું પિત્રોઃ પ્રત્યુપકર્ત્તુઞ્ચ શિક્ષન્તાં
યતસ્તદેવેશ્વરસ્ય સાક્ષાદ્ ઉત્તમં ગ્રાહ્યઞ્ચ કર્મ્મ।

V અપરં યા નારી સત્યવિધવા નાથહીના ચાસ્તિ સા ઈશ્વરસ્યાશ્રયે તિષ્ઠન્તી દિવાનિશં નિવેદનપ્રાર્થનાભ્યાં કાલં યાપયતિ।

VI કિન્તુ યા વિધવા સુખભોગાસક્તા સા જીવત્યપિ મૃતા ભવતિ।

VII અતએવ તા યદ્ અનિન્દિતા ભવેયૂસ્તદર્થમ્ એતાનિ ત્વયા નિદિશ્યન્તાં।

VIII યદિ કશ્ચિત્ સ્વજાતીયાન્ લોકાન્ વિશેષતઃ સ્વીયપરિજનાન્ ન પાલયતિ તર્હિ સ વિશ્વાસાદ્ ભ્રષ્ટો ઽપ્યધમશ્ચ ભવતિ।

IX વિધવાવર્ગે યસ્યા ગણના ભવતિ તયા ષષ્ટિવત્સરેભ્યો ન્યૂનવયસ્કયા ન ભવિતવ્યં; અપરં પૂર્વ્વમ્ એકસ્વામિકા ભૂત્વા

X સા યત્ શિશુપોષણેનાતિથિસેવનેન પવિત્રલોકાનાં ચરણપ્રક્ષાલનેન ક્લિષ્ટાનામ્ ઉપકારેણ સર્વ્વવિધસત્કર્મ્માચરણેન ચ
સત્કર્મ્મકરણાત્ સુખ્યાતિપ્રાપ્તા ભવેત્ તદપ્યાવશ્યકં।

XI કિન્તુ યુવતી ર્વિધવા ન ગૃહાણ યતઃ ખ્રીષ્ટસ્ય વૈપરીત્યેન તાસાં દર્પે જાતે તા વિવાહમ્ ઇચ્છન્તિ।

XII તસ્માચ્ચ પૂર્વ્વધર્મ્મં પરિત્યજ્ય દણ્ડનીયા ભવન્તિ।

XIII અનન્તરં તા ગૃહાદ્ ગૃહં પર્ય્યટન્ત્ય આલસ્યં શિક્ષન્તે કેવલમાલસ્યં નહિ કિન્ત્વનર્થકાલાપં પરાધિકારચર્ચ્ચાઞ્ચાપિ શિક્ષમાણા અનુચિતાનિ વાક્યાનિ ભાષન્તે।

XIV અતો મમેચ્છેયં યુવત્યો વિધવા વિવાહં કુર્વ્વતામ્ અપત્યવત્યો ભવન્તુ ગૃહકર્મ્મ કુર્વ્વતાઞ્ચેત્થં વિપક્ષાય કિમપિ નિન્દાદ્વારં ન દદતુ।

XV યત ઇતઃ પૂર્વ્વમ્ અપિ કાશ્ચિત્ શયતાનસ્ય પશ્ચાદ્ગામિન્યો જાતાઃ।

XVI અપરં વિશ્વાસિન્યા વિશ્વાસિનો વા કસ્યાપિ પરિવારાણાં મધ્યે યદિ વિધવા વિદ્યન્તે તર્હિ સ તાઃ પ્રતિપાલયતુ તસ્માત્ સમિતૌ ભારે ઽનારોપિતે સત્યવિધવાનાં પ્રતિપાલનં કર્ત્તું તયા શક્યતે।

XVII યે પ્રાઞ્ચઃ સમિતિં સમ્યગ્ અધિતિષ્ઠન્તિ વિશેષત ઈશ્વરવાક્યેનોપદેશેન ચ યે યત્નં વિદધતે તે દ્વિગુણસ્યાદરસ્ય યોગ્યા માન્યન્તાં।

XVIII યસ્માત્ શાસ્ત્રે લિખિતમિદમાસ્તે, ત્વં શસ્યમર્દ્દકવૃષસ્યાસ્યં મા બધાનેતિ, અપરમપિ કાર્ય્યકૃદ્ વેતનસ્ય યોગ્યો ભવતીતિ।

XIX દ્વૌ ત્રીન્ વા સાક્ષિણો વિના કસ્યાચિત્ પ્રાચીનસ્ય વિરુદ્ધમ્ અભિયોગસ્ત્વયા ન ગૃહ્યતાં।

XX અપરં યે પાપમાચરન્તિ તાન્ સર્વ્વેષાં સમક્ષં ભર્త્સયસ્વ તેનાપરેષામપિ ભીતિ ર્જનિષ્યતે।

XXI અહમ્ ઈશ્વરસ્ય પ્રભો ર્યીશુખ્રીષ્ટસ્ય મનોનીતદિવ્યદૂતાનાઞ્ચ ગોચરે ત્વામ્ ઇદમ્ આજ્ઞાપયામિ ત્વં કસ્યાપ્યનુરોધેન કિમપિ ન કુર્વ્વન્ વિનાપક્ષપાતમ્ એતાન વિધીન્ પાલય।

XXII કસ્યાપિ મૂર્દ્ધ્નિ હસ્તાપર્ણં ત્વરયા માકાર્ષીઃ। પરપાપાનાઞ્ચાંશી મા ભવ। સ્વં શુચિં રક્ષ।

XXIII અપરં તવોદરપીડાયાઃ પુનઃ પુન દુર્બ્બલતાયાશ્ચ નિમિત્તં કેવલં તોયં ન પિવન્ કિઞ્ચિન્ મદ્યં પિવ।

XXIV કેષાઞ્ચિત્ માનવાનાં પાપાનિ વિચારાત્ પૂર્વ્વં કેષાઞ્ચિત્ પશ્ચાત્ પ્રકાશન્તે।

XXV તથૈવ સત્કર્મ્માણ્યપિ પ્રકાશન્તે તદન્યથા સતિ પ્રચ્છન્નાનિ સ્થાતું ન શક્નુવન્તિ।

# VI

I યાવન્તો લોકા યુગધારિણો દાસાઃ સન્તિ તે સ્વસ્વસ્વામિનં પૂર્ણસમાદરયોગ્યં મન્યન્તાં નો ચેદ્ ઈશ્વરસ્ય નામ્ન ઉપદેશસ્ય ચ નિન્દા સમ્ભવિષ્યતિ।

II યેષાઞ્ચ સ્વામિનો વિશ્વાસિનઃ ભવન્તિ તૈસ્તે ભ્રાતૃત્વાત્ નાવજ્ઞેયાઃ કિન્તુ તે કર્મ્મફલભોગિનો વિશ્વાસિનઃ પ્રિયાશ્ચ ભવન્તીતિ હેતોઃ સેવનીયા એવ, ત્વમ્ એતાનિ શિક્ષય સમુપદિશ ચ।

III યઃ કશ્ચિદ્ ઇતરશિક્ષાં કરોતિ, અસ્માકં પ્રભો ર્યીશુખ્રીષ્ટસ્ય હિતવાક્યાનીશ્વરભક્તે ર્યોગ્યાં શિક્ષાઞ્ચ ન સ્વીકરોતિ

IV સ દર્પધ્માતઃ સર્વ્વથા જ્ઞાનહીનશ્ચ વિવાદૈ ર્વાગ્યુદ્ધૈશ્ચ રોગયુક્તશ્ચ ભવતિ।

V તાદૃશાદ્ ભાવાદ્ ઈર્ષ્યાવિરોધાપવાદદુષ્ટાસૂયા ભ્રષ્ટમનસાં સત્યજ્ઞાનહીનાનામ્ ઈશ્વરભક્તિં લાભોપાયમ્ ઇવ મન્યમાનાનાં લોકાનાં વિવાદાશ્ચ જાયન્તે તાદૃશેભ્યો લોકેભ્યસ્ત્વં પૃથક્ તિષ્ઠ।

VI સંયતેચ્છયા યુક્તા યેશ્વરભક્તિઃ સા મહાલાભોપાયો ભવતીતિ સત્યં।

VII એતજ્જગત્પ્રવેશનકાલેઽસ્માભિઃ કિમપિ નાનાયિ તત્તયજનકાલેઽપિ કિમપિ નેતું ન શક્ષ્યત ઇતિ નિશ્ચિતં।

VIII અતએવ ખાદ્યાન્યાચ્છાદનાનિ ચ પ્રાપ્યાસ્માભિઃ સન્તુષ્ટૈ ર્ભવિતવ્યં।

IX યે તુ ધનિનો ભવિતું ચેષ્ટન્તે તે પરીક્ષાયામ્ ઉન્માથે પતન્તિ યે ચાભિલાષા માનવાન્ વિનાશે નરકે ચ મજ્જયન્તિ તાદૃશેષ્વજ્ઞાનાહિતાભિલાષેષ્વપિ પતન્તિ।

X યતોઽર્થસ્પૃહા સર્વ્વેષાં દુરિતાનાં મૂલં ભવતિ તામવલમ્બ્ય કેચિદ્ વિશ્વાસાદ્ અભ્રંશન્ત નાનાક્લેશૈશ્ચ સ્વાન્ અવિધ્યન્।

XI હે ઈશ્વરસ્ય લોક ત્વમ્ એતેભ્યઃ પલાય્ય ધર્મ્મ ઈશ્વરભક્તિ ર્વિશ્વાસઃ પ્રેમ સહિષ્ણુતા ક્ષાન્તિશ્ચૈતાન્યાચર।

XII વિશ્વાસરૂપમ્ ઉત્તમયુદ્ધં કુરુ, અનન્તજીવનમ્ આલમ્બસ્વ યતસ્તદર્થં ત્વમ્ આહૂતો ઽભવઃ, બહુસાક્ષિણાં સમક્ષઞ્ચોત્તમાં પ્રતિજ્ઞાં સ્વીકૃતવાન્।

XIII અપરં સર્વ્વેષાં જીવયિતુરીશ્વરસ્ય સાક્ષાદ્ યશ્ચ ખ્રીષ્ટો યીશુઃ પન્તીયપીલાતસ્ય સમક્ષમ્ ઉત્તમાં પ્રતિજ્ઞાં સ્વીકૃતવાન્ તસ્ય સાક્ષાદ્ અહં ત્વામ્ ઇદમ્ આજ્ઞાપયામિ।

XIV ઈશ્વરેણ સ્વસમયે પ્રકાશિતવ્યમ્ અસ્માકં પ્રભો ર્યીશુખ્રીષ્ટસ્યાગમનં યાવત્ ત્વયા નિષ્કલઙ્કત્વેન નિર્દ્દોષત્વેન ચ વિધી રક્ષ્યતાં।

XV સ ઈશ્વરઃ સચ્ચિદાનન્દઃ, અદ્વિતીયસમ્રાટ્, રાજ્ઞાં રાજા, પ્રભૂનાં પ્રભુઃ,

XVI અમરતાયા અદ્વિતીય આકરઃ, અગમ્યતેજોનિવાસી, મર્त્ત્યાનાં કેનાપિ ન દૃષ્ટઃ કેનાપિ ન દૃશ્યશ્ચ। તસ્ય ગૌરવપરાક્રમૌ સદાતનૌ ભૂયાસ્તાં। આમેન્।

XVII ઇહલોકે યે ધનિનસ્તે ચિત્તસમુન્નતિં ચપલે ધને વિશ્વાસઞ્ચ ન કુર્વ્વતાં કિન્તુ ભોગાર્થમ્ અસ્મભ્યં પ્રચુરત્વેન સર્વ્વદાતા

XVIII યોઽમર ઈશ્વરસ્તસ્મિન્ વિશ્વસન્તુ સદાચારં કુર્વ્વન્તુ સત્કર્મ્મધનેન ધનિનો સુકલા દાતારશ્ચ ભવન્તુ,

XIX યથા ચ સત્યં જીવનં પાપ્નુયુસ્તથા પારત્રિકામ્ ઉત્તમસમ્પદં સઞ્ચિન્વન્ત્વેતિ ત્વયાદિશ્યન્તાં।

XX હે તીમથિય, ત્વમ્ ઉપનિધિં ગોપય કાલ્પનિકવિદ્યાયા અપવિત્રં પ્રલાપં વિરોધોક્તિઞ્ચ ત્યજ ચ,

XXI યતઃ કતિપયા લોકાસ્તાં વિદ્યામવલમ્બ્ય વિશ્વાસાદ્ ભ્રષ્ટા અભવન। પ્રસાદસ્તવ સહાયો ભૂયાત્। આમેન્।

# ૨ તીમથિયં પત્રં

I ખ્રીષ્ટેન યીશુના યા જીવનસ્ય પ્રતિજ્ઞા તામધીશ્વરસ્યેચ્છયા યીશોઃ ખ્રીષ્ટસ્યૈકઃ પ્રેરિતઃ પૌલોઽહં સ્વકીયં પ્રિયં ધર્મ્મપુત્રં તીમથિયં પ્રતિ પત્રં લિખામિ।
II તાત ઈશ્વરોઽસ્માકં પ્રભુ ર્યીશુખ્રીષ્ટશ્ચ ત્વયિ પ્રસાદં દયાં શાન્તિઞ્ચ ક્રિયાસ્તાં।
III અહમ્ આ પૂર્વ્વપુરુષાત્ યમ્ ઈશ્વરં પવિત્રમનસા સેવે તં ધન્યં વદનં કથયામિ, અહમ્ અહોરાત્રં પ્રાર્થનાસમયે ત્વાં નિરન્તરં સ્મરામિ।
IV યશ્ચ વિશ્વાસઃ પ્રથમે લોયીનામિકાયાં તવ માતામહ્યામ્ ઉનીકીનામિકાયાં માતરિ ચાતિષ્ઠત્ તવાન્તરેઽપિ તિષ્ઠતીતિ મન્યે
V તવ તં નિષ્કપટં વિશ્વાસં મનસિ કુર્વ્વન્ તવાશ્રુપાતં સ્મરન્ યથાનન્દેન પ્રફલ્લો ભવેયં તદર્થં તવ દર્શનમ્ આકાઙ્ક્ષે।
VI અતો હેતો ર્મમ હસ્તાર્પણેન લબ્ધો ય ઈશ્વરસ્ય વરસ્ત્વયિ વિદ્યતે તમ્ ઉજ્જ્વાલયિતું ત્વાં સ્મારયામિ।
VII યત ઈશ્વરોઽસ્મભ્યં ભયજનકમ્ આત્માનમ્ અદત્ત્વા શક્તિપ્રેમસતર્કતાનામ્ આકરમ્ આત્માનં દત્તવાન્।
VIII અતએવાસ્માકં પ્રભુમધિ તસ્ય વન્દિદાસં મામધિ ચ પ્રમાણં દાતું ન ત્રપસ્વ કિન્ત્વીશ્વરીયશક્ત્યા સુસંવાદસ્ય કૃતે દુઃખસ્ય સહભાગી ભવ।
IX સોઽસ્માન્ પરિત્રાણપાત્રાણિ કૃતવાન્ પવિત્રેણાહ્વાનેનાહૂતવાંશ્ચ; અસ્મત્કર્મ્મહેતુનેતિ નહિ સ્વીયનિરૂપાણસ્ય પ્રસાદસ્ય ચ કૃતે તત્ કૃતવાન્। સ પ્રસાદઃ સૃષ્ટેઃ પૂર્વ્વકાલે ખ્રીષ્ટેન યીશુનાસ્મભ્યમ્ અદાયિ,
X કિન્ત્વધુનાસ્માકં પરિત્રાતુ ર્યીશોઃ ખ્રીષ્ટસ્યાગમનેન પ્રાકાશત। ખ્રીષ્ટો મૃત્યું પરાજિતવાન્ સુસંવાદેન ચ જીવનમ્ અમરતાઞ્ચ પ્રકાશિતવાન્।
XI તસ્ય ઘોષયિતા દૂતશ્ચાન્યજાતીયાનાં શિક્ષકશ્ચાહં નિયુક્તોઽસ્મિ।
XII તસ્માત્ કારણાત્ મમાયં ક્લેશો ભવતિ તેન મમ લજ્જા ન જાયતે યતોઽહં યસ્મિન્ વિશ્વસિતવાન્ તમવગતોઽસ્મિ મહાદિનં યાવત્ મમોપનિધે ર્ગોપનસ્ય શક્તિસ્તસ્ય વિદ્યત ઇતિ નિશ્ચિતં જાનામિ।
XIII હિતદાયકાનાં વાક્યાનામ્ આદર્શરૂપેણ મત્તઃ શ્રુતાઃ ખ્રીષ્ટે યીશૌ વિશ્વાસપ્રેમ્નોઃ કથા ધારય।
XIV અપરમ્ અસ્મદન્તર્વાસિના પવિત્રેણાત્મના તામુત્તમામ્ ઉપનિધિં ગોપય।
XV આશિયાદેશીયાઃ સર્વ્વે માં ત્યક્તવન્ત ઇતિ ત્વં જાનાસિ તેષાં મધ્યે ફૂગિલ્લો હર્મ્મગિનિશ્ચ વિદ્યેતે।
XVI પ્રભુરનીષિફરસ્ય પરિવારાન્ પ્રતિ કૃપાં વિદધાતુ યતઃ સ પુનઃ પુન ર્મામ્ આપ્યાયિતવાન્
XVII મમ શૃઙ્ખલેન ન ત્રપિત્વા રોમાનગરે ઉપસ્થિતિસમયે યત્નેન માં મૃગયિત્વા મમોદ્દેશં પ્રાપ્તવાન્।
XVIII અતો વિચારદિને સ યથા પ્રભોઃ કૃપાભાજનં ભવેત્ તાદૃશં વરં પ્રભુસ્તસ્મૈ દેયાત્। ઇફિષનગરેઽપિ સ કતિ પ્રકારૈ ર્મામ્ ઉપકૃતવાન્ તત્ ત્વં સમ્યગ્ વેત્સિ।

# II

I હે મમ પુત્ર, ખ્રીષ્ટયીશુતો યોઽનુગ્રહસ્તસ્ય બલેન ત્વં બલવાન્ ભવ।
II અપરં બહુભિઃ સાક્ષિભિઃ પ્રમાણીકૃતાં યાં શિક્ષાં શ્રુતવાનસિ તાં વિશ્વાસ્યેષુ પરસ્મૈ શિક્ષાદાને નિપુણેષુ ચ લોકેષુ સમર્પય।
III ત્વં યીશુખ્રીષ્ટસ્યોત્તમો યોદ્ધેવ ક્લેશં સહસ્વ।
IV યો યુદ્ધં કરોતિ સ સાંસારિકે વ્યાપારે મગ્નો ન ભવતિ કિન્તુ સ્વનિયોજયિત્રે રોચિતું ચેષ્ટતે।
V અપરં યો મલ્લૈ ર્યુધ્યતિ સ યદિ નિયમાનુસારેણ ન યુદ્ધ્યતિ તર્હિ કિરીટં ન લપ્સ્યતે।
VI અપરં યઃ કૃષીવલઃ કર્મ્મ કરોતિ તેન પ્રથમેન ફલભાગિના ભવિતવ્યં।
VII મયા યદુચ્યતે તત્ ત્વયા બુધ્યતાં યતઃ પ્રભુસ્તુભ્યં સર્વ્વત્ર બુદ્ધિં દાસ્યતિ।
VIII મમ સુસંવાદસ્ય વચનાનુસારાદ્ દાયૂદ્વંશીયં મૃતગણમધ્યાદ્ ઉત્થાપિતઞ્ચ યીશું ખ્રીષ્ટં સ્મર।
IX તત્સુસંવાદકારણાદ્ અહં દુષ્કર્મ્મેવ બન્ધનદશાપર્ય્યન્તં ક્લેશં ભુઞ્જે કિન્ત્વીશ્વરસ્ય વાક્યમ્ અબદ્ધં તિષ્ઠતિ।
X ખ્રીષ્ટેન યીશુના યદ્ અનન્તગૌરવસહિતં પરિત્રાણં જાયતે તદભિરુચિતૈ ર્લોકૈરપિ યત્ લભ્યેત તદર્થમહં તેષાં નિમિત્તં સર્વ્વાણ્યેતાનિ સહે।
XI અપરમ્ એષા ભારતી સત્યા યદિ વયં તેન સાર્દ્ધં મ્રિયામહે તર્હિ તેન સાર્દ્ધં જીવિવ્યામઃ, યદિ ચ ક્લેશં સહામહે તર્હિ તેન સાર્દ્ધં રાજત્વમપિ કરિષ્યામહે।
XII યદિ વયં તમ્ અનઙ્ગીકુર્મ્મસ્તર્હિ સો ઽસ્માનપ્યનઙ્ગીકરિષ્યતિ।
XIII યદિ વયં ન વિશ્વાસામસ્તર્હિ સ વિશ્વાસ્યસ્તિષ્ઠતિ યતઃ સ્વમ્ અપહ્નોતું ન શક્નોતિ।
XIV ત્વમેતાનિ સ્મારયન્ તે યથા નિષ્ફલં શ્રોતૃણાં ભ્રંશજનકં વાગ્યુદ્ધં ન કુર્ય્યસ્તથા પ્રભોઃ સમક્ષં દૃઢં વિનીયાદિશ।
XV અપરં ત્વમ્ ઈશ્વરસ્ય સાક્ષાત્ સ્વં પરીક્ષિતમ્ અનિન્દનીયકર્મ્મકારિણઞ્ચ સત્યમતસ્ય વાક્યાનાં સદ્વિભજને નિપુણઞ્ચ દર્શયિતું યતસ્વ।
XVI કિન્ત્વપવિત્રા અનર્થકકથા દૂરીકુરુ યતસ્તદાલમ્બિન ઉત્તરોત્તરમ્ અધર્મ્મે વર્દ્ધિષ્યન્તે,
XVII તેષાઞ્ચ વાક્યં ગલિતક્ષતવત્ ક્ષયવર્દ્ધકો ભવિષ્યતિ તેષાં મધ્યે હુમિનાયઃ ફિલીતશ્ચેતિનામાનૌ દ્વૌ જનૌ સત્યમતાદ્ ભ્રષ્ટૌ જાતૌ,
XVIII મૃતાનાં પુનરુત્થિતિ ર્વ્યતીતેતિ વદન્તૌ કેષાઞ્ચિદ્ વિશ્વાસમ્ ઉત્પાટયતશ્ચ।
XIX તથાપીશ્વરસ્ય ભિત્તિમૂલમ્ અચલં તિષ્ઠતિ તસ્મિંશ્ચેયં લિપિ ર્મુદ્રાઙ્કિતા વિદ્યતે। યથા, જાનાતિ પરમેશસ્તુ સ્વકીયાન્ સર્વ્વમાનવાન્। અપગચ્છેદ્ અધર્મ્માચ્ચ યઃ કશ્ચિત્ ખ્રીષ્ટનામકૃત્॥

XX કિન્તુ બૃહન્નિકેતને કેવલ સુવર્ણમયાનિ રૌપ્યમયાણિ ચ ભાજનાનિ વિદ્યન્ત ઇતિ તર્હિ કાષ્ઠમયાનિ મૃણ્મયાન્યપિ વિદ્યન્તે
તેષાઞ્ચ કિયન્તિ સમ્માનાય કિયન્તપમાનાય ચ ભવન્તિ।
XXI અતો યદિ કશ્ચિદ્ એતાદૃશેભ્યઃ સ્વં પરિષ્કરોતિ તર્હિ સ પાવિતં પ્રભોઃ કાર્ય્યયોગ્યં સર્વ્વસત્કાર્ય્યાયોપયુક્તં સમ્માનાર્થકઞ્ચ
ભાજનં ભવિષ્યતિ।
XXII યૌવનાવસ્થાયા અભિલાષાસ્ત્વયા પરિત્યજ્યન્તાં ધર્મ્મો વિશ્વાસઃ પ્રેમ યે ચ શુચિમનોભિઃ પ્રભુમ્ ઉદ્દિશ્ય પ્રાર્થનાં કુર્વ્વતે
તૈઃ સાર્દ્ધમ્ ઐક્યભાવશ્ચૈતેષુ ત્વયા યત્નો વિધીયતાં।
XXIII અપરં ત્વમ્ અનર્થકાન્ અજ્ઞાનાંશ્ચ પ્રશ્નાન્ વાગ્યુદ્ધોત્પાદકાન્ જ્ઞાત્વા દૂરીકુરુ।
XXIV યતઃ પ્રભો ર્દાસેન યુદ્ધમ્ અકર્ત્તવ્યં કિન્તુ સર્વ્વાન્ પ્રતિ શાન્તેન શિક્ષાદાનેચ્છુકેન સહિષ્ણુના ચ ભવિતવ્યં, વિપક્ષાશ્ચ તેન
નમ્રત્વેન ચેતિતવ્યાઃ।
XXV તથા કૃતે યદીશ્વરઃ સત્યમતસ્ય જ્ઞાનાર્થં તેભ્યો મનઃપરિવર્ત્તનરૂપં વરં દદ્યાત્,
XXVI તર્હિ તે યેન શયતાનેન નિજાભિલાષસાધનાય ધૃતાસ્તસ્ય જાલાત્ ચેતનાં પ્રાપ્યોદ્ધારં લબ્ધું શક્ષ્યન્તિ।

# III

I ચરમદિનેષુ ક્લેશજનકાઃ સમયા ઉપસ્થાસ્યન્તીતિ જાનીહિ।
II યતસ્તાત્કાલિકા લોકા આત્મપ્રેમિણો ઽર્થપ્રેમિણ આત્મશ્લાઘિનો ઽભિમાનિનો નિન્દકાઃ પિત્રોરનાજ્ઞાગ્રાહિણઃ કૃતઘ્ના
અપવિત્રાઃ
III પ્રીતિવર્જિતા અસન્ધેયા મૃષાપવાદિનો ઽજિતેન્દ્રિયાઃ પ્રચણ્ડા ભદ્રદ્વેષિણો
IV વિશ્વાસઘાતકા દુઃસાહસિનો દર્પધ્માતા ઈશ્વરાપ્રેમિણઃ કિન્તુ સુખપ્રેમિણો
V ભક્તવેશાઃ કિન્ત્વસ્વીકૃતભક્તિગુણા ભવિષ્યન્તિ; એતાદૃશાનાં લોકાનાં સંમર્ગં પરિત્યજ।
VI યતો યે જનાઃ પ્રચ્છન્નં ગેહાન્ પ્રવિશન્તિ પાપૈ ર્ભારગ્રસ્તા નાનાવિધાભિલાષૈશ્ચાલિતા યાઃ કામિન્યો
VII નિત્યં શિક્ષન્તે કિન્તુ સત્યમતસ્ય તત્ત્વજ્ઞાનં પ્રાપ્તું કદાચિત્ ન શક્નુવન્તિ તા દાસીવદ્ વશીકુર્વ્વતે ચ તે તાદૃશા લોકાઃ।
VIII યાન્નિ ર્યામ્બ્રિશ્ચ યથા મૂસમં પ્રતિ વિપક્ષત્વમ્ અકુરુતાં તથૈવ ભ્રષ્ટમનસો વિશ્વાસવિષયે ઽગ્રાહ્યાશ્ચૈતે લોકા અપિ સત્યમતં
પ્રતિ વિપક્ષતાં કુર્વ્વન્તિ।
IX કિન્તુ તે બહુદૂરમ્ અગ્રસરા ન ભવિષ્યન્તિ યતસ્તયો ર્મૂઢતા યદ્વત્ તદ્વદ્ એતેષામપિ મૂઢતા સર્વ્વદૃશ્યા ભવિષ્યતિ।
X મમોપદેશઃ શિષ્ટતાભિપ્રાયો વિશ્વાસો ધૈર્ય્યં પ્રેમ સહિષ્ણુતોપદ્રવઃ ક્લેશા
XI આન્તિયખિયાયામ્ ઇકનિયે લૂસ્ત્રાયાઞ્ચ માં પ્રતિ યદ્યદ્ અઘટત યાંશ્ચોપદ્રવાન્ અહમ્ અસહે સર્વ્વમેતત્ ત્વમ્ અવગતોઽસિ
કિન્તુ તત્સર્વ્વતઃ પ્રભુ ર્મામ્ ઉદ્ધૃતવાન્।
XII પરન્તુ યાવન્તો લોકાઃ ખ્રીષ્ટેન યીશુનેશ્વરભક્તિમ્ આચરિતુમ્ ઇચ્છન્તિ તેષાં સર્વ્વેષામ્ ઉપદ્રવો ભવિષ્યતિ।
XIII અપરં પાપિષ્ઠાઃ ખલાશ્ચ લોકા ભ્રામ્યન્તો ભ્રમયન્તશ્ચોત્તરોત્તરં દુષ્ટત્વેન વર્દ્ધિષ્યન્તે।
XIV કિન્તુ ત્વં યદ્ યદ્ અશિક્ષથાઃ, યચ્ચ ત્વયિ સમર્પિતમ્ અભૂત્ તસ્મિન્ અવતિષ્ઠ, યતઃ કસ્માત્ શિક્ષાં પ્રાપ્તોઽસિ તદ્ વેત્સિ;
XV યાનિ ચ ધર્મ્મશાસ્ત્રાણિ ખ્રીષ્ટે યીશૌ વિશ્વાસેન પરિત્રાણપ્રાપ્તયે ત્વાં જ્ઞાનિનં કર્ત્તું શક્નુવન્તિ તાનિ ત્વં શૈશવકાલાદ્
અવગતોઽસિ।
XVI તત્ સર્વ્વં શાસ્ત્રમ્ ઈશ્વરસ્યાત્મના દત્તં શિક્ષાયૈ દોષબોધાય શોધનાય ધર્મ્મવિનયાય ચ ફલયુક્તં ભવતિ
XVII તેન ચેશ્વરસ્ય લોકો નિપુણઃ સર્વ્વસ્મૈ સત્કર્મ્મણે સુસજ્જશ્ચ ભવતિ।

# IV

I ઈશ્વરસ્ય ગોચરે યશ્ચ યીશુઃ ખ્રીષ્ટઃ સ્વીયાગમનકાલે સ્વરાજત્વેન જીવતાં મૃતાનાઞ્ચ લોકાનાં વિચારં કરિષ્યતિ તસ્ય ગોચરે
ઽહં ત્વામ્ ઇદં દૃઢમ્ આજ્ઞાપયામિ।
II ત્વં વાક્યં ઘોષય કાલેઽકાલે ચોત્સુકો ભવ પૂર્ણયા સહિષ્ણુતયા શિક્ષયા ચ લોકાન્ પ્રબોધય ભર્ત્સય વિનયસ્વ ચ।
III યત એતાદૃશઃ સમય આયાતિ યસ્મિન્ લોકા યથાર્થમ્ ઉપદેશમ્ અસહ્યમાનાઃ કર્ણકણ્ડૂયનવિશિષ્ટા ભૂત્વા નિજાભિલાષાત્
શિક્ષકાન્ સંગ્રહીષ્યન્તિ
IV સત્યમતાચ્ચ શ્રોત્રાણિ નિવર્ત્ત્ય વિપથગામિનો ભૂત્વોપાખ્યાનેષુ પ્રવર્ત્તિષ્યન્તે;
V કિન્તુ ત્વં સર્વ્વવિષયે પ્રબુદ્ધો ભવ દુઃખભોગં સ્વીકુરુ સુસંવાદપ્રચારકસ્ય કર્મ્મ સાધય નિજપરિચર્ય્યાં પૂર્ણત્વેન કુરુ ચ।
VI મમ પ્રાણાનામ્ ઉત્સર્गો ભવતિ મમ પ્રસ્થાનકાલશ્ચોપાતિષ્ઠત્।
VII અહમ્ ઉત્તમયુદ્ધં કૃતવાન્ ગન્તવ્યમાર્ગસ્યાન્તં યાવદ્ ધાવિતવાન્ વિશ્વાસઞ્ચ રક્ષિતવાન્।
VIII શેષં પુણ્યમુકુટં મદર્થં રક્ષિતં વિદ્યતે તચ્ચ તસ્મિન્ મહાદિને યથાર્થવિચારકેણ પ્રભુના મહ્યં દાયિષ્યતે કેવલં મહ્યમ્ ઇતિ નહિ
કિન્તુ યાવન્તો લોકાસ્તસ્યાગમનમ્ આકાઙ્ક્ષન્તે તેભ્યઃ સર્વ્વેભ્યો ઽપિ દાયિષ્યતે।
IX ત્વં ત્વરયા મત્સમીપમ્ આગન્તું યતસ્વ,
X યતો દીમા ઐહિકસંસારમ્ ઈહમાનો માં પરિત્યજ્ય થિષલનીકીં ગતવાન્ તથા ક્રીષ્કિ ર્ગાલાતિયાં ગતવાન્ તીતશ્ચ દાલ્માતિયાં
ગતવાન્।
XI કેવલો લૂકો મયા સાર્દ્ધં વિદ્યતે। ત્વં માર્કં સઙ્ગિનં કૃત્વાગચ્છ યતઃ સ પરિચર્ય્યયા મમોપકારી ભવિષ્યતિ,
XII તુખિકઞ્ચાહમ્ ઇફિષનગરં પ્રેષિતવાન્।
XIII યદ્ આચ્છાદનવસ્ત્રં ત્રોયાનગરે કાર્પસ્ય સન્નિધૌ મયા નિક્ષિપ્તં ત્વમાગમનસમયે તત્ પુસ્તકાનિ ચ વિશેષતશ્ચર્મ્મગ્રન્થાન્
આનય।
XIV કાંસ્યકારઃ સિકન્દરો મમ બહ્વનિષ્ટં કૃતવાન્ પ્રભુસ્તસ્ય કર્મ્મણાં સમુચિતફલં દદાતુ।
XV ત્વમપિ તસ્માત્ સાવધાનાસ્તિષ્ઠ યતઃ સોઽસ્માકં વાક્યાનામ્ અતીવ વિપક્ષો જાતઃ।

XVI મમ પ્રથમપ્રત્યુત્તરસમયે કોઽપિ મમ સહાયો નાભવત્ સર્વ્વે માં પર્ય્યત્યજન્ તાન્ પ્રતિ તસ્ય દોષસ્ય ગણના ન ભૂયાત્;
XVII કિન્તુ પ્રભુ ર્મમ સહાયો ઽભવત્ યથા ચ મયા ઘોષણા સાધ્યેત ભિન્નજાતીયાશ્ચ સર્વ્વે સુસંવાદં શૃણુયુસ્તથા મહ્યં શક્તિમ્
અદદાત્ તતો ઽહં સિંહસ્ય મુખાદ્ ઉદ્ધૃતઃ।
XVIII અપરં સર્વ્વસ્માદ્ દુષ્કર્મ્મતઃ પ્રભુ ર્મામ્ ઉદ્ધરિષ્યતિ નિજસ્વર્ગીયરાજ્યં નેતું માં તારયિષ્યતિ ચ। તસ્ય ધન્યવાદઃ સદાકાલં
ભૂયાત્। આમેન્।
XIX ત્વં પ્રિષ્કામ્ આક્કિલમ્ અનીષિફરસ્ય પરિજનાંશ્ચ નમસ્કુરુ।
XX ઇરાસ્તઃ કરિન્થનગરે ઽતિષ્ઠત્ ત્રફિમશ્ચ પીડિતત્વાત્ મિલીતનગરે મયા વ્યહીયત।
XXI ત્વં હેમન્તકાલાત્ પૂર્વ્વમ્ આગન્તું યતસ્વ। ઉબૂલઃ પૂદિ ર્લીનઃ ક્લૌદિયા સર્વ્વે ભ્રાતરશ્ચ ત્વાં નમસ્કુર્વ્વતે।
XXII પ્રભુ ર્યીશુઃ ખ્રીષ્ટસ્તવાત્મના સહ ભૂયાત્। યુષ્માસ્વનુગ્રહો ભૂયાત્। આમેન્।

# તીતં પત્રં

I અનન્તજીવનસ્યાશાતો જાતાયા ઈશ્વરભક્તે ર્યોગ્યસ્ય સત્યમતસ્ય યત્ તત્વજ્ઞાનં યશ્ચ વિશ્વાસ ઈશ્વરસ્યાભિરુચિતલોકૈ
ર્લભ્યતે તદર્થં
II યીશુખ્રીષ્ટસ્ય પ્રેરિત ઈશ્વરસ્ય દાસઃ પૌલોઽહં સાધારણવિશ્વાસાત્ મમ પ્રકૃતં ધર્મ્મપુત્રં તીતં પ્રતિ લિખમિ।
III નિષ્કપટ ઈશ્વર આદિકાલાત્ પૂર્વ્વં તત્ જીવનં પ્રતિજ્ઞાતવાન્ સ્વનિરૂપિતસમયે ચ ઘોષણયા તત્ પ્રકાશિતવાન્|
IV મમ ત્રાતુરીશ્વરસ્યાજ્ઞયા ચ તસ્ય ઘોષણં મયિ સમર્પિતમ્ અભૂત્| અસ્માકં તાત ઈશ્વરઃ પરિત્રાતા પ્રભુ ર્યીશુખ્રીષ્ટશ્ચ તુભ્યમ્
અનુગ્રહં દયાં શાન્તિઞ્ચ વિતરતુ|
V ત્વં યદ્ અસમ્પૂર્ણકાર્ય્યાણિ સમ્પૂરયે મંદીયાદેશાચ્ચ પ્રતિનગરં પ્રાચીનગણાન્ નિયોજયેસ્તદર્થમહં ત્વાં ક્રીત્યુપદ્વીપે સ્થાપયિત્વા
ગતવાન્|
VI તસ્માદ્ યો નરો ઽનિન્દિત એકસ્યા યોષિતઃ સ્વામી વિશ્વાસિનામ્ અપચયસ્યાવાધ્યત્વસ્ય વા દોષેણાલિપ્તાનાઞ્ચ સન્તાનાનાં
જનકો ભવતિ સ એવ યોગ્યઃ।
VII યતો હેતોરધ્યક્ષેણેશ્વરસ્ય ગૃહાધ્યક્ષેણેવાનિન્દનીયેન ભવિતવ્યં। તેન સ્વેચ્છાચારિણા ક્રોધિના પાનાસક્તેન પ્રહારકેણ લોભિના
વા ન ભવિતવ્યં
VIII કિન્ત્વતિથિસેવકેન સલ્લોકાનુરાગિણા વિનીતેન ન્યાય્યેન ધાર્મ્મિકેણ જિતેન્દ્રિયેણ ચ ભવિતવ્યં,
IX ઉપદેશે ચ વિશ્વસ્તં વાક્યં તેન ધારિતવ્યં યતઃ સ યદ્ યથાર્થેનોપદેશેન લોકાન્ વિનેતું વિઘ્નકારિણશ્ચ નિરુત્તરાન્ કર્ત્તું શક્નુયાત્
તદ્ આવશ્યકં।
X યતસ્તે બહવો ઽવાધ્યા અનર્થકવાક્યવાદિનઃ પ્રવઞ્ચકાશ્ચ સન્તિ વિશેષતશ્છિન્નત્વચાં મધ્યે કેચિત્ તાદૃશા લોકાઃ સન્તિ।
XI તેષાઞ્ચ વાગ્રોધ આવશ્યકો યતસ્તે કુત્સિતલાભસ્યાશયાનુચિતાનિ વાક્યાનિ શિક્ષયન્તો નિખિલપરિવારાણાં સુમતિં
નાશયન્તિ।
XII તેષાં સ્વદેશીય એકો ભવિષ્યદ્વાદી વચનમિદમુક્તવાન્, યથા, ક્રીતીયમાનવાઃ સર્વ્વે સદા કાપટ્યવાદિનઃ। હિંસ્રજન્તુસમાનાસ્તે
ઽલસાશ્ચોદરભારતઃ॥
XIII સાક્ષ્યમેતત્ તથ્યં, અતો◌ હેતોસ્ત્વં તાન્ ગાઢં ભર્ત્સય તે ચ યથા વિશ્વાસે સ્વસ્થા ભવેયુ
XIV ર્યિહૂદીયોપાખ્યાનેષુ સત્યમતભ્રષ્ટાનાં માનવાનામ્ આજ્ઞાસુ ચ મનાંસિ ન નિવેશયેયુસ્તથાદિશ।
XV શુચીનાં કૃતે સર્વ્વાણ્યેવ શુચીનિ ભવન્તિ કિન્તુ કલઙ્કિતાનામ્ અવિશ્વાસિનાઞ્ચ કૃતે શુચિ કિમપિ ન ભવતિ યતસ્તેષાં બુદ્ધયઃ
સંવેદાશ્ચ કલઙ્કિતાઃ સન્તિ।
XVI ઈશ્વરસ્ય જ્ઞાનં તે પ્રતિજાનન્તિ કિન્તુ કર્મ્મભિસ્તદ્ અનઙ્ગીકુર્વ્વતે યતસ્તે ગર્હિતા અનાજ્ઞાગ્રાહિણઃ સર્વ્વસત્કર્મ્મણશ્ચાયોગ્યાઃ
સન્તિ।

# II

I યથાર્થસ્યોપદેશસ્ય વાક્યાનિ ત્વયા કથ્યન્તાં
II વિશેષતઃ પ્રાચીનલોકા યથા પ્રબુદ્ધા ધીરા વિનીતા વિશ્વાસે પ્રેમ્નિ સહિષ્ણુતાયાઞ્ચ સ્વસ્થા ભવેયુસ્તદ્વત્
III પ્રાચીનયોષિતોઽપિ યથા ધર્મ્મયોગ્યમ્ આચારં કુર્ય્યુઃ પરનિન્દકા બહુમદ્યપાનસ્ય નિઘ્નાશ્ચ ન ભવેયુઃ
IV કિન્તુ સુશિક્ષાકારિણ્યઃ સત્ય ઈશ્વરસ્ય વાક્યં યત્ ન નિન્દ્યેત તદર્થં યુવતીઃ સુશીલતામ્ અર્થતઃ પતિસ્નેહમ્ અપત્યસ્નેહં
V વિનીતિં શુચિત્વં ગૃહિણીત્વં સૌજન્યં સ્વામિનિઘ્નઞ્ચાદિશેયુસ્તથા ત્વયા કથ્યતાં।
VI તદ્વદ્ યૂનોઽપિ વિનીતયે પ્રબોધય।
VII ત્વઞ્ચ સર્વ્વવિષયે સ્વં સત્કર્મ્મણાં દૃષ્ટાન્તં દર્શય શિક્ષાયાઞ્ચાવિકૃતત્વં ધીરતાં યથાર્થં
VIII નિર્દ્દોષઞ્ચ વાક્યં પ્રકાશય તેન વિપક્ષો યુષ્માકમ્ અપવાદસ્ય કિમપિ છિદ્રં ન પ્રાપ્ય ત્રપિષ્યતે।
IX દાસાશ્ચ યત્ સ્વપ્રભૂનાં નિઘ્નાઃ સર્વ્વવિષયે તુષ્ટિજનકાશ્ચ ભવેયુઃ પ્રત્યુત્તરં ન કુર્ય્યુઃ
X કિમપિ નાપહરેયુઃ કિન્તુ પૂર્ણાં સુવિશ્વસ્તતાં પ્રકાશયેયુરિતિ તાન્ આદિશ। યત એવમ્પ્રકારેણાસ્મકં ત્રાતુરીશ્વરસ્ય શિક્ષા
સર્વ્વવિષયે તૈ ર્ભૂષિતવ્યા।
XI યતો હેતોસ્ત્રાણાજનક ઈશ્વરસ્યાનુગ્રહઃ સર્વ્વાન્ માનવાન્ પ્રત્યુદિતવાન્
XII સ ચાસ્માન્ ઇદં શિક્ષ્યતિ યદ્ વયમ્ અધર્મ્મં સાંસારિકાભિલાષાંશ્ચાનઙ્ગીકૃત્ય વિનીતત્વેન ન્યાયેનેશ્વરભક્ત્યા ચેહલોકે આયુ
ર્યાપયામઃ,
XIII પરમસુખસ્યાશામ્ અર્થતો ઽસ્માકં મહત ઈશ્વરસ્ય ત્રાણકર્ત્તુ ર્યીશુખ્રીષ્ટસ્ય પ્રભાવસ્યોદયં પ્રતીક્ષામહે।
XIV યતઃ સ યથાસ્માન્ સર્વ્વસ્માદ્ અધર્મ્માત્ મોચયિત્વા નિજાધિકારસ્વરૂપં સત્કર્મ્મસૂત્સુકમ્ એકં પ્રજાવર્ગં પાવયેત્ તદર્થમ્
અસ્માકં કૃતે આત્મદાનં કૃતવાન્|
XV એતાનિ ભાષસ્વ પૂર્ણસામર્થ્યેન ચાદિશ પ્રબોધય ચ, કોઽપિ ત્વાં નાવમન્યતાં।

# III

I તે યથા દેશાધિપાનાં શાસકાનાઞ્ચ નિઘ્ના આજ્ઞાગ્રાહિણશ્ચ સર્વ્વસ્મૈ સત્કર્મ્મણે સુસજ્જાશ્ચ ભવેયુઃ
II કમપિ ન નિન્દેયુ ર્નિવ્વિરોધિનઃ ક્ષાન્તાશ્ચ ભવેયુઃ સર્વ્વાન્ પ્રતિ ચ પૂર્ણં મૃદુત્વં પ્રકાશયેયુશ્ચેતિ તાન્ આદિશ।
III યતઃ પૂર્વ્વં વયમપિ નિર્બ્બોધા અનાજ્ઞાગ્રાહિણો ભ્રાન્તા નાનાભિલાષાણાં સુખાનાઞ્ચ દાસેયા દુષ્ટત્વેર્ષ્યાચારિણો ઘૃણિતાઃ
પરસ્પરં દ્વેષિણશ્ચાભવામઃ।
IV કિન્ત્વસ્માકં ત્રાતુરીશ્વરસ્ય યા દયા મર્ત્ત્યાનાં પ્રતિ ચ યા પ્રીતિસ્તસ્યાઃ પ્રાદુર્ભાવે જાતે

V વયમ્ આત્મકૃતેભ્યો ધર્મ્મકર્મ્મભ્યસ્તન્નહિ કિન્તુ તસ્ય કૃપાતઃ પુનર્જન્મરૂપેણ પ્રક્ષાલનેન પ્રવિત્રસ્યાત્મનો નૂતનીકરણેન ચ
તસ્માત્ પરિત્રાણાં પ્રાપ્તાઃ
VI સ ચાસ્માકં ત્રાત્રા યીશુખ્રીષ્ટેનાસ્મદુપરિ તમ્ આત્માનં પ્રચુરત્વેન વૃષ્ટવાન્|
VII ઇત્થં વયં તસ્યાનુગ્રહેણ સપુણ્યીભૂય પ્રત્યાશયાનન્તજીવનસ્યાધિકારિણો જાતાઃ|
VIII વાક્યમેતદ્ વિશ્વસનીયમ્ અતો હેતોરીશ્વરે યે વિશ્વસિતવન્તસ્તે યથા સત્કર્મ્માણ્યનુતિષ્ઠેયુસ્તથા તાન્ દૃઢમ્ આજ્ઞાપયેતિ
મમાભિમતં| તાન્યેવોત્તમાનિ માનવેભ્યઃ ફલદાનિ ચ ભવન્તિ|
IX મૂઢેભ્યઃ પ્રશ્નવંશાવલિવિવાદેભ્યો વ્યવસ્થાયા વિતણ્ડાભ્યશ્ચ નિવર્ત્તસ્વ યતસ્તા નિષ્ફલા અનર્થકાશ્ચ ભવન્તિ|
X યો જનો બિભિત્સુસ્તમ્ એકવારં દ્વિર્વ્વા પ્રબોધ્ય દૂરીકુરુ,
XI યતસ્તાદૃશો જનો વિપથગામી પાપિષ્ઠ આત્મદોષકશ્ચ ભવતીતિ ત્વયા જ્ઞાયતાં|
XII યદાહમ્ આર્ત્તિમાં તુખિકં વા તવ સમીપં પ્રેષયિષ્યામિ તદા ત્વં નીકપલૌ મમ સમીપમ્ આગન્તું યતસ્વ યતસ્તત્રૈવાહં શીતકાલં
યાપયિતું મતિમ્ અકાર્ષં|
XIII વ્યવસ્થાપકઃ સીના આપલ્લુશ્ચૈતયોઃ કસ્યાપ્યભાવો યન્ન ભવેત્ તદર્થં તૌ યત્નેન ત્વયા વિસૃજ્યેતાં|
XIV અપરમ્ અસ્મદીયલોકા યન્નિષ્ફલા ન ભવેયુસ્તદર્થં પ્રયોજનીયોપકારાયા સત્કર્મ્માણ્યનુષ્ઠાતું શિક્ષન્તાં|
XV મમ સઙ્ગિનઃ સવ્વે ત્વાં નમસ્કુર્વ્વતે| યે વિશ્વાસાદ્ અસ્માસુ પ્રીયન્તે તાન્ નમસ્કુરુ; સર્વ્વેષુ યુષ્માસ્વનુગ્રહો ભૂયાત્| આમેન્|

# ફિલોમોનં પત્રં

I ખ્રીષ્ટસ્ય યીશો ર્બન્દિદાસઃ પૌલસ્તીથિયનામા ભ્રાતા ચ પ્રિયં સહકારિણં ફિલીમોનં
II પ્રિયામ્ આપ્પિયાં સહસેનામ્ આર્ખિપ્પં ફિલીમોનસ્ય ગૃહે સ્થિતાં સમિતિઞ્ચ પ્રતિ પત્રં લિખતઃ।
III અસ્માકં તાત ઈશ્વરઃ પ્રભુ ર્યીશુખ્રીષ્ટશ્ચ યુષ્માન્ પ્રતિ શાન્તિમ્ અનુગ્રહઞ્ચ ક્રિયાસ્તાં।
IV પ્રભું યીશું પ્રતિ સર્વ્વાન્ પવિત્રલોકાન્ પ્રતિ ચ તવ પ્રેમવિશ્વાસયો ર્વૃત્તાન્તં નિશમ્યાહં
V પ્રાર્થનાસમયે તવ નામોચ્ચારયન્ નિરન્તરં મમેશ્વરં ધન્યં વદામિ।
VI અસ્માસુ યદ્યત્ સૌજન્યં વિદ્યતે તત્ સર્વ્વં ખ્રીષ્ટં યીશું યત્ પ્રતિ ભવતીતિ જ્ઞાનાય તવ વિશ્વાસમૂલિકા દાનશીલતા યત્ સફલા
ભવેત્ તદહમ્ ઇચ્છામિ।
VII હે ભ્રાતઃ, ત્વયા પવિત્રલોકાનાં પ્રાણ આપ્યાયિતા અભવન્ એતસ્માત્ તવ પ્રેમ્નાસ્માકં મહાન્ આનન્દઃ સાન્ત્વના ચ જાતઃ।
VIII ત્વયા યત્ કર્ત્તવ્યં તત્ ત્વામ્ આજ્ઞાપયિતું યદ્યપ્યહં ખ્રીષ્ટેનાતીવોત્સુકો ભવેયં તથાપિ વૃદ્ધ
IX ઇદાનીં યીશુખ્રીષ્ટસ્ય બન્દિદાસશ્ચૈવમ્ભૂતો યઃ પૌલઃ સોઽહં ત્વાં વિનેતું વરં મન્યે।
X અતઃ શૃઙ્ખલબદ્ધોઽહં યમજનયં તં મદીયતનયમ્ ઓનીષિમમ્ અધિ ત્વાં વિનયે।
XI સ પૂર્વ્વં તવાનુપકારક આસીત્ કિન્ત્વિદાનીં તવ મમ ચોપકારી ભવતિ।
XII તમેવાહં તવ સમીપં પ્રેષયામિ, અતો મદીયપ્રાણસ્વરૂપઃ સ ત્વયાનુગૃહ્યતાં।
XIII સુસંવાદસ્ય કૃતે શૃઙ્ખલબદ્ધોઽહં પરિચારકમિવ તં સ્વસન્નિધૌ વર્ત્તયિતુમ્ ઐચ્છં।
XIV કિન્તુ તવ સૌજન્યં યદ્ બલેન ન ભૂત્વા સ્વેચ્છાયાઃ ફલં ભવેત્ તદર્થં તવ સમ્મતિં વિના કિમપિ કર્ત્તવ્યં નામન્યે।
XV કો જાનાતિ ક્ષણકાલાર્થં ત્વત્તસ્તસ્ય વિચ્છેદોઽભવદ્ એતસ્યાયમ્ અભિપ્રાયો યત્ ત્વમ્ અનન્તકાલાર્થં તં લપ્સ્યસે
XVI પુન ર્દાસમિવ લપ્સ્યસે તન્નહિ કિન્તુ દાસાત્ શ્રેષ્ઠં મમ પ્રિયં તવ ચ શારીરિકસમ્બન્ધાત્ પ્રભુસમ્બન્ધાચ્ચ તતોઽધિકં પ્રિયં
ભ્રાતરમિવ।
XVII અતો હેતો ર્યદિ માં સહભાગિનં જાનાસિ તર્હિ મામિવ તમનુગૃહાણ।
XVIII તેન યદિ તવ કિમપ્યપરાદ્ધં તુભ્યં કિમપિ ધાર્ય્યતે વા તર્હિ તત્ મમેતિ વિદિત્વા ગણય।
XIX અહં તત્ પરિશોત્સ્યામિ, એતત્ પૌલોઽહં સ્વહસ્તેન લિખામિ, યતસ્ત્વં સ્વપ્રાણાન્ અપિ મહ્યં ધારયસિ તદ્ વક્તું નેચ્છામિ।
XX ભો ભ્રાતઃ, પ્રભોઃ કૃતે મમ વાઞ્છાં પૂરય ખ્રીષ્ટસ્ય કૃતે મમ પ્રાણાન્ આપ્યાયય।
XXI તવાજ્ઞાગ્રાહિત્વે વિશ્વસ્ય મયા એતત્ લિખ્યતે મયા યદુચ્યતે તતોઽધિકં ત્વયા કારિષ્યત ઇતિ જાનામિ।
XXII તત્કરણસમયે મદર્થમપિ વાસગૃહં ત્વયા સજ્જીક્રિયતાં યતો યુષ્માકં પ્રાર્થનાનાં ફલરૂપો વર ઇવાહં યુષ્મભ્યં દાયિષ્યે મમેતિ
પ્રત્યાશા જાયતે।
XXIII ખ્રીષ્ટસ્ય યીશાઃ કૃતે મયા સહ બન્દિરિપાફ્રા
XXIV મમ સહકારિણો માર્ક આરિષ્ટાર્ખો દીમા લૂકશ્ચ ત્વાં નમસ્કારં વેદયન્તિ।
XXV અસ્માકં પ્રભો ર્યીશુખ્રીષ્ટસ્યાનુગ્રહો યુષ્માકમ્ આત્મના સહ ભૂયાત્। આમેન્।

# ઇબ્રિણઃ પત્રં

I પુરા ય ઈશ્વરો ભવિષ્યદ્વાદિભિઃ પિતૃલોકેભ્યો નાનાસમયે નાનાપ્રકારં કથિતવાન્
II સ એતસ્મિન્ શેષકાલે નિજપુત્રેણાસ્મભ્યં કથિતવાન્। સ તં પુત્રં સર્વ્વાધિકારિણં કૃતવાન્ તેનૈવ ચ સર્વ્વજગન્તિ સૃષ્ટવાન્।
III સ પુત્રસ્તસ્ય પ્રભાવસ્ય પ્રતિબિમ્બસ્તસ્ય તત્ત્વસ્ય મૂર્ત્તિશ્ચાસ્તિ સ્વીયશક્તિવાક્યેન સર્વ્વં ધત્તે ચ સ્વપ્રાણૈરસ્માકં પાપમાર્જ્જનં કૃત્વા ઊર્દ્ધ્વસ્થાને મહામહિમ્નો દક્ષિણપાર્શ્વે સમુપવિષ્ટવાન્।
IV દિવ્યદૂતગણાદ્ યથા સ વિશિષ્ટનામ્નો ઽધિકારી જાતસ્તથા તેભ્યોઽપિ શ્રેષ્ઠો જાતઃ।
V યતો દૂતાનાં મધ્યે કદાચિદીશ્વરેણેદં ક ઉક્તઃ? યથા, "મદીયતનયો ઽસિ ત્વમ્ અદ્યૈવ જનિતો મયા। " પુનશ્ચ "અહં તસ્ય પિતા ભવિષ્યામિ સ ચ મમ પુત્રો ભવિષ્યતિ। "
VI અપરં જગતિ સ્વકીયાદ્વિતીયપુત્રસ્ય પુનરાનયનકાલે તેનોક્તં, યથા, "ઈશ્વરસ્ય સકલૈ ર્દૂતૈરેષ એવ પ્રણમ્યતાં। "
VII દૂતાન્ અધિ તેનેદમ્ ઉક્તં, યથા, "સ કરોતિ નિજાન્ દૂતાન્ ગન્ધવાહસ્વરૂપકાન્। વહ્નિશિખાસ્વરૂપાંશ્ચ કરોતિ નિજસેવકાન્।। "
VIII કિન્તુ પુત્રમુદ્દિશ્ય તેનોક્તં, યથા, "હે ઈશ્વર સદા સ્થાયિ તવ સિંહાસનં ભવેત્। યાથાર્થ્યસ્ય ભવેદ્દણ્ડો રાજદણ્ડસ્ત્વદીયકઃ।
IX પુણ્યે પ્રેમ કરોષિ ત્વં કિઞ્ચાધર્મ્મમ્ ઋતીયસે। તસ્માદ્ ય ઈશ ઈશસ્તે સ તે મિત્રગણાદપિ। અધિકાહ્લાદતૈલેન સેચનં કૃતવાન્ તવ।। "
X પુનશ્ચ, યથા, "હે પ્રભો પૃથિવીમૂલમ્ આદૌ સંસ્થાપિતં ત્વયા। તથા ત્વદીયહસ્તેન કૃતં ગગનમણ્ડલં।
XI ઇમે વિનંક્ષ્યતસ્ત્વન્તુ નિત્યમેવાવતિષ્ઠસે। ઇદન્તુ સકલં વિશ્વં સંજરિષ્યતિ વસ્ત્રવત્।
XII સઙ્કોચિતં ત્વયા તત્તુ વસ્ત્રવત્ પરિવર્ત્સ્યતે। ત્વન્તુ નિત્યં સ એવાસી ર્નિરન્તાસ્તવ વત્સરાઃ।। "
XIII અપરં દૂતાનાં મધ્યે કઃ કદાચિદીશ્વરેણેદમુક્તઃ? યથા, "તવારીન્ પાદપીઠં તે યાવન્નહિ કરોમ્યહં। મમ દક્ષિણદિગ્ભાગે તાવત્ ત્વં સમુપાવિશ।। "
XIV યે પરિત્રાણસ્યાધિકારિણો ભવિષ્યન્તિ તેષાં પરિચર્ય્યાર્થં પ્રેષ્યમાણાઃ સેવનકારિણ આત્માનઃ કિં તે સર્વ્વે દૂતા નહિ?

# II

I અતો વયં યદ્ ભ્રમસ્રોતસા નાપનીયામહે તદર્થમસ્માભિ ર્યદ્યદ્ અશ્રાવિ તસ્મિન્ મનાંસિ નિધાતવ્યાનિ।
II યતો હેતો દૂતૈઃ કથિતં વાક્યં યદ્યમોઘમ્ અભવદ્ યદિ ચ તલ્લઙ્ઘનકારિણે તસ્યાગ્રાહકાય ચ સર્વ્વસ્મૈ સમુચિતં દણ્ડમ્ અદીયત,
III તર્હ્યસ્માભિસ્તાદૃશં મહાપરિત્રાણમ્ અવજ્ઞાય કથં રક્ષા પ્રાપ્સ્યતે, યત્ પ્રથમતઃ પ્રભુના પ્રોક્તં તતોઽસ્માન્ યાવત્ તસ્ય શ્રોતૃભિઃ સ્થિરીકૃતં,
IV અપરં લક્ષણૈરદ્ભુતકર્મ્મભિ ર્વિવિધશક્તિપ્રકાશેન નિજેચ્છાતઃ પવિત્રસ્યાત્મનો વિભાગેન ચ યદ્ ઈશ્વરેણ પ્રમાણીકૃતમ્ અભૂત્।
V વયં તુ યસ્ય ભાવિરાજ્યસ્ય કથાં કથયામઃ, તત્ તેન્ દિવ્યદૂતાનામ્ અધીનીકૃતમિતિ નહિ।
VI કિન્તુ કુત્રાપિ કશ્ચિત્ પ્રમાણમ્ ઈદૃશં દત્તવાન્, યથા, "કિં વસ્તુ માનવો યત્ સ નિત્યં સંસ્મર્ય્યતે ત્વયા। કિં વા માનવસન્તાનો યત્ સ આલોચ્યતે ત્વયા।
VII દિવ્યદતગણેભ્યઃ સ કિઞ્ચિન્ ન્યૂનઃ કૃતસ્ત્વયા। તેજોગૌરવરૂપેણ કિરીટેન વિભૂષિતઃ। સૃષ્ટં યત્ તે કરાભ્યાં સ તત્પ્રભુત્વે નિયોજિતઃ।
VIII ચરણાધશ્ચ તસ્યૈવ ત્વયા સર્વ્વં વશીકૃતં।। " તેન સર્વ્વં યસ્ય વશીકૃતં તસ્યાવશીભૂતં કિમપિ નાવશેષિતં કિન્ત્વધુનાપિ વયં સર્વ્વાણિ તસ્ય વશીભૂતાનિ ન પશ્યામઃ।
IX તથાપિ દિવ્યદૂતગણેભ્યો યઃ કિઞ્ચિન્ ન્યૂનીકૃતોઽભવત્ તં યીશું મૃત્યુભોગહેતોસ્તેજોગૌરવરૂપેણ કિરીટેન વિભૂષિતં પશ્યામઃ, યત ઈશ્વરસ્યાનુગ્રહાત્ સ સર્વ્વેષાં કૃતે મૃત્યુમ્ અસ્વદત।
X અપરઞ્ચ યસ્મૈ યેન ચ કૃત્સ્નં વસ્તુ સૃષ્ટં વિદ્યતે બહુસન્તાનાનાં વિભવાયાનયનકાલે તેષાં પરિત્રાણાગ્રસરસ્ય દુઃખભોગેન સિદ્ધીકરણમપિ તસ્યોપયુક્તમ્ અભવત્।
XI યતઃ પાવકઃ પૂયમાનાશ્ચ સર્વ્વે એકસ્માદેવોત્પન્ના ભવન્તિ, ઇતિ હેતોઃ સ તાન્ ભ્રાતૃન્ વદિતું ન લજ્જતે।
XII તેન સ ઉક્તવાન્, યથા, "દ્યોતયિષ્યામિ તે નામ ભ્રાતૃણાં મધ્યતો મમ। પરન્તુ સમિતે ર્મધ્યે કરિષ્યે તે પ્રશંસનં।। "
XIII પુનરપિ, યથા, "તસ્મિન્ વિશ્વસ્ય સ્થાતાહં। " પુનરપિ, યથા, "પશ્યાહમ્ અપત્યાનિ ચ દત્તાનિ મહ્યમ્ ઈશ્વરાત્। "
XIV તેષામ્ અપત્યાનાં રુધિરપલલવિશિષ્ટત્વાત્ સોઽપિ તદ્વત્ તદ્વિશિષ્ટોઽભૂત્ તસ્યાભિપ્રાયોઽયં યત્ સ મૃત્યુબલાધિકારિણં શયતાનં મૃત્યુના બલહીનં કુર્ય્યાત્
XV યે ચ મૃત્યુભયાદ્ યાવજ્જીવનં દાસત્વસ્ય નિઘ્ના આસન્ તાન્ ઉદ્ધારયેત્।
XVI સ દૂતાનામ્ ઉપકારી ન ભવતિ કિન્ત્વિબ્રાહીમો વંશસ્યૈવોપકારી ભવતી।
XVII અતો હેતોઃ સ યથા કૃપાવાન્ પ્રજાનાં પાપશોધનાર્થમ્ ઈશ્વરોદ્દેશ્યવિષયે વિશ્વાસ્યો મહાયાજકો ભવેત્ તદર્થં સર્વ્વવિષયે સ્વભ્રાતૃણાં સદૃશીભવનં તસ્યોચિતમ્ આસીત્।
XVIII યતઃ સ સ્વયં પરીક્ષાં ગત્વા યં દુઃખભોગમ્ અવગતસ્તેન પરીક્ષાક્રાન્તાન્ ઉપકર્ત્તું શક્નોતિ।

# III

I હે સ્વર્ગીયસ્યાહ્વાનસ્ય સહભાગિનઃ પવિત્રભ્રાતરઃ, અસ્માકં ધર્મ્મપ્રતિજ્ઞાયા દૂતોઽગ્રસરશ્ચ યો યીશુસ્તમ્ આલોચધ્વં।
II મૂસા યદ્વત્ તસ્ય સર્વ્વપરિવારમધ્યે વિશ્વાસ્ય આસીત્, તદ્વત્ અયમપિ સ્વનિયોજકસ્ય સમીપે વિશ્વાસ્યો ભવતિ।
III પરિવારાચ્ચ યદ્વત્ તત્સ્થાપયિતુરધિકં ગૌરવં ભવતિ તદ્વત્ મૂસસોઽયં બહુતરગૌરવસ્ય યોગ્યો ભવતિ।

IV એકૈકસ્ય નિવેશનસ્ય પરિજનાનાં સ્થાપયિતા કશ્ચિદ્ વિદ્યતે યશ્ચ સર્વ્વસ્થાપયિતા સ ઈશ્વર એવ।

V મૂસાશ્ચ વક્ષ્યમાણાનાં સાક્ષી ભૃત્ય ઇવ તસ્ય સર્વ્વપરિજનમધ્યે વિશ્વાસ્યોઽભવત્ કિન્તુ ખ્રીષ્ટસ્તસ્ય પરિજનાનામધ્યક્ષ ઇવ।

VI વયં તુ યદિ વિશ્વાસસ્યોત્સાહં શ્લાઘનઞ્ચ શેષં યાવદ્ ધારયામસ્તર્હિ તસ્ય પરિજના ભવામઃ।

VII અતો હેતોઃ પવિત્રેણાત્મના યદ્વત્ કથિતં, તદ્વત્, "અદ્ય યૂયં કથાં તસ્ય યદિ સંશ્રોતુમિચ્છથ।

VIII તર્હિ પુરા પરીક્ષાયા દિને પ્રાન્તરમધ્યતઃ। મદાજ્ઞાનિગ્રહસ્થાને યુષ્માભિસ્તુ કૃતં યથા। તથા મા કુરુતેદાનીં કઠિનાનિ મનાંસિ વઃ।

IX યુષ્માકં પિતરસ્તત્ર મત્પરીક્ષામ્ અકુર્વ્વત। કુર્વ્વદ્ભિ ર્મેઽનુસન્ધાનં તૈરદૃશ્યન્ત મત્ક્રિયાઃ। ચત્વારિંશત્સમા યાવત્ ક્રુદ્ધ્વાહન્તુ તદન્વયે।

X અવાદિષમ્ ઇમે લોકા ભ્રાન્તાન્તઃકરણાઃ સદા। મામકીનાનિ વર્ત્માનિ પરિજાનન્તિ નો ઇમે।

XI ઇતિ હેતોરહં કોપાત્ શપથં કૃતવાન્ ઇમં। પ્રવેક્ષ્યતે જનૈરેતૈ ર્ન વિશ્રામસ્થલં મમ। "

XII હે ભ્રાતરઃ સાવધાના ભવત, અમરેશ્વરાત્ નિવર્ત્તકો યોઽવિશ્વાસસ્તદ્યુક્તં દુષ્ટાન્તઃકરણં યુષ્માકં કસ્યાપિ ન ભવતુ।

XIII કિન્તુ યાવદ્ અદ્યનામા સમયો વિદ્યતે તાવદ્ યુષ્મન્મધ્યે કોઽપિ પાપસ્ય વઞ્ચનયા યત્ કઠોરીકૃતો ન ભવેત્ તદર્થં પ્રતિદિનં પરસ્પરમ્ ઉપદિશત।

XIV યતો વયં ખ્રીષ્ટસ્યાંશિનો જાતાઃ કિન્તુ પ્રથમવિશ્વાસસ્ય દૃઢત્વમ્ અસ્માભિઃ શેષં યાવદ્ અમોઘં ધારયિતવ્યં।

XV અદ્ય યૂયં કથાં તસ્ય યદિ સંશ્રોતુમિચ્છથ, તર્હ્યાજ્ઞાલઙ્ઘનસ્થાને યુષ્માભિસ્તુ કૃતં યથા, તથા મા કુરુતેદાનીં કઠિનાનિ મનાંસિ વ ઇતિ તેન યદુક્તં,

XVI તદનુસારાદ્ યે શ્રુત્વા તસ્ય કથાં ન ગૃહીતવન્તસ્તે કે? કિં મૂસસા મિસરદેશાદ્ આગતાઃ સર્વ્વે લોકા નહિ?

XVII કેભ્યો વા સ ચત્વારિંશદ્વર્ષાણિ યાવદ્ અક્રુધ્યત્? પાપં કુર્વ્વતાં યેષાં કુણપાઃ પ્રાન્તરે ઽપતન્ કિં તેભ્યો નહિ?

XVIII પ્રવેક્ષ્યતે જનૈરેતૈ ર્ન વિશ્રામસ્થલં મમેતિ શપથઃ કેષાં વિરુદ્ધં તેનાકારિ? કિમ્ અવિશ્વાસિનાં વિરુદ્ધં નહિ?

XIX અતસ્તે તત્ સ્થાનં પ્રવેષ્ટુમ્ અવિશ્વાસાત્ નાશક્નુવન્ ઇતિ વયં વીક્ષામહે।

# IV

I અપરં તદ્વિશ્રામપ્રાપ્તેઃ પ્રતિજ્ઞા યદિ તિષ્ઠતિ તર્હ્યસ્માકં કશ્ચિત્ ચેત્ તસ્યાઃ ફલેન વઞ્ચિતો ભવેત્ વયમ્ એતસ્માદ્ બિભીમઃ।

II યતો ઽસ્માકં સમીપે યદ્વત્ તદ્વત્ તેષાં સમીપેઽપિ સુસંવાદઃ પ્રચારિતો ઽભવત્ કિન્તુ તૈઃ શ્રુતં વાક્યં તાન્ પ્રતિ નિષ્ફલમ્ અભવત્, યતસ્તે શ્રોતારો વિશ્વાસેન સાર્દ્ધં તન્નામિશ્રયન્।

III તદ્ વિશ્રામસ્થાનં વિશ્વાસિભિરસ્માભિઃ પ્રવિશ્યતે યતસ્તેનોક્તં, "અહં કોપાત્ શપથં કૃતવાન્ ઇમં, પ્રવેક્ષ્યતે જનૈરેતૈ ર્ન વિશ્રામસ્થલં મમ। " કિન્તુ તસ્ય કર્મ્માણિ જગતઃ સૃષ્ટિકાલાત્ સમાપ્તાનિ સન્તિ।

IV યતઃ કસ્મિંશ્ચિત્ સ્થાને સપ્તમં દિનમધિ તેનેદમ્ ઉક્તં, યથા, "ઈશ્વરઃ સપ્તમે દિને સ્વકૃતેભ્યઃ સર્વ્વકર્મ્મભ્યો વિશશ્રામ। "

V કિન્ત્વેતસ્મિન્ સ્થાને પુનસ્તેનોચ્યતે, યથા, "પ્રવેક્ષ્યતે જનૈરેતૈ ર્ન વિશ્રામસ્થલં મમ। "

VI ફલતસ્તત્ સ્થાનં કૈશ્ચિત્ પ્રવેષ્ટવ્યં કિન્તુ યે પુરા સુસંવાદં શ્રુતવન્તસ્તૈરવિશ્વાસાત્ તન્ન પ્રવિષ્ટમ્,

VII ઇતિ હેતોઃ સ પુનરદ્યનામકં દિનં નિરૂપ્ય દીર્ઘકાલે ગતેઽપિ પૂર્વ્વોક્તાં વાચં દાયૂદા કથયતિ, યથા, "અદ્ય યૂયં કથાં તસ્ય યદિ સંશ્રોતુમિચ્છથ, તર્હિ મા કુરુતેદાનીં કઠિનાનિ મનાંસિ વઃ। "

VIII અપરં યિહોશૂયો યદિ તાન્ વ્યશ્રામયિષ્યત્ તર્હિ તતઃ પરમ્ અપરસ્ય દિનસ્ય વાગ્ ઈશ્વરેણ નાકથયિષ્યત।

IX અત ઈશ્વરસ્ય પ્રજાભિઃ કર્ત્તવ્ય એકો વિશ્રામસ્તિષ્ઠતિ।

X અપરમ્ ઈશ્વરો યદ્વત્ સ્વકૃતકર્મ્મભ્યો વિશશ્રામ તદ્વત્ તસ્ય વિશ્રામસ્થાનં પ્રવિષ્ટો જનોઽપિ સ્વકૃતકર્મ્મભ્યો વિશ્રામ્યતિ।

XI અતો વયં તદ્ વિશ્રામસ્થાનં પ્રવેષ્ટું યતામહૈ, તદવિશ્વાસોદાહરણેન કોઽપિ ન પતતુ।

XII ઈશ્વરસ્ય વાદોઽમરઃ પ્રભાવવિશિષ્ટશ્ચ સર્વ્વસ્માદ્ દ્વિધારખઙ્ગાદપિ તીક્ષ્ણઃ, અપરં પ્રાણાત્મનો ર્ગ્રન્થિમજ્જયોશ્ચ પરિભેદાય વિચ્છેદકારી મનસશ્ચ સઙ્કલ્પાનામ્ અભિપ્રેતાનાઞ્ચ વિચારકઃ।

XIII અપરં યસ્ય સમીપે સ્વીયા સ્વીયા કથાસ્માભિઃ કથયિતવ્યા તસ્યાગોચરઃ કોઽપિ પ્રાણી નાસ્તિ તસ્ય દૃષ્ટૌ સર્વ્વમેવાનાવૃતં પ્રકાશિતઞ્ચાસ્તે।

XIV અપરં ય ઉચ્ચતમં સ્વર્ગં પ્રવિષ્ટ એતાદૃશ એકો વ્યક્તિરર્થત ઈશ્વરસ્ય પુત્રો યીશુરસ્માકં મહાયાજકોઽસ્તિ, અતો હેતો ર્વયં ધર્મ્મપ્રતિજ્ઞાં દૃઢમ્ આલમ્બામહૈ।

XV અસ્માકં યો મહાયાજકો ઽસ્તિ સોઽસ્માકં દુઃખૈ ર્દુઃખિતો ભવિતુમ્ અશક્તો નહિ કિન્તુ પાપં વિના સર્વ્વવિષયે વયમિવ પરીક્ષિતઃ।

XVI અતએવ કૃપાં ગ્રહીતું પ્રયોજનીયોપકારાર્થમ્ અનુગ્રહં પ્રાપ્તુઞ્ચ વયમ્ ઉત્સાહેનાનુગ્રહસિંહાસનસ્ય સમીપં યામઃ।

# V

I યઃ કશ્ચિત્ મહાયાજકો ભવતિ સ માનવાનાં મધ્યાત્ નીતઃ સન્ માનવાનાં કૃત ઈશ્વરોદ્દેશ્યવિષયેઽર્થત ઉપહારાણાં પાપાર્થકબલીનાઞ્ચ દાન નિયુજ્યતે।

II સ ચાજ્ઞાનાં ભ્રાન્તાનાઞ્ચ લોકાનાં દુઃખેન દુઃખી ભવિતું શક્નોતિ, યતો હેતોઃ સ સ્વયમપિ દૌર્બ્બલ્યવેષ્ટિતો ભવતિ।

III એતસ્માત્ કારણાચ્ચ યદ્વત્ લોકાનાં કૃતે તદ્વદ્ આત્મકૃતેઽપિ પાપાર્થકબલિદાનં તેન કર્ત્તવ્યં।

IV સ ઘોચ્ચપદઃ સ્વેચ્છાતઃ કેનાપિ ન ગૃહ્યતે કિન્તુ હારોણ ઇવ ય ઈશ્વરેણાહૂયતે તેનૈવ ગૃહ્યતે।

V એવમ્પ્રકારેણ ખ્રીષ્ટોઽપિ મહાયાજકત્વં ગ્રહીતું સ્વીયગૌરવં સ્વયં ન કૃતવાન્, કિન્તુ "મદીયતનયોઽસિ ત્વમ્ અદ્યૈવ જનિતો મયેતિ" વાચં યસ્તં ભાષિતવાન્ સ એવ તસ્ય ગૌરવં કૃતવાન્।

VI તદ્વદ્ અન્યગીતેઽપીદમુક્તં, ત્વં મલ્કીષેદકઃ શ્રેણ્યાં યાજકોઽસિ સદાતનઃ।

VII સ ચ દેહવાસકાલે બહુક્રન્દનેનાશ્રુપાતેન ચ મૃત્યુત ઉદ્ધરણે સમર્થસ્ય પિતુઃ સમીપે પુનઃ પુનર્વિનતિં પ્રર્થનાઞ્ચ કૃત્વા તત્ફલરૂપિણીં શઙ્કાતો રક્ષાં પ્રાપ્ય ચ
VIII યદ્યપિ પુત્રોઽભવત્ તથાપિ યૈરક્લિશ્યત તૈરાજ્ઞાગ્રહણમ્ અશિક્ષત।
IX ઇત્થં સિદ્ધીભૂય નિજાજ્ઞાગ્રાહિણાં સર્વ્વેષામ્ અનન્તપરિત્રાણસ્ય કારણસ્વરૂપો ઽભવત્।
X તસ્માત્ સ મલ્કીષેદકઃ શ્રેણીભુક્તો મહાયાજક ઈશ્વરેણાખ્યાતઃ।
XI તમધ્યસ્માકં બહુકથાઃ કથયિતવ્યાઃ કિન્તુ તાઃ સ્તબ્ધકર્ણૈ ર્યુષ્માભિ ર્દુર્ગમ્યાઃ।
XII યતો યૂયં યદ્યપિ સમયસ્ય દીર્ઘત્વાત્ શિક્ષકા ભવિતુમ્ અશક્ષ્યત તથાપીશ્વરસ્ય વાક્યાનાં યા પ્રથમા વર્ણમાલા તામધિ શિક્ષાપ્રાપ્તિ ર્યુષ્માકં પુનરાવશ્યકા ભવતિ, તથા કઠિનદ્રવ્યે નહિ કિન્તુ દુગ્ધે યુષ્માકં પ્રયોજનમ્ આસ્તે।
XIII યો દુગ્ધપાયી સ શિશુરેવેતિકારણાત્ ધર્મ્મવાક્યે તત્પરો નાસ્તિ।
XIV કિન્તુ સદસદ્વિચારે યેષાં ચેતાંસિ વ્યવહારેણ શિક્ષિતાનિ તાદૃશાનાં સિદ્ધલોકાનાં કઠોરદ્રવ્યેષુ પ્રયોજનમસ્તિ।

# VI

I વયં મૃતિજનકકર્મ્મભ્યો મનઃપરાવર્ત્તનમ્ ઈશ્વરે વિશ્વાસો મજ્જનશિક્ષણં હસ્તાર્પણં મૃતલોકાનામ્ ઉત્થાનમ્
II અનન્તકાલસ્થાયિવિચારાજ્ઞા ચૈતૈઃ પુનર્ભિત્તિમૂલં ન સ્થાપયન્તઃ ખ્રીષ્ટવિષયકં પ્રથમોપદેશં પશ્ચાત્કૃત્ય સિદ્ધિં યાવદ્ અગ્રસરા ભવામ।
III ઈશ્વરસ્યાનુમત્યા ચ તદ્ અસ્માભિઃ કારિષ્યતે।
IV ય એકકૃત્વો દીપ્તિમયા ભૂત્વા સ્વર્ગીયવરરસમ્ આસ્વદિતવન્તઃ પવિત્રસ્યાત્મનોંઽશિનો જાતા
V ઈશ્વરસ્ય સુવાક્યં ભાવિકાલસ્ય શક્તિશ્ચાસ્વદિતવન્તશ્ચ તે ભ્રષ્ટ્વા યદિ
VI સ્વમનોભિરીશ્વરસ્ય પુત્રં પુનઃ ક્રુશે ઘ્નન્તિ લજ્જાસ્પદં કુર્વ્વતે ચ તર્હિ મનઃપરાવર્ત્તનાય પુનસ્તાન્ નવીનીકર્ત્તું કોઽપિ ન શક્નોતિ।
VII યતો યા ભૂમિઃ સ્વોપરિ ભૂયઃ પતિતં વૃષ્ટિં પિવતી તત્ફલાધિકારિણાં નિમિત્તમ્ ઇષ્ટાનિ શાકાદીન્યુત્પાદયતિ સા ઈશ્વરાદ્ આશિષં પ્રાપ્તા।
VIII કિન્તુ યા ભૂમિ ર્ગોક્ષુરકણ્ટકવૃક્ષાન્ ઉત્પાદયતિ સા ન ગ્રાહ્યા શાપાર્હા ચ શેષે તસ્યા દાહો ભવિષ્યતિ।
IX હે પ્રિયતમાઃ, યદ્યપિ વયમ્ એતાદૃશં વાક્યં ભાષામહે તથાપિ યૂયં તત ઉત્કૃષ્ટાઃ પરિત્રાણપથસ્ય પથિકાશ્ચાધ્વ ઇતિ વિશ્વસામઃ।
X યતો યુષ્માભિઃ પવિત્રલોકાનાં ય ઉપકારો ઽકારિ ક્રિયતે ચ તેનેશ્વરસ્ય નામ્ને પ્રકાશિતં પ્રેમ શ્રમઞ્ચ વિસ્મર્ત્તુમ્ ઈશ્વરોઽન્યાયકારી ન ભવતિ।
XI અપરં યુષ્માકમ્ એકૈકો જનો યત્ પ્રત્યાશાપૂરણાર્થં શેષં યાવત્ તમેવ યત્નં પ્રકાશયેદિત્યહમ્ ઇચ્છામિ।
XII અતઃ શિથિલા ન ભવત કિન્તુ યે વિશ્વાસેન સહિષ્ણુતયા ચ પ્રતિજ્ઞાનાં ફલાધિકારિણો જાતાસ્તેષામ્ અનુગામિનો ભવત।
XIII ઈશ્વરો યદા ઇબ્રાહીમે પ્રત્યજાનાત્ તદા શ્રેષ્ઠસ્ય કસ્યાપ્યપરસ્ય નામ્ના શપથં કર્ત્તું નાશક્નોત્, અતો હેતોઃ સ્વનામ્ના શપથં કૃત્વા તેનોક્તં યથા,
XIV "સત્યમ્ અહં ત્વામ્ આશિષં ગદિષ્યામિ તવાન્વયં વર્દ્ધયિષ્યામિ ચ। "
XV અનેન પ્રકારેણ સ સહિષ્ણુતાં વિધાય તસ્યાઃ પ્રત્યાશાયાઃ ફલં લબ્ધવાન્।
XVI અથ માનવાઃ શ્રેષ્ઠસ્ય કસ્યચિત્ નામ્ના શપન્તે, શપથશ્ચ પ્રમાણાર્થં તેષાં સર્વ્વવિવાદાન્તકો ભવતિ।
XVII ઇત્યસ્મિન્ ઈશ્વરઃ પ્રતિજ્ઞાયાઃ ફલાધિકારિણઃ સ્વીયમન્ત્રણાયા અમોઘતાં બાહુલ્યતો દર્શયિતુમિચ્છન્ શપથેન સ્વપ્રતિજ્ઞાં સ્થિરીકૃતવાન્।
XVIII અતએવ યસ્મિન્ અનૃતકથનમ્ ઈશ્વરસ્ય ન સાધ્યં તાદૃશેનાચલેન વિષયદ્વયેન સમ્મુખસ્થરક્ષાસ્થલસ્ય પ્રાપ્તયે પલાયિતાનામ્ અસ્માકં સુદૃઢા સાન્ત્વના જાયતે।
XIX સા પ્રત્યાશાસ્માકં મનોનૌકાયા અચલો લઙ્ગરો ભૂત્વા વિચ્છેદકવસ્ત્રસ્યાભ્યન્તરં પ્રવિષ્ટા।
XX તત્રૈવાસ્માકમ્ અગ્રસરો યીશુઃ પ્રવિશ્ય મલ્કીષેદકઃ શ્રેણ્યાં નિત્યસ્થાયી યાજકોઽભવત્।

# VII

I શાલમસ્ય રાજા સર્વ્વોપરિસ્થસ્યેશ્વરસ્ય યાજકશ્ચ સન્ યો નૃપતીનાં મારણાત્ પ્રત્યાગતમ્ ઇબ્રાહીમં સાક્ષાત્કૃત્યાશિષં ગદિતવાન્,
II યસ્મૈ ચેબ્રાહીમ્ સર્વ્વદ્રવ્યાણાં દશમાંશં દત્તવાન્ સ મલ્કીષેદક્ સ્વનામ્નોઽર્થેન પ્રથમતો ધર્મ્મરાજઃ પશ્ચાત્ શાલમસ્ય રાજાર્થતઃ શાન્તિરાજો ભવતિ।
III અપરં તસ્ય પિતા માતા વંશસ્ય નિર્ણય આયુષ આરમ્ભો જીવનસ્ય શેષશ્ચૈતેષામ્ અભાવો ભવતિ, ઇત્થં સ ઈશ્વરપુત્રસ્ય સદૃશીકૃતઃ, સ ત્વનન્તકાલં યાવદ્ યાજકસ્તિષ્ઠતિ।
IV અતએવાસ્માકં પૂર્વ્વપુરુષ ઇબ્રાહીમ્ યસ્મૈ લુઠિતદ્રવ્યાણાં દશમાંશં દત્તવાન્ સ કીદૃક્ મહાન્ તદ્ આલોચયત।
V યાજકત્વપ્રાપ્તા લેવેઃ સન્તાના વ્યવસ્થાનુસારેણ લોકેભ્યોઽર્થત ઇબ્રાહીમો જાતેભ્યઃ સ્વીયભ્રાતૃભ્યો દશમાંશગ્રહણસ્યાદેશં લબ્ધવન્તઃ।
VI કિન્ત્વસૌ યદ્યપિ તેષાં વંશાત્ નોત્પન્નસ્તથાપીબ્રાહીમો દશમાંશં ગૃહીતવાન્ પ્રતિજ્ઞાનામ્ અધિકારિણમ્ આશિષં ગદિતવાંશ્ચ।
VII અપરં યઃ શ્રેયાન્ સ ક્ષુદ્રતરાયાશિષં દદાતીત્યત્ર કોઽપિ સન્દેહો નાસ્તિ।
VIII અપરમ્ ઇદાનીં યે દશમાંશં ગૃહ્લન્તિ તે મૃત્યોરધીના માનવાઃ કિન્તુ તદાનીં યો ગૃહીતવાન્ સ જીવતીતિપ્રમાણપ્રાપ્તઃ।
IX અપરં દશમાંશગ્રાહી લેવિરપીબ્રાહીમ્દ્વારા દશમાંશં દત્તવાન્ એતદપિ કથયિતું શક્યતે।
X યતો યદા મલ્કીષેદક્ તસ્ય પિતરં સાક્ષાત્ કૃતવાન્ તદાનીં સ લેવિઃ પિતુરુરસ્યાસીત્।
XI અપરં યસ્ય સમ્બન્ધે લોકા વ્યવસ્થાં લબ્ધવન્તસ્તેન લેવીયયાજકવર્ગેણ યદિ સિદ્ધિઃ સમભવિષ્યત્ તર્હિ હારોણસ્ય શ્રેણ્યા મધ્યાદ્ યાજકં ન નિરૂપ્યેશ્વરેણ મલ્કીષેદકઃ શ્રેણ્યા મધ્યાદ્ અપરસ્યૈકસ્ય યાજકસ્યોત્થાપનં કુત આવશ્યકમ્ અભવિષ્યત્?

XII યતો યાજકવર્ગસ્ય વિનિમયેન સુતરાં વ્યવસ્થાયા અપિ વિનિમયો જાયતે।
XIII અપરઞ્ચ તદ્ વાક્યં યસ્યોદ્દેશ્યં સોઽપરેણ વંશેન સંયુક્તાઽસ્તિ તસ્ય વંશસ્ય ચ કોઽપિ કદાપિ વેદ્યાઃ કર્મ્મ ન કૃતવાન્।
XIV વસ્તુતસ્તુ યં વંશમધિ મૂસા યાજકત્વસ્યૈકાં કથામપિ ન કથિતવાન્ તસ્મિન્ યિહૂદાવંશેઽસ્માકં પ્રભુ ર્જન્મ ગૃહીતવાન્ ઇતિ સુસ્પષ્ટં।
XV તસ્ય સ્પષ્ટતરમ્ અપરં પ્રમાણમિદં યત્ મલ્કીષેદકઃ સાદૃશ્યવતાપરેણ તાદૃશેન યાજકેનોદેતવ્યં,
XVI યસ્ય નિરૂપણં શરીરસમ્બન્ધીયવિધિયુક્તયા વ્યવસ્થાયા ન ભવતિ કિન્ત્વક્ષયજીવનયુક્તયા શક્ત્યા ભવતિ।
XVII યત ઈશ્વર ઇદં સાક્ષ્યં દત્તવાન્, યથા, "ત્વં મક્લીષેદકઃ શ્રેણ્યાં યાજકોઽસિ સદાતનઃ। "
XVIII અનેનાગ્રવર્ત્તિનો વિધે દુર્બ્બલતાયા નિષ્ફલતાયાશ્ચ હેતોરર્થતો વ્યવસ્થયા કિમપિ સિદ્ધં ન જાતમિતિહેતોસ્તસ્ય લોપો ભવતિ।
XIX યયા ચ વયમ્ ઈશ્વરસ્ય નિકટવર્ત્તિનો ભવામ એતાદૃશી શ્રેષ્ઠપ્રત્યાશા સંસ્થાપ્યતે।
XX અપરં યીશુઃ શપથં વિના ન નિયુક્તસ્તસ્માદપિ સ શ્રેષ્ઠનિયમસ્ય મધ્યસ્થો જાતઃ।
XXI યતસ્તે શપથં વિના યાજકા જાતાઃ કિન્ત્વસૌ શપથેન જાતઃ યતઃ સ ઇદમુક્તઃ, યથા,
XXII "પરમેશ ઇદં શેપે ન ચ તસ્માન્નિવર્ત્સ્યતે। ત્વં મલ્કીષેદકઃ શ્રેણ્યાં યાજકોઽસિ સદાતનઃ। "
XXIII તે ચ બહવો યાજકા અભવન્ યતસ્તે મૃત્યુના નિત્યસ્થાયિત્વાત્ નિવારિતાઃ,
XXIV કિન્ત્વસાવનન્તકાલં યાવત્ તિષ્ઠતિ તસ્માત્ તસ્ય યાજકત્વં ન પરિવર્ત્તનીયં।
XXV તતો હેતો ર્યે માનવાસ્તેનેશ્વરસ્ય સન્નિધિં ગચ્છન્તિ તાન્ સ શેષં યાવત્ પરિત્રાતું શક્નોતિ યતસ્તેષાં કૃતે પ્રાર્થનાં કર્ત્તું સ સતતં જીવતિ।
XXVI અપરમ્ અસ્માકં તાદૃશમહાયાજકસ્ય પ્રયોજનમાસીદ્ યઃ પવિત્રો ઽહિંસકો નિષ્કલઙ્કઃ પાપિભ્યો ભિન્નઃ સ્વર્ગાદપ્યુચ્ચીકૃતશ્ચ સ્યાત્।
XXVII અપરં મહાયાજકાનાં યથા તથા તસ્ય પ્રતિદિનં પ્રથમં સ્વપાપાનાં કૃતે તતઃ પરં લોકાનાં પાપાનાં કૃતે બલિદાનસ્ય પ્રયોજનં નાસ્તિ યત આત્મબલિદાનં કૃત્વા તદ્ એકકૃત્વસ્તેન સમ્પાદિતં।
XXVIII યતો વ્યવસ્થયા યે મહાયાજકા નિરૂપ્યન્તે તે દૌર્બ્બલ્યયુક્તા માનવાઃ કિન્તુ વ્યવસ્થાતઃ પરં શપથયુક્તેન વાક્યેન યો મહાયાજકો નિરૂપિતઃ સો ઽનન્તકાલાર્થં સિદ્ધઃ પુત્ર એવ।

# VIII

I કથ્યમાનાનાં વાક્યાનાં સારોઽયમ્ અસ્માકમ્ એતાદૃશ એકો મહાયાજકોઽસ્તિ યઃ સ્વર્ગે મહામહિમ્નઃ સિંહાસનસ્ય દક્ષિણપાર્શ્વો સમુપવિષ્ટવાન્
II યચ્ચ દૂષ્યં ન મનુજૈઃ કિન્ત્વીશ્વરેણ સ્થાપિતં તસ્ય સત્યદૂષ્યસ્ય પવિત્રવસ્તૂનાઞ્ચ સેવકઃ સ ભવતિ।
III યત એકૈકો મહાયાજકો નૈવેદ્યાનાં બલીનાઞ્ચ દાને નિયુજ્યતે, અતો હેતોરેતસ્યાપિ કિઞ્ચિદ્ ઉત્સર્જનીયં વિદ્યત ઇત્યાવશ્યકં।
IV કિઞ્ચ સ યદિ પૃથિવ્યામ્ અસ્થાસ્યત્ તર્હિ યાજકો નાભવિષ્યત્, યતો યે વ્યવસ્થાનુસારાત્ નૈવેદ્યાનિ દદત્યેતાદૃશા યાજકા વિદ્યન્તે।
V તે તુ સ્વર્ગીયવસ્તૂનાં દૃષ્ટાન્તેન છાયયા ચ સેવામનુતિષ્ઠન્તિ યતો મૂસસિ દૂષ્યં સાધયિતુમ્ ઉદ્યતે સતીશ્વરસ્તદેવ તમાદિષ્ટવાન્ ફલતઃ સ તમુક્તવાન્, યથા, "અવધેહિ ગિરૌ ત્વાં યદ્યન્નિદર્શનં દર્શિતં તદ્વત્ સર્વ્વાણિ ત્વયા ક્રિયન્તાં। "
VI કિન્ત્વિદાનીમ્ અસૌ તસ્માત્ શ્રેષ્ઠં સેવકપદં પ્રાપ્તવાન્ યતઃ સ શ્રેષ્ઠપ્રતિજ્ઞાભિઃ સ્થાપિતસ્ય શ્રેષ્ઠનિયમસ્ય મધ્યસ્થોઽભવત્।
VII સ પ્રથમો નિયમો યદિ નિર્દ્દોષોઽભવિષ્યત તર્હિ દ્વિતીયસ્ય નિયમસ્ય કિમપિ પ્રયોજનં નાભવિષ્યત્।
VIII કિન્તુ સ દોષમારોપયન્ તેભ્યઃ કથયતિ, યથા, "પરમેશ્વર ઇદં ભાષતે પશ્ય યસ્મિન્ સમયેઽહમ્ ઇસ્રાયેલવંશેન યિહૂદાવંશેન ચ સાર્દ્ધમ્ એકં નવીનં નિયમં સ્થિરીકરિષ્યામ્યેતાદૃશઃ સમય આયાતિ।
IX પરમેશ્વરોઽપરમપિ કથયતિ તેષાં પૂર્વ્વપુરુષાણાં મિસરદેશાદ્ આનયનાર્થં યસ્મિન્ દિનેઽહં તેષાં કરં ધૃત્વા તૈઃ સહ નિયમં સ્થિરીકૃતવાન્ તદ્દિનસ્ય નિયમાનુસારેણ નહિ યતસ્તૈ ર્મમ નિયમે લઙ્ઘિતેઽહં તાન્ પ્રતિ ચિન્તાં નાકરવં।
X કિન્તુ પરમેશ્વરઃ કથયતિ તદ્દિનાત્ પરમહં ઇસ્રાયેલવંશીયૈઃ સાર્દ્ધમ્ ઇમં નિયમં સ્થિરીકરિષ્યામિ, તેષાં ચિત્તે મમ વિધીન્ સ્થાપયિષ્યામિ તેષાં હૃત્પત્રે ચ તાન્ લેખિષ્યામિ, અપરમહં તેષામ્ ઈશ્વરો ભવિષ્યામિ તે ચ મમ લોકા ભવિષ્યન્તિ।
XI અપરં ત્વં પરમેશ્વરં જાનીહીતિવાક્યેન તેષામેકૈકો જનઃ સ્વં સ્વં સમીપવાસિનં ભ્રાતરઞ્ચ પુન ર્ન શિક્ષયિષ્યતિ યત આક્ષુદ્રાત્ મહાન્તં યાવત્ સર્વ્વે માં જ્ઞાસ્યન્તિ।
XII યતો હેતોરહં તેષામ્ અધર્મ્માન્ ક્ષમિષ્યે તેષાં પાપાન્યપરાધાંશ્ચ પુનઃ કદાપિ ન સ્મરિષ્યામિ। "
XIII અનેન તં નિયમં નૂતનં ગદિત્વા સ પ્રથમં નિયમં પુરાતનીકૃતવાન્; યચ્ચ પુરાતનં જીર્ણાઞ્ચ જાતં તસ્ય લોપો નિકટો ઽભવત્।

# IX

I સ પ્રથમો નિયમ આરાધનાયા વિવિધરીતિભિરૈહિકપવિત્રસ્થાનેન ચ વિશિષ્ટ આસીત્।
II યતો દૂષ્યમેકં નિરમીયત તસ્ય પ્રથમકોષ્ઠસ્ય નામ પવિત્રસ્થાનમિત્યાસીત્ તત્ર દીપવૃક્ષો ભોજનાસનં દર્શનીયપૂપાનાં શ્રેણી ચાસીત્।
III તત્પશ્ચાદ્ દ્વિતીયાયાસ્તિરસ્કરિણ્યા અભ્યન્તરે ઽતિપવિત્રસ્થાનમિતિનામકં કોષ્ઠમાસીત્,
IV તત્ર ચ સુવર્ણમયો ધૂપાધારઃ પરિતઃ સુવર્ણમણ્ડિતા નિયમમઞ્જૂષા ચાસીત્ તન્મધ્યે માન્નાયાઃ સુવર્ણઘટો હારોણસ્ય મઞ્જરિતદણ્ડસ્તક્ષિતૌ નિયમપ્રસ્તરૌ,
V તદુપરિ ચ કરુણાસને છાયાકારિણૌ તેજોમયૌ કિરૂબાવાસ્તામ્, એતેષાં વિશેષવૃત્તાન્તકથનાય નાયં સમયઃ।
VI એતેષ્વીદૃક્ નિર્મ્મિતેષુ યાજકા ઈશ્વરસેવામ્ અનુતિષ્ઠનતો દૂષ્યસ્ય પ્રથમકોષ્ઠં નિત્યં પ્રવિશન્તિ।

VII કિન્તુ દ્વિતીયં કોષ્ઠં પ્રતિવર્ષમ્ એકકૃત્વ એકાકિના મહાયાજકેન પ્રવિશ્યતે કિન્ત્વાત્મનિમિત્તં લોકાનામ્ અજ્ઞાનકૃતપાપાનાઞ્ચ
નિમિત્તમ્ ઉત્સર્જ્જનીયં રુધિરમ્ અનાદાય તેન ન પ્રવિશ્યતે।

VIII ઇત્યનેન પવિત્ર આત્મા યત્ જ્ઞાપયતિ તદિદં તત્ પ્રથમં દૂષ્યં યાવત્ તિષ્ઠતિ તાવત્ મહાપવિત્રસ્થાનગામી પન્થા
અપ્રકાશિતસ્તિષ્ઠતિ।

IX તચ્ચ દૂષ્યં વર્ત્તમાનસમયસ્ય દૃષ્ટાન્તઃ, યતો હેતોઃ સામ્પ્રતં સંશોધનકાલં યાવદ્ યન્નિરૂપિતં તદનુસારાત્ સેવાકારિણો
માનસિકસિદ્ધિકરણેઽસમર્થાભિઃ

X કેવલં ખાદ્યપેયેષુ વિવિધમજ્જનેષુ ચ શારીરિકરીતિભિ ર્યુક્તાનિ નૈવેદ્યાનિ બલિદાનાનિ ચ ભવન્તિ।

XI અપરં ભાવિમઙ્ગલાનાં મહાયાજકઃ ખ્રીષ્ટ ઉપસ્થાયાહસ્તનિર્મ્મિતેનાર્થત એતત્સૃષ્ટે ર્બહિર્ભૂતેન શ્રેષ્ઠેન સિદ્ધેન ચ દૂષ્યેણ ગત્વા

XII છાગાનાં ગોવત્સાનાં વા રુધિરમ્ અનાદાય સ્વીયરુધિરમ્ આદાયૈકકૃત્વ એવ મહાપવિત્રસ્થાનં પ્રવિશ્યાનન્તકાલિકાં મુક્તિં
પ્રાપ્તવાન્।

XIII વૃષછાગાનાં રુધિરેણ ગવીભસ્મનઃ પ્રક્ષેપેણ ચ યદ્યશુચિલોકાઃ શારીરિશુચિત્વાય પૂયન્તે,

XIV તર્હિ કિં મન્યધ્વે યઃ સદાતનેનાત્મના નિષ્કલઙ્કબલિમિવ સ્વમેવેશ્વરાય દત્તવાન્, તસ્ય ખ્રીષ્ટસ્ય રુધિરેણ યુષ્માકં
મનાંસ્યમરેશ્વરસ્ય સેવાયૈ કિં મૃત્યુજનકેભ્યઃ કર્મ્મભ્યો ન પવિત્રીકારિષ્યન્તે?

XV સ નૂતનનિયમસ્ય મધ્યસ્થોઽભવત્ તસ્યાભિપ્રાયોઽયં યત્ પ્રથમનિયમલઙ્ઘનરૂપપાપેભ્યો મૃત્યુના મુક્તૌ જાતાયામ્
આહૂતલોકા અનન્તકાલીયસમ્પદઃ પ્રતિજ્ઞાફલં લભેરન્।

XVI યત્ર નિયમો ભવતિ તત્ર નિયમસાધકસ્ય બલે ર્મૃત્યુના ભવિતવ્યં।

XVII યતો હતેન બલિના નિયમઃ સ્થિરીભવતિ કિન્તુ નિયમસાધકો બલિ ર્યાવત્ જીવતિ તાવત્ નિયમો નિરર્થકસ્તિષ્ઠતિ।

XVIII તસ્માત્ સ પૂર્વ્વનિયમોઽપિ રુધિરપાતં વિના ન સાધિતઃ।

XIX ફલતઃ સર્વ્વલોકાન્ પ્રતિ વ્યવસ્થાનુસારેણ સર્વ્વા આજ્ઞાઃ કથયિત્વા મૂસા જલેન સિન્દૂરવર્ણલોમ્ના એષોવતૃણેન ચ સાર્દ્ધં
ગોવત્સાનાં છાગાનાઞ્ચ રુધિરં ગૃહીત્વા ગ્રન્થે સર્વ્વલોકેષુ ચ પ્રક્ષિપ્ય બભાષે,

XX યુષ્માન્ અધીશ્વરો યં નિયમં નિરૂપિતવાન્ તસ્ય રુધિરમેતત્।

XXI તદ્વત્ સ દૂષ્યેઽપિ સેવાર્થકેષુ સર્વ્વપાત્રેષુ ચ રુધિરં પ્રક્ષિપ્તવાન્।

XXII અપરં વ્યવસ્થાનુસારેણ પ્રાયશઃ સર્વ્વાણિ રુધિરેણ પરિષ્ક્રિયન્તે રુધિરપાતં વિના પાપમોચનં ન ભવતિ ચ।

XXIII અપરં યાનિ સ્વર્ગીયવસ્તૂનાં દૃષ્ટાન્તાસ્તેષામ્ એતૈઃ પાવનમ્ આવશ્યકમ્ આસીત્ કિન્તુ સાક્ષાત્ સ્વર્ગીયવસ્તૂનામ્ એતેભ્યઃ
શ્રેષ્ઠે◌ૈ ર્બલિદાનૈઃ પાવનમાવશ્યકં।

XXIV યતઃ ખ્રીષ્ટઃ સત્યપવિત્રસ્થાનસ્ય દૃષ્ટાન્તરૂપં હસ્તકૃતં પવિત્રસ્થાનં ન પ્રવિષ્ટવાન્ કિન્ત્વસ્મન્નિમિત્તમ્ ઇદાનીમ્ ઈશ્વરસ્ય
સાક્ષાદ્ ઉપસ્થાતું સ્વર્ગમેવ પ્રવિષ્ટઃ।

XXV યથા ચ મહાયાજકઃ પ્રતિવર્ષં પરશોણિતમાદાય મહાપવિત્રસ્થાનં પ્રવિશતિ તથા ખ્રીષ્ટેન પુનઃ પુનરાત્મોત્સર્ગો ન કર્ત્તવ્યઃ,

XXVI કર્ત્તવ્યે સતિ જગતઃ સૃષ્ટિકાલમારભ્ય બહુવારં તસ્ય મૃત્યુભોગ આવશ્યકોઽભવત્; કિન્ત્વિદાનીં સ આત્મોત્સર્ગેણ
પાપનાશાર્થમ્ એકકૃત્વો જગતઃ શેષકાલે પ્રચકાશે।

XXVII અપરં યથા માનુષસ્યૈકકૃત્વો મરણં તત્ પશ્ચાદ્ વિચારો નિરૂપિતોઽસ્તિ,

XXVIII તદ્વત્ ખ્રીષ્ટોઽપિ બહૂનાં પાપવહનાર્થં બલિરૂપેણૈકકૃત્વ ઉત્સસૃજે, અપરં દ્વિતીયવારં પાપાદ્ ભિન્નઃ સન્ યે તં પ્રતીક્ષન્તે
તેષાં પરિત્રાણાર્થં દર્શનં દાસ્યતિ।

# X

I વ્યવસ્થા ભવિષ્યન્મઙ્ગલાનાં છાયાસ્વરૂપા ન ચ વસ્તૂનાં મૂર્ત્તિસ્વરૂપા તતો હેતો ર્નિત્યં દીયમાનૈરેકવિધૈ ર્વાર્ષિકબલિભિઃ
શરણાગતલોકાન્ સિદ્ધાન્ કર્ત્તું કદાપિ ન શક્નોતિ।

II યદ્યશક્ષ્યત્ તર્હિ તેષાં બલીનાં દાનં કિં ન ન્યવર્ત્તિષ્યત? યતઃ સેવાકારિષ્વેકકૃત્વઃ પવિત્રીભૂતેષુ તેષાં કોઽપિ પાપબોધઃ પુન
ર્નાભવિષ્યત્।

III કિન્તુ તૈ ર્બલિદાનૈઃ પ્રતિવત્સરં પાપાનાં સ્મારણં જાયતે।

IV યતો વૃષાણાં છાગાનાં વા રુધિરેણ પાપમોચનં ન સમ્ભવતિ।

V એતત્કારણાત્ ખ્રીષ્ટેન જગત્ પ્રવિશ્યેદમ્ ઉચ્યતે, યથા, "નેષ્ટ્વા બલિં ન નૈવેદ્યં દેહો મે નિર્મ્મિતસ્ત્વયા।

VI ન ચ ત્વં બલિભિ ર્હવ્યૈઃ પાપઘ્નૈ ર્વા પ્રતુષ્યસિ।

VII અવાદિષં તદૈવાહં પશ્ય કુર્વ્વે સમાગમં। ધર્મ્મગ્રન્થસ્ય સર્ગે મે વિદ્યતે લિખિતા કથા। ઈશ મનોઽભિલાષસ્તે મયા સમ્પૂરયિષ્યતે।
"

VIII ઇત્યસ્મિન્ પ્રથમતો યેષાં દાનં વ્યવસ્થાનુસારાદ્ ભવતિ તાન્યધિ તેનેદમુક્તં યથા, બલિનૈવેદ્યહવ્યાનિ પાપઘ્નઞ્ચોપચારકં,
નેમાનિ વાઞ્છસિ ત્વં હિ ન ચૈતેષુ પ્રતુષ્યસીતિ।

IX તતઃ પરં તેનોક્તં યથા, "પશ્ય મનોઽભિલાષં તે કર્ત્તું કુર્વ્વે સમાગમં;" દ્વિતીયમ્ એતદ્ વાક્યં સ્થિરીકર્ત્તું સ પ્રથમં લુમ્પતિ।

X તેન મનોઽભિલાષેણ ચ વયં યીશુખ્રીષ્ટસ્યૈકકૃત્વઃ સ્વશરીરોત્સર્ગાત્ પવિત્રીકૃતા અભવામ।

XI અપરમ્ એકૈકો યાજકઃ પ્રતિદિનમ્ ઉપાસનાં કુર્વ્વન્ યૈશ્ચ પાપાનિ નાશયિતું કદાપિ ન શક્યન્તે તાદૃશાન્ એકરૂપાન્ બલીન્
પુનઃ પુનરુત્સૃજન્ તિષ્ઠતિ।

XII કિન્ત્વસૌ પાપનાશકમ્ એકં બલિં દત્વાનન્તકાલાર્થમ્ ઈશ્વરસ્ય દક્ષિણ ઉપવિશ્ય

XIII યાવત્ તસ્ય શત્રવસ્તસ્ય પાદપીઠં ન ભવન્તિ તાવત્ પ્રતીક્ષમાણસ્તિષ્ઠતિ।

XIV યત એકેન બલિદાનેન સોઽનન્તકાલાર્થં પૂયમાનાન્ લોકાન્ સાધિતવાન્।

XV એતસ્મિન્ પવિત્ર આત્માપ્યસ્માકં પક્ષે પ્રમાણયતિ

XVI "યતો હેતોસ્તદ્દિનાત્ પરમ્ અહં તૈઃ સાર્દ્ધમ્ ઇમં નિયમં સ્થિરીકરિષ્યામીતિ પ્રથમત ઉક્ત્વા પરમેશ્વરેણેદં કથિતં, તેષાં ચિત્તે
મમ વિધીન્ સ્થાપયિષ્યામિ તેષાં મનઃસુ ચ તાન્ લેખિષ્યામિ ચ,
XVII અપરઞ્ચ તેષાં પાપાન્યપરાધાંશ્ચ પુનઃ કદાપિ ન સ્મારિષ્યામિ। "
XVIII કિન્તુ યત્ર પાપમોચનં ભવતિ તત્ર પાપાર્થકબલિદાનં પુન ર્ન ભવતિ।
XIX અતો હે ભ્રાતરઃ, યીશો રુધિરેણ પવિત્રસ્થાનપ્રવેશાયાસ્માકમ્ ઉત્સાહો ભવતિ,
XX યતઃ સોઽસ્મદર્થં તિરસ્કરિણ્યાર્થતઃ સ્વશરીરેણ નવીનં જીવનયુક્તઞ્ચૈકં પન્થાનં નિર્મ્મિતવાન્,
XXI અપરઞ્ચેશ્વરીયપરિવારસ્યાધ્યક્ષ એકો મહાયાજકોઽસ્માકમસ્તિ।
XXII અતો હેતોરસ્માભિઃ સરલાન્તઃકરણૈ ર્દૃઢવિશ્વાસૈઃ પાપબોધાત્ પ્રક્ષાલિતમનોભિ ર્નિર્મ્મલજલે સ્નાતશરીરૈશ્ચેશ્વરમ્
ઉપાગત્ય પ્રત્યાશાયાઃ પ્રતિજ્ઞા નિશ્ચલા ધારયિતવ્યા।
XXIII યતો યસ્તામ્ અઙ્ગીકૃતવાન્ સ વિશ્વસનીયઃ।
XXIV અપરં પ્રેમ્નિ સત્ક્રિયાસુ ચૈકૈકસ્યોત્સાહવૃદ્ધ્યર્થમ્ અસ્માભિઃ પરસ્પરં મન્ત્રયિતવ્યં।
XXV અપરં કતિપયલોકા યથા કુર્વ્વન્તિ તથાસ્માભિઃ સભાકરણં ન પરિત્યક્તવ્યં પરસ્પરમ્ ઉપદેષ્ટવ્યઞ્ચ યતસ્તત્ મહાદિનમ્
ઉત્તરોત્તરં નિકટવર્ત્તિ ભવતીતિ યુષ્માભિ ર્દૃશ્યતે।
XXVI સત્યમતસ્ય જ્ઞાનપ્રાપ્તેઃ પરં યદિ વયં સ્વંચ્છયા પાપાચારં કુર્મ્મસ્તર્હિ પાપાનાં કૃતે ઽન્યત્ કિમપિ બલિદાનં નાવશિષ્યતે
XXVII કિન્તુ વિચારસ્ય ભયાનકા પ્રતીક્ષા રિપુનાશકાનલસ્ય તાપશ્ચાવશિષ્યતે।
XXVIII યઃ કશ્ચિત્ મૂસસો વ્યવસ્થામ્ અવમન્યતે સ દયાં વિના દ્વયોસ્તિસૃણાં વા સાક્ષિણાં પ્રમાણેન હન્યતે,
XXIX તસ્માત્ કિં બુધ્યધ્વે યો જન ઈશ્વરસ્ય પુત્રમ્ અવજાનાતિ યેન ચ પવિત્રીકૃતો ઽભવત્ તત્ નિયમસ્ય રુધિરમ્ અપવિત્રં
જાનાતિ, અનુગ્રહકરમ્ આત્માનમ્ અપમન્યતે ચ, સ કિયન્મહાઘોરતરદણ્ડસ્ય યોગ્યો ભવિષ્યતિ?
XXX યતઃ પરમેશ્વરઃ કથયતિ, "દાનં ફલસ્ય મત્કર્મ્મ સૂચિતં પ્રદદામ્યહં। " પુનરપિ, "તદા વિચારયિષ્યન્તે પરેશેન નિજાઃ પ્રજાઃ।
" ઇદં યઃ કથિતવાન્ તં વયં જાનીમઃ।
XXXI અમરેશ્વરસ્ય કરયોઃ પતનં મહાભયાનકં।
XXXII હે ભ્રાતરઃ, પૂર્વ્વદિનાનિ સ્મરત યતસ્તદાનીં યૂયં દીપ્તિં પ્રાપ્ય બહુદુર્ગતિરૂપં સંગ્રામં સહમાના એકતો નિન્દાક્લેશૈઃ
કૌતુકીકૃતા અભવત,
XXXIII અન્યતશ્ચ તદ્ભોગિનાં સમાંશિનો ઽભવત।
XXXIV યૂયં મમ બન્ધનસ્ય દુઃખેન દુઃખિનો ઽભવત, યુષ્માકમ્ ઉત્તમા નિત્યા ચ સમ્પત્તિઃ સ્વર્ગે વિદ્યત ઇતિ જ્ઞાત્વા સાનન્દં
સર્વ્વસ્વસ્યાપહરણમ્ અસહધ્વઞ્ચ।
XXXV અતએવ મહાપુરસ્કારયુક્તં યુષ્માકમ્ ઉત્સાહં ન પરિત્યજત।
XXXVI યતો યૂયં યેનેશ્વરસ્યેચ્છાં પાલયિત્વા પ્રતિજ્ઞાયાઃ ફલં લભધ્વં તદર્થં યુષ્માભિ ર્ધૈર્ય્યાવલમ્બનં કર્ત્તવ્યં।
XXXVII યેનાગન્તવ્યં સ સ્વલ્પકાલાત્ પરમ્ આગમિષ્યતિ ન ચ વિલમ્બિષ્યતે।
XXXVIII "પુણ્યવાન્ જનો વિશ્વાસેન જીવિષ્યતિ કિન્તુ યદિ નિવર્ત્તતે તર્હિ મમ મનસ્તસ્મિન્ ન તોષં યાસ્યતિ। "
XXXIX કિન્તુ વયં વિનાશજનિકાં ધર્મ્માત્ નિવૃત્તિં ન કુર્વ્વાણા આત્મનઃ પરિત્રાણાય વિશ્વાસં કુર્વ્વામહે |

# XI

I વિશ્વાસ આશંસિતાનાં નિશ્ચયઃ, અદૃશ્યાનાં વિષયાણાં દર્શનં ભવતિ।
II તેન વિશ્વાસેન પ્રાઞ્ચો લોકાઃ પ્રામાણ્યં પ્રાપ્તવન્તઃ।
III અપરમ્ ઈશ્વરસ્ય વાક્યેન જગન્ત્યસૃજ્યન્ત, દૃષ્ટવસ્તૂનિ ચ પ્રત્યક્ષવસ્તુભ્યો નોદપદ્યન્તૈતદ્ વયં વિશ્વાસેન બુધ્યામહે।
IV વિશ્વાસેન હાબિલ્ ઈશ્વરમુદ્દિશ્ય કાબિલઃ શ્રેષ્ઠં બલિદાનં કૃતવાન્ તસ્માચ્ચેશ્વરેણ તસ્ય દાનાન્યધિ પ્રમાણે દત્તે સ ધાર્મ્મિક
ઇત્યસ્ય પ્રમાણં લબ્ધવાન્ તેન વિશ્વાસેન ચ સ મૃતઃ સન્ અદ્યાપિ ભાષતે।
V વિશ્વાસેન હનોક્ યથા મૃત્યું ન પશ્યેત્ તથા લોકાન્તરં નીતઃ, તસ્યોદ્દેશશ્ચ કેનાપિ ન પ્રાપિ યત ઈશ્વરસ્તં લોકાન્તરં નીતવાન્,
તત્પ્રમાણમિદં તસ્ય લોકાન્તરીકરણાત્ પૂર્વ્વં સ ઈશ્વરાય રોચિતવાન્ ઇતિ પ્રમાણં પ્રાપ્તવાન્।
VI કિન્તુ વિશ્વાસં વિના કોઽપીશ્વરાય રોચિતું ન શક્નોતિ યત ઈશ્વરોઽસ્તિ સ્વાન્વેષિલોકેભ્યઃ પુરસ્કારં દદાતિ ચેતિકથાયામ્
ઈશ્વરશરણાગતૈ ર્વિશ્વસિતવ્યં।
VII અપરં તદાનીં યાન્યદૃશ્યાન્યાસન્ તાનીશ્વરેણાદિષ્ટઃ સન્ નોહો વિશ્વાસેન ભીત્વા સ્વપરિજનાનાં રક્ષાર્થં પોતં નિર્મ્મિતવાન્
તેન ચ જગજ્જનાનાં દોષાન્ દર્શિતવાન્ વિશ્વાસાત્ લભ્યસ્ય પુણ્યસ્યાધિકારી બભૂવ ચ।
VIII વિશ્વાસેનેબ્રાહીમ્ આહૂતઃ સન્ આજ્ઞાં ગૃહીત્વા યસ્ય સ્થાનસ્યાધિકારસ્તેન પ્રાપ્તવ્યસ્તત્ સ્થાનં પ્રસ્થિતવાન્ કિન્તુ
પ્રસ્થાનસમયે ક્ક યામીતિ નાજાનાત્।
IX વિશ્વાસેન સ પ્રતિજ્ઞાતે દેશે પરદેશવત્ પ્રવસન્ તસ્યાઃ પ્રતિજ્ઞાયાઃ સમાનાંશિભ્યામ્ ઇસ્હાકા યાકૂબા ચ સહ દૂષ્યવાસ્યભવત્।
X યસ્માત્ સ ઈશ્વરેણ નિર્મ્મિતં સ્થાપિતઞ્ચ ભિત્તિમૂલયુક્તં નગરં પ્રત્યૈક્ષત।
XI અપરઞ્ચ વિશ્વાસેન સારા વયોતિક્રાન્તા સન્ત્યપિ ગર્ભધારણાય શક્તિં પ્રાપ્ય પુત્રવત્યભવત્, યતઃ સા પ્રતિજ્ઞાકારિણં
વિશ્વાસ્યમ્ અમન્યત।
XII તતો હેતો ર્મૃતકલ્પાદ્ એકસ્માત્ જનાદ્ આકાશીયનક્ષત્રાણીવ ગણનાતીતાઃ સમુદ્રતીરસ્થસિકતા ઇવ ચાસંખ્યા લોકા
ઉત્પેદિરે।
XIII એતે સર્વ્વે પ્રતિજ્ઞાયાઃ ફલાન્યપ્રાપ્ય કેવલં દૂરાત્ તાનિ નિરીક્ષ્ય વન્દિત્વા ચ, પૃથિવ્યાં વયં વિદેશિનઃ પ્રવાસિનશ્ચાસ્મહ ઇતિ
સ્વીકૃત્ય વિશ્વાસેન પ્રાણાન્ તત્યજુઃ।
XIV યે તુ જના ઇત્થં કથયન્તિ તૈઃ પૈતૃકદેશો ઽસ્માભિરન્વિષ્યત ઇતિ પ્રકાશ્યતે।

XV તે યસ્માદ્ દેશાત્ નિર્ગતાસ્તં યદ્યસ્મરિષ્યન્ તર્હિ પરાવર્ત્તનાય સમયમ્ અલપ્સ્યન્ત।
XVI કિન્તુ તે સર્વ્વોત્કૃષ્ટમ્ અર્થતઃ સ્વર્ગીયં દેશમ્ આકાઙ્ક્ષન્તિ તસ્માદ્ ઈશ્વરસ્તાનધિ ન લજ્જમાનસ્તેષામ્ ઈશ્વર ઇતિ નામ
ગૃહીતવાન્ યતઃ સ તેષાં કૃતે નગરમેકં સંસ્થાપિતવાન્।
XVII અપરમ્ ઇબ્રાહીમઃ પરીક્ષાયાં જાતાયાં સ વિશ્વાસેનેસ્હાકમ્ ઉત્સસર્જ,
XVIII વસ્તુત ઇસ્હાકિ તવ વંશો વિખ્યાસ્યત ઇતિ વાગ્ યમધિ કથિતા તમ્ અદ્વિતીયં પુત્રં પ્રતિજ્ઞાપ્રાપ્તઃ સ ઉત્સસર્જ।
XIX યત ઈશ્વરો મૃતાનપ્યુત્થાપયિતું શક્નોતીતિ સ મેને તસ્માત્ સ ઉપમારૂપં તં લેભે।
XX અપરમ્ ઇસ્હાક્ વિશ્વાસેન યાકૂબ્ એષાવે ચ ભાવિવિષયાનધ્યાશિષં દદૌ।
XXI અપરં યાકૂબ્ મરણકાલે વિશ્વાસેન યૂષફઃ પુત્રયોરેકૈકસ્મૈ જનાયાશિષં દદૌ યષ્ટ્યા અગ્રભાગે સમાલમ્બ્ય પ્રણનામ ચ।
XXII અપરં યૂષફ્ ચરમકાલે વિશ્વાસેનેસ્રાયેલ્વંશીયાનાં મિસરદેશાદ્ બહિર્ગમનસ્ય વાચં જગાદ નિજાસ્થીનિ ચાધિ સમાદિદેશ।
XXIII નવજાતો મૂસાશ્ચ વિશ્વાસાત્ ત્રાીન્ માસાન્ સ્વપિતૃભ્યામ્ અગોપ્યત યતસ્તૌ સ્વશિશું પરમસુન્દરં દૃષ્ટવન્તૌ રાજાજ્ઞાઞ્ચ
ન શઙ્કિતવન્તૌ।
XXIV અપરં વયઃપ્રાપ્તો મૂસા વિશ્વાસાત્ ફિરૌણો દૌહિત્ર ઇતિ નામ નાઙ્ગીચકાર।
XXV યતઃ સ ક્ષણિકાત્ પાપજસુખભોગાદ્ ઈશ્વરસ્ય પ્રજાભિઃ સાર્દ્ધં દુઃખભોગં વવ્રે।
XXVI તથા મિસરદેશીયનિધિભ્યઃ ખ્રીષ્ટનિમિત્તાં નિન્દાં મહતીં સમ્પત્તિં મેને યતો હેતોઃ સ પુરસ્કારદાનમ્ અપૈક્ષત।
XXVII અપરં સ વિશ્વાસેન રાજ્ઞઃ ક્રોધાત્ ન ભીત્વા મિસરદેશં પરિતત્યાજ, યતસ્તેનાદૃશ્યં વીક્ષમાણેનેવ ધૈર્ય્યમ્ આલમ્બિ।
XXVIII અપરં પ્રથમજાતાનાં હન્તા યત્ સ્વીયલોકાન્ ન સ્પૃશેત્ તદર્થં સ વિશ્વાસેન નિસ્તારપર્વ્વીયબલિચ્છેદનં
રુધિરસેચનઞ્ચાનુષ્ઠિતાવાન્।
XXIX અપરં તે વિશ્વાસાત્ સ્થલેનેવ સૂફ્સાગરેણ જગ્મુઃ કિન્તુ મિસ્રીયલોકાસ્તત્ કર્ત્તુમ્ ઉપક્રમ્ય તોયેષુ મમજ્જુઃ।
XXX અપરઞ્ચ વિશ્વાસાત્ તૈઃ સપ્તાહં યાવદ્ યિરીહોઃ પ્રાચીરસ્ય પ્રદક્ષિણે કૃતે તત્ નિપપાત।
XXXI વિશ્વાસાદ્ રાહબ્નામિકા વેશ્યાપિ પ્રીત્યા ચારાન્ અનુગૃહ્યાવિશ્વાસિભિઃ સાર્દ્ધં ન વિનનાશ।
XXXII અધિકં કિં કથયિષ્યામિ? ગિદિયોનો બારકઃ શિમ્શોનો યિપ્તહો દાયૂદ્ શિમૂયેલો ભવિષ્યદ્વાદિનશ્ચૈતેષાં વૃત્તાન્તકથનાય
મમ સમયાભાવો ભવિષ્યતિ।
XXXIII વિશ્વાસાત્ તે રાજ્યાનિ વશીકૃતવન્તો ધર્મ્મકર્મ્માણિ સાધિતવન્તઃ પ્રતિજ્ઞાનાં ફલં લબ્ધવન્તઃ સિંહાનાં મુખાનિ રુદ્ધવન્તો
XXXIV વહ્નેર્દાહં નિર્વ્વાપિતવન્તઃ ખઙ્ગધારાદ્ રક્ષાં પ્રાપ્તવન્તો દૌર્બ્બલ્યે સબલીકૃતા યુદ્ધે પરાક્રમિણો જાતાઃ પરેષાં સૈન્યાનિ
દવયિતવન્તશ્ચ।
XXXV યોષિતઃ પુનરુત્થાનેન મૃતાન્ આત્મજાન્ લેભિરે, અપરે ચ શ્રેષ્ઠોત્થાનસ્ય પ્રાપ્તેરાશયા રક્ષામ્ અગૃહીત્વા તાડનેન
મૃતવન્તઃ।
XXXVI અપરે તિરસ્કારૈઃ કશાભિ ર્બન્ધનૈઃ કારયા ચ પરીક્ષિતાઃ।
XXXVII બહવશ્ચ પ્રસ્તરાઘાતૈ ર્હતાઃ કરપત્રૈ ર્વા વિદીર્ણા યન્ત્રૈ ર્વા ક્લિષ્ટાઃ ખઙ્ગધારૈ ર્વા વ્યાપાદિતાઃ। તે મેષાણાં છાગાનાં વા
ચર્મ્માણિ પરિધાય દીનાઃ પીડિતા દુઃખાર્ત્તાશ્ચાભ્રામ્યન્।
XXXVIII સંસારો યેષામ્ અયોગ્યસ્તે નિર્જનસ્થાનેષુ પર્વ્વતેષુ ગહ્વરેષુ પૃથિવ્યાશ્છિદ્રેષુ ચ પર્ય્યટન્।
XXXIX એતૈઃ સર્વ્વૈ ર્વિશ્વાસાત્ પ્રમાણં પ્રાપિ કિન્તુ પ્રતિજ્ઞાયાઃ ફલં ન પ્રાપિ।
XL યતસ્તે યથાસ્માન્ વિના સિદ્ધા ન ભવેયુસ્તથૈવેશ્વરેણાસ્માકં કૃતે શ્રેષ્ઠતરં કિમપિ નિર્દિદિશે।

# XII

I અતો હેતોરેતાવત્સાક્ષિમેઘૈ ર્વેષ્ટિતાઃ સન્તો વયમપિ સર્વ્વભારમ્ આશુબાધકં પાપઞ્ચ નિક્ષિપ્યાસ્માકં ગમનાય નિરૂપિતે માર્ગે
ધૈર્ય્યેણ ધાવામ।
II યશ્ચાસ્માકં વિશ્વાસસ્યાગ્રેસરઃ સિદ્ધિકર્ત્તા ચાસ્તિ તં યીશું વીક્ષામહૈ યતઃ સ સ્વસમ્મુખસ્થિતાનન્દસ્ય પ્રાપ્ત્યર્થમ્ અપમાનં
તુચ્છીકૃત્ય ક્રુશસ્ય યાતનાં સોઢવાન્ ઈશ્વરીયસિંહાસનસ્ય દક્ષિણપાર્શ્વે સમુપવિષ્ટવાંશ્ચ।
III યઃ પાપિભિઃ સ્વવિરુદ્ધમ્ એતાદૃશં વૈપરીત્યં સોઢવાન્ તમ્ આલોચયત તેન યૂયં સ્વમનઃસુ શ્રાન્તાઃ ક્લાન્તાશ્ચ ન ભવિષ્યથ।
IV યૂયં પાપેન સહ યુધ્યન્તોઽદ્યાપિ શોણિતવ્યયપર્ય્યન્તં પ્રતિરોધં નાકુરુત।
V તથા ચ પુત્રાન્ પ્રતીવ યુષ્માન્ પ્રતિ ય ઉપદેશ ઉક્તસ્તં કિં વિસ્મૃતવન્તઃ? "પરેશેન કૃતાં શાસ્તિં હે મત્પુત્ર ન તુચ્છય। તેન
સંભર્ત્સિતશ્ચાપિ નૈવ ક્લામ્ય કદાચન।
VI પરેશઃ પ્રીયતે યસ્મિન્ તસ્મૈ શાસ્તિં દદાતિ યત્। યન્તુ પુત્રં સ ગૃહ્લાતિ તમેવ પ્રહરત્યપિ। "
VII યદિ યૂયં શાસ્તિં સહધ્વં તર્હીશ્વરઃ પુત્રૈરિવ યુષ્માભિઃ સાર્દ્ધં વ્યવહરતિ યતઃ પિતા યસ્મૈ શાસ્તિં ન દદાતિ તાદૃશઃ પુત્રઃ કઃ?
VIII સર્વ્વે યસ્યાઃ શાસ્તેરંશિનો ભવન્તિ સા યદિ યુષ્માકં ન ભવતિ તર્હિ યૂયમ્ આત્મજા ન કિન્તુ જારજા આધ્વે।
IX અપરમ્ અસ્માકં શારીરિકજન્મદાતારોઽસ્માકં શાસ્તિકારિણોઽભવન્ તે ચાસ્માભિઃ સમ્માનિતાસ્તસ્માદ્ ય આત્મનાં
જનયિતા વયં કિં તતોઽધિકં તસ્ય વશીભૂય ન જીવિષ્યામઃ?
X તે ત્વલ્પદિનાનિ યાવત્ સ્વમનોઽમતાનુસારેણ શાસ્તિં કૃતવન્તઃ કિન્ત્વેષોઽસ્માકં હિતાય તસ્ય પવિત્રતાયા અંશિત્વાય ચાસ્માન્
શાસ્તિ।
XI શાસ્તિશ્ચ વર્ત્તમાનસમયે કેનાપિ નાનન્દજનિકા કિન્તુ શોકજનિકૈવ મન્યતે તથાપિ યે તયા વિનીયન્તે તેભ્યઃ સા પશ્ચાત્
શાન્તિયુક્તં ધર્મ્મફલં દદાતિ।
XII અતએવ યૂયં શિથિલાન્ હસ્તાન્ દુર્બ્બલાનિ જાનૂનિ ચ સબલાનિ કુરુધ્વં।
XIII યથા ચ દુર્બ્બલસ્ય સન્ધિસ્થાનં ન ભજ્યેત સ્વસ્થં તિષ્ઠેત્ તથા સ્વચરણાર્થં સરલં માર્ગં નિર્મ્માત।
XIV અપરઞ્ચ સર્વ્વૈઃ સાર્થમ્ એક્યભાવં યચ્ચ વિના પરમેશ્વરસ્ય દર્શનં કેનાપિ ન લપ્સ્યતે તત્ પવિત્રત્વં ચેષ્ટધ્વં।

XV યથા કશ્ચિદ્ ઈશ્વરસ્યાનુગ્રહાત્ ન પતેત્, યથા ચ તિક્તતાયા મૂલં પ્રરુહ્ય બાધાજનકં ન ભવેત્ તેન ચ બહવોઽપવિત્રા ન ભવેયુઃ,
XVI યથા ચ કશ્ચિત્ લમ્પટો વા એકકૃત્વ આહારાર્થં સ્વીયજ્યેષ્ઠાધિકારવિક્રેતા ય એષૌસ્તદ્વદ્ અધર્મ્માચારી ન ભવેત્ તથા સાવધાના ભવત।
XVII યતઃ સ એષૌઃ પશ્ચાદ્ આશીર્વ્વાદાધિકારી ભવિતુમ્ ઇચ્છન્નપિ નાનુગૃહીત ઇતિ યૂયં જાનીથ, સ ચાશ્રુપાતેન મત્યન્તરં પ્રાર્થયમાનોઽપિ તદુપાયં ન લેભે।
XVIII અપરઞ્ચ સ્પૃશ્યઃ પર્વ્વતઃ પ્રજ્વલિતો વહ્નિઃ કૃષ્ણાવર્ણો મેઘો ઽન્ધકારો ઝઞ્ભ્શ તૂરીવાદ્યં વાક્યાનાં શબ્દશ્ચ નૈતેષાં સન્નિધૌ યૂયમ્ આગતાઃ।
XIX તં શબ્દં શ્રુત્વા શ્રોતારસ્તાદૃશં સમ્ભાષણં યત્ પુન ર્ન જાયતે તત્ પ્રાર્થિતવન્તઃ।
XX યતઃ પશુરપિ યદિ ધરાધરં સ્પૃશતિ તર્હિ સ પાષાણાઘાતૈ ર્હન્તવ્ય ઇત્યાદેશં સોઢું તે નાશક્નુવન્।
XXI તચ્ચ દર્શનમ્ એવં ભયાનકં યત્ મૂસસોક્તં ભીતસ્ત્રાસયુક્તશ્ચાસ્મીતિ।
XXII કિન્તુ સીયોન્પર્વ્વતો ઽમરેશ્વરસ્ય નગરં સ્વર્ગસ્થયિરૂશાલમમ્ અયુતાનિ દિવ્યદૂતાઃ
XXIII સ્વર્ગે લિખિતાનાં પ્રથમજાતાનામ્ ઉત્સવઃ સમિતિશ્ચ સર્વ્વેષાં વિચારાધિપતિરીશ્વરઃ સિદ્ધીકૃતધાર્મ્મિકાનામ્ આત્માનો
XXIV નૂતનનિયમસ્ય મધ્યસ્થો યીશુઃ, અપરં હાબિલો રક્તાત્ શ્રેયઃ પ્રચારકં પ્રોક્ષણસ્ય રક્તઞ્ચૈતેષાં સન્નિધૌ યૂયમ્ આગતાઃ।
XXV સાવધાના ભવત તં વક્તારં નાવજાનીત યતો હેતોઃ પૃથિવીસ્થિતઃ સ વક્તા યૈરવજ્ઞાતસ્તૈ ર્યદિ રક્ષા નાપ્રાપિ તર્હિ સ્વર્ગીયવક્તુઃ પરાઙ્મુખીભૂયાસ્માભિઃ કથં રક્ષા પ્રાપ્સ્યતે?
XXVI તદા તસ્ય રવાત્ પૃથિવી કમ્પિતા કિન્ત્વિદાનીં તેનેદં પ્રતિજ્ઞાતં યથા, "અહં પુનરેકકૃત્વઃ પૃથિવીં કમ્પયિષ્યામિ કેવલં તન્નહિ ગગનમપિ કમ્પયિષ્યામિ। "
XXVII સ એકકૃત્વઃ શબ્દો નિશ્ચલવિષયાણાં સ્થિતયે નિર્મ્મિતાનામિવ ચઞ્ચલવસ્તૂનાં સ્થાનાન્તરીકરણં પ્રકાશયતિ।
XXVIII અતએવ નિશ્ચલરાજ્યપ્રાપ્તૈરસ્માભિઃ સોઽનુગ્રહ આલમ્બિતવ્યો યેન વયં સાદરં સભયઞ્ચ તુષ્ટિજનકરૂપેણેશ્વરં સેવિતું શક્નુયામ।
XXIX યતોઽસ્માકમ્ ઈશ્વરઃ સંહારકો વહ્નિઃ।

# XIII

I ભ્રાતૃષુ પ્રેમ તિષ્ઠતુ। અતિથિસેવા યુષ્માભિ ર્ન વિસ્મર્ય્યતાં
II યતસ્તયા પ્રચ્છન્નરૂપેણ દિવ્યદૂતાઃ કેષાઞ્ચિદ્ અતિથયોઽભવન્।
III બન્દિનઃ સહબન્દિભિરિવ દુઃખિનશ્ચ દેહવાસિભિરિવ યુષ્માભિઃ સ્મર્ય્યન્તાં।
IV વિવાહઃ સર્વ્વેષાં સમીપે સમ્માનિતવ્યસ્તદીયશય્યા ચ શુચિઃ કિન્તુ વેશ્યાગામિનઃ પારદારિકાશ્ચેશ્વરેણ દણ્ડયિષ્યન્તે।
V યૂયમ્ આચારે નિર્લોભા ભવત વિદ્યમાનવિષયે સન્તુષ્યત ચ યસ્માદ્ ઈશ્વર એવેદં કથિતવાન્, યથા, "ત્વાં ન ત્યક્ષ્યામિ ન ત્વાં હાસ્યામિ। "
VI અતએવ વયમ્ ઉત્સાહેનેદં કથયિતું શક્નુમઃ, "મત્પક્ષે પરમેશોઽસ્તિ ન ભેષ્યામિ કદાચન। યસ્માત્ માં પ્રતિ કિં કર્ત્તું માનવઃ પારયિષ્યતિ॥ "
VII યુષ્માકં યે નાયકા યુષ્મભ્યમ્ ઈશ્વરસ્ય વાક્યં કથિતવન્તસ્તે યુષ્માભિઃ સ્મર્ય્યન્તાં તેષામ્ આચારસ્ય પરિણામમ્ આલોચ્ય યુષ્માભિસ્તેષાં વિશ્વાસોઽનુક્રિયતાં।
VIII યીશુઃ ખ્રીષ્ટઃ શ્વોઽદ્ય સદા ચ સ એવાસ્તે।
IX યૂયં નાનાવિધનૂતનશિક્ષાભિ ર્ન પરિવર્ત્તધ્વં યતોઽનુગ્રહેણાન્તઃકરણસ્ય સુસ્થિરીભવનં ક્ષેમં ન ચ ખાદ્યદ્રવ્યૈઃ। યતસ્તદાચારિણસ્તૈ ર્નોપકૃતાઃ।
X યે દૃષ્યસ્ય સેવાં કુર્વ્વન્તિ તે યસ્યા દ્રવ્યભોજનસ્યાનધિકારિણસ્તાદૃશી યજ્ઞવેદિરસ્માકમ્ આસ્તે।
XI યતો યેષાં પશૂનાં શોણિતં પાપનાશાય મહાયાજકેન મહાપવિત્રસ્થાનસ્યાભ્યન્તરં નીયતે તેષાં શરીરાણિ શિબિરાદ્ બહિ ર્દહ્યન્તે।
XII તસ્માદ્ યીશુરપિ યત્ સ્વરુધિરેણ પ્રજાઃ પવિત્રીકુર્ય્યાત્ તદર્થં નગરદ્વારસ્ય બહિ ર્મૃતિં ભુક્તવાન્।
XIII અતો હેતોરસ્માભિરપિ તસ્યાપમાનં સહમાનૈઃ શિબિરાદ્ બહિસ્તસ્ય સમીપં ગન્તવ્યં।
XIV યતો ઽત્રાસ્માકં સ્થાયિ નગરં ન વિદ્યતે કિન્તુ ભાવિ નગરમ્ અસ્માભિરન્વિષ્યતે।
XV અતએવ યીશુનાસ્માભિ ર્નિત્યં પ્રશંસારૂપો બલિરર્થતસ્તસ્ય નામાઙ્ગીકુર્વ્વતામ્ ઓષ્ઠાધરાણાં ફલમ્ ઈશ્વરાય દાતવ્યં।
XVI અપરઞ્ચ પરોપકારો દાનઞ્ચ યુષ્માભિ ર્ન વિસ્મર્ય્યતાં યતસ્તાદૃશં બલિદાનમ્ ઈશ્વરાય રોચતે।
XVII યૂયં સ્વનાયકાનામ્ આજ્ઞાગ્રાહિણો વશ્યાશ્ચ ભવત યતો યૈરુપનિધિઃ પ્રતિદાતવ્યસ્તાદૃશા લોકા ઇવ તે યુષ્મદીયાત્મનાં રક્ષણાર્થં જાગ્રતિ, અતસ્તે યથા સાનન્દાસ્તત્ કુર્ય્યુ ર્ન ચ સાર્ત્તસ્વરા અત્ર યતધ્વં યતસ્તેષામ્ આર્ત્તસ્વરો યુષ્માકમ્ ઇષ્ટજનકો ન ભવેત્।
XVIII અપરઞ્ચ યૂયમ્ અસ્મન્નિમિત્તં પ્રાર્થનાં કુરુત યતો વયમ્ ઉત્તમમનોવિશિષ્ટાઃ સર્વ્વત્ર સદાચારં કર્ત્તુમ્ ઇચ્છુકાશ્ચ ભવામ ઇતિ નિશ્ચિતં જાનીમઃ।
XIX વિશેષતોઽહં યથા ત્વરયા યુષ્મભ્યં પુન ર્દીયે તદર્થં પ્રાર્થનાયૈ યુષ્માન્ અધિકં વિનયે।
XX અનન્તનિયમસ્ય રુધિરેણ વિશિષ્ટો મહાન્ મેષપાલકો યેન મૃતગણમધ્યાત્ પુનરાનાયિ સ શાન્તિદાયક ઈશ્વરો
XXI નિજાભિમતસાધનાય સર્વ્વસ્મિન્ સત્કર્મ્મણિ યુષ્માન્ સિદ્ધાન્ કરોતુ, તસ્ય દૃષ્ટૌ ચ યદ્યત્ તુષ્ટિજનકં તદેવ યુષ્માકં મધ્યે યીશુના ખ્રીષ્ટેન સાધયતુ। તસ્મૈ મહિમા સર્વ્વદા ભૂયાત્। આમેન્।
XXII હે ભ્રાતરઃ, વિનયેઽહં યૂયમ્ ઇદમ્ ઉપદેશવાક્યં સહધ્વં યતોઽહં સંક્ષેપેણ યુષ્માન્ પ્રતિ લિખિતવાન્।

XXIII અસ્માકં ભ્રાતા તીમથિયો મુક્તોઽભવદ્ ઇતિ જાનીત, સ ચ યદિ ત્વરયા સમાગચ્છતિ તર્હિ તેન સાર્દ્ધમ્ અહં યુષ્માન્
સાક્ષાત્ કરિષ્યામિ।
XXIV યુષ્માકં સર્વ્વાન્ નાયકાન્ પવિત્રલોકાંશ્ચ નમસ્કુરુત। અપરમ્ ઇતાલિયાદેશીયાનાં નમસ્કારં જ્ઞાસ્યથ।
XXV અનુગ્રહો યુષ્માકં સર્વ્વેષાં સહાયો ભૂયાત્। આમેન્।

# યાકૂબઃ પત્રં

I ઈશ્વરસ્ય પ્રભો ર્યીશુખ્રીષ્ટસ્ય ચ દાસો યાકૂબ્ વિકીર્ણીભૂતાન્ દ્વાદશં વંશાન્ પ્રતિ નમસ્કૃત્ય પત્રં લિખતિ।

II હે મમ ભ્રાતરઃ, યૂયં યદા બહુવિધપરીક્ષાષુ નિપતત તદા તત્ પૂર્ણાનન્દસ્ય કારણં મન્યધ્વં।

III યતો યુષ્માકં વિશ્વાસસ્ય પરીક્ષિતત્વેન ધૈર્ય્યં સમ્પાદ્યત ઇતિ જાનીથ।

IV તચ્ચ ધૈર્ય્યં સિદ્ધફલં ભવતુ તેન યૂયં સિદ્ધાઃ સમ્પૂર્ણાશ્ચ ભવિષ્યથ કસ્યાપિ ગુણસ્યાભાવશ્ચ યુષ્માકં ન ભવિષ્યતિ।

V યુષ્માકં કસ્યાપિ જ્ઞાનાભાવો યદિ ભવેત્ તર્હિ ય ઈશ્વરઃ સરલભાવેન તિરસ્કારઞ્ચ વિના સર્વ્વેભ્યો દદાતિ તતઃ સ યાચતાં તતસ્તસ્મૈ દાયિષ્યતે।

VI કિન્તુ સ નિઃસન્દેહઃ સન્ વિશ્વાસેન યાચતાં યતઃ સન્દિગ્ધો માનવો વાયુના ચાલિતસ્યોત્પ્લવમાનસ્ય ચ સમુદ્રતરઙ્ગસ્ય સદૃશો ભવતિ।

VII તાદૃશો માનવઃ પ્રભોઃ કિઞ્ચિત્ પ્રાપ્સ્યતીતિ ન મન્યતાં।

VIII દ્વિમના લોકઃ સર્વ્વગતિષુ ચઞ્ચલો ભવતિ।

IX યો ભ્રાતા નમ્રઃ સ નિજોન્નત્યા શ્લાઘતાં।

X યશ્ચ ધનવાન્ સ નિજનમ્રતયા શ્લાઘતાંયતઃ સ તૃણપુષ્પવત્ ક્ષયં ગમિષ્યતિ।

XI યતઃ સતાપેન સૂર્ય્યેણોદિત્ય તૃણં શોષ્યતે તત્પુષ્પઞ્ચ ભ્રશ્યતિ તેન તસ્ય રૂપસ્ય સૌન્દર્ય્યં નશ્યતિ તદ્વદ્ ધનિલોકોઽપિ સ્વીયમૂઢતયા મ્લાસ્યતિ।

XII યો જનઃ પરીક્ષાં સહતે સ એવ ધન્યઃ, યતઃ પરીક્ષિતત્વં પ્રાપ્ય સ પ્રભુના સ્વપ્રેમકારિભ્યઃ પ્રતિજ્ઞાતં જીવનમુકુટં લપ્સ્યતે।

XIII ઈશ્વરો માં પરીક્ષત ઇતિ પરીક્ષાસમયે કોઽપિ ન વદતુ યતઃ પાપાયેશ્વરસ્ય પરીક્ષા ન ભવતિ સ ચ કમપિ ન પરીક્ષતે।

XIV કિન્તુ યઃ કશ્ચિત્ સ્વીયમનોવાઞ્છયાકૃષ્યતે લોભ્યતે ચ તસ્યૈવ પરીક્ષા ભવતિ।

XV તસ્માત્ સા મનોવાઞ્છા સગર્ભા ભૂત્વા દુષ્કૃતિં પ્રસૂતે દુષ્કૃતિશ્ચ પરિણામં ગત્વા મૃત્યું જનયતિ।

XVI હે મમ પ્રિયભ્રાતરઃ, યૂયં ન ભ્રામ્યત।

XVII યત્ કિઞ્ચિદ્ ઉત્તમં દાનં પૂર્ણો વરશ્ચ તત્ સર્વ્વમ્ ઊર્દ્ધ્વાદ્ અર્થતો યસ્મિન્ દશાન્તરં પરિવર્ત્તનજાતચ્છાયા વા નાસ્તિ તસ્માદ્ દીપ્ત્યાકરાત્ પિતુરવરોહતિ।

XVIII તસ્ય સૃષ્ટવસ્તૂનાં મધ્યે વયં યત્ પ્રથમફલસ્વરૂપા ભવામસ્તદર્થં સ સ્વેચ્છાતઃ સત્યમતસ્ય વાક્યેનાસ્માન્ જનયામાસ।

XIX અતએવ હે મમ પ્રિયભ્રાતરઃ, યુષ્માકમ્ એકૈકો જનઃ શ્રવણે ત્વરિતઃ કથને ધીરઃ ક્રોધેઽપિ ધીરો ભવતુ।

XX યતો માનવસ્ય ક્રોધ ઈશ્વરીયધર્મ્મં ન સાધયતિ।

XXI અતો હેતો ર્યૂયં સર્વ્વામ્ અશુચિક્રિયાં દુષ્ટતાબાહુલ્યઞ્ચ નિક્ષિપ્ય યુષ્મન્મનસાં પરિત્રાણે સમર્થં રોપિતં વાક્યં નમ્રભાવેન ગૃહ્લીત।

XXII અપરઞ્ચ યૂયં કેવલમ્ આત્મવઞ્ચયિતારો વાક્યસ્ય શ્રોતારો ન ભવત કિન્તુ વાક્યસ્ય કર્મ્મકારિણો ભવત।

XXIII યતો યઃ કશ્ચિદ્ વાક્યસ્ય કર્મ્મકારી ન ભૂત્વા કેવલં તસ્ય શ્રોતા ભવતિ સ દર્પણે સ્વીયશારીરિકવદનં નિરીક્ષમાણસ્ય મનુજસ્ય સદૃશઃ।

XXIV આત્માકારે દૃષ્ટે સ પ્રસ્થાય કીદૃશ આસીત્ તત્ તત્ક્ષણાદ્ વિસ્મરતિ।

XXV કિન્તુ યઃ કશ્ચિત્ નત્વા મુક્તેઃ સિદ્ધાં વ્યવસ્થામ્ આલોક્ય તિષ્ઠતિ સ વિસ્મૃતિયુક્તઃ શ્રોતા ન ભૂત્વા કર્મ્મકર્ત્તૈવ સન્ સ્વકાર્ય્યે ધન્યો ભવિષ્યતિ।

XXVI અનાયત્તરસનઃ સન્ યઃ કશ્ચિત્ સ્વમનો વઞ્ચયિત્વા સ્વં ભક્તં મન્યતે તસ્ય ભક્તિ ર્મુધા ભવતિ।

XXVII ક્લેશકાલે પિતૃહીનાનાં વિધવાનાઞ્ચ યદ્ અવેક્ષણં સંસારાચ્ચ નિષ્કલઙ્કેન યદ્ આત્મરક્ષણં તદેવ પિતુરીશ્વરસ્ય સાક્ષાત્ શુચિ ર્નિર્મ્મલા ચ ભક્તિઃ।

## II

I હે મમ ભ્રાતરઃ, યૂયમ્ અસ્માકં તેજસ્વિનઃ પ્રભો ર્યીશુખ્રીષ્ટસ્ય ધર્મ્મં મુખાપેક્ષયા ન ધારયત।

II યતો યુષ્માકં સભાયાં સ્વર્ણાઙ્ગુરીયકયુક્તે ભ્રાજિષ્ણુપરિચ્છદે પુરુષે પ્રવિષ્ટે મલિનવસ્ત્રે કસ્મિંશ્ચિદ્ દરિદ્રેઽપિ પ્રવિષ્ટે

III યૂયં યદિ તં ભ્રાજિષ્ણુપરિચ્છદવસાનં જનં નિરીક્ષ્ય વદેત ભવાન્ અત્રોત્તમસ્થાન ઉપવિશત્વિતિ કિઞ્ચ તં દરિદ્રં યદિ વદેત ત્વમ્ અમુસ્મિન્ સ્થાને તિષ્ઠ યદ્વાત્ર મમ પાદપીઠ ઉપવિશેતિ,

IV તર્હિ મનઃસુ વિશેષ્ય યૂયં કિં કુતર્કૈઃ કુવિચારકા ન ભવથ?

V હે મમ પ્રિયભ્રાતરઃ, શૃણુત, સંસારે યે દરિદ્રાસ્તાન્ ઈશ્વરો વિશ્વાસેન ધનિનઃ સ્વપ્રેમકારિભ્યશ્ચ પ્રતિશ્રુતસ્ય રાજ્યસ્યાધિકારિણઃ કર્ત્તું કિં ન વરીતવાન્? કિન્તુ દરિદ્રો યુષ્માભિરવજ્ઞાયતે।

VI ધનવન્ત એવ કિં યુષ્માન્ નોપદ્રવન્તિ બલાચ્ચ વિચારાસનાનાં સમીપં ન નયન્તિ?

VII યુષ્મદુપરિ પરિકીર્ત્તિતં પરમં નામ કિં તૈરેવ ન નિન્દ્યતે?

VIII કિઞ્ચ ત્વં સ્વસમીપવાસિનિ સ્વાત્મવત્ પ્રીયસ્વ, એતચ્છાસ્ત્રીયવચનાનુસારતો યદિ યૂયં રાજકીયવ્યવસ્થાં પાલયથ તર્હિ ભદ્રં કુરુથ।

IX યદિ ચ મુખાપેક્ષાં કુરુથ તર્હિ પાપમ્ આચરથ વ્યવસ્થયા ચાજ્ઞાલઙ્ઘિન ઇવ દૂષ્યધ્વે।

X યતો યઃ કશ્ચિત્ કૃત્સ્નાં વ્યવસ્થાં પાલયતિ સ યદ્યેકસ્મિન્ વિધૌ સ્ખલતિ તર્હિ સર્વ્વેષામ્ અપરાધી ભવતિ।

XI યતો હેતોસ્ત્વં પરદારાન્ મા ગચ્છેતિ યઃ કથિતવાન્ સ એવ નરહત્યાં મા કુર્ય્યા ઇત્યપિ કથિતવાન્ તસ્માત્ ત્વં પરદારાન્ ન ગત્વા યદિ નરહત્યાં કરોષિ તર્હિ વ્યવસ્થાલઙ્ઘી ભવસિ।

XII મુક્તે ર્વ્યવસ્થાતો યેષાં વિચારેણ ભવિતવ્યં તાદૃશા લોકા ઇવ યૂયં કથાં કથયત કર્મ્મ કુરુત ચ।
XIII યો દયાં નાચરતિ તસ્ય વિચારો નિર્દ્દયેન કારિષ્યતે, કિન્તુ દયા વિચારમ્ અભિભવિષ્યતિ।
XIV હે મમ ભ્રાતરઃ, મમ પ્રત્યયોઽસ્તીતિ યઃ કથયતિ તસ્ય કર્મ્માણિ યદિ ન વિદ્યન્ત તર્હિ તેન કિં ફલં? તેન પ્રત્યયેન કિં તસ્ય પરિત્રાણં ભવિતું શક્નોતિ?
XV કેષુચિદ્ ભ્રાતૃષુ ભગિનીષુ વા વસનહીનેષુ પ્રાત્યહિકાહારહીનેષુ ચ સત્સુ યુષ્માકં કોઽપિ તેભ્યઃ શરીરાર્થં પ્રયોજનીયાનિ દ્રવ્યાણિ ન દત્વા યદિ તાન્ વદેત્,
XVI યૂયં સકુશલં ગત્વોષ્ણગાત્રા ભવત તૃપ્યત ચેતિ તર્હ્યેતેન કિં ફલં?
XVII તદ્વત્ પ્રત્યયો યદિ કર્મ્મભિ ર્યુક્તો ન ભવેત્ તર્હ્યેકાકિત્વાત્ મૃત એવાસ્તે।
XVIII કિઞ્ચ કશ્ચિદ્ ઇદં વદિષ્યતિ તવ પ્રત્યયો વિદ્યતે મમ ચ કર્મ્માણિ વિદ્યન્તે, ત્વં કર્મ્મહીનં સ્વપ્રત્યયં માં દર્શય તર્હ્યહમપિ મત્કર્મ્મભ્યઃ સ્વપ્રત્યયં ત્વાં દર્શયિષ્યામિ।
XIX એક ઈશ્વરો ઽસ્તીતિ ત્વં પ્રત્યેષિ। ભદ્રં કરોષિ। ભૂતા અપિ તત્ પ્રતિયન્તિ કમ્પન્તે ચ।
XX કિન્તુ હે નિર્બ્બોધમાનવ, કર્મ્મહીનઃ પ્રત્યયો મૃત એવાસ્ત્યેતદ્ અવગન્તું કિમ્ ઇચ્છસિ?
XXI અસ્માકં પૂર્વ્વપુરુષો ય ઇબ્રાહીમ્ સ્વપુત્રમ્ ઇસ્હાકં યજ્ઞવેદ્યામ્ ઉત્સૃષ્ટવાન્ સ કિં કર્મ્મભ્યો ન સપુણ્યીકૃતઃ?
XXII પ્રત્યયે તસ્ય કર્મ્મણાં સહકારિણિ જાતે કર્મ્મભિઃ પ્રત્યયઃ સિદ્ધો ઽભવત્ તત્ કિં પશ્યસિ?
XXIII ઇત્થઞ્ચેદં શાસ્ત્રીયવચનં સફલમ્ અભવત્, ઇબ્રાહીમ્ પરમેશ્વરે વિશ્વસિતવાન્ તચ્ચ તસ્ય પુણ્યાયાગણ્યત સ ચેશ્વરસ્ય મિત્ર ઇતિ નામ લબ્ધવાન્।
XXIV પશ્યત માનવઃ કર્મ્મભ્યઃ સપુણ્યીક્રિયતે ન ચૈકાકિના પ્રત્યયેન।
XXV તદ્વદ્ યા રાહબ્નામિકા વારાઙ્ગના ચારાન્ અનુગૃહ્યાપરેણ માર્ગેણ વિસસર્જ સાપિ કિં કર્મ્મભ્યો ન સપુણ્યીકૃતા?
XXVI અતએવાત્મહીનો દેહો યથા મૃતોઽસ્તિ તથૈવ કર્મ્મહીનઃ પ્રત્યયોઽપિ મૃતોઽસ્તિ।

# III

I હે મમ ભ્રાતરઃ, શિક્ષકૈરસ્માભિ ર્ગુરુતરદણ્ડો લપ્સ્યત ઇતિ જ્ઞાત્વા યૂયમ્ અનેકે શિક્ષકા મા ભવત।
II યતઃ સર્વ્વે વયં બહુવિષયેષુ સ્ખલામઃ, યઃ કશ્ચિદ્ વાક્યે ન સ્ખલતિ સ સિદ્ધપુરુષઃ કૃત્સ્નં વશીકર્ત્તું સમર્થશ્ચાસ્તિ।
III પશ્યત વયમ્ અશ્વાન્ વશીકર્ત્તું તેષાં વક્ત્રેષુ ખલીનાન્ નિધાય તેષાં કૃત્સ્નં શરીરમ્ અનુવર્ત્તયામઃ।
IV પશ્યત યે પોતા અતીવ બૃહદાકારાઃ પ્રચણ્ડવાતૈશ્ચ ચાલિતાસ્તેઽપિ કર્ણધારસ્ય મનોઽભિમતાદ્ અતિક્ષુદ્રેણ કર્ણેન વાઞ્છિતં સ્થાનં પ્રત્યનુવર્ત્તન્તે।
V તદ્વદ્ રસનાપિ ક્ષુદ્રતરાઙ્ગં સન્તી દર્પવાક્યાનિ ભાષતે। પશ્ય કીદૃઙ્મહારણ્યં દહ્યતે ઽલ્પેન વહ્નિના।
VI રસનાપિ ભવેદ્ વહ્નિરધર્મ્મરૂપપિષ્ટપે। અસ્મદઙ્ગેષુ રસના તાદૃશં સન્તિષ્ઠતિ સા કૃત્સ્નં દેહં કલઙ્કયતિ સૃષ્ટિરથસ્ય ચક્રં પ્રજ્વલયતિ નરકાનલેન જ્વલતિ ચ।
VII પશુપક્ષ્યુરોગજલચરાણાં સર્વ્વેષાં સ્વભાવો દમયિતું શક્યતે માનુષિકસ્વભાવેન દમયાઞ્ચક્રે ચ।
VIII કિન્તુ માનવાનાં કેનાપિ જિહ્વા દમયિતું ન શક્યતે સા ન નિવાર્ય્યમ્ અનિષ્ટં હલાહલવિષેણ પૂર્ણા ચ।
IX તયા વયં પિતરમ્ ઈશ્વરં ધન્યં વદામઃ, તયા ચેશ્વરસ્ય સાદૃશ્યે સૃષ્ટાન્ માનવાન્ શપામઃ।
X એકસ્માદ્ વદનાદ્ ધન્યવાદશાપૌ નિર્ગચ્છતઃ। હે મમ ભ્રાતરઃ, એતાદૃશં ન કર્ત્તવ્યં।
XI પ્રસ્રવણઃ કિમ્ એકસ્માત્ છિદ્રાત્ મિષ્ટં તિક્તઞ્ચ તોયં નિર્ગમયતિ?
XII હે મમ ભ્રાતરઃ, ઉડુમ્બરતરુઃ કિં જિતફલાનિ દ્રાક્ષાલતા વા કિમ્ ઉડુમ્બરફલાનિ ફલિતું શક્નોતિ? તદ્વદ્ એકઃ પ્રસ્રવણો લવણમિષ્ટે તોયે નિર્ગમયિતું ન શક્નોતિ।
XIII યુષ્માકં મધ્યે જ્ઞાની સુબોધશ્ચ ક આસ્તે? તસ્ય કર્મ્માણિ જ્ઞાનમૂલકમૃદુતાયુક્તાનીતિ સદાચારાત્ સ પ્રમાણયતુ।
XIV કિન્તુ યુષ્મદન્તઃકરણમધ્યે યદિ તિક્તેર્ષ્યા વિવાદેચ્છા ચ વિદ્યતે તર્હિ સત્યમતસ્ય વિરુદ્ધં ન શ્લાઘધ્વં નચાનૃતં કથયત।
XV તાદૃશં જ્ઞાનમ્ ઊર્દ્ધ્વાદ્ આગતં નહિ કિન્તુ પાર્થિવં શરીરિ ભૌતિકઞ્ચ।
XVI યતો હેતોરીર્ષ્યા વિવાદેચ્છા ચ યત્ર વેદ્યેતે તત્રૈવ કલહઃ સર્વ્વં દુષ્કૃતઞ્ચ વિદ્યતે।
XVII કિન્તૂર્દ્ધ્વાદ્ આગતં યત્ જ્ઞાનં તત્ પ્રથમં શુચિ તતઃ પરં શાન્તં ક્ષાન્તમ્ આશુસન્ધેયં દયાદિસત્ફલૈઃ પરિપૂર્ણમ્ અસન્દિગ્ધં નિષ્કપટઞ્ચ ભવતિ।
XVIII શાન્ત્યાચારિભિઃ શાન્ત્યા ધર્મ્મફલં રોપ્યતે।

# IV

I યુષ્માકં મધ્યે સમરા રણશ્ચ કુત ઉત્પદ્યન્તે? યુષ્મદઙ્ગશિબિરાશ્રિતાભ્યઃ સુખેચ્છાભ્યઃ કિં નોત્પદ્યન્તે?
II યૂયં વાઞ્છથ કિન્તુ નાપ્નુથ, યૂયં નરહત્યામ્ ઈર્ષ્યાઞ્ચ કુરુથ કિન્તુ કૃતાર્થા ભવિતું ન શક્નુથ, યૂયં યુધ્યથ રણં કુરુથ ચ કિન્ત્વપ્રાપ્તાસ્તિષ્ઠથ, યતો હેતોઃ પ્રાર્થનાં ન કુરુથ।
III યૂયં પ્રાર્થયધ્વે કિન્તુ ન લભધ્વે યતો હેતોઃ સ્વસુખભોગેષુ વ્યયાર્થં કુ પ્રાર્થયધ્વે।
IV હે વ્યભિચારિણો વ્યભિચારિણ્યશ્ચ, સંસારસ્ય યત્ મૈત્ર્યં તદ્ ઈશ્વરસ્ય શાત્રવમિતિ યૂયં કિં ન જાનીથ? અત એવ યઃ કશ્ચિત્ સંસારસ્ય મિત્રં ભવિતુમ્ અભિલષતિ સ એવેશ્વરસ્ય શત્રુ ર્ભવતિ।
V યૂયં કિં મન્યધ્વે? શાસ્ત્રસ્ય વાક્યં કિં ફલહીનં ભવેત્? અસ્મદન્તર્વાસી ય આત્મા સ વા કિમ્ ઈર્ષ્યાર્થં પ્રેમ કરોતિ?
VI તન્નહિ કિન્તુ સ પ્રતુલં વરં વિતરતિ તસ્માદ્ ઉક્તમાસ્તે યથા, આત્માભિમાનલોકાનાં વિપક્ષો ભવતીશ્વરઃ। કિન્તુ તેનૈવ નમ્રેભ્યઃ પ્રસાદાદ્ દીયતે વરઃ॥
VII અતએવ યૂયમ્ ઈશ્વરસ્ય વશ્યા ભવત શયતાનં સંરુન્ધ તેન સ યુષ્મત્તઃ પલાયિષ્યતે।

VIII ઈશ્વરસ્ય સમીપવર્ત્તિનો ભવત તેન સ યુષ્માકં સમીપવર્ત્તી ભવિષ્યતિ। હે પાપિનઃ, યૂયં સ્વકરાન્ પરિષ્કુરુધ્વં। હે દ્વિમનોલોકાઃ, યૂયં સ્વાન્તઃકરણાનિ શુચીનિ કુરુધ્વં।
IX યૂયમ્ ઉદ્વિજધ્વં શોચત વિલપત ચ, યુષ્માકં હાસઃ શોકાય, આનન્દશ્ચ કાતરતાયૈ પરિવર્ત્તતાં।
X પ્રભોઃ સમક્ષં નમ્રા ભવત તસ્માત્ સ યુષ્માન્ ઉચ્ચીકરિષ્યતિ।
XI હે ભ્રાતરઃ, યૂયં પરસ્પરં મા દૂષયત। યઃ કશ્ચિદ્ ભ્રાતરં દૂષયતિ ભ્રાતુ ર્વિચારઞ્ચ કરોતિ સ વ્યવસ્થાં દૂષયતિ વ્યવસ્થાયાશ્ચ વિચારં કરોતિ। ત્વં યદિ વ્યવસ્થાયા વિચારં કરોષિ તર્હિ વ્યવસ્થાપાલયિતા ન ભવસિ કિન્તુ વિચારયિતા ભવસિ।
XII અદ્વિતીયો વ્યવસ્થાપકો વિચારયિતા ચ સ એવાસ્તે યો રક્ષિતું નાશયિતુઞ્ચ પારયતિ। કિન્તુ કસ્ત્વં યત્ પરસ્ય વિચારં કરોષિ?
XIII અદ્ય શ્વો વા વયમ્ અમુકનગરં ગત્વા તત્ર વર્ષમેકં યાપયન્તો વાણિજ્યં કરિષ્યામઃ લાભં પ્રાપ્સ્યામશ્ચેતિ કથાં ભાષમાણા યૂયમ્ ઇદાનીં શૃણુત।
XIV શ્વઃ કિં ઘટિષ્યતે તદ્ યૂયં ન જાનીથ યતો જીવનં વો ભવેત્ કીદૃક્ તત્તુ બાષ્પસ્વરૂપકં, ક્ષણમાત્રં ભવેદ્ દૃશ્યં લુપ્યતે ચ તતઃ પરં।
XV તદનુક્ત્વા યુષ્માકમ્ ઇદં કથનીયં પ્રભોરિચ્છાતો વયં યદિ જીવામસ્તર્હ્યેતત્ કર્મ્મ તત્ કર્મ્મ વા કરિષ્યામ ઇતિ।
XVI કિન્ત્વિદાનીં યૂયં ગર્વ્વવાક્યૈઃ શ્લાઘનં કુરુધ્વે તાદૃશં સર્વ્વં શ્લાઘનં કુત્સિતમેવ।
XVII અતો યઃ કશ્ચિત્ સત્કર્મ્મ કર્ત્તં વિદિત્વા તન્ન કરોતિ તસ્ય પાપં જાયતે।

# V

I હે ધનવન્તઃ, યૂયમ્ ઇદાનીં શૃણુત યુષ્માભિરાગમિષ્યત્ક્લેશહેતોઃ ક્રન્દ્યતાં વિલપ્યતાઞ્ચ।
II યુષ્માકં દ્રવિણં જીર્ણં કીટભુક્તાઃ સુચેલકાઃ।
III કનકં રજતઞ્ચાપિ વિકૃતિં પ્રગમિષ્યતિ, તત્કલઙ્કશ્ચ યુષ્માકં પાપં પ્રમાણયિષ્યતિ, હુતાશવચ્ચ યુષ્માકં પિશિતં ખાદયિષ્યતિ। ઇત્થમ્ અન્તિમઘસ્રેષુ યુષ્માભિઃ સઞ્ચિતં ધનં।
IV પશ્યત યૈઃ કૃષીવલૈ ર્યુષ્માકં શસ્યાનિ છિન્નાનિ તેભ્યો યુષ્માભિ ર્યદ્ વેતનં છિન્નં તદ્ ઉચ્ચૈ ર્ધ્વનિં કરોતિ તેષાં શસ્યચ્છેદકાનામ્ આર્ત્તરાવઃ સેનાપતેઃ પરમેશ્વરસ્ય કર્ણકુહરં પ્રવિષ્ટઃ।
V યૂયં પૃથિવ્યાં સુખભોગં કામુકતાઞ્ચારિતવન્તઃ, મહાભોજસ્ય દિન ઇવ નિજાન્તઃકરણાનિ પરિતર્પિતવન્તશ્ચ।
VI અપરઞ્ચ યુષ્માભિ ર્ધાર્મ્મિકસ્ય દણ્ડાજ્ઞા હત્યા ચાકારિ તથાપિ સ યુષ્માન્ ન પ્રતિરુદ્ધવાન્।
VII હે ભ્રાતરઃ, યૂયં પ્રભોરાગમનં યાવદ્ ધૈર્ય્યમાલમ્બધ્વં। પશ્યત કૃષિવલો ભૂમે ર્બહુમૂલ્યં ફલં પ્રતીક્ષમાણો યાવત્ પ્રથમમ્ અન્તિમઞ્ચ વૃષ્ટિજલં ન પ્રાપ્નોતિ તાવદ્ ધૈર્ય્યમ્ આલમ્બતે।
VIII યૂયમપિ ધૈર્ય્યમાલમ્બ્ય સ્વાન્તઃકરણાનિ સ્થિરીકુરુત, યતઃ પ્રભોરુપસ્થિતિઃ સમીપવર્ત્તિન્યભવત્।
IX હે ભ્રાતરઃ, યૂયં યદ્ દણ્ડ્યા ન ભવેત તદર્થં પરસ્પરં ન ગ્લાયત, પશ્યત વિચારયિતા દ્વારસમીપે તિષ્ઠતિ।
X હે મમ ભ્રાતરઃ, યે ભવિષ્યદ્વાદિનઃ પ્રભો ર્નામ્ના ભાષિતવન્તસ્તાન્ યૂયં દુઃખસહનસ્ય ધૈર્ય્યસ્ય ચ દૃષ્ટાન્તાન્ જાનીત।
XI પશ્યત ધૈર્ય્યશીલા અસ્માભિ ર્ધન્યા ઉચ્યન્તે। આયૂબો ધૈર્ય્યં યુષ્માભિરશ્રાવિ પ્રભોઃ પરિણામશ્ચાદર્શિ યતઃ પ્રભુ ર્બહુકૃપઃ સકરુણશ્ચાસ્તિ।
XII હે ભ્રાતરઃ વિશેષત ઇદં વદામિ સ્વર્ગસ્ય વા પૃથિવ્યા વાન્યવસ્તુનો નામ ગૃહીત્વા યુષ્માભિઃ કોઽપિ શપથો ન ક્રિયતાં, કિન્તુ યથા દણ્ડ્યા ન ભવત તદર્થં યુષ્માકં તથૈવ તન્નહિ ચેતિવાક્યં યથેષ્ટં ભવતુ।
XIII યુષ્માકં કશ્ચિદ્ દુઃખી ભવતિ? સ પ્રાર્થનાં કરોતુ। કશ્ચિદ્ વાનન્દિતો ભવતિ? સ ગીતં ગાયતુ।
XIV યુષ્માકં કશ્ચિત્ પીડિતો ઽસ્તિ? સ સમિતેઃ પ્રાચીનાન્ આહ્વાતુ તે ચ પભો ર્નામ્ના તં તૈલેનાભિષિચ્ય તસ્ય કૃતે પ્રાર્થનાં કુર્વ્વન્તુ।
XV તસ્માદ્ વિશ્વાસજાતપ્રાર્થનયા સ રોગી રક્ષાં યાસ્યતિ પ્રભુશ્ચ તમ્ ઉત્થાપયિષ્યતિ યદિ ચ કૃતપાપો ભવેત્ તર્હિ સ તં ક્ષમિષ્યતે।
XVI યૂયં પરસ્પરમ્ અપરાધાન્ અઙ્ગીકુરુધ્વમ્ આરોગ્યપ્રાપ્ત્યર્થઞ્ચૈકજનો ઽન્યસ્ય કૃતે પ્રાર્થનાં કરોતુ ધાર્મ્મિકસ્ય સયત્ના પ્રાર્થના બહુશક્તિવિશિષ્ટા ભવતિ।
XVII ય એલિયો વયમિવ સુખદુઃખભોગી મર્ત્ત્ય આસીત્ સ પ્રાર્થનયાનાવૃષ્ટિં યાચિતવાન્ તેન દેશે સાર્દ્ધવત્સરત્રયં યાવદ્ વૃષ્ટિ ર્ન બભૂવ।
XVIII પશ્ચાત્ તેન પુનઃ પ્રાર્થનાયાં કૃતાયામ્ આકાશસ્તોયાન્યવર્ષીત્ પૃથિવી ચ સ્વફલાનિ પ્રારોહયત્।
XIX હે ભ્રાતરઃ, યુષ્માકં કસ્મિંશ્ચિત્ સત્યમતાદ્ ભ્રષ્ટે યદિ કશ્ચિત્ તં પરાવર્ત્તયતિ
XX તર્હિ યો જનઃ પાપિનં વિપથભ્રમણાત્ પરાવર્ત્તયતિ સ તસ્યાત્માનં મૃત્યુત ઉદ્ધરિષ્યતિ બહુપાપાન્યાવરિષ્યતિ ચેતિ જાનાતુ।

# ૧ પિતરસ્ય પત્રં

I પન્ત-ગાલાતિયા-કપ્પદકિયા-આશિયા-બિથુનિયાદેશેષુ પ્રવાસિનો યે વિકીર્ણલોકાઃ
II પિતુરીશ્વરસ્ય પૂર્વ્વનિર્ણયાદ્ આત્મનઃ પાવનેન યીશુખ્રીષ્ટસ્યાજ્ઞાગ્રહણાય શોણિતપ્રોક્ષણાય ચાભિરુચિતાસ્તાન્ પ્રતિ યીશુખ્રીષ્ટસ્ય પ્રેરિતઃ પિતરઃ પત્રં લિખતિ। યુષ્માન્ પ્રતિ બાહુલ્યેન શાન્તિરનુગ્રહશ્ચ ભૂયાસ્તાં।
III અસ્માકં પ્રભો ર્યીશુખ્રીષ્ટસ્ય તાત ઈશ્વરો ધન્યઃ, યતઃ સ સ્વકીયબહુકૃપાતો મૃતગણમધ્યાદ્ યીશુખ્રીષ્ટસ્યોત્થાનેન જીવનપ્રત્યાશાર્થમ્ અર્થતો
IV ઽક્ષયનિષ્કલઙ્કામ્લાનસમ્પત્તિપ્રાપ્ત્યર્થમ્ અસ્માન્ પુન ર્જનયામાસ। સા સમ્પત્તિઃ સ્વર્ગે ઽસ્માકં કૃતે સઞ્ચિતા તિષ્ઠતિ,
V યૂયઞ્ચેશ્વરસ્ય શક્તિતઃ શેષકાલે પ્રકાશ્યપરિત્રાણાર્થં વિશ્વાસેન રક્ષ્યધ્વે।
VI તસ્માદ્ યૂયં યદ્યપ્યાનન્દેન પ્રફુલ્લા ભવથ તથાપિ સામ્પ્રતં પ્રયોજનહેતોઃ કિયત્કાલપર્ય્યન્તં નાનાવિધપરીક્ષાભિઃ ક્લિશ્યધ્વે।
VII યતો વહ્નિના યસ્ય પરીક્ષા ભવતિ તસ્માત્ નશ્વરસુવર્ણાદપિ બહુમૂલ્યં યુષ્માકં વિશ્વાસરૂપં યત્ પરીક્ષિતં સ્વર્ણં તેન યીશુખ્રીષ્ટસ્યાગમનસમયે પ્રશંસાયાઃ સમાદરસ્ય ગૌરવસ્ય ચ યોગ્યતા પ્રાપ્તવ્યા।
VIII યૂયં તં ખ્રીષ્ટમ્ અદૃષ્ટ્વાપિ તસ્મિન્ પ્રીયધ્વે સામ્પ્રતં તં ન પશ્યન્તોઽપિ તસ્મિન્ વિશ્વસન્તો ઽનિર્વ્વચનીયેન પ્રભાવયુક્તેન ચાનન્દેન પ્રફુલ્લા ભવથ,
IX સ્વવિશ્વાસસ્ય પરિણામરૂપમ્ આત્મનાં પરિત્રાણં લભધ્વે ચ।
X યુષ્માસુ યો ઽનુગ્રહો વર્ત્તતે તદ્વિષયે ય ઈશ્વરીયવાક્યં કથિતવન્તસ્તે ભવિષ્યદ્વાદિનસ્તસ્ય પરિત્રાણસ્યાન્વેષણમ્ અનુસન્ધાનઞ્ચ કૃતવન્તઃ।
XI વિશેષતસ્તેષામન્તર્વ્વાસી યઃ ખ્રીષ્ટસ્યાત્મા ખ્રીષ્ટે વર્ત્તિષ્યમાણાનિ દુઃખાનિ તદનુગામિપ્રભાવઞ્ચ પૂર્વ્વં પ્રાકાશયત્ તેન કઃ કીદૃશો વા સમયો નિરદિશ્યતૈતસ્યાનુસન્ધાનં કૃતવન્તઃ।
XII તતસ્તૈ ર્વિષયૈસ્તે યન્ન સ્વાન્ કિન્ત્વસ્માન્ ઉપકુર્વ્વન્ત્યેતત્ તેષાં નિકટે પ્રાકાશ્યત। યાંશ્ચ તાન્ વિષયાન્ દિવ્યદૂતા અપ્યવનતશિરસો નિરીક્ષિતુમ્ અભિલષન્તિ તે વિષયાઃ સામ્પ્રતં સ્વર્ગાત્ પ્રેષિતસ્ય પવિત્રસ્યાત્મનઃ સહાય્યાદ્ યુષ્મત્સમીપે સુસંવાદપ્રચારયિતૃભિઃ પ્રાકાશ્યન્ત।
XIII અતએવ યૂયં મનઃકટિબન્ધનં કૃત્વા પ્રબુદ્ધાઃ સન્તો યીશુખ્રીષ્ટસ્ય પ્રકાશસમયે યુષ્માસુ વર્ત્તિષ્યમાનસ્યાનુગ્રહસ્ય સમ્પૂર્ણાં પ્રત્યાશાં કુરુત।
XIV અપરં પૂર્વ્વીયાજ્ઞાનતાવસ્થાયાઃ કુત્સિતાભિલાષાણાં યોગ્યમ્ આચારં ન કુર્વ્વન્તો યુષ્મદાહ્વાનકારી યથા પવિત્રો ઽસ્તિ
XV યૂયમપ્યાજ્ઞાગ્રાહિસન્તાના ઇવ સર્વ્વસ્મિન્ આચારે તાદૃક્ પવિત્રા ભવત।
XVI યતો લિખિતમ્ આસ્તે, યૂયં પવિત્રાસ્તિષ્ઠત યસ્માદહં પવિત્રઃ।
XVII અપરઞ્ચ યો વિનાપક્ષપાતમ્ એકૈકમાનુષસ્ય કર્મ્માનુસારાદ્ વિચારં કરોતિ સ યદિ યુષ્માભિસ્તાત આખ્યાયતે તર્હિ સ્વપ્રવાસસ્ય કાલો યુષ્માભિ ર્ભીત્યા યાપ્યતાં।
XVIII યૂયં નિરર્થકાત્ પૈતૃકાચારાત્ ક્ષયણીયૈ રૂપ્યસુવર્ણાદિભિ ર્મુક્તિં ન પ્રાપ્ય
XIX નિષ્કલઙ્કનિર્મ્મલમેષશાવકસ્યેવ ખ્રીષ્ટસ્ય બહુમૂલ્યેન રુધિરેણ મુક્તિં પ્રાપ્તવન્ત ઇતિ જાનીથ।
XX સ જગતો ભિત્તિમૂલસ્થાપનાત્ પૂર્વ્વં નિયુક્તઃ કિન્તુ ચરમદિનેષુ યુષ્મદર્થં પ્રકાશિતો ઽભવત્।
XXI યતસ્તેનૈવ મૃતગણાત્ તસ્યોત્થાપયિતરિ તસ્મૈ ગૌરવદાતરિ ચેશ્વરે વિશ્વસિથ તસ્માદ્ ઈશ્વરે યુષ્માકં વિશ્વાસઃ પ્રત્યાશા ચાસ્તે।
XXII યૂયમ્ આત્મના સત્યમતસ્યાજ્ઞાગ્રહણદ્વારા નિષ્કપટાય ભ્રાતૃપ્રેમ્ને પાવિતમનસો ભૂત્વા નિર્મ્મલાન્તઃકરણૈઃ પરસ્પરં ગાઢં પ્રેમ કુરુત।
XXIII યસ્માદ્ યૂયં ક્ષયણીયવીર્ય્યાત્ નહિ કિન્ત્વક્ષયણીયવીર્ય્યાદ્ ઈશ્વરસ્ય જીવનદાયકેન નિત્યસ્થાયિના વાક્યેન પુનર્જન્મ ગૃહીતવન્તઃ।
XXIV સર્વ્વપ્રાણી તૃણૈસ્તુલ્યસ્તત્તેજસ્તૃણપુષ્પવત્। તૃણાનિ પરિશુષ્યતિ પુષ્પાણિ નિપતન્તિ ચ।
XXV કિન્તુ વાક્યં પરેશસ્યાનન્તકાલં વિતિષ્ઠતે। તદેવ ચ વાક્યં સુસંવાદેન યુષ્માકમ્ અન્તિકે પ્રકાશિતં।

## II

I સર્વ્વાન્ દ્વેષાન્ સર્વ્વાંશ્ચ છલાન્ કાપટ્યાનીર્ષ્યાઃ સમસ્તગ્લાનિકથાશ્ચ દૂરીકૃત્ય
II યુષ્માભિઃ પરિત્રાણાય વૃદ્ધિપ્રાપ્ત્યર્થં નવજાતશિશુભિરિવ પ્રકૃતં વાગ્દુગ્ધં પિપાસ્યતાં।
III યતઃ પ્રભુ ર્મધુર એતસ્યાસ્વાદં યૂયં પ્રાપ્તવન્તઃ।
IV અપરં માનુષૈરવજ્ઞાતસ્ય કિન્ત્વીશ્વરેણાભિરુચિતસ્ય બહુમૂલ્યસ્ય જીવત્પ્રસ્તરસ્યેવ તસ્ય પ્રભોઃ સન્નિધિમ્ આગતા
V યૂયમપિ જીવત્પ્રસ્તરા ઇવ નિચીયમાના આત્મિકમન્દિરં ખ્રીષ્ટેન યીશુના ચેશ્વરતોષકાણામ્ આત્મિકબલીનાં દાનાર્થં પવિત્રો યાજકવર્ગો ભવથ।
VI યતઃ શાસ્ત્રે લિખિતમાસ્તે, યથા, પશ્ય પાષાણ એકો ઽસ્તિ સીયોનિ સ્થાપિતો મયા। મુખ્યકોણસ્ય યોગ્યઃ સ વૃતશ્ચાતીવ મૂલ્યવાન્। યો જનો વિશ્વસેત્ તસ્મિન્ સ લજ્જાં ન ગમિષ્યતિ।
VII વિશ્વાસિનાં યુષ્માકમેવ સમીપે સ મૂલ્યવાન્ ભવતિ કિન્ત્વવિશ્વાસિનાં કૃતે નિચેતૃભિરવજ્ઞાતઃ સ પાષાણઃ કોણસ્ય ભિત્તિમૂલં ભૂત્વા બાધાજનકઃ પાષાણઃ સ્ખલનકારકશ્ચ શૈલો જાતઃ।
VIII તે ચાવિશ્વાસાદ્ વાક્યેન સ્ખલન્તિ સ્ખલને ચ નિયુક્તાઃ સન્તિ।

IX કિન્તુ યૂયં યેનાન્ધકારમધ્યાત્ સ્વકીયાશ્ચર્ય્યદીપ્તિમધ્યમ્ આહૂતાસ્તસ્ય ગુણાન્ પ્રકાશયિતુમ્ અભિરુચિતો વંશો રાજકીયો યાજકવર્ગઃ પવિત્રા જાતિરધિકર્ત્તવ્યાઃ પ્રજાશ્ચ જાતાઃ।
X પૂર્વ્વં યૂયં તસ્ય પ્રજા નાભવત કિન્ત્વિદાનીમ્ ઈશ્વરસ્ય પ્રજા આધ્વે। પૂર્વ્વમ્ અનનુકમ્પિતા અભવત કિન્ત્વિદાનીમ્ અનુકમ્પિતા આધ્વે।
XI હે પ્રિયતમાઃ, યૂયં પ્રવાસિનો વિદેશિનશ્ચ લોકા ઇવ મનસઃ પ્રાતિકૂલ્યેન યોધિભ્યઃ શારીરિકસુખાભિલાષેભ્યો નિવર્ત્તધ્વમ્ ઇત્યહં વિનયે।
XII દેવપૂજકાનાં મધ્યે યુષ્માકમ્ આચાર એવમ્ ઉત્તમો ભવતુ યથા તે યુષ્માન્ દુષ્કર્મ્મકારિલોકાનિવ પુન ર્ન નિન્દન્તઃ કૃપાદૃષ્ટિદિને સ્વચક્ષુર્ગોચરીયસત્ક્રિયાભ્ય ઈશ્વરસ્ય પ્રશંસાં કુર્ય્યુઃ।
XIII તતો હેતો ર્યૂયં પ્રભોરનુરોધાત્ માનવસૃષ્ટાનાં કર્તૃત્વપદાનાં વશીભવત વિશેષતો ભૂપાલસ્ય યતઃ સ શ્રેષ્ઠઃ,
XIV દેશાધ્યક્ષાણાઞ્ચ યતસ્તે દુષ્કર્મ્મકારિણાં દણ્ડદાનાર્થં સત્કર્મ્મકારિણાં પ્રશંસાર્થઞ્ચ તેન પ્રેરિતાઃ।
XV ઇત્થં નિર્બ્બોધમાનુષાણામ્ અજ્ઞાનત્વં યત્ સદાચારિભિ ર્યુષ્માભિ ર્નિરુત્તરીક્રિયતે તદ્ ઈશ્વરસ્યાભિમતં।
XVI યૂયં સ્વાધીના ઇવાચરત તથાપિ દુષ્ટતાયા વેષસ્વરૂપાં સ્વાધીનતાં ધારયન્ત ઇવ નહિ કિન્ત્વીશ્વરસ્ય દાસા ઇવ।
XVII સર્વ્વાન્ સમાદ્રિયધ્વં ભ્રાતૃવર્ગે પ્રીયધ્વમ્ ઈશ્વરાદ્ બિભીત ભૂપાલં સમ્મન્યધ્વં।
XVIII હે દાસાઃ યૂયં સમ્પૂર્ણાદરેણ પ્રભૂનાં વશ્યા ભવત કેવલં ભદ્રાણાં દયાલૂનાઞ્ચ નહિ કિન્ત્વનૃજૂનામપિ।
XIX યતો ઽન્યાયેન દુઃખભોગકાલ ઈશ્વરચિન્તયા યત્ ક્લેશસહનં તદેવ પ્રિયં।
XX પાપં કૃત્વા યુષ્માકં ચપેટાઘાતસહનેન કા પ્રશંસા? કિન્તુ સદાચારં કૃત્વા યુષ્માકં યદ્ દુઃખસહનં તદેવેશ્વરસ્ય પ્રિયં।
XXI તદર્થમેવ યૂયમ્ આહૂતા યતઃ ખ્રીષ્ટોઽપિ યુષ્મન્નિમિત્તં દુઃખં ભુક્ત્વા યૂયં યત્ તસ્ય પદચિહ્નૈ ર્વ્રજેત તદર્થં દૃષ્ટાન્તમેકં દર્શિતવાન્।
XXII સ કિમપિ પાપં ન કૃતવાન્ તસ્ય વદને કાપિ છલસ્ય કથા નાસીત્।
XXIII નિન્દિતો ઽપિ સન્ સ પ્રતિનિન્દાં ન કૃતવાન્ દુઃખં સહમાનો ઽપિ ન ભર્ત્સિતવાન્ કિન્તુ યથાર્થવિચારયિતુઃ સમીપે સ્વં સમર્પિતવાન્।
XXIV વયં યત્ પાપેભ્યો નિવૃત્ય ધર્મ્માર્થં જીવામસ્તદર્થં સ સ્વશરીરેણાસ્માકં પાપાનિ ક્રુશ ઊઢવાન્ તસ્ય પ્રહારૈ ર્યૂયં સ્વસ્થા અભવત।
XXV યતઃ પૂર્વ્વં યૂયં ભ્રમણકારિમેષા ઇવાધ્વં કિન્ત્વધુના યુષ્માકમ્ આત્મનાં પાલકસ્યાધ્યક્ષસ્ય ચ સમીપં પ્રત્યાવર્ત્તિતાઃ।

# III

I હે યોષિતઃ, યૂયમપિ નિજસ્વામિનાં વશ્યા ભવત તથા સતિ યદિ કેચિદ્ વાક્યે વિશ્વાસિનો ન સન્તિ તર્હિ
II તે વિનાવાક્યં યોષિતામ્ આચારેણાર્થતસ્તેષાં પ્રત્યક્ષેણ યુષ્માકં સભયસતીત્વાચારેણાક્રષ્ટું શક્ષ્યન્તે।
III અપરં કેશરચનયા સ્વર્ણાલઙ્કારધારણેન પરિચ્છદપરિધાનેન વા યુષ્માકં વાહ્યભૂષા ન ભવતુ,
IV કિન્ત્વીશ્વરસ્ય સાક્ષાદ્ બહુમૂલ્યક્ષમાશાન્તિભાવાક્ષયરત્નેન યુક્તો ગુપ્ત આન્તરિકમાનવ એવ।
V યતઃ પૂર્વ્વકાલે યાઃ પવિત્રસ્ત્રિય ઈશ્વરે પ્રત્યાશામકુર્વ્વન્ તા અપિ તાદૃશીમેવ ભૂષાં ધારયન્ત્યો નિજસ્વામિનાં વશ્યા અભવન્।
VI તથૈવ સારા ઇબ્રાહીમો વશ્યા સતી તં પતિમાખ્યાતવતી યૂયઞ્ચ યદિ સદાચારિણ્યો ભવથ વ્યાકુલતયા ચ ભીતા ન ભવથ તર્હિ તસ્યાઃ કન્યા આધ્વે।
VII હે પુરુષાઃ, યૂયં જ્ઞાનતો દુર્બ્બલતરભાજનૈરિવ યોષિદ્ભિઃ સહવાસં કુરુત, એકસ્ય જીવનવરસ્ય સહભાગિનીભ્યતાભ્યઃ સમાદરં વિતરત ચ ન ચેદ્ યુષ્માકં પ્રાર્થનાનાં બાધા જનિષ્યતે।
VIII વિશેષતો યૂયં સર્વ્વ એકમનસઃ પરદુઃખૈ ર્દુઃખિતા ભ્રાતૃપ્રમિણઃ કૃપાવન્તઃ પ્રીતિભાવાશ્ચ ભવત।
IX અનિષ્ટસ્ય પરિશોધેનાનિષ્ટં નિન્દાયા વા પરિશોધેન નિન્દાં ન કુર્વ્વન્ત આશિષં દત્ત યતો યૂયમ્ આશિરધિકારિણો ભવિતુમાહૂતા ઇતિ જાનીથ।
X અપરઞ્ચ, જીવને પ્રીયમાણો યઃ સુદિનાનિ દિદૃક્ષતે। પાપાત્ જિહ્વાં મૃષાવાક્યાત્ સ્વાધરૌ સ નિવર્ત્તયેત્।
XI સ ત્યજેદ્ દુષ્ટતામાર્ગં સત્ક્રિયાઞ્ચ સમાચરેત્। મૃગયાણશ્ચ શાન્તિં સ નિત્યમેવાનુધાવતુ।
XII લોચને પરમેશસ્યોન્મીલિતે ધાર્મ્મિકાન્ પ્રતિ। પ્રાર્થનાયાઃ કૃતે તેષાઃ તચ્છ્રોત્રે સુગમે સદા। ક્રોધાસ્યઞ્ચ પરેશસ્ય કદાચારિષુ વર્ત્તતે।
XIII અપરં યદિ યૂયમ્ ઉત્તમસ્યાનુગામિનો ભવથ તર્હિ કો યુષ્માન્ હિંસિષ્યતે?
XIV યદિ ચ ધર્મ્માર્થં ક્લિશ્યધ્વં તર્હિ ધન્યા ભવિષ્યથ। તેષામ્ આશઙ્કયા યૂયં ન બિભીત ન વિઙ્ક્ત વા।
XV મનોભિઃ કિન્તુ મન્યધ્વં પવિત્રં પ્રભુમીશ્વરં। અપરઞ્ચ યુષ્માકમ્ આન્તરિકપ્રત્યાશાયાસ્તત્ત્વં યઃ કશ્ચિત્ પૃચ્છતિ તસ્મૈ શાન્તિભીતિભ્યામ્ ઉત્તરં દાતું સદા સુસજ્જા ભવત।
XVI યે ચ ખ્રીષ્ટધર્મ્મે યુષ્માકં સદાચારં દૂષયન્તિ તે દુષ્કર્મ્મકારિણામિવ યુષ્માકમ્ અપવાદેન યત્ લજ્જિતા ભવેયુસ્તદર્થં યુષ્માકમ્ ઉત્તમઃ સંવેદો ભવતુ।
XVII ઈશ્વરસ્યાભિમતાદ્ યદિ યુષ્માભિઃ ક્લેશઃ સોઢવ્યસ્તર્હિ સદાચારિભિઃ ક્લેશસહનં વરં ન ચ કદાચારિભિઃ।
XVIII યસ્માદ્ ઈશ્વરસ્ય સન્નિધિમ્ અસ્માન્ આનેતુમ્ અધાર્મ્મિકાણાં વિનિમયેન ધાર્મ્મિકઃ ખ્રીષ્ટો ઽપ્યેકકૃત્વઃ પાપાનાં દણ્ડં ભુક્તવાન્, સ ચ શરીરસમ્બન્ધે મારિતઃ કિન્ત્વાત્મનઃ સમ્બન્ધે પુન ર્જીવિતો ઽભવત્।
XIX તત્સમ્બન્ધે ચ સ યાત્રાં વિધાય કારાબદ્ધાનામ્ આત્મનાં સમીપે વાક્યં ઘોષિતવાન્।
XX પુરા નોહસ્ય સમયે યાવત્ પોતો નિરમીયત તાવદ્ ઈશ્વરસ્ય દીર્ઘસહિષ્ણુતા યદા વ્યલમ્બત તદા તેઽનાજ્ઞાગ્રાહિણોઽભવન્। તેન પોતોનાલ્પેઽર્થાદ્ અષ્ટાવેવ પ્રાણિનસ્તોયમ્ ઉત્તીર્ણાઃ।
XXI તન્નિદર્શનઞ્ચાવગાહનં (અર્થતઃ શારીરિકમલિનતાયા યસ્ત્યાગઃ સ નહિ કિન્ત્વીશ્વરાયોત્તમસંવેદસ્ય યા પ્રતજ્ઞા સૈવ) યીશુખ્રીષ્ટસ્ય પુનરુત્થાનેનેદાનીમ્ અસ્માન્ ઉત્તારયતિ,

XXII યતઃ સ સ્વર્ગં ગત્વેશ્વરસ્ય દક્ષિણે વિદ્યતે સ્વર્ગીયદૂતાઃ શાસકા બલાનિ ચ તસ્ય વશીભૂતા અભવન્|

# IV

I અસ્માકં વિનિમયેન ખ્રીષ્ટઃ શરીરસમ્બન્ધે દણ્ડં ભુક્તવાન્ અતો હેતોઃ શરીરસમ્બન્ધે યો દણ્ડં ભુક્તવાન્ સ પાપાત્ મુક્ત
II ઇતિભાવેન યૂયમપિ સુસજ્જીભૂય દેહવાસસ્યાવશિષ્ટં સમયં પુનર્માનવાનામ્ ઇચ્છાસાધનાર્થં નહિ કિન્ત્વીશ્વરસ્યેચ્છાસાધનાર્થં યાપયત|
III આયુષો યઃ સમયો વ્યતીતસ્તસ્મિન્ યુષ્માભિ ર્યદ્ દેવપૂજકાનામ્ ઇચ્છાસાધનં કામકુત્સિતાભિલાષમદ્યપાનરઙ્ગરસમત્તતાઘૃણાર્હદેવપૂજાચરણઞ્ચાકારિ તેન બાહુલ્યં|
IV યૂયં તૈઃ સહ તસ્મિન્ સર્વ્વનાશપઙ્કે મજ્જિતું ન ધાવથ, ઇત્યનેનાશ્ચર્ય્યં વિજ્ઞાય તે યુષ્માન્ નિન્દન્તિ|
V કિન્તુ યો જીવતાં મૃતાનાઞ્ચ વિચારં કર્त्तુમ્ ઉદ્યતોઽસ્તિ તસ્મૈ તૈરુત્તરં દાયિષ્યતે|
VI યતો હેતો ર્યે મૃતાસ્તેષાં યત્ માનવોદ્દેશ્યઃ શારીરિકવિચારઃ કિન્ત્વીશ્વરોદ્દેશ્યમ્ આત્મિકજીવનં ભવત્ તદર્થં તેષામપિ સન્નિધૌ સુસમાચારઃ પ્રકાશિતોઽભવત્|
VII સર્વ્વેષામ્ અન્તિમકાલ ઉપસ્થિતસ્તસ્માદ્ યૂયં સુબુદ્ધયઃ પ્રાર્થનાર્થં જાગ્રતશ્ચ ભવત|
VIII વિશેષતઃ પરસ્પરં ગાઢં પ્રેમ કુરુત, યતઃ, પાપાનામપિ બાહુલ્યં પ્રેમ્નૈવાચ્છાદયિષ્યતે|
IX કાતરોક્તિં વિના પરસ્પરમ્ આતિથ્યં કૃરુત|
X યેન યો વરો લબ્ધસ્તેનૈવ સ પરમ્ ઉપકરોતૃ, ઇત્થં યૂયમ્ ઈશ્વરસ્ય બહુવિધપ્રસાદસ્યોત્તમા ભાણ્ડાગારાધિપા ભવત|
XI યો વાક્યં કથયતિ સ ઈશ્વરસ્ય વાક્યમિવ કથયતુ યશ્ચ પરમ્ ઉપકરોતિ સ ઈશ્વરદત્તસામર્થ્યાદિવોપકરોતુ| સર્વ્વવિષયે યીશુખ્રીષ્ટેનેશ્વરસ્ય ગૌરવં પ્રકાશ્યતાં તસ્યૈવ ગૌરવં પરાક્રમશ્ચ સર્વ્વદા ભૂયાત્| આમેન|
XII હે પ્રિયતમાઃ, યુષ્માકં પરીક્ષાર્થં યસ્તાપો યુષ્માસુ વર્त्तતે તમ્ અસમ્ભવઘટિતં મત્વા નાશ્ચર્ય્યં જાનીત,
XIII કિન્તુ ખ્રીષ્ટેન ક્લેશાનાં સહભાગિત્વાદ્ આનન્દત તેન તસ્ય પ્રતાપપ્રકાશેઽપ્યાનનન્દેન પ્રફુલ્લા ભવિષ્યથ|
XIV યદિ ખ્રીષ્ટસ્ય નામહેતુના યુષ્માકં નિન્દા ભવતિ તર્હિ યૂયં ધન્યા યતો ગૌરવદાયક ઈશ્વરસ્યાત્મા યુષ્માસ્વધિતિષ્ઠતિ તેષાં મધ્યે સ નિન્દ્યતે કિન્તુ યુષ્મન્મધ્યે પ્રશંસ્યતે|
XV કિન્તુ યુષ્માકં કોઽપિ હન્તા વા ચૈરો વા દુષ્કર્મ્મકૃદ્ વા પરાધિકારચર્ચ્ચક ઇવ દણ્ડં ન ભુઙ્क्तાં|
XVI યદિ ચ ખ્રીષ્ટીયાન ઇવ દણ્ડં ભુઙ્क्तે તર્હિ સ ન લજ્જમાનસ્તત્કારણાદ્ ઈશ્વરં પ્રશંસતુ|
XVII યતો વિચારસ્યારમ્ભસમયે ઈશ્વરસ્ય મન્દિરે યુજ્યતે યદિ ચાસ્મત્સ્વારભતે તર્હીશ્વરીયસુસંવાદાગ્રાહિણાં શેષદશા કા ભવિષ્યતિ?
XVIII ધાર્મ્મિકેનાપિ ચેત્ ત્રાણમ્ અતિકૃચ્છ્રેણ ગમ્યતે| તર્હ્યધાર્મ્મિકપાપિભ્યામ્ આશ્રયઃ કુત્ર લપ્સ્યતે|
XIX અત ઈશ્વરેચ્છાતો યે દુઃખં ભુઞ્જતે તે સદાચારેણ સ્વાત્માનો વિશ્વાસ્યસ્રષ્ટુરીશ્વસ્ય કરાભ્યાં નિદધતાં|

# V

I ખ્રીષ્ટસ્ય ક્લેશાનાં સાક્ષી પ્રકાશિષ્યમાણસ્ય પ્રતાપસ્યાંશી પ્રાચીનશ્ચાહં યુષ્માકં પ્રાચીનાન્ વિનીયેદં વદામિ|
II યુષ્માકં મધ્યવર્त्ती ય ઈશ્વરસ્ય મેષવૃન્દો યૂયં તં પાલયત તસ્ય વીક્ષણં કુરુત ચ, આવશ્યકત્વેન નહિ કિન્તુ સ્વેચ્છાતો ન વ કુલોભેન કિન્ત્વિચ્છુકમનસા|
III અપરમ્ અંશાનામ્ અધિકારિણ ઇવ ન પ્રભવત કિન્તુ વૃન્દસ્ય દૃષ્ટાન્તસ્વરૂપા ભવત|
IV તેન પ્રધાનપાલક ઉપસ્થિતે યૂયમ્ અમ્લાનં ગૌરવકિરીટં લપ્સ્યધ્વે|
V હે યુવાનઃ, યૂયમપિ પ્રાચીનલોકાનાં વશ્યા ભવત સર્વ્વે ચ સર્વ્વેષાં વશીભૂય નમ્રતાભરણેન ભૂષિતા ભવત, યતઃ,આત્માભિમાનિલોકાનાં વિપક્ષો ભવતીશ્વરઃ| કિન્તુ તેનૈવ નમ્રેભ્યઃ પ્રસાદાદ્ દીયતે વરઃ|
VI અતો યૂયમ્ ઈશ્વરસ્ય બલવત્કરસ્યાધો નમ્રીભૂય તિષ્ઠત તેન સ ઉચિતસમયે યુષ્માન્ ઉચ્ચીકરિષ્યતિ|
VII યૂયં સર્વ્વચિન્તાં તસ્મિન્ નિક્ષિપત યતઃ સ યુષ્માન્ પ્રતિ ચિન્તયતિ|
VIII યૂયં પ્રબુદ્ધા જાગ્રતશ્ચ તિષ્ઠત યતો યુષ્માકં પ્રતિવાદી યઃ શયતાનઃ સ ગર્જ્જનકારી સિંહ ઇવ પર્ય્યટન્ કં ગ્રસિષ્યામીતિ મૃગયતે,
IX અતો વિશ્વાસે સુસ્થિરાસ્તિષ્ઠન્તસ્તેન સાર્દ્ધં યુધ્યત, યુષ્માકં જગન્નિવાસિભ્રાતૃષ્વપિ તાદૃશાઃ ક્લેશા વર્त्तન્ત ઇતિ જાનીત|
X ક્ષણિકદુઃખભોગાત્ પરમ્ અસ્મભ્યં ખ્રીષ્ટેન યીશુના સ્વકીયાનન્તગૌરવદાનાર્થં યોઽસ્માન્ આહૂતવાન્ સ સર્વ્વાનુગ્રાહીશ્વરઃ સ્વયં યુષ્માન્ સિદ્ધાન્ સ્થિરાન્ સબલાન્ નિશ્ચલાંશ્ચ કરોતુ|
XI તસ્ય ગૌરવં પરાક્રમશ્ચાનન્તકાલં યાવદ્ ભૂયાત્| આમેન્|
XII યઃ સિલ્વાનો (મન્યે) યુષ્માકં વિશ્વાસ્યો ભ્રાતા ભવતિ તદ્દ્વારાહં સંક્ષેપેણ લિખિત્વા યુષ્માન્ વિનીતવાન્ યૂયઞ્ચ યસ્મિન્ અધિતિષ્ઠથ સ એવેશ્વરસ્ય સત્યો ઽનુગ્રહ ઇતિ પ્રમાણં દત્તવાન્|
XIII યુષ્માભિઃ સહાભિરુચિતા યા સમિતિ ર્બાબિલિ વિદ્યતે સા મમ પુત્રો માર્કશ્ચ યુષ્માન્ નમસ્કારં વેદયતિ|
XIV યૂયં પ્રેમચુમ્બનેન પરસ્પરં નમસ્કુરુત| યીશુખ્રીષ્ટાશ્રિતાનાં યુષ્માકં સર્વ્વેષાં શાન્તિ ર્ભૂયાત્| આમેન્|

# ૨ પિતરસ્ય પત્રં

I યે જના અસ્માભિઃ સાર્દ્ધમ્ અસ્તદીશ્વરે ત્રાતરિ યીશુખ્રીષ્ટે ચ પુણ્યસમ્બલિતવિશ્વાસધનસ્ય સમાનાંશિત્વં પ્રાપ્તાસ્તાન્ પ્રતિ યીશુખ્રીષ્ટસ્ય દાસઃ પ્રેરિતશ્ચ શિમોન્ પિતરઃ પત્રં લિખતિ।

II ઈશ્વરસ્યાસ્માકં પ્રભો ર્યીશોશ્ચ તત્વજ્ઞાનેન યુષ્માસ્વનુગ્રહશાન્ત્યો ર્બાહુલ્યં વર્ત્તતાં।

III જીવનાર્થમ્ ઈશ્વરભક્ત્યર્થઞ્ચ યદ્યદ્ આવશ્યકં તત્ સર્વ્વં ગૌરવસદ્ગુણાભ્યામ્ અસ્મદાહ્વાનકારિણસ્તત્ત્વજ્ઞાનદ્વારા તસ્યેશ્વરીયશક્તિરસ્મભ્યં દત્તવતી।

IV તત્સર્વ્વેણ ચાસ્મભ્યં તાદૃશા બહુમૂલ્યા મહાપ્રતિજ્ઞા દત્તા યાભિ ર્યૂયં સંસારવ્યાપ્તાત્ કુત્સિતાભિલાષમૂલાત્ સર્વ્વનાશાદ્ રક્ષાં પ્રાપ્યેશ્વરીયસ્વભાવસ્યાંશિનો ભવિતું શક્નુથ।

V તતો હેતો ર્યૂયં સમ્પૂર્ણં યત્નં વિધાય વિશ્વાસે સૌજન્યં સૌજન્યે જ્ઞાનં

VI જ્ઞાન આયતેન્દ્રિયતામ્ આયતેન્દ્રિયતાયાં ધૈર્ય્યં ધૈર્ય્ય ઈશ્વરભક્તિમ્

VII ઈશ્વરભક્તૌ ભ્રાતૃસ્નેહે ચ પ્રેમ યુઙ્ક્ત।

VIII એતાનિ યદિ યુષ્માસુ વિદ્યન્તે વર્દ્ધન્તે ચ તર્હ્યસ્મત્પ્રભો ર્યીશુખ્રીષ્ટસ્ય તત્ત્વજ્ઞાને યુષ્માન્ અલસાન્ નિષ્ફલાંશ્ચ ન સ્થાપયિષ્યન્તિ।

IX કિન્ત્વેતાનિ યસ્ય ન વિદ્યન્તે સો ઽન્ધો મુદ્રિતલોચનઃ સ્વકીયપૂર્વ્વપાપાનાં માર્જ્જનસ્ય વિસ્મૃતિં ગતશ્ચ।

X તસ્માદ્ હે ભ્રાતરઃ, યૂયં સ્વકીયાહ્વાનવરણયો ર્દૃઢકરણે બહુ યતધ્વં, તત્ કૃત્વા કદાચ ન સ્ખલિષ્યથ।

XI યતો ઽનેન પ્રકારેણાસ્માકં પ્રભોસ્ત્રાતૃ ર્યીશુખ્રીષ્ટસ્યાનન્તરાજ્યસ્ય પ્રવેશેન યૂયં સુકલેન યોજયિષ્યધ્વે।

XII યદ્યપિ યૂયમ્ એતત્ સર્વ્વં જાનીથ વર્ત્તમાને સત્યમતે સુસ્થિરા ભવથ ચ તથાપિ યુષ્માન્ સર્વ્વદા તત્ સ્મારયિતુમ્ અહમ્ અયત્નવાન્ ન ભવિષ્યામિ।

XIII યાવદ્ એતસ્મિન્ દૂષ્યે તિષ્ઠામિ તાવદ્ યુષ્માન્ સ્મારયન્ પ્રબોધયિતું વિહિતં મન્યે।

XIV યતો ઽસ્માકં પ્રભુ ર્યીશુખ્રીષ્ટો માં યત્ જ્ઞાપિતવાન્ તદનુસારાદ્ દૂષ્યમેતત્ મયા શીઘ્રં ત્યક્તવ્યમ્ ઇતિ જાનામિ।

XV મમ પરલોકગમનાત્ પરમપિ યૂયં યદેતાનિ સ્મર્ત્તું શક્ષ્યથ તસ્મિન્ સર્વ્વથા યતિષ્યે।

XVI યતો ઽસ્માકં પ્રભો ર્યીશુખ્રીષ્ટસ્ય પરાક્રમં પુનરાગમનઞ્ચ યુષ્માન્ જ્ઞાપયન્તો વયં કલ્પિતાન્યુપાખ્યાનાન્યન્વગચ્છામેતિ નહિ કિન્તુ તસ્ય મહિમ્નઃ પ્રત્યક્ષસાક્ષિણો ભૂત્વા ભાષિતવન્તઃ।

XVII યતઃ સ પિતુરીશ્વરાદ્ ગૌરવં પ્રશંસાઞ્ચ પ્રાપ્તવાન્ વિશેષતો મહિમયુક્તતેજોમધ્યાદ્ એતાદૃશી વાણી તં પ્રતિ નિર્ગતવતી, યથા, એષ મમ પ્રિયપુત્ર એતસ્મિન્ મમ પરમસન્તોષઃ।

XVIII સ્વર્ગાત્ નિર્ગતેયં વાણી પવિત્રપર્વ્વતે તેન સાર્દ્ધં વિદ્યમાનૈરસ્માભિરશ્રાવિ।

XIX અપરમ્ અસ્મત્સમીપે દૃઢતરં ભવિષ્યદ્વાક્યં વિદ્યતે યૂયઞ્ચ યદિ દિનારમ્ભં યુષ્મન્મનઃસુ પ્રભાતીયનક્ષત્રસ્યોદયઞ્ચ યાવત્ તિમિરમયે સ્થાને જ્વલન્તં પ્રદીપમિવ તદ્ વાક્યં સમ્મન્યધ્વે તર્હિ ભદ્રં કરિષ્યથ।

XX શાસ્ત્રીયં કિમપિ ભવિષ્યદ્વાક્યં મનુષ્યસ્ય સ્વકીયભાવબોધકં નહિ, એતદ્ યુષ્માભિઃ સમ્યક્ જ્ઞાયતાં।

XXI યતો ભવિષ્યદ્વાક્યં પુરા માનુષાણામ્ ઇચ્છાતો નોત્પન્નં કિન્ત્વીશ્વરસ્ય પવિત્રલોકાઃ પવિત્રેણાત્મના પ્રવર્ત્તિતાઃ સન્તો વાક્યમ્ અભાષન્ત।

## II

I અપરં પૂર્વ્વકાલે યથા લોકાનાં મધ્યે મિથ્યાભવિષ્યદ્વાદિન ઉપાતિષ્ઠન્ તથા યુષ્માકં મધ્યેઽપિ મિથ્યાશિક્ષકા ઉપસ્થાસ્યન્તિ, તે સ્વેષાં ક્રેતારં પ્રભુમ્ અનઙ્ગીકૃત્ય સત્વરં વિનાશં સ્વેષુ વર્ત્તયન્તિ વિનાશકવૈધર્મ્યં ગુપ્તં યુષ્મન્મધ્યમ્ આનેષ્યન્તિ।

II તતો ઽનેકેષુ તેષાં વિનાશકમાર્ગં ગતેષુ તેભ્યઃ સત્યમાર્ગસ્ય નિન્દા સમ્ભવિષ્યતિ।

III અપરઞ્ચ તે લોભાત્ કાપટ્યવાક્યૈ ર્યુષ્મત્તો લાભં કરિષ્યન્તે કિન્તુ તેષાં પુરાતનદણ્ડાજ્ઞા ન વિલમ્બતે તેષાં વિનાશશ્ચ ન નિદ્રાતિ।

IV ઈશ્વરઃ કૃતપાપાન્ દૂતાન્ ન ક્ષમિત્વા તિમિરશૃઙ્ખલૈઃ પાતાલે રુદ્ધ્વા વિચારાર્થં સમર્પિતવાન્

V પુરાતનં સંસારમપિ ન ક્ષમિત્વા તં દુષ્ટાનાં સંસારં જલાપ્લાવનેન મજ્જયિત્વા સપ્તજનૈઃ સહિતં ધર્મ્મપ્રચારકં નોહં રક્ષિતવાન્

VI સિદોમમ્ અમોરા ચેતિનામકે નગરે ભવિષ્યતાં દુષ્ટાનાં દૃષ્ટાન્તં વિધાય ભસ્મીકૃત્ય વિનાશેન દણ્ડિતવાન્;

VII કિન્તુ તૈઃ કુત્સિતવ્યભિચારિભિ ર્દુષ્ટાત્મભિઃ ક્લિષ્ટં ધાર્મ્મિકં લોટં રક્ષિતવાન્

VIII સ ધાર્મ્મિકો જનસ્તેષાં મધ્યે નિવસન્ સ્વીયદૃષ્ટિશ્રોત્રગોચરેભ્યસ્તેષામ્ અધર્મ્માચારેભ્યઃ સ્વકીયધાર્મ્મિકમનસિ દિને દિને તપ્તવાન્

IX પ્રભુ ર્ભક્તાન્ પરીક્ષાદ્ ઉદ્ધર્ત્તું વિચારદિનઞ્ચ યાવદ્ દણ્ડ્યામાનાન્ અધાર્મ્મિકાન્ રોદ્ધું પારયતિ,

X વિશેષતો યે ઽમેધ્યાભિલાષાત્ શારીરિકસુખમ્ અનુગચ્છન્તિ કર્તૃત્વપદાનિ ચાવજાનન્તિ તાનેવ (રોદ્ધું પારયતિ। ) તે દુઃસાહસિનઃ પ્રગલ્ભાશ્ચ।

XI અપરં બલગૌરવાભ્યાં શ્રેષ્ઠા દિવ્યદૂતાઃ પ્રભોઃ સન્નિધૌ યેષાં વૈપરીત્યેન નિન્દાસૂચકં વિચારં ન કુર્વ્વન્તિ તેષામ્ ઉચ્ચપદસ્થાનાં નિન્દનાદ્ ઇમે ન ભીતાઃ।

XII કિન્તુ યે બુદ્ધિહીનાઃ પ્રકૃતા જન્તવો ધર્ત્તવ્યતાયૈ વિનાશ્યતાયૈ ચ જાયન્તે તત્સદૃશા ઇમે યન્ન બુધ્યન્તે તત્ નિન્દન્તઃ સ્વકીયવિનાશ્યતયા વિનંક્ષ્યન્તિ સ્વીયાધર્મ્મસ્ય ફલં પ્રાપ્સ્યન્તિ ચ।

XIII તે દિવા પ્રકૃષ્ટભોજનં સુખં મન્યન્તે નિજછલૈઃ સુખભોગિનઃ સન્તો યુષ્માભિઃ સાર્દ્ધં ભોજનં કુર્વ્વન્તઃ કલઙ્કિનો દોષિણશ્ચ ભવન્તિ।

XIV તેષાં લોચનાનિ પરદારાકાઙ્ક્ષીણિ પાપે ચાશ્રાન્તાનિ તે ચઞ્ચલાનિ મનાંસિ મોહયન્તિ લોભે તત્પરમનસઃ સન્તિ ચ।

XV તે શાપગ્રસ્તા વંશાઃ સરલમાર્ગં વિહાય બિયોરપુત્રસ્ય બિલિયમસ્ય વિપથેન વ્રજન્તો ભ્રાન્તા અભવન્| સ બિલિયમો
ઽપ્યધર્મ્માત્ પ્રાપ્યે પારિતોષિકેઽપ્રીયત,
XVI કિન્તુ નિજાપરાધાદ્ ભર્ત્સનામ્ અલભત યતો વચનશક્તિહીનં વાહનં માનુષિકગિરમ્ ઉચ્ચાર્ય્ય ભવિષ્યદ્વાદિન ઉન્મત્તતામ્
અબાધત|
XVII ઇમે નિર્જલાનિ પ્રસ્રવણાનિ પ્રચણ્ડવાયુના ચાલિતા મેઘાશ્ચ તેષાં કૃતે નિત્યસ્થાયી ઘોરતરાન્ધકારઃ સઞ્ચિતો ઽસ્તિ|
XVIII યે ચ જના ભ્રાન્ત્યાચારિગણાત્ કૃચ્છ્રેણોદ્ધૃતાસ્તાન્ ઇમે ઽપરિમિતદર્પકથા ભાષમાણાઃ શારીરિકસુખાભિલાષૈઃ
કામક્રીડાભિશ્ચ મોહયન્તિ|
XIX તેભ્યઃ સ્વાધીનતાં પ્રતિજ્ઞાય સ્વયં વિનાશ્યતાયા દાસા ભવન્તિ, યતઃ, યો યેનૈવ પરાજિગ્યે સ જાતસ્તસ્ય કિઙ્કરઃ|
XX ત્રાતુઃ પ્રભો ર્યીશુખ્રીષ્ટસ્ય જ્ઞાનેન સંસારસ્ય મલેભ્ય ઉદ્ધૃતા યે પુનસ્તેષુ નિમજ્જ્ય પરાજીયન્તે તેષાં પ્રથમદશાતઃ શેષદશા
કુત્સિતા ભવતિ|
XXI તેષાં પક્ષે ધર્મ્મપથસ્ય જ્ઞાનાપ્રાપ્તિ ર્વરં ન ચ નિર્દ્દિષ્ટાત્ પવિત્રવિધિમાર્ગાત્ જ્ઞાનપ્રાપ્તાનાં પરાવર્ત્તનં|
XXII કિન્તુ યેયં સત્યા દૃષ્ટાન્તકથા સૈવ તેષુ ફલિતવતી, યથા, કુક્કુરઃ સ્વીયવાન્તાય વ્યાવર્ત્તતે પુનઃ પુનઃ| લુઠિતું કર્દ્દમે તદ્વત્
ક્ષાલિતશ્ચૈવ શૂકરઃ||

# III

I હે પ્રિયતમાઃ, યૂયં યથા પવિત્રભવિષ્યદ્વક્તૃભિઃ પૂર્વ્વોક્તાનિ વાક્યાનિ ત્રાત્રા પ્રભુના પ્રેરિતાનામ્ અસ્માકમ્ આદેશઞ્ચ સારથ
તથા યુષ્માન્ સ્મારયિત્વા
II યુષ્માકં સરલભાવં પ્રબોધયિતુમ્ અહં દ્વિતીયમ્ ઇદં પત્રં લિખામિ|
III પ્રથમં યુષ્માભિરિદં જ્ઞાયતાં યત્ શેષે કાલે સ્વેચ્છાચારિણો નિન્દકા ઉપસ્થાય
IV વદિષ્યન્તિ પ્રભોરાગમનસ્ય પ્રતિજ્ઞા કુત્ર? યતઃ પિતૃલોકાનાં મહાનિદ્રાગમનાત્ પરં સર્વ્વાણિ સૃષ્ટેરારમ્ભકાલે યથા
તથૈવાવતિષ્ઠન્તે|
V પૂર્વ્વમ્ ઈશ્વરસ્ય વાક્યેનાકાશમણ્ડલં જલાદ્ ઉત્પન્ના જલે સન્તિષ્ઠમાના ચ પૃથિવ્યવિદ્યતૈતદ્ અનિચ્છુકતાતસ્તે ન જાનાન્તિ,
VI તતસ્તાત્કાલિકસંસારો જલેનાપ્લાવિતો વિનાશં ગતઃ|
VII કિન્ત્વધુના વર્ત્તમાને આકાશભૂમણ્ડલે તેનૈવ વાક્યેન વહ્ન્યર્થં ગુપ્તે વિચારદિનં દુષ્ટમાનવાનાં વિનાશઞ્ચ યાવદ્ રક્ષ્યતે|
VIII હે પ્રિયતમાઃ, યૂયમ્ એતદેકં વાક્યમ્ અનવગતા મા ભવત યત્ પ્રભોઃ સાક્ષાદ્ દિનમેકં વર્ષસહસ્રવદ્ વર્ષસહસ્રઞ્ચ દિનૈકવત્|
IX કેચિદ્ યથા વિલમ્બં મન્યન્તે તથા પ્રભુઃ સ્વપ્રતિજ્ઞાયાં વિલમ્બતે તન્નહિ કિન્તુ કોઽપિ યન્ન વિનશ્યેત્ સર્વ્વ એવ મનઃપરાવર્ત્તનં
ગચ્છેયુરિત્યભિલષન્ સો ઽસ્માન્ પ્રતિ દીર્ઘસહિષ્ણુતાં વિદધાતિ|
X કિન્તુ ક્ષપાયાં ચૌર ઇવ પ્રભો ર્દિનમ્ આગમિષ્યતિ તસ્મિન્ મહાશબ્દેન ગગનમણ્ડલં લોપ્સ્યતે મૂલવસ્તૂનિ ચ તાપેન ગલિષ્યન્તે
પૃથિવી તન્મધ્યસ્થિતાનિ કર્મ્માણિ ચ ધક્ષ્યન્તે|
XI અતઃ સર્વ્વૈરેતૈ ર્વિકારે ગન્તવ્યે સતિ યસ્મિન્ આકાશમણ્ડલં દાહેન વિકારિષ્યતે મૂલવસ્તૂનિ ચ તાપેન ગલિષ્યન્તે
XII તસ્યેશ્વરદિનસ્યાગમનં પ્રતીક્ષમાણૈરાકાઙ્ક્ષમાણૈશ્ચ યૂષ્માભિ ર્ધર્મ્માચારેશ્વરભક્તિભ્યાં કીદૃશૈ ર્લોકૈ ર્ભવિતવ્યં?
XIII તથાપિ વયં તસ્ય પ્રતિજ્ઞાનુસારેણ ધર્મ્મસ્ય વાસસ્થાનં નૂતનમ્ આકાશમણ્ડલં નૂતનં ભૂમણ્ડલઞ્ચ પ્રતીક્ષામહે|
XIV અતએવ હે પ્રિયતમાઃ, તાનિ પ્રતીક્ષમાણા યૂયં નિષ્કલઙ્કા અનિન્દિતાશ્ચ ભૂત્વા યત્ શાન્ત્યાશ્રિતાસ્તિષ્ઠથૈતસ્મિન્ યતધ્વં|
XV અસ્માકં પ્રભો ર્દીર્ઘસહિષ્ણુતાઞ્ચ પરિત્રાણજનિકાં મન્યધ્વં| અસ્માકં પ્રિયભ્રાત્રે પૌલાય યત્ જ્ઞાનમ્ અદાયિ તદનુસારેણ
સોઽપિ પત્રે યુષ્માન્ પ્રતિ તદેવાલિખત્|
XVI સ્વકીયસર્વ્વપત્રેષુ ચૈતાન્યધિ પ્રસ્તુત્ય તદેવ ગદતિ| તેષુ પત્રેષુ કતિપયાનિ દુરૂહ્યાણિ વાક્યાનિ વિદ્યન્તે યે ચ લોકા
અજ્ઞાનાશ્ચઞ્ચલાશ્ચ તે નિજવિનાશાર્થમ્ અન્યશાસ્ત્રીયવચનાનીવ તાન્યપિ વિકારયન્તિ|
XVII તસ્માદ્ હે પ્રિયતમાઃ, યૂયં પૂર્વ્વં બુદ્ધ્વા સાવધાનાસ્તિષ્ઠત, અધાર્મ્મિકાણાં ભ્રાન્તિસ્રોતસાપહૃતાઃ સ્વકીયસુસ્થિરત્વાત્ મા
ભ્રશ્યત|
XVIII કિન્ત્વસ્માકં પ્રભોસ્ત્રાતુ ર્યીશુખ્રીષ્ટસ્યાનુગ્રહે જ્ઞાને ચ વર્દ્ધધ્વં| તસ્ય ગૌરવમ્ ઇદાનીં સદાકાલઞ્ચ ભૂયાત્| આમેન્|

# ૧ યોહનઃ પત્રં

I આદિતો ય આસીદ્ યસ્ય વાગ્ અસ્માભિરશ્રાવિ યઞ્ચ વયં સ્વનેત્રૈ ર્દૃષ્ટવન્તો યઞ્ચ વીક્ષિતવન્તઃ સ્વકરૈઃ સ્પૃષ્ટવન્તશ્ચ તં જીવનવાદં વયં જ્ઞાપયામઃ।

II સ જીવનસ્વરૂપઃ પ્રકાશત વયઞ્ચ તં દૃષ્ટવન્તસ્તમધિ સાક્ષ્યં દદ્મશ્ચ, યશ્ચ પિતુઃ સન્નિધાવવર્ત્તતાસ્માકં સમીપે પ્રકાશત ચ તમ્ અનન્તજીવનસ્વરૂપં વયં યુષ્માન્ જ્ઞાપયામઃ।

III અસ્માભિ ર્યદ્ દૃષ્ટં શ્રુતઞ્ચ તદેવ યુષ્માન્ જ્ઞાપ્યતે તેનાસ્માભિઃ સહાંશિત્વં યુષ્માકં ભવિષ્યતિ। અસ્માકઞ્ચ સહાંશિત્વં પિત્રા તત્પુત્રેણ યીશુખ્રીષ્ટેન ચ સાર્દ્ધં ભવતિ।

IV અપરઞ્ચ યુષ્માકમ્ આનન્દો યત્ સમ્પૂર્ણો ભવેદ્ તદર્થં વયમ્ એતાનિ લિખામઃ।

V વયં યાં વાર્ત્તાં તસ્માત્ શ્રુત્વા યુષ્માન્ જ્ઞાપયામઃ સેયમ્। ઈશ્વરો જ્યોતિસ્તસ્મિન્ અન્ધકારસ્ય લેશોઽપિ નાસ્તિ।

VI વયં તેન સહાંશિન ઇતિ ગદિત્વા યદ્યન્ધાકારે ચરામસ્તર્હિ સત્યાચારિણો ન સન્તો ઽનૃતવાદિનો ભવામઃ।

VII કિન્તુ સ યથા જ્યોતિષિ વર્ત્તતે તથા વયમપિ યદિ જ્યોતિષિ ચરામસ્તર્હિ પરસ્પરં સહભાગિનો ભવામસ્તસ્ય પુત્રસ્ય યીશુખ્રીષ્ટસ્ય રુધિરઞ્ચાસ્માન્ સર્વ્વસ્માત્ પાપાત્ શુદ્ધયતિ।

VIII વયં નિષ્પાપા ઇતિ યદિ વદામસ્તર્હિ સ્વયમેવ સ્વાન્ વઞ્ચયામઃ સત્યમતઞ્ચાસ્માકમ્ અન્તરે ન વિદ્યતે।

IX યદિ સ્વપાપાનિ સ્વીકુર્મ્મહે તર્હિ સ વિશ્વાસ્યો યાથાર્થિકશ્ચાસ્તિ તસ્માદ્ અસ્માકં પાપાનિ ક્ષમિષ્યતે સર્વ્વસ્માદ્ અધર્મ્માચ્ચાસ્માન્ શુદ્ધયિષ્યતિ।

X વયમ્ અકૃતપાપા ઇતિ યદિ વદામસ્તર્હિ તમ્ અનૃતવાદિનં કુર્મ્મસ્તસ્ય વાક્યઞ્ચાસ્માકમ્ અન્તરે ન વિદ્યતે।

## II

I હે પ્રિયબાલકાઃ, યુષ્માભિ ર્યત્ પાપં ન ક્રિયેત તદર્થં યુષ્માન્ પ્રત્યેતાનિ મયા લિખ્યન્તે। યદિ તુ કેનાપિ પાપં ક્રિયતે તર્હિ પિતુઃ સમીપે ઽસ્માકં એકઃ સહાયો ઽર્થતો ધાર્મ્મિકો યીશુઃ ખ્રીષ્ટો વિદ્યતે।

II સ ચાસ્માકં પાપાનાં પ્રાયશ્ચિત્તં કેવલમસ્માકં નહિ કિન્તુ લિખિલસંસારસ્ય પાપાનાં પ્રાયશ્ચિત્તં।

III વયં તં જાનીમ ઇતિ તદીયાજ્ઞાપાલનેનાવગચ્છામઃ।

IV અહં તં જાનામીતિ વદિત્વા યસ્તસ્યાજ્ઞા ન પાલયતિ સો ઽનૃતવાદી સત્યમતઞ્ચ તસ્યાન્તરે ન વિદ્યતે।

V યઃ કશ્ચિત્ તસ્ય વાક્યં પાલયતિ તસ્મિન્ ઈશ્વરસ્ય પ્રેમ સત્યરૂપેણ સિધ્યતિ વયં તસ્મિન્ વર્ત્તામહે તદ્ એતેનાવગચ્છામઃ।

VI અહં તસ્મિન્ તિષ્ઠામીતિ યો ગદતિ તસ્યેદમ્ ઉચિતં યત્ ખ્રીષ્ટો યાદૃગ્ આચરિતવાન્ સો ઽપિ તાદૃગ્ આચરેત્।

VII હે પ્રિયતમાઃ, યુષ્માન્ પ્રત્યહં નૂતનામાજ્ઞાં લિખામીતિ નહિ કિન્ત્વાદિતો યુષ્માભિ ર્લબ્ધાં પુરાતનામાજ્ઞાં લિખામિ। આદિતો યુષ્માભિ ર્યદ્ વાક્યં શ્રુતં સા પુરાતનાજ્ઞા।

VIII પુનરપિ યુષ્માન્ પ્રતિ નૂતનાજ્ઞા મયા લિખ્યત એતદપિ તસ્મિન્ યુષ્માસુ ચ સત્યં, યતો ઽન્ધકારો વ્યત્યેતિ સત્યા જ્યોતિશ્ચેદાનીં પ્રકાશતે;

IX અહં જ્યોતિષિ વર્ત્ત ઇતિ ગદિત્વા યઃ સ્વભ્રાતરં દ્વેષ્ટિ સો ઽદ્યાપિ તમિસ્રે વર્ત્તતે।

X સ્વભ્રાતરિ યઃ પ્રીયતે સ એવ જ્યોતિષિ વર્ત્તતે વિઘ્નજનકં કિમપિ તસ્મિન્ ન વિદ્યતે।

XI કિન્તુ સ્વભ્રાતરં યો દ્વેષ્ટિ સ તિમિરે વર્ત્તતે તિમિરે ચરતિ ચ તિમિરેણ ચ તસ્ય નયને ઽન્ધીક્રિયેતે તસ્માત્ ક્ક યામીતિ સ જ્ઞાતું ન શક્નોતિ।

XII હે શિશવઃ, યૂયં તસ્ય નામ્ના પાપક્ષમાં પ્રાપ્તવન્તસ્તસ્માદ્ અહં યુષ્માન્ પ્રતિ લિખામિ।

XIII હે પિતરઃ, ય આદિતો વર્ત્તમાનસ્તં યૂયં જાનીથ તસ્માદ્ યુષ્માન્ પ્રતિ લિખામિ। હે યુવાનઃ યૂયં પાપત્માનં જિતવન્તસ્તસ્માદ્ યુષ્માન્ પ્રતિ લિખામિ। હે બાલકાઃ, યૂયં પિતરં જાનીથ તસ્માદહં યુષ્માન્ પ્રતિ લિખિતવાન્।

XIV હે પિતરઃ, આદિતો યો વર્ત્તમાનસ્તં યૂયં જાનીથ તસ્માદ્ યુષ્માન્ પ્રતિ લિખિતવાન્। હે યુવાનઃ, યૂયં બલવન્ત આધ્વે, ઈશ્વરસ્ય વાક્યઞ્ચ યુષ્મદન્તરે વર્તતે પાપાત્મા ચ યુષ્માભિઃ પરાજિગ્યે તસ્માદ્ યુષ્માન્ પ્રતિ લિખિતવાન્।

XV યૂયં સંસારે સંસારસ્થવિષયેષુ ચ મા પ્રીયધ્વં યઃ સંસારે પ્રીયતે તસ્યાન્તરે પિતુઃ પ્રેમ ન તિષ્ઠતિ।

XVI યતઃ સંસારે યદ્યત્ સ્થિતમ્ અર્થતઃ શારીરિકભાવસ્યાભિલાષો દર્શનેન્દ્રિયસ્યાભિલાષો જીવનસ્ય ગર્વ્વશ્ચ સર્વ્વમેતત્ પિતૃતો ન જાયતે કિન્તુ સંસારદેવ।

XVII સંસારસ્તદીયાભિલાષશ્ચ વ્યત્યેતિ કિન્તુ ય ઈશ્વરસ્યેષ્ટં કરોતિ સો ઽનન્તકાલં યાવત્ તિષ્ઠતિ।

XVIII હે બાલકાઃ, શેષકાલોઽયં, અપરં ખ્રીષ્ટારિણોપસ્થાવ્યમિતિ યુષ્માભિ ર્યથા શ્રુતં તથા બહવઃ ખ્રીષ્ટારય ઉપસ્થિતાસ્તસ્માદયં શેષકાલોઽસ્તીતિ વયં જાનીમઃ।

XIX તે ઽસ્મન્મધ્યાન્ નિર્ગતવન્તઃ કિન્ત્વસ્મદીયા નાસન્ યદ્યસ્મદીયા અભવિષ્યન્ તર્હ્યસ્મત્સઙ્ગે ઽસ્થાસ્યન્, કિન્તુ સર્વ્વે ઽસ્મદીયા ન સન્ત્યેતસ્ય પ્રકાશ આવશ્યક આસીત્।

XX યઃ પવિત્રસ્તસ્માદ્ યૂયમ્ અભિષેકં પ્રાપ્તવન્તસ્તેન સર્વ્વાણિ જાનીથ।

XXI યૂયં સત્યમતં ન જાનીથ તત્કારણાદ્ અહં યુષ્માન્ પ્રતિ લિખિતવાન્ તન્નહિ કિન્તુ યૂયં તત્ જાનીથ સત્યમતાચ્ચ કિમપ્યનૃતવાક્યં નોત્પદ્યતે તત્કારણાદેવ।

XXII યીશુરભિષિક્તસ્ત્રાતેતિ યો નાઙ્ગીકરોતિ તં વિના કો ઽપરો ઽનૃતવાદી ભવેત્? સ એવ ખ્રીષ્ટારિ ર્યઃ પિતરં પુત્રઞ્ચ નાઙ્ગીકરોતિ।

XXIII યઃ કશ્ચિત્ પુત્રં નાઙ્ગીકરોતિ સ પિતરમપિ ન ધારયતિ યશ્ચ પુત્રમઙ્ગીકરોતિ સ પિતરમપિ ધારયતિ।

XXIV આદિતો યુષ્માભિ ર્યત્ શ્રુતં તદ્ યુષ્માસુ તિષ્ઠતુ, આદિતઃ શ્રુતં વાક્યં યદિ યુષ્માસુ તિષ્ઠતિ, તર્હિ યૂયમપિ પુત્રે પિતરિ ચ સ્થાસ્યથ।

XXV સ ચ પ્રતિજ્ઞયાસ્મભ્યં યત્ પ્રતિજ્ઞાતવાન્ તદ્ અનન્તજીવનં।
XXVI યે જના યુષ્માન્ ભ્રામયન્તિ તાનધ્યહમ્ ઇદં લિખિતવાન્।
XXVII અપરં યૂયં તસ્માદ્ યમ્ અભિષેકં પ્રાપ્તવન્તઃ સ યુષ્માસુ તિષ્ઠતિ તતઃ કોઽપિ યદ્ યુષ્માન્ શિક્ષયેત્ તદ્ અનાવશ્યકં, સ
ચાભિષેકો યુષ્માન્ સર્વ્વાણિ શિક્ષયતિ સત્યશ્ચ ભવતિ ન ચાતથ્યઃ, અતઃ સ યુષ્માન્ યદ્વદ્ અશિક્ષયત્ તદ્વત્ તત્ર સ્થાસ્યથ।
XXVIII અતએવ હે પ્રિયબાલકા યૂયં તત્ર તિષ્ઠત, તથા સતિ સ યદા પ્રકાશિષ્યતે તદા વયં પ્રતિભાન્વિતા ભવિષ્યામઃ,
તસ્યાગમનસમયે ચ તસ્ય સાક્ષાન્ન ત્રપિષ્યામહે।
XXIX સ ધાર્મ્મિકો ઽસ્તીતિ યદિ યૂયં જાનીથ તર્હિ યઃ કશ્ચિદ્ ધર્મ્માચારં કરોતિ સ તસ્માત્ જાત ઇત્યપિ જાનીત।

# III

I પશ્યત વયમ્ ઈશ્વરસ્ય સન્તાના ઇતિ નામ્નાખ્યામહે, એતેન પિતાસ્મભ્યં કીદૃક્ મહાપ્રેમ પ્રદત્તવાન્, કિન્તુ સંસારસ્તં નાજાનાત્
તત્કારણાદસ્માન્ અપિ ન જાનાતિ।
II હે પ્રિયતમાઃ, ઇદાનીં વયમ્ ઈશ્વરસ્ય સન્તાના આસ્મહે પશ્ચાત્ કિં ભવિષ્યામસ્તદ્ અદ્યાપ્યપ્રકાશિતં કિન્તુ પ્રકાશં ગતે વયં
તસ્ય સદૃશા ભવિષ્યામિ ઇતિ જાનીમઃ, યતઃ સ યાદૃશો ઽસ્તિ તાદૃશો ઽસ્માભિર્દર્શિષ્યતે।
III તસ્મિન્ એષા પ્રત્યાશા યસ્ય કસ્યચિદ્ ભવતિ સ સ્વં તથા પવિત્રં કરોતિ યથા સ પવિત્રો ઽસ્તિ।
IV યઃ કશ્ચિત્ પાપમ્ આચરતિ સ વ્યવસ્થાલઙ્ઘનં કરોતિ યતઃ પાપમેવ વ્યવસ્થાલઙ્ઘનં।
V અપરં સો ઽસ્માકં પાપાન્યપહર્ત્તું પ્રાકાશતૈતદ્ યૂયં જાનીથ, પાપઞ્ચ તસ્મિન્ ન વિદ્યતે।
VI યઃ કશ્ચિત્ તસ્મિન્ તિષ્ઠતિ સ પાપાચારં ન કરોતિ યઃ કશ્ચિત્ પાપાચારં કરોતિ સ તં ન દૃષ્ટવાન્ ન વાવગતવાન્।
VII હે પ્રિયબાલકાઃ, કશ્ચિદ્ યુષ્માકં ભ્રમં ન જનયેત્, યઃ કશ્ચિદ્ ધર્મ્માચારં કરોતિ સ તાદૃગ્ ધાર્મ્મિકો ભવતિ યાદૃક્ સ ધામ્મિકો
ઽસ્તિ।
VIII યઃ પાપાચારં કરોતિ સ શયતાનાત્ જાતો યતઃ શયતાન આદિતઃ પાપાચારી શયતાનસ્ય કર્મ્મણાં લોપાર્થમેવેશ્વરસ્ય પુત્રઃ
પ્રાકાશત।
IX યઃ કશ્ચિદ્ ઈશ્વરાત્ જાતઃ સ પાપાચારં ન કરોતિ યતસ્તસ્ય વીર્ય્યં તસ્મિન્ તિષ્ઠતિ પાપાચારં કર્ત્તુઞ્ચ ન શક્નોતિ યતઃ સ
ઈશ્વરાત્ જાતઃ।
X ઇત્યનેનેશ્વરસ્ય સન્તાનાઃ શયતાનસ્ય ચ સન્તાના વ્યક્તા ભવન્તિ। યઃ કશ્ચિદ્ ધર્મ્માચારં ન કરોતિ સ ઈશ્વરાત્ જાતો નહિ
યશ્ચ સ્વભ્રાતરિ ન પ્રીયતે સો ઽપીશ્વરાત્ જાતો નહિ।
XI યતસ્તસ્ય ય આદેશ આદિતો યુષ્માભિઃ શ્રુતઃ સ એષ એવ યદ્ અસ્માભિઃ પરસ્પરં પ્રેમ કર્ત્તવ્યં।
XII પાપાત્મતો જાતો યઃ કાબિલ્ સ્વભ્રાતરં હતવાન્ તત્સદૃશૈરસ્માભિ ર્ન ભવિતવ્યં। સ કસ્માત્ કારણાત્ તં હતવાન્? તસ્ય
કર્મ્માણિ દુષ્ટાનિ તદ્ભ્રાતુશ્ચ કર્મ્માણિ ધર્મ્માણ્યાસન્ ઇતિ કારણાત્।
XIII હે મમ ભ્રાતરઃ, સંસારો યદિ યુષ્માન્ દ્વેષ્ટિ તર્હિ તદ્ આશ્ચર્ય્યં ન મન્યધ્વં।
XIV વયં મૃત્યુમ્ ઉત્તીર્ય્ય જીવનં પ્રાપ્તવન્તસ્તદ્ ભ્રાતૃષુ પ્રેમકરણાત્ જાનીમઃ। ભ્રાતરિ યો ન પ્રીયતે સ મૃત્યૌ તિષ્ઠતિ।
XV યઃ કશ્ચિત્ સ્વભ્રાતરં દ્વેષ્ટિ સં નરઘાતી કિઞ્ચાનન્તજીવનં નરઘાતિનઃ કસ્યાપ્યન્તરે નાવતિષ્ઠતે તદ્ યૂયં જાનીથ।
XVI અસ્માકં કૃતે સ સ્વપ્રાણાંસ્ત્યક્તવાન્ ઇત્યનેન વયં પ્રેમ્નસ્તત્ત્વમ્ અવગતાઃ, અપરં ભ્રાતૃણાં કૃતે ઽસ્માભિરપિ
પ્રાણાસ્ત્યક્તવ્યાઃ।
XVII સાંસારિકજીવિકાપ્રાપ્તો યો જનઃ સ્વભ્રાતરં દીનં દૃષ્ટ્વા તસ્માત્ સ્વીયદયાં રુણદ્ધિ તસ્યાન્તર ઈશ્વરસ્ય પ્રેમ કથં તિષ્ઠેત્?
XVIII હે મમ પ્રિયબાલકાઃ, વાક્યેન જિહ્વયા વાસ્માભિઃ પ્રેમ ન કર્ત્તવ્યં કિન્તુ કાર્ય્યેણ સત્યતયા ચૈવ।
XIX એતેન વયં યત્ સત્યમતસમ્બન્ધીયાસ્તત્ જાનીમસ્તસ્ય સાક્ષાત્ સ્વાન્તઃકરણાનિ સાન્ત્વયિતું શક્ષ્યામશ્ચ।
XX યતો ઽસ્મદન્તઃકરણં યદ્યસ્માન્ દૂષયતિ તર્હ્યસ્મદન્તઃ કરણાદ્ ઈશ્વરો મહાન્ સર્વ્વજ્ઞશ્ચ।
XXI હે પ્રિયતમાઃ, અસ્મદન્તઃકરણં યદ્યસ્માન્ ન દૂષયતિ તર્હિ વયમ્ ઈશ્વરસ્ય સાક્ષાત્ પ્રતિભાન્વિતા ભવામઃ।
XXII યચ્ચ પ્રાર્થયામહે તત્ તસ્માત્ પ્રાપ્નુમઃ, યતો વયં તસ્યાજ્ઞાઃ પાલયામસ્તસ્ય સાક્ષાત્ તુષ્ટિજનકમ્ આચારં કુર્મ્મશ્ચ।
XXIII અપરં તસ્યેયમાજ્ઞા યદ્ વયં પુત્રસ્ય યીશુખ્રીષ્ટસ્ય નામ્નિ વિશ્વસિમસ્તસ્યાજ્ઞાનુસારેણ ચ પરસ્પરં પ્રેમ કુર્મ્મઃ।
XXIV યશ્ચ તસ્યાજ્ઞાઃ પાલયતિ સ તસ્મિન્ તિષ્ઠતિ તસ્મિન્ સોઽપિ તિષ્ઠતિ; સ ચાસ્માન્ યમ્ આત્માનં દત્તવાન્ તસ્માત્ સો
ઽસ્માસુ તિષ્ઠતીતિ જાનીમઃ।

# IV

I હે પ્રિયતમાઃ, યૂયં સર્વ્વેષ્વાત્મસુ ન વિશ્વસિત કિન્તુ તે ઈશ્વરાત્ જાતા ન વેત્યાત્મનઃ પરીક્ષધ્વં યતો બહવો મૃષાભવિષ્યદ્વાદિનો
જગન્મધ્યમ્ આગતવન્તઃ।
II ઈશ્વરીયો ય આત્મા સ યુષ્માભિરનેન પરિચીયતાં, યીશુઃ ખ્રીષ્ટો નરાવતારો ભૂત્વાગત એતદ્ યેન કેનચિદ્ આત્મના સ્વીક્રિયતે
સ ઈશ્વરીયઃ।
III કિન્તુ યીશુઃ ખ્રીષ્ટો નરાવતારો ભૂત્વાગત એતદ્ યેન કેનચિદ્ આત્મના નાઙ્ગીક્રિયતે સ ઈશ્વરીયો નહિ કિન્તુ ખ્રીષ્ટારેરાત્મા, તેન
ચાગન્તવ્યમિતિ યુષ્માભિઃ શ્રુતં, સ ચેદાનીમપિ જગતિ વર્ત્તતે।
IV હે બાલકાઃ, યૂયમ્ ઈશ્વરાત્ જાતાસ્તાન્ જિતવન્તશ્ચ યતઃ સંસારાધિષ્ઠાનકારિણો ઽપિ યુષ્મદધિષ્ઠાનકારી મહાન્।
V તે સંસારાત્ જાતાસ્તતો હેતોઃ સંસારાદ્ ભાષન્તે સંસારશ્ચ તેષાં વાક્યાનિ ગૃહ્લાતિ।
VI વયમ્ ઈશ્વરાત્ જાતાઃ, ઈશ્વરં યો જાનાતિ સોઽસ્મદ્વાક્યાનિ ગૃહ્લાતિ યશ્ચેશ્વરાત્ જાતો નહિ સોઽસ્મદ્વાક્યાનિ ન ગૃહ્લાતિ;
અનેન વયં સત્યાત્માનં ભ્રામકાત્માનઞ્ચ પરિચિનુમઃ।
VII હે પ્રિયતમાઃ, વયં પરસ્પરં પ્રેમ કરવામ, યતઃ પ્રેમ ઈશ્વરાત્ જાયતે, અપરં યઃ કશ્ચિત્ પ્રેમ કરોતિ સ ઈશ્વરાત્ જાત ઈશ્વરં
વેત્તિ ચ।

VIII યઃ પ્રેમ ન કરોતિ સ ઈશ્વરં ન જાનાતિ યત ઈશ્વરઃ પ્રેમસ્વરૂપઃ।
IX અસ્માસ્વીશ્વરસ્ય પ્રેમૈતેન પ્રાકાશત યત્ સ્વપુત્રેણાસ્મભ્યં જીવનદાનાર્થમ્ ઈશ્વરઃ સ્વીયમ્ અદ્વિતીયં પુત્રં જગન્મધ્યં
પ્રેષિતવાન્।
X વયં યદ્ ઈશ્વરે પ્રીતવન્ત ઇત્યત્ર નહિ કિન્તુ સ યદસ્માસુ પ્રીતવાન્ અસ્મત્પાપાનાં પ્રાયશ્ચિત્તાર્થં સ્વપુત્રં પ્રેષિતવાંશ્ચેત્યત્ર પ્રેમ
સન્તિષ્ઠતે।
XI હે પ્રિયતમાઃ, અસ્માસુ યદીશ્વરેણૈતાદૃશં પ્રેમ કૃતં તર્હિ પરસ્પરં પ્રેમ કર્ત્તુમ્ અસ્માકમપ્યુચિતં।
XII ઈશ્વરઃ કદાચ કેનાપિ ન દૃષ્ટઃ યદ્યસ્માભિઃ પરસ્પરં પ્રેમ ક્રિયતે તર્હીશ્વરો ઽસ્મન્મધ્યે તિષ્ઠતિ તસ્ય પ્રેમ ચાસ્માસુ સેત્સ્યતે।
XIII અસ્મભ્યં તેન સ્વકીયાત્મનોંઽશો દત્ત ઇત્યનેન વયં યત્ તસ્મિન્ તિષ્ઠામઃ સ ચ યદ્ અસ્માસુ તિષ્ઠતીતિ જાનીમઃ।
XIV પિતા જગત્રાતારં પુત્રં પ્રેષિતવાન્ એતદ્ વયં દૃષ્ટ્વા પ્રમાણયામઃ।
XV યીશુરીશ્વરસ્ય પુત્ર એતદ્ યેનાઙ્ગીક્રિયતે તસ્મિન્ ઈશ્વરસ્તિષ્ઠતિ સ ચેશ્વરે તિષ્ઠતિ।
XVI અસ્માસ્વીશ્વરસ્ય યત્ પ્રેમ વર્ત્તતે તદ્ વયં જ્ઞાતવન્તસ્તસ્મિન્ વિશ્વાસિતવન્તશ્ચ। ઈશ્વરઃ પ્રેમસ્વરૂપઃ પ્રેમ્ની યસ્તિષ્ઠતિ સ
ઈશ્વરે તિષ્ઠતિ તસ્મિંશ્ચેશ્વરસ્તિષ્ઠતિ।
XVII સ યાદૃશો ઽસ્તિ વયમપ્યેતસ્મિન્ જગતિ તાદૃશા ભવામ એતસ્માદ્ વિચારદિને ઽસ્માભિ ર્યા પ્રતિભા લભ્યતે
સાસ્મત્સમ્બન્ધીયસ્ય પ્રેમ્નઃ સિદ્ધિઃ।
XVIII પ્રેમ્નિ ભીતિ ર્ન વર્ત્તતે કિન્તુ સિદ્ધં પ્રેમ ભીતિં નિરાકરોતિ યતો ભીતિઃ સયાતનાસ્તિ ભીતો માનવઃ પ્રેમ્નિ સિદ્ધો ન જાતઃ।
XIX અસ્માસુ સ પ્રથમં પ્રીતવાન્ ઇતિ કારણાદ્ વયં તસ્મિન્ પ્રીયામહે।
XX ઈશ્વરે ઽહં પ્રીય ઇત્યુક્ત્વા યઃ કશ્ચિત્ સ્વભ્રાતરં દ્વેષ્ટિ સો ઽનૃતવાદી। સ યં દૃષ્ટવાન્ તસ્મિન્ સ્વભ્રાતરિ યદિ ન પ્રીયતે તર્હિ
યમ્ ઈશ્વરં ન દૃષ્ટવાન્ કથં તસ્મિન્ પ્રેમ કર્ત્તું શક્નુયાત્?
XXI અત ઈશ્વરે યઃ પ્રીયતે સ સ્વીયભ્રાતર્ય્યપિ પ્રીયતામ્ ઇયમ્ આજ્ઞા તસ્માદ્ અસ્માભિ ર્લબ્ધા।

# V

I યીશુરભિષિક્તસ્ત્રાતેતિ યઃ કશ્ચિદ્ વિશ્વાસિતિ સ ઈશ્વરાત્ જાતઃ; અપરં યઃ કશ્ચિત્ જનયિતરિ પ્રીયતે સ તસ્માત્ જાતે જને
ઽપિ પ્રીયતે।
II વયમ્ ઈશ્વરસ્ય સન્તાનેષુ પ્રીયામહે તદ્ અનેન જાનીમો યદ્ ઈશ્વરે પ્રીયામહે તસ્યાજ્ઞાઃ પાલયામશ્ચ।
III યત ઈશ્વરે યત્ પ્રેમ તત્ તદીયાજ્ઞાપાલનેનાસ્માભિઃ પ્રકાશયિતવ્યં, તસ્યાજ્ઞાશ્ચ કઠોરા ન ભવન્તિ।
IV યતો યઃ કશ્ચિદ્ ઈશ્વરાત્ જાતઃ સ સંસારં જયતિ કિઞ્ચાસ્માકં યો વિશ્વાસઃ સ એવાસ્માકં સંસારજયિજયઃ।
V યીશુરીશ્વરસ્ય પુત્ર ઇતિ યો વિશ્વસિતિ તં વિના કોઽપરઃ સંસારં જયતિ?
VI સોઽભિષિક્તસ્ત્રાતા યીશુસ્તોયરુધિરાભ્યામ્ આગતઃ કેવલં તોયેન નહિ કિન્તુ તોયરુધિરાભ્યામ્, આત્મા ચ સાક્ષી ભવતિ
યત આત્મા સત્યતાસ્વરૂપઃ।
VII યતો હેતોઃ સ્વર્ગે પિતા વાદઃ પવિત્ર આત્મા ચ ત્રય ઇમે સાક્ષિણઃ સન્તિ, ત્રય ઇમે ચૈકો ભવન્તિ।
VIII તથા પૃથિવ્યામ્ આત્મા તોયં રુધિરઞ્ચ ત્રીણ્યેતાનિ સાક્ષ્યં દદાતિ તેષાં ત્રયાણામ્ એકત્વં ભવતિ ચ।
IX માનવાનાં સાક્ષ્યં યદ્યસ્માભિ ર્ગૃહ્યતે તર્હીશ્વરસ્ય સાક્ષ્યં તસ્માદપિ શ્રેષ્ઠં યતઃ સ્વપુત્રમધીશ્વરેણ દત્તં સાક્ષ્યમિદં।
X ઈશ્વરસ્ય પુત્રે યો વિશ્વાસિતિ સ નિજાન્તરે તત્ સાક્ષ્યં ધારયતિ; ઈશ્વરે યો ન વિશ્વસિતિ સ તમ્ અનૃતવાદિનં કરોતિ યત
ઈશ્વરઃ સ્વપુત્રમધિ યત્ સાક્ષ્યં દત્તવાન્ તસ્મિન્ સ ન વિશ્વસિતિ।
XI તચ્ચ સાક્ષ્યમિદં યદ્ ઈશ્વરો ઽસ્મભ્યમ્ અનન્તજીવનં દત્તવાન્ તચ્ચ જીવનં તસ્ય પુત્રે વિદ્યતે।
XII યઃ પુત્રં ધારયતિ સ જીવનં ધારિયતિ, ઈશ્વરસ્ય પુત્રં યો ન ધારયતિ સ જીવનં ન ધારયતિ।
XIII ઈશ્વરપુત્રસ્ય નામ્નિ યુષ્માન્ પ્રત્યેતાનિ મયા લિખિતાનિ તસ્યાભિપ્રાયો ઽયં યદ્ યૂયમ્ અનન્તજીવનપ્રાપ્તા ઇતિ જાનીયાત
તસ્યેશ્વરપુત્રસ્ય નામ્નિ વિશ્વસેત ચ।
XIV તસ્યાન્તિકે ઽસ્માકં યા પ્રતિભા ભવતિ તસ્યાઃ કારણમિદં યદ્ વયં યદિ તસ્યાભિમતં કિમપિ તં યાચામહે તર્હિ સો ઽસ્માકં
વાક્યં શૃણોતિ।
XV સ ચાસ્માકં યત્ કિઞ્ચન યાચનં શૃણોતીતિ યદિ જાનીમસ્તર્હિ તસ્માદ્ યાચિતા વરા અસ્માભિઃ પ્રાપ્યન્તે તદપિ જાનીમઃ।
XVI કશ્ચિદ્ યદિ સ્વભ્રાતરમ્ અમૃત્યુજનકં પાપં કુર્વ્વન્તં પશ્યતિ તર્હિ સ પ્રાર્થનાં કરોતુ તેનેશ્વરસ્તસ્મૈ જીવનં દાસ્યતિ, અર્થતો
મૃત્યુજનકં પાપં યેન નાકારિતસ્મૈ। કિન્તુ મૃત્યુજનકમ્ એકં પાપમ્ આસ્તે તદધિ તેન પ્રાર્થના ક્રિયતામિત્યહં ન વદામિ।
XVII સર્વ્વ એવાધર્મ્મઃ પાપં કિન્તુ સર્વ્વપાંપ મૃત્યુજનકં નહિ।
XVIII ય ઈશ્વરાત્ જાતઃ સ પાપાચારં ન કરોતિ કિન્ત્વીશ્વરાત્ જાતો જનઃ સ્વં રક્ષતિ તસ્માત્ સ પાપાત્મા તં ન સ્પૃશતીતિ વયં
જાનીમઃ।
XIX વયમ્ ઈશ્વરાત્ જાતાઃ કિન્તુ કૃત્સ્નઃ સંસારઃ પાપાત્મનો વશં ગતો ઽસ્તીતિ જાનીમઃ।
XX અપરમ્ ઈશ્વરસ્ય પુત્ર આગતવાન્ વયઞ્ચ યયા તસ્ય સત્યમયસ્ય જ્ઞાનં પ્રાપ્નુયામસ્તાદૃશીં ધિયમ્ અસ્મભ્યં દત્તવાન્ ઇતિ
જાનીમસ્તસ્મિન્ સત્યમયે ઽર્થતસ્તસ્ય પુત્રે યીશુખ્રીષ્ટે તિષ્ઠામશ્ચ; સ એવ સત્યમય ઈશ્વરો ઽનન્તજીવનસ્વરૂપશ્ચાસ્તિ।
XXI હે પ્રિયબાલકાઃ, યૂયં દેવમૂર્ત્તિભ્યઃ સ્વાન્ રક્ષત। આમેન્।

# ૨ યોહનઃ પત્રં

I હે અભિરુચિતે કુરિયે, ત્વાં તવ પુત્રાંશ્ચ પ્રતિ પ્રાચીનોઽહં પત્રં લિખામિ।
II સત્યમતાદ્ યુષ્માસુ મમ પ્રેમાસ્તિ કેવલં મમ નહિ કિન્તુ સત્યમતજ્ઞાનાં સર્વ્વેષામેવ। યતઃ સત્યમતમ્ અસ્માસુ તિષ્ઠત્યનન્તકાલં
યાવચ્ચાસ્માસુ સ્થાસ્યતિ।
III પિતુરીશ્વરાત્ તત્પિતુઃ પુત્રાત્ પ્રભો ર્યીશુખ્રીષ્ટાચ્ચ પ્રાપ્યો ઽનુગ્રહઃ કૃપા શાન્તિશ્ચ સત્યતાપ્રેમભ્યાં સાર્દ્ધં યુષ્માન્ અધિતિષ્ઠતુ।
IV વયં પિતૃતો યામ્ આજ્ઞાં પ્રાપ્તવન્તસ્તદનુસારેણ તવ કેચિદ્ આત્મજાઃ સત્યમતમ્ આચરન્ત્યેતસ્ય પ્રમાણં પ્રાપ્યાહં ભૃશમ્
આનન્દિતવાન્।
V સામ્પ્રતઞ્ચ હે કુરિયે, નવીનાં કાઞ્ચિદ્ આજ્ઞાં ન લિખન્નહમ્ આદિતો લબ્ધામ્ આજ્ઞાં લિખન્ ત્વામ્ ઇદં વિનયે યદ્ અસ્માભિઃ
પરસ્પરં પ્રેમ કર્ત્તવ્યં।
VI અપરં પ્રેમૈતેન પ્રકાશતે યદ્ વયં તસ્યાજ્ઞા આચરેમ। આદિતો યુષ્માભિ ર્યા શ્રુતા સેયમ્ આજ્ઞા સા ચ યુષ્માભિરાચરિતવ્યા।
VII યતો બહવઃ પ્રવઞ્ચકા જગત્ પ્રવિશ્ય યીશુખ્રીષ્ટો નરાવતારો ભૂત્વાગત એતત્ નાઙ્ગીકુર્વ્વન્તિ સ એવ પ્રવઞ્ચકઃ ખ્રીષ્ટારિશ્ચાસ્તિ।
VIII અસ્માકં શ્રમો યત્ પણ્ડશ્રમો ન ભવેત્ કિન્તુ સમ્પૂર્ણં વેતનમસ્માભિ ર્લભ્યેત તદર્થં સ્વાનધિ સાવધાના ભવતઃ।
IX યઃ કશ્ચિદ્ વિપથગામી ભૂત્વા ખ્રીષ્ટસ્ય શિક્ષાયાં ન તિષ્ઠતિ સ ઈશ્વરં ન ધારયતિ ખ્રીષ્ટસ્ય શિક્ષાયાં યસ્તિષ્ઠતિ સ પિતરં
પુત્રઞ્ચ ધારયતિ।
X યઃ કશ્ચિદ્ યુષ્મત્સન્નિધિમાગચ્છન્ શિક્ષામેનાં નાનયતિ સ યુષ્માભિઃ સ્વવેશ્મનિ ન ગૃહ્યતાં તવ મઙ્ગલં ભૂયાદિતિ વાગપિ તસ્મૈ
ન કથ્યતાં।
XI યતસ્તવ મઙ્ગલં ભૂયાદિતિ વાચં યઃ કશ્ચિત્ તસ્મૈ કથયતિ સ તસ્ય દુષ્કર્મ્મણામ્ અંશી ભવતિ।
XII યુષ્માન્ પ્રતિ મયા બહૂનિ લેખિતવ્યાનિ કિન્તુ પત્રમસીભ્યાં તત્ કર્ત્તું નેચ્છામિ, યતો ઽસ્માકમ્ આનન્દો યથા સમ્પૂર્ણો
ભવિષ્યતિ તથા યુષ્મત્સમીપમુપસ્થાયાહં સમ્મુખીભૂય યુષ્માભિઃ સમ્ભાષિષ્ય ઇતિ પ્રત્યાશા મમાસ્તે।
XIII તવાભિરુચિતાયા ભગિન્યા બાલકાસ્ત્વાં નમસ્કારં જ્ઞાપયન્તિ। આમેન્।

# ૩ યોહનઃ પત્રં

I પ્રાચીનો ઽહં સત્યમતાદ્ યસ્મિન્ પ્રીયે તં પ્રિયતમં ગાયં પ્રતિ પત્રં લિખામિ।
II હે પ્રિય, તવાત્મા યાદૃક् શુભાન્વિતસ્તાદૃક् સર્વ્વવિષયે તવ શુભં સ્વાસ્થ્યઞ્ચ ભૂયાત્।
III ભ્રાતૃભિરાગત્ય તવ સત્યમતસ્યાર્થતસ્ત્વં કીદૃક् સત્યમતમાચરસ્યેતસ્ય સાક્ષ્યે દત્તે મમ મહાનન્દો જાતઃ।
IV મમ સન્તાનાઃ સત્યમતમાચરન્તીતિવાર્ત્તાતો મમ ય આનન્દો જાયતે તતો મહત્તરો નાસ્તિ।
V હે પ્રિય, ભ્રાતૃન્ પ્રતિ વિશેષતસ્તાન્ વિદેશિનો ભૃાતૃન્ પ્રતિ ત્વયા યદ્યત્ કૃતં તત્ સર્વ્વં વિશ્વાસિનો યોગ્યં।
VI તે ચ સમિતેઃ સાક્ષાત્ તવ પ્રમ્નઃ પ્રમાણં દત્તવન્તઃ, અપરમ્ ઈશ્વરયોગ્યરૂપેણ તાન્ પ્રસ્થાપયતા ત્વયા સત્કર્મ્મ કારિષ્યતે।
VII યતસ્તે તસ્ય નામ્ના યાત્રાં વિધાય ભિન્નજાતીયેભ્યઃ કિમપિ ન ગૃહીતવન્તઃ।
VIII તસ્માદ્ વયં યત્ સત્યમતસ્ય સહાયા ભવેમ તદર્થમેતાદૃશા લોકા અસ્માભિરનુગ્રહીતવ્યાઃ।
IX સમિતિં પ્રત્યહં પત્રં લિખિતવાન્ કિન્તુ તેષાં મધ્યે યો દિયત્રિફિઃ પ્રધાનાયતે સો ઽસ્માન્ ન ગૃહ્લાતિ।
X અતો ઽહં યદોપસ્થાસ્યામિ તદા તેન યદ્યત્ ક્રિયતે તત્ સર્વ્વં તં સ્મારયિષ્યામિ, યતઃ સ દુર્વ્વાક્યૈરસ્માન્ અપવદતિ, તેનાપિ
તૃપ્તિં ન ગત્વા સ્વયમપિ ભ્રાતૃન્ નાનુગૃહ્લાતિ યે ચાનુગ્રહીતુમિચ્છન્તિ તાન્ સમિતિતો ઽપિ બહિષ્કરોતિ।
XI હે પ્રિય, ત્વયા દુષ્કર્મ્મ નાનુક્રિયતાં કિન્તુ સત્કર્મ્મૈવ। યઃ સત્કર્મ્માચારી સ ઈશ્વરાત્ જાતઃ, યો દુષ્કર્મ્માચારી સ ઈશ્વરં ન દૃષ્ટવાન્।
XII દીમીત્રિયસ્ય પક્ષે સર્વ્વૈઃ સાક્ષ્યમ્ અદાયિ વિશેષતઃ સત્યમતેનાપિ, વયમપિ તત્પક્ષે સાક્ષ્યં દદ્મઃ, અસ્માકઞ્ચ સાક્ષ્યં
સત્યમેવેતિ યૂયં જાનીથ।
XIII ત્વાં પ્રતિ મયા બહૂનિ લેખિતવ્યાનિ કિન્તુ મસીલેખનીભ્યાં લેખિતું નેચ્છામિ।
XIV અચિરેણ ત્વાં દ્રક્ષ્યામીતિ મમ પ્રત્યાશાસ્તે તદાવાં સમ્મુખીભૂય પરસ્પરં સમ્ભાષિષ્યાવહે।
XV તવ શાન્તિ ર્ભૂયાત્। અસ્માકં મિત્રાણિ ત્વાં નમસ્કારં જ્ઞાપયન્તિ ત્વમપ્યેકૈકસ્ય નામ પ્રોચ્ય મિત્રેભ્યો નમસ્કુરુ। ઇતિ।

# યિહૂદાઃ પત્રં

I યીશુખ્રીષ્ટસ્ય દાસો યાકૂબો ભ્રાતા યિહૂદાસ્તાતેનેશ્વરેણ પવિત્રીકૃતાન્ યીશુખ્રીષ્ટેન રક્ષિતાંશ્ચાહૂતાન્ લોકાન્ પ્રતિ પત્રં લિખતિ।
II કૃપા શાન્તિઃ પ્રેમ ચ બાહુલ્યરૂપેણ યુષ્માસ્વધિતિષ્ઠતુ།
III હે પ્રિયાઃ, સાધારણપરિત્રાણમધિ યુષ્માન્ પ્રતિ લેખિતું મમ બહુયત્ને જાતે પૂર્વ્વકાલે પવિત્રલોકેષુ સમર્પિતો યો ધર્મ્મસ્તદર્થં
યૂયં પ્રાણવ્યયેનાપિ સચેષ્ટા ભવતેતિ વિનયાર્થં યુષ્માન્ પ્રતિ પત્રલેખનમાવશ્યકમ્ અમન્યે।
IV યસ્માદ્ એતદ્રૂપદણ્ડપ્રાપ્તયે પૂર્વ્વં લિખિતાઃ કેચિજ્જના અસ્માન્ ઉપસૃપ્તવન્તઃ, તે ઽધાર્મ્મિકલોકા અસ્માકમ્ ઈશ્વરસ્યાનુગ્રહં
ધ્વજીકૃત્ય લમ્પટતામ્ આચરન્તિ, અદ્વિતીયો ઽધિપતિ ર્યો ઽસ્માકં પ્રભુ ર્યીશુખ્રીષ્ટસ્તં નાઙ્ગીકુર્વ્વન્તિ।
V તસ્માદ્ યૂયં પુરા યદ્ અવગતાસ્તત્ પુન ર્યુષ્માન્ સ્મારયિતુમ્ ઇચ્છામિ, ફલતઃ પ્રભુરેકકૃત્વઃ સ્વપ્રજા મિસરદેશાદ્ ઉદધાર યત્
તતઃ પરમ્ અવિશ્વાસિનો વ્યનાશયત્।
VI યે ચ સ્વર્ગદૂતાઃ સ્વીયકર્તૃત્વપદે ન સ્થિત્વા સ્વવાસસ્થાનં પરિત્યક્તવન્તસ્તાન્ સ મહાદિનસ્ય વિચારાર્થમ્ અન્ધકારમયે
ઽધઃસ્થાને સદાસ્થાયિભિ ર્બન્ધનૈરબધ્નાત્।
VII અપરં સિદોમમ્ અમોરા તન્નિકટસ્થનગરાણિ ચૈતેષાં નિવાસિનસ્તત્સમરૂપં વ્યભિચારં કૃતવન્તો વિષમમૈથુનસ્ય ચેષ્ટયા વિપથં
ગતવન્તશ્ચ તસ્માત્ તાન્યપિ દૃષ્ટાન્તસ્વરૂપાણિ ભૂત્વા સદાતનવહ્નિના દણ્ડં ભુઞ્જતે।
VIII તથૈવેમે સ્વપ્નાચારિણોઽપિ સ્વશરીરાણિ કલઙ્કયન્તિ રાજાધીનતાં ન સ્વીકુર્વ્વન્ત્યુચ્ચપદસ્થાન્ નિન્દન્તિ ચ।
IX કિન્તુ પ્રધાનદિવ્યદૂતો મીખાયેલો યદા મૂસસો દેહે શયતાનેન વિવદમાનઃ સમભાષત તદા તિસ્મન્ નિન્દારૂપં દણ્ડં સમર્પયિતું
સાહસં ન કૃત્વાકથયત્ પ્રભુસ્ત્વાં ભર્ત્સયતાં।
X કિન્ત્વિમે યન્ન બુધ્યન્તે તન્નિન્દન્તિ યચ્ચ નિર્બ્બોધપશવ ઇવેન્દ્રિયૈરવગચ્છન્તિ તેન નશ્યન્તિ।
XI તાન્ ધિક્, તે કાબિલો માર્ગે ચરન્તિ પારિતોષિકસ્યાશાતો બિલિયમો ભ્રાન્તિમનુધાવન્તિ કોરહસ્ય દુર્મુખત્વેન વિનશ્યન્તિ ચ।
XII યુષ્માકં પ્રેમભોજ્યેષુ તે વિઘ્નજનકા ભવન્તિ, આત્મમ્ભરયશ્ચ ભૂત્વા નિર્લજ્જયા યુષ્માભિઃ સાર્દ્ધં ભુઞ્જતે। તે
વાયુભિશ્ચાલિતા નિસ્તોયમેઘા હેમન્તકાલિકા નિષ્ફલા દ્વિ ર્મૃતા ઉન્મૂલિતા વૃક્ષાઃ,
XIII સ્વકીયલજ્જાફેણોદ્વમકાઃ પ્રચણ્ડાઃ સામુદ્રતરઙ્ગાઃ સદાકાલં યાવત્ ઘોરતિમિરભાગીનિ ભ્રમણકારીણિ નક્ષત્રાણિ ચ ભવન્તિ।
XIV આદમતઃ સપ્તમઃ પુરુષો યો હનોકઃ સ તાનુદ્દિશ્ય ભવિષ્યદ્વાક્યમિદં કથિતવાન્, યથા, પશ્ય સ્વકીયપુણ્યાનામ્ અયુતૈ
ર્વેષ્ટિતઃ પ્રભુઃ।
XV સર્વ્વાન્ પ્રતિ વિચારાજ્ઞાસાધનાયાગમિષ્યતિ। તદા ચાધાર્મ્મિકાઃ સર્વ્વે જાતા યૈરપરાધિનઃ। વિધર્મ્મકર્મ્મણાં તેષાં
સર્વ્વેષામેવ કારણાત્। તથા તદ્વૈપરીત્યેનાપ્યધર્મ્માચારિપાપિનાં। ઉક્તકઠોરવાક્યાનાં સર્વ્વેષામપિ કારણાત્। પરમેશેન દોષિત્વં તેષાં
પ્રકાશયિષ્યતે॥
XVI તે વાક્કલહકારિણઃ સ્વભાગ્યનિન્દકાઃ સ્વેચ્છાચારિણો દર્પવાદિમુખવિશિષ્ટા લાભાર્થં મનુષ્યસ્તાવકાશ્ચ સન્તિ।
XVII કિન્તુ હે પ્રિયતમાઃ, અસ્માકં પ્રભો ર્યીશુખ્રીષ્ટસ્ય પ્રેરિતૈ ર્યદ્ વાક્યં પૂર્વ્વં યુષ્મભ્યં કથિતં તત્ સ્મરત,
XVIII ફલતઃ શેષસમયે સ્વેચ્છાતો ઽધર્મ્માચારિણો નિન્દકા ઉપસ્થાસ્યન્તીતિ।
XIX એતે લોકાઃ સ્વાન્ પૃથક્ કુર્વ્વન્તઃ સાંસારિકા આત્મહીનાશ્ચ સન્તિ।
XX કિન્તુ હે પ્રિયતમાઃ, યૂયં સ્વેષામ્ અતિપવિત્રવિશ્વાસે નિચીયમાનાઃ પવિત્રેણાત્મના પ્રાર્થનાં કુર્વ્વન્ત
XXI ઈશ્વરસ્ય પ્રેમ્ના સ્વાન્ રક્ષત, અનન્તજીવનાય ચાસ્માકં પ્રભો ર્યીશુખ્રીષ્ટસ્ય કૃપાં પ્રતીક્ષધ્વં।
XXII અપરં યૂયં વિવિચ્ય કાંશ્ચિદ્ અનુકમ્પધ્વં
XXIII કાંશ્ચિદ્ અગ્નિત ઉદ્ધૃત્ય ભયં પ્રદર્શ્ય રક્ષત, શારીરિકભાવેન કલઙ્કિતં વસ્ત્રમપિ ઋતીયધ્વં।
XXIV અપરઞ્ચ યુષ્માન્ સ્ખલનાદ્ રક્ષિતુમ્ ઉલ્લાસેન સ્વીયતેજસઃ સાક્ષાત્ નિર્દોષાન્ સ્થાપયિતુઞ્ચ સમર્થો
XXV યો ઽસ્માકમ્ અદ્વિતીયસ્ત્રાણકર્ત્તા સર્વ્વજ્ઞ ઈશ્વરસ્તસ્ય ગૌરવં મહિમા પરાક્રમઃ કર્તૃત્વઞ્ચેદાનીમ્ અનન્તકાલં યાવદ્ ભૂયાત્।
આમેન્।

# પ્રકાશિતં ભવિષ્યદ્વાક્યં

I યત્ પ્રકાશિતં વાક્યમ્ ઈશ્વરઃ સ્વદાસાનાં નિકટં શીઘ્રમુપસ્થાસ્યન્તીનાં ઘટનાનાં દર્શનાર્થં યીશુખ્રીષ્ટે સમર્પિતવાન્ તત્ સ સ્વીયદૂતં પ્રેષ્ય નિજસેવકં યોહનં જ્ઞાપિતવાન્।

II સ ચેશ્વરસ્ય વાક્યે ખ્રીષ્ટસ્ય સાક્ષ્યે ચ યદ્યદ્ દૃષ્ટવાન્ તસ્ય પ્રમાણં દત્તવાન્।

III એતસ્ય ભવિષ્યદ્વક્તૃગ્રન્થસ્ય વાક્યાનાં પાઠકઃ શ્રોતારશ્ચ તન્મધ્યે લિખિતાજ્ઞાગ્રાહિણશ્ચ ધન્યા યતઃ સ કાલઃ સન્નિકટઃ।

IV યોહન્ આશિયાદેશસ્થાઃ સપ્ત સમિતીઃ પ્રતિ પત્રં લિખતિ। યો વર્ત્તમાનો ભૂતો ભવિષ્યંશ્ચ યે ચ સપ્તાત્માનસ્તસ્ય સિંહાસનસ્ય સમ્મુખે તિષ્ઠન્તિ

V યશ્ચ યીશુખ્રીષ્ટો વિશ્વસ્તઃ સાક્ષી મૃતાનાં મધ્યે પ્રથમજાતો ભૂમણ્ડલસ્થરાજાનામ્ અધિપતિશ્ચ ભવતિ, એતેભ્યો ઽનુગ્રહઃ શાન્તિશ્ચ યુષ્માસુ વર્ત્તતાં।

VI યો ઽસ્માસુ પ્રીતવાન્ સ્વરુધિરેણાસ્માન્ સ્વપાપેભ્યઃ પ્રક્ષાલિતવાન્ તસ્ય પિતુરીશ્વરસ્ય યાજકાન્ કૃત્વાસ્માન્ રાજવર્ગે નિયુક્તવાંશ્ચ તસ્મિન્ મહિમા પરાક્રમશ્ચાનન્તકાલં યાવદ્ વર્ત્તતાં। આમેન્।

VII પશ્યત સ મેઘૈરાગચ્છતિ તેનૈકૈકસ્ય ચક્ષુસ્તં દ્રક્ષ્યતિ યે ચ તં વિદ્ધવન્તસ્તે ઽપિ તં વિલોકિષ્યન્તે તસ્ય કૃતે પૃથિવીસ્થાઃ સર્વ્વે વંશા વિલપિષ્યન્તિ। સત્યમ્ આમેન્।

VIII વર્ત્તમાનો ભૂતો ભવિષ્યંશ્ચ યઃ સર્વ્વશક્તિમાન્ પ્રભુઃ પરમેશ્વરઃ સ ગદતિ, અહમેવ કઃ ક્ષશ્ચાર્થત આદિરન્તશ્ચ।

IX યુષ્માકં ભ્રાતા યીશુખ્રીષ્ટસ્ય ક્લેશરાજ્યતિતિક્ષાણાં સહભાગી ચાહં યોહન્ ઈશ્વરસ્ય વાક્યહેતો ર્યીશુખ્રીષ્ટસ્ય સાક્ષ્યહેતોશ્ચ પાત્મનામક ઉપદ્વીપ આસં।

X તત્ર પ્રભો ર્દિને આત્મનાવિષ્ટો ઽહં સ્વપશ્ચાત્ તૂરીધ્વનિવત્ મહારવમ્ અશ્રૌષં,

XI તેનોક્તમ્, અહં કઃ ક્ષશ્ચાર્થત આદિરન્તશ્ચ। ત્વં યદ્ દ્રક્ષ્યસિ તદ્ ગ્રન્થે લિખિત્વાશિયાદેશસ્થાનાં સપ્ત સમિતીનાં સમીપમ્ ઇફિષં સ્મુર્ણાં થુયાતીરાં સાર્દ્દિં ફિલાદિલ્ફિયાં લાયદીકેયાઞ્ચ પ્રેષય।

XII તતો મયા સમ્ભાષમાણસ્ય કસ્ય રવઃ શ્રૂયતે તદ્દર્શનાર્થં મુખં પરાવર્ત્તિતં તત્ પરાવર્ત્ય સ્વર્ણમયાઃ સપ્ત દીપવૃક્ષા દૃષ્ટાઃ।

XIII તેષાં સપ્ત દીપવૃક્ષાણાં મધ્યે દીર્ઘપરિચ્છદપરિહિતઃ સુવર્ણશૃઙ્ખલેન વેષ્ટિતવક્ષશ્ચ મનુષ્યપુત્રાકૃતિરેકો જનસ્તિષ્ઠતિ,

XIV તસ્ય શિરઃ કેશશ્ચ શ્વેતમેષલોમાનીવ હિમવત્ શ્વેતૌ લોચને વહ્નિશિખાસમે

XV ચરણૌ વહ્નિકુણ્ડેતાપિતસુપિત્તલસદૃશૌ રવશ્ચ બહુતોયાનાં રવતુલ્યઃ।

XVI તસ્ય દક્ષિણહસ્તે સપ્ત તારા વિદ્યન્તે વક્ત્રાચ્ચ તીક્ષ્ણો દ્વિધારઃ ખઙ્ગો નિર્ગચ્છતિ મુખમણ્ડલઞ્ચ સ્વતેજસા દેદીપ્યમાનસ્ય સૂર્ય્યસ્ય સદૃશં।

XVII તં દૃષ્ટ્વાહં મૃતકલ્પસ્તચ્ચરણે પતિતસ્તતઃ સ્વદક્ષિણકરં મયિ નિધાય તેનોક્તમ્ મા ભૈષીઃ; અહમ્ આદિરન્તશ્ચ।

XVIII અહમ્ અમરસ્તથાપિ મૃતવાન્ કિન્તુ પશ્યાહમ્ અનન્તકાલં યાવત્ જીવામિ। આમેન્। મૃત્યોઃ પરલોકસ્ય ચ કુઞ્જિકા મમ હસ્તગતાઃ।

XIX અતો યદ્ ભવતિ યચ્ચેતઃ પરં ભવિષ્યતિ ત્વયા દૃષ્ટં તત્ સર્વ્વં લિખ્યતાં।

XX મમ દક્ષિણહસ્તે સ્થિતા યાઃ સપ્ત તારા યે ચ સ્વર્ણમયાઃ સપ્ત દીપવૃક્ષાસ્ત્વયા દૃષ્ટાસ્તત્તાત્પર્ય્યમિદં તાઃ સપ્ત તારાઃ સપ્ત સમિતીનાં દૂતાઃ સુવર્ણમયાઃ સપ્ત દીપવૃક્ષાશ્ચ સપ્ત સમિતયઃ સન્તિ।

# II

I ઇફિષસ્થસમિતે ર્દૂતં પ્રતિ ત્વમ્ ઇદં લિખ; યો દક્ષિણકરેણ સપ્ત તારા ધારયતિ સપ્તાનાં સુવર્ણદીપવૃક્ષાણાં મધ્યે ગમનાગમને કરોતિ ચ તેનેદમ્ ઉચ્યતે।

II તવ ક્રિયાઃ શ્રમઃ સહિષ્ણુતા ચ મમ ગોચરાઃ, ત્વં દુષ્ટાન્ સોઢું ન શક્નોષિ યે ચ પ્રેરિતા ન સન્તઃ સ્વાન્ પ્રેરિતાન્ વદન્તિ ત્વં તાન્ પરીક્ષ્ય મૃષાભાષિણો વિજ્ઞાતવાન્,

III અપરં ત્વં તિતિક્ષાં વિદધાસિ મમ નામાર્થં બહુ સોઢવાનસિ તથાપિ ન પર્ય્યક્લામ્યસ્તદપિ જાનામિ।

IV કિઞ્ચ તવ વિરુદ્ધં મયૈતત્ વક્તવ્યં યત્ તવ પ્રથમં પ્રેમ ત્વયા વ્યહીયત।

V અતઃ કુતઃ પતિતો ઽસિ તત્ સ્મૃત્વા મનઃ પરાવર્ત્ય પૂર્વ્વીયક્રિયાઃ કુરુ ન ચેત્ ત્વયા મનસિ ન પરિવર્ત્તિતે ઽહં તૂર્ણમ્ આગત્ય તવ દીપવૃક્ષં સ્વસ્થાનાદ્ અપસારયિષ્યામિ।

VI તથાપિ તવેષ ગુણો વિદ્યતે યત્ નીકલાયતીયલોકાનાં યાઃ ક્રિયા અહમ્ ઋતીયે તાસ્ત્વમપિ ઋતીયમે।

VII યસ્ય શ્રોત્રં વિદ્યતે સ સમિતીઃ પ્રત્યુચ્યમાનામ્ આત્મનઃ કથાં શૃણોતુ। યો જનો જયતિ તસ્મા અહમ્ ઈશ્વરસ્યારામસ્થજીવનતરોઃ ફલં ભોક્તું દાસ્યામિ।

VIII અપરં સ્મુર્ણાસ્થસમિતે ર્દૂતં પ્રતીદં લિખ; ય આદિરન્તશ્ચ યો મૃતવાન્ પુનર્જીવિતવાંશ્ચ તેનેદમ્ ઉચ્યતે,

IX તવ ક્રિયાઃ ક્લેશો દૈન્યઞ્ચ મમ ગોચરાઃ કિન્તુ ત્વં ધનવાનસિ યે ચ યિહૂદીયા ન સન્તઃ શયતાનસ્ય સમાજાઃ સન્તિ તથાપિ સ્વાન્ યિહૂદીયાન્ વદન્તિ તેષાં નિન્દામપ્યહં જાનામિ।

X ત્વયા યો યઃ ક્લેશઃ સોઢવ્યસ્તસ્માત્ મા ભૈષીઃ પશ્ય શયતાનો યુષ્માકં પરીક્ષાર્થં કાંશ્ચિત્ કારાયાં નિક્ષેપ્સ્યતિ દશ દિનાનિ યાવત્ ક્લેશો યુષ્માસુ વર્ત્તિષ્યતે ચ। ત્વં મૃત્યુપર્ય્યન્તં વિશ્વાસ્યો ભવ તેનાહં જીવનકિરીટં તુભ્યં દાસ્યામિ।

XI યસ્ય શ્રોત્રં વિદ્યતે સ સમિતીઃ પ્રત્યુચ્યમાનામ્ આત્મનઃ કથાં શૃણોતુ। યો જયતિ સ દ્વિતીયમૃત્યુના ન હિંસિષ્યતે।

XII અપરં પર્ગામસ્થસમિતે ર્દૂતં પ્રતીદં લિખ, યસ્તીક્ષ્ણં દ્વિધારં ખઙ્ગં ધારયતિ સ એવ ભાષતે।

XIII તવ ક્રિયા મમ ગોચરાઃ, યત્ર શયતાનસ્ય સિંહાસનં તત્રૈવ ત્વં વસસિ તદપિ જાનામિ। ત્વં મમ નામ ધારયસિ મદ્ભક્તેરસ્વીકારસ્ત્વયા ન કૃતો મમ વિશ્વાસ્યસાક્ષિણ આન્તિપાઃ સમયે ઽપિ ન કૃતઃ। સ તુ યુષ્મન્મધ્યે ઽઘાનિ યતઃ શયતાનસ્તત્રૈવ નિવસતિ।

XIV તથાપિ તવ વિરુદ્ધં મમ કિઞ્ચિદ્ વક્તવ્યં યતો દેવપ્રસાદાદનાય પરદારગમનાય ચેસ્રાયેલઃ સન્તાનાનાં સમ્મુખ ઉન્માથં સ્થાપયિતું બાલાક્ યેનાશિક્ષ્યત તસ્ય બિલિયમઃ શિક્ષાવલમ્બિનસ્તવ કેચિત્ જનાસ્તત્ર સન્તિ।

XV તથા નીકલાયતીયાનાં શિક્ષાવલમ્બિનસ્તવ કેચિત્ જના અપિ સન્તિ તદેવાહમ્ ઋતીયે।

XVI અતો હેતોસ્ત્વં મનઃ પરિવર્ત્તય ન ચેદહં ત્વરયા તવ સમીપમુપસ્થાય મદ્વક્તસ્થખઙ્ગેન તૈઃ સહ યોત્સ્યામિ।

XVII યસ્ય શ્રોત્રં વિદ્યતે સ સમિતીઃ પ્રત્યુચ્યમાનામ્ આત્મનઃ કથાં શૃણોતુ। યો જનો જયતિ તસ્મા અહં ગુપ્તમાન્નાં ભોક્તું દાસ્યામિ શુભ્રપ્રસ્તરમપિ તસ્મૈ દાસ્યામિ તત્ર પ્રસ્તરે નૂતનં નામ લિખિતં તચ્ચ ગ્રહીતારં વિના નાન્યેન કેનાપ્યવગમ્યતે।

XVIII અપરં થુયાતીરાસ્થસમિતે ર્દૂતં પ્રતીદં લિખ યસ્ય લોચને વહ્નિશિખાસદૃશે ચરણૌ ચ સુપિત્તલસઙ્કાશૌ સ ઈશ્વરપુત્રો ભાષતે,

XIX તવ ક્રિયાઃ પ્રેમ વિશ્વાસઃ પરિચર્ય્યા સહિષ્ણુતા ચ મમ ગોચરાઃ, તવ પ્રથમક્રિયાભ્યઃ શેષક્રિયાઃ શ્રેષ્ઠાસ્તદપિ જાનામિ।

XX તથાપિ તવ વિરુદ્ધં મયા કિઞ્ચિદ્ વક્તવ્યં યતો યા ઈષેબલ્નામિકા યોષિત્ સ્વાં ભવિષ્યદ્વાદિનીં મન્યતે વેશ્યાગમનાય દેવપ્રસાદાશનાય ચ મમ દાસાન્ શિક્ષયતિ ભ્રામયતિ ચ સા ત્વયા ન નિવાર્ય્યતે।

XXI અહં મનઃપરિવર્ત્તનાય તસ્યૈ સમયં દત્તવાન્ કિન્તુ સા સ્વીયવેશ્યાક્રિયાતો મનઃપરિવર્ત્તયિતું નાભિલષતિ।

XXII પશ્યાહં તાં શય્યાયાં નિક્ષેપ્સ્યામિ, યે તયા સાર્દ્ધં વ્યભિચારં કુર્વ્વન્તિ તે યદિ સ્વક્રિયાભ્યો મનાંસિ ન પરાવર્ત્તયન્તિ તર્હિ તાનપિ મહાક્લેશે નિક્ષેપ્સ્યામિ

XXIII તસ્યાઃ સન્તાનાંશ્ચ મૃત્યુના હનિષ્યામિ। તેનાહમ્ અન્તઃકરણાનાં મનસાઞ્ચાનુસન્ધાનકારી યુષ્માકમેકૈકસ્મૈ ચ સ્વક્રિયાણાં ફલં મયા દાતવ્યમિતિ સર્વ્વાઃ સમિતયો જ્ઞાસ્યન્તિ।

XXIV અપરમ્ અવશિષ્ટાન્ થુયાતીરસ્થલોકાન્ અર્થતો યાવન્તસ્તાં શિક્ષાં ન ધારયન્તિ યે ચ કૈશ્ચિત્ શયતાનસ્ય ગમ્ભીરાર્થા ઉચ્યન્તે તાન્ યે નાવગતવન્તસ્તાનહં વદામિ યુષ્માસુ કમપ્યપરં ભારં નારોપયિષ્યામિ;

XXV કિન્તુ યદ્ યુષ્માકં વિદ્યતે તત્ મમાગમનં યાવદ્ ધારયત।

XXVI યો જનો જયતિ શેષપર્ય્યન્તં મમ ક્રિયાઃ પાલયતિ ચ તસ્મા અહમ્ અન્યજાતીયાનામ્ આધિપત્યં દાસ્યામિ;

XXVII પિતૃતો મયા યદ્વત્ કર્તૃત્વં લબ્ધં તદ્વત્ સો ઽપિ લૌહદણ્ડેન તાન્ ચારયિષ્યતિ તેન મૃદ્ભાજનાનીવ તે ચૂર્ણા ભવિષ્યન્તિ।

XXVIII અપરમ્ અહં તસ્મૈ પ્રભાતીયતારામ્ અપિ દાસ્યામિ।

XXIX યસ્ય શ્રોત્રં વિદ્યતે સ સમિતીઃ પ્રત્યુચ્યમાનામ્ આત્મનઃ કથાં શૃણોતુ।

# III

I અપરં સાર્દ્દિસ્થસમિતે ર્દૂતં પ્રતીદં લિખ, યો જન ઈશ્વરસ્ય સપ્તાત્મનઃ સપ્ત તારાશ્ચ ધારયતિ સ એવ ભાષતે, તવ ક્રિયા મમ ગોચરાઃ, ત્વં જીવદાખ્યો ઽસિ તથાપિ મૃતો ઽસિ તદપિ જાનામિ।

II પ્રબુદ્ધો ભવ, અવશિષ્ટં યદ્યત્ મૃતકલ્પં તદપિ સબલીકુરુ યત ઈશ્વરસ્ય સાક્ષાત્ તવ કર્મ્માણિ ન સિદ્ધાનીતિ પ્રમાણં મયા પ્રાપ્તં।

III અતઃ કીદૃશીં શિક્ષાં લબ્ધવાન્ શ્રુતવાશ્ચાસિ તત્ સ્મરન્ તાં પાલય સ્વમનઃ પરિવર્ત્તય ચ। ચેત્ પ્રબુદ્ધો ન ભવેસ્તર્હ્યહં સ્તેન ઇવ તવ સમીપમ્ ઉપસ્થાસ્યામિ કિઞ્ચ કસ્મિન્ દણ્ડે ઉપસ્થાસ્યામિ તન્ન જ્ઞાસ્યસિ।

IV તથાપિ યૈઃ સ્વવાસાંસિ ન કલઙ્કિતાનિ તાદૃશાઃ કતિપયલોકાઃ સાર્દ્દિનગરે ઽપિ તવ વિદ્યન્તે તે શુભ્રપરિચ્છદૈ ર્મમ સઙ્ગે ગમનાગમને કરિષ્યન્તિ યતસ્તે યોગ્યાઃ।

V યો જનો જયતિ સ શુભ્રપરિચ્છદં પરિધાપયિષ્યન્તે, અહઞ્ચ જીવનગ્રન્થાત્ તસ્ય નામ નાન્તર્ધાપયિષ્યામિ કિન્તુ મત્પિતુઃ સાક્ષાત્ તસ્ય દૂતાનાં સાક્ષાચ્ચ તસ્ય નામ સ્વીકરિષ્યામિ।

VI યસ્ય શ્રોત્રં વિદ્યતે સ સમિતીઃ પ્રત્યુચ્યમાનામ્ આત્મનઃ કથાં શૃણોતુ।

VII અપરઞ્ચ ફિલાદિલ્ફિયાસ્થસમિતે ર્દૂતં પ્રતીદં લિખ, યઃ પવિત્રઃ સત્યમયશ્ચાસ્તિ દાયૂદઃ કુઞ્જિકાં ધારયતિ ચ યેન મોચિતે ઽપરઃ કોઽપિ ન રુણદ્ધિ રુદ્ધે ચાપરઃ કોઽપિ ન મોચયતિ સ એવ ભાષતે।

VIII તવ ક્રિયા મમ ગોચરાઃ પશ્ય તવ સમીપે ઽહં મુક્તં દ્વારં સ્થાપિતવાન્ તત્ કેનાપિ રોદ્ધું ન શક્યતે યતસ્તવાલ્પં બલમાસ્તે તથાપિ ત્વં મમ વાક્યં પાલિતવાન્ મમ નામ્નો ઽસ્વીકારં ન કૃતવાંશ્ચ।

IX પશ્ય યિહૂદીયા ન સન્તો યે મૃષાવાદિનઃ સ્વાન્ યિહૂદીયાન્ વદન્તિ તેષાં શયતાનસમાજીયાનાં કાંશ્ચિદ્ અહમ્ આનેષ્યામિ પશ્ય તે મદાજ્ઞાત આગત્ય તવ ચરણયોઃ પ્રણંસ્યન્તિ ત્વઞ્ચ મમ પ્રિયો ઽસીતિ જ્ઞાસ્યન્તિ।

X ત્વં મમ સહિષ્ણુતાસૂચકં વાક્યં રક્ષિતવાનસિ તત્કારણાત્ પૃથિવીનિવાસિનાં પરીક્ષાર્થં કૃત્સ્નં જગદ્ યેનાગામિપરીક્ષાદિનેનાક્રમિષ્યતે તસ્માદ્ અહમપિ ત્વાં રક્ષિષ્યામિ।

XI પશ્ય મયા શીઘ્રમ્ આગન્તવ્યં તવ યદસ્તિ તત્ ધારય કો ઽપિ તવ કિરીટં નાપહરતુ।

XII યો જનો જયતિ તમહં મદીયેશ્વરસ્ય મન્દિરે સ્તમ્ભં કૃત્વા સ્થાપયિસ્યામિ સ પુન ર્ન નિર્ગમિષ્યતિ। અપરઞ્ચ તસ્મિન્ મદીયેશ્વરસ્ય નામ મદીયેશ્વરસ્ય પુર્ય્યા અપિ નામ અર્થતો યા નવીના યિરૂશાનમ્ પુરી સ્વર્ગાત્ મદીયેશ્વરસ્ય સમીપાદ્ અવરોક્ષ્યતિ તસ્યા નામ મમાપિ નૂતનં નામ લેખિષ્યામિ।

XIII યસ્ય શ્રોત્રં વિદ્યતે સ સમિતીઃ પ્રત્યુચ્યમાનામ્ આત્મનઃ કથાં શૃણોતુ।

XIV અપરઞ્ચ લાયદિકેયાસ્થસમિતે ર્દૂતં પ્રતીદં લિખ, ય આમેન્ અર્થતો વિશ્વાસ્યઃ સત્યમયશ્ચ સાક્ષી, ઈશ્વરસ્ય સૃષ્ટેરાદિશ્ચાસ્તિ સ એવ ભાષતે।

XV તવ ક્રિયા મમ ગોચરાઃ ત્વં શીતો નાસિ તપ્તો ઽપિ નાસીતિ જાનામિ।

XVI તવ શીતત્વં તપ્તત્વં વા વરં ભવેત્, શીતો ન ભૂત્વા તપ્તો ઽપિ ન ભૂત્વા ત્વમેવમ્ભૂતઃ કદૂષ્ણો ઽસિ તત્કારણાદ્ અહં સ્વમુખાત્ ત્વામ્ ઉદ્વમિષ્યામિ।

XVII અહં ધની સમૃદ્ધશ્ચાસ્મિ મમ કસ્યાપ્યભાવો ન ભવતીતિ ત્વં વદસિ કિન્તુ ત્વમેવ દુઃખાર્ત્તો દુર્ગતો દરિદ્રો ઽન્ધો નગ્નશ્ચાસિ તત્ ત્વયા નાવગમ્યતે།

XVIII ત્વં યદ્ ધની ભવેસ્તદર્થં મત્તો વહ્નૌ તાપિતં સુવર્ણં ક્રીણીહિ નગ્નત્વાત્ તવ લજ્જા યન્ન પ્રકાશેત તદર્થં પરિધાનાય મત્તઃ શુભ્રવાસાંસિ ક્રીણીહિ યચ્ચ તવ દૃષ્ટિઃ પ્રસન્ના ભવેત્ તદર્થં ચક્ષુર્લેપનાયાઞ્જનં મત્તઃ ક્રીણીહીતિ મમ મન્ત્રણા།

XIX યેષ્વહં પ્રીયે તાન્ સર્વ્વાન્ ભર્ત્સયામિ શાસ્મિ ચ, અતસ્ત્વમ્ ઉદ્યમં વિધાય મનઃ પરિવર્ત્તય།

XX પશ્યાહં દ્વારિ તિષ્ઠન્ તદ્ આહન્મિ યદિ કશ્ચિત્ મમ રવં શ્રુત્વા દ્વારં મોચયતિ તર્હ્યહં તસ્ય સન્નિધિં પ્રવિશ્ય તેન સાર્દ્ધં ભોક્ષ્યે સો ઽપિ મયા સાર્દ્ધં ભોક્ષ્યતે།

XXI અપરમહં યથા જિતવાન્ મમ પિત્રા ચ સહ તસ્ય સિંહાસન ઉપવિષ્ટશ્ચાસ્મિ, તથા યો જનો જયતિ તમહં મયા સાર્દ્ધં મત્સિંહાસન ઉપવેશયિષ્યામિ།

XXII યસ્ય શ્રોત્રં વિદ્યતે સ સમિતીઃ પ્રત્યુચ્યમાનમ્ આત્મનઃ કથાં શૃણોતુ།

# IV

I તતઃ પરં મયા દૃષ્ટિપાતં કૃત્વા સ્વર્ગે મુક્તં દ્વારમ્ એકં દૃષ્ટં મયા સહભાષમાણસ્ય ચ યસ્ય તૂરીવાદ્યતુલ્યો રવઃ પૂર્વ્વં શ્રુતઃ સ મામ્ અવોચત્ સ્થાનમેતદ્ આરોહય, ઇતઃ પરં યેન યેન ભવિતવ્યં તદહં ત્વાં દર્શયિષ્યે།

II તેનાહં તત્ક્ષણાદ્ આત્માવિષ્ટો ભૂત્વા ઽપશ્યં સ્વર્ગે સિંહાસનમેકં સ્થાપિતં તત્ર સિંહાસને એકો જન ઉપવિષ્ટો ઽસ્તિ།

III સિંહાસને ઉપવિષ્ટસ્ય તસ્ય જનસ્ય રૂપં સૂર્ય્યકાન્તમણેઃ પ્રવાલસ્ય ચ તુલ્યં તત્ સિંહાસનઞ્ચ મરકતમણિવદ્રૂપવિશિષ્ટેન મેઘધનુષા વેષ્ટિતં།

IV તસ્ય સિંહાસને ચતુર્દિક્ષુ ચતુર્વિંશતિસિંહાસનાનિ તિષ્ઠન્તિ તેષુ સિંહાસનેષુ ચતુર્વિંશતિ પ્રાચીનલોકા ઉપવિષ્ટાસ્તે શુભ્રવાસઃપરિહિતાસ્તેષાં શિરાંસિ ચ સુવર્ણકિરીટૈ ર્ભૂષિતાનિ།

V તસ્ય સિંહાસનસ્ય મધ્યાત્ તડિતો રવાઃ સ્તનિતાનિ ચ નિર્ગચ્છન્તિ સિંહાસનસ્યાન્તિકે ચ સપ્ત દીપા જ્વલન્તિ ત ઈશ્વરસ્ય સપ્તાત્માનઃ।

VI અપરં સિંહાસનસ્યાન્તિકે સ્ફટિકતુલ્યઃ કાચમયો જલાશયો વિદ્યતે, અપરમ્ અગ્રતઃ પશ્ચાચ્ચ બહુચક્ષુષ્મન્તશ્ચત્વારઃ પ્રાણિનઃ સિંહસનસ્ય મધ્યે ચતુર્દિક્ષુ ચ વિદ્યન્તે།

VII તેષાં પ્રથમઃ પ્રાણી સિંહાકારો દ્વિતીયઃ પ્રાણી ગોવાત્સાકારસ્તૃતીયઃ પ્રાણી મનુષ્યવદ્વદનવિશિષ્ટશ્ચતુર્થશ્ચ પ્રાણી ઉડ્ડીયમાનકુરરોપમઃ।

VIII તેષાં ચતુર્ણામ્ એકૈકસ્ય પ્રાણિનઃ ષટ્ પક્ષાઃ સન્તિ તે ચ સર્વ્વાઙ્ગેષ્વભ્યન્તરે ચ બહુચક્ષુર્વિશિષ્ટાઃ, તે દિવાનિશં ન વિશ્રામ્ય ગદન્તિ પવિત્રઃ પવિત્રઃ પવિત્રઃ સર્વ્વશક્તિમાન્ વર્ત્તમાનો ભૂતો ભવિષ્યંશ્ચ પ્રભુઃ પરમેશ્વરઃ।

IX ઇત્થં તૈઃ પ્રાણિભિસ્તસ્યાનન્તજીવિનઃ સિંહાસનોપવિષ્ટસ્ય જનસ્ય પ્રભાવે ગૌરવે ધન્યવાદે ચ પ્રકીર્ત્તિતે

X તે ચતુર્વિંશતિપ્રાચીના અપિ તસ્ય સિંહાસનોપવિષ્ટસ્યાન્તિકે પ્રણિનત્ય તમ્ અનન્તજીવિનં પ્રણમન્તિ સ્વીયકિરીટાંશ્ચ સિંહાસનસ્યાન્તિકે નિક્ષિપ્ય વદન્તિ,

XI હે પ્રભો ઈશ્વરાસ્માકં પ્રભાવં ગૌરવં બલં། ત્વમેવાર્હસિ સમ્પ્રાપ્તું યત્ સર્વ્વં સસૃજે ત્વયા། તવાભિલાષતશ્ચૈવ સર્વ્વં સમ્ભૂય નિર્મ્મમે།།

# V

I અનન્તરં તસ્ય સિહાસનોપવિષ્ટજનસ્ય દક્ષિણસ્તે ઽન્ત ર્બહિશ્ચ લિખિતં પત્રમેકં મયા દૃષ્ટં તત્ સપ્તમુદ્રાભિરઙ્કિતં།

II તત્પશ્ચાદ્ એકો બલવાન્ દૂતો દૃષ્ટઃ સ ઉચ્ચૈઃ સ્વરેણ વાચમિમાં ઘોષયતિ કઃ પત્રમેતદ્ વિવરીતું તમ્મુદ્રા મોચયિતુઞ્ચાર્હતિ?

III કિન્તુ સ્વર્ગમર્ત્ત્યપાતાલેષુ તત્ પત્રં વિવરીતું નિરીક્ષિતુઞ્ચ કસ્યાપિ સામર્થ્યં નાભવત્།

IV અતો યસ્તત્ પત્રં વિવરીતું નિરીક્ષિતુઞ્ચાર્હતિ તાદૃશજનસ્યાભાવાદ્ અહં બહુ રોદિતવાન્།

V કિન્તુ તેષાં પ્રાચીનાનામ્ એકો જનો મામવદત્ મા રોદીઃ પશ્ય યો યિહૂદાવંશીયઃ સિંહો દાયૂદો મૂલસ્વરૂપશ્ચાસ્તિ સ પત્રસ્ય તસ્ય સપ્તમુદ્રાણાઞ્ચ મોચનાય પ્રમૂતવાન્།

VI અપરં સિંહાસનસ્ય ચતુર્ણાં પ્રાણિનાં પ્રાચીનવર્ગસ્ય ચ મધ્ય એકો મેષશાવકો મયા દૃષ્ટઃ સ છેદિત ઇવ તસ્ય સપ્તશૃઙ્ગાણિ સપ્તલોચનાનિ ચ સન્તિ તાનિ કૃત્સ્નાં પૃથિવીં પ્રેષિતા ઈશ્વરસ્ય સપ્તાત્માનઃ।

VII સ ઉપાગત્ય તસ્ય સિંહાસનોપવિષ્ટજનસ્ય દક્ષિણકરાત્ તત્ પત્રં ગૃહીતવાન્།

VIII પત્રે ગૃહીતે ચત્વારઃ પ્રાણિનશ્ચતુર્વિંશતિપ્રાચીનાશ્ચ તસ્ય મેષશાવકસ્યાન્તિકે પ્રણિપતન્તિ તેષામ્ એકૈકસ્ય કરયો ર્વીણાં સુગન્ધિદ્રવ્યૈઃ પરિપૂર્ણં સ્વર્ણમયપાત્રઞ્ચ તિષ્ઠતિ તાનિ પવિત્રલોકાનાં પ્રાર્થનાસ્વરૂપાણિ།

IX અપરં તે નૂતનમેકં ગીતમગાયન્, યથા, ગ્રહીતું પત્રિકાં તસ્ય મુદ્રા મોચયિતું તથા། ત્વમેવાર્હસિ યસ્માત્ ત્વં બલિવત્ છેદનં ગતઃ। સર્વ્વાભ્યો જાતિભાષાભ્યઃ સર્વ્વસ્માદ્ વંશદેશતઃ। ઈશ્વરસ્ય કૃતે ઽસ્માન્ ત્વં સ્વીયરક્તેન ક્રીતવાન્།

X અસ્મદીશ્વરપક્ષે ઽસ્માન્ નૃપતીન્ યાજકાનપિ། કૃતવાંસ્તેન રાજત્વં કરિષ્યામો મહીતલે།།

XI અપરં નિરીક્ષમાણેન મયા સિંહાસનસ્ય પ્રાણિચતુષ્ટયસ્ય પ્રાચીનવર્ગસ્ય ચ પરિતો બહૂનાં દૂતાનાં રવઃ શ્રુતઃ, તેષાં સંખ્યા અયુતાયુતાનિ સહસ્રસહસ્રાણિ ચ།

XII તૈરુચ્ચૈરિદમ્ ઉક્તં, પરાક્રમં ધનં જ્ઞાનં શક્તિં ગૌરવમાદરં། પ્રશંસાઞ્ચાર્હતિ પ્રાપ્તું છેદિતો મેષશાવકઃ།།

XIII અપરં સ્વર્ગમર્ત્ત્યપાતાલસાગરેષુ યાનિ વિદ્યન્તે તેષાં સર્વ્વેષાં સૃષ્ટવસ્તૂનાં વાગિયં મયા શ્રુતા, પ્રશંસાં ગૌરવં શૌર્ય્યમ્ આધિપત્યં સનાતનં། સિંહસનોપવિષ્ટશ્ચ મેષવત્સશ્ચ ગચ્છતાં།

XIV અપરં તે ચત્વારઃ પ્રાણિનઃ કથિતવન્તસ્તથાસ્તુ, તતશ્ચતુર્વિંશતિપ્રાચીના અપિ પ્રણિપત્ય તમ્ અનન્તકાલજીવિનં પ્રાણમન્།

# VI

I અનન્તરં મયિ નિરીક્ષમાણે મેષશાવકેન તાસાં સપ્તમુદ્રાણામ્ એકા મુદ્રા મુક્તા તતસ્તેષાં ચતુર્ણામ્ એકસ્ય પ્રાણિન આગત્ય પશ્યેતિવાચકો મેઘગર્જનતુલ્યો રવો મયા શ્રુતઃ।
II તતઃ પરમ્ એકઃ શુક્લાશ્વો દૃષ્ટઃ, તદારૂઢો જનો ધનુ ર્ધારયતિ તસ્મૈ ચ કિરીટમેકમ્ અદાયિ તતઃ સ પ્રભવન્ પ્રભવિષ્યંશ્ચ નિર્ગતવાન્|
III અપરં દ્વિતીયમુદ્રાયાં તેન મોચિતાયાં દ્વિતીયસ્ય પ્રાણિન આગત્ય પશ્યેતિ વાક્ મયા શ્રુતા।
IV તતો ઽરુણવર્ણો ઽપર એકો ઽશ્વો નિર્ગતવાન્ તદારોહિણિ પૃથિવીતઃ શાન્ત્યપહરણસ્ય લોકાનાં મધ્યે પરસ્પરં પ્રતિઘાતોત્પાદનસ્ય ચ સામર્થ્યં સમર્પિતમ્, એકો બૃહત્ખઙ્ગો ઽપિ તસ્મા અદાયિ।
V અપરં તૃતીયમુદ્રાયાં તન મોચિતાયાં તૃતીયસ્ય પ્રાણિન આગત્ય પશ્યેતિ વાક્ મયા શ્રુતા, તતઃ કાલવર્ણ એકો ઽશ્વો મયા દૃષ્ટઃ, તદારોહિણો હસ્તે તુલા તિષ્ઠતિ
VI અનન્તરં પ્રાણિચતુષ્ટયસ્ય મધ્યાદ્ વાગિયં શ્રુતા ગોધૂમાનામેકઃ સેટકો મુદ્રાપાદૈકમૂલ્યઃ, યવાનાઞ્ચ સેટકત્રયં મુદ્રાપાદૈકમૂલ્યં તૈલદ્રાક્ષારસાશ્ચ ત્વયા મા હિંસિતવ્યાઃ।
VII અનન્તરં ચતુર્થમુદ્રાયાં તેન મોચિતાયાં ચતુર્થસ્ય પ્રાણિન આગત્ય પશ્યેતિ વાક્ મયા શ્રુતા।
VIII તતઃ પાણ્ડુરવર્ણ એકો ઽશ્વો મયા દૃષ્ટઃ, તદારોહિણો નામ મૃત્યુરિતિ પરલોકશ્ચ તમ્ અનુચરતિ ખઙ્ગેન દુર્ભિક્ષેણ મહામાર્ય્યા વન્યપશુભિશ્ચ લોકાનાં બધાય પૃથિવ્યાશ્ચતુર્થાંશસ્યાધિપત્યં તસ્મા અદાયિ।
IX અનન્તરં પઞ્ચમમુદ્રાયાં તેન મોચિતાયામ્ ઈશ્વરવાક્યહેતોસ્તત્ર સાક્ષ્યદાનાચ્ચ છેદિતાનાં લોકાનાં દેહિનો વેદ્યા અધો મયાદૃશ્યન્ત।
X ત ઉચ્ચૈરિદં ગદન્તિ, હે પવિત્ર સત્યમય પ્રભો અસ્માકં રક્તપાતે પૃથિવીનિવાસિભિ ર્વિવદિતું તસ્ય ફલ દાતુઞ્ચ કતિ કાલં વિલમ્બસે?
XI તતસ્તેષામ્ એકૈકસ્મૈ શુભ્રઃ પરિચ્છદો ઽદાયિ વાગિયઞ્ચાકથ્યત યૂયમલ્પકાલમ્ અર્થતો યુષ્માકં યે સહાદાસા ભ્રાતરો યૂયમિવ ઘાનિષ્યન્તે તેષાં સંખ્યા યાવત્ સમ્પૂર્ણતાં ન ગચ્છતિ તાવદ્ વિરમત।
XII અનન્તરં યદા સ ષષ્ઠમુદ્રામમોચયત્ તદા મયિ નિરીક્ષમાણે મહાન્ ભૂકમ્પો ઽભવત્ સૂર્ય્યશ્ચ ઉષ્ટ્રલોમજવસ્ત્રવત્ કૃષ્ણવર્ણશ્ચન્દ્રમાશ્ચ રક્તસઙ્કાશો ઽભવત્
XIII ગગનસ્થતારાશ્ચ પ્રબલવાયુના ચાલિતાદ્ ઉડુમ્બરવૃક્ષાત્ નિપાતિતાન્યપક્કફલાનીવ ભૂતલે ન્યપતન્|
XIV આકાશમણ્ડલઞ્ચ સઙ્કુચ્યમાનગ્રન્થઇવાન્તર્ધાનમ્ અગમત્ ગિરય ઉપદ્વીપાશ્ચ સર્વ્વે સ્થાનાન્તરં ચાલિતાઃ
XV પૃથિવીસ્થા ભૂપાલા મહાલ્લોકાઃ સહસ્રપતયો ધનિનઃ પરાક્રમિણશ્ચ લોકા દાસા મુક્તાશ્ચ સર્વ્વે ઽપિ ગુહાસુ ગિરિસ્થશૈલેષુ ચ સ્વાન્ પ્રાચ્છાદયન્|
XVI તે ચ ગિરીન્ શૈલાંશ્ચ વદન્તિ યૂયમ્ અસ્મદુપરિ પતિત્વા સિંહાસનોપવિષ્ટજનસ્ય દૃષ્ટિતો મેષશાવકસ્ય કોપાચ્ચાસ્માન્ ગોપાયત;
XVII યતસ્તસ્ય ક્રોધસ્ય મહાદિનમ્ ઉપસ્થિતં કઃ સ્થાતું શક્નોતિ?

# VII

I અનન્તરં ચત્વારો દિવ્યદૂતા મયા દૃષ્ટાઃ, તે પૃથિવ્યાશ્ચતુર્ષુ કોણેષુ તિષ્ઠનતઃ પૃથિવ્યાં સમુદ્રે વૃક્ષેષુ ચ વાયુ ર્યથા ન વહેત્ તથા પૃથિવ્યાશ્ચતુરો વાયૂન્ ધારયન્તિ।
II અનન્તરં સૂર્ય્યોદયસ્થાનાદ્ ઉદ્યન્ અપર એકો દૂતો મયા દૃષ્ટઃ સોઽમરેશ્વરસ્ય મુદ્રાં ધારયતિ, યેષુ ચર્તુષુ દૂતેષુ પૃથિવીસમુદ્રયો ર્હિંસનસ્ય ભારો દત્તસ્તાન્ સ ઉચ્ચૈરિદં અવદત્|
III ઈશ્વરસ્ય દાસા યાવદ્ અસ્માભિ ર્ભાલેષુ મુદ્રયાઙ્કિતા ન ભવિષ્યન્તિ તાવત્ પૃથિવી સમુદ્રો તરવશ્ચ યુષ્માભિ ર્ન હિંસ્યન્તાં।
IV તતઃ પરં મુદ્રાઙ્કિતલોકાનાં સંખ્યા મયાશ્રાવિ। ઇસ્રાયેલઃ સર્વ્વવંશાીયાશ્ચતુશ્ચત્વારિંશત્સહસ્રાધિકલક્ષલોકા મુદ્રયાઙ્કિતા અભવન્,
V અર્થતો યિહૂદાવંશે દ્વાદશસહસ્રાણિ રૂબેણવંશે દ્વાદશસહસ્રાણિ ગાદવંશે દ્વાદશસહસ્રાણિ,
VI આશેરવંશે દ્વાદશસહસ્રાણિ નપ્તાલિવંશે દ્વાદશસહસ્રાણિ મિનશિવંશે દ્વાદશસહસ્રાણિ,
VII શિમિયોનવંશે દ્વાદશસહસ્રાણિ લેવિવંશે દ્વાદશસહસ્રાણિ ઇષાખરવંશે દ્વાદશસહસ્રાણિ,
VIII સિબૂલૂનવંશે દ્વાદશસહસ્રાણિ યૂષફવંશે દ્વાદશસહસ્રાણિ બિન્યામીનવંશે ચ દ્વાદશસહસ્રાણિ લોકા મુદ્રાઙ્કિતાઃ।
IX તતઃ પરં સર્વ્વજાતીયાનાં સર્વ્વવંશીયાનાં સર્વ્વદેશીયાનાં સર્વ્વભાષાવાદિનાઞ્ચ મહાલોકારણ્યં મયા દૃષ્ટં, તાન્ ગણયિતું કેનાપિ ન શક્યં, તે ચ શુભ્રપરિચ્છદપરિહિતાઃ સન્તઃ કરૈશ્ચ તાલવૃન્તાનિ વહન્તઃ સિંહાસનસ્ય મેષશાવકસ્ય ચાન્તિકે તિષ્ઠન્તિ,
X ઉચ્ચૈઃસ્વરૈરિદં કથયન્તિ ચ, સિંહાસનોપવિષ્ટસ્ય પરમેશસ્ય નઃ સ્તવઃ। સ્તવશ્ચ મેષવત્સસ્ય સમ્ભૂયાત્ ત્રાણકારણાત્|
XI તતઃ સર્વ્વે દૂતાઃ સિંહાસનસ્ય પ્રાચીનવર્ગસ્ય પ્રાણિચતુષ્ટયસ્ય ચ પરિતસ્તિષ્ઠન્તઃ સિંહાસનસ્યાન્તિકે ન્યૂબ્જીભૂયેશ્વરં પ્રણમ્ય વદન્તિ,
XII તથાસ્તુ ધન્યવાદશ્ચ તેજો જ્ઞાનં પ્રશંસનં। શૌર્ય્યં પરાક્રમશ્ચાપિ શક્તિશ્ચ સર્વ્વમેવ તત્| વર્ત્તતામીશ્વરેઽસ્માકં નિત્યં નિત્યં તથાસ્ત્વિતિ।
XIII તતઃ પરં તેષાં પ્રાચીનાનામ્ એકો જનો માં સમ્ભાષ્ય જગાદ શુભ્રપરિચ્છદપરિહિતા ઇમે કે? કુતો વાગતાઃ?
XIV તતો મયોક્તં હે મહેચ્છ ભવાનેવ તત્ જાનાતિ। તેન કથિતં, ઇમે મહાક્લેશમધ્યાદ્ આગત્ય મેેષશાવકસ્ય રુધિરેણ સ્વીયપરિચ્છદાન્ પ્રક્ષાલિતવન્તઃ શુક્લીકૃતવન્તશ્ચ।
XV તત્કારણાત્ ત ઈશ્વરસ્ય સિંહાસનસ્યાન્તિકે તિષ્ઠન્તો દિવારાત્રં તસ્ય મન્દિરે તં સેવન્તે સિંહાસનોપવિષ્ટો જનશ્ચ તાન્ અધિસ્થાસ્યતિ।
XVI તેષાં ક્ષુધા પિપાસા વા પુન ર્ન ભવિષ્યતિ રૌદ્રં કોપ્યુત્તાપો વા તેષુ ન નિપતિષ્યતિ,

XVII યતઃ સિંહાસનાધિષ્ઠાનકારી મેષશાવકસ્તાન્ ચારયિષ્યતિ, અમૃતતોયાનાં પ્રસ્રવણાનાં સન્નિધિં તાન્ ગમયિષ્યતિ ચ, ઈશ્વરોઽપિ તેષાં નયનભ્યઃ સર્વ્વમશ્રુ પ્રમાર્ક્ષ્યતિ།

# VIII

I અનન્તરં સપ્તમમુદ્રાયાં તેન મોચિતાયાં સાર્દ્ધદણ્ડકાલં સ્વર્ગો નિઃશબ્દોઽભવત્།
II અપરમ્ અહમ્ ઈશ્વરસ્યાન્તિકે તિષ્ઠતઃ સપ્તદૂતાન્ અપશ્યં તેભ્યઃ સપ્તતૂર્ય્યોઽદીયન્ત།
III તતઃ પરમ્ અન્ય એકો દૂત આગતઃ સ સ્વર્ણધૂપાધારં ગૃહીત્વા વેદિમુપાતિષ્ઠત્ સ ચ યત્ સિંહાસનસ્યાન્તિકે સ્થિતાયાઃ
સુવર્ણવેદ્યા ઉપરિ સર્વ્વેષાં પવિત્રલોકાનાં પ્રાર્થનાસુ ધૂપાન્ યોજયેત્ તદર્થં પ્રચુરધૂપાસ્તસ્મૈ દત્તાઃ།
IV તતસ્તસ્ય દૂતસ્ય કરાત્ પવિત્રલોકાનાં પ્રાર્થનાભિઃ સંયુક્તધૂપાનાં ધૂમ ઈશ્વરસ્ય સમક્ષં ઉદતિષ્ઠત્།
V પશ્ચાત્ સ દૂતો ધૂપાધારં ગૃહીત્વા વેદ્યા વહ્નિના પૂરયિત્વા પૃથિવ્યાં નિક્ષિપ્તવાન્ તેન રવા મેઘગર્જ્જનાનિ વિદ્યુતો
ભૂમિકમ્પશ્ચાભવન્།
VI તતઃ પરં સપ્તતૂરી ર્ધારયન્તઃ સપ્તદૂતાસ્તૂરી ર્વાદયિતુમ્ ઉદ્યતા અભવન્།
VII પ્રથમેન તૂર્ય્યાં વાદિતાયાં રક્તમિશ્રિતૌ શિલાવહ્ની સમ્ભૂય પૃથિવ્યાં નિક્ષિપ્તૌ તેન પૃથિવ્યાસ્તૃતીયાંશો દગ્ધઃ, તરૂણામપિ
તૃતીયાંશો દગ્ધઃ, હરિદ્વર્ણતૃણાનિ ચ સર્વ્વાણિ દગ્ધાનિ།
VIII અનન્તરં દ્વિતીયદૂતેન તૂર્ય્યાં વાદિતાયાં વહ્નિના પ્રજ્વલિતો મહાપર્વ્વતઃ સાગરે નિક્ષિપ્તસ્તેન સાગરસ્ય તૃતીયાંશો રક્તીભૂતઃ
IX સાગરે સ્થિતાનાં સપ્રાણાનાં સૃષ્ટવસ્તૂનાં તૃતીયાંશો મૃતઃ, અર્ણવયાનાનામ્ અપિ તૃતીયાંશો નષ્ટઃ།
X અપરં તૃતીયદૂતેન તૂર્ય્યાં વાદિતાયાં દીપ ઇવ જ્વલન્તી એકા મહતી તારા ગગણાત્ નિપત્ય નદીનાં
જલપ્રસ્રવણાનાઞ્ચોપર્ય્યાવતીર્ણા།
XI તસ્યાસ્તારાયા નામ નાગદમનકમિતિ, તેન તોયાનાં તૃતીયાંશે નાગદમનકીભૂતે તોયાનાં તિક્તત્વાત્ બહવો માનવા મૃતાઃ།
XII અપરં ચતુર્થદૂતેન તૂર્ય્યાં વાદિતાયાં સૂર્ય્યસ્ય તૃતીયાંશશ્ચન્દ્રસ્ય તૃતીયાંશો નક્ષત્રાણાઞ્ચ તૃતીયાંશઃ પ્રહૃતઃ, તેન તેષાં તૃતીયાંશે
ઽન્ધકારીભૂતે દિવસસ્તૃતીયાંશકાલં યાવત્ તેજોહીનો ભવતિ નિશાપિ તામેવાવસ્થાં ગચ્છતિ།
XIII તદા નિરીક્ષમાણેન મયાકાશમધ્યેનાભિપતત એકસ્ય દૂતસ્ય રવઃ શ્રુતઃ સ ઉચ્ચૈ ર્ગદતિ, અપરૈ યૈંસ્ત્રિભિ ર્દૂતૈસ્તૂર્ય્યો
વાદિતવ્યાસ્તેષામ્ અવશિષ્ટતૂરીધ્વનિતઃ પૃથિવીનિવાસિનાં સન્તાપઃ સન્તાપઃ સન્તાપશ્ચ સમ્ભવિષ્યતિ།

# IX

I તતઃ પરં સપ્તમદૂતેન તૂર્ય્યાં વાદિતાયાં ગગનાત્ પૃથિવ્યાં નિપતિત એકસ્તારકો મયા દૃષ્ટઃ, તસ્મૈ રસાતલકૂપસ્ય કુઞ્જિકાદાયિ།
II તેન રસાતલકૂપે મુક્તે મહાગ્નિકુણ્ડસ્ય ધૂમ ઇવ ધૂમસ્તસ્માત્ કૂપાદ્ ઉદ્ગતઃ། તસ્માત્ કૂપધૂમાત્ સૂર્ય્યાકાશૌ તિમિરાવૃતૌ།
III તસ્માદ્ ધૂમાત્ પતઙ્ગેષુ પૃથિવ્યાં નિર્ગતેષુ નરલોકસ્થવૃશ્ચિકવત્ બલં તેભ્યોઽદાયિ།
IV અપરં પૃથિવ્યાસ્તૃણાનિ હરિદ્વર્ણશાકાદયો વૃક્ષાશ્ચ તૈ ર્ન સિંહિતવ્યાઃ કિન્તુ યેષાં ભાલેષ્વીશ્વરસ્ય મુદ્રાયા અઙ્કો નાસ્તિ કેવલં
તે માનવાસ્તૈ ર્હિંસિતવ્યા ઇદં ત આદિષ્ટાઃ།
V પરન્તુ તેષાં બધાય નહિ કેવલં પઞ્ચ માસાન્ યાવત્ યાતનાદાનાય તેભ્યઃ સામર્થ્યમદાયિ། વૃશ્ચિકેન દષ્ટસ્ય માનવસ્ય યાદૃશી
યાતના જાયતે તૈરપિ તાદૃશી યાતના પ્રદીયતે།
VI તસ્મિન્ સમયે માનવા મૃત્યું મૃગયિષ્યન્તે કિન્તુ પ્રાપ્તું ન શક્ષ્યન્તિ, તે પ્રાણાન્ ત્યક્તુમ્ અભિલષિષ્યન્તિ કિન્તુ મૃત્યુસ્તેભ્યો
દૂરં પલાયિષ્યતે།
VII તેષાં પતઙ્ગાનામ્ આકારો યુદ્ધાર્થં સુસજ્જિતાનામ્ અશ્વાનામ્ આકારસ્ય તુલ્યઃ, તેષાં શિરઃસુ સુવર્ણકિરીટાનીવ કિરીટાનિ
વિદ્યન્તે, મુખમણ્ડલાનિ ચ માનુષિકમુખતુલ્યાનિ,
VIII કેશાશ્ચ યોષિતાં કેશાનાં સદૃશાઃ, દન્તાશ્ચ સિંહદન્તતુલ્યાઃ,
IX લૌહકવચવત્ તેષાં કવચાનિ સન્તિ, તેષાં પક્ષાણાં શબ્દો રણાય ધાવતામશ્વરથાનાં સમૂહસ્ય શબ્દતુલ્યઃ།
X વૃશ્ચિકાનામિવ તેષાં લાઙ્ગૂલાનિ સન્તિ, તેષુ લાઙ્ગૂલેષુ કણ્ટકાનિ વિદ્યન્તે, અપરં પઞ્ચ માસાન્ યાવત્ માનવાનાં હિંસનાય તે
સામર્થ્યપ્રાપ્તાઃ།
XI તેષાં રાજા ચ રસાતલસ્ય દૂતસ્તસ્ય નામ ઇબ્રીયભાષયા અબદ્દોન્ યૂનાનીયભાષયા ચ અપલ્લુયોન્ અર્થતો વિનાશક ઇતિ།
XII પ્રથમઃ સન્તાપો ગતવાન્ પશ્ય ઇતઃ પરમપિ દ્વાભ્યાં સન્તાપાભ્યામ્ ઉપસ્થાતવ્યં།
XIII તતઃ પરં ષષ્ઠદૂતેન તૂર્ય્યાં વાદિતાયામ્ ઈશ્વરસ્યાન્તિકે સ્થિતાયાઃ સુવર્ણવેદ્યાશ્ચતુશ્ચૂડાતઃ કસ્યચિદ્ રવો મયાશ્રાવિ།
XIV સ તૂરીધારિણં ષષ્ઠદૂતમ્ અવદત્, ફરાતાખ્યે મહાનદે યે ચત્વારો દૂતા બદ્ધાઃ સન્તિ તાન્ મોચય།
XV તતસ્તદ્દણ્ડસ્ય તદ્દિનસ્ય તન્માસસ્ય તદ્વત્સરસ્ય ચ કૃતે નિરૂપિતાસ્તે ચત્વારો દૂતા માનવાનાં તૃતીયાંશસ્ય બધાર્થં મોચિતાઃ།
XVI અપરમ્ અશ્વારોહિસૈન્યાનાં સંખ્યા મયાશ્રાવિ, તે વિંશતિકોટય આસન્།
XVII મયા યે ઽશ્વા અશ્વારોહિણશ્ચ દૃષ્ટાસ્ત એતાદૃશાઃ, તેષાં વહ્નિસ્વરૂપાણિ નીલપ્રસ્તરસ્વરૂપાણિ ગન્ધકસ્વરૂપાણિ ચ
વર્મ્માણ્યાસન્, વાજિનાઞ્ચ સિંહમૂર્દ્ધસદૃશા મૂર્દ્ધાનઃ, તેષાં મુખેભ્યો વહ્નિધૂમગન્ધકા નિર્ગચ્છન્તિ།
XVIII એતૈસ્ત્રિભિ ર્દણ્ડૈરર્થતસ્તેષાં મુખેભ્યો નિર્ગચ્છદ્ભિ ર્વહ્નિધૂમગન્ધકૈ ર્માનુષાણાં તુતીયાંશો ઽઘાનિ།
XIX તેષાં વાજિનાં બલં મુખેષુ લાઙ્ગૂલેષુ ચ સ્થિતં, યતસ્તેષાં લાઙ્ગૂલાનિ સર્પાકારાણિ મસ્તકવિશિષ્ટાનિ ચ તૈરેવ તે હિંસન્તિ།
XX અપરમ્ અવશિષ્ટા યે માનવા તૈ ર્દણ્ડૈ ર્ન હતાસ્તે યથા દૃષ્ટિશ્રવણગમનશક્તિહીનાન્ સ્વર્ણરૌપ્યપિત્તલપ્રસ્તરકાષ્ઠમયાન્
વિગ્રહાન્ ભૂતાંશ્ચ ન પૂજયિષ્યન્તિ તથા સ્વહસ્તાનાં ક્રિયાભ્યઃ સ્વમનાંસિ ન પરાવર્ત્તિતવન્તઃ
XXI સ્વબધકુહકવ્યભિચારચૌર્ય્યેભ્યો ઽપિ મનાંસિ ન પરાવર્ત્તિતવન્તઃ།

# X

I અનન્તરં સ્વર્ગાદ્ અવરોહન્ અપર એકો મહાબલો દૂતો મયા દૃષ્ટઃ, સ પરિહિતમેઘસ્તસ્ય શિરશ્ચ મેઘધનુષા ભૂષિતં
મુખમણ્ડલઞ્ચ સૂર્ય્યતુલ્યં ચરણૌ ચ વહ્નિસ્તમ્ભસમૌ।
II સ સ્વકરેણ વિસ્તીર્ણમેકં ક્ષુદ્રગ્રન્થં ધારયતિ, દક્ષિણચરણેન સમુદ્રે વામચરણેન ચ સ્થલે તિષ્ઠતિ।
III સ સિંહગર્જનવદ્ ઉચ્ચૈઃસ્વરેણ ન્યનદત્ નિનાદે કૃતે સપ્ત સ્તનિતાનિ સ્વકીયાન્ સ્વનાન્ પ્રાકાશયન્।
IV તૈઃ સપ્ત સ્તનિતૈ ર્વાક્યે કથિતે ઽહં તત્ લેખિતુમ્ ઉદ્યત આસં કિન્તુ સ્વર્ગાદ્ વાગિયં મયા શ્રુતા સપ્ત સ્તનિતૈ ર્યદ્ યદ્ ઉક્તં
તત્ મુદ્રયાઙ્કય મા લિખ।
V અપરં સમુદ્રમેદિન્યોસ્તિષ્ઠન્ યો દૂતો મયા દૃષ્ટઃ સ ગગનં પ્રતિ સ્વદક્ષિણકરમુત્થાપ્ય
VI અપરં સ્વર્ગાદ્ યસ્ય રવો મયાશ્રાવિ સ પુન ર્માં સમ્ભાવ્યાવદત્ ત્વં ગત્વા સમુદ્રમેદિન્યોસ્તિષ્ઠતો દૂતસ્ય કરાત્ તં વિસ્તીર્ણં
ક્ષુદ્રગ્રન્થં ગૃહાણ, તેન મયા દૂતસમીપં ગત્વા કથિતં ગ્રન્થો ઽસૌ દીયતાં।
VII કિન્તુ તૂરીં વાદિષ્યતઃ સપ્તમદૂતસ્ય તૂરીવાદનસમય ઈશ્વરસ્ય ગુપ્તા મન્ત્રણા તસ્ય દાસાન્ ભવિષ્યદ્વાદિનઃ પ્રતિ તેન સુસંવાદે
યથા પ્રકાશિતા તથૈવ સિદ્ધા ભવિષ્યતિ।
VIII અપરં સ્વર્ગાદ્ યસ્ય રવો મયાશ્રાવિ સ પુન ર્માં સમ્ભાષ્યાવદત્ ત્વં ગત્વા સમુદ્રમેદિન્યોસ્તિષ્ઠતો દૂતસ્ય કરાત્ તં વિસ્તીર્ણં
ક્ષુદ્રગ્રન્થં ગૃહાણ,
IX તેન મયા દૂતસમીપં ગત્વા કથિતં ગ્રન્થો ઽસૌ દીયતાં। સ મામ્ અવદત્ તં ગૃહીત્વા ગિલ, તવોદરે સ તિક્તરસો ભવિષ્યતિ
કિન્તુ મુખે મધુવત્ સ્વાદુ ર્ભવિષ્યતિ।
X તેન મયા દૂતસ્ય કરાદ્ ગ્રન્થો ગૃહીતો ગિલિતશ્ચ। સ તુ મમ મુખે મધુવત્ સ્વાદુરાસીત્ કિન્ત્વદનાત્ પરં મમોદરસ્તિક્તતાં ગતઃ।
XI તતઃ સ મામ્ અવદત્ બહૂન્ જાતિવંશભાષાવદિરાજાન્ અધિ ત્વયા પુન ર્ભવિષ્યદ્વાક્યં વક્તવ્યં।

# XI

I અનન્તરં પરિમાણદણ્ડવદ્ એકો નલો મહ્યમદાયિ, સ ચ દૂત ઉપતિષ્ઠન્ મામ્ અવદત્, ઉત્થાયેશ્વરસ્ય મન્દિરં વેદીં
તત્રત્યસેવકાંશ્ચ મિમીષ્વ।
II કિન્તુ મન્દિરસ્ય બહિઃપ્રાઙ્ગણં ત્યજ ન મિમીષ્વ યતસ્તદ્ અન્યજાતીયેભ્યો દત્તં, પવિત્રં નગરઞ્ચ દ્વિચત્વારિંશન્માસાન્ યાવત્
તેષાં ચરણૈ ર્મર્દ્દિષ્યતે।
III પશ્ચાત્ મમ દ્વાભ્યાં સાક્ષિભ્યાં મયા સામર્થ્યં દાયિષ્યતે તાવુષ્ટ્રલોમજવસ્ત્રપરિહિતૌ ષષ્ઠ્યધિકદ્વિશતાધિકસહસ્રદિનાનિ
યાવદ્ ભવિષ્યદ્વાક્યાનિ વદિષ્યતઃ।
IV તાવેવ જગદીશ્વરસ્યાન્તિકે તિષ્ઠન્તૌ જિતવૃક્ષૌ દીપવૃક્ષૌ ચ।
V યદિ કેચિત્ તૌ હિંસિતું ચેષ્ટન્તે તર્હિ તયો ર્વદનાભ્યામ્ અગ્નિ ર્નિર્ગત્ય તયોઃ શત્રૂન્ ભસ્મીકરિષ્યતિ। યઃ કશ્ચિત્ તૌ હિંસિતું
ચેષ્ટતે તેનૈવમેવ વિનષ્ટવ્યં।
VI તયો ર્ભવિષ્યદ્વાક્યકથનદિનેષુ યથા વૃષ્ટિ ર્ન જાયતે તથા ગગનં રોદ્ધું તયોઃ સામર્થ્યમ્ અસ્તિ, અપરં તોયાનિ શોણિતરૂપાણિ
કર્ત્તું નિજાભિલાષાત્ મુહુર્મુહુઃ સર્વ્વવિધદણ્ડૈઃ પૃથિવીમ્ આહન્તુઞ્ચ તયોઃ સામર્થ્યમસ્તિ।
VII અપરં તયોઃ સાક્ષ્યે સમાપ્તે સતિ રસાતલાદ્ યેનોત્થિતવ્યં સ પશુસ્તાભ્યાં સહ યુદ્ધ્વા તૌ જેષ્યતિ હનિષ્યતિ ચ।
VIII તતસ્તયોઃ પ્રભુરપિ યસ્યાં મહાપુર્ય્યાં ક્રુશે હતો ઽર્થતો યસ્યાઃ પારમાર્થિકનામની સિદોમં મિસરશ્ચેતિ તસ્યા મહાપુર્ય્યાઃ
સન્નિવેશે તયોઃ કુણપે સ્થાસ્યતઃ।
IX તતો નાનાજાતીયા નાનાવંશીયા નાનાભાષાવાદિનો નાનાદેશીયાશ્ચ બહવો માનવાઃ સાર્દ્ધદિનત્રયં તયોઃ કુણપે નિરીક્ષિષ્યન્તે,
તયોઃ કુણપયોઃ શ્મશાને સ્થાપનં નાનુજ્ઞાસ્યન્તિ।
X પૃથિવીનિવાસિનશ્ચ તયો ર્હેતોરાનન્દિષ્યન્તિ સુખભોગં કુર્વ્વન્તઃ પરસ્પરં દાનાનિ પ્રેષયિષ્યન્તિ ચ યતસ્તાભ્યાં ભવિષ્યદ્વાદિભ્યાં
પૃથિવીનિવાસિનો યાતનાં પ્રાપ્તાઃ।
XI તસ્માત્ સાર્દ્ધદિનત્રયાત્ પરમ્ ઈશ્વરાત્ જીવનદાયક આત્મનિ તૌ પ્રવિષ્ટે તૌ ચરણૈરુદતિષ્ઠતાં, તેન યાવન્તસ્તાવપશ્યન્ તે
ઽતીવ ત્રાસયુક્તા અભવન્।
XII તતઃ પરં તૌ સ્વર્ગાદ્ ઉચ્ચૈરિદં કથયન્તં રવમ્ અશૃણુતાં યુવાં સ્થાનમ્ એતદ્ આરોહતાં તતસ્તયોઃ શત્રુષુ નિરીક્ષમાણેષુ તૌ
મેઘેન સ્વર્ગમ્ આરૂઢવન્તૌ।
XIII તદ્દણ્ડે મહાભૂમિકમ્પે જાતે પુર્ય્યા દશમાંશઃ પતિતઃ સપ્તસહસ્રાણિ માનુષાશ્ચ તેન ભૂમિકમ્પેન હતાઃ, અવશિષ્ટાશ્ચ ભયં
ગત્વા સ્વર્ગીયેશ્વરસ્ય પ્રશંસામ્ અકીર્ત્તયન્।
XIV દ્વિતીયઃ સન્તાપો ગતઃ પશ્ય તૃતીયઃ સન્તાપસ્તૂર્ણમ્ આગચ્છતિ।
XV અનન્તરં સપ્તદૂતેન તૂર્ય્યાં વાદિતાયાં સ્વર્ગ ઉચ્ચૈઃ સ્વરૈર્વાગિયં કીર્ત્તિતા, રાજત્વં જગતો યદ્યદ્ રાજ્યં તદધુનાભવત્।
અસ્મત્પ્રભોસ્તદીયાભિષિક્તસ્ય તારકસ્ય ચ। તેન ચાનન્તકાલીયં રાજત્વં પ્રકરિષ્યતે॥
XVI અપરમ્ ઈશ્વરસ્યાન્તિકે સ્વકીયસિંહાસનેષૂપવિષ્ટાશ્ચતુર્વિંશતિપ્રાચીના ભુવિ ન્યઙ્ભૂખા ભૂત્વેશ્વરં પ્રણમ્યાવદન્,
XVII હે ભૂત વર્ત્તમાનાપિ ભવિષ્યંશ્ચ પરેશ્વર। હે સર્વ્વશક્તિમન્ સ્વામિન્ વયં તે કુર્મ્મહે સ્તવં। યત્ ત્વયા ક્રિયતે રાજ્યં ગૃહીત્વા
તે મહાબલં।
XVIII વિજાતીયેષુ કુપ્યત્સુ પ્રાદુર્ભૂતા તવ ક્રુધા। મૃતાનામપિ કાલો ઽસૌ વિચારો ભવિતા યદા। ભૃત્યાશ્ચ તવ યાવન્તો
ભવિષ્યદ્વાદિસાધવઃ। યે ચ ક્ષુદ્રા મહાન્તો વા નામતસ્તે હિ બિભ્યતિ। યદા સર્વ્વેભ્ય એતેભ્યો વેતનં વિતરિષ્યતે। ગન્તવ્યશ્ચ યદા
નાશો વસુધાયા વિનાશકૈઃ॥
XIX અનન્તરમ્ ઈશ્વરસ્ય સ્વર્ગસ્થમન્દિરસ્ય દ્વારં મુક્તં તન્મન્દિરમધ્યે ચ નિયમમઞ્જૂષા દૃશ્યાભવત્, તેન તડિતો રવાઃ સ્તનિતાનિ
ભૂમિકમ્પો ગુરુતરશિલાવૃષ્ટિશ્ચૈતાનિ સમભવન્।

# XII

I ততঃ পরং স্বর্গে মহাচিত্রং দৃষ্টং যোষিদেকাসীৎ সা পরিহিতসূর্য্যা চন্দ্রশ্চ তস্যাশ্চরণয়োরধো দ্বাদশতারাণাং কিরীটঞ্চ
শিরস্যাসীৎ|
II সা গর্ভবতী সতী প্রসববেদনয়া ব্যথিতার্ত্তরাবম্ অকরোৎ|
III ততঃ স্বর্গে ঽপরম্ একং চিত্রং দৃষ্টং মহানাগ একঃ উপাতিষ্ঠৎ স লোহিতবর্ণস্তস্য সপ্ত শিরাংসি সপ্ত শৃঙ্গাণি শিরঃসু চ
সপ্ত কিরীটান্যাসন্|
IV স স্বলাঙ্গূলেন গগনস্থনক্ষত্রাণাং তৃতীযাংশম্ অবমৃজ্য পৃথিব্যাং ন্যপাতযৎ| স এব নাগো নবজাতং সন্তানং গ্রসিতুম্
উদ্যতস্তস্যাঃ প্রসবিষ্যমাণাযা যোষিতো ঽন্তিকে ঽতিষ্ঠৎ|
V সা তু পুংসন্তানং প্রসূতা স এব লৌহমযরাজদণ্ডেন সর্ব্বজাতীশ্চারযিষ্যতি, কিঞ্চ তস্যাঃ সন্তান ঈশ্বরস্য সমীপং
তদীযসিংহাসনস্য চ সন্নিধিম্ উদ্ধৃতঃ|
VI সা চ যোষিৎ প্রান্তরং পলাযিতা যতস্তত্রেশ্বরেণ নির্ম্মিত আশ্রমে ষষ্ঠ্যধিকশতদ্বযাধিকসহস্রদিনানি তস্যাঃ পালনেন
ভবিতব্যং|
VII ততঃ পরং স্বর্গে সংগ্রাম উপাপিষ্ঠৎ মীখাযেলস্তস্য দূতাশ্চ তেন নাগেন সহাযুধ্যন্ তথা স নাগস্তস্য দূতাশ্চ সংগ্রামম্
অকুর্ব্বন্, কিন্তু প্রভবিতুং নাশক্নুবন্
VIII যতঃ স্বর্গে তেষাং স্থানং পুন র্নাবিদ্যত|
IX অপরং স মহানাগো ঽর্থতো দিযাবলঃ (অপবাদকঃ) শযতানশ্চ (বিপক্ষঃ) ইতি নাম্না বিখ্যাতো যঃ পুরাতনঃ সর্পঃ কৃৎস্নং
নরলোকং ভ্রামযতি স পৃথিব্যাং নিপাতিতস্তেন সার্দ্ধং তস্য দূতা অপি তত্র নিপাতিতাঃ|
X ততঃ পরং স্বর্গে উচ্চৈ র্ভাষমাণো রবো ঽযং মযাশ্রাবি, ত্রাণং শক্তিশ্চ রাজত্বমধুনৈবেশ্বরস্য নঃ| তথা তেনাভিষিক্তস্য ত্রাতুঃ
পরাক্রমো ঽভবৎ|| যতো নিপাতিতো ঽস্মাকং ভ্রাতৃণাং সো ঽভিযোজকঃ| যেনেশ্বরস্য নঃ সাক্ষাৎ তে ঽদূষ্যন্ত দিবানিশং||
XI মেষবৎসস্য রক্তেন স্বসাক্ষ্যবচনেন চ| তে তু নির্জিতবন্তস্তং ন চ স্নেহম্ অকুর্ব্বত| প্রাণোষ্বপি স্বকীযেষু মরণস্যৈব সঙ্কটে|
XII তস্মাদ্ আনন্দতু স্বর্গো হৃষ্যন্তাং তন্নিবামিনঃ| হা ভূমিসাগরৌ তাপো যুবামেবাক্রমিষ্যতি| যুবযোরবতীর্ণো যৎ শৈতানো ঽতীব
কাপনঃ| অল্পো মে সমযো ঽস্ত্যেতচ্চাপি তেনাবগম্যতে||
XIII অনন্তরং স নাগঃ পৃথিব্যাং স্বং নিক্ষিপ্তং বিলোক্য তাং পুত্রপ্রসূতাং যোষিতম্ উপাদ্রবৎ|
XIV ততঃ সা যোষিৎ যৎ স্বকীযং প্রান্তরস্থাশ্রমং প্রত্যুৎপতিতুং শক্নুযাৎ তদর্থং মহাকুররস্য পক্ষদ্বযং তস্যৈ দত্তং, সা তু তত্র নাগতো
দূরে কালৈকং কালদ্বযং কালার্দ্ধঞ্চ যাবৎ পাল্যতে|
XV কিঞ্চ স নাগস্তাং যোষিতং স্রোতসা প্লাবযিতুং স্বমুখাৎ নদীবৎ তোযানি তস্যাঃ পশ্চাৎ প্রাক্ষিপৎ|
XVI কিন্তু মেদিনী যোষিতম্ উপকুর্ব্বতী নিজবদনং ব্যাদায নাগমুখাদ্ উদ্গীর্ণাং নদীম্ অপিবৎ|
XVII ততো নাগো যোষিতে ক্রুদ্ধ্বা তদ্বংশস্যাবশিষ্টলোকৈরর্থতো য ঈশ্বরস্যাজ্ঞাঃ পালযন্তি যীশোঃ সাক্ষ্যং ধারযন্তি চ তৈঃ সহ যোদ্ধুং
নির্গতবান্|
XVIII []

# XIII

I ততঃ পরমহং সাগরীযসিকতাযাং তিষ্ঠন্ সাগরাদ্ উদ্গচ্ছন্তম্ একং পশুং দৃষ্টবান্ তস্য দশ শৃঙ্গাণি সপ্ত শিরাংসি চ দশ শৃঙ্গেষু
দশ কিরীটানি শিরঃসু চেশ্বরনিন্দাসূচকানি নামানি বিদ্যন্তে|
II মযা দৃষ্টঃ স পশুশ্চিত্রব্যাঘ্রসদৃশঃ কিন্তু তস্য চরণৌ ভল্লূকস্যেব বদনঞ্চ সিংহবদনমিব| নাগনে তস্মৈ স্বীযপরাক্রমঃ স্বীযং
সিংহাসনং মহাধিপত্যঞ্চাদাযি|
III মযি নিরীক্ষমাণে তস্য শিরসাম্ একম্ অন্তকাঘাতেন ছেদিতমিবাদৃশ্যত, কিন্তু তস্যান্তকক্ষতস্য প্রতীকারো ঽক্রিযত ততঃ
কৃৎস্নো নরলোকস্তং পশুমধি চমৎকারং গতঃ,
IV যশ্চ নাগস্তস্মৈ পশবে সামর্থ্যং দত্তবান্ সর্ব্বে তং প্রাণমন্ পশুমপি প্রণমন্তো ঽকথযন্, কো বিদ্যতে পশোস্তুল্যস্তেন কো
যোদ্ধুমর্হতি|
V অনন্তরং তস্মৈ দর্পবাক্যেশ্বরনিন্দাবাদি বদনং দ্বিচত্বারিংশন্মাসান্ যাবদ্ অবস্থিতেঃ সামর্থ্যঞ্চাদাযি|
VI ততঃ স ঈশ্বরনিন্দনার্থং মুখং ব্যাদায তস্য নাম তস্যাবাসং স্বর্গনিবাসিনশ্চ নিন্দিতুম্ আরভত|
VII অপরং ধার্ম্মিকৈঃ সহ যোধনস্য তেষাং পরাজযস্য চানুমতিঃ সর্ব্বজাতীযানাং সর্ব্ববংশীযানাং সর্ব্বভাষাবাদিনাং
সর্ব্বদেশীযানাঞ্চাধিপত্যমপি তস্মা অদাযি|
VIII ততো জগতঃ সৃষ্টিকালাৎ ছেদিতস্য মেষবৎসস্য জীবনপুস্তকে যাবতাং নামানি লিখিতানি ন বিদ্যন্তে তে পৃথিবীনিবাসিনঃ
সর্ব্বে তং পশুং প্রণংস্যন্তি|
IX যস্য শ্রোত্রং বিদ্যতে স শৃণোতু|
X যো জনো ঽপরান্ বন্দীকৃত্য নযতি স স্বযং বন্দীভূয স্থানান্তরং গমিষ্যতি, যশ্চ খঙ্গেন হন্তি স স্বযং খঙ্গেন ঘানিষ্যতে| অত্র
পবিত্রলোকানাং সহিষ্ণুতযা বিশ্বাসেন চ প্রকাশিতব্যং|
XI অনন্তরং পৃথিবীত উদ্গচ্ছন্ অপর একঃ পশু র্মযা দৃষ্টঃ স মেষশাবকবৎ শৃঙ্গদ্বযবিশিষ্ট আসীৎ নাগবচ্চাভাষত|
XII স প্রথমপশোরন্তিকে তস্য সর্ব্বং পরাক্রমং ব্যবহরতি বিশেষতো যস্য প্রথমপশোরন্তিকক্ষতং প্রতীকারং গতং তস্য পূজাং পৃথিবীং
তন্নিবাসিনশ্চ কারযতি|
XIII অপরং মানবানাং সাক্ষাদ্ আকাশতো ভুবি বহ্নিবর্ষণাদীনি মহাচিত্রাণি করোতি|
XIV তস্য পশোঃ সাক্ষাদ্ যেষাং চিত্রকর্ম্মণাং সাধনায সামর্থ্যং তস্মৈ দত্তং তৈঃ স পৃথিবীনিবাসিনো ভ্রামযতি, বিশেষতো যঃ পশুঃ
খঙ্গেন ক্ষতযুক্তো ভূত্বাপ্যজীবৎ তস্য প্রতিমানির্ম্মাণং পৃথিবীনিবাসিন আদিশতি|

XV અપરં તસ્ય પશોઃ પ્રતિમા યથા ભાષતે યાવન્તશ્ચ માનવાસ્તાં પશુપ્રતિમાં ન પૂજયન્તિ તે યથા હન્યન્તે તથા પશુપ્રતિમાયાઃ પ્રાણપ્રતિષ્ઠાર્થં સામર્થ્યં તસ્મા અદાયિ।

XVI અપરં ક્ષુદ્રમહદ્ધનિદરિદ્રમુક્તદાસાન્ સર્વ્વાન્ દક્ષિણકરે ભાલે વા કલઙ્કં ગ્રાહયતિ।

XVII તસ્માદ્ યે તં કલઙ્કમર્થતઃ પશો ર્નામ તસ્ય નામ્નઃ સંખ્યાઙ્કં વા ધારયન્તિ તાન્ વિના પરેણ કેનાપિ ક્રયવિક્રયે કર્ત્તું ન શક્યેતે।

XVIII અત્ર જ્ઞાનેન પ્રકાશિતવ્યં। યો બુદ્ધિવિશિષ્ટઃ સ પશોઃ સંખ્યાં ગણયતુ યતઃ સા માનવસ્ય સંખ્યા ભવતિ। સા ચ સંખ્યા ષટ્ષષ્ટ્યધિકષટ્શતાનિ।

# XIV

I તતઃ પરં નિરીક્ષમાણેન મયા મેષશાવકો દૃષ્ટઃ સ સિયોનપર્વ્વતસ્યોપર્ય્યતિષ્ઠત્, અપરં યેષાં ભાલેષુ તસ્ય નામ તત્પિતુશ્ચ નામ લિખિતમાસ્તે તાદૃશાશ્ચતુશ્ચત્વારિંશત્સહસ્રાધિકા લક્ષલોકાસ્તેન સાર્દ્ધમ્ આસન્।

II અનન્તરં બહુતોયાનાં રવ ઇવ ગુરુતરસ્તનિતસ્ય ચ રવ ઇવ એકો રવઃ સ્વર્ગાત્ મયાશ્રાવિ। મયા શ્રુતઃ સ રવો વીણાવાદકાનાં વીણાવાદનસ્ય સદૃશઃ।

III સિંહસનસ્યાન્તિકે પ્રાણિચતુષ્ટયસ્ય પ્રાચીનવર્ગસ્ય ચાન્તિકે ઽપિ તે નવીનમેકં ગીતમ્ અગાયન્ કિન્તુ ધરણીતઃ પરિક્રીતાન્ તાન્ ચતુશ્ચત્વારિંશત્યહસ્રાધિકલક્ષલોકાન્ વિના નાપરેણ કેનાપિ તદ્ ગીતં શિક્ષિતું શક્યતે।

IV ઇમે યોષિતાં સઙ્ગેન ન કલઙ્કિતા યતસ્તે ઽમૈથુના મેષશાવકો યત્ કિમપિ સ્થાનં ગચ્છેત્ તત્સર્વ્વસ્મિન્ સ્થાને તમ્ અનુગચ્છન્તિ યતસ્તે મનુષ્યાણાં મધ્યતઃ પ્રથમફલાનીવેશ્વરસ્ય મેષશાવકસ્ય ચ કૃતે પરિક્રીતાઃ।

V તેષાં વદનેષુ ચાનૃતં કિમપિ ન વિદ્યતે યતસ્તે નિર્દોષા ઈશ્વરસિંહાસનસ્યાન્તિકે તિષ્ઠન્તિ।

VI અનન્તરમ્ આકાશમધ્યેનોડ્ડીયમાનો ઽપર એકો દૂતો મયા દૃષ્ટઃ સો ઽનન્તકાલીયં સુસંવાદં ધારયતિ સ ચ સુસંવાદઃ સર્વ્વજાતીયાન્ સર્વ્વવંશીયાન્ સર્વ્વભાષાવાદિનઃ સર્વ્વદેશીયાંશ્ચ પૃથિવીનિવાસિનઃ પ્રતિ તેન ઘોષિતવ્યઃ।

VII સ ઉચ્ચૈઃસ્વરેણેદં ગદતિ યૂયમીશ્વરાદ્ બિભીત તસ્ય સ્તવં કુરુત ચ યતસ્તદીયવિચારસ્ય દણ્ડ ઉપાતિષ્ઠત્ તસ્માદ્ આકાશમણ્ડલસ્ય પૃથિવ્યાઃ સમુદ્રસ્ય તોયપ્રસ્રવણાનાઞ્ચ સ્રષ્ટા યુષ્માભિઃ પ્રણમ્યતાં।

VIII તત્પશ્ચાદ્ દ્વિતીય એકો દૂત ઉપસ્થાયાવદત્ પતિતા પતિતા સા મહાબાબિલ્ યા સર્વ્વજાતીયાન્ સ્વકીયં વ્યભિચારરૂપં ક્રોધમદમ્ અપાયયત્।

IX તત્પશ્ચાદ્ તૃતીયો દૂત ઉપસ્થાયોચ્ચૈરવદત્, યઃ કશ્ચિત તં શશું તસ્ય પ્રતિમાઞ્ચ પ્રણમતિ સ્વભાલે સ્વકરે વા કલઙ્કં ગૃહ્લાતિ ચ

X સો ઽપીશ્વરસ્ય ક્રોધપાત્રે સ્થિતમ્ અમિશ્રિતં મદત્ અર્થત ઈશ્વરસ્ય ક્રોધમદં પાસ્યતિ પવિત્રદૂતાનાં મેષશાવકસ્ય ચ સાક્ષાદ્ વહ્નિગન્ધકયો ર્યાતનાં લપ્સ્યતે ચ।

XI તેષાં યાતનાયા ધૂમો ઽનન્તકાલં યાવદ્ ઉદ્ગમિષ્યતિ યે ચ પશું તસ્ય પ્રતિમાઞ્ચ પૂજયન્તિ તસ્ય નામ્નો ઽઙ્કં વા ગૃહ્લન્તિ તે દિવાનિશં કઞ્ચન વિરામં ન પ્રાપ્સ્યન્તિ।

XII યે માનવા ઈશ્વરસ્યાજ્ઞા યીશૌ વિશ્વાસઞ્ચ પાલયન્તિ તેષાં પવિત્રલોકાનાં સહિષ્ણુતયાત્ર પ્રકાશિતવ્યં।

XIII અપરં સ્વર્ગાત્ મયા સહ સમ્ભાષમાણ એકો રવો મયાશ્રાવિ તેનોક્તં ત્વં લિખ, ઇદાનીમારભ્ય યે પ્રભૌ મ્રિયન્તે તે મૃતા ધન્યા ઇતિ; આત્મા ભાષતે સત્યં સ્વશ્રમેભ્યસ્તૈ ર્વિરામઃ પ્રાપ્તવ્યઃ તેષાં કર્મ્માણિ ચ તાન્ અનુગચ્છન્તિ।

XIV તદનન્તરં નિરીક્ષમાણેન મયા શ્વેતવર્ણ એકો મેઘો દૃષ્ટસ્તન્મેઘારૂઢો જનો માનવપુત્રાકૃતિરસ્તિ તસ્ય શિરસિ સુવર્ણકિરીટં કરે ચ તીક્ષ્ણં દાત્રં તિષ્ઠતિ।

XV તતઃ પરમ્ અન્ય એકો દૂતો મન્દિરાત્ નિર્ગત્યોચ્ચૈઃસ્વરેણ તં મેઘારૂઢં સમ્ભાષ્યાવદત્ ત્વયા દાત્રં પ્રસાર્ય્ય શસ્યચ્છેદનં ક્રિયતાં શસ્યચ્છેદનસ્ય સમય ઉપસ્થિતો યતો મેદિન્યાઃ શસ્યાનિ પરિપક્કાનિ।

XVI તતસ્તેન મેઘારૂઢેન પૃથિવ્યાં દાત્રં પ્રસાર્ય્ય પૃથિવ્યાઃ શસ્યચ્છેદનં કૃતં।

XVII અનન્તરમ્ અપર એકો દૂતઃ સ્વર્ગસ્થમન્દિરાત્ નિર્ગતઃ સો ઽપિ તીક્ષ્ણં દાત્રં ધારયતિ।

XVIII અપરમ્ અન્ય એકો દૂતો વેદિતો નિર્ગતઃ સ વહ્નેરધિપતિઃ સ ઉચ્ચૈઃસ્વરેણ તં તીક્ષ્ણદાત્રધારિણં સમ્ભાષ્યાવદત્ ત્વયા સ્વં તીક્ષ્ણં દાત્રં પ્રસાર્ય્ય મેદિન્યા દ્રાક્ષાગુચ્છચ્છેદનં ક્રિયતાં યતસ્તત્ફલાનિ પરિણતાનિ।

XIX તતઃ સ દૂતઃ પૃથિવ્યાં સ્વદાત્રં પ્રસાર્ય્ય પૃથિવ્યા દ્રાક્ષાફલચ્છેદનમ્ અકરોત્ તત્ફલાનિ ચેશ્વરસ્ય ક્રોધસ્વરૂપસ્ય મહાકુણ્ડસ્ય મધ્યં નિરક્ષિપત્।

XX તત્કુણ્ડસ્થફલાનિ ચ બહિ ર્મર્દ્દિતાનિ તતઃ કુણ્ડમધ્યાત્ નિર્ગતં રક્તં ક્રોશશતપર્ય્યન્તમ્ અશ્વાનાં ખલીનાન્ યાવદ્ વ્યાપ્નોત્।

# XV

I તતઃ પરમ્ અહં સ્વર્ગે ઽપરમ્ એકમ્ અદ્ભુતં મહાચિહ્નં દૃષ્ટવાન્ અર્થતો યૈ ર્દણ્ડૈરીશ્વરસ્ય કોપઃ સમાપ્તિં ગમિષ્યતિ તાન્ દણ્ડાન્ ધારયન્તઃ સપ્ત દૂતા મયા દૃષ્ટાઃ।

II વહ્નિમિશ્રિતસ્ય કાચમયસ્ય જલાશયસ્યાકૃતિરપિ દૃષ્ટા યે ચ પશોસ્તત્પ્રતિમાયાસ્તન્નામ્નો ઽઙ્કસ્ય ચ પ્રભૂતવન્તસ્તે તસ્ય કાચમયજલાશયસ્ય તીરે તિષ્ઠન્ત ઈશ્વરીયવીણા ધારયન્તિ,

III ઈશ્વરદાસસ્ય મૂસસો ગીતં મેષશાવકસ્ય ચ ગીતં ગાયન્તો વદન્તિ, યથા, સર્વ્વશક્તિવિશિષ્ટસ્ત્વં હે પ્રભો પરમેશ્વર। ત્વદીયસર્વ્વકર્મ્માણિ મહાન્તિ ચાદ્ભુતાનિ ચ। સર્વ્વપુણ્યવતાં રાજન્ માર્ગા ન્યાય્યા ઋતાશ્ચ તે।

IV હે પ્રભો નામધેયાત્તે કો ન ભીતિં ગમિષ્યતિ। કો વા ત્વદીયનામ્નશ્ચ પ્રશંસાં ન કરિષ્યતિ। કેવલસ્ત્વં પવિત્રો ઽસિ સર્વ્વજાતીયમાનવાઃ। ત્વામેવાભિપ્રણંસ્યન્તિ સમાગત્ય ત્વદન્તિકં। યસ્માત્તવ વિચારાજ્ઞાઃ પ્રાદુર્ભાવં ગતાઃ કિલ॥

V તદનન્તરં મયિ નિરીક્ષમાણે સતિ સ્વર્ગે સાક્ષ્યાવાસસ્ય મન્દિરસ્ય દ્વારં મુક્તં।

VI યે ચ સપ્ત દૂતાઃ સપ્ત દણ્ડાન્ ધારયન્તિ તે તસ્માત્ મન્દિરાત્ નિરગચ્છન્। તેષાં પરિચ્છદા નિર્મ્મલશૃભ્રવર્ણવસ્ત્રનિર્મ્મિતા વક્ષાંસિ ચ સુવર્ણશૃઙ્ખલૈ ર્વેષ્ટિતાન્યાસન્।

VII અપરં ચતુર્ણાં પ્રાણિનામ્ એકસ્તેભ્યઃ સપ્તદૂતેભ્યઃ સપ્તસુવર્ણકંસાન્ અદદાત્।

VIII અનન્તરમ્ ઈશ્વરસ્ય તેજઃપ્રભાવકારણાત્ મન્દિરં ધૂમેન પરિપૂર્ણં તસ્માત્ તૈઃ સપ્તદૂતૈઃ સપ્તદણ્ડાનાં સમાપ્તિં યાવત્ મન્દિરં
કેનાપિ પ્રવેષ્ટું નાશક્યત།

# XVI

I તતઃ પરં મન્દિરાત્ તાન્ સપ્તદૂતાન્ સમ્ભાષમાણ એષ મહારવો મયાશ્રાવિ, યૂયં ગત્વા તેભ્યઃ સપ્તકંસેભ્ય ઈશ્વરસ્ય ક્રોધં
પૃથિવ્યાં સ્રાવયત།
II તતઃ પ્રથમો દૂતો ગત્વા સ્વકંસે યદ્યદ્ અવિદ્યત તત્ પૃથિવ્યામ્ અસ્રાવયત્ તસ્માત્ પશોઃ કલઙ્કધારિણાં તત્પ્રતિમાપૂજકાનાં
માનવાનાં શરીરેષુ વ્યથાજનકા દુષ્ટવ્રણા અભવન્།
III તતઃ પરં દ્વિતીયો દૂતઃ સ્વકંસે યદ્યદ્ અવિદ્યત તત્ સમુદ્રે ઽસ્રાવયત્ તેન સ કુણપસ્થશોણિતરૂપ્યભવત્ સમુદ્રે સ્થિતાશ્ચ સર્વ્વે
પ્રાણિનો મૃત્યું ગતાઃ།
IV અપરં તૃતીયો દૂતઃ સ્વકંસે યદ્યદ્ અવિદ્યત તત્ સર્વ્વં નદીષુ જલપ્રસ્રવણેષુ ચાસ્રાવયત્ તતસ્તાનિ રક્તમયાન્યભવન્། અપરં
તોયાનામ્ અધિપસ્ય દૂતસ્ય વાગિયં મયા શ્રુતા॥
V વર્ત્તમાનશ્ચ ભૂતશ્ચ ભવિષ્યંશ્ચ પરમેશ્વરઃ། ત્વમેવ ન્યાય્યકારી યદ્ એતાદૃક્ ત્વં વ્યચારયઃ།
VI ભવિષ્યદ્વાદિસાધૂનાં રક્તં તૈરેવ પાતિતં། શોણિતં ત્વન્તુ તેભ્યો ઽદાસ્તત્પાનં તેષુ યુજ્યતે॥
VII અનન્તરં વેદીતો ભાષમાણસ્ય કસ્યચિદ્ અયં રવો મયા શ્રુતઃ, હે પરશ્વર સત્યં તત્ હે સર્વ્વશક્તિમન્ પ્રભો། સત્યા ન્યાય્યાશ્ચ
સર્વ્વા હિ વિચારાજ્ઞાસ્ત્વદીયકાઃ॥
VIII અનન્તરં ચતુર્થો દૂતઃ સ્વકંસે યદ્યદ્ અવિદ્યત તત્ સર્વ્વં સૂર્ય્યે ઽસ્રાવયત્ તસ્મૈ ચ વહ્નિના માનવાન્ દગ્ધું સામર્થ્યમ્ અદાયિ།
IX તેન મનુષ્યા મહાતાપેન તાપિતાસ્તેષાં દણ્ડાનામ્ આધિપત્યવિશિષ્ટસ્યેશ્વરસ્ય નામાનિન્દન્ તત્પ્રશંસાર્થઞ્ચ મનઃપરિવર્ત્તનં
નાકુર્વ્વન્།
X તતઃ પરં પઞ્ચમો દૂતઃ સ્વકંસે યદ્યદ્ અવિદ્યત તત્ સર્વ્વં પશોઃ સિંહાસને ઽસ્રાવયત્ તેન તસ્ય રાષ્ટ્રં તિમિરાચ્છન્નમ્ અભવત્
લોકાશ્ચ વેદનાકારણાત્ સ્વરસના અદંદશ્યત།
XI સ્વકીયવ્યથાવ્રણકારણાચ્ચ સ્વર્ગસ્થમ્ અનિન્દન્ સ્વક્રિયાભ્યશ્ચ મનાંસિ ન પરાવર્ત્તયન્།
XII તતઃ પરં ષષ્ઠો દૂતઃ સ્વકંસે યદ્યદ્ અવિદ્યત તત્ સર્વ્વં ફરાતાખ્યો મહાનદે ઽસ્રાવયત્ તેન સૂર્ય્યોદયદિશ આગમિષ્યતાં રાજ્ઞાં
માર્ગસુગમાર્થં તસ્ય તોયાનિ પર્ય્યશુષ્યન્།
XIII અનન્તરં નાગસ્ય વદનાત્ પશો ર્વદનાત્ મિથ્યાભવિષ્યદ્વાદિનશ્ચ વદનાત્ નિર્ગચ્છન્તસ્ત્રયો ઽશુચય આત્માનો મયા દૃષ્ટાસ્તે
મણ્ડૂકાકારાઃ།
XIV ત આશ્ચર્ય્યકર્મ્મકારિણો ભૂતાનામ્ આત્માનઃ સન્તિ સર્વ્વશક્તિમત ઈશ્વરસ્ય મહાદિને યેન યુદ્ધેન ભવિતવ્યં તત્કૃતે
કૃત્સ્નજગતો રાજ્ઞાઃ સંગ્રહીતું તેષાં સન્નિધિં નિર્ગચ્છન્તિ།
XV અપરમ્ ઇબ્રિભાષયા હર્મ્મગિદ્દોનામકસ્થને તે સઙ્ગૃહીતાઃ།
XVI પશ્યાહં ચૈરવદ્ આગચ્છામિ યો જનઃ પ્રબુદ્ધસ્તિષ્ઠતિ યથા ચ નગ્નઃ સન્ ન પર્ય્યટતિ તસ્ય લજ્જા ચ યથા દૃશ્યા ન ભવતિ
તથા સ્વવાસાંસિ રક્ષતિ સ ધન્યઃ།
XVII તતઃ પરં સપ્તમો દૂતઃ સ્વકંસે યદ્યદ્ અવિદ્યત તત્ સર્વ્વમ્ આકાશે ઽસ્રાવયત્ તેન સ્વર્ગીયમન્દિરમધ્યસ્થસિંહાસનાત્
મહારવો ઽયં નિર્ગતઃ સમાપ્તિરભવદિતિ།
XVIII તદનન્તરં તડિતો રવાઃ સ્તનિતાનિ ચાભવન્, યસ્મિન્ કાલે ચ પૃથિવ્યાં મનુષ્યાઃ સૃષ્ટાસ્તમ્ આરભ્ય યાદૃઙ્મહાભૂમિકમ્પઃ
કદાપિ નાભવત્ તાદૃગ્ ભૂકમ્પો ઽભવત્།
XIX તદાનીં મહાનગરી ત્રિખણ્ડા જાતા ભિન્નજાતીયાનાં નગરાણિ ચ ન્યપતન્ મહાબાબિલ્ ચેશ્વરેણ
સ્વકીયપ્રચણ્ડકોપમદિરાપાત્રદાનાર્થં સંસ્મૃતા॥
XX દ્વીપાશ્ચ પલાયિતા ગિરયશ્ચાન્તહિતાઃ།
XXI ગગનમણ્ડલાચ્ચ મનુષ્યાણામ્ ઉપર્ય્યેકૈકદ્રોણપરિમિતશિલાનાં મહાવૃષ્ટિરભવત્ તચ્છિલાવૃષ્ટેઃ ક્લેશાત્ મનુષ્યા ઈશ્વરમ્
અનિન્દમ્ યતસ્તજ્જાતઃ ક્લેશો ઽતીવ મહાન્།

# XVII

I તદનન્તરં તેષાં સપ્તકંસધારિણાં સપ્તદૂતાનામ્ એક આગત્ય માં સમ્ભાષ્યાવદત્, અત્રાગચ્છ, મેદિન્યા નરપતયો યયા વેશ્યયા
સાર્દ્ધં વ્યભિચારકર્મ્મ કૃતવન્તઃ,
II યસ્યા વ્યભિચારમદેન ચ પૃથિવીનિવાસિનો મત્તા અભવન્ તસ્યા બહુતોયેષૂપવિષ્ટાયા મહાવેશ્યાયા દણ્ડમ્ અહં ત્વાં દર્શયામિ།
III તતો ઽહમ્ આત્મનાવિષ્ટસ્તેન દૂતેન પ્રાન્તરં નીતસ્તત્ર નિન્દાનામભિઃ પરિપૂર્ણં સપ્તશિરોભિ ર્દશશૃઙ્ગૈશ્ચ વિશિષ્ટં સિન્દૂરવર્ણં
પશુમુપવિષ્ટા યોષિદેકા મયા દૃષ્ટા॥
IV સા નારી કૃષ્ણલોહિતવર્ણં સિન્દૂરવર્ણઞ્ચ પરિચ્છદં ધારયતિ સ્વર્ણમણિમુક્તાભિશ્ચ વિભૂષિતાસ્તિ તસ્યાઃ કરે ઘૃણાર્હદ્રવ્યૈઃ
સ્વવ્યભિચારજાતમલૈશ્ચ પરિપૂર્ણ એકઃ સુવર્ણમયઃ કંસો વિદ્યતે།
V તસ્યા ભાલે નિગૂઢવાક્યમિદં પૃથિવીસ્થવેશ્યાનાં ઘૃણ્યક્રિયાણાઞ્ચ માતા મહાબાબિલિતિ નામ લિખિતમ્ આસ્તે།
VI મમ દૃષ્ટિગોચરસ્થા સા નારી પવિત્રલોકાનાં રુધિરેણ યીશોઃ સાક્ષિણાં રુધિરેણ ચ મત્તાસીત્ તસ્યા દર્શનાત્ મમાતિશયમ્
આશ્ચર્ય્યજ્ઞાનં જાતં།
VII તતઃ સ દૂતો મામ્ અવદત્ કુતસ્તવાશ્ચર્ય્યજ્ઞાનં જાયતે? અસ્યા યોષિતસ્તદ્વાહનસ્ય સપ્તશિરોભિ ર્દશશૃઙ્ગૈશ્ચ યુક્તસ્ય પશોશ્ચ
નિગૂઢભાવમ્ અહં ત્વાં જ્ઞાપયામિ།

VIII ત્વયા દૃષ્ટો ऽસૌ પશુરાસીત્ નેદાનીં વર્ત્તતે કિન્તુ રસાતલાત્ તેનોદેતવ્યં વિનાશશ્ચ ગન્તવ્યઃ। તતો યેષાં નામાનિ જગતઃ
સૃષ્ટિકાલમ્ આરભ્ય જીવનપુસ્તકે લિખિતાનિ ન વિદ્યન્તે તે પૃથિવીનિવાસિનો ભૂતમ્ અવર્ત્તમાનમુપસ્થાસ્યન્તઞ્ચ તં પશું દૃષ્ટ્વાશ્ચર્ય્યં
મંસ્યન્તે।
IX અત્ર જ્ઞાનયુક્તયા બુદ્ધ્યા પ્રકાશિતવ્યં। તાનિ સપ્તશિરાંસિ તસ્યા યોષિત ઉપવેશનસ્થાનસ્વરૂપાઃ સપ્તગિરયઃ સપ્ત રાજાનશ્ચ
સન્તિ।
X તેષાં પઞ્ચ પતિતા એકશ્ચ વર્ત્તમાનઃ શેષશ્ચાદ્યાપ્યનુપસ્થિતઃ સ યદોપસ્થાસ્યતિ તદાપિ તેનાલ્પકાલં સ્થાતવ્યં।
XI યઃ પશુરાસીત્ કિન્ત્વિદાનીં ન વર્ત્તતે સ એવાષ્ટમઃ, સ સપ્તાનામ્ એકો ऽસ્તિ વિનાશં ગમિષ્યતિ ચ।
XII ત્વયા દૃષ્ટાનિ દશશૃઙ્ગાણ્યપિ દશ રાજાનઃ સન્તિઃ, અદ્યાપિ તૈ રાજ્યં ન પ્રાપ્તં કિન્તુ મુહૂર્ત્તમેકં યાવત્ પશુના સાર્દ્ધં તે રાજાન
ઇવ પ્રભુત્વં પ્રાપ્સ્યન્તિ।
XIII ત એકમન્ત્રણા ભવિષ્યન્તિ સ્વકીયશક્તિપ્રભાવૌ પશવે દાસ્યન્તિ ચ।
XIV તે મેષશાવકેન સાર્દ્ધં યોત્સ્યન્તિ, કિન્તુ મેષશાવકસ્તાન્ જેષ્યતિ યતઃ સ પ્રભૂનાં પ્રભૂ રાજ્ઞાં રાજા ચાસ્તિ તસ્ય સઙ્ગિનો
ऽપ્યાહૂતા અભિરુચિતા વિશ્વાસ્યાશ્ચ।
XV અપરં સ મામ્ અવદત્ સા વેશ્યા યત્રોપવિશતિ તાનિ તોયાનિ લોકા જનતા જાતયો નાનાભાષાવાદિનશ્ચ સન્તિ।
XVI ત્વયા દૃષ્ટાનિ દશ શૃઙ્ગાણિ પશુશ્ચેમે તાં વેશ્યામ્ ઋતીયિષ્યન્તે દીનાં નગ્નાઞ્ચ કરિષ્યન્તિ તસ્યા માંસાનિ ભોક્ષ્યન્તે વહ્નિના તાં
દાહયિષ્યન્તિ ચ।
XVII યત ઈશ્વરસ્ય વાક્યાનિ યાવત્ સિદ્ધિં ન ગમિષ્યન્તિ તાવદ્ ઈશ્વરસ્ય મનોગતં સાધયિતુમ્ એકાં મન્ત્રણાં કૃત્વા તસ્મૈ પશવે
સ્વેષાં રાજ્યં દાતુઞ્ચ તેષાં મનાંસીશ્વરેણ પ્રવર્ત્તિતાનિ।
XVIII અપરં ત્વયા દૃષ્ટા યોષિત્ સા મહાનગરી યા પૃથિવ્યા રાજ્ઞામ્ ઉપરિ રાજત્વં કુરુતે।

# XVIII

I તદનન્તરં સ્વર્ગાદ્ અવરોહન્ અપર એકો દૂતો મયા દૃષ્ટઃ સ મહાપરાક્રમવિશિષ્ટસ્તસ્ય તેજસા ચ પૃથિવી દીપ્તા।
II સ બલવતા સ્વરેણ વાચમિમામ્ અઘોષયત્ પતિતા પતિતા મહાબાબિલ્, સા ભૂતાનાં વસતિઃ સર્વ્વેષામ્ અશુચ્યાત્મનાં કારા
સર્વ્વેષામ્ અશુચીનાં ઘૃણ્યાનાઞ્ચ પક્ષિણાં પિઞ્જરશ્ચાભવત્।
III યતઃ સર્વ્વજાતીયાસ્તસ્યા વ્યભિચારજાતાં ક્રોપમદિરાં પીતવન્તઃ પૃથિવ્યા રાજાનશ્ચ તયા સહ વ્યભિચારં કૃતવન્તઃ પૃથિવ્યા
વણિજશ્ચ તસ્યાઃ સુખભોગબાહુલ્યાદ્ ધનાઢ્યતાં ગતવન્તઃ।
IV તતઃ પરં સ્વર્ગાત્ મયાપર એષ રવઃ શ્રુતઃ, હે મમ પ્રજાઃ, યૂયં યત્ તસ્યાઃ પાપાનામ્ અંશિનો ન ભવત તસ્યા દણ્ડૈશ્ચ દણ્ડયુક્તા
ન ભવત તદર્થં તતો નિર્ગચ્છત।
V યતસ્તસ્યાઃ પાપાનિ ગગનસ્પર્શાન્યભવન્ તસ્યા અધર્મ્મક્રિયાશ્ચેશ્વરેણ સંસ્મૃતાઃ।
VI પરાન્ પ્રતિ તયા યદ્વદ્ વ્યવહૃતં તદ્વત્ તાં પ્રતિ વ્યવહરત, તસ્યાઃ કર્મ્મણાં દ્વિગુણફલાનિ તસ્યૈ દત્ત, યસ્મિન્ કંસે સા પરાન્
મદ્યમ્ અપાયયત્ તમેવ તસ્યાઃ પાનાર્થં દ્વિગુણમદ્યેન પૂરયત।
VII તયા યાત્મશ્લાઘા યશ્ચ સુખભોગઃ કૃતસ્તયો ર્દ્વિગુણૌ યાતનાશોકૌ તસ્યૈ દત્ત, યતઃ સા સ્વકીયાન્તઃકરણે વદતિ, રાજ્ઞીવદ્
ઉપવિષ્ટાહં નાનાથા ન ચ શોકવિત્।
VIII તસ્માદ્ દિવસ એકસ્મિન્ મારીદુર્ભિક્ષશોચનૈઃ, સા સમાપ્લોષ્યતે નારી ધ્યક્ષ્યતે વહ્નિના ચ સા; યદ્ વિચારાધિપસ્તસ્યા
બલવાન્ પ્રભુરીશ્વરઃ,
IX વ્યભિચારસ્તયા સાર્દ્ધં સુખભોગશ્ચ યૈઃ કૃતઃ, તે સર્વ્વ એવ રાજાનસ્તદ્દાહધૂમદર્શનાત્, પ્રરોદિષ્યન્તિ વક્ષાંસિ ચાહનિષ્યન્તિ
બાહુભિઃ।
X તસ્યાસ્તૈ ર્યાતનાભીતે ર્દૂરે સ્થિત્વેદમુચ્યતે, હા હા બાબિલ્ મહાસ્થાન હા પ્રભાવાન્વિતે પુરિ, એકસ્મિન્ આગતા દણ્ડે
વિચારાજ્ઞા ત્વદીયકા।
XI મેદિન્યા વણિજશ્ચ તસ્યાઃ કૃતે રુદન્તિ શોચન્તિ ચ યતસ્તેષાં પણ્યદ્રવ્યાણિ કેનાપિ ન ક્રીયન્તે।
XII ફલતઃ સુવર્ણરૌપ્યમણિમુક્તાઃ સૂક્ષ્મવસ્ત્રાણિ કૃષ્ણલોહિતવાસાંસિ પટ્ટવસ્ત્રાણિ સિન્દૂરવર્ણવાસાંસિ ચન્દનાદિકાષ્ઠાનિ
ગજદન્તેન મહાર્ઘકાષ્ઠેન પિત્તલલૌહાભ્યાં મર્મ્મરપ્રસ્તરેણ વા નિર્મ્મિતાનિ સર્વ્વવિધપાત્રાણિ
XIII ત્વગેલા ધૂપઃ સુગન્ધિદ્રવ્યં ગન્ધરસો દ્રાક્ષારસસ્તૈલં શસ્યચૂર્ણં ગોધૂમો ગાવો મેષા અશ્વા રથા દાસેયા મનુષ્યપ્રાણાશ્ચૈતાનિ
પણ્યદ્રવ્યાણિ કેનાપિ ન ક્રીયન્તે।
XIV તવ મનોऽભિલાષસ્ય ફલાનાં સમયો ગતઃ, ત્વત્તો દૂરીકૃતં યદ્યત્ શોભનં ભૂષણં તવ, કદાચન તદુદ્દેશો ન પુન ર્લપ્સ્યતે ત્વયા।
XV તદ્વિક્રેતારો યે વણિજસ્તયા ધનિનો જાતાસ્તે તસ્યા યાતનાયા ભયાદ્ દૂરે તિષ્ઠનતો રોદિષ્યન્તિ શોચન્તશ્ચેદં ગદિષ્યન્તિ
XVI હા હા મહાપુરિ, ત્વં સૂક્ષ્મવસ્ત્રૈઃ કૃષ્ણલોહિતવસ્ત્રૈઃ સિન્દૂરવર્ણવાસોભિશ્ચાચ્છાદિતા સ્વર્ણમણિમુક્તાભિરલઙ્કૃતા ચાસીઃ,
XVII કિન્ત્વેકસ્મિન્ દણ્ડે સા મહાસમ્પદ્ લુપ્તા। અપરં પોતાનાં કર્ણધારાઃ સમૂહલોકા નાવિકાઃ સમુદ્રવ્યવસાયિનશ્ચ સર્વ્વે
XVIII દૂરે તિષ્ઠન્તસ્તસ્યા દાહસ્ય ધૂમં નિરીક્ષમાણા ઉચ્ચૈઃસ્વરેણ વદન્તિ તસ્યા મહાનગર્ય્યાઃ કિં તુલ્યં?
XIX અપરં સ્વશિરઃસુ મૃત્તિકાં નિક્ષિપ્ય તે રુદન્તઃ શોચન્તશ્ચોચ્ચૈઃસ્વરેણેદં વદન્તિ હા હા યસ્યા મહાપુર્ય્યા બાહુલ્યધનકારણાત્,
સમ્પત્તિઃ સઞ્ચિતા સર્વ્વૈઃ સામુદ્રપોતનાયકૈઃ, એકસ્મિન્નેવ દણ્ડે સા સમ્પૂર્ણોચ્છિન્નતાં ગતા।
XX હે સ્વર્ગવાસિનઃ સર્વ્વે પવિત્રાઃ પ્રેરિતાશ્ચ હે। હે ભાવિવાદિનો યૂયં કૃતે તસ્યાઃ પ્રહર્ષત। યુષ્માકં યત્ તયા સાર્દ્ધં યો વિવાદઃ
પુરાભવત્। દણ્ડં સમુચિતં તસ્ય તસ્યૈ વ્યતરદીશ્વરઃ।।
XXI અનન્તરમ્ એકો બલવાન્ દૂતો બૃહત્પેષણીપ્રસ્તરતુલ્યં પાષાણમેકં ગૃહીત્વા સમુદ્રે નિક્ષિપ્ય કથિતવાન્, ઈદૃગ્બલપ્રકાશેન
બાબિલ્ મહાનગરી નિપાતયિષ્યતે તતસ્તસ્યા ઉદ્દેશઃ પુન ર્ન લપ્સ્યતે।

XXII વલ્લકીવાદિનાં શબ્દં પુન ર્ન શ્રોષ્યતે ત્વયિ। ગાથાકાનાઞ્ચ શબ્દો વા વંશીતૂર્ય્યાદિવાદિનાં। શિલ્પકર્મ્મકરઃ કો ઽપિ પુન ર્ન દ્રક્ષ્યતે
ત્વયિ। પેષણીપ્રસ્તરધ્વાનઃ પુન ર્ન શ્રોષ્યતે ત્વયિ।
XXIII દીપસ્યાપિ પ્રભા તદ્વત્ પુન ર્ન દ્રક્ષ્યતે ત્વયિ। ન કન્યાવરયોઃ શબ્દઃ પુનઃ સંશ્રોષ્યતે ત્વયિ। યસ્માન્મુખ્યાઃ પૃથિવ્યા યે
વણિજસ્તેઽભવન્ તવ। યસ્માચ્ચ જાતયઃ સર્વ્વા મોહિતાસ્તવ માયયા।
XXIV ભાવિવાદિપવિત્રાણાં યાવન્તશ્ચ હતા ભુવિ। સર્વ્વેષાં શોણિતં તેષાં પ્રાપ્તં સર્વ્વં તવાન્તરે॥

# XIX

I તતઃ પરં સ્વર્ગસ્થાનાં મહાજનતાયા મહાશબ્દો ઽયં મયા શ્રૂતઃ, બ્રૂત પરેશ્વરં ધન્યમ્ અસ્મદીયો ય ઈશ્વરઃ। તસ્યાભવત્ પરિત્રાણં
પ્રભાવશ્ચ પરાક્રમઃ।
II વિચારાજ્ઞાશ્ચ તસ્યૈવ સત્યા ન્યાય્યા ભવન્તિ ચ। યા સ્વવેશ્યાક્રિયાભિશ્ચ વ્યકરોત્ કૃત્સ્નમેદિનીં। તાં સ દણ્ડિતવાન્ વેશ્યાં
તસ્યાશ્ચ કરતસ્તથા। શોણિતસ્ય સ્વદાસાનાં સંશોધં સ ગૃહીતવાન્॥
III પુનરપિ તૈરિદમુક્તં યથા, બ્રૂત પરેશ્વરં ધન્યં યન્નિત્યં નિત્યમેવ ચ। તસ્યા દાહસ્ય ધૂમો ઽસૌ દિશમૂર્દ્ધ્વમુદેષ્યતિ॥
IV તતઃ પરં ચતુર્વ્વિંશતિપ્રાચીનાશ્ચત્વારઃ પ્રાણિનશ્ચ પ્રણિપત્ય સિંહાસનોપવિષ્ટમ્ ઈશ્વરં પ્રણમ્યાવદન્, તથાસ્તુ પરમેશશ્ચ
સર્વ્વૈરેવ પ્રશસ્યતાં॥
V અનન્તરં સિંહાસનમધ્યાદ્ એષ રવો નિર્ગતો, યથા, હે ઈશ્વરસ્ય દાસેયાસ્તદ્ભક્તાઃ સકલા નરાઃ। યૂયં ક્ષુદ્રા મહાન્તશ્ચ પ્રશંસત
વ ઈશ્વરં॥
VI તતઃ પરં મહાજનતાયાઃ શબ્દ ઇવ બહુતોયાનાઞ્ચ શબ્દ ઇવ ગૃરુતરસ્તનિતાનાઞ્ચ શબ્દ ઇવ શબ્દો ઽયં મયા શ્રુતઃ, બ્રૂત પરેશ્વરં
ધન્યં રાજત્વં પ્રાપ્તવાન્ યતઃ। સ પરમેશ્વરો ઽસ્માકં યઃ સર્વ્વશક્તિમાન્ પ્રભુઃ।
VII કીર્ત્તયામઃ સ્તવં તસ્ય હૃષ્ટાશ્ચોલ્લાસિતા વયં। યન્મેષશાવકસ્યૈવ વિવાહસમયો ઽભવત્। વાગ્દત્તા ચાભવત્ તસ્મૈ યા કન્યા
સા સુસજ્જિતા।
VIII પરિધાનાય તસ્યૈ ચ દત્તઃ શુભ્રઃ સુચેલકઃ॥
IX સ સુચેલકઃ પવિત્રલોકાનાં પુણ્યાનિ। તતઃ સ મામ્ ઉક્તવાન્ ત્વમિદં લિખ મેષશાવકસ્ય વિવાહભોજ્યાય યે નિમન્ત્રિતાસ્તે
ધન્યા ઇતિ। પુનરપિ મામ્ અવદત્, ઇમાનીશ્વરસ્ય સત્યાનિ વાક્યાનિ।
X અનન્તરં અહં તસ્ય ચરણયોરન્તિકે નિપત્ય તં પ્રણન્તુમુદ્યતઃ। તતઃ સ મામ્ ઉક્તવાન્ સાવધાનસ્તિષ્ઠ મૈવં કુરુ યીશોઃ
સાક્ષ્યવિશિષ્ટૈસ્તવ ભ્રાતૃભિસ્ત્વયા ચ સહદાસો ઽહં। ઈશ્વરમેવ પ્રણમ યસ્માદ્ યીશોઃ સાક્ષ્યં ભવિષ્યદ્વાક્યસ્ય સારં।
XI અનન્તરં મયા મુક્તઃ સ્વર્ગો દૃષ્ટઃ, એકઃ શ્વેતવર્ણો ઽશ્વો ઽપિ દૃષ્ટસ્તદારૂઢો જનો વિશ્વાસ્યઃ સત્યમયશ્ચેતિ નામ્ના ખ્યાતઃ સ
યાથાર્થ્યેન વિચારં યુદ્ધઞ્ચ કરોતિ।
XII તસ્ય નેત્રે ઽગ્નિશિખાતુલ્યે શિરસિ ચ બહુકિરીટાનિ વિદ્યન્તે તત્ર તસ્ય નામ લિખિતમસ્તિ તમેવ વિના નાપરઃ કો ઽપિ તન્નામ
જાનાતિ।
XIII સ રુધિરમગ્નેન પરિચ્છદેનાચ્છાદિત ઈશ્વરવાદ ઇતિ નામ્નાભિધીયતે ચ।
XIV અપરં સ્વર્ગસ્થસૈન્યાનિ શ્વેતાશ્વારૂઢાનિ પરિહિતનિર્મ્મલશ્વેતસૂક્ષ્મવસ્ત્રાણિ ચ ભૂત્વા તમનુગચ્છન્તિ।
XV તસ્ય વક્ત્રાદ્ એકસ્તીક્ષ્ણઃ ખઙ્ગો નિર્ગચ્છતિ તેન ખઙ્ગેન સર્વ્વજાતીયાસ્તેનાઘાતિતવ્યાઃ સ ચ લૌહદણ્ડેન તાન્ ચારયિષ્યતિ
સર્વ્વશક્તિમત ઈશ્વરસ્ય પ્રચણ્ડકોપરસોત્પાદકદ્રાક્ષાકુણ્ડે યદ્યત્ તિષ્ઠતિ તત્ સર્વ્વં સ એવ પદાભ્યાં પિનષ્ટિ।
XVI અપરં તસ્ય પરિચ્છદ ઉરસિ ચ રાજ્ઞાં રાજા પ્રભૂનાં પ્રભુશ્ચેતિ નામ નિખિતમસ્તિ।
XVII અનન્તરં સૂર્ય્યે તિષ્ઠન્ એકો દૂતો મયા દૃષ્ટઃ, આકાશમધ્ય ઉડ્ડીયમાનાન્ સર્વ્વાન્ પક્ષિણઃ પ્રતિ સ ઉચ્ચૈઃસ્વરેણેદં ઘોષયતિ,
અત્રાગચ્છત।
XVIII ઈશ્વરસ્ય મહાભોજ્યે મિલત, રાજ્ઞાં ક્રવ્યાણિ સેનાપતીનાં ક્રવ્યાણિ વીરાણાં ક્રવ્યાણ્યશ્વાનાં તદારૂઢાનાઞ્ચ ક્રવ્યાણિ
દાસમુક્તાનાં ક્ષુદ્રમહતાં સર્વ્વેષામેવ ક્રવ્યાણિ ચ યુષ્માભિ ર્ભક્ષિતવ્યાનિ।
XIX તતઃ પરં તેનાશ્વારૂઢજનેન તદીયસૈન્યૈશ્ચ સાર્દ્ધં યુદ્ધં કર્ત્તું સ પશુઃ પૃથિવ્યા રાજાનસ્તેષાં સૈન્યાનિ ચ સમાગચ્છન્તીતિ મયા
દૃષ્ટં।
XX તતઃ સ પશુ ર્ધૃતો યશ્ચ મિથ્યાભવિષ્યદ્વક્તા તસ્યાન્તિકે ચિત્રકર્મ્માણિ કુર્વ્વન્ તૈરેવ પશ્વઙ્કધારિણસ્તત્પ્રતિમાપૂજકાંશ્ચ
ભ્રમિતવાન્ સો ઽપિ તેન સાર્દ્ધં ધૃતઃ। તૌ ચ વહ્નિગન્ધકજ્વલિતહ્રદે જીવન્તૌ નિક્ષિપ્તૌ।
XXI અવશિષ્ટાશ્ચ તસ્યાશ્વારૂઢસ્ય વક્ત્રનિર્ગતખઙ્ગેન હતાઃ, તેષાં ક્રવ્યૈશ્ચ પક્ષિણઃ સર્વ્વે તૃપ્તિં ગતાઃ।

# XX

I તતઃ પરં સ્વર્ગાદ્ અવરોહન્ એકો દૂતો મયા દૃષ્ટસ્તસ્ય કરે રમાતલસ્ય કુઞ્જિકા મહાશૃઙ્ખલઞ્ચૈકં તિષ્ઠતઃ।
II અપરં નાગો ઽર્થતઃ યો વૃદ્ધઃ સર્પો ઽપવાદકઃ શયતાનશ્ચાસ્તિ તમેવ ધૃત્વા વર્ષસહસ્રં યાવદ્ બદ્ધવાન્।
III અપરં રસાતલે તં નિક્ષિપ્ય તદુપરિ દ્વારં રુદ્ધ્વા મુદ્રાઙ્કિતવાન્ યસ્માત્ તદ્ વર્ષસહસ્રં યાવત્ સમ્પૂર્ણં ન ભવેત્ તાવદ્
ભિન્નજાતીયાસ્તેન પુન ર્ન ભ્રમિતવ્યાઃ। તતઃ પરમ્ અલ્પકાલાર્થં તસ્ય મોચનેન ભવિતવ્યં।
IV અનન્તરં મયા સિંહાસનાનિ દૃષ્ટાનિ તત્ર યે જના ઉપાવિશન્ તેભ્યો વિચારભારો ઽદીયત; અનન્તરં યીશોઃ સાક્ષ્યસ્ય કારણાદ્
ઈશ્વરવાક્યસ્ય કારણાચ્ચ યેષાં શિરશ્છેદનં કૃતં પશોસ્તદીયપ્રતિમાયા વા પૂજા યૈ ર્ન કૃતા ભાલે કરે વા કલઙ્કો ઽપિ ન ધૃતસ્તેષામ્
આત્માનો ઽપિ મયા દૃષ્ટાઃ, તે પ્રાપ્તજીવનાસ્તદ્વર્ષસહસ્રં યાવત્ ખ્રીષ્ટેન સાર્દ્ધં રાજત્વમકુર્વ્વન્।
V કિન્ત્વવશિષ્ટા મૃતજનાસ્તસ્ય વર્ષસહસ્રસ્ય સમાપ્તેઃ પૂર્વ્વં જીવનં ન પ્રાપન્।
VI એષા પ્રથમોત્થિતિઃ। યઃ કશ્ચિત્ પ્રથમાયા ઉત્થિતેરંશી સ ધન્યઃ પવિત્રશ્ચ। તેષુ દ્વિતીયમૃત્યોઃ કો ઽપ્યધિકારો નાસ્તિ ત ઈશ્વરસ્ય
ખ્રીષ્ટસ્ય ચ યાજકા ભવિષ્યન્તિ વર્ષસહસ્રં યાવત્ તેન સહ રાજત્વં કરિષ્યન્તિ ચ।
VII વર્ષસહસ્રે સમાપ્તે શયતાનઃ સ્વકારાતો મોક્ષ્યતે।

VIII તતઃ સ પૃથિવ્યાશ્ચતુર્દિક્ષુ સ્થિતાન્ સર્વ્વજાતીયાન્ વિશેષતો જૂજાખ્યાન્ માજૂજાખ્યાંશ્ચ સામુદ્રસિકતાવદ્ બહુસંખ્યકાન્ જનાન્ ભ્રમયિત્વા યુદ્ધાર્થં સંગ્રહીતું નિર્ગમિષ્યતિ।

IX તતસ્તે મે◌દિન્યાઃ પ્રસ્થેનાગત્ય પવિત્રલોકાનાં દુર્ગં પ્રિયતમાં નગરીઞ્ચ વેષ્ટિતવન્તઃ કિન્ત્વીશ્વરેણ નિક્ષિપ્તો ઽગ્નિરાકાશાત્ પતિત્વા તાન્ ખાદિતવાન્।

X તેષાં ભ્રમયિતા ચ શયતાનો વહ્નિગન્ધકયો ર્હ્રદે ઽર્થતઃ પશુ ર્મિથ્યાભવિષ્યદ્વાદી ચ યત્ર તિષ્ઠતસ્તત્રૈવ નિક્ષિપ્તઃ, તત્રાનન્તકાલં યાવત્ તે દિવાનિશં યાતનાં ભોક્ષ્યન્તે।

XI તતઃ શુક્લમ્ એકં મહાસિંહાસનં મયા દૃષ્ટં તદુપવિષ્ટો ઽપિ દૃષ્ટસ્તસ્ય વદનાન્તિકાદ્ ભૂનભોમણ્ડલે પલાયેતાં પુનસ્તાભ્યાં સ્થાનં ન લબ્ધં।

XII અપરં ક્ષુદ્રા મહાન્તશ્ચ સર્વ્વે મૃતા મયા દૃષ્ટાઃ, તે સિંહાસનસ્યાન્તિકે ઽતિષ્ઠન્ ગ્રન્થાશ્ચ વ્યસ્તીર્ય્યન્ત જીવનપુસ્તકાખ્યમ્ અપરમ્ એકં પુસ્તકમપિ વિસ્તીર્ણં। તત્ર ગ્રન્થેષુ યદ્યત્ લિખિતં તસ્માત્ મૃતાનામ્ એકૈકસ્ય સ્વક્રિયાનુયાયી વિચારઃ કૃતઃ।

XIII તદાનીં સમુદ્રેણ સ્વાન્તરસ્થા મૃતજનાઃ સમર્પિતાઃ, મૃત્યુપરલોકાભ્યામપિ સ્વાન્તરસ્થા મૃતજનાઃ સર્મિપતાઃ, તેષાઞ્ચૈકૈકસ્ય સ્વક્રિયાનુયાયી વિચારઃ કૃતઃ।

XIV અપરં મૃત્યુપરલોકૌ વહ્નિહ્રદે નિક્ષિપ્તૌ, એષ એવ દ્વિતીયો મૃત્યુઃ।

XV યસ્ય કસ્યચિત્ નામ જીવનપુસ્તકે લિખિતં નાવિદ્યત સ એવ તસ્મિન્ વહ્નિહ્રદે ન્યક્ષિપ્યત।

# XXI

I અનન્તરં નવીનમ્ આકાશમણ્ડલં નવીના પૃથિવી ચ મયા દૃષ્ટે યતઃ પ્રથમમ્ આકાશમણ્ડલં પ્રથમા પૃથિવી ચ લોપં ગતે સમુદ્રો ઽપિ તતઃ પરં ન વિદ્યતે।

II અપરં સ્વર્ગાદ્ અવરોહન્તી પવિત્રા નગરી, અર્થતો નવીના યિરૂશાલમપુરી મયા દૃષ્ટા, સા વરાય વિભૂષિતા કન્યેવ સુસજ્જિતાસીત્।

III અનન્તરં સ્વર્ગાદ્ એષ મહારવો મયા શ્રુતઃ પશ્યાયં માનવૈઃ સાર્દ્ધમ્ ઈશ્વરસ્યાવાસઃ, સ તૈઃ સાર્દ્ધં વત્સ્યતિ તે ચ તસ્ય પ્રજા ભવિષ્યન્તિ, ઈશ્વરશ્ચ સ્વયં તેષામ્ ઈશ્વરો ભૂત્વા તૈઃ સાર્દ્ધં સ્થાસ્યતિ।

IV તેષાં નેત્રેભ્યશ્ચાશ્રૂણિ સર્વ્વાણીશ્વરેણ પ્રમાર્ક્ષ્યન્તે મૃત્યુરપિ પુન ર્ન ભવિષ્યતિ શોકવિલાપક્લેશા અપિ પુન ર્ન ભવિષ્યન્તિ, યતઃ પ્રથમાનિ સર્વ્વાણિ વ્યતીતિનિ।

V અપરં સિંહાસનોપવિષ્ટો જનોઽવદત્ પશ્યાહં સર્વ્વાણિ નૂતનીકરોમિ। પુનરવદત્ લિખ યત ઇમાનિ વાક્યાનિ સત્યાનિ વિશ્વાસ્યાનિ ચ સન્તિ।

VI પન ર્મામ્ અવદત્ સમાપ્તં, અહં કઃ ક્ષશ્ચ, અહમ્ આદિરન્તશ્ચ યઃ પિપાસતિ તસ્મા અહં જીવનદાયિપ્રસ્રવણસ્ય તોયં વિનામૂલ્યં દાસ્યામિ।

VII યો જયતિ સ સર્વ્વેષામ્ અધિકારી ભવિષ્યતિ, અહઞ્ચ તસ્યેશ્વરો ભવિષ્યામિ સ ચ મમ પુત્રો ભવિષ્યતિ।

VIII કિન્તુ ભીતાનામ્ અવિશ્વાસિનાં ઘૃણ્યાનાં નરહન્તૃણાં વેશ્યાગામિનાં મોહકાનાં દેવપૂજકાનાં સર્વ્વેષામ્ અનૃતવાદિનાઞ્ચાંશો વહ્નિગન્ધકજ્વલિતહ્રદે ભવિષ્યતિ, એષ એવ દ્વિતીયો મૃત્યુઃ।

IX અનન્તરં શેષસપ્તદણ્ડૈઃ પરિપૂર્ણાઃ સપ્ત કંસા યેષાં સપ્તદૂતાનાં કરેષ્વાસન્ તેષામેક આગત્ય માં સમ્ભાષ્યાવદત્, આગચ્છાહં તાં કન્યામ્ અર્થતો મેષશાવકસ્ય ભાવિભાર્ય્યાં ત્વાં દર્શયામિ।

X તતઃ સ આત્માવિષ્ટં મામ્ અત્યુચ્ચં મહાપર્વ્વતમેંક નીત્વેશ્વરસ્ય સન્નિધિતઃ સ્વર્ગાદ્ અવરોહન્તીં યિરૂશાલમાખ્યાં પવિત્રાં નગરીં દર્શિતવાન્।

XI સા ઈશ્વરીયપ્રતાપવિશિષ્ટા તસ્યાસ્તેજો મહાર્ઘરત્નવદ્ અર્થતઃ સૂર્ય્યકાન્તમણિતેજસ્તુલ્યં।

XII તસ્યાઃ પ્રાચીરં બૃહદ્ ઉચ્ચઞ્ચ તત્ર દ્વાદશ ગોપુરાણિ સન્તિ તદ્ગોપુરોપરિ દ્વાદશ સ્વર્ગદૂતા વિદ્યન્તે તત્ર ચ દ્વાદશ નામાન્યર્થત ઇસ્રાયેલીયાનાં દ્વાદશવંશાનાં નામાનિ લિખિતાનિ।

XIII પૂર્વ્વદિશિ ત્રીણિ ગોપુરાણિ ઉત્તરદિશિ ત્રીણિ ગોપુરાણિ દક્ષિણદિષિ ત્રીણિ ગોપુરાણિ પશ્ચીમદિશિ ચ ત્રીણિ ગોપુરાણિ સન્તિ।

XIV નગર્ય્યાઃ પ્રાચીરસ્ય દ્વાદશ મૂલાનિ સન્તિ તત્ર મેષાશાવાકસ્ય દ્વાદશપ્રેરિતાનાં દ્વાદશ નામાનિ લિખિતાનિ।

XV અનરં નગર્ય્યાસ્તદીયગોપુરાણાં તત્પ્રાચીરસ્ય ચ માપનાર્થં મયા સમ્ભાષમાણસ્ય દૂતસ્ય કરે સ્વર્ણમય એકઃ પરિમાણદણ્ડ આસીત્।

XVI નગર્ય્યા આકૃતિશ્ચતુરસ્રા તસ્યા દૈર્ઘ્યપ્રસ્થે સમે। તતઃ પરં સ તેગ પરિમાણદણ્ડેન તાં નગરીં પરિમિતવાન્ તસ્યાઃ પરિમાણં દ્વાદશસહસ્રનલ્વાઃ। તસ્યા દૈર્ઘ્યં પ્રસ્થમ્ ઉચ્ચત્વઞ્ચ સમાનાનિ।

XVII અપરં સ તસ્યાઃ પ્રાચીરં પરિમિતવાન્ તસ્ય માનવાસ્યાર્થતો દૂતસ્ય પરિમાણાનુસારતસ્તત્ ચતુશ્ચત્વારિંશદધિકાશતહસ્તપરિમિતં ।

XVIII તસ્ય પ્રાચીરસ્ય નિર્મ્મિતિઃ સૂર્ય્યકાન્તમણિભિ ર્નગરી ચ નિર્મ્મલકાચતુલ્યેન શુદ્ધસુવર્ણેન નિર્મ્મિતા।

XIX નગર્ય્યાઃ પ્રાચીરસ્ય મૂલાનિ ચ સર્વ્વવિધમહાર્ઘમણિભિ ર્ભૂષિતાનિ। તેષાં પ્રથમં ભિત્તિમૂલં સૂર્ય્યકાન્તસ્ય, દ્વિતીયં નીલસ્ય, તૃતીયં તામ્રમણેઃ, ચતુર્થં મરકતસ્ય,

XX પઞ્ચમં વૈદૂર્ય્યસ્ય, ષષ્ઠં શોણરત્નસ્ય, સપ્તમં ચન્દ્રકાન્તસ્ય,અષ્ટમં ગોમેદસ્ય, નવમં પદ્મરાગસ્ય, દશમં લશૂનીયસ્ય, એકાદશં પેરોજસ્ય, દ્વાદશં મર્ટીષ્મણેશ્ચાસ્તિ।

XXI દ્વાદશગોપુરાણિ દ્વાદશમુક્તાભિ ર્નિર્મ્મિતાનિ, એકૈકં ગોપુરમ્ એકૈકયા મુક્તયા કૃતં નગર્ય્યા મહામાર્ગશ્ચાચ્છકાચવત્ નિર્મ્મલસુવર્ણેન નિર્મ્મિતં।

XXII તસ્યા અન્તર એકમપિ મન્દિરં મયા ન દૃષ્ટં સતઃ સર્વ્વશક્તિમાન્ પ્રભુઃ પરમેશ્વરો મેષશાવકશ્ચ સ્વયં તસ્ય મન્દિરં।

XXIII તસ્યૈ નગર્ય્યૈ દીપ્તિદાનાર્થં સૂર્ય્યાચન્દ્રમસોઃ પ્રયોજનં નાસ્તિ યત ઈશ્વરસ્ય પ્રતાપસ્તાં દીપયતિ મેષશાવકશ્ચ તસ્યા જ્યોતિરસ્તિ।
XXIV પરિત્રાણપ્રાપ્તલોકનિવહાશ્ચ તસ્યા આલોકે ગમનાગમને કુર્વ્વન્તિ પૃથિવ્યા રાજાનશ્ચ સ્વકીયં પ્રતાપં ગૌરવઞ્ચ તન્મધ્યમ્ આનયન્તિ।
XXV તસ્યા દ્વારાણિ દિવા કદાપિ ન રોત્સ્યન્તે નિશાપિ તત્ર ન ભવિષ્યતિ।
XXVI સર્વ્વજાતીનાં ગૌરવપ્રતાપૌ તન્મધ્યમ્ આનેષ્યેતે।
XXVII પરન્ત્વપવિત્રં ઘૃણ્યકૃદ્ અનૃતકૃદ્ વા કિમપિ તન્મધ્યં ન પ્રવેક્ષ્યતિ મેષશાવકસ્ય જીવનપુસ્તકે યેષાં નામાનિ લિખિતાનિ કેવલં ત એવ પ્રવેક્ષ્યન્તિ।

# XXII

I અનન્તરં સ સ્ફટિકવત્ નિર્મ્મલમ્ અમૃતતોયસ્ય સ્રોતો મામ્ અઉર્શયત્ તદ્ ઈશ્વરસ્ય મેષશાવકસ્ય ચ સિંહાસનાત્ નિર્ગચ્છતિ।
II નગર્ય્યા માર્ગમધ્યે તસ્યા નદ્યાઃ પાર્શ્વયોરમૃતવૃક્ષા વિદ્યન્તે તેષાં દ્વાદશફલાનિ ભવન્તિ, એકૈકો વૃક્ષઃ પ્રતિમાસં સ્વફલં ફલતિ તદ્વૃક્ષપત્રાણિ ચાન્યજાતીયાનામ્ આરોગ્યજનકાનિ।
III અપરં કિમપિ શાપગ્રસ્તં પુન ર્ન ભવિષ્યતિ તસ્યા મધ્ય ઈશ્વરસ્ય મેષશાવકસ્ય ચ સિંહાસનં સ્થાસ્યતિ તસ્ય દાસાશ્ચ તં સેવિષ્યન્તે।
IV તસ્ય વદનદર્શનં પ્રાપ્સ્યન્તિ ભાલેષુ ચ તસ્ય નામ લિખિતં ભવિષ્યતિ।
V તદાનીં રાત્રિઃ પુન ર્ન ભવિષ્યતિ યતઃ પ્રભુઃ પરમેશ્વરસ્તાન્ દીપયિષ્યતિ તે ચાનન્તકાલં યાવદ્ રાજત્વં કરિષ્યન્તે।
VI અનન્તરં સ મામ્ અવદત્, વાક્યાનીમાનિ વિશ્વાસ્યાનિ સત્યાનિ ચ, અચિરાદ્ યૈ ર્ભવિતવ્યં તાનિ સ્વદાસાન્ જ્ઞાપયિતું પવિત્રભવિષ્યદ્વાદિનાં પ્રભુઃ પરમેશ્વરઃ સ્વદૂતં પ્રેષિતવાન્।
VII પશ્યાહં તૂર્ણમ્ આગચ્છામિ, એતદ્ગ્રન્થસ્ય ભવિષ્યદ્વાક્યાનિ યઃ પાલયતિ સ એવ ધન્યઃ।
VIII યોહનહમ્ એતાનિ શ્રુતવાન્ દૃષ્ટવાંશ્ચાસ્મિ શ્રુત્વા દૃષ્ટ્વા ચ તદ્દર્શકદૂતસ્ય પ્રણામાર્થં તચ્ચરણયોરન્તિકે ઽપતં।
IX તતઃ સ મામ્ અવદત્ સાવધાનો ભવ મૈવં કૃરુ, ત્વયા તવ ભ્રાતૃભિ ર્ભવિષ્યદ્વાદિભિરેતદ્ગ્રન્થસ્થવાક્યપાલનકારિભિશ્ચ સહદાસો ઽહં। ત્વમ્ ઈશ્વરં પ્રણમ।
X સ પુન ર્મામ્ અવદત્, એતદ્ગ્રન્થસ્થભવિષ્યદ્વાક્યાનિ ત્વયા ન મુદ્રાઙ્કયિતવ્યાનિ યતઃ સમયો નિકટવર્ત્તી।
XI અધર્મ્માચાર ઇતઃ પરમપ્યધર્મ્મમ્ આચરતુ, અમેધ્યાચાર ઇતઃ પરમપ્યમેધ્યમ્ આચરતુ ધર્મ્માચાર ઇતઃ પરમપિ ધર્મ્મમ્ આચરતુ પવિત્રાચારશ્ચેતઃ પરમપિ પવિત્રમ્ આચરતુ।
XII પશ્યાહં તૂર્ણમ્ આગચ્છામિ, એકૈકસ્મૈ સ્વક્રિયાનુયાયિફલદાનાર્થં મદ્દાતવ્યફલં મમ સમવર્ત્તિ।
XIII અહં કઃ ક્ષશ્ચ પ્રથમઃ શેષશ્ચાદિરન્તશ્ચ।
XIV અમુતવૃક્ષસ્યાધિકારપ્રાપ્ત્યર્થં દ્વારૈ ર્નગરપ્રવેશાર્થઞ્ચ યે તસ્યાજ્ઞાઃ પાલયન્તિ ત એવ ધન્યાઃ।
XV કુક્કુરૈ ર્માયાવિભિઃ પુઙ્ગામિભિ ર્નરહન્તૃ◌ૃભિ ર્દેવાર્ચ્ચકૈઃ સર્વ્વૈરનૃતે પ્રીયમાણૈરનૃતાચારિભિશ્ચ બહિઃ સ્થાતવ્યં।
XVI મણ્ડલીષુ યુષ્મભ્યમેતેષાં સાક્ષ્યદાનાર્થં યીશુરહં સ્વદૂતં પ્રેષિતવાન્, અહમેવ દાયૂદો મૂલં વંશશ્ચ, અહં તેજોમયપ્રભાતીયતારાસ્વરૂપઃ।
XVII આત્મા કન્યા ચ કથયતઃ, ત્વયાગમ્યતાં। શ્રોતાપિ વદતુ, આગમ્યતામિતિ। યશ્ચ તૃષાર્ત્તઃ સ આગચ્છતુ યશ્ચેચ્છતિ સ વિના મૂલ્યં જીવનદાયિ જલં ગૃહ્લાતુ।
XVIII યઃ કશ્ચિદ્ એતદ્ગ્રન્થસ્થભવિષ્યદ્વાક્યાનિ શૃણોતિ તસ્મા અહં સાક્ષ્યમિદં દદામિ, કશ્ચિદ્ યદ્યપરં કિમપ્યેતેષુ યોજયતિ તર્હીશ્વરોગ્રન્થેઽસ્મિન્ લિખિતાન્ દણ્ડાન્ તસ્મિન્નેવ યોજયિષ્યતિ।
XIX યદિ ચ કશ્ચિદ્ એતદ્ગ્રન્થસ્થભવિષ્યદ્વાક્યેભ્યઃ કિમપ્યપહરતિ તર્હીશ્વરો ગ્રન્થે ઽસ્મિન્ લિખિતાત્ જીવનવૃક્ષાત્ પવિત્રનગરાચ્ચ તસ્યાંશમપહરિષ્યતિ।
XX એતત્ સાક્ષ્યં યો દદાતિ સ એવ વક્તિ સત્યમ્ અહં તૂર્ણમ્ આગચ્છામિ। તથાસ્તુ। પ્રભો યીશો◌ે, આગમ્યતાં ભવતા।
XXI અસ્માકં પ્રભો ર્યીશુખ્રીષ્ટસ્યાનુગ્રહઃ સર્વ્વેષુ યુષ્માસુ વર્ત્તતાં। આમેન્।